Bhava Prakasika

First Chapter

First Pada

१.१.१

अतसीगुच्छसच्छायमञ्चितोरःस्थलं श्रिया । अञ्जनाचलशृङ्गारमञ्जलिमर्म गाहताम् ।।

प्रारिप्सितस्य ग्रन्थस्य अविघ्नपरिसमाप्त्यर्थं प्रचयगमनार्थञ्च स्वाचार्यस्य वरदगुरोरिष्टदेवतारूपं हस्तिगिरीश्वरं भगवन्तं वरद-प्रणातार्तिहरनामभ्यां प्रख्यापितेष्टप्राप्त्यनिष्टपरिहारलक्षणपुरुषार्थदातृभावम् अत एव शरण्यं शरणमुपगच्छति वरदं द्विरदाद्रीशमिति । द्विरदाद्रीशमित्यनेन सौलभ्यमुक्तम् ;

दिङ्नागैरर्चितस्तत्र पुरा विष्णुः सनातनः । ततो हस्तिगिरिर्नाम ख्यातिरासीन्महागिरेः ।।

इति पुराणवचनेन दिङ्नागानां तिरश्चामप्यर्चनीयोऽभूत् तत्रेति प्रतीतेः । श्रीनिधिंकरुणानिधिमिति पदद्वयेन शरण्यत्वोपयुक्ते साम-र्थ्यकारुणिकत्वे अभिहिते । श्रीनिधेर्हि देयद्रव्येषु न दुर्लभं किञ्चिद्वस्त्वस्तीति नेष्टप्रापणे देयद्रव्याभावकृतमसामर्थ्यमस्ति । "अप्र- मेयं हि तत्तेजो यस्य सा जनकात्मजा' इति श्रीनिधेरप्रमेयतेजोनिधित्वेन अनिष्टनिरसनेपि तेजोविरहलक्षणमसामर्थ्यं न संभवति । हरिमित्यनेन आश्रितानां दुरितं हरतीत्यर्थसिद्धिः । *एवं परदेवतां प्रणम्य स्वाभीष्टां स्वस्य एतत्प्रबन्धनिर्माणौपयिकज्ञानशक्त्यादि-गुणप्रदायिनीं सदर्शनाख्यामपि देवतां प्रणमति बहिरिति । उपबृंहितवेदाय व्याख्यातवेदाय* । अन्तर्ज्वरम् = "बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति' इति न्यायेन विपरीतार्थप्रतिपादनसमुद्भूतं व्याकुलत्वम् । अशीशमत् शमयति स्मेत्यर्थः । शमेर्ण्यन्तात् कर्तरि लुङि चङि (च) रूपम् । यथा योगी स्वशक्तिवैभवेन परेषां ज्वरं निवर्तयति, एवमयमपि स्वशक्तिवैभवेन श्रुत्यादीनामन्तर्ज्वरं शमयति स्मेति सूच्यते । प्रपद्ये प्रणवाकारमिति । प्रणवाकारं प्रणवसदृशं रङ्गमिव च स्थितमित्यर्थः । पूर्वाधिप्रतिपादितं भाष्यस्य रङ्गप्रणवाभ्यां सादृश्यमुत्तरार्धेन उपपादयति । परस्येति ।

"अकारार्थो विष्णुर्जगदुदयरक्षाप्रळयकृत् मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम् ।

उकारोऽनन्यार्हं नियमयति सम्बन्धमनयोः त्रयीसारः त्र्यात्मा प्रणव इममर्थं समदिशत् ।।'

इत्युक्तरीत्या प्रणवस्य शेषित्वप्रकाशकत्वम् । भाष्यस्य परमशेषित्वप्रकाशकत्वं स्पष्टमेव । श्रीरङ्गस्यापि परब्रह्मशेषशायित्वप्रकाश-कत्वेन शेषित्वप्रकाशकत्वम् । यद्यपि श्रीरङ्गस्य शेषशायित्वलक्षणशेषित्वप्रकाशकत्वम्; भाष्यप्रणवयोस्तु स्वामित्वलक्षणशेषि-त्वप्रकाशकत्वमिति नैकः साधारणो धर्मः-तथापि, "सकलकलं पुरमेतत् संप्रति जातं सुधांशुबिम्बमिव' इत्यत्रेव श्लेषभित्तिका-भेदाध्यवसायमूलया भेदे अभेदः इत्येवंरूपया अतिशयोक्त्यैव साधारणधर्मैक्यलाभः । श्रुत्यन्तेष्विति *श्रवणमननयोरुमयोरपि श्रुत्यन्तादिसंबन्धाविशेषेऽपि प्राधान्यात् प्रणवे ? (श्रवणे ?) श्रुत्यन्तरस्य प्रतिपादकत्वेन प्रतिपत्तिस्थानतया, मनने भाष्यस्य च व्यपदेशः । यथा "श्रोतव्यः श्रतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः' इति । दृष्टं विशदध्यानविषयीकृतम् । न तु स्वमते ध्यानदर्शनयो-र्भेदोऽस्ति । "रङ्गधामनि यो मुक्तिकालीन (नः ?) श्रवणमननिदिध्यासनफलीभूतः सः' इत्यपि वदन्ति । अत्र श्रुत्यन्तहृदम्बु-जरङ्गधामतुल्यतया भगवदभिव्यक्तिस्थानत्वं भाष्यस्य व्यज्यते । प्रमाणञ्च प्रमेयञ्चेति । प्रमाणं वेदः प्रमेयं तत्प्रतिपाद्योऽर्थः । अथ चिकीर्षितौपयिकतया प्रकृतं व्याख्येयतात्पर्यज्ञानमाशास्ति-अविस्तृता इति । गिरः ।

दीपादिसङ्ग्रहार्थं सामान्येन ग्रहणम् । अत एव तदैककण्ठ्येन भाष्यं व्याख्यायते । अखिलं पदगतं वाक्यगतं पबन्धगतञ्च । दृढं कुतर्कानपनोद्यम् ।

एवं मङ्गलमनुष्ठाय चिकीर्षितं प्रतिजानीते श्रीरङ्गेति । प्रथमविशेषणेन स्वस्य धीविशेषः, द्वितीयेन सत्वोत्तरत्वञ्च आप्त्यर्थं प्रदर्शितम् । अचूचुदत् । श्रुतप्रकाशिकायामिति शेषः । अत्र भाष्यं मया व्या---(ख्यायत इ)ति (प्रति) ज्ञातं भवति । तत्र विन्या-सविशेषात् भगवत्कैङ्कर्यबुध्यैव स्वस्य प्रवृत्तिः; न तु पाण्डित्यख्यापनायेति व्यज्यते । अथ तत्प्रीणनार्थमपि ग्रन्थकरणम्, "बोधयन्तः परस्पर'मिति वचनानुसारेण परप्रत्यायनाथर्तयैवार्थवत् । ननु शिष्याः स्वयमेव जानन्ति, किं त्वया यत्नः क्रियते इत्याशङ्कयाऽऽह गुरुभ्य इति । सौकर्यायेति प्रकृतचोद्यपरिहारः । अथापि संप्रदायविरहाद्भ्रमसंभवे कथं परानुग्रहः स्यात् ? तत्राऽऽह गुरुभ्य इति । एवमपि शब्दरचनायामन्यथा प्रतिपादनसंभवेन भ्रमसंभव इत्यत उक्तं तत्प्रयुक्तैः इति । एवं तर्हि ते यत्नः किमर्थ इत्यत्राऽऽह सङ्क-लय्येति । वरदगुरुभिरुपन्यस्तेष्वर्थेषु यावदपेक्षितम्, तथा सङ्कलनमस्मत्कृतमित्यभिसन्धिः । अथापि कृत्स्नोपदेशाभावात् स्वग्रन्थ-स्यानुपादेयतामाशङ्कयाऽऽह क इति । इदं चोद्यं न्यायसुदर्शनादिष्वपि समानमित्यर्थः । अथापि तैः पूर्वकृतैरेवालम् । किं भवद्यत्नेन कतिपयार्थग्राहिणेति चोद्यं परिहरति श्रुतांशेति । भाष्यवित्तमैः सुदर्शन-विवरणादिभिः भाष्यार्थं प्रतिपद्यमानैरपि इयं कृतिः श्रुतप्रकाशिका नोपेक्ष्या; किन्तु उपादेया । किमर्थं ? मया आचार्यसकाशात् श्रुतानामर्थानां श्रुतप्रकाशिकया प्रतिपाद्यमानानां सुद-र्शनादिष्वनुक्तानां भाष्यार्थांशानां स्थितये । अत्र दृष्टान्तः आढ्यैरिति । "पन्त्रे तद्देवतायाञ्च', "यस्य देवे परा भक्तिः यथा देवे तथा गुरौ' इत्यादिप्रमाणानुसारेण भाष्यार्थाधिगमस्य भाष्य-तत्कर्तृतत्प्रतिपाद्यभगवत्प्रसादलभ्यत्वम्-कृत्स्नभाष्यार्थवेदितुः भाष्यकारस्य तत्प्रतिपाद्यस्य भगवतो वा, "अस्य वाक्यस्यायमर्थः' इत्येवंरूपात् वचनात् भाष्यार्थः सुबोधो भविष्यति इत्याशङ्कयाऽऽह भाष्य-ञ्चेद्व्यवृणोदित्यादिना । ननु व्यवृणोदित्यत्र "हेतुहेतुमतोर्लिङ्' इति लिङो भविष्यद्विषयत्वात् लिङ् मा भून्नाम । मा च भूत्, "लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति लृङ् । तस्यापि भविष्यद्विषयकत्वात् । "भूते च' इत्यनेन भेते काले,"लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति विधीयमानो लृङ् कस्मान्न भवतीति चेत्-अत्राहुः । सत्या अपि क्रियातिपत्तेरविवक्षितत्वाद्वा, सतोऽपि हेतु-हेतुमद्भावस्याविवक्षितत्वाद्वा लृङ् न भवति । सतोऽप्यविवक्षा दृश्यते, यथा "अनुदरा कन्ये'ति ।

केचित्तु "गाम्भीर्यादनवस्थिति' रिति गाम्भीर्यहेतुकत्वोक्तेः अनवस्थाने विवरणं न हेतुरिति वर्णयन्ति । केचित्तु-ननु स्वयमेव भाष्यकारैः भाष्यस्य व्याख्यातत्वा-त्किमिति भवता यत्नः क्रियते इति चोद्यं परिहर्तुमनुवदति भाष्यञ्चेदिति । अत्र चेच्छब्दः न यद्यर्थे, किंतु असन्दिग्धे सन्दिग्ध- वद्वचने, वेदाश्चेदितिवत् । भाष्यञ्चेदिदम्, स्वयं व्यवृणोदेव । भाष्य---भाष्यं स्वयमेव स्वव्याख्यानं भवति । तथा हि भाष्यलक्षणं कुर्वन्ति, "स्वपदानि च वर्ण्यन्ते' इति । परिहरति व्याख्यानेति । तथा; अत्र अपिरध्याहार्यः । तथापि व्याख्यानवाचां भाष्या-न्तर्गतानां गाम्भीर्यादनवस्थितिः = तात्पर्यं परिनिष्ठा न लब्धुं शक्येत्यर्थः । अथा कैरिव ? (अन्यथा कैयट ?) वार्तिकादेरनारं-भापत्तेरिति भावः । अनवस्थितिमुपपादयति मितमतिरित्यादि । नर (नारद) नारायणन्यायेन भगवानेव अर्चारूपी (?) भाष्य-परिज्ञानार्थिभिरुपसर्पणीयः इति किं युष्मत्कृत्या ? नेत्याह प्रष्टव्य इति । अर्चारूपी ईश्वरः कथं प्रष्टव्यः ? कुत इत्यत आह - स हि इति । स हि नारायणादिरूप ईश्वरः नः इदानीन्तनानामस्माकं प्रत्यक्षरूपो न । इदानीमर्चारूपेणावस्थानात् नारदादिवत् नास्मा-कमुपदेष्टेत्यर्थः-इति व्याचक्षते । तदेवं श्रीरङ्गेशाज्ञयेत्यारभ्य श्रुतप्रकाशिकारम्भप्रतिज्ञा । तस्याः भाष्यं विषयः; सङ्कलय्य तदर्थज्ञापनं प्रयोजनम्; तच्च न पूर्वव्याख्यानैरन्यथासिद्धम्; न वा भ्रमप्रमादादिदोषमिश्रम्; तदर्थिनश्चात्र अधिकारिणः इति स्वग्रन्थे प्रेक्षावत्प्र-वृत्त्यौपयिकं अनुबन्धचतुष्टयं प्रदर्शितं भवति ।

अष्टादशविद्यास्थानेषु शारीरकशास्त्रे भगवतो भाष्यकारस्य व्याचिख्यासायां निमित्तमाह सर्वेषामित्यादिना । स्वत एव भग-वत्साक्षात्कारसमर्थानां मुक्तानां वेदस्या लौकिकपुरुषार्थप्रतिपत्त्यर्थमनादरणीयत्वादाह - प्रमाणाधीनप्रमेयनिश्चयानामिति । भ्रान्तात् प्रति वेदस्यानादरणीयत्वादाह उपादित्सितेति । उपादित्सितजिहासितालौकि (तलौकि) केष्टानिष्टतत्साधनानामित्यर्थः । अलौकिकपुरुषार्थतत्साधनप्रत्यायकत्वाविशेषेण सांख्याद्यागमवैलक्षण्ये वेदस्य निमित्तमाह - तत्राप्यपुरुषेति । पूर्वभागे कुतो न व्याचिख्यासेति शङ्कामपाकरोति- तत्र चेत्यादिना । पूर्वभागे अर्वाचीनफलतत्साधनपरे अवगते इति योजना । असन्दिग्धतया-ऽवगतेत्यर्थः । पूर्वभागेऽनुपप्लुत इति यावत् । अत्र अर्वाचीनेति विशेषणेन वेदान्तभागप्रतिपाद्यार्थविप्लवे महाफलहानिवत् तदंशे

तन्नास्तीत्यपि सूचितम् । तदुज्जिजीवयिषया व्याचिख्यासितमित्यन्वयः । निष्कण्ठकीकृत्य कृतार्थयितुं भवभयाभितप्तेत्यन्वयः । तेन उज्जिजीवयिषाया, कृतार्थयितुमित्यनयोः न पौनरुक्तयमिति वदन्ति । केचित्तु उज्जिजीवयिषायाः सदसद्विवेचनचतुरपूर्वाचार्य-विरचितमित्यनेनान्वय इति उज्जिजीवयिषां पूर्वाचार्यगतामाहुः । अपरे तु उज्जीवनकृतार्थीकरणयोः द्वारद्वारिभावेन भेदमाहुः । कुपथ-प्रवृत्तिनीति । कुत्सितः पथः कुपथः । पथशब्देन समासः । न पथिन्शब्देन । तेन "कापथ्यक्षयोः' इति न भवति । पठितश्च त्रिका-ण्डशेषे "पथः पन्थाश्च मार्गः स्यात्' इति पथिन्शब्दसमानार्थः पथशब्दोऽकारान्तः ।

शङ्करादिकृतानां शारीरकव्याख्यानानामनादरणीयत्वे हेतुमाह परमर्षिप्रणीतानीति । यत्तदोर्नित्यसम्बन्धात् अत्र यानीति शेषः । यानि परमर्षिप्रणीतानि शास्त्राणि, तेषां महर्षिप्रणीतानि व्याख्यानानि सन्ति चेदित्यर्थः । व्याख्येयानीति गहनार्थत्वसूचकम् । सन्त्यपि तान्यनादृत्य व्याख्येयान्तराणि इत्यत्र व्याख्येयान्तरकथनं दृष्टान्तार्थम् । यथा व्याख्येयान्तराणां शारीरकविरुद्धानाम-प्रामाणिकत्वम्, तथा बोधायनव्याख्यानविरुद्धानां शङ्करादिकृतव्याख्यानानामप्रामाणिकत्वमित्यर्थः । यद्वा तेषाञ्च महर्षिप्रणी-तानीत्यत्र चशब्दो भिन्नक्रमः । परमर्षिप्रणीतानि व्याख्येयानि, तेषां महर्षिप्रणीतानि व्याख्यानानि च सन्ति चेत्, तान्येव व्या-ख्येयानि, व्याख्यानानि च अनुरोद्धव्यानीत्यर्थः । बाधकानुपलम्भादिति । "सर्वत्र प्रसिद्धोपदेशा'दित्यत्र व्याख्यानान्तरवर्णनं पर-मतानुसारेण कृतम् । अनन्तरमेव वृत्तिकारोक्तार्थवर्णनात् । अतो न तद्विरोधः । पूर्वभागार्थानां शिक्षणीयत्वमिति । अरुणाधि-करणादिष्विति भावः ।

अखिलेतिश्लोकार्थविचारः

इष्टदेवतोपासनरूपं मङ्गलमिति । उपासनाशीरूपं भङ्गलमित्यर्थः । अत एव वक्ष्यति, "वस्तुनिर्देशः, भवत्वित्याशीर्वादश्च कृतौ भवतः' इति । केचित्तु भक्तिप्रार्थनमपि भक्तिरूपमिति मन्यन्ते । यद्वा उपासनस्य स्वतोऽनुकूलत्वमवगम्य तत् प्रार्थयमानेन तस्या-प्यनुष्ठितत्वसम्भवादेवमुक्तमिति द्रष्टव्यम् । मङ्गलाचारयुक्तानामिति । न च इदं वचनं जपहोमादितुल्यतया आदर्शदर्शनादिमङ्गला-चारस्य विनिपातनिवृत्तिहेतुत्वावगमकम्; न त्वारम्भकाले मङ्गलकर्तव्यतायां प्रमाणम् । अत एव मङ्गलानुष्ठाने आचारमेव प्रमा-णयन्ति इति वाच्यम्-समाप्तिप्रतिबन्धकविघ्नस्यापि विनिपातशब्दार्थत्वेन मङ्गलाचरणस्य विघ्ननिवारकत्वावगमकत्वेन प्रामाण्य-सम्भवात् । यथा चोदनासूत्रे इति * । "चोदनालक्षणोऽर्थो धर्मः' (पू.मी १-१-२) इति सूत्रे यश्चोदनालक्षणः स धर्म इति धर्म-स्वरूपे कथिते, यथा चोदनैव प्रमाणमिति अर्थादुक्तं भवति-तथेत्यर्थः । प्रह्वीभावावगमात् प्रणतिरपि फलितेति । प्रणतिरप्यनुष्ठिता भवतीत्यर्थः । ननु विनतेत्युक्तिमात्रेण कथं प्रणतिरनुष्ठितेत्यवसीयते । तथासति, उपासकानां भगवान् मोक्षप्रदः इत्युक्तिमात्रेण तद्वाक्यप्रयोक्तृणां सर्वेषामपि अनुष्ठितोपासनकत्वप्रसङ्गेन मोक्षप्रसङ्गः इति चेन्न-अतिसुकरस्य प्रणामस्य रक्षादीक्षारूपेष्टसाधन-त्वमवगम्य तत् अन्येषामप्युपदिशता भाष्यकृता साप्यनुष्ठितेत्युक्ते विरोधाऽभावात् । णमु प्रह्वत्वे इति हि धातुरिति । ननु भक्ति-विनतशब्दयोः प्रह्वोभावावगमकत्वमुपन्यस्य भक्तिशब्दस्य प्रह्वीभावाऽवगमकत्वोपपादकानुपन्यासेन नमेः

तदुपन्यासोऽसंगतः । नच भक्तिशब्दे प्रह्वीभावावगमकत्वस्योपपादकनिरपेक्षतया तदनुपन्यास इति वक्तुं शक्यम् । प्रत्युत भक्तिशब्दस्यैव प्रह्वोभावार्थकत्वस्य अप्रसिद्धत्वेन तदुपपादकसापेक्षतया तदुपन्यास एव (हि) युक्त इति चेत्- मैवम्-भक्ति-विनतशब्दयोरैकार्थ्यमवश्यं वक्तव्यम् । इतरथा रक्षाहेतुत्वं विनतेरुपन्यस्य तदतिरिक्तायाः भक्तेः पार्थने किं केन सङ्गत स्यात् । अतो भक्तिविनतशब्दयोरैकार्थ्यात् प्रक्रमस्थविनतशब्दस्य, "णमु प्रह्वत्वे' इति स्मृत्यनुसारेण अर्थे कथिते भाक्तशब्दस्याप्यर्थः कथितः । यथा,

"विदितः स हि धर्मज्ञः शरणागतवत्सलः ।तेन मैत्री भवतु ते यदि जीवितुमिच्छसि ।।' (श्रीमद्रामा-)

इत्यत्र मैत्र्याः शरणागतिरूपत्वसिद्धिः इति मत्वा, "णमु प्रह्वत्वे इति हि धातुरित्युक्तम् । न च नमेः प्रह्वीभावार्थकत्वे विनतशब्दस्य न्यासोपासनाख्यविद्याविशेषनिष्ठपरत्वं न स्यादिति वाच्यम्-उपसर्गवशेन ज्ञानविशेषविशिष्टप्रह्वीभाववाचकत्वसम्भवेन विद्याविशे-षवाचित्वसम्भवात् ।

विषयविषयिरूपेति । विषयो ब्रह्म; उपासनफले विषयिणी । न च उपासनस्य तृतीयाध्यायप्रतिपाद्यस्य विषयित्वेऽपि कथं फलस्य चतुर्थाध्यायप्रतिपाद्यस्य विषयित्वमिति वाच्यम्-फलभूतायाः मुक्तेरपि भगवदनुभवरूपतया विषयित्वेन क्रोडीकारसंभवेनादोषात् । भवतीति भुवनमिति । यद्यपि भुवनशब्दः, "भू सू धू भृस् जिभ्यश्छन्दसि' इति छन्दसि क्युन्नन्तो व्युत्पादितः । तथापि "वा भुवन' मित्यत्र "बहुलस्मरणात् भाषाविषयत्वमप्यस्ती'ति वैयाकरणोक्तेरदोषः । रूढिशक्तया कुलालादिव्यावृत्तिरिति । यद्यपि योगो -ऽतिप्रसक्तः -तथापि रूढ्या तन्निरास इति भावः । यद्यपि रूढ्यनभ्युपगमेऽपि अखिलशब्देनैव कुलालादिव्यावृत्तिसिद्धिः; तस्याखिलकार्यहेतुत्वाभावात् । किञ्च लीलापदेनापि व्यावृत्तिसिद्धि । प्रयोज्यरूपघटगतजन्मादिव्यापारस्य कुलाललीलात्वा- भावात् -तथापि इतरपदनिरपेक्षस्यापि केवल भुवनशब्दस्य कुलालादिव्यावर्तकत्वसिद्धिरित्यभिप्रेत्य तथोक्तमिति द्रष्टव्यम् । अण्डजातानीति । अण्डान्तर्वर्तीनि भुवनानि विक्षितानीत्यर्थः; न त्वण्डसमूहाः इति । भुवनशब्दस्याण्डवाचित्वाप्रसिद्धेः । किञ्च ब्रह्मणोऽण्डोत्पादकत्वगन्धाभावेन तद्व्यावृत्यर्थं साकल्यस्याप्यविवक्षणीयत्वापातात् । केचित्तु अण्डजातानि अण्डसमूहा अपीत्यर्थः । तेषामपि विपुलतरकार्यविशेषरूपत्वेन भुवनशब्दवाच्यत्वसम्भवात् । न चैवं ब्रह्मणोऽण्डानुत्पादकत्वेन तत एव तद्व्यावृत्तिसिद्धि- रिति वाच्यम् - अखिलपदाभावे भूलोकादिलक्षणयत्किञ्चिद्भुवनजनकत्वस्य चतुर्मुखादावपि सम्भवेन तद्व्यावृत्त्यर्थत्वेन अखिल-पदस्यार्थवत्त्वात् । निषेध्यवशात् शुभत्वाशुभत्वे इति । ननु यद्यत्र भुवनवैकल्यस्य निषेध्यस्याशुभत्वात् तन्निषेधस्य शुभत्वम्, तर्हि अखिलहेयप्रत्यनीकेत्यत्र अखिलशब्दस्य भगवच्छरणागतिवाक्योपक्रमगतस्य हेयवैकल्यनिषेधवाचिनः शुभत्वं न स्यात्, निषेध्यस्य हेयवैकल्यस्य शुभत्वादिति चेन्न-तत्रापि अखिलहेयप्रत्यनीकेत्यत्र निवर्तकवाचिप्रत्यनीकशब्देन निवृत्तिक्रियाव्यापाराविषयत्वं हेयगतं हि निषिध्यते; हेयगतं च निवृत्तिक्रियाव्यापाराविषयत्वमशुभमेवेति तन्निषेधस्यापि शुभत्वात् । चिदचिद्भेदोऽप्यभिप्रेत इति । अखिलशब्दस्य सर्वशब्दपर्यायतया सर्वत्वस्य बुहुष्वेव वृत्तेः, "पृथक्तवनिवेशात् संख्यया कर्मभेदः स्यात्' (पूर्वमी-२-२-२१) इति न्यायेन बहुत्वस्य भेदगर्भतया भुवनानां भेदः सिद्धो भवति । भुवनशब्दश्चिदचित्संवलनात्मकविपुलतरकार्यविशेषवाचीति चिद-चिद्भेदश्च सिद्धो भवति । न च सर्वशब्दस्य बहुत्वसापेक्षत्वमसंप्रतिपन्नमिति वाच्यम्; "विश्वजित् सर्वपृष्ठः' इत्यत्र सर्वपृष्ठशब्दस्य चोदकप्राप्तज्यौतिष्टोमिकपृष्ठानुवादित्वं न संभवति, ज्योतिष्टोमे द्वयोरेव पृष्ठयोः सत्त्वेन तत्र बहुत्वसापेक्षस्य सर्वशब्दस्याप्रवृत्तेः; अपितु षाडहिकानां बृहद्रथन्तरवैरूपवैराजशाक्वररैवतानां विधिरिति सप्तमे (पू.मी. ७-३-३) स्थितत्वात् । स्थेमा स्थितिरिति । न स्चिर-त्वमित्यर्थः । अयमाशयः-यद्यपि स्थिरशब्दात् इमनिच् न संभवति, पृथ्वादिष्वस्य पाठाभावात्; अत एवोक्तं वृत्तौ प्रियस्थिरेति सूत्रे, "स्थिरशब्दस्य पृथ्वाद्यपाठादिमनिच् नोदाह्नियते' इति-तथापि तिष्ठतेरौणादिक इमनिच्प्रत्ययो बहुलवचनात् अनिमवेमादिवद् द्रष्टव्यः । प्रसिद्धश्चायं शब्दः शिष्टप्रयोगेषु, "द्राघीयांसः संहताः स्थेमभाजः' इत्यादिषु । निखिलजगदुदयविभवविलयेत्यत्र विभव-पदेन

स्थितिरुच्यते । ननु मोक्षस्य पृथङ्निर्देशं सिद्धवत्कृत्य खलु तस्य भङ्गादिशब्दार्थयोरनन्तर्भाव उक्तः; स न युक्तः, पृथक्की-र्तनस्यास्मिन् श्लोके अदर्शनात्, रक्षापदस्य स्वर्गादिफलप्रदत्वप्रतिपादकत्वादित्याशङ्कय रक्षापदस्य (पृथक्) स्वर्गादिफलप्रदत्व-प्रतिपादनानौचित्यं दर्शयति-विनतेत्यादिपेनेति । अध्यासपरिणामपक्षयोरिति । अध्यासपक्षः शांकरः, परिणामपक्षो यादव-भास्करीय इति द्रष्टव्यम् । तस्यार्थत्वाभावेनेति । अभेदे अन्तःप्रवेशाद्यसिद्धेः स्वमत एवान्तः प्रवेशनियमनश्रुतिस्वारस्यसंभवात् स्वमते अध्यासपरिणामपक्षवैलक्षण्यसिध्द्यर्थमन्तः- प्रवेशनियमनसंभवस्य पृथग्वक्तव्यत्वादित्यर्थः । विस्तरेणोक्तस्येति । "जगदुद्भव-स्थितिसंहारान्तःप्रवेशनियमनादिलीलम्' इति ग्रन्थकृतैवान्यत्र विस्तरेणोक्तस्य, आदिपदेन संक्षेपेणोक्तौ विवक्षितत्वोपपत्तेरित्यर्थः । प्रयोजकव्यापारो हि लीलेति । ननु स्वतन्त्रकर्तृप्रयोजकराजव्यापाररूपप्रेषणादेः लीलात्वादर्शनात् बाललीलाप्रयोजकतत्पितृ-व्यापारभूतप्रार्थनादेर्लीलात्वाभावाच्च प्रत्युत प्रयोज्यभूतबालव्यापारस्यैव लीलात्वदर्शनाच्च कथमेतदिति चेत्-न; तद्व्यापारस्तस्य लीला, नान्यव्यापारः इत्यत्र तात्पर्यात् । न चैवं नटविटविदूषकादिव्यापारस्य परिहासादेः राजलीलात्वं न स्यादिति वाच्यम्; इष्टापत्तेः । तत्र लीलारसनिष्पादकत्वेन लीलापदस्य औपचारिकत्वात् । न च, "लोकवत्तु लीलाकैवल्यम्' इति सूत्रे भगवता भाष्यकृता जगज्जन्मस्थितिध्वंसादेर्लीलैव प्रयोजनमिति जन्मादेर्लीलाप्रयोजनकत्वोक्तया लीलात्वाभावस्य सूचितत्वात् इह जन्मादिषु प्रयुज्यमानो लीलाशब्द औपचारिक एव स्यादिति वाच्यम्-परिपूर्णानन्यप्रेयस्त्वच्छन्दपुरुषकार्यचेष्टाविशेषे लीलाशब्दस्य प्रचुरप्रयोगसत्त्वेन जन्म-स्थित्यादेरपि मुख्यलीलात्वस्य सिद्धान्त्यभिमतत्वात्; "लोकवत्तु लीलाकैवल्यम्' इति सूत्रभाष्यस्यापि जगज्जन्मादेर्लीलात्वपरतया व्याख्यास्यमानत्वाच्च । भङ्गस्य लीलात्वे युक्तेऽपीति । न च भङ्गस्य नाशरूपत्वात् नाशस्य च जन्मस्थित्यादिवत् प्रयोज्यगतत्वा-विशेषात् कथमर्धवैशसेन भङ्गस्य लीलात्वाभ्युपगम इति वाच्यम्; घटो विनश्यतीतिवत् घटो भनक्तीति प्रयोगाभावेन तयोर्भिन्नत्वात् । अत एव घटो जायते, घठस्तिष्ठतीतिवत् घटो भनक्तीति प्रयोगाभावः । तथाच घटकर्तृकव्यापारौ जन्मस्थिती, भङ्गस्तु न तद्व्यापार इति विवेकः । लीलात्वकथनेनोपादानत्वं फलितमिति । जगज्जन्मस्थित्योः परमात्मलीलात्वकथनेन परमात्मसमवेतव्यापारत्वोक्तया परमात्मन एव भाव्यवस्थावत्त्वेन उपादानत्वलाभादिति भावः ।

ननु भूतशब्दस्य लब्धसत्ताकार्थकत्वे लब्धसत्ताकानां तेषां परमात्मसाध्या रक्षा कीदृशीत्याशङ्कयाह-लब्धस्वरूपाणां चेति । ननु

लब्धस्वरूपाणां स्वरूपाप्रच्युतेर्भगवद्भरत्ववत् अलब्धस्वरूपाणां स्वरूपलाभरूपरक्षाया अपि भगवद्भरत्वात् कथं "लब्धस्वरूपाणां रक्षैकदीक्ष' इति पृथक्कृत्योयत इति चेत्, आनुकूल्यावस्थायां तद्रक्षाया निमित्तान्तरनैरपेक्ष्येण तत्र विशिष्योक्तयुपपत्तेः । षष्ठयाः संमन्धमात्रविषयत्वादिति । ननु यद्यपि संबन्धवाचिनी षष्ठी, तथापि यस्य विशेषस्याभिव्यञ्जकमस्ति, तत्रैव पर्यवस्यति; यथा देवदत्तस्येत्यभेदेन प्रवृत्ता षष्ठी पुत्रः, पाणिः, कम्बल इति प्रतिसंबन्धिवशेन पितृत्वावयवित्वस्वामित्वरूपविशेषेषु पर्यवस्यति; न हि देवदत्तस्य पुत्र इत्युक्ते देवदत्तस्वामिकमन्यपितृकं पुत्रं प्रतियन्ति । ततश्च भूतव्रात इत्युक्ते भूतव्रातयोरेव समुदायसमुदायिभावलक्षणः संबन्धः प्रतीयते । ततश्च भूताभूतव्राते भूतव्रातशब्दस्य, सापेक्षमसमर्थमिति न्यायेन अग्नीषोमीये आग्नेयशब्दवदसामर्थ्यादप्रवृत्तिः, अथवा छत्रिन्यायेन लक्षणा वा समाश्रयणीया स्यात् । राजपरिषदित्यादौ तु परिषत्सेनादिशब्दानां समुदायिविशेषविशिष्टसमुदाय-वाचिनां नैकान्ततः समुदाय्यपेक्षा; यथा वनघटादिशब्दानां तरुगजादिसमूहवाचिनामन्तर्भावितसमुदायिकतया न समुदाय्यपेक्षा, यथा वा पुत्रीयतिजीवतीत्यादीनामन्तर्भावितेषिधारणकर्मकाणां न कर्मापेक्षा । ततश्च परिषदादिशब्देषु स्वाम्याकाङ्क्षामात्रम्, "किंस्वामिका परिषत्' इति । ततश्च राजपरिषदित्यत्र राज्ञः स्वामित्वेनान्वयः, राजस्वामिका परिषदिति । ततश्च तत्राप्यराज्ञां स्वामित्वमेव वार्यते । न च परिषच्छब्दतुल्य एवायं व्रातशब्दः, न समूहादिशब्दवदिति वाच्यम्-तर्हि तथैव वक्तव्यत्वेन संबन्ध- मात्रस्य षष्ठयर्थत्वप्रसाधनवैफल्यादिति चेत्-सत्यम्;

समूहशब्दपर्याय एवायं व्रातशब्दः, "समूहनिकरव्रात' इति कोशपाठात्-तथापि तस्यानर्थक्यप्रसङ्गात् विवक्षितविशेषसिद्धिरित्यत्र तात्पर्यात् । इतरथा विनतविविधभूतेत्यनेनैव विवक्षितार्थसिद्धौ व्रातपदेनाति-रिक्तार्थालाभात् व्रातशब्दवैयर्थ्यप्रसङ्गात् । अत एव वक्ष्यति- "एवं च व्रातशब्द (पद) प्रयोगस्यार्थवत्त्वं स्यात्' इति । ब्रह्मजिज्ञासेति सूत्रे संबन्धसामान्यषष्ठीपरिग्रहे ब्रह्मसंबन्धिनामपि जिज्ञास्यत्वं सिध्यतीति सर्वैरपि भाष्यकृद्भिर्व्यवहृतत्वाच्च । अत्र व्रातशब्दस्य "पशुर्मनुष्यः पक्षी वा'

इत्यादिप्रमाणानुसारेणानियतवृत्त्युत्सेधजीविवाचित्वं केचिन्मन्यन्ते; उक्तं च काशिकायां वृत्तौ "व्रातच्फञोर-स्त्रियाम्' इत्यत्र "व्राता अनियतवृत्तय उत्सेधजीविनः' इति; उत्सेधजीविनः=शरीरप्रयासजीविन इत्यर्थः । "काममात्मानम्' इत्यादि-स्मृतेर्भगवदाज्ञारूपायाः संसारिचेतनमात्रविषयत्वात् कथमनया स्मृत्या भगवतोऽपि संश्रितरक्षणानुष्ठानस्याभिमतत्वसिद्धिरित्यत आह - ईदृशीति ।

परत्वसौलभ्ये च संश्रयणीयतानिमित्ततयेति । ननु अखिलेत्यादिप्रथमपादप्रतिपाद्यस्य जगत्कारणत्वस्य परत्वपर्यवदितत्वेऽपि विनतविविधेति द्वितीयपादप्रतिपाद्यस्य मोक्षप्रदत्वस्य कथं सौलभ्यपर्यवसितत्वम् ? न हि पुरुषार्थप्रदत्वमात्रेण सौलभ्यं सिध्यति; तथा सति कल्पवृक्षकनकाचलादेरपि सौलभ्यपसङ्ग इति चेत्-मैवम्; दातृत्वस्यापि सौलभ्यपर्यवसितत्वात् । उक्तं हि अभिगम्यत्व-मोक्षप्रदत्वलक्षणं सौलभ्यमिति । वक्ष्यति न ग्रन्थकारः, "अन्तस्तद्धर्मोपदेशात्' इत्यत्र (कारुण्यसौशील्यादीत्यत्र)"कारुण्यसैशी-ळ्यवात्सल्यौदार्याणि सौलभ्योपयुक्तानि' इति । ततश्च नानुपपत्तिः । य एनं विदुरमृतास्ते भवन्ति इति । मोक्षप्रदत्वलक्षणं सौलभ्य-मित्यर्थः । सं बाहुभ्यां नमतीत्यादि । पतत्रैः=कर्मभिः द्यावापृथिवीसंजनयन् परमात्मा स्वाश्रितविषये बाहुभ्यां संनमति सम्यक् प्रह्वीभवति; "प्रह्वीभवति नीचे हि परो नैच्यं विलोकयन्' इत्यादिस्मृतेरित्यर्थः ।

विदीप्त इत्यत्र दीप्तिमात्रव्यावर्तकत्वस्य स्वरसतः प्रतीयमानत्वात् पूर्वभागप्रतिपाद्यत्वरूपविशेषणविशिष्टतया दीप्तमित्यस्यार्थस्य स्वरसतोऽप्रतीतेराह - यद्वा क्षुद्रसुखेति । केचित्तु द्वितीयपक्षे दीप्तिविदीप्त्योर्भिन्नविषयतया अस्वारस्यं मन्यमानाः प्रथममेव पक्षं रोचयन्ते । ते च तद्वाक्यमेवं योजयन्ति - अग्न्यादिरूपतया पूर्वभागेऽपि ब्रह्मणः प्रतिपाद्यत्वमस्त्येव; "तदेवाग्निस्तद्वायुः' इति उप-निषद्वाक्येन तथैव ज्ञायमानत्वात् । वेदान्तभागे तु विशेषेण दीप्तमिति । विशेषेण=अद्वारकतयेत्यर्थः । व्युत्पत्तिलक्षणसौष्ठवाभाव इति । व्युत्पत्तिसमर्थनं प्रथमाधिकरणे; लक्षणसौष्ठवसमर्थनं जन्माद्यधिकरणे । रूढिशक्तयेति । श्रीनिवासशब्दस्य नारायणे रूढत्वात् श्रीनिवासे ब्रह्मणीत्यनेन नारायणस्यैव ब्रह्मत्वाविष्करणादिति भावः । ब्रह्मणस्तदुत्तीर्णत्वं चेति । भेदाभेदवादिपक्ष इत्यर्थः । वक्ष्यति हि श्रीनिवासशब्दं प्रस्तुत्य- "अनेनैवैश्वरोत्तीर्णब्रह्मवादिनो भेदाभेदवादिनो व्युदस्ताः' इति ।

परस्मिन्नित्यनेन "ब्रह्मविदाप्नोति परम्' इति श्रुतिगतपरशब्दार्थसूचनमुखेन, "परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः' इत्यधिकरणार्थस्य प्राप्यान्तरव्युदासस्य, परशब्द-प्रत्यभिज्ञया, "न स्थानतोऽपि परस्य' इत्यधिकरणार्थस्य उभयलिङ्गत्वस्य वा स्मरणं संभवतीत्यभिप्रयन्नाह - परस्मिन्नित्यादि । वस्तुतोऽर्थद्वयसूचनमपि संभवतीति ध्येयम् । अविशेषेण भक्तिरूपेत्युक्तत्वादिति । न च "अत्रापि, "छागो वा मन्त्रवर्णात्' इति न्यायोऽभिप्रेतः' इति पूर्ववाक्येन च, "शेमुषी भक्तिरूपेति भक्तिरूपज्ञानस्योपायत्वं प्रागुक्तम्; कथमिदानीं प्रीतिरूपध्रुवानुस्मृते-रुपायत्वं प्रातिपाद्यत इत्यत्राह - एवंरूपेति; एवंरूपा साक्षात्कारप्रीतिरूपत्वपर्यन्ता ध्रुवानुस्मृतिरेव भक्तिशब्दवाच्येत्यर्थः' इति लघुसिद्धान्तग्रन्थेन च विरोधः शङ्कनीयः; एतस्य मतान्तरत्वेनादोषात् । रक्षैकदीक्षे परस्मिन्नित्यन्तैरिति । अत्र रक्षैकदीक्ष इत्य- स्मात् परम् "इति' शब्दोऽध्याहर्तव्यः; ततश्चेत्थं योजना - परस्मिन्नित्यन्तैः प्रतिपादित उपेयभूत एव रक्षैकदीक्ष इति सिद्धोपाय उक्त इति । ततश्च रक्षैकदीक्ष इति पदोपादानवैयर्थ्यं न चोदनीयमिति द्रष्टव्यम् ।

भाट्टप्राभाकरा व्यावर्तिता इति । भुवनशब्दस्य विपुलतरकार्यविशेषवाचितया तत्सर्गस्य, "न कदाचिदनीदृशं जगत्' इति वदद्भिरनभ्युपगतत्वादिति भावः ।

(पाराशर्येत्यादिश्लोकार्थ विचारः)

अथ द्वितीयेन श्लोकेन स्वप्रबन्धस्यावान्तरविषय इति । पाराशर्यवचोरूपसूत्रसमुदाय इत्यर्थः । इत्यादिभिराचार्योपसत्तेरिति आदिशब्देन, "विष्णोः कटाक्षमद्वेष आभिमुख्यं च सात्त्विकैः । संभाषणं षडेतानि ह्याचार्यप्राप्तिहेतवः ।' इत्यादिर्विवक्षितः । भग-वत्कटाक्षहेतुकत्वावगमादिति । उपदेशकटाक्षादिभिर्भगवत आचार्यलम्भकत्वेन प्राथमिकोपकारकत्वावगमादित्यर्थः । ततश्च "तद्विद्धि' इत्यादीनां भगवत्कटाक्षहेतुकत्वावगमकत्वं नास्तीति चोद्यस्य नावकाशः । यस्य देवे परा भक्तिरिति । भक्तिर्हि उप-कारकत्वकृतः स्नेहविशेषः । तत्र भगवद्भक्तेरुपमानकोटौ तिवेशादाधिक्यं व्यज्यते । तदाधिक्यं च उपकारकत्वाधिक्याधीनम् । अतः भगवतः आचार्यापेक्षयोपकाराधिक्यलाभ इति भावः । पाराशर्यशब्देन जन्मोत्कर्ष इति । ननु गोत्राधिकारे, "गर्गादिभ्यो यञ्' इति यञो विधानादनन्तरापत्ये कथं यञ्प्रत्ययः ? उच्यते-गोत्रत्वोपचारात् "जामदग्न्यो रामः' इतिवत् । ननु शारीरकसूत्रकारो बादरायण इति हि प्रसिद्धिः; कथं तत् पाराशर्यस्योच्यत इत्याशङ्कयाह - तस्यैव बादरायण-संज्ञत्वं च विवक्षितमिति ।

वचःशब्दस्यार्थे तात्पर्यमिति । यद्यपि वचस एव सुधात्वं सुनिरूपितम् । तथाहि-उपनिषत्पर्यालोचननिष्पन्नत्वलक्षणमुपनिषद्दुग्धा-ब्धिमध्योद्धृतत्वमर्थस्येव शब्दस्यापि सुवचम् । संसाराग्निविदीपनव्यपगतप्राणात्मसंजीवनत्वमपि तादृशज्ञानविषयतयार्थस्येव शब्दस्यापि तादृशसंजीवनज्ञानजनकत्वेन सुवचम् । पूर्वाचार्य सुरक्षितत्वमपि अर्थस्य अन्यथाप्रतीतिलक्षण पीडापरिहारमुखेन शब्दस्यापि सुवचम् । दूरस्थितत्वानीतत्वे अप्यनभिव्यक्ताभिव्यक्तार्थकत्वरूपे शब्देऽपि संभवतः । उपक्रमगतवचस्सुधात्वानुसारेणोपसंहारगतं चास्वारस्यं सोढव्यम्-तथापि रक्षितत्वानीतत्वादिकमर्थद्वारा शब्द इत्यौपसंहारिकबह्व-स्वारस्यापेक्षया भूयोनुग्रहन्यायेनोपक्रमगतवचश्शब्दस्यैकस्यैवार्थलक्षकत्वं न्याय्यमिति भावः । वेदादिशब्दनामिति । ननु "वेदवित्' इत्यादौ विच्छब्दस्यैवार्थतो ज्ञानपरत्वमाश्रित्य वेदशब्दस्यार्थपरत्वाभावोऽपि वक्तुं सुशकः; यथा, "यः सर्वज्ञः सर्ववित्' इत्यत्र सर्वं प्रकारतो वेतीत्यर्थाश्रयणम्; न हि तत्र सर्वपदस्य लक्षणा-तथा "वेदं वेत्ति' इत्युक्ते वेत्तीति शब्दात् न वेदस्य स्वरूपेण ज्ञानमात्रं प्रतीयते, अपितु तत्तदर्थविशेषप्रतिपादकत्वप्रकारेणापि वेत्तीति ह्यर्थः प्रतीयते । अत एव "तदधीते तद्वेद' इति सूत्रे, "यस्तु सामपाठं पठति नासौ वेदेत्युच्यते' इति, "अर्थाभिज्ञ एव वेदेत्युच्यते' इति चोक्तं महाभाष्य इति चेत्-न; "सोऽहं भगवो मन्त्रविदेवास्मि, नात्मवित्' इत्यादौ विच्छब्दस्यार्थप्रतीतिपरत्वाभावेन विच्छब्दादर्थप्रतीत्यदर्शनात् । किंच यदि (द्यत्र) "वेदवित्' इत्यादावसंप्रति-पत्तिः, तदा "नोदाहरणमादर्तव्यम्' इति न्यायेन "मन्त्रसाक्षात्कारवानयम्' इत्यादिकं संप्रतिपन्नमुदाहरणान्तरं भविष्यतीत्यदोषः । न ह्यत्र मन्त्रशब्दस्य मन्त्रार्थपरत्वे विप्रतिपत्तिरस्ति ।

लक्षणाभीजभूतं वचश्शब्दमुख्यार्थभूतवाक्यस्य लक्ष्यमाणार्थसंबन्धमुपपादयति - अर्थाभिधायकं हि वाक्यमिति । सुधाशब्द-लक्षणाभयाच्चेति । सुधासदृशार्थे लक्षणाया अभ्युपगन्तव्यत्वादिति भावः । ननु रूपकपक्षेऽपि वचश्शब्दस्यार्थे लक्षणा आवश्यकीति तुल्यमिति चेत्--सत्यम्; त्वन्मते सुधाशब्दे लक्षणा, वचसः सुधा वचःसुधेति वचश्शब्दस्य षष्ठयर्थलक्षणाप्यभ्युपगन्तव्या; अस्मन्मते तु वचःशब्दमात्रे लक्षणेति भावः । ननु स्वाभिमते, "उपमितं व्याघ्रादिभिः', "मयूरव्यंसकादयश्च' इति वा सूत्रानुशिष्टरूपकसमासेऽपि सुधाशब्दलक्षणाऽविशिष्टा; सुधाशब्दस्य तत्सदृशपरत्वात्; "विशेषणं विशेष्येण' इत्यनियमे प्राप्ते आरभ्यमाणस्यास्य सूत्रस्य विशेष-णविशेष्यत्वनियमार्थत्वात् (ष्यविषयत्वात्); भिन्नाथर्योर्वचःसुधाशब्दयोर्विशेषणविशेष्यभावस्य सुधाशब्दे

सदृशलक्षणामन्तरेणा-योगात्; आपादपरिसमाप्तेः,"समानाधिकरणेन' इत्यधिकाराभ्युपगमाच्च; सुधाशब्देन भोग्यत्वमभिप्रेतमिति वक्ष्यमाणत्वाच्चेति चेत्-

सत्यम्; अस्त्येव स्वपक्षेऽपि लक्षणा; तथापि सा, "उपमितं व्याघ्रादिभिः' इति सूत्रानुशिष्टा । षष्ठीसमासपक्षे तु सुधाशब्दस्यार्थे लक्षणा न शास्त्रीया; अपि त्वैच्छिकी । अत एव, "इन्द्रपीतस्य' इति भक्षमन्त्रे बहुव्रीहौ लक्षणाद्वयसद्भावेऽप्यैच्छिकलक्षणाद्वययुक्त-तत्पुरुषपरित्यागेन शास्त्रानुशिष्टलक्षणाद्वययुक्तबहुव्रीहिपक्ष एवाश्रितः । इन्द्रेण पीत इति तत्पुरुषाश्रयणे पूर्वपद एका लक्षणा; तथा पीतपदे पीतावयलक्षणा । वक्ष्यति चाचार्यः "अन्तस्तद्धर्मोपदेशात्' इत्यत्र, "हृदयपुण्डरीकमिति प्रयोगस्तु "उपमितं व्याघ्रादिभिः' इति सूत्रविहितसमासत्वात् मुख्य एव' इति ।

केचित्तु रूपकसमासे शक्यतावच्छेदकप्रकारकस्याहार्यारोपस्यैवोत्पत्तेस्तत्र मुख्यत्वमेव । अतएव अन्नमयादावात्मशब्दस्य मुख्य-त्वमिति, "अन्वयादिति चेत् स्यादवधारणात्' इत्यादौ क्रियासमभिहारेण ग्रन्थकृद्व्यवहार इति वदन्ति ।

ननु "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सामान्यधर्माप्रयोग एव समासविधानात् पूर्वाचार्यसुरक्षितत्वादेश्च सामान्यधर्मस्य प्रयुज्यमानत्वात् कथं समास इत्याशङ्कय, "पुरुषव्याघ्रोऽभिरूपः' इत्यादिषु व्याघ्रशब्दविवक्षित शूरत्वरूप सामान्यधर्माप्रयोगेण अभिरूपशब्दप्रयोगेपि समासवत् सुधाशब्दविवहितभोग्यत्वरूपधर्माप्रयोगात् समास उपपद्यत इत्यभिप्रयन्नाह - सुधाशब्देन भोग्यत्वमभिप्रेतमिति । आनन्त्यादीति आदिशब्देन गाम्भीर्याद्युच्यते । आध्यात्मिकादीति आदिशब्देनाधिदैविकाधिभौतिकयोर्ग्रहणम् ।

समिति कैवल्यव्यावृत्तिरिति । नन्वेतद्वाक्यपर्यालोचनायां कैवल्यस्यापि संसारोन्मोचनकोटावनुप्रवेश एवाचार्याणामभिमत इति प्रतीयत इति चेत्-मैवम्; समिति कैवल्यव्यावृत्तिरिति वदद्भिः कैवल्यस्य समीचीनसंसारनिवृत्तित्वाभावकथनेन संसारानुवृत्तेरेवाभ्यु-पेतत्वात् । प्राणशब्दस्य परमात्मपरत्वसमर्थनपूर्वकं परमात्मालाभे संसारस्य हेतुत्वं कथयतामाचार्याणां कैवल्ये संसाराभावस्याभि-मतत्वे,"निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायात् कैवल्ये संसाराभावेन परमात्मलाभस्यैवाभ्युपगन्तव्यत्वप्रसङ्गात् । वस्तुतस्तु व्यपगतप्राणात्मसंजीवनीमित्युक्ते व्यपगतप्राणानां संजीवनीं प्राणधारिकामित्येवार्थः प्रतीयते; जीवनशब्दस्य प्राणधारणार्थत्वात् । ततश्च यः प्राणो व्यपगत, तत्प्राणलम्भिकामित्यर्थः पर्यवस्यति । ततश्च व्यपगतपरमात्मरूपप्राणलम्भकत्वं कैवल्यस्याप्रसक्तमेव । कथं तर्हि, समिति कैवल्य व्यावृत्तिरित्युच्यत इति चेत्; इत्थम्-प्राणशब्दो जीवपरमात्मोभयपरः; भूमविद्यायां प्राणशब्दस्य जीवेऽपि प्रयोगात् । ततश्च संसाराग्निविदीपनेन व्यपगतप्राणानां जीवपरमात्मानुभवशून्यानां जीवनीमित्युक्ते कैवल्यस्यापि तदन्यतरजीवरूप-प्राणलम्भकत्वमस्तीति तद्व्यावृत्त्यर्थं समित्युपसर्गः । ततश्च व्यपगतयावत्प्राणलम्भकत्वं समित्युपसर्गसिद्धमिति ग्रन्थाभिप्रायो द्रष्टव्यः ।

निषादस्थपत्यधिकरणन्यायेन कर्मधारयमभिप्रेत्याह - बह्वयो मतय इति । एककर्तृकमतिभेदस्य परस्परव्याहत्यसंभवात् कर्तृभे-दोऽवश्यं वाच्य इत्यभिप्रायेणाह - बहूनां मतयो वेति । गायत्र्यवयवभूतैरिति । "कद्रूश्च वै सुपर्णी च' इत्यनुवाके, "तृतीयस्यामितो दिवि सोम आसीत्' इति मन्त्रे च गायत्र्या अमृताहरणस्य प्रसिद्धेरिति भावः । पिबन्त्वित्यनेन रस्यतायाः स्वरसतः प्रतीतेः अन्वह-मित्यस्य तदतिशयद्योतकत्वं युक्तमिति मत्वाऽऽह - रस्यतातिशयादिति । ग्रन्थस्य तृप्तिकरत्वप्रतिपादनस्य मन्दफलत्वादाह - यद्वा गभीरत्वादिति ।

पूर्वाचार्यशब्दोऽपीति । पूर्वाचार्यसुरक्षितामिति श्लोकस्थपूर्वाचार्यशब्दोऽपीत्यर्थः । विस्तीर्णां संचिक्षिपुरित्यनेनेति । भवदीयस्य शारीरकव्याख्यानस्य कथं सांप्रदायिकत्वम् ? मूलानुपलम्भात्; न च टङ्कद्रमिडादिभाष्यग्रन्थ एव मूलमिति वाच्यम्, तस्यापि सांप्र-दायिकत्वे प्रमाणाभावादित्याशङ्कापरिहारोऽप्यर्थात् सूच्यत इति भावः । भाष्यव्याख्याने प्रवृत्तस्य (भवतः?) भगवत आचार्यस्य भाष्यानन्तर्गतश्लोकव्याख्यानमनुचितमित्यभिप्रायेणाशङ्कते

- ननु सूत्रार्थ इत्यादिना । मङ्गलाचरणमिति; अखिलेत्यादि श्लोकद्वय-मित्यर्थः । अविघ्नपरिसमाप्त्याद्यर्थतयेति । आदिशब्देन विषयप्रयोजनाधिकारिणः कथ्यन्ते । तदन्तर्भाव्येवेति । महाभाष्ये पस्पशा-ह्निकवदिति भावः ।

प्रस्तोतव्यत्वमुच्यत इति चेदिति । यथा "त्वामस्मि (हं) वच्मि विदुषां समवायोऽत्र तिष्ठति' इत्यत्र वच्मीत्युक्तया उच्यमान-स्यार्थस्य उपदेश्यत्वमवसीयते, एवमारभ्यत इत्यर्थेन अथेत्यनेनारम्भयोग्यत्वमुच्यत इत्यर्थः स्यादिति शङ्काभिप्रायः । उपदेशार्थ-ज्ञापनपरत्वाभावादिति । प्रस्तोतव्यत्वमित्यत्र तव्यप्रत्ययस्य, "प्रैषातिसर्ग' इति सूत्रविहितप्रैषार्थककृत्यप्रत्ययत्वासंभवात्, "अर्हे कृत्यतृचश्च' इत्यर्हार्थविहितकृत्यप्रत्ययत्वं वाच्यमित्यर्थः । योग्यत्वमशाब्दमिति । ननु प्रस्तोतव्यत्वस्य वाच्यत्वमभ्युपगम्य कथं योग्यत्वस्य शाब्दत्वं प्रत्याख्यायते ? "अर्हे कृत्यतृतश्च' इत्यनुशासनेन प्रस्तावार्हत्वस्यापि प्रस्तोतव्यशब्दार्थत्वात् । न च प्रस्तोत-व्यत्वस्यापि वाच्यत्वं नाभ्युपगतमिति वाच्यम्-तदानीमपीत्यपिशब्देन तदभ्युपेत्यैव प्रवृत्तेरिति चेत्-न-तदानीमपीत्यपिशब्देन न वाच्यत्वमभ्युपेतम्, अपि तु तत्पदप्रयोज्यप्रतीतिविषयत्वमात्रं प्रस्तोतव्यत्वस्याभ्युपेतम् । ततश्च, यथा धूमे बोधिते स्वयमेवासौ वह्निमनुमास्यतीति बुद्धया प्रयुक्ते "धूमोऽस्ति' इति वाक्ये वह्नयस्तित्वं न शाब्दम्, मुख्यार्थानुपपत्त्यभावेन वह्नौ लक्षणाया धूमशब्दे (व्दस्य) अभावात्-तद्वत् प्रारम्भयोग्यत्वस्य कथंचिदथपदप्रयोज्यप्रतीतिविषयत्वे सत्यपि न शाब्दत्वमिति भावः । ननु वह्नि- तात्पर्यके "धूमोऽस्ति' इति वाक्ये वह्नयस्तित्वस्य शाब्दत्वमपि संभवत्येव, तात्पर्यस्यापि लक्षणाबीजत्वात् । "अव्भक्षः' इत्यादौ यथाश्रुतार्थप्रतिपादनमात्रेण प्रयोजनानवाप्तेस्तन्मात्रभक्षणस्य शाब्दत्वाङ्गीकारात् । नद्यां सिष्णासुं प्रति प्रयुक्ते, नद्यां ग्राहाः सन्ति'

इति वाक्ये, "तत्र मा स्नासीः' इत्यादिवाक्यार्थलक्षकत्वस्य तान्त्रिकैरभ्युपेतत्वादिति चेत् - न । आरम्भयोग्यत्वस्य व्यङ्गयार्थतया शक्तिलक्षणान्यतरमूलकत्वाभावेन शाब्दत्वाभावात्; प्रसिद्धानन्तर्यार्थप्रतिपादनमुखेन वक्ष्यमाणप्रयोजनसंभवे अप्रसिद्धमन्दप्रयो-जनकप्रारम्भार्थकत्वस्यायुक्तत्वाच्च । अथवा, अशाब्दम् अवाच्यम् अशक्यमित्यर्थः । योग्यत्वस्य कथंचिदमुख्यया वृत्त्या प्रतिपाद्य-त्वसंभवेऽपि मुख्यत्वासंभवात् मुख्यार्थग्रहणे संभवति तत्त्यागस्यानुचितत्वादिति भावः । एवमथयोग्येत्युक्ते इति । यद्यपि, "अथातो ब्रह्मजिज्ञासा योग्या' इत्यध्याहारे अथेत्यस्याधिक्रियत इत्यर्थः, ततश्च "अधिक्रियते ब्रह्मजिज्ञासा योग्या' इत्यर्थः स्यात् । योग्यत्वं च संनिधानात् अधिकार एव लभ्यते । यथा, "योग्या ब्राह्मणा आनीयन्ताम्' इत्युक्ते आनयनयोग्या इत्येव प्रतीयते । ततश्च "प्रारभ्यते योग्या ब्रह्मजिज्ञासा' इत्युक्ते प्रारम्भयोग्येति प्रतीतिः सिध्यति-तथापि अधिक्रियते योग्येति न शाब्दप्रतीतिः स्यादिति भावः । अत एव वक्ष्यति- "अधिकृतमित्यपि फलितार्थकथनम्; न वाचनिकोक्तिः' इति । चादीनां द्योतकत्वादिति । निपातानां द्योतकत्वस्य वाक्यपदीये निर्णीतत्वादिति भावः । नन्विदमानन्तर्यार्थकत्वपक्षेऽपि समानमित्याशङ्कय सप्रयोजनत्वाप्रयोजनत्वाभ्यां वैषम्यमित्याह - अत्र त्वित्यादिना । माङ्गलिकावुभाविति । प्रयोजनार्थे ठक्प्रत्यय इति भावः । यद्यपि भूवादिसूत्रे अन्वयप्रतियोग्यनुपस्थापकस्यापि वाकारस्य मङ्ग-लार्थवत् सप्रयोजनत्वं संभवति - तथाप्यन्वयप्रतियोग्युपस्थापकत्वेन वाक्यार्थान्वयित्वसंभवे गत्यभावस्वीकार्यमङ्गलमात्रप्रयोज-नकत्वस्यायुक्तत्वमिति भावः । प्रकृतादथादर्थान्तरपरत्वमित्यत्र प्रकृतादिति पञ्चमी ल्यब्लोपे । न तु "अन्यारादितर' इत्यन्यार्थे इत्याह - तद्धि प्रकृतमपेक्ष्येति । अथशब्देन वक्ष्यमाणस्य कल्पान्तरस्य प्रकृतविषयत्वं हि ज्ञाप्यते । "किं ब्रह्म सगुणमथ निर्गुणम्' इत्युक्ते प्रकृतं ब्रह्मापेक्ष्यैव निर्गुणत्वरूपकल्पान्तरमुपन्यस्त इति प्रतीयते; न तु तदतिरिक्तं जीवं जडं वापेक्ष्येति । यथा वा, "अथा-ध्यात्मम्' इत्यादि । ततश्च प्रकृतापेक्षत्वमथशब्दार्थः । अत एवोत्तरत्रापि, "न ह्यमङ्गलत्वप्रकृतानपेक्षत्वाकार्त्स्न्ैः पूर्वपक्षोत्थानम्' इति वक्ष्यति ।

हेतोः साध्याविशिष्टत्वं स्यादिति । नन्वानन्तर्यार्थत्वपक्षेऽपि न अथशब्दोपस्थापितमानन्तर्यं हेतूकर्तुं शक्यम् । न ह्यानन्तर्यात् ब्रह्मजिज्ञासा कर्तव्येति वक्तुं शक्यते-अपि तु ब्रह्मजिज्ञासाक्षिप्तः कर्मविचार एव अतश्शब्देन हेतुतया परामृश्यते ।स एवाथशब्द-निर्दिष्टानन्तर्यप्रतियोगितयाप्यन्वेतीति वाच्यम् । तद्वदिहापि ब्रह्मजिज्ञासाक्षिप्तकर्मविचार एवातःशब्देन हेतुतया परामृश्यताम्, न त्वथशब्दोपस्थापितमधिकृतत्वमिति चेत्-न; "उत्तरार्धादिशब्दानां सापेक्षार्थाभिधायिनाम् । नापेक्षणीयसंबन्धात् प्रागर्थोऽध्यव- सीयते ।' इति न्यायेनाथशब्दस्य केवलानन्तर्याप्रतिपादकत्वेन पूर्ववृत्तकर्मविचारविशिष्टानन्तर्यप्रतिपादकतया कर्मविचारस्याप्यथ-शब्दोपस्थापितत्वेनानन्तर्यार्थत्वपक्षे अथशब्दोपस्थापितस्य कर्मविचारस्य अत शब्देन हेतुतया परामर्शः संभवेत् । अधिकारार्थत्वपक्षे तु न तथेति वैषम्यादिति भावः । ननु "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्ेष्वथो अथ' इत्यानन्तर्यादिवत् मङ्गलस्यापि सहपाठात् वाच्य-त्वमेव स्यादित्यस्वरसादाह - वाच्यत्वाभ्युपगमेऽपीति । पूर्वपक्षयुक्तिप्रत्यनीकत्वाभावादिति । आनन्तयर्पक्षे तु कर्मणामल्पा-स्थिरफलत्वप्रतीतिसहितानन्नस्थिरफलापातप्रतीतिरूपाधिकारिविशेषणासंभवरूपपूर्वपक्षयुक्तौ कर्मविचारहेतुत्वोपन्यासस्य प्रत्य-नीकत्वादिति भावः । न ह्यमङ्गलत्वप्रकृतानपेक्षत्वाकार्त्स्न्ैः पूर्वपक्षोत्थानमिति । यद्यप्यमङ्गलत्वादिना पूर्वपक्षे न मङ्गलत्वादीनां हेतुतया परामर्शः संभवति । मङ्गत्वादेस्तत्पूर्वपक्षिभिरनभ्युपेतत्वात् । उभयसंप्रतिपन्नस्यैव हेतूकरणीयत्वात् तथापि क्षित्यादिषु सकर्तृकत्वसाधने सावयवत्वसाधितस्य कार्यत्वस्य प्रसाध्याङ्गकस्य हेतुत्ववत् प्रसाध्याङ्गकानां मङ्गलत्वादीनां हेतुत्वं संभवतीति भावः ।

प्रश्नवाक्यगतप्रश्नस्त्विति । नन्वथशब्दोपस्थापितत्वेन प्रश्नस्यातःशब्दपरामर्शयोग्यत्वात् कुतो नातःशब्देन परामर्श ? न च तस्यासिद्धत्वात् न हेतुतया परामर्श इति वाच्यम् । न हि हेतुतया परामशर्दशायां हेतुतया पराम्रष्टव्यस्य तादात्विकसिद्धत्वम- पेक्षितम्, "भाविनो वर्षात् फलम्' इत्यादिप्रयोगदर्शनात्, "प्रश्नेनार्थो ज्ञायते किम् ?' इति प्रश्नवाक्य एव प्रश्नस्य तृतीयया हेतुत्व-दर्शनात् । अन्यत्र (अत्रत्य) प्रश्नशब्दस्य प्रश्नसामान्यपरतया क्रियमाणप्रश्नादन्य एव प्रश्नस्तृतीयया हेतुत्वेन परामृश्यत इति वक्तुं (क्तुम) शक्यत्वादिति चेत्-न-अथकिंशब्दादौ प्रश्नस्य प्रयोक्तृधर्मत्वेन सूचने सत्यपि वाक्यार्थान्वयित्वाभावात्; "हा, हन्त' इत्यादौ विषादवत् । न तु प्रश्नादिशब्दवत् प्रश्नस्य वाच्यत्वमित्यत्र तात्पर्यात् । भवतीति पदेनेति । केचित्तु अथशब्द इत्यनेनैव स्वस्वारस्यं सूच्यत इति वदन्ति । इत्यादिसूत्रान्तरेति । "अथशब्दानुशासनम्' इत्यादौ सूत्रत्वोक्तिरौपचारिकीति द्रष्टव्यम् । अथशब्दस्यानन्तर्ये स्वारस्यं हीति । अस्मिन् प्रयोगे तदर्थकत्वस्य सापेक्षत्वेऽपि स्वारस्यमात्रस्य न सापेक्षत्वमिति भावः । यथा

गुरुभार्गवावित्यादिषु परस्परसाहचर्यात् ग्रहयोरेव प्रतीतिः; नाचार्यपरशुरामयोः । यथा च रामकृष्णाविति बलकेशवयोरेव प्रतीतिः; न तु दाशरथ्यर्जुनयोः-एवमिहापीतरेतरसाहचर्यादर्थनिर्णायकत्वेऽपि न दोष इति परिहारान्तरं द्रष्टव्यम् । इमे चाभ्युच्चययुक्ती इति । इमे अथातःशब्दस्वारस्ये । अत्रपदाभिप्रेतेति । ब्रह्मजिज्ञासापदाक्षिप्तपूर्ववृत्तसापेक्षत्वादिति भावः ।

(अथातःपदद्वयकृत्यविचारः)

ननु, "अथातःशब्दयोरन्यतरेणाल'मित्यस्य कोऽभिप्रायः ? किमेकाकारप्रतीतिजनकत्वादिति, उत "भूतले घटः', "घटवत् भूतलम्' इतिवत् प्रयोजनैक्यादिति वेति विकल्पं हृदि निधाय जिज्ञासाविशेष्यकोत्तरकालकर्तव्यताप्रकारकज्ञानजनकस्य अथ-शब्दस्य, पूर्ववृत्तविशेष्यकहेतुत्वप्रकारकज्ञानजनकस्य चातःशब्दस्य नैकाकारप्रतीतिजनकत्वमिति प्रथमपक्षं दूषयति- अथशब्द-स्यानन्तरकालमुपस्थापयत इत्यादिना । द्वितीयं दूषयति - प्रतिज्ञाहेतुरुपेणेति । न कर्तव्यतामात्रं साध्यधर्म इति । ब्रह्मजिज्ञासा विचारितकर्मभिः

पुरुषैरनुष्ठेया, कर्मणामल्पास्थिरफलत्वप्रतीतिसहितानन्तस्थिरफलप्रतीतेर्विचारितकर्मसु पुरुषेषु संभवादिति प्रदर्शनं ह्युचितम् । ततश्च विचारितकर्मत्वरूपपुरुषविशेषणप्रतिपत्त्यर्थमथशब्दोऽपेक्षितः । तस्मिंश्च सति उक्तार्थो लभ्यत इति भावः । शास्त्रान्तरश्रवणेन विना संपादयितुमशक्यत्वादिति । नित्यानित्यवस्तुविवेकादीनामिति शेषः । अथशब्दाक्षिप्तेति । अथशब्दाक्षि-प्तकर्मविचारहेतुत्वाक्षिप्तस्य विशिष्टहेतोरसिद्धि शङ्कापरिहारार्थत्वादित्यर्थः ।

(अधीतसाङ्गेतिभाष्यविषयः)

अधिगताल्पास्थिरफलकेवलकर्मज्ञानतयेति भाष्यस्यायमर्थः-अधिगतम्=प्राप्तम् अल्पास्थिरफलं केवलकर्मेति ज्ञानं यस्य सृोधिग-ताल्पास्थिरफलकेवलकमर्ज्ञानः, तत्त्वेनेति । उपनीय तु यश्शिष्यमिति । ननु श्रोत्रियोपाध्यायगुर्वादिनामविधानवत् तत्प्रकरणस्थमिदं वाक्यमुपनीयाध्यापयितुराचार्यनामविधानपरमिति ग्रन्थकृतैव वक्ष्यमाणत्वात् कथमस्य वाक्यस्य साङ्गसशिरस्कवेदाध्ययनकर्तव्यतायां प्रमाणतयोपन्यास इति चेत्-मैवम् । "कायर्कालं संज्ञापरिभाषम्' इति न्यायेनास्य वाक्यस्य, "आचायर्वान् भवेत्' इति विधिवा-क्यैकवाक्यतया तद्वाक्यैकदेशस्यास्य तदेकवाक्यतया प्रामाण्यसंभवात् । ततश्च कंचिद्गुरुमुपेत्य तस्य सकाशात् सकल्पं सरहस्यं च वेदं स्वीकुर्वीतेति हि तस्य वाक्यस्यार्थ इति भावः । गुरुमताभिप्रायेण वा बोध्यम् । गुरुमते हि, "सकल्पं सरहस्यं वेदमध्यापयेदाचार्यक-कामः' इति श्रुत्युन्नायकत्वादस्य वाक्यस्याध्यापनविधिप्रयुक्तवेदाध्ययनवत् कल्परहस्याध्ययनस्यापि सिद्धत्वोपपत्तेः । आगमोत्थेति । विचारसहकृतवाक्यजन्यमागमोत्थम् । विवेकविमोकादिजन्यं तु ध्यानादिरूपम् । कर्मविचारस्य हेतुतयोक्तत्वात् इत्यनन्तरं "सिद्धः' इति शेषः । सिद्धिप्रकारः कथमित्याशङ्कय, कारणतया कार्यतया च (अङ्ग) सिद्धिरित्याह - कर्मविचारस्येत्यादिना । आवृत्ति-विधानादिभिरिति । यदि चातुर्मास्यादीनामक्षयफलत्वम्, तदा पुनस्तदनुष्ठानवैयर्थ्यात् प्रत्यब्दं चातुर्मास्याद्यावृत्तिविधानं व्यर्थं स्यादिति भावः ।

ननु-आवृत्तिविधानस्य न कर्मणामल्पास्थिरफलत्वावगमहेतुत्वम्; "आवृत्तिरसकृदुपदेशात्' इत्यधिकरणे, "आ प्रयाणात्तत्रापि हि दृष्टम्' इत्यधिकरणे च ज्ञानस्याप्यावृत्तिप्रतिपादनेन तत्फलस्य मोक्षस्याप्यनित्यत्वप्रसङ्गात् । यद्याप्रयाणमहरहरावृत्तिविशिष्टस्यैव ज्ञानस्य मोक्षः फलम्, तदा अत्रापि तथास्तु । यदि "प्रतिवसन्तं सोमयागस्य; पञ्चाब्धपयर्न्तं वा पञ्चदशाब्दपर्यन्तं वा प्रत्यब्दं वा चातुर्मास्यानाम्' इति विहितावृत्तिवैशिष्टयेन फलजनकत्वाभ्युपगमे तत्तदावृत्तितारतम्यात् फलतारतम्यं स्यादित्युच्येत, तदा ज्ञाना-वृत्तेरप्याप्रयाणमनुवर्तनीयायाः प्रयाणकालस्याव्यवस्थितत्वात् तारतम्येन फलतारतम्यं स्यादिति तुल्यम् । न च "कमर्ण्यारम्भ-भाव्यत्वात् कृषिवत् प्रत्यारम्भं फलानि स्युः' इत्येकादशाध्यायाधिकरणे (११-१-३) कर्मणां कृषिन्यायेन प्रत्यारम्भं फलभेद-व्युत्पादनादनित्यफलत्वमिति वाच्यम्-आवृत्तिवैशिष्टयेन येषां कर्मणां फलजनकत्वम्, तदतिरिक्तविषयत्वात् तस्य । अवश्यं च तथाभ्युपगन्तव्यम् । इतरथा दाक्षायणयज्ञे फलभेदः स्यात् । न च, "फलस्य कर्मनिष्पत्तेस्तेषां लोकवत् परिमाणतो विशेषः स्यात्' इत्यर्थवादाधिकरणसूत्रे (१-२-१७) बह्वल्पाङ्गकर्मगुरुलघुभावानुसारेण फलतारतम्यस्योक्तत्वात्, "हिरण्यदा अमृतत्वं भजन्ते', "अपाम सोममृता अभूम', "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्' इत्यादिना अमृतत्वसाधनतयोक्तनां हिरण्यदानसोमया-गचातुर्मास्यानामतुल्यत्वावगत्या अल्पास्थिरफलत्वं सिध्येदिति शङ्कनीयम्-"विकल्पोऽविशिष्टफलत्वात्' इत्यधिकरणे बह्वल्प-गुणविद्यानां प्रपत्तेश्च गुरुलघुभावे सत्यप्येकरूपमुक्तिफलताया वक्ष्यमाणत्वात् तद्वदेव कर्मण्युपपत्तेः । ननु उपासनानामाप्रयाण-मावृत्तिविशिष्टतया फलसाधनत्वम्, बह्वल्पगुणकोपासनानां प्रपत्तेश्च विकल्पेन साधनत्वं च तृतीये वक्ष्यत इत्येतत् सत्यम्-तथापि

ब्रह्मविचाराम्भदशायां वक्ष्यमाणन्यायापरिज्ञानादावृत्तिविधानादिमात्रेण कर्मणामल्पास्थिरफलत्वं ज्ञायत इति चेत्-सत्यमनेन ज्ञायते । तथापि वक्ष्यमाणविरोधादावृत्तिविधानादियुक्तेराभासत्वात् तन्मूला

कर्मफलानित्यत्वबुद्धिरप्याभासीभवेत् । किंच, आर-म्भदशायामपि वक्ष्यमाणार्थानां श्रुतशास्त्रेभ्योऽवगतिसंभवात् तादृशवक्ष्यमाणन्यायावगतिमतां पुरुषाणां कर्मणामल्पास्थिरफलत्वाव-गत्यभावेन ब्रह्मविचारे प्रवृत्त्यभावप्रसङ्गात् । किंच, अवहननवत् विचारस्य दृष्टार्थत्वेन यावत्फलोदयमावर्तनीयतया पुनर्विचारा-
रम्भदशायाम् "विकल्पोऽविशिष्टफलत्वात्' इति तृतीयाध्यायसूत्र न्यायावगति संभवात् । एतेन ज्योतिष्टोमेन स्वर्गकामो यजेतेति स्वर्गार्थत्वेन विहितस्य सोमयागस्योत्तरवेद्या विकल्पितमग्न्याधारस्थण्डिल-
रूपाग्निमाश्रित्य, "श्येनचितं चिन्वीत स्वर्गकामः' इति स्वर्गार्थश्येनाकृतिरूपगुणविधानसामर्थ्येन तद्गुणयुक्तसोमयागजन्यस्वर्गात् केवलतज्जन्यस्वर्गस्य न्यूनतावश्यम्भावात् अल्पास्थिरफलत्वावगमः सिध्यतीत्यपि शङ्का परास्ता । "ए (एकै ?) कस्मै वा अन्ये यज्ञक्रतवः कामायाह्नियन्ते, सर्वेभ्यो ज्योतिष्टोमः' इति सर्वफलार्थतया विहितस्य सोमयागस्य "यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत' इति फलत्रयसाधनतया विहितस्य सौभरस्य तत्तत्फलविशेषार्थप्रयोगे, "हीषिति वृष्टिकामाय निधनं कुर्यात्, ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय' इति निधनविशेषव्यवस्थावत् स्वर्गार्थसोमयागप्रयोगे गुणविशेषव्यवस्थेत्युपपत्तेः । न च, "अपाम सोममृता अभूम', "अक्षय्यं ह वै' इत्यादिमन्त्रार्थवादवर्णितानां फलत्वाभावनियमः, सूक्तवाकमन्त्राम्नातानामायु-रादीनां रात्रिसत्रार्थवादामनातायाः प्रतिष्ठायाश्च फलत्वदर्शनात् । न च सोमयागस्य विध्युद्देशे फलश्रवणात् मन्त्रोक्तफलं न ग्राह्यमिति वाच्यम्-विध्युद्देशश्रुत एव स्वर्गे नित्यत्वरूपविशेषणस्य, "सप्तर्षीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि' इति मन्त्रेण लोकविशेषभोग्यत्वस्येव समर्पणोपपत्तेः । "दिवि ज्योतिरजरमारभेताम्' इत्यैष्टिक एव मन्त्रान्तरे पत्नीयजमानाभ्यां प्राप्यस्य फलस्य नित्यत्वोक्तेश्च । "फलवत्तां (च) दशर्यति' इति पन्यधिकरणसूत्रे (पू.मी.६-१-२१) विशिष्यास्य मन्त्रस्य फलसमर्पकतायाः प्रदर्शि-तत्वात्-इति चेत् ।

उच्यते-यत्तावदुक्तं ज्ञानस्याप्यावृत्तिश्रवणादिति । तन्न, ज्ञानस्यासाधनत्वात् ध्यानस्यैव साधनत्वात् । तस्य चावृत्तिविशिष्टत्वात् । यद्यपि "आप्रयाणात्' इत्यत्र ध्यानस्याप्यावृत्तिरुक्ता, तथापि "प्रायणान्तमोंकारमभिध्यायीत' इति प्रायणान्तमनुष्ठितस्यैव ध्यानस्य मोक्षसाधनत्वात् । कर्मणि, तादृशावृत्तिविशिष्टस्य कर्मणो मुक्तिसाधनत्वप्रतिपादकवाक्यादर्शनात् । "स खल्वेवं वर्तयन् यावदायुषम्' इत्यस्य ध्यानविषयत्वात् । कर्मसु तु पञ्चाब्दपञ्चदशाब्दाद्यावृत्तितारतम्यात् फलभेदस्यावश्यम्भावात् । न हि ध्यानादावीदृशमावृत्ति-तारतम्यमस्ति, प्रायणान्तावृत्तस्यैव साधनत्वात् । न हि प्रायणान्तावृत्तं (त्ति) साधनं कस्यचित् शीघ्रमासीदित्येतावता फललाघवं कल्पयितुमुचितम् । तथा हि सति कस्यचिद् दृढाङ्गस्य सहकारिपौष्कल्यवतः किंचित् कर्म शीघ्रं निर्वृत्तमिति तत्र फललाघवं कल्प्येत । न हि सेतुदर्शनं कस्यचित् रोग (चोर) पीडादिकमन्तरेण निष्पन्नमित्येतादृशापेक्षया फलवैषम्यं कल्प्यते । उपसंहार्यगुणाल्पभूयस्त्वा-दिकमपि न फलवैषम्यकल्पकम्; यथाकथंचिदाप्रयाणं निरन्तरकतर्व्यत्वाविशेषेणानुष्ठाने सौकर्यदौष्कर्यासंभवात् । तस्मादावृत्तितार-तम्येन फलतारतम्यस्यावश्याभ्युपेयत्वात् मुक्तौ च तदभावात् मुक्तेरन्यदेव कर्मणः फलं वाच्यम् । किंच अनेकजन्मानुष्ठितनित्यनैमि-त्तिककर्मनिर्मलीकृतान्तःकरणसंपाद्यायाः शान्त्याद्यङ्गिकाया भक्तेः सर्वतो गरीयस्त्वेन तत्साध्यमुक्तेः कर्मसाध्यत्वे गुरुतरभक्तिरूप-
साधनविधेमर्हाविश्वासानुबद्धप्रपत्तिविधेश्चाननुष्ठानलक्षणाप्रामाण्यप्रसङ्गात् न कर्मणां भक्तिप्रपत्तिसाध्यमोक्षफलकत्वमिति कर्मफला-नित्यत्वनिश्चयः कृतकर्मविचाराणां सुलभ इति आवृत्तिविधानादिभिरित्यस्य ग्रन्थस्याभिप्रायः ।

कर्मणः फलद्वारा हानायेति । फलद्वारा हानम्=फलस्यानित्यत्वज्ञानमिति यावत् । ज्ञातव्यत्वम् विचार्यत्वमित्यर्थः । कर्म-विचारस्य कर्मफलानित्यत्वज्ञानफलकत्वं कण्ठोक्तमित्यर्थः । स्वरूपेणोपादानायेति ।

तृतीयाध्यायकरिष्यमाणविचारापेक्षित-कर्मस्वरूपपरिज्ञानायेत्यर्थः । एतेन-कर्मविचारस्य ब्रह्मविचारोपयोगदशायां कर्मज्ञानस्य हानोपादानोपयोगसमर्थनमसंगतम् । न हि हानोपादानयोर्विचारोपयोगोऽस्ति, येन तद्द्वारा कर्मविचारो ब्रह्मविचारोपयुक्तः स्यात् । उपादेयस्य नित्यनैमित्तिककर्मणो ध्या-नाङ्गत्वेन विचाराङ्गत्वाभावात् । न च विचारे प्रवर्तमानस्यापि चित्तशुद्धयर्थं कर्मानुष्ठानमपेक्षितम्, काम्यानां च कर्मणां त्यागो-ऽपेक्षित इति वाच्यम् । तर्हि कर्मविचारानन्तरं किंचित्कालं कर्मानुष्ठाय विशुद्धचित्तो विचारे प्रवर्तत इत्यव्यवधानेन प्रवृत्तिर्न स्यात्- इति शङ्का परास्ता । हानोपादानशब्दयोरनित्यत्वनित्यत्वद्वारा हेयत्वोपादेयत्वज्ञापनपरत्वात् । अत एव हि वक्ष्यति - स्वरूपेणो-पादेयत्वप्रतीते-(ति ?) रनन्तस्थिरफलापातप्रतीत्यन्तर्भावादिति (भूतेति?) । ननु कर्मविचारात् कमर्णामल्पास्थिरफलत्वनि-श्चयसद्भावेऽपि न हेयत्वनिश्चयः । उत्तरभागे अनन्तस्थिरफलनिश्चयाभावेन सर्वत्राप्यल्पास्थिरफलत्वसंभावनावतः पूर्वभागप्रतिपन्ने कर्मणि हेयत्वनिश्चयानिष्पत्तेरिति चेत्-न; उत्कटकोटिकहेयत्वज्ञाननिेष्पत्तिसंभवेनादोषात् । ग्रन्थाविरोध इति । "अपेक्षितकर्म-स्वरूपज्ञ न केवलकर्मणामल्पास्थिरफलत्वज्ञानं च' इति प्रयोजनद्वयसूचकग्रन्थेन कर्मफलानित्यत्वज्ञानरूपैकप्रयोजनदर्शकस्यास्य न विरोध इत्यर्थः । कर्मानुष्ठात्रभावप्रसङ्ग इति । अकृतकर्मविचाराणां त्वनुष्ठानौपयायिकार्थनिश्चयाभावेनानुष्ठानाप्रसक्तेः अनु-ष्ठानस्य कृतकर्मविचारपुरुषविषयतया तेषां च बह्मविचारप्रवृत्तत्वादनुष्ठात्रभावप्रसङ्ग इत्याक्षेपाभिप्रायः । श्रुत्वापि ये स्वर्गार्थिन इति । ननु कृतकर्मविचाराणां सर्वेषां ब्रह्मविचारे प्रवृत्ततया वैराग्यपादश्रवणेन स्वर्गार्थित्वमेव न स्यादित्याक्षिपन्तं प्रति नेदमुत्तरमिति चेत् न; श्रुत्वापि ये स्वर्गार्थिनो दृश्यन्ते, तेषामिति तदर्थत्वात् । ब्रह्मविचारसामग्रीति । कृतेऽपि ब्रह्मविचारे अदृष्टवैगुण्येनाशु-द्धचित्ततया स्वर्गार्थकर्मानुष्ठानसंभवादित्यपि द्रष्टव्यम् ।

(षष्ठयर्थविचारः)

कर्मत्वकरणत्वादिसंबन्धविशेषेष्विति । नन्वेतद्वाक्यपर्यालोचनायां षष्ठयर्थभूतसंबन्धसामान्यावान्तरविशेषरूपत्वं कर्मत्व-करणत्वादेः प्रतीयते । न च तद् युज्यते वक्तुम्; "षष्ठी शेषे' इति कर्माद्यतिरिक्ते प्रातिपदिकार्थव्यतिरिक्ते षष्ठया अनुशिष्टत्वेन, द्वितीयातृतीयाथर्योः सामान्यविशेषभावाभावत् द्वितीयार्थस्य षष्ठयर्थस्य च सामान्यविशेषभावाभावात् ।

"संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।

श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते ।।'

इति हरिणोक्तत्वेन, "नटस्य ृणोति', "माषाणामश्नीयात्', "अनुकरोति भगवतो नारायणस्य', इत्यादावपि कर्मत्वाद्यतिरिक्तस्य क्रियाकारकसंबन्धपूर्वकस्य शेषशेषिभावादिलक्षणस्य संबन्धस्यसत्त्वादिति चेत्-न; "माषाणामश्नीयात्' इत्यादौ कर्मत्वाद्यति-रिक्तकल्पने प्रमाणाभावात्, द्वितीयादीनां षष्ठयपवादतया विधानाभ्युपगमेन सामान्यविशेषभावनियमोपपत्तेः । इतरा विभक्तयः- विहिता इति । यद्यपि"कर्तृकर्मणोः कृति' इति षष्ठयपि विहिता-तथापि कर्मादिषु संबन्धविशेषेष्वेवेतरविभक्तयो विहिताः; षष्ठी तु संबन्धसामान्ये, विशेषेऽपि विहितेत्येवकारम्, अपिशब्दं चाध्याहृत्य योजना कार्या । परिणा ब्रह्मानुबन्धिनामिति । ननु "संब-न्धसामान्यपरिग्रहे' इति पठ्यते । तत्र परिणा संबन्धसामान्यपरितःस्थितीनां तदनुबन्धिनामेव ग्रहणं स्यात् । न तु ब्रह्मानुबन्धिनाम् । न हि "ब्रह्मपरिग्रहे' इति पठ्यते, येन ब्रह्मानुसंबन्धिनःपरिणा प्रतीयेरन् । अत एवोत्तरत्र "षष्ठी कृह्यते' इत्युक्तम्, न तु परीत्यपि । "कर्मणि षष्ठी परिगृह्यते' इत्युक्तेऽपि न ब्रह्मानुबन्धिनां ग्रहणं सिध्येत् । अपि तु षष्ठयनुबन्धिनामेवेति चेत्-न-ब्रह्मानुबन्धिनामपि परंपरया संबन्धसामान्यानुबन्धित्वस्य कथंचित्संभवादित्यभिप्रायात् । प्रधानसंबन्धादिति । यथा "राजाऽसौ निर्गतः' इत्युक्ते स परिवारस्य निर्गमनं प्रतीयते, तद्वदिति भावः । समासनिषेधस्य

सावकाशत्वमिति । "कृद्योगलक्षणा च षष्ठी समस्यते' इति प्रतिप्रसवानवरुद्धोऽवकाश इत्यर्थः । ननु "कर्मणि च' इति समासनिषेधः कस्मान्न भवतीति चेत्-न; तस्य, "उभयप्राप्तौ कर्मणि' इति सूत्रविहितषष्ठीविषयत्वात् । यथा, "आश्चर्यो गवां दोहोऽशिक्षितेन गोपालेन' इति । एतदभिप्रेत्योक्तं भगवता भाष्यकृता- "कर्तृकर्मणोः कृति' इति । यद्यपि ज्ञानपदं कृदन्तमिति । ततश्च प्रतिप्रसवावरुद्धत्वान्नावकाश इति भावः । सर्पिपो जानीत इति तिङन्तपदान्वयार्हत्वादिति । तिङन्तयोग इवेयमपि शेषलक्षणा षष्ठीत्यर्थः । न च शेषषष्ठीत्वे, "ज्ञोऽविदर्थस्य' इति विधानवैयर्थ्यं शङ्कनीयम्; समासनिषेधार्थत्वात् पुनर्विधानस्य -षष्ठी श्रूयत एव; न लुप्यत इति । लोपश्च समासे । उक्तं च हरिणा -

"साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः ।

प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये ।।' इति ।

धातोर्विभक्तेश्च प्रवृत्तितत्करणार्थत्वादिति । ततश्च सर्पिषः कर्तृकर्मान्यतरत्वभावात् न कृद्योगलक्षणा षष्ठीति भावः । यद्यपि "ज्ञोऽविदर्थस्य करणे' इति षष्ठयाः शेषषष्ठीत्वेन न करणत्वमर्थः-तथापि करणस्य शेषतया विवक्षितस्यार्थत्वात् कर्तृकर्मान्य-तरार्थत्वाभावान्न कृद्योगलक्षणषष्ठीसंभव इत्यत्र तात्पर्यम् । ननु धातोः प्रवृत्त्यर्थकत्वकथनमनुपयुक्तमिति चेत्-न; ज्ञाधातोर्ज्ञा- नार्थत्वे सकर्मकत्वात् कर्मसंभावनाप्यस्ति, प्रवृत्त्यर्थत्वे तुसापि नास्तीति प्रदर्शनार्थत्वात् ।

ननु नेयं षष्ठीति । ननु सूत्रकृता प्रयुक्तत्वाभावेऽपि स्वप्रयुक्तत्वात् स्वप्रयुक्तव्याख्यानस्य च भाष्यलक्षणत्वान्न तद्व्याख्याने दोषः । इतरग्रन्थेष्वपि "शक्तिः सामर्थ्यं कारणत्वमिति यावत्' इति पर्यायतया स्वप्रयुक्तमपि शब्दं यावत्परप्रतीति व्याकुर्वाणा दृश्यन्त इति सर्वजनीनमेतत् । अतः समासव्याख्यानाय स्वप्रयुक्तविग्रहवाक्यगतायाः षष्ठयाः संदिग्धार्थाया व्याकरणकोशादिना अर्थे कथनीये विभक्तिविषये कोशादेरभावात् व्याकरणेनैव व्याख्यानं युक्तमिति चेत् मैवम्-समासपद व्याख्यानं विग्रहणैव कर्तव्यमिति नियमाभावेन "ब्रह्मजिज्ञासा=ब्रह्मकर्मजिज्ञासा कर्तव्या ।

ब्रह्मशब्दो ब्रह्मकर्मकपर' इत्येव व्याख्ययताम्; किमिति संदिग्धार्थकव्याख्यानसापेक्षविग्रहवाक्योपन्यासेनेति तात्पर्यात् । विभ-क्तयर्थस्य प्रातिपदिकेन लक्षणा हि समास इति । इदं तु

कर्मधारयभिन्नलुप्तविभक्तिकतत्पुरुषाव्ययीभावविशेषविषयं द्रष्टव्यम् । लक्ष्यार्थविशेषनिर्णयायेति । "अस्या विभक्तेरयमर्थोऽनेन प्रातिपदिकेन लक्ष्यते' इति प्रतिपादनयेत्यर्थः ।

ननु "नानुशासनेन' इत्यस्याः शङ्कायाः कथमुत्थानम् ? विभक्तेर्व्याख्येयत्वे सिद्धे कोशादीनां तद्विषय उदासीनत्वादनुशासनेन व्याख्यानमुचितम् । ततश्चास्या विभक्तेरयमर्थ इति निर्णये सति योग्यतावशेन कर्मत्वरूपोऽर्थो लक्ष्यत इति निर्णयाय युक्तमेव विभ-क्तयर्थकथनम् । अत एव हि, "न गङ्गायां घोषः' इत्युत्तरवाक्यमपि न युक्तम् । न ह्यत्र लक्षकपदस्य लक्ष्येऽनुशासनमुपन्यस्यते; किंतु योग्यतादिवशेन लक्षणीयस्य कर्मत्वस्य विभक्तयर्थत्वकथनायानुशासनमुपन्यस्यते । अत एव, "स तु नियमः प्रातिपदिकेन प्रातिपदि-कान्तरार्थलक्षणायामेव' इति परिहारग्रन्थोऽपि न युक्तः, ब्रह्मणः कर्मत्वकर्तृत्वादीनां मध्ये कर्मत्वस्यैव लक्षणीयत्वाय योग्यतादि-प्रतिसंधानस्येहाप्यपेक्षितत्वादिति चेत्-न-अनभिज्ञो भवान् वाक्यार्थस्य । न ह्यत्र "कर्तृकर्मणोः कृति' इत्यनुशासनबलेन षष्ठीव्या-ख्यानमसंगतमिति चोद्यते; येनायमुपालम्भः स्यात् । किन्तु "कृद्योगलक्षणा षष्ठी समस्यते' इत्यनेन कृद्योगलक्षणषष्ठयन्तपदस्य लुप्तायां विभक्तौ तदर्थे लक्षणायाः साधुत्वान्वाख्यानपरेण व्याख्यानं किमर्थं क्रियते ? न हि गङ्गापदस्य तीरे लक्षणाया प्रयोगे साधुत्वमस्तीत्यत्रानुशासनमपेक्षितमित्याक्षेपस्य, क्वचिदर्थविशेषे लक्षणया प्रयोगस्य साधुत्वमनुशासनसापेक्षमिति परिहारस्य च संभवेनादोषात् ।

ननु लुप्तविभक्तयर्थस्य लुप्तविभक्तिकशब्दमुख्यार्थत्वे निषादस्थपत्यधिकरणविरोधः, षष्ठीतत्पुरुषौ लक्षणाया अप्रसक्तेरित्य-रुचेराह - अमुख्यत्वे वा का नः क्षतिरिति । ननु पदान्तरयोगविहितविभक्तेरर्थसद्भावे, "नमस्करोति देवान्' इत्यत्र नमःशब्दयोग-निमित्तचतुर्थ्यपेक्षया कर्मणि द्वितीयायाः प्राबल्यं न स्यादित्याशङ्कयाह - कारकविभक्तेरिति । पदान्तरयोगविहितत्वरूपम-स्त्येवेति । ननु"कर्तृकर्मणोः' इति विहितस्य कृदन्तपदयोगनिमित्तत्वेऽपि न कारकविभक्तित्वक्षतिः, तत्र शाब्दिकानां कारक-षष्ठीत्वस्य व्यवहारात् । अत एव, "गतिकारकोपपदात् कृत' इति कारकस्वरो भवति । इतरथा स न प्राप्नुयादिति चेत्-सत्यम्; अस्त्येव कारकविभक्तित्वम् । उपपदयोगनिमित्ततयोपपदविभक्तित्वमप्यस्ति । तस्याश्चोपपदयोगनिरपेक्षकारकविभक्तयपेक्षया । दौर्बल्यमप्यनुभवसिद्धम् । "घटं करोति' इत्यत्रेव "घटस्य कृतिः' इत्यत्र कर्मत्वस्य शीघ्रप्रतीत्यभावात् । न चैवम्, "कर्तृकमर्णोः कृति' इति षष्ठया उपपदविभक्तित्वे षष्ठीं बाधित्वा द्वितीयाप्राप्नोतीति वाच्यम्-तद्विषया एवारभ्यमाणत्वेन तदपवादत्वात् । न चैवम्, "कन्याया अलंकर्ता' इत्यादौ कृद्योगषष्ठया अप्युपपदविभक्तित्वाविशेषात् । अलंयोगनिमित्तचतुर्थीबाधकत्वं न स्यादिति वाच्यम्- परत्वेन बाधकत्वोपपत्तेः । कर्मणि षष्ठया अपि कारकविशेषविहितत्वेन कारकविभक्तित्वस्याप्यभ्युपेतत्वेन अलंपदयोगनिमित्तविभक्तेः केवलोपपदविभक्तित्वेन तद्बाधकत्वोपपत्तेश्च । पदान्तरपरामर्शसापेक्षत्वेनेति । उक्तं च- "सूक्तवाके च कालविधिः परार्थत्वात्' (३-२-५) इत्यत्र तृतीये, "सूक्तवाकेन प्रस्तरं प्रहरति' इत्यत्र सूक्तवाकेनेति तृतीया इत्थंभूतलक्षणे भविष्यतीति पूर्वपक्षे, "सर्वत्र क्रिया-कारकसंबन्धस्यान्तरङ्गत्वात् सूक्तवाकस्य प्रस्तरप्रहरणक्रियायां कारकत्वेनैव संबन्धो वक्तुमुचितः । इत्थंभूतलक्षणाश्रयणे तु न कारकत्वेन संबन्धःसिध्येत् । न च लक्षणक्रियायां करणत्वेनान्वयो युक्तः; सूक्तवाक्येन लक्षितं प्रस्तरमिति लक्षणक्रियाया वाचक-पदाभावेन तद्वाचकपदान्तरसापेक्षत्वात् । तस्मान्नेत्थंभूतलक्षणे तृतीया । अपि तु करणे तृतीयैवे'ति -उक्तरीत्या उपपदविभक्तेः कारकविभक्तयपेक्षया दुर्बलत्वादिति । अमुख्यत्वं तु परिहृतमिति ।"का नः क्षति'रिति परिहृतमित्यर्थः ।

(ब्रह्मशब्दार्थविचारः)

पुरुषोत्तमशब्दस्य रूढ्येति । यद्यपि यौगिकार्थस्यातिप्रसक्तौ समुदायशक्तिलक्षणरूढ्यभ्युपगमः; न तु (हि) शचीपतिवाक्पति (पार्वतीपति) श्रीवत्सवक्षः प्रभृतिषु प्रोद्गात्रहीनधार्यादिशब्देष्विव रूढिरभ्युपगन्तव्या तथापि पुरुषोत्तमशब्दस्य नारायणपर्यायतया पाठात् समानप्रवृत्तिनिमित्तत्वमभ्युपगम्योक्तं द्रष्टव्यम् । चेतनवैलक्षण्यमुक्तमिति । यद्यप्युत्तमशब्दस्योद्गतार्थवाच्युपसर्गात् समा-धनक्रियावचनात् तमप्रत्यये निष्पन्नस्य न वैलक्षण्यमात्रमर्थः । अव्युत्पत्तिपक्षेऽपि न वैलक्षण्यमर्थः; वैलक्षण्यमात्रेणोत्तमशब्दप्र-योगाभावात् । अत एव, "स्वेतरवैलक्षण्यं तृणादेरप्यस्ति' इति ग्रन्थोऽपि न युक्तः-तथापि "अक्षरादपि चोत्तमः' इति प्रमाणानुसारेण पञ्चमीसमासस्य वा, "सप्तमी' इति योगविभागात् सप्तमीसमासस्य वा आश्रयणीयतया, "यतश्च निर्धारणम्', "पचमी विभक्ते' इति सूत्राभ्यामेव पञ्चमीसप्तम्योर्विधेयत्वेन निर्धारणस्यावश्यकत्वान्निर्धारणस्य च वैलक्षण्यापरपर्यायपृथक्करणवाचित्वाद्वैलक्षण्यमर्थ

इत्येतदभिप्रेत्यैतदुक्तमिति द्रष्टव्यम् । प्रतिपादनोपयोगितयेति । पुरुषोत्तमस्य निर्दोषत्वकल्पयाणगुणाकरत्वाश्रयतया निरतिशय-बृहत्त्वरूपप्रवृत्तिनिमित्तं संभवतीति प्रतिपादनार्थमित्यर्थः । न तु प्रवृत्तिनिमित्ततयेति । ततश्च ब्रह्मशब्दस्य बृहत्त्वव्यतिरिक्तं स्वभावतो निरस्तदोषत्वमपि प्रवृत्तिनिमित्तान्तरमिति न भ्रमितव्यमिति भावः । अर्थसामर्थ्यमाह - मुमुक्षोरशेषदोषेति । वाङ्मनसागोच-रतयानवधिकत्वमुक्तमिति । ननु ब्रह्मगुणानां सर्वातिशायितया अतिशयस्य सर्वावधिकत्वेन कथमनवधिकत्वम् ? इन्द्राद्यानन्दा-तिशयो हि मनुष्यानन्दावधिकः । ब्रह्मानन्दातिशयो हि मनुष्यादिप्रजापत्यन्तसर्वानन्दावधिकः । अत एव सर्वेषामवधित्वात् सर्वेभ्योऽतिशयित इत्यवध्यर्थपञ्चमीति चेत्-न; अवधिशब्दस्येयत्तार्थकत्वात् । ततश्च ब्रह्मानन्दातिशयोऽपरिच्छिन्न इत्यर्थः । यद्वा

स्वसमानाधिकरणापकर्षावधिशून्यत्वमेवानवधिकत्वम् । स्वशब्देनोत्कर्षः परामृश्यते । इन्द्रानन्दादिगतस्य देवाद्यनन्दापेक्षयाति-शयस्य बृहस्पत्यानन्दावधिकापकषर्समानाधिकरणतया स्वसमानाधिकरणापकर्षावधिमत्त्वम्; ईश्वरगुणनिष्टोत्कर्षस्य तु स्वसमा-नाधिकरणापकर्षाभावेन तादृशावधिशून्यत्वमिति विशेषात् । अथवा इतरेषामतिशयस्य देवमनुष्याद्यवधिसापेक्ष (निरूप्य)त्वेन सावधिकत्वम्; ईश्वरविषये तु उपपदादि निरपेक्षतया अतिशयित इति प्रत्यय प्रयोगयोर्दर्शनात् तद्गतातिशयस्य अवधिप्रतीत्यधीन प्रतीतिकत्वाभावेन निरवधिकत्वम् । अत एव अयोध्येश्वरः मिथिलेश्वर इति इतरत्र ऐश्वर्यस्य निर्देशः । ईश्वरविषये तु मर्यादोपन्यासमन्तरेण"ईश्वरः' इत्येव प्रतीतिप्रयागौ । अत एव, "शब्दादेव प्रमितः' इत्यत्र ईशा-नपदस्यैव निरपेक्षस्य परमात्मप्रतिपादकत्वम्; न तु प्रतिसंबन्धिसापेक्षस्येति श्रुतित्वमुपपादितम् ।

"मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः ।

इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः ।।' इत्यभियुक्तोक्तेश्च ।

अन्तर्भावाभिप्रायो गणशब्द इति । एकैकस्यैव सत्यसंकल्पत्वादेर्गुणगणत्वे सत्येव तस्य वक्ष्यमाणरीत्या तद्विशेषणभूतम-संख्येयत्वमुपपद्यते । इतरथा सर्वेषां गुणानां गण एक एव स्यादित्यसंख्येयत्वविशेषणमनन्वितं स्यात् । इदं च, "नन्वनवधि-कातिशयशब्दस्य गणविशेषणत्वे' इत्यादिग्रन्थेनाक्षेपसमाधानाभ्यां व्यवस्थाप्यमानमनवधिकातिशयत्वस्यासंख्येयत्वस्य च कल्याणगुणगणविशेषणत्वं सिद्धवत्कृत्योक्तमिति द्रष्टव्यम् । सामानाधिकरण्याभावाद्बहुव्रीहिनर् स्यादिति । अनवधिकाति-शयासंख्येयकल्याणगुणानां गणो यस्येति विग्रहे समस्यमानपदसामानाधिकरण्याभावात् बहुव्रीहिर्न स्यात्,"समानाधिकरणानां बहुव्रीहिरिष्यते' इत्यनुशासनादिति भावः । तदन्तर्गतानामेवेति । अत्र दृष्टान्तदाष्टार्न्तिकयोरयं विशेषः दृष्टान्ते श्रुतशीलादिकं समुहिगतमेव; दाष्टार्न्तिके त्वनधिकातिशयत्वं श्रुत्यर्थाभ्यामुभयान्वितं प्रतीयत इति । ततो निर्गतानामिति । इदमुपलक्षणम् । श्रुतशीलादेः समूहान्वयित्वे तदन्तर्गतानां समूहिनां श्रुताद्यभावप्रसङ्ग इत्यपि द्रष्टव्यम् । श्रुताद्यभावप्रसङ्गादिति । श्रुताद्यन्वय-प्रतीतिर्न स्यादित्यर्थः । भगवद्गुणापेक्षया सातिशयत्वादिति । भगवद्गुणापेक्षया निकृष्टत्वादित्यर्थः । प्रतिज्ञातमर्थं शब्दसा-मर्थ्यादिति । बृहतिधातोर्निष्पन्नस्य ब्रह्मशब्दस्य बृहत्त्वगुणयोगनिमित्तकतया प्रवृत्तिनिमित्तपौष्कल्यं यत्र, तत्रैव मुख्यवृत्तत्वम्; इतरत्र तु अमुख्यवृत्तत्वमित्युपपादयतीति भावः । व्याख्यान्तरमाह - तत्रार्थान्तरेष्विति । ब्रह्मशब्दप्रयोगविषयेषु सर्वेष्विति । पुरुषोत्तमव्यतिरिक्तेष्विति शेषः । बृहत्त्वगुणयोगोऽस्तीत्यर्थ इति । अतस्तत्र गौण इत्येतावत्पर्यन्तो वाक्यार्थः । अत एव, "पुरुषो-त्तमे गौणत्वम्, अन्यत्र मुख्यत्वं च किं न स्यात्' इत्याक्षेपग्रन्थसामञ्जस्यम्; अन्यथा "सर्वत्र बृहत्त्वगुणयोगेन हि' इति वाक्येनैव पुरुषोत्तमे मुख्यत्वप्रतिपादनस्यान्यत्र गौणत्वप्रतिपादनस्य च पर्यवसिततया, पुरुषोत्तमे गौणत्वमित्याक्षेपग्रन्थासामञ्जस्यात् "ततः किम् ?' इत्येवोत्तरग्रन्थस्यावतरणीयत्वात् । अस्मिन् पक्षे "सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः' इति भाष्यस्य पूर्वग्रन्थशेषत्वम्; पूर्वस्मिंस्तु पक्षे उत्तरग्रन्थशेषत्वम् । अत एव, "सर्वत्रेत्यादिना' इत्यादिशब्देनोपादानं कृतम् । यद्वा, ततः किमित्येवावतारिका । "ततः किम् ?' इत्यस्य हि "तावता कथं तव पुरुषोत्तमः एव मुख्यवृत्त्याभिधीयत इति प्रतिज्ञातार्थसिद्धिः ? विपरीतं किं न स्यात् ?' इति ह्यभिप्रेतोऽर्थः । स एवार्थः पुरुषोत्तमे गौणत्वमित्यादिग्रन्थेनोच्यत इति न दोषः; नापि व्याख्याद्वयाश्रयणमिति द्रष्टव्यम् ।

ब्रह्मगुणादेरपीति । ननु "बृहत्त्वाद्बृंहरत्वाच्च' इति प्रमाणानुसारेण द्वयमपि प्रवृत्तिनिमित्तत्यभ्युपगमेन ब्रह्मगुणादौ नातिप्रसङ्गः । अवश्यं च तथाभ्युपगन्तव्यम् । इतरथा ब्रह्मगुणादावतिप्रसङ्गस्य तादवस्थ्यात् । प्रवृत्तिनिमित्तस्य सत्त्वात् । न हि-लाक्षादिरञ्जक-द्रव्येण रक्तस्य स्वतश्च रक्तत्वाश्रयस्य जपाकुसुमादेरेवासंकोचात् रक्तपदवाच्यत्वम्, न तु केवलजपाकुसुमादेरित्यस्ति । न वा-पर्वताश्रयस्यैव पर्वतस्य पर्वतशब्दवाच्यत्वम्, न तु पर्वतानाधारपर्वतस्य,

तस्य स्वरूपतः पर्वतत्वाश्रयत्वेऽपि धर्मतः पर्वतत्वाना-श्रयत्वादित्यस्तीति चेत्-न; "कस्मादुच्यते ब्रह्म' इति, "बृहन्तो ह्यस्मिन् गुणाः' इति प्रमाणानुसारात् बृहद्गुणकत्वमेव प्रवृत्ति-निमित्तम् । स्वरूपबृहत्त्वबृंहणत्वे अपि तत्रैवान्तर्गते इत्यत्रैव तात्पर्यात् । यद्वा, "गुणतो बृहत्त्व'मित्यस्य न गुणगतबृहत्त्वमित्यर्थः, किं तु बृहद्गुणकत्वकृतःस्वरूपनिष्ठ एव बाहात्म्यविशेषो ज्यायस्त्वरूपः । अतः सर्वतो ज्यायस्त्वं बृहत्त्वम् । तदेव ब्रह्मशब्द-

प्रवृत्तिनिमित्तमिति भावः । शब्दशक्तेरसंकोचस्येति । ननु द्वयोरपि प्रवृत्तिनिमित्तत्वाभ्युपगम एव ब्रह्मशब्दशक्तेः संकोचः, गुणतो बृहत्त्वस्य ब्रह्मगुणादिव्यावर्तकत्वादिति चेत् न । न ह्यत्र (त्य) शब्दशक्तेरित्यस्य ब्रह्मशब्दशक्तेरित्यर्थः । अपि तु "बृहन्तो ह्यस्मिन् गुणाः' इति ब्रह्मशब्दप्रवृत्तिनिमित्तप्रतिपादकवाक्यगतगुणशब्दशक्तेरित्यर्थः । यद्वा ब्रह्मवत् प्रवृत्तिनिमित्तस्यापि शक्यत्वात् तत्र बृहत्त्वविशेषरूपप्रवृत्तिनिमित्तस्यैव शक्यत्वमित्युक्तेः संकोचप्रसङ्ग इत्यर्थः । न च द्वयोरपि शक्यत्वे शक्यव्यक्तिसंकोचप्रसङ्गः, प्रयोगाभावेन व्यक्तिसंकोचस्य प्रागेव सिद्धत्वेनैतदधीनत्वाभावात् ।

तस्मात् ब्रह्मण इति । ननु तस्मादित्यस्य सर्वेश्वरादित्यर्थो वक्तुमुचितः, "ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः' इति पूर्ववाक्ये तत्रैवेतितच्छब्देन सर्वेश्वरस्यैव निर्दिष्टत्वात् । तत्र ब्रह्मणः परामर्शे अप्रसक्तप्रतिषेधापत्तेः । न हि ब्रह्मशब्दस्याब्रह्मणि मुख्यवृत्तत्वं प्रसक्तम्, येन तन्निषेधः सफलः स्यादिति चेत् उच्यते-तस्मादित्यस्य ब्रह्मण इति नार्थकथनम्, अपि तु शेषपूरणम् । अयमभिप्रायः स्वरूपेण गुणैश्चानवधिकातिशयशालिनः सर्वेश्वरस्य ब्रह्मत्वं सिद्धम् । इतः परं तस्मादपि ब्रह्मणोऽन्योऽपि ब्रह्मशब्दमुख्यार्थ इति स्वीकारे अनेकार्थत्वं स्यादिति । केचित्तु-ब्रह्मणः निरवधिकबृहत्त्वशालिन इत्यर्थः । पूर्ववाक्ये"तत्रैव' इत्यत्र तच्छब्देनापि निर-तिशयबृहत्त्वशाल्येव परामृश्यते; न तु सर्वेश्वरः । तथा "तद्गुणलेशयोगात्' इत्युत्तरत्रापि बृहत्त्वगुणलेशयोगातदित्येवार्थ इत्याहुः । अस्मिन् पक्षे, "स च सर्वेश्वर एव । अतो ब्रह्मशब्दस्तत्रैव मुख्यवृतः' इत्ययमंशो व्यर्थः । नन्वितरत्र प्रयोगस्यौपचारिकत्वे स प्रयोगः सार्वत्रिकः किं न स्यादित्याशङ्कय औपचारिकस्यापर्यनुयोज्यत्वान्न सार्वत्रिक इत्याह - औपचारिकस्त्विति । ननु -

"एकदेशेऽपि यो दृष्टः शब्दो जातिनिबन्धनः ।
तदत्यागान्न तस्यास्ति निमित्तान्तरगामिता ।।'

इति बर्हिराज्याधिकरणन्यायेनाव्यभिचारात् बृहत्त्वस्यैव प्रवृत्तिनिमित्तत्वे नानेकशक्तिकल्पनागौणत्वादिदोषः । त्र्यणुकादिषु ब्रह्म-शब्दाप्रयोगस्य बृहच्छब्दाप्रयोगवत्, असंस्कृततृणादिष्वार्याणां बर्हिरादिशब्दाप्रयोगवच्चोपपत्तेः । "परं जैमिनिर्मुख्यत्वात्', "स्या-च्चैकस्य ब्रह्मशब्दवत्' इत्यादौ ब्रह्मशब्दस्य परमात्मनि मुख्यात्वव्यवहारास्तु ब्रह्मगतबृहत्त्वस्यावधिप्रतीत्यधीनप्रतीत्यकत्वाभावेना-वधिप्रतीत्यधीनप्रतीतिकेतरबृहत्त्वापेक्षया शीघ्रधीस्थत्वात्, "मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः' इति न्यायेनोपपद्यते । न हि नरेश्वरशब्दः स्वभार्यापुत्रादिस्वामिनि प्रयुज्यते; न वा केवलेश्वरशब्दः पृथिवीश्वरादावपि प्रयुज्यत इत्येतावता स्वामित्वं प्रवृत्तिनि-मित्तमपहाय निरङ्कुशेश्वरत्वमेव तस्य प्रवृत्तिनिमित्तमिति शक्यते वक्तुमिति चेत्-मैवम्; तथाहि सति गोशब्दस्यापि "गच्छति' इति व्युत्पत्त्या "गमेर्डोः' इति व्युत्पन्नतया गन्तृत्वमेव प्रवृत्तिनिमित्तम्; इतरत्राप्रयोगास्तु बर्हिराज्यादिशब्देष्विवोपपन्नो न तस्य गन्तृ-विशेषे रूढिं कल्पयतीति स्यात् । यदि च नियमेनेतरत्राप्रयोगेण विशिष्य सांस्नादिमति रूढिं कल्पयित्वा इतरस्यावाच्यत्वं कल्प्यते, तत् प्रकृतेऽपि समानमिति दिक् । केचित्तु-बृहत्त्वस्य प्रवृत्तिनिमित्तत्वमभ्युपगम्य तत्पौष्कल्यस्यैव भगवति समर्थनात् बृहत्त्वमेव प्रवृत्तिनिमित्तम् । न हि प्रवृत्तिनिमित्तपौष्कल्यं प्रवृत्तिनिमित्तम् । ततश्च नावयवार्थव्यतिरिक्तरूढ्यर्थस्वीकारः सिद्धान्तिसंमत इति वदन्ति ।

औपचारिकभगवच्छब्दप्रयोगयोग्येष्विति । ननु "स वाच्यो भगवानिति' इति वाच्यत्वेनोक्तानां वसिष्ठादीनां कथमौपचा-रिकभगवच्छब्दप्रयोगयोग्यत्वकथनमिति चेत्-न-त्वद्रीत्या औपचारिकभगवच्छब्दप्रयोगयोग्यानामित्यर्थः । ननु खाण्डिक्यादिषु सार्वत्रिकभगवच्छब्दप्रयोगाभावो न स्वध्यवसान इत्यस्वरसादाह - किं च प्रत्यक्षमूलेति । आगममूलव्युत्पत्त्येति । ननु, "उत्पत्तिं प्रलयं च' इत्ययमपि आगमो भवत्येवेति तन्मूलया व्युत्पत्त्या वसिष्ठादिष्वपि मुख्यत्वं किं न स्यात् ? "ज्ञानशक्तिबलैश्वर्य' इति श्लोकेऽपि, "अशेषतः' इति सर्वेषामपि प्रवृत्तिनिमित्तत्वं उच्यते । नतु मिलितानाम् । तथाहि सति वाच्यानि इति बहुवचनं न स्यात् । अत एव ज्ञानादिषु षट्सु प्रवृत्तिनिमित्तेषु कथितेषु, "अत्यल्पमिदमुच्यते' इति पर्यालोच्य "विना हेयैर्गुणादिभिः' इति ज्ञानादिभिन्नानामपि हेयव्यतिरिक्तानां शुभानां गुणानां सर्वेषां प्रवृत्तिनिमित्तत्वमुच्यते, "यद्यद्विभूदिमत् सत्त्वं श्रीमदूर्जितमेव वा' इतिवदिति चेत्-न- "भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधी च वर्तेते वासुदेवे सनातने ।' इत्याद्युपबृंहणानुगुण्यात्; केवलस्य भगवच्छब्दस्यान्यत्राप्रयोगाच्चेति भावः । अत एव हि पुरुषोत्तमोऽभिधीयत इत्यु-क्तमिति । यद्यपि, "तमेवं विद्वान्' इति वाक्ये पूवर्त्र, "वेदाहमेतं पुरुषम्' इति महान् पुरुष एव प्रस्तुतः; न पुरुषोत्तमः-तथापि तयोरेकार्थपर्यवसानमभिप्रेत्योक्तमिति द्रष्टव्यम् । "अतः सर्वेश्वर एव जिज्ञासाकर्मभूतं ब्रह्म' इति वाक्यगतस्यातःशब्दस्य ताप-त्रयातुरजिज्ञास्यत्वरूपार्थसामर्थ्यमात्रे संकोचकल्पने प्रमाणाभावादाह - यद्वा अत इति । "अतः' इति व्याख्येयं पदम् । अव्यु- त्पन्नो व्युत्पन्नो वा भगवति मुख्य इति । गृहीतसंगतिक इत्यर्थः; मुख्यया वृत्त्या भगवत्प्रतिपादक इत्यर्थः । बुद्धिपूर्विकेति ।

बुद्धिपूविर्का व्युत्पत्तिः, मातापित्रादिभिरङ्गुलिनिर्देशपूर्वकमम्बातातमातुलादिषु यत्र व्युत्पत्तिर्ग्राह्यते, तत्र; यादृच्छिकव्युत्पत्तिस्तु, "घटमानय' इति वाक्यश्रवणात् प्रयोज्यप्रवृत्तिमुपलभ्य यत्र व्युत्पत्तिर्गृह्यते, तत्रेति द्रष्टव्यम् । इदं चाधिकरणनिरूपणे स्पष्टं भवि- ष्यति । यूपाहवनीत्येत्यत्र कपालशब्दः संपातायातः; तस्य लौकिकत्वात् ।

(जिज्ञासाशब्दार्थविचारः)

कर्मणश्च क्रिया शेषभूतेति । ननु प्रधानस्य विधेयत्वे, "व्रीहीन् प्रोक्षति' इत्यादौ व्रीह्यादीनां विधेयत्वप्रसङ्गात्, प्रत्युत प्रधान-त्वस्यानुवाद्यत्वानुबन्धिनो विधेयत्वविरोधाच्च, "व्रीहिभिर्यजेत', "अरुणया क्रीणाति' इत्यादौ गुणस्यैव विधेयत्वदर्शनाच्च कथ-मेतदिति चेत्-उच्यते-इच्छाया विषयसौन्दर्याधीनत्वेन पुरुषेच्छाधीनकृतिसाध्यत्वाभावेऽपीष्यमाणज्ञानस्येच्छाधीनकृतिसाध्यतया पुरुषतन्त्रत्वेन विधेयत्वसंभवादिति तदर्थात् । केचित्तु-"प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यम्' इति न्यायस्यौपगवादौ सामान्यतो दृष्टत्वेऽपि "अश्वेन जिगमिषति' "असिना जिघांसति' इत्यादौ सन्वाच्येच्छापेक्षया प्रकृत्यर्थस्यैव स्वतन्त्रोपस्थितत्व-लक्षणस्य शब्दतःप्राधान्यस्य समभिव्याहृतपदार्थान्तरान्वयस्य च दर्शनात्, ःब्रह्म जिज्ञासा' इत्यत्र प्रकृत्यर्थज्ञानस्यैवाध्याहृत-कर्तव्यपदान्वयसंभव इति भाष्याभिप्रायं वर्णयन्ति । प्रतीतिरूपं ज्ञानमिति । अत्र, उद्दिश्येति शेषः । तथाचायमत्रान्वयः- प्रमि- तिरूपं ज्ञानमुद्दिश्य आक्षिप्तं तर्करूपं ज्ञानं मनोव्यापारविशेषरूपं विधेयमिति परैरुक्तमिति । यद्वा, विधेयं शाब्दमित्यर्थः; उत्तरत्र तर्करूपं ज्ञानमार्थमित्युक्तेः । आर्थिके च विचारेऽध्याहृतकर्तव्यत्वान्वयः । "श्रौतस्तु मुमुक्षानन्तरं ब्रह्मज्ञानेच्छा भवितुं युक्तेत्येष एव' इति कल्पतरूक्तेः । प्रागुक्तपक्षः साधीयानिति । प्रकृतिप्रत्ययार्थाक्षिप्तस्य विधेयत्वापेक्षया प्रकृत्यर्थविधेयत्वस्य युक्तत्वादिति भावः ।

(यादवप्रकाशीयसूत्रार्थनिरासः)

प्रधानादिनिरासनिरपेक्षत्वादिति । प्रधानादिनिरासमुखेन प्रधानादिजिज्ञास्यत्वनिरासनिरपेक्षत्वादित्यर्थः । ततश्च विचारा-नपेक्षितं प्रधानादिनिरासनमुखेन जिज्ञास्यत्वनिरसनं विफलमिति भावः ।

(वृत्तिकारोक्तवर्णनम्)

भाष्ये-वृत्तात् कर्मज्ञानादनन्तरमिति । अनन्तरशब्दस्य पश्चाच्छब्दपर्यायतया दिक्शब्दत्वमङ्गीकृत्य पञ्चमीनिर्देश इति द्रष्टव्यम् । तद्विषयं शास्त्रं शारीरकमित्युच्यत इति । शारीरं कायतीति शारीरकम् । के शब्दे । "अतोऽनुपसर्गे कः' इति के रूपम् । मीमांसाया एकप्रबन्धत्वमिति । यद्येवं वेदोपकाररूपैकप्रयोजनसमर्थत्वेनार्थैक्यात् व्याकरणज्योतिषादीनां तत्प्रयोजने निष्पाद्ये परस्पराकाङ्क्षाया अपि सत्त्वादेकाङ्गत्वप्रसङ्गः । न च तेषामङ्गत्वेनैक्यामिष्टमिति वाच्यम्-तर्हीहापि मीमांसात्वेनैक्यं स्यात्, न तु शास्त्रैक्यमिति चेत्-न; तथा सतीदृशप्रतिबन्धा पूर्वोत्तरषट्कयोरपि शास्त्रभेदप्रसङ्गात् । न च तत्र विषयप्रयोजनाधिकारिणामेकत्वात्, "अथातो धर्मजिज्ञासा' इति प्रतिज्ञायाः साधारण्याच्चैकत्वमिति वाच्यम्-अत्रापि वेदार्थरूपविषयस्य, तज्ज्ञानरूपप्रयोजनस्य, तत्कामस्य चाधिकारिण एकत्वात् । विचारद्वयानुगतसाधारणप्रतिज्ञाया उपपादयिष्यमाणत्वाच्च । ननु "अथातो ब्रह्मजिज्ञासा' इति साधारणप्रतिज्ञेत्ययुक्तम्; तथा सति अथशब्दस्य कर्मविचारानन्तर्यार्थकत्वं न स्यादिति "वृद्धिमिच्छतो मूलहान्यापत्तिः' इति न्यायाः पातात् । न हि कर्म-विचारानन्तर्यं विंशतिलक्षण्या मीमांसायाः संभवति । अपि तु चतुर्लक्षण्या एवेत्यस्वरसादाह - एवं वेति । प्रतिधर्मसमोभयानु-यायिनीति । साधर्म्यसमवैधर्म्यसमरूपोभयजात्यनुयायिनी प्रतिधर्मसमजातिप्रतिज्ञा अर्थसिद्धेत्यर्थः । प्रतिधर्मसमाजातिर्द्वि(वि)धा साधर्म्यसमा वैधर्म्यसमा चेति । तत्र, "साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसं-शयप्रकरणहेत्वार्थापत्त्यविशेषोपपत्त्यनुपलब्धिनित्यानित्यकार्यसमाः' इति जातीनां विभागोद्देशसूत्रेण विशेषयोरेवोद्देशः कृतः, अनन्तरम् "साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ' इति लक्षणसूत्रं च विशेषयोरेवेति भावः । ननु वेदाध्ययनानन्तरमर्थविचारो न कर्तव्यः, अविवक्षितार्थकत्वादिति सर्ववेदार्थानुगतपूर्वपक्षनिरासाय "अथातो वेदार्थजिज्ञासा' इति सूत्रे कर्तव्ये मन्दप्रयोजना विशेषप्रतिज्ञा अयुक्ता । साधर्म्यवैधर्म्यसमजातिस्थले तु सामान्यप्रतिज्ञायाः शिष्यबुद्धिसमाधानमात्रार्थत्वेन निरसनीयपूर्वपक्षाभावेन आर्थत्वेऽप्यदोष इत्यस्वरसादाह - अथवा अथातो धर्मजिज्ञासेत्येवेति । अलौकिकश्रेयःसाधनमिति । वेदैकगम्यश्रेयःसाधनताकमित्यर्थः । नन्वेवं श्येनादेरपि धर्मत्वप्रसङ्गः । न च बलवदनिष्टाजनकत्वेन तद्विशेषात् तद्व्यावृत्तिरिति वाच्यम्, तथा सति परमात्मनः सर्वकारणत्वेनाधर्मत्वप्रसङ्गादिति चेत्-मैवम् । तथाहि सति ज्योतिष्टोमादेर्धर्मत्वं न स्यात्,"सर्वेभ्यो ज्योतिष्टोमः' इति तस्य सर्वफलसाधनत्वेन वैरिविपतिसाधनतया तद्द्वारा बलवदनिष्टजनकत्वात् । वैरिविपत्तिफलकप्रयोगे तस्य धर्मत्वाभाव इष्ट एव । वैरिविपत्त्यादिफलकप्रयोगानवच्छिन्नस्यैव ज्योतिष्टोमस्य धर्मत्वमिति चेत्-तथा सति ब्रह्मणोऽननुष्ठेय-पदार्थतया बलवदनिष्टानुबन्धिप्रयोगानवच्छिन्नत्वे सति अलौकिकश्रेयःसाधनत्वस्यैव ब्रह्मण्यपि संभवात् "धर्मजिज्ञासा' इत्येव साधारणप्रतिज्ञेति भावः । नन्विन्द्रियगम्यानां तेषां कथं धर्मत्वमित्याशङ्कयाह - तेषामैन्द्रियकत्वेऽपीति । तादृप्येणेति । ऐन्द्रियकत्वरूपेणेत्यर्थः । ननु धर्मशब्दस्य साधारण्यमभ्युपेत्य धर्मद्वयविचारः प्रतिज्ञायत इति वदता नैकस्य बुद्धिस्थत्वं वक्तुं शक्यम् । अतश्चोदनासूत्रे साध्यधर्मस्यैव लक्षणकथने नैतन्नियामकमित्यस्वरसादाह - पूर्वभागप्रतिपन्नत्वेनेति । विशेषप्रतिज्ञाया अप्यावश्यकत्वमभिप्रेत्याह - तन्त्रेण वार्थतो वेति । शब्दा बोध्यत्वशङ्कापरिजिहीर्षयेति । सिद्धव्युत्पत्तिसमर्थनानार्थमिति भावः । तस्य परमात्माराधनरूपत्वानवगमादिति । न च राजपुरुषस्य राजपुरुषपदाद्राजप्रेष्यत्वरूपपारतन्त्र्यप्रतीतावपि यथा न शाब्द-प्राधान्यविरोधः, पुरुषस्य विशेष्यतया प्रतीतेः, एवं परमात्माराधनरूपत्वप्रतीतावपि कर्मणो विशेष्यतया भानान्न शाब्दप्राधान्यविरोध इति वाच्यम् । अत्र शाब्दप्राधान्यमित्यस्यान्योपसर्जनतया अप्रतीयमानत्वमित्यर्थात् । न च राजपुरुषे तन्नास्तीति शङ्कनीयम्, वस्तुगत्या राजपुरुषस्य पुरुषपदात् प्रतीतिदशायां तदुपपत्तेः । केचित्तु, "युक्तयन्तरमाह -परमात्माराधनरूपत्वानवगमादिति' इति वदन्ति ।

ननु "कृष्णं धर्मं सनातनम्' इत्यादौ धर्मशब्दप्रयोगस्य, "प्रणम्रेषु महीषेषु प्रसादो मूर्तिमानयम् ' इत्यस्य मुर्तिमत्त्वरूपप्रसिद्धप्र-सादवैलक्षण्यविशिष्टप्रसादत्वारोप इव, "रामो विग्रहवान् धर्मः' इत्यस्य विग्रहवत्त्वरूपप्रसिद्धधर्मवैलक्षण्यविशिष्टधर्मत्वारोप इव च सनातनत्वरूपप्रसिद्धधर्मवैलक्षण्यविशिष्टधर्मत्वारोपे तात्पर्येणोपपन्नस्य, पौराणिकस्य, "यमिन्द्रमाहुर्वरुणं यमाहुः' इत्यादि-वाक्यतुल्यस्य वचनस्य,"चोदनालक्षणोऽर्थो धर्मः' इति विचार्यधर्मशब्दार्थनिर्णयैकप्रयोजनकसूत्रवत् शब्दशक्तिनियकत्वाभावः । अस्तु वा ब्रह्मसाधारण्यम्-तथापि जैमिनिनोभयविधधर्मविचारस्य प्रतिज्ञातत्वे ब्रह्मसूत्राण्यपि तेनैव प्रणेतव्यानि स्युः । न हि महर्षेर्विघ्नशङ्कोत्प्रेक्षितुं शक्यते । स्वाचार्यस्य बादरायणस्य ब्रह्मसूत्रप्रणिनीषां दृष्ट्वोदासामासेति कल्पना तु न; प्रमाणाभावात्, तादृशजनवादानुपलम्भाच्चेत्यस्वरसादाह - यद्यपीति । अश्रुतवेदान्तानामिति । वाय्वादिदेवताप्रीत्यर्थं कर्मणोऽनुष्ठाने वाय्वादीनां नश्वरतया कर्मभिः प्रीतस्य वाय्वादेः फलप्रदानात् प्रागपि नाशसंभवेन निष्फलत्वबुध्द्या अश्रुतवेदान्तानां कर्मण्यश्रद्धा जायेत । श्रुतवेदान्तानां तु तत्तत्कर्माराध्यस्य तत्तद्देवतान्तर्यामिणः कर्मानुरूपफलप्रदस्य सकलकल्पानुयायित्वेन न तच्छङ्केति भावः । यद्वा-अश्रुतवेदान्तानाम् । अपीति शेषः । अविरक्तानामपि कर्मण्यश्रद्धा स्यादित्यर्थः । अत एव वक्ष्यति-"वीतरागव्यतिरिक्तानामग्नि-होत्रादिषु' इत्यादि । ननु महता यत्नेन देवताविग्रहादिकं निराकुर्वाणस्य तत्र तात्पर्याभावे देवताविग्रहं साधयतो बादराययणस्यापि,"नहिनिन्दा' न्यायः कुतो नावतरेदित्यस्वरसादाह - यद्वा वेदप्रामाण्यकर्मावश्यकर्तव्यतातात्पर्यातिशयादिति । देवताविग्रहसत्त्वे, "विरोधः कर्मणीति चेत्' इत्यादिदेवताधिकरणोक्तरीत्या वेदस्याप्रामाण्यं प्रसज्यते । कर्मणश्च देवताप्रीत्यर्थतया देवतां प्रति गुणत्वे कर्मणः फलजनकत्वाभावेन कर्मण आवश्यकत्वं किंजिद्धिीयेतापि । अतो वेदप्रामाण्यकर्मावश्यकत्योर्बद्धादरातिशयेन जैमिनिना देवताविग्रहनिराकरणेऽल्पीयान् कटाक्षः पातितश्चेत्, का क्षतिरिति भावः । तदुक्तरात्रिसत्रेति । "ज्योतिर्गौरायुः' इत्युत्पन्नस्य रात्रिसत्रस्य फलाकाङ्क्षायाम्, "प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ति' इत्यर्थवादसमर्पितप्रतिष्ठाया विपरिणामेन फलत्वमा-त्रकल्पनमेव ज्यायः; न तु विश्वजिन्न्यायेन स्वर्गस्वरूपमपि कल्पयित्वा तस्य फलत्वकल्पनमपि' इति चतुर्थे स्थितम् । ततश्च तेनैव न्यायेनार्थवादिकदेवताविग्रहादिष्वपि तात्पर्यमस्तीति भावः । तस्मिंस्तद्धर्मोऽतिदेष्टव्य इति स्थितमिति । "यस्य लिङ्गमर्थसंयो-गादभिधानवत्' (८-१-२) इत्यष्टमाध्यायद्वितीयाधिकरण इति शेषः । नात्र द्रव्यदेवतयोरिति । ननु"विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात्' (८-१-३२) सति सूत्रे, "यस्य यत्र द्रव्यदेवतासाम्ययोर्विप्रतिपत्तिरस्ति, यथा ऐन्द्रपुरोडाशे देवतासाम्यात् साऩाय्यविध्यन्तः, द्रव्यसाम्यात् पुरोडाशविध्यन्तश्च, तत्र द्रव्यसादृश्यमाश्रित्यैव नियमः प्रवर्तते । कुतः ? कर्मणो हविष्युपल-भ्यमानत्वात्=यागाख्यस्य कर्मणस्त्यागरूपस्य हविष्युपलभ्यमानत्वात् । हविर्हि त्यज्यमानं दृश्यते इत्येवं द्रव्यस्यान्तरङ्गतया तत्सादृश्यमपेक्षितम् । शब्दार्थगतचोदनासादृश्यगवेषणायामन्तरङ्गसादृश्यस्यैवापेक्षितत्वात् ऐन्द्रपुरोडाशे आग्नेयविध्यन्त एव प्रवर्तते; न त्वैन्द्रसान्नाटयविध्यन्तः' इति स्थितम् । न तु द्रव्यदेवतयोः प्रत्यक्षत्वाप्रत्यक्षत्वाभ्यामिति चेत्-अस्त्वेवम् । तस्याप्य-र्थस्योक्तार्थाविरुद्धत्वेन ग्राह्यत्वात् । विपक्षनिरासार्थस्येति । वेदाप्रामाण्यादिनिरासार्थस्येत्यर्थः ।

(कर्मब्रह्ममीमांसयोः क्रमनियामकम्)

द्वितीयाध्यायात्पूर्वं ब्रह्मविचारः किं न स्यादिति । ननु प्रथमलक्षणार्थप्रामाण्यस्योपजीव्यत्वमिव भेदादिलक्षणोक्तस्य शब्दा-न्तरादेः श्रुतिलिङ्गादेश्चोपजीव्यत्वमविशिष्टमिति कथमयमाक्षेपः ? नन्वस्मिन् शास्त्रे सर्ववेदान्तानां ब्रह्मणि समन्वयार्थमुपक्रमादीन्येव ज्ञातव्यानि, न श्रुतिलिङ्गादीनीति चेत्-उपक्रमोन्मेषार्थं श्रुतिलिङ्गादीनामपेक्ष्यत्वात् । न हि ब्रह्माभिधानश्रुत्यादिकमनुपलभ्य "उपक्रमो ब्रह्मविषयः' इति निश्चेतुं शक्यम् । न चैतावता श्रुतिलिङ्गादिकमेव समन्वयोपयोगि, नोपक्रमादिकमिति वक्तुं शक्यम् । श्रुत्यादिष्वपि प्रकरणस्योपक्रमादितात्पर्यलिङ्गाधीनात्मज्ञानत्वात्

। साकाङ्क्षप्रधानवचनं हि प्रकरणम् । प्राधान्यनिर्णयश्च तात्पर्य-लिङ्गावसेयः । किं च येषु वाक्येषु ब्रह्माब्रह्मसमावेशः, तत्र ब्रह्मलिङ्गबलवत्त्वस्य तात्पर्यलिङ्गोपक्रमाद्यवसेयत्वात् श्रुतिलिङ्गादिक-मुपक्रमादिकं चापेक्षितम् । न चोपक्रमादीनां श्रुतिलिङ्गादीनां चान्योन्याश्रयः । उपक्रमादीनां स्वरूपलाभार्थं श्रुतिलिङ्गाद्यपेक्षणम्, बलाबलावधारणार्थमुपकमाद्यपेक्षणमिति विषयभेदेन परस्परापेक्षाया अदोषत्वात् । तस्मात् श्रुतिलिङ्गादिकमुपजीव्यमेवेति तदर्थं तृतीयाध्यायापेक्षया अपि सत्त्वात् द्वितीयाध्यायात्पूर्वमिति शङ्कायास्तत्परिहारस्य चानुत्थानमेव ।

ननु श्रुत्यादीनामुक्तरीत्योपजीव्यत्वेऽपि न तत्परिज्ञानार्थं पूर्वतन्त्रापेक्षा, इहैव, "द्युभ्वाद्यायतनं स्वशब्दात्', "आकाशस्त-ल्लिङ्गात्', "तथाचैकवाक्योपबन्धात्', "प्रकरणात्' इत्यादिसूत्रैः श्रुत्यादिस्वरूपावगमस्य, ःश्रुत्यादिबलीयस्त्वाच्च न बाधः' इत्यादिसूत्रे श्रुत्यादीनां पूर्वबलीयस्त्वावगमस्य च संभवात् । न हि तत्र श्रुत्यादीनां लक्षणमुक्तमस्ति । क्वचिद्वाक्यैक्यमात्रस्य लक्षणमुक्तम् "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्' इति । यानि तु तद्व्याख्यातृभिरुक्तानि लक्षणानि, तानि नोप- युज्यन्ते । तथा हि -

"निरपेक्षो रवः श्रुतिः' इति श्रुतिलक्षणमुक्तम् । तत् सर्वत्राप्यसिद्धम्, शक्तिस्मरणादिसापेक्षत्वात् । पदान्तरसमभिव्याहारनि-रपेक्षत्वं विवक्षितमिति चेत्-न; धूमवति पर्वते प्रयुक्तस्य "सः' इति पदस्यानुमानव्यवधानसापेक्षत्वेऽपि पदान्तरसमभिव्याहार-निरपेक्षत्वेन लिङ्गसमर्पकस्यापि शब्दस्य लिङ्गिनि श्रुतित्वप्रसङ्गात् । "शब्दादेव प्रमितः' इत्यधिकरणे विषयवाक्ये, "अङ्गुष्ठमात्रः पुरुषः' इत्यत्र ईशानश्रुतेरङ्गुष्ठप्रमितः परमात्मेति बोधने अङ्गुष्ठमात्रपदसमभिव्याहारसापेक्षत्वेन श्रुतित्वाभावप्रसङ्गाच्च । ननु पर-मात्मवाचिन ईशानशब्दस्याङ्गुष्ठमात्रपदसामानाधिकरण्यात् वस्तुतोऽङ्गुष्ठमात्रप्रमितपरत्वेन पर्यवस्यतो धर्मिमात्रज्ञापने नैरपेक्ष्यमस्ति, "व्रीहीन् प्रोक्षति' इत्यत्र क्रियेप्सिततमवाचिन्या द्वितीयाविभक्तेः प्रोक्षतिपदसामानाधिकरण्यात् प्रोक्षणत्वेन पर्यवस्यतः क्रिया- मात्रस्य ज्ञापन इवेति चेत्-

तर्हि, "आकाशस्तल्लिङ्गात्' इत्यधिकरणविषयवाक्ये, "आकाशो ह्येवैभ्यो ज्यायान्' इत्यत्र ज्यायः-शब्दस्याकाशपदसमभिव्याहाराद्वस्तुत आकाशपरत्वेन पर्यवसितस्य धर्मिमात्रज्ञापने नैरपेक्ष्यमस्तीति तस्याप्याकाशस्य परमात्मत्वे साध्ये श्रुतित्वप्रसङ्गात् ।

तथा वस्तुसामर्थ्यरूपलिङ्गलक्षणमपि नोपयुज्यते; "आनन्दमयोऽभ्यासात्' इति वर्ण्यमानानां निरतिशयानन्दादिब्रह्मासा-धारणधर्मलिङ्गानां वस्तुसामार्थ्यरूपलिङ्गत्वाभावात् । "इतिकर्तव्यताकाङ्क्षा प्रकरणम्' इति पूर्वतन्त्रोक्तं प्रकरणं न ब्रह्मविचारोपयोगि, सिद्धरूपस्य ब्रह्मण इतिकर्तव्यताकाङ्क्षाविरहादिति स्पष्टमेव । स्थानस्य तु संनिधियथासंख्यलक्षणस्य संग्राहकमेकमनुगतं लक्षणं पूर्वतन्त्रोक्तं न दृश्यते । "समाख्या यौगिकी संज्ञा' इत्येतदपि न युक्तम्, पूर्वतन्त्रे होतृचमसादिसंज्ञायाः, इह शास्त्रे, "स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्' इत्यादिषु श्रुताया ब्रह्मविद्यादिसंज्ञायाश्च समाख्यात्वसंभवेऽपि आध्वयर्वौद्गात्रादिसंज्ञायाः प्रकृतिप्रत्ययस-मुदायरूपत्वेन तदभिमतैकपदश्रुतिरूपतया समाख्यात्वासंभवात् ।

तस्मात् तत्रत्यानां श्रुतिलिङ्गादीनामिहानपेक्षितत्वात् न प्रमाणलक्षणातिरिक्तमपेक्षितमिति चेत् -

तर्हि "अत एव च नित्यत्वम्' इति वेदप्रामाण्यस्य, "तदुपर्यपि बादरायणः संभवात्' इति सूत्रेण मन्त्रार्थवादैः देवतानां विग्रवत्वस्य सिध्या विद्याधिकार हेतुसामर्थ्य संभव साधकेन मन्त्रार्थवादप्रामाण्यस्य,"शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्' इति सूत्रेण स्मृत्यादिषु श्रुत्यनुमापकत्वप्रवृत्तिनिमित्तकानुमानशब्दप्रयोगवता स्मृत्यादिषु प्रामाण्यस्य च सिद्धेः प्रमाणलक्षणमपि नोपजीव्यं स्यात् । ननु पूर्वतन्त्रे पूर्वपक्षसिद्धान्ताभ्यां स्फुष्टं वेदादिप्रामाण्यसमर्थनमस्ति । इह तु न स्फुटप्रतिपत्तिरिति चेत्, व्याख्यानतो विशेषप्रतिपत्तिसंभवात् । उक्तं हि-

"व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम्' इति, इति चेत्-सत्यम् । उक्तरीत्या श्रुतिलिङ्गादिषु तत्रत्येषु च वैषम्यसद्भावेऽपि प्रामाण्ये वैषम्याभावेन तत्र कण्ठरवेण समर्थित-प्रामाण्योपजीवनेऽपि श्रुत्यादेर्वैषम्यसद्भावेन द्वितीयात् पूर्वं ब्रह्मविचारः किं न स्यादित्याक्षेपः संभवतीति नानुपपत्तिरिति भावः ।

(अध्ययनविधिनिरूपणम्)

आत्मज्ञानस्य व्रीह्यादिद्वारेति । नन्वात्मनः कर्मशेषत्वे सत्येवात्मज्ञानस्यात्मद्वारा शेषत्वं स्यादिति वक्तुमुचितम्, न तु व्यत्यासेन ज्ञानस्यात्मद्वारा शेषत्वे सत्यात्मनः शेषत्वं स्यादितीति चेत्-न; "कर्मशेषत्वे' इति निमित्तसप्तमी, "चर्मणि द्वीपिनं हन्ति' इतिवत् । सतीत्यस्य सामीचीन्यमर्थः । समीचीने आत्मद्वारा कर्मशेषत्वे आत्मनः कर्मशेषत्वमुपयुक्तं स्यादिति । शेषत्वस्य सामीचीन्यं नाम संनिपातित्वम् । ततश्चात्मज्ञानस्य कर्मशेषत्वे व्रीहिद्वारा प्रोक्षणस्येवात्मद्वारा संनिपातित्वलक्षणं समीचीनं शेषत्वं सिध्येदिति भावः । आत्मनो द्वारभावे संभवतीति । संस्कार्यतया द्वारभावसंभव इत्यर्थः । फलप्रदतयो शेषत्वमस्त्विति चेदिति । न चैवं देवतायाः कर्मवत् फलप्रदत्वेन कर्मतुल्यकक्ष्यतया समप्राधान्यप्रसङ्ग इति वाच्यम्-भोक्तृत्वार्थानामपि श्मश्रुवपनादीनां यागतुल्यकक्ष्यत्वा- भावेन यागाङ्गत्ववदुपपत्तेः । "फलप्रदतया शेषित्वमस्तु' इति पाठेऽपि यागशेषिभूतभोक्तृत्वार्थानां श्मश्रुवपनादीनां यागार्थत्ववत् यागशेषिभूतपरमात्मार्थानामपि यागाङ्गत्वमविरुद्धमेवेति द्रष्टव्यम् । न तु पुस्तकनिरीक्षणादिनेति । अर्थज्ञानेऽध्ययननियमो भाट्टैरुक्तः । स त्वर्थज्ञानकामनाखण्डनेन प्रत्याख्यातो गुरुणा । अस्मदभिमते त्वक्षरग्रहणार्थाध्ययननियमे स्वाधीनोच्चारणक्षमत्व-लक्षणाक्षरग्रहणकामनासंभवादुपायान्तरसत्त्वेन व्यावर्त्यसंभवाच्च नियमविधित्वमपक्रम्प्यमिति भावः । उपनयनद्वाराऽध्ययनशेषत्वे सतीति । न च प्रथमशब्दाभिप्रेतस्याष्टमवर्षस्याध्ययनं प्रत्यप्याधारतया नोपनयनद्वारा शेषत्वमिति वाच्यम्-"श्रावण्यां प्रौष्ठवद्यां वा उपाकृत्य यथाविधि । युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ।' इत्यष्टमवर्षान्तर्गतिनियमशून्यकालविशेषे विहितस्य, "द्वादशवर्षाण्येकवेदे ब्रह्मचर्यं चरेत्; प्रतिद्वादश वा सर्वेषु' इत्यनेकसंवत्सरसाध्यस्याध्ययनस्याष्टमवर्षाङ्गकत्वासंभवेनोपनयनस्यै-वाष्टमवर्षाङ्गकत्वं वक्तव्यमिति सिद्धम् । ततश्चोपनयनाङ्गभूतकालमध्ययनाङ्गतयोपचारतो निर्दिशन् भाष्यकारो ज्ञापयति, उपन-यनाध्ययनयोरङ्गाङ्गिभावोऽस्तीति । उपनयनद्वाराऽध्ययनशेषत्वात् कालस्येति । अष्टमवर्षाङ्गकोपनयनाङ्गकस्याध्ययनस्य प्राथम्यं सिध्यतीति भावः । अकर्त्रभिप्रायसूत्रविद्दितत्वाच्चेति । आत्मनेपदस्येति शेषः । अकर्त्रभिप्रायसूत्रम्, "संमानन' इति सूत्रम् । अध्ययनाङ्गविधिरिति । ननु उपनयनस्य दृष्टद्वारसभवेऽदृष्टकल्पनाया अन्याय्यत्वादध्ययनं गुरूच्चारणानूच्चारणमेव, न स्वतन्त्र-मित्यध्यापयितृपूर्वकत्वमाक्षेपसिद्धमिति, अध्यापयितृपूर्वकत्वसिद्धयर्थमध्यापयितृपूर्वकत्वमध्ययनाङ्गं नानेन वाक्येन विधेयमस्तीति कथमध्ययनाङ्गविधिरिति चेत्-न; "अष्टवर्षं ब्राह्मणमुपनयीत; तमध्यापयेत्' इत्यत्राध्यापनस्य रागप्राप्तत्वात्, "याजयेत्' इत्यत्र यजनस्येवाध्ययनस्यैवानेन विधिना विधाने उपनयनस्य तत्समभिव्याहारात्तदङ्गत्वं सिध्येत् । तदभावे तु, "उपनयीत' इत्यनेना-ध्ययनाङ्गतयोपनयनं विधीयत इत्यस्यापरिज्ञानाददृष्टार्थमुपनयनं विधीयत इति स्यात् । ततश्च स्वतन्त्रमप्यध्ययनं प्राप्नुयात् । ततश्च "अध्यापयेत्' इत्येतदपेक्षितमिति भावः । यद्वा "ऐन्द्रवायवं गृह्णाति' इतिवाक्याक्षेपलभ्ययागविधायकस्य, "सोमेन यजेत' इत्यस्य विधित्ववत् उपनयनविध्याक्षेपलभ्याध्यापयितृपूर्वकत्वविधायकस्य "अध्यापयेत्' इत्यस्य विधित्वसंभवादिति भावः । यद्यपि "अध्यापयीत' इत्येव मीमांसकग्रन्थेषु लिख्यते, अत्र तु "अध्यापयेत्' इति श्रुतिर्लिख्यते-तथापि "बुधयुधनशजनेङ्' इति सूत्रा-नुकूलत्वेनास्यैव पाठस्य सामीचीन्यम् । क्त्वाश्रुत्योपनयनस्येति । "वाजपेयेषेष्ट्वा बृहस्पतिसवेन यजेत' इतिवत् क्त्वाश्रुत्या कर्त्रैक्यावगमात् तेन च प्रयोगैक्यावगमादङ्गाङ्गिभावः सिध्यतीति भावः । अन्तरङ्गत्वं हि प्रत्यक्षश्रुतिसिद्धमिति । उपनयनसंस्कारे

माणवकगतत्वस्य प्रत्यक्षद्वितीयासिद्धत्वादध्ययनस्य तन्निष्ठित्वाच्च तत्संस्कार्यनिष्ठत्वमन्तरङ्गत्वं प्रत्यक्षश्रुतिसिद्धमिति भावः । नाध्यापनाङ्गत्वं युक्तमिति । अध्यापनाङ्गत्वे क्रियाफलस्य कर्तृगतत्वात्, "स्वरितञितः' इत्येवात्मनेपदं सिद्धमितीदं व्यर्थं स्यादिति भावः । तदवधारणनिषेधार्थमिति । कर्तव्येवेति नियमेनाकर्तृगामिनि फले आत्मनेपदाप्राप्तौ तन्निवृत्तिः क्रियते । आत्मनेपदं प्राप्यत इत्यर्थः ।

ऋत्विजो वृणीत इत्यत्रेति । अत्र केनचित्-"वृणीते' इति रूपं "वृङ् संभक्तौ' इत्यत एव; नान्यस्मात्, ञितः श्नाविकरण-पाठाभावात् । तेन "स्वरित' इति सूत्राप्रवृत्तिरिष्टप्रसञ्जनमेवेत्युक्तम् । तदसत् । (वृङ्वरणे इत्यस्यापि श्नाविकरणे पाठात्) यद्यपि क्र्यादौ "वृञ् वरणे' इति धातुर्धातुवृत्तौ न पठितः, तथापि "वृ ग्न वृञ् वृतौ' इति कल्पद्रुमे पठितः । तस्यैवात्र विवक्षितत्वात् । "वृञ् वरणे' इति क्र्यादौ (स्वादौ) दीर्घान्तस्य पाठात् तत एव तस्य रूपस्य संभवाच्च । नन्वत्र "वृङ् संभक्तौ' इति धातुर्युज्यते । संभक्तिर्हि प्रार्थना । अत एव हि "अवद्यपण्यवर्याः', "एतिस्तुशास्वृ', "ईडवन्दवृशंसदुहां ण्यतः' इत्यादिषु वृत्तिकारादिभिरुदा-हरणेषु ऋत्विग्विषये "वृङ् संभक्तौ' इत्येवोदाहृतम् । अतः, "स्वरितञितः' इतिसूत्राप्रसञ्जनमिष्टप्रसञ्जनमेवेति चेत्-सत्यम्-संभ-क्तितात्पर्यमन्तरेण वरणतात्पर्येण प्रयुक्ते लौकिके प्रयागे आत्मनेपदाभावप्रसङ्गस्यापादयितुं शक्यत्वात् । ततः ऋत्विक्ष्वपि वरणेन निरोधनरूपफलसंभवादिति भावः ।

अग्निसंस्कारव्यवहितस्येति । अव्यवहितस्याग्निसंस्कारस्य कर्तृगतत्वाभावादात्मनेपदं न स्यादित्यर्थः । आधानकर्तरि न व्यवहितफलान्वय इति । ततश्चाव्यवहितफलस्य कर्तृगामित्व एव, "स्वरित' इत्यादिसूत्रप्रवृत्तिः । अत्र चाव्यवहितं संस्कारविशि-ष्टाग्निरूपं फलमाधानकर्तृगतमेवेति, "स्वरित' इत्यादिनात्मनेपदमुपपद्यत इति भावः । असाधारणफलान्वयविषयत्वादिति । क्रियायाः फलं प्रधानभूतं चेत् कर्तृगामि भवति-यदर्थं क्रिया आरभ्यते तच्चेत् फलं कर्तृर्लकारवाच्यस्य भवति, तदा आत्मनेपदमित्यर्थः। अत एव "यजन्ति याजकाः', "पचन्ति पाचकाः' इत्यत्र न भवति । यद्यप्यत्र दक्षिणाभृतिश्च कर्तुः फलमस्ति-तथापि न तदर्थः क्रियारम्भ इत्यदोषः । यथा व्रीहीनवहन्तीत्यत्रेति । "क्रियाणामर्थशेषत्वात प्रत्यक्षे त (क्षोतस्त) न्निर्वृत्त्यापवर्गः स्यात्' (११-१-२७) इत्येकादाशाध्यायाधिकरणे तथैव व्यवस्थापितत्वादिति भावः ।

सक्तुहोमो यथा पुरुषसंस्कार इति । यथा भूतभाव्युपयोगविधुराणां सक्तूनां होमसंस्कार्यत्वाभावेन सक्तुहोमस्य गुणकर्मत्वा-भावेन प्रधानकर्मत्वम्, तद्वदिति भावः । एतदभिप्रायेण पुरुषसंस्कारत्वोक्तिरिति द्रष्टव्यम् । स्वाध्यायस्य हि कर्मत्वावगमो न पुरुषस्येति । यद्यप्यध्ययनस्य प्राभाकराभिमतमर्थकर्मत्वमेव निरसनीयम्; न तु पुरुषसंस्कारत्वम्, तस्य परानुक्तत्वात् । न चाध्य-यनस्य स्वाध्यायसंस्कारत्वाभावे पुरुषसंस्कारत्वमापतेदेव, कोटिद्वयविनिर्मुक्ताकाराभावादिति वाच्यम्-गुणकर्मत्वशून्यानां काम्यानां प्रयाजादीनां च पुरुषसंकारत्वस्याभावात् तथापि प्रधानकर्मत्वनिरासे तात्पर्यम् । प्राप्यत्वमात्रपर्यवसानं चायुक्तमिति । न चैवं वैदिके, "पयो दोग्धि' इत्यत्रापि पयसः संस्कार्यत्वप्रसङ्गः, तत्रापि प्रापण(प्रपूरण?) नियमजन्यादृष्टस्याभ्युपेतत्वेन संस्कार्यत्व-स्येष्टत्वात् । ततश्चाध्ययनेन वेदानां या प्राप्तिः स्वाध्यायोच्चारणेच्छायां सत्यामस्खलिततदुच्चारणोपयोगितालुमूर्धादिवर्णस्थानव-शित्वसहिताविच्छिन्नस्मृतिसंततिचनकवर्णपदवाक्याबलीविषयसंस्कारदार्ढ्यजनकाक्षरराशिग्रहणरूपा, तन्नियमजन्यादृष्टस्य स्वा-ध्यायनिष्ठस्याभ्युपेयत्वमिति भावः । सुवर्णं भार्यमित्यत्रेति । तृतीये सुवर्णभरणस्य पुरुषार्थत्वस्य व्यवस्थापितत्वादिति भावः । प्रतियोग्यभ्युपगम इति, प्रतिबाद्यभ्युपगम इत्यर्थः । सकतून् जुहोतीत्यादिषु प्रत्ययस्वारस्यावगतमपीति । ननु "मैत्रावरुणाय दण्डं प्रयच्छति' इत्यत्रेव "तथायुक्तं चानीप्सितम्' इत्यनीप्सिते । कर्मणि द्वितीया भविष्यतीति कुतो व्यत्ययाश्रयणमिति चेत्-न । तत्र हि दानकर्मभूतेन दण्डेन

मैत्रावरुणस्य संस्कारः; न तु दण्डसाधनकेन दानेन । इह तु सक्तुसाधनकेन होमेनापूर्वम्, न होमकर्मभिः सक्तुभिरिति वैषम्यात् । नन्वध्ययनस्यार्थज्ञानार्थत्वपक्षेऽपि न कर्मत्वभङ्गः, अर्थसिद्धस्याध्ययनसंस्कार्यत्वस्य, चरुमुपदधातीत्यत्रेव द्वितीयया अनुवादोपपत्तेः । अग्निप्रकरणाम्मातेन "चरुमुपदधाति' इति विधिना चरूपधाने स्थण्डिलस्याङ्गतया विनियुज्यमाने, तस्य साक्षात्स्थण्डिलनिर्वर्तकत्वायोगादुपहितेन चरुणा तन्निर्वृत्तिदर्श-नेच्चोपधानस्य स्थण्डिलाङ्गत्वं चरुसंस्कारद्वारकमिति अर्थसिद्धमेव हि चरोरुपधानसंस्कार्यत्वं द्वितीययाऽनूद्यते । एवमिहाप्यध्ययनस्य तत्समाप्त्यनन्तरारम्भणीयमीमांसापरिचयोत्तरकालभाविनि अर्थज्ञाने साक्षात् करणत्वायोगात् अध्ययनगृहीतस्वाध्यायेन कालान्तरे स्मृतिसमारूढेन द्वारेणार्थज्ञानदर्शनाच्चार्थसिद्धं स्वाध्यायस्याध्ययनसंस्कार्यत्वं तव्यप्रत्ययेनानूद्यत इत्युपपत्तेरिति चेत्-न । "अध्य-यनगृहीतस्वाध्यायेनार्थज्ञानं भावयेत्' इत्यर्थाश्रयणेन भट्टमते दोषाभावेऽपि, अध्ययनस्य स्वाध्यायसंस्कारत्वानभ्युपगन्तृगुरुमते, "स्वाध्यायसाधनकाध्ययनकाध्ययनेनार्थज्ञानं भावयेत्' इत्यर्थाश्रयणेन तव्यप्रत्ययार्थत्यागः सिद्ध इति भावः । अर्थावबोधनस्य सप्र-योजनकत्वप्रदर्शनार्थमाह - अनुष्ठानौपयिकेति । चशब्देन समुच्चीयत इति । यद्यपीदं पक्षद्वर्यपि समानम् । तथापि पूर्वपक्षे अपिहि विरोधसूचकः । द्वितीयपक्षे तु जपादेः स्वरूपस्य च समुच्चयपर इति विवेकः । मन्त्राणां स्वाध्यायान्तर्गतानां पृथङ्िनर्देशः किं निबन्धन इत्याशङ्कयाह - मन्त्रवदिति पृथङ् निर्देश इति । उपकारकमन्त्रवत्त्वप्रतिपादनस्य प्रकृतेऽत्यन्तानुप्रयोगात् वतिप्रत्ययान्तत्वमाश्रित्याह - यद्वा यथा बालस्येति । सनियमकोच्चारणमिति । यद्यपि नियमोऽङ्गविधायकवाक्यान्तरप्राप्यः, नाध्ययनशरीरान्तःपाती, तथाप्यर्थज्ञानस्य तच्छरीरानन्तःपातित्वे तात्पर्यम् । अपि तु स्वशाखामात्रवाचीति । अध्यायशब्दो वेदपरः, स्वशब्दः पितृपितामहपरंपरागतस्वीत्ववाची । न च, "स्वाध्यायशब्दवाच्यवेदाख्यक्षरराशेः' इति भाष्येण विरोध इति वाच्यम्-तस्यापि "स्ववेदाख्याक्षरराशेः' इत्यत्र तात्पर्यात् । न च सिद्धान्ते स्वाध्यायस्याध्ययनोद्देश्यतया उद्देश्यगतविशेषणस्य ग्रहैकत्ववदविवक्षितत्वात् स्वीयास्वीयसाधारण्येनाध्ययनं प्राप्नोतीति वाच्यम्-वेदानामानन्त्येन सर्वाध्ययनस्याशक्यत्वेन संकोचेऽपेक्षिते स्वीयत्वस्योद्देश्यगतस्य विवक्षितत्वोपपत्तेः । मात्रचेति । ननु "क्षीरमात्रं पिब' इत्यादावुत्तरपदत्वनियतं मात्रपदं प्रातिपदिकम् । न तु, "प्रमाणे द्वसच्दघ्नञ्मा-त्रचः' इति विहितो मात्रच्प्रत्ययः, तस्य प्रमाणार्थं एव विधानादिति चेत्-न । "ऊरुमात्रम्' इत्यादावपि प्रमाणार्थप्रत्यय इतरव्यव-
च्छेदप्रतीतेर्मात्रच्प्रत्ययव्यतिरेकेणोत्तरपदत्वनियतप्रातिपदिकाभ्युपगमे प्रमाणाभावादित्यत्र तात्पर्यात् । यथा अग्नीनादधीतेति वाक्यमिति । एतच्च, "तत्प्रकृत्यर्थं यथान्येऽनारभ्यवादाः' (३-६-१४) इति तार्तीयाधिकरणे स्थितम् । तत्र हि, आधानविधेः पणर्तादिवत् क्रतुपर्यन्तत्वं पूर्वपक्षीकृत्य अलौकिकस्याहवनीयाद्यग्नेरेव फलाकाङ्क्षाशामकत्वसंभवात् तन्मात्रविश्रान्त एवाधानविधिः,
न क्रतुपर्यन्त इति स्थापितम् । आधानमात्रपरमिति । अग्निसिद्धयर्थाधानमात्र (विधि)परमित्यर्थः । ग्रहणशेषतयाविनियुक्तस्येति । ननु सिद्धान्ते न स्वाध्यायस्य ग्रहणशेषतया विनियोगः, स्वाध्यायस्य शेषित्वावगमादिति चेत्-मैवम् । ग्रहणशेषतया अविनियु-क्तम्येति छेदः । ग्रहणशब्दश्चाथर्ग्रहणपरः; अर्थज्ञानशेषतया अविनियुक्तस्य स्वाध्यायस्याथर्परत्वे प्रमाणाभावादित्यर्थः ।अयं भावः-अर्थावबोधमुद्दिश्य शब्दोच्चारणेन हि लोके वाक्यानां तात्पर्यमवगम्य तन्निर्वाहार्थं मुख्यासंभवे लक्षणादिकं परिकल्प्यते; न तूच्चारणमात्रेण । अत एव "गौरश्वः पुरुषो हस्ती' इति पदानामुच्चारणमात्रेण लक्षणया न कल्प्यते । यदा विशिष्टार्थबोधमुद्दिश्य तेषामुच्चारणमिति तात्पर्यमवगम्यते, तदैव तन्निर्वाहारार्थम्, "अयं गौर्बलीवर्दः, अश्वो वेगवान्, पुरुषो नियतचेष्टः, हस्ती महाबलः' इति गवादिपदानामध्याहारलक्षणादि कल्प्यते । एवं च वेदवाक्यानामर्थावबोधमुद्दिश्योच्चारणाभावे तात्पर्यासिद्धया तन्निर्वाहा-र्थलक्षणागौणवृत्त्यनुषङ्गाध्याहारव्यवधारणकल्पनोच्छेदप्रसङ्गादवश्यं वेदेऽप्यर्थावबोधमुद्दिश्योच्चारणस्य वक्तव्यत्वात् वेदे च लोक इव तमुद्दिश्य रागप्रयुक्तोच्चारणाभावाद्विधिप्रयुक्तमेव तदाश्रयणीयमिति,

विधिश्चाध्ययनविधेरन्यो न दृश्यत इति, तेनैवार्थावबो-धमुद्दिश्य गुरुमुखोच्चारणानूच्चारणरूपमध्ययनं विधीयत इत्यकामेनापि स्वीकतर्व्यम् । एवं च दृष्टफलेऽप्यर्थावबोधे विधिरन्य-तोऽसिध्यतस्तात्पर्यस्य सिद्धयर्थ इति ।

(विचारे रागतः प्रवृत्तिसमर्थनम्)

शब्दस्य बोधकत्वशक्तिस्वाभाव्यादित्यर्थ इति । लोकव्युत्पत्तिसिद्धस्य शब्दानामर्थपरत्वस्यौत्सर्गिकस्य क्वचित्क्वचिल्लौकि-कवाक्ये वक्तृदोषादपवादेऽपि अपौरुषेये तदभावात्; निरपवादस्य स्वत एव समर्थस्यार्थज्ञानोद्देश्यकशब्दोच्चारणस्य विधिनिरपे-क्षत्वाच्च । ननु-शब्दानामर्थपरत्वमात्रं व्युत्पत्तिसिद्धम् । न त्वग्निहोत्रादिवाक्यं तत्तदर्थविशेषपरमित्यपि । तत्तु तत्तदर्थविशेषमुद्दि-श्योच्चारणमपेक्षत इति तदर्थोऽध्ययनविधिः स्यादिति चेत्-न; अध्ययनविधिनापि तदलाभात् । न ह्यध्ययनविधिः प्रतिवाक्यं तत्त-दर्थज्ञानविशेषमुद्दिश्य तत्तद्वाक्योच्चारणे व्याप्रियते । "स्वाध्यायाध्ययनेन यद्भावयितुं शक्यम्, तदनेन भावयेत्' इति विधाने सति अग्निहोत्रादिवाक्याध्याध्ययनेन न्यायलभ्यतत्तदर्थविशेषज्ञानमेव भावयितुं शक्यमिति तत्तदर्थविशेषं तात्पर्यमर्थतः सिध्येदिति चेत्- तर्हि अग्निहोत्रादिवाक्यानामौत्सर्गिकमर्थपरत्वमेव न्यायपर्यालोचनेन तत्तदर्थविशेषतात्पर्यतया पर्यवस्यतीत्येवास्तु; किमुच्चारण-विधिना ? यदि च लोके दृष्टमित्येतावता वेदेप्यर्थावबोधमुद्दिश्योच्चारणमाद्रियेत, तदा स्वतन्त्रवकतृविवक्षितेतरार्थावबोधमुद्दिश्य श्रोतृभिरुच्चारणे कृतेऽपि तस्य वाक्यस्य तत्र तात्पर्यं न दृष्टम् । किंतु स्वतन्त्रकर्तुर्यदर्थावबोधमुद्दिश्योच्चारणम्, तत्रैव तात्पर्यं दृष्टमिति वेदस्य तात्पर्यसिद्धयर्थं पौरुषेयत्वमपि कल्प्येत । वस्तुतस्तु लोकेऽपि नोच्चारणाधीनं तात्पर्यम्, मौनिना लिखित्वा दत्ते परेणापि लिखितं दृष्ट्वा मनसानुसंहिते श्लोकादावुच्चारणाभावात् । किंतु "अस्माद्वाक्यादेतदर्थप्रतीतिर्भवतु' इति वकतृविवक्षाधीनं तदिति । तस्मात् तात्पर्यसिद्धयर्थमध्ययनविधेरर्थावबोधफलकल्पनायाः कथंचिदपि नावकाशः; लोके व्युत्पत्तिसिद्धमर्थपरत्वं वकतृविवक्षिते विशेषे पर्यवस्यति; वेदे तु न्यायलभ्ये विशेषे । तदनुसारेण च लक्षणादिकल्पनमित्येवाभ्युपगन्तव्यम् । अत एव वेदस्य तात्पर्यवत्त्व-सिद्धिमेवाध्ययनविधिफलं मन्वानेनापि न्यायतोऽध्ययनविधिरर्थावबोधमपि फलत्वेन गृह्णातीति तात्पर्यं निश्चित्य तद्बलेन स्वाध्या-यावाप्तेरेव फलतापत्यायकस्य तव्यप्रत्ययस्य स्वारस्यमुल्लङ्घितम् । न ह्यध्ययनविधेरुक्तार्थतात्पर्यनिश्चयोऽयमर्थावबोधमुद्दिश्योच्चार-णविध्यधीनः, तथाभूतविध्यन्तराभावात् । अस्यैव विधेरपेक्षायामात्माश्रयापत्तेः ः किंतु केवलन्यायाधीन एव वक्तव्यः । तस्मात् तात्पर्यसिद्धयर्थमध्ययनविधेरर्थावबोधफलकत्वकल्पनमित्येतत् तावदयुक्तमिति भावः ।

अन्यत्र विनियोगस्त्विति । अध्ययनस्यार्थज्ञानादन्यस्मिन् स्वाध्याये विनियोग इत्यर्थः । गृहीतात्=गृहीतमात्रात् अध्ययन-गृहीतस्येत्युक्तेरिति । ननु "अध्ययनगृहीतस्य' इति भाष्यस्य कथमध्ययनगृहीतमात्रत्वमर्थः ? येन "गृहीतमात्रात्' इत्यंशे तत् उपपादकं स्यादिति चेत्-उच्यते- "अध्ययनगृहीतस्य स्वाध्यायस्य' इति पूर्वभाष्ये "अध्ययनगृहीतस्यार्थावबोधित्वदर्शनात्' इत्येवं प्रमिति-जनकत्वस्वभावस्योपपादितत्वात् तस्यैवापातप्रतीतिजनकत्वस्य विरुद्धत्वात् पूर्ववाक्यं मीमांसापरिकरयुक्तपरम् । अतस्तदविरोधायेदं वाक्यमध्यनगृहीतमात्रपरमिति भावः । केचित्तु मीमांसापरिकरयुक्तस्येत्यनुक्तेः, "सर्वं वाक्यं सावधारणम्' इति न्यायात् सिध्यती-त्याहुः । आपाततोऽवगम्यमानान् दृष्ट्वेत्यन्वय इति । केचित्तु अवगम्यमानानर्थान् प्रयोजनवतो दृेष्ट्वेत्यपि योजयन्ति । अङ्गत्वा-न्यथानुपपत्त्यैवेति । न च"वैदाङ्गानि च सर्वाणि' इति द्वितीयाश्रुत्या अङ्गानां कर्मत्वावगमात् स्वाध्यायस्येवाङ्गानां प्राप्यत्वं किं न स्यादिति वाच्यम्-तथा सति अङ्गाध्ययनस्याक्षरग्रहणमात्रपर्यन्तत्वेऽङ्गानां वेदानुपकारकतया अङ्गत्वभङ्गप्रसङ्गेन मुख्यप्रातिपदिकानुरोधेन "सक्तून् जुहोति' इत्यत्रेव विभक्तिविपरिणामेन कर्मत्व परित्यागेन करणत्वस्याश्र-यणीयत्वात् । "पाठकर्मभूतैरङ्गैरर्थज्ञानं भावयेत्' इत्यपि संभवेन प्राप्तपाठकर्मत्वानुवादेनापि दोषाभावाच्च ।

यथा "चरुमुपदधाति' इत्यत्र "उपहितेन चरुणा स्थण्डिलं निर्वर्तयेत्' इत्येवं प्राप्तमुपधानकर्मत्वं द्वितीययानूद्यते, तद्वदिति भावः ।

(समावर्तनस्मृतिविरोधपरिहारः)

किमभिप्रेत्यैतदुक्तमिति । किमभिप्रेत्य श्रुतिस्मृत्योर्बाध्यबाधकत्वमुक्तमित्यर्थः । ननु "अधीत्य स्नायात्' इत्यादौ "अध्यय-नकर्मिकां भावनां परिसमाप्य' इत्यर्थः । न तु "अध्ययनकरणिकामर्थज्ञानकर्मिकाम्' इति । "वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत', "उच्चैः प्रवर्ग्येण चरन्ति', "अप्स्ववभृथेन चरन्ति' इत्यादाविव तृतीयानिर्देशाभावेन तत्करणिकाया भावनाया असंप्रतिपत्तेः । ननु "अग्निचित् वर्षति न धावेत्' इत्यत्र चयनकरणकभावनाया एव भूताया निमित्तत्वम्, न धात्वर्थमात्रस्य भूतस्य निमित्तत्वम् । ततश्च क्रत्वन्त एवाग्निचिद्व्रतानि प्रवर्तन्त इति पञ्चमे स्थितम् । तद्वदिह किं न स्यादिति चेत्-न-अत्र (तत्र?) "अग्नौ चेः' इत्यग्नौ कर्मणि चिनोतेः क्विब्विधानात् अग्निकर्मिकायाश्चयनकरणिकाया भूताया एव भावनाया निमित्तत्वम् । इह तु, "वेदमधीत्य स्नायात्' इति वेदकर्मिकाया भूताया एव भावनायाः पूर्वकालत्वं क्त्वाप्रत्ययेन प्रतीयते; न त्वर्थज्ञानफलकर्मिकायाः । ततश्चाध्ययनविधेरर्थज्ञान-फलकत्वपक्षे विरोधः स्यादेवेत्यरुचेराह - किंच विरोधे सत्यपीति । गुरोः कर्मातिशेषेण=गुरुशुश्रूषानवरुद्धकालेनेत्यर्थः । यद्वा अतिशेषेण निःशेषमित्यर्थः । निवेशे हि वृत्ते नैयमिकानीति । निवेशः=विवाहः । ननु "ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यवि-शेषेण स्वर्गकाममात्रप्रवृत्तत्वात् शूद्रस्यापि स्वर्गकामत्वाविशेषादनुष्ठानप्रसङ्गो दुर्वारः, "न शूद्राय मतिं दद्यात्' इत्यादिनिषेधस्मृतेः शुश्रूषारहितशूद्रविषयत्वस्य संभवादित्यरुचेराह - किंच यजमानेनेति । अध्ययनलभ्यत्वादिति । अध्ययनसंस्कृतस्वाध्यायस्य प्रयोजनसाकाङ्क्षस्य स्वाध्यायसाध्यसकलकर्मसु विनियोगो भवतीति भावः । "यो ह वा अविदितार्षेयेति । "यो ह वा अविदितार्षेयच्छन्दोदैवताब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्छति गर्तं वा पतति' इति प्रसि-द्धश्रुतिपाठः । अस्यायमर्थः-आर्षेयः ऋषिः; गायत्र्यादि; दैवतम् अग्न्यादिकम्; ब्राह्मणं विनियोजकवाक्यम् । आर्षेयादिकमजानानो याजकोऽध्यापको वा स्थावरतां प्राप्नोति, गर्ते वा पतति, म्रियेत वा । अस्य छन्दांसि निर्विर्याणि भवन्ति । जानानस्य तु तद्विपर्ययो भवति । तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति । प्रतिग्रहर्तुसंवेशनादेरिवेति । न चैतत् रागप्राप्तस्य विधातुमशक्यत्वाच्च इत्युत्तर-ग्रन्थविरुद्धमिति वाच्यम् । रागप्राप्तस्य पाक्षिक्यामप्राप्तौ सतां विधेयत्वदर्शनात् रागप्राप्तत्वविधेयत्वयोर्नात्यन्तविरोध इत्येतत्तात्प-र्योऽयं ग्रन्थः । उत्तरग्रन्थस्तु रागतो नित्यप्राप्तविषय इत्यवविरोधोपपत्तेः । ननु-एतद्भट्टपर्यालोचनायामर्थज्ञानस्याध्ययनविधि-विधेयत्वरागप्राप्तत्वविचार इव प्रतीयते । न चैष युज्यते । अर्थज्ञानस्याध्ययनविधिविधेयत्वस्य मीमांसकैरप्यनभ्युपेतत्वात् । अर्थज्ञानस्याध्ययनविधिफलत्वमेव हि तैः स्वीकृतम्; न तु विधेयत्वम् । फलस्याविधेयत्वात् । चतुर्थे लिप्सा सूत्रे (४-१-२), "फलं चाकर्मसंनिधौ' इति द्वैतीयीकाधिकरणे "कर्मणस्त्वप्रवृत्तत्वात्' इत्याष्टमिकाधिकरणे (८-१-१३)ऽपि फलाविधेयत्वस्य प्रतिपादितत्वात् । एकादशाद्ये च फलाविधेयत्वस्य प्रतिपादितत्वाच्चेति चेत्-न-अत्रार्थज्ञानपदेन विचारस्यैव विवक्षितत्वात् । विचारवैधत्वस्य मीमांसकैरभ्युपेततया तस्य रागप्राप्तत्वेन प्रतिक्षेप्यत्वोपपत्तेः । किंचानेनैव वाक्येनेति । "यो ह वा अविदितार्षेय' इत्यादिवाक्यविहितार्थज्ञानाक्षिप्ततया विचारस्य प्राप्तेर्ना-ध्ययनविध्याक्षेप्यत्वं विचारस्य युज्यते । यथा स्वस्वविधिविहितानां क्रतूनां ज्योतिष्टोमदर्शपूर्णमासादीनामाधानविधिसिद्धैराह-वनीयादिभिः स्वसाफल्यसिद्धयर्थं नानुष्ठाप्यत्वं तथेत्यर्थः ।

ननु न हि कर्मणामल्पास्थिरफलत्वमनन्तस्थिरफलत्वं चेत्यत्र पूर्वपक्षसिद्धान्तरूपेण इत्यस्य व्युत्प्रमेणान्वयो द्रष्टव्यः । "स्वरूपे निरूपिते' इत्युक्ते "स्वरूपमात्रे निरूपितेऽपि कर्मणामल्पास्थिरफलत्वमावृत्तिविधानादिभिर्ज्ञात्वा'

इत्यस्यार्थस्याध्याहारसापेक्षतया विलम्बितप्रतीतिकतया अन्यथा व्याचष्टे- यद्वा कर्मविधिस्वरूपं निरूपितमिति । अस्मिन् पक्षेऽस्य भाष्यस्येत्थमवतारिका-ननु परमात्माराधनकर्मसु, "स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः' इत्यनन्तस्थिरफलतयावगतेषु कथमल्पास्थिरफलत्वावगति-रित्याशङ्कयाह - कर्मविधिस्वरूपे निरूपित इति । अस्मिन्नपि पक्षे "कर्मविधिस्वरूपे' इत्यस्य परमात्माराधनत्वविनिर्मुक्तस्वरूप-मात्रेऽवगते अल्पास्थिरफलत्वावगतिप्रतिबन्धकपरमात्माराधनरूपत्वप्रतीत्यभावेन अल्पास्थिरफलत्वमवगम्येत्यस्याप्यर्थस्य विलम्बितप्रतीतिकत्वमविशिष्टमित्यस्वरसो बोध्यः । केचिदेवं व्याचक्षते - तत्र कर्मविधिस्वरूपे निरूपित इति । विधिश्च स्वरूपं च विधिस्वरूपम् । कमर्विधौ कर्मस्वरूपे च निरूपित इत्यर्थः । प्रत्यब्दं चातुर्मास्याद्यावृत्तिविधौ निरूपिते चातुर्मास्यानां क्षय्यफलत्व-

निश्चयो भवति । यदि चातुर्मास्यानामक्षय्यफलत्वम्, तदा पुनस्तदनुष्ठानवैयर्थ्यप्रसङ्गादित्यवगतेः स्वत एवोत्पत्तेः । तथा चातु-र्मास्यादिस्वरूपं सहस्रसंवत्सरसाध्यविश्वसृजामयनादिस्वरूपं च निरूपयता चातुर्मास्यादिष्वल्पवित्तव्ययायाससाध्येषु, "फलस्य कर्मनिष्पत्तेः तेषां लोकवत् परिणामतो विशेषः स्यात्' (पू-मी.१-२-१७) इति न्यायालोचनसनाथचेतसा नित्यनैमित्तिकक-र्माराधितपरमपुरुषानुग्रहलब्धचित्तनैर्मल्येन पुंसा चातुर्मास्यादिकर्मणामनित्यफलत्वस्य सुज्ञानत्वादिति भावः ।

येनेति निर्देशो विज्ञानाभिप्राय इति । ततश्च, "प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' इति प्रतिनिर्दिश्यमानाया एव ब्रह्मविद्याया यच्छब्देन पराम्रष्टव्यतया ययेति स्त्रीलिङ्गनिर्देशो न प्रसञ्जनीय इति भावः । अतो निरूप्य संपाद्यैस्तैरिति । ननु, "शमदमाद्युपेतः स्यात्' इत्यत्र न शमादिस्वरूपं निरूप्यते, अपि तु शमादेरुपासनाङ्गत्वम् । तच्च श्रुतिबलप्राप्तस्य श्रवणं प्रति अङ्गभावस्य नोप-जीव्यमिति चेत्-न-तत्राविहितविषयव्यापारोपरमः शम इत्यस्यार्थस्य तदधिकरणे व्युत्पाद्यत्वादिति भावः । "ब्रह्मविदाप्नोति' इत्यस्यानन्तस्थिरफलब्रह्मप्राप्तिपर्यन्तप्रामाण्यसंभवे अनन्तस्थिरफलत्वमात्रप्रतिपादनपरत्वमयुक्तमित्यस्वरसादाह - यद्वा विद्यया अनन्तस्थिरेति । विषयस्य दर्शितत्वादिति । ब्रह्मस्वरूपस्येत्यर्थः । ततश्च "पश्यः' इति ब्रह्मदर्शनमेव पर्यवस्यतीति भावः । समुच्चयो युक्त इति । अत्र केचित्-"ननुच' इति निपातसमुदायोऽयं नन्वर्थक एव, ततोऽतिरिक्तार्थाप्रतीतेः । ननुशब्दस्य प्रयोक्तृ-धर्मभूतशङ्काद्योतकत्वेन "ननु च' इत्यस्य "शङ्का च' इति शब्दतुल्यार्थत्वाभावात् । अतोऽत्र चशब्दस्य समुच्चयार्थत्वप्रसाधने नातीवाभिनिवेष्टव्यमिति मन्यन्ते । ननु कर्मविचारनैरपेक्ष्यसिद्धयर्थं कर्मणां वाक्यजन्यं क्षयिफलत्वज्ञानमेव वक्तव्यम् । न तु ब्रह्मो-पासनस्याक्षयफलत्वज्ञानमित्यत्राह - ब्रह्मोपासनस्येत्यादिग्रन्थ इति ।

(लघुपूर्वपक्षघट्ट ः)

विवक्षितेतरगामित्वव्युदासार्थः प्रथम एवकार इति । विवक्षितं साधनचतुष्टयम्, तदितरः कर्मविचारः । अत्र केचित्-यच्छ-ब्दान्वित एवकारः तावत्खल्वादिशब्दवत् वाक्यालङ्कारार्थ एव । न हि"ब्रह्मजिज्ञासा यन्नियमेनापेक्षते तदेव पूर्ववृत्तं वक्तव्यम्' इत्यस्मादधिकस्याथर्स्य एवकारसहिताद्वाक्यात् प्रतिपत्तिरस्ति । अस्य वाक्यस्य नियमेनानपेक्षितकर्मविचारपूर्वववृत्तत्वव्युदासमा-त्रपरत्वेन कर्मविचारे नियमेनापेक्षितत्वव्युदासपरत्वाभावादिति वदन्ति । तदेतदेवकारार्थानभिज्ञानविजृम्भितम् । विशेष्यसंगतो ह्येवकारो विशेषणस्य तदितरयोगव्यवच्छेदार्थः । "पार्थ एव धनुर्धरः' इत्युक्ते हि धनुर्धरत्वरूपविशेषणस्य पार्थेतरगामित्वं व्यव-च्छिनत्त्येवकारः । "पार्थ एव धनुर्धरः' इति वाक्यस्य "पार्थादन्यो धनुर्धरो न' इत्यर्थः । अत एव, "षड्िंवंशतिरित्येव ब्रूयात्' इत्यत्र एवकारोपबन्धात् षड्िंवंशतिमन्त्रो न विधीयते । अपि तु तदितरमन्त्रो निषिध्यत इति पूर्वतन्त्रे निर्णीतम् । ततश्च "यदेव नियमेना-पेक्षते' इति वाक्यस्यायमर्थः - "यद्व्यतिरिक्तं नियमेन नापेक्षितम्, तद्व्यतिरिक्तं न पूर्ववृत्तमिति । ततश्च प्रथम

एवकारो नियमेना-पेक्षितत्वस्य यच्छब्दार्थातिरिक्तगामित्वव्यवच्छेदार्थकः, द्वितीयस्तु यच्छब्दनिर्दिष्टात् तच्छब्दार्थादतिरिक्तस्य पूर्ववृत्तत्वव्युदासकः । इयांस्तु विशेषः-प्रथम एवकारोऽनुवादी । द्वितीयस्तु पुरोवादीति । वेदान्तमात्राध्ययनस्याशास्त्रीयत्वादाह - यद्वा अधीतकृत्स्नवे-दस्यापीति । न त्वन्ययोगव्यवच्छेदपरमिति । पूर्वभागाध्ययनव्यवच्छेदपरं नेत्यर्थः । ननु, "साम्ना स्तुवीत' इति साम्न एव स्तोत्र- द्वारा कर्माङ्गत्वम्, नोद्गीथादेरिति शङ्कामुद्गीथादिस्वरूपप्रकाशनेन निराकुर्वन्नादिपदग्राह्यं चाह - एकस्य साम्न इत्यादिना । ननु कथं साम्नः पञ्चभागात्मकत्वम् ? हिंकारः, प्रस्तावः, आदिः, उद्गीथः प्रतिहारः, उपद्रवः, निधनम्, इति सप्तविधित्वं दृश्यते । अत एव हि, "सप्तविधं सामोपासीत' इति विधिरित्याशङ्कय हिंकारस्य प्रस्तावेऽन्तर्भावात्, आदिशब्दितस्य ओंकारस्य चोद्गीथेऽन्तर्भावात् पाञ्चविध्ये नानुपपत्तिरित्यभिप्रयन्नाह - प्रस्तावो हिंकारपूर्वं गीयत इति । एकैकोपासनं विधीयत इति । "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते । सैषा देवता प्रस्तावमन्वायत्ता','सैषा देवतोद्गीथमन्वायत्ता' इत्यादिष्विति शेषः । क्वचिच्चावयवावयवभृतप्रणवाद्युपासनं विधीयते, ओमित्येतदक्षरमुद्गीथमुपासीतेति इति पाठः समीचीनः । मध्ये "तत्रोद्गीथावयव-भूतप्रणवोपासनं विधीयते' इति क्वचित् पठ्यते । न तस्य समीचीन्यं पश्यामः । "ओमित्येतदक्षरमुद्गीथमुपासीत' इति वाक्यस्योद्गी-थावयवप्रणवोपासनविधिपरत्वं च, "व्याप्तेश्च समञ्जनम्' इत्यत्र स्पष्टीभविष्यति । केचित्तु कर्माङ्गाश्रयेति भाष्यस्यायमर्थः- कर्मा-ङ्गाश्रयो (यमु ?) द्गीथस्यादिरुद्गीथादिः प्रणवः, तस्योपासनमिति । अत एवैतदभिप्रायेण "तत्रोद्गीथावयवभूतप्रणवोपासनं विधीयते' इत्युक्तमिति वदन्ति । "स्वायत्ते शब्दप्रयोगे' इति न्यायेन "कर्माङ्गोद्गीथादिविषयाण्युपासनानि' इति वक्तव्ये "कर्माङ्गाश्रयाण्युद्गी-थाद्युपासनानि' इति भाष्ये वचनव्यक्तिः किमर्थमाश्रितेत्याशङ्कयाह - कर्माङ्गोद्गीथाद्याश्रयाण्युपासनानीत्युक्त इति । उपासन-मात्रस्य च पक्षीकारः प्रतीयेतेति । ननु कर्माङ्गाश्रयत्वस्य हेतूकरणादेव यावति हेतुर्विश्राम्यति तावत एव ग्रहणं तथेति भविष्यति, "यथा पर्वतो धूमवत्त्वाद्वह्निमान्' इत्यत्र धूमवतः पर्वतस्य ग्रहणं तथेति चेत्-सत्यम्-तादृशन्यायप्रतिसंधानाभावदशायामुपासनमा-त्रपक्षीकारप्रतीतिर्जायेत । अत एव "प्रतीयेत' इति प्रतीतिमात्रमापादितम् । भाष्ये-अनभिज्ञो भवान् शारीरकशास्त्रविज्ञानस्येति । शास्त्रप्रतिपाद्यं विज्ञानं शास्त्रविज्ञानम् । मध्यमपदेलोपी समासः । तदेतदाचष्टे - शास्त्रे प्रधानतया प्रतिपाद्यमित्यादिना । प्रति-पाद्यशब्द उत्पाद्यपरः । "आत्मैकत्वविद्याप्रतिपत्तये' इति परव्यवहारानुसारादुत्पत्तिः प्रतिपत्तिशब्देन व्यवहृता । वक्ष्यति च - "प्रतिपादकानि निष्पादनक्षमाणि' इति । अतो लाक्षणिकपयोगो न दोषायेति द्रष्टव्यम् । मिथ्याज्ञानं भ्रान्तिज्ञानमिति । मिथ्या-विषयं ज्ञानं मिथ्याज्ञानमिति मध्यमपदलोपी समास इति भावः । मूलाज्ञाननिवृत्तेरेव प्रयोजनत्वमभिप्रयन्नाह - यद्वा मिथ्याभूत-मज्ञानमिति । तुशब्दद्वयं शङ्काद्वयव्यावृत्त्यर्थ(वर्तक)मिति । उपनिषत्स्वधीतत्वात् ब्रह्ममीमांसायां निरूप्यमाणत्वाच्चोद्गीथा-द्युपासनं ब्रह्मविद्यापेक्षितमित्येका शङ्का । "ततः किम्' इत्यनेनाभिप्रेतासंगतत्वशङ्का द्वितीया । एतच्छङ्काद्वयस्य यथाक्रमं व्यावृ-त्त्यर्थमित्यर्थः । अत्र भास्करीयाः प्रत्यवतिष्ठन्त इति । अत्र च हेतुरुत्तरत्र स्पष्टः । न समसमुच्चयपर इति । तन्मते, "तमेतं वेदा-नुवचनेन' इत्यत्र "सहयुक्तेऽप्रधाने' इति तृतीयया वेदानुवचनादीनां "विविदिषन्ति' इति निर्दिष्टवेदनापेक्षया अप्राधान्याभ्युपगमेन कर्मणां विद्यायाः फलोपकार्यङ्गत्वमात्रस्याभ्युपगतत्वेन तैरपि समसमुच्चयस्यानभ्युपगमादिति भावः । समुच्चित्योपदेशादित्यत्र समु-च्चित्यशब्दवदिति । इदं हि वाक्यम्, "अन्तर उपपत्तेः' इत्यधिकरणभाष्यस्थमग्निविद्यात्मविद्याविषयम् । तयोः समुच्चयानभ्युपग-मादिति भावः । विशेषणविशेष्यभावेन निर्दिष्टमिति । न च समुच्चितशब्दो वैषम्यं न सहत इति वाच्यम्, अङ्गाङ्गिसमुच्चयेऽपि समुच्चयशब्दप्रयोगदर्शनात् । न ह्यत्र समसमुच्चयः श्रूयत इति भावः । चः प्रतिपादकसमुच्चय इति । श्रुतिसूत्रयोः प्रतिपादकयोः समु- च्चय इत्यर्थः । तज्ज्ञानस्य कथं पूर्वभावित्वमिति ।

ब्रह्मविचारपूर्वभावित्वमित्यर्थः । निरूपयिष्यमाणत्वमभिप्रेत्योक्तमिति । "अन्तरा चापि तु तद्दृष्टेः', "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इत्यादावधिकारिविशेषे ब्रह्मविद्यायाः कर्मविशेषैः समुच्चयतदभावयोः प्रतिपादयिष्यमाणत्वादिति भावः । अधिकारिविशेषनिष्ठब्रह्मविद्याया अनिर्दिष्टत्वात्समुच्चयतदभावयोः सामान्येन विद्याविषयत्व-मेवोचितमिति मत्वाह - यद्वा नित्यनैमित्तिकयोरिति । विद्यायाश्चेति शेषः । नित्यनैमित्तिकाभ्यां समुच्चयः, न काम्यनिषिद्धा-भ्यामित्यर्थः । पदार्थज्ञानपूर्वकत्वादिति । यद्यपि यज्ञादिपदार्थावगमाय न मीमांसापेक्षा, व्याकरणकोशाप्तवाक्यादिभिर्व्युत्पत्ति-संभवात् । मीमांसाया अपि लोकप्रसिद्धपदार्थव्यवहारितया पदार्थावगतिप्रयोजनकत्वाभावाच्च -तथापि ग्राह्याग्राह्यकर्मविभागो मीमांसाधीन इति भावः । यद्वा पूर्वमीमांसायामपि, "यजतिचोदना द्रव्यदेवताक्रियं समुदाये' (४-२-२७) इत्यादिदर्शनात्, व्या-पन्नादिपदार्थनिर्णयदर्शनाच्च पदार्थनिर्णायकत्वमपि संभवतीत्यपि द्रष्टव्यम् । आशयमजानानश्चोदयति - ननु गामानयेति वाक्या-दिति । वाक्यार्थं पूर्वं प्रतिपद्येति । प्रयोजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य गवानयने प्रवृत्तिमुपलभ्य "इयं च गवानयने प्रवृत्तिर्गवानयनकार्यताज्ञानसाध्या गवानयनप्रवृत्तित्वात् संप्रतिपन्नगवानयनप्रवृत्तिवत्' इति तस्याः प्रवृत्तेर्गवानयनकार्यताज्ञान-साध्यतां निश्चित्य, "तच्च ज्ञानं वाक्यात्पूर्वमजातत्वात् वाक्यानन्तरं जातत्वाच्च वाक्यजन्यम् । तस्मात् गवानयनं वाक्यार्थः' इति प्रतिपद्येत्यर्थः । ततश्च "अस्य वाक्यस्यायमर्थः' इति वाक्यार्थत्वज्ञानपूर्वकमेव "अस्य पदस्यायमर्थः' इति ज्ञानम्, न तु "अस्य पद-स्यायमर्थः' इति पदार्थत्वज्ञानपूर्वकम् "अस्य वाक्यस्यायमर्थः' इति वाक्यार्थत्वज्ञानमुत्पद्यत इत्यर्थः । शाब्दज्ञानत्वावच्छिन्ने वृत्त्या पदजन्यपदार्थोपस्थितेर्हेतुत्वमित्येतदेव हि वाक्यार्थज्ञानस्य पदार्थज्ञानपूर्वकत्वम् । न तु वाक्यार्थत्वज्ञानस्य पदार्थत्वज्ञानपूर्वकत्वम्, येनास्याक्षेपस्यावकाशः स्यादिति स्वाशयमाविष्करोति - उच्यते - व्युत्पन्नात् शब्दादिति । व्युत्पत्तावपि न वाक्यार्थधिय इति । यद्यपि शाब्दज्ञानत्वावच्छिन्ने पदजन्यपदार्थोपस्थितेर्हेतुत्वकथनेनैव प्रकृतोपयोगसिद्धेर्व्युत्पत्तिदशायां वाक्यार्थत्वज्ञानस्य पूर्वभाव-प्रत्ययाख्यानं न प्रकृत उपयुज्यते -तथापि पराभिमानखण्डनार्थतयोपन्यस्तमिति द्रष्टव्यम् । याज्यापुरोनुवाक्यामन्त्रानुसारेणेति । सरस्वतीदेवत्ययाज्यापुरोनुवाक्ययोः प्राक् पठितत्वादिति भावः । तेनैव क्रमेणानुष्ठानं निर्णीतमिति । श्रुत्यर्थपाठादिक्रमनियाम-काभावादनियम इति प्राप्ते प्रधानप्रत्यासत्तिसिद्धयै मुख्यक्रमात् स्त्रीदेवत्यस्य यागस्य निर्वापादयश्चोदकप्राप्ता धर्माः प्रागनुष्ठेया इति निर्णीतं पञ्चमे "मुख्यक्रमेण वाऽङ्गानां तदर्थत्वात्' (५-१-१४) इत्यत्र । क्रमनियामक (निश्चायक) हेतुवैषम्यमेवेति । दृष्टान्ते याज्यापुरोनुवाक्याक्रमः शेषिक्रमनियामकः; दार्ष्टान्तिके तु कार्यकारणभाव इति हेतुवैषम्यमिति भावः । उपासनस्यैव विचारं प्रति शेषित्वादिति । उपासनस्य स्वविचारं प्रत्येव शेषित्वात् शेषिक्रमादापतन् शेषयोः क्रमः शारीरकतृतीयाध्यायकर्मविचारविषय एव स्यात्; न तु कृत्स्नशारीरककर्ममीमांसाविषय इत्यर्थः । तदपेक्षितत्वेनेति । उपासनापेक्षितत्वेनेत्यर्थः । कृत्स्नाया अपि ब्रह्ममीमां-सायाः इत्यस्यानन्तरम् "उपासनशेषत्वेन' इत्यध्याहर्तव्यम् । यादवपक्षं चोपजीव्येति । समसमुच्चयाङ्गाङ्गिभावयोस्तदभिमतयोरपि प्रतीतेरिति भावः । पाश्वर्स्थश्चोदयतीति । यादवानभिमतकर्मविचारपूर्ववृत्तत्वोपन्यासात्, सिद्धान्तिग्रन्थत्वे साधनसाध्यद्वित्व-निरासकपरिहारग्रन्थासामञ्जस्यप्रसङ्गाच्चेति भावः । चशब्दः प्रतिपाद्यसमुच्चय इति । द्वितीयान्तेनाध्याहृताङ्गभावशब्देन चशब्द-स्यान्वय इति भावः । ननु यदा, बाढम् इत्यादिग्रन्थो भास्करसिद्धान्त्यन्यतरचोद्यपरः, तदा साध्यसाधनद्वित्वनिरासकभाष्य-ग्रन्थस्याप्रसक्तप्रतिषेधकत्वं स्यादित्याशङ्कां प्रतिक्षिपति - यदा बाढमित्यादीति । व्यावृत्त्यन्वयरूपा विशेषा इति । भावाभावरूपा इत्यर्थः । सकलविशेषप्रत्यनीकमित्यत्र विशेषशब्देन स्वगतधर्मस्यापि ग्रहणे तत एव ज्ञातृत्वज्ञेयत्वव्यावृत्तेरपि सिद्धत्वात् मात्रचा ज्ञातृत्वज्ञेयत्वव्यावृत्तिकथनमस्वरसमित्यस्वरसादाह - यद्वा सकलविशेषप्रत्यनीकशब्देनेति ।

अज्ञाननिवृत्त्यन्तर्गतेत्यर्थ इति । मूले सकलभेददर्शननिवृत्तीति
कार्यकारणयोरभेदोपचारादविद्यानिवृत्तेर्भेददर्शननिवृत्तिरूपत्वोक्तिरिति भावः ।

एकस्मादनेकवाक्यानामिति । "विद्यां चाविद्यां च' इति वाक्यमेकमिति भावः । अस्फुटार्थात् स्फुटार्थानामिति । "प्राबल्यं विवक्षितम्' इत्यनुषङ्गः । ननु कर्मणोऽन्तवत्त्वे श्रूयमाणे कथं तत्फलस्यान्तवत्त्वमुच्यते इत्याशङ्कयाह - अनेन वाक्येनेत्यादिना । फलद्वारकत्वमुक्तमिति कर्मणः स्वत एवान्तवत्त्वेन तस्यानुपदेष्टव्यत्वात्, "तद्यथा' इत्यादिश्रुतिवशाच्च फलस्यैवान्तवत्त्वम् "अन्तवदेवास्य तद्भवति' इत्यादिवाक्यप्रतिपाद्यमित्यर्थः । समुच्चयपरवाक्यस्य श्रुत्यन्तरानुगुण्येनेति । यद्यपि "यदपि चोक्तम्' इत्यत्र "साध्यसाधनद्वित्ववत् कर्मापेक्षितत्वमपि यदुक्तम्' इत्युक्तिक्रियायामेव समुच्चयः प्रतीयते, न निर्वाहक्रियायाम्-तथाप्येतत् फलितार्थकथनमिति द्रष्टव्यम् । "यदपि चेदमुक्तं यज्ञादिकर्मापेक्षा विद्येति' इत्यत्र "यज्ञादिकर्मापेक्षा विद्येति यदुक्तम्' इत्युक्ते "यद् विद्यायां कर्मसापेक्षत्वमुक्तम्' इति सापेक्षत्वस्यैव यच्छब्दनिर्दिष्टतया स्वरसतः प्रतीयमानत्वात् तस्योत्तरवाक्ये विविदिषोपयोगप्रतिपादनमनुचितमित्याशङ्कय, "यज्ञादिकर्मापेक्षा विद्या' इत्यनया वचनव्यक्तया अर्थाद्विद्यापेक्षितत्वेन यत्किंचित्कर्मोक्तमिति कर्मण एव यच्छब्दनिर्दिष्टत्वात् तस्य विविदिषोपयोगप्रतिपादनमविरुद्धमित्यभिप्रायेणाह - अनया वचनव्यक्तयेति । निर्देशस्वारस्यमस्तीति । फलपदस्वारस्यमात्रं नास्तीत्यर्थः । यादवमतप्रतिक्षेपकतया प्रथमव्याख्यानम् । अस्मिन् पक्षे फलपदस्वारस्यमस्ति; "यज्ञादिकर्मापेक्षा विद्या' इति निर्देशस्याङ्गाङ्गिभावसूत्रस्मारकस्य न स्वारस्यम् । सिद्धान्तिमतप्रतिक्षेपके द्वितीयव्याख्याने "यज्ञादिकर्मापेक्षा विद्या' इति निर्दे-शस्वारस्यमस्ति; फलपदस्वारस्यं नास्ति । अत उभयपदस्वारस्यसिद्धयर्थं भास्करपक्षप्रतिक्षेपपरतया व्याचष्टे - अथवा यज्ञादीति । प्रयाजादिवदिति । ननु भास्करेण यज्ञादिवाक्यस्य वेदनं प्रति फलोपकार्यङ्गत्वमात्रप्रतिपादकत्वाभ्युपगमेऽपि फलार्थत्वानभ्युपगमान्मोक्षार्थप्रतिपादनपरत्वनिषेधेऽप्रसक्तप्रतिषेधः स्यादिति चेत्-न-प्रयाजादीनां करणानुग्राहकाणां करणानुग्रहद्वारा फलपर्यन्त-त्वसंभवादित्यभिप्रायान्नात्यन्ताप्रसक्तप्रतिषेध इति ध्येयम् । असिना जिघांसतीति । असेर्हनने करणत्वं प्रतीयते; न जिघांसायाम्; एवं "विविदिषन्ति' इति वाक्येन वेदानुवचनशब्दितस्य ब्रह्मयज्ञस्य, यज्ञस्य, दानस्य, कामानशनरूपस्य तपसश्च वेदनहेतुत्वं प्रतीयत इति भावः । वाक्यद्वयेनेति । "विविदिषायां जातायाम्' इत्येकं वाक्यम् । "तदेवं जन्मान्तरशत' इत्यपरम् । अन्तरङ्गत्वं स्पष्टमिति । विद्यासंयोगश्रवणादिति भावः ।उक्तं च शांकरभाष्ये सर्वापेक्षाधिकरणे - "विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि । विविदिषासंयोगात् बाह्यतराणि यज्ञादीनि' इति । विविदिषायाः पूर्वं हि कर्मोपयोग इति ।

"प्रत्यक्प्रवणतां बुद्धेः कर्माण्यापाद्य शुद्धितः । कृतार्थान्यस्तमायान्ति प्रावृडन्ते घना इव ।।
इति तदुक्तेः । प्राग् बीजावापात् कर्षणम्, तदनन्तरमकर्षणमिति कर्षणाकर्षणाभ्यामङ्कुरादिनिष्पादनवत्, आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ।।' (गी.६-३)

इत्यादिवचनानुसारेण चेतसः शुद्धया विविदिषारूपप्रत्यक्प्रावण्यपर्यन्तं कर्मानुष्ठानम्; ततः सन्यास इति कर्मतत्सन्यासाभ्यां विद्या-निष्पत्त्युपगमादिति भावः । इदानीमप्यनुष्ठानायेति । अत्र । केचित्-अनुत्पन्नविविदिषस्य पुंसो यावद्विविदिषोत्पत्ति अस्मिन्नपि जन्मनि कर्मानुष्ठानस्येष्टत्वान्नैतच्छङ्काव्यावर्तको जन्मान्तरशब्दः । अपितु अन्तःकरणशुद्धिरनेकजन्मानुष्ठितनित्यनैमित्तिककर्म-साध्येति दर्शयितुमेवेति वदन्ति । अनेकजन्मसंसिद्ध इति । जन्मान्तरशब्दस्वारस्यादव्यवहितजन्मन एव ग्रहणं स्यात् । तत्र चाने-कजन्मत्वासंभवादस्यापि जन्मनो ग्रहणं भविष्यतीत्यभिप्रायः । शोधकवाक्यमिति । कारणत्वशङ्कितदोषव्युदासकं वाक्यमित्यर्थः । न कर्मेत्यर्थ इति । यज्ञादिकं कर्म न करणमित्यर्थः । निष्पादनक्षमाणीति । आत्मैकत्वपराणीत्यर्थः । भाष्ये-न्याययुक्तार्थग्रहण-मिति ।

तात्पर्यनिर्णायकोपक्रमादिन्यायानुसंधानपूर्वकं सर्वाण्यपि वेदान्तवाक्यान्यात्मैकत्वतात्पर्यकारणीत्येवं तात्पर्यरूपार्थग्रहणमित्यर्थः । न तु वाक्यार्थग्रहणम्, तस्य तन्मते श्रवणफलत्वात् । पूर्वप्रकृतादेवेत्येवकाराभिप्राय इति । यद्यपि ज्ञानकर्मार्थ -स्वभावः प्राक्प्रस्तुतः, न तु शमाद्यर्थस्वभावः, व्यक्तिभेदात्-तथाप्यर्थस्वभावत्वेनैक्यमाश्रित्य एवकारः प्रयुक्त इति द्रष्टव्यम् । जिज्ञा-सानुपपत्त्युपपादकतया "अर्थस्वभावादेव' इत्युत्तरग्रन्थं व्याख्याय, अधुना "कर्म च पूर्ववृत्तमस्तु' इति शङ्कापरिहारपरतया व्याचष्टे- यद्वा अनेन विना जिज्ञासानुपपत्तेरिति । "अनेन विना जिज्ञासानुपपत्तेः' इत्यंशस्य फलितमर्थमाह - शमाद्यर्थस्वभावादित्यर्थ इति । प्रथमस्यैवकारस्य भाव इति । अर्थस्वभावातिरिकतस्य हेतुत्वप्रतिक्षेपक इत्यर्थः । शमाद्यर्थस्वभाव उक्त इति । इदमुपलक्ष- णम् । तयोरपि स्वभाव इत्यर्थः । तत्र ज्ञानकर्मार्थस्वभावद्वयस्यात्यन्ताप्रकृतत्वमभिप्रेत्याभिप्रेतत्वोक्तिः; न त्वथर्स्वभावशब्दानुक्तत्वात् । अत एवार्थस्वभावशब्दितस्येतरनिरपेक्षस्य साधनचतुष्टयस्य पूर्ववृत्तत्वायोगान्ययोगव्यवच्छेदहेतुत्वं वक्ष्यमाणमुपपद्यत इति द्रष्टव्यम् । इदंशब्दो हि साधनचतुष्टयपूव्रवृत्तत्वपर इति । "इदमेव पूर्ववृत्तम्' इतीदंशब्दो हीत्यर्थः । तस्मादिति । शमाद्यर्थ-स्वभावादित्यर्थः । भाष्ये ब्रह्मस्वरूपाच्छादिकाविद्यामूलमिति । आच्छादिका च सा अविद्या चेति न कर्मधारयः, येन पुंवद्भावात् "आच्छादकाविद्या' इति स्यात्, किंतु "धात्वर्थे ण्वुल्' इति भावे ण्वुलि कारिकाशायिकादिवदाच्छादिका । ततस्तादर्थ्यचतुर्थी-समासः । आच्छादनकारिण्यविद्येत्यर्थ इति एवं । निर्वाहान्तरमपि द्रष्टव्यम् । यद्वा अपारमार्थिकं भेददर्शनमेवेति । बन्धमूलभेद-दर्शनमपारमार्थिकमेवेत्यभिप्रायः । "एषोऽणुरात्मा चेतसा वेदितव्यः',"दृश्यते त्वग्रयया बुद्धया' इत्यादिप्रमाणानुसाराद्वाक्यार्थ-भावनापरिपाकसहितमन्तःकरणं त्वंपदार्थस्यापरोक्षतत्पदार्थतामाविर्भावयति' इति वाचस्पतिवचनानुसारेण मनस एव ब्रह्मसा-क्षात्कारकारणत्वमिति मन्यमानमप्यनुगृह्णन्नाह - निवर्तक बोधः प्रमाणजन्य इति यावदिति । दूरस्थान्तिकस्थविशेषणवि- शिष्टेति । "सोऽयं देवदत्तः' इत्यादिवन्न वैयर्थ्यमित्यर्थः । अभिप्रेत्यशब्देन शङ्कापरिहार इति । अनुक्तशङ्गापरिहार इत्यर्थः । "धर्मेण पापमनुवदति', "कषायपक्तिः कर्माणि' इत्यादिप्रमाणान्यभिप्रयन्नाह - परंपरयोपयोगमिति ।

(लघुसिद्धान्तघट्टः)

पूर्वपक्षोक्तेष्वर्थेष्वविरुद्धांशाभ्युपगमेन प्रतिवदतीति ।

"मिथ्यासंप्रतिपत्त्या वा प्रत्यवस्कन्दनेन वा । प्राङ्न्यायविधिसिद्धया वा (?) उत्तरं स्याच्चचुर्विधम् ।।'

इति संप्रतिपत्तिशब्दितस्याभ्युपगमस्यांप्युत्तरत्वं संभवतीति भावः ।
पराभिमतसदसदनिर्वचनीयाविद्यानिवृत्तेरभ्युपगमानर्हत्वादाह - प्रतिबन्ध(क)निवृत्तिरिति । कर्मसाध्य उक्त इति । साध्यद्वित्ववादिनेति शेषः । मार्गसमीकरणतत्प्रापणे इति । मार्गे प्रतिबन्ध-काभावसंपादनलक्षणसमीकरणमात्रेणाश्मनो विशिष्टदेशप्राप्त्यभावात् तत्प्रापणार्थं तत्र पृथग्यत्नोऽपेक्षित इति भावः । ननु, प्रति-बन्धकनिवृत्तिरेव ज्ञानसाध्या; ब्रह्मप्राप्तिस्तु स्वत एवेत्ययुक्तम्-"बह्मविदाप्नोति परम्' इति ब्रह्म स्वरूपप्राप्तेरपि ज्ञानसाध्यत्वाव-गमादित्याशङ्कय प्रतिबन्धकनिवृत्तिब्रह्मप्राप्त्योरैक्याश्रयणेन परिहरति - यद्वा भावान्तरस्येति । परमतं स्वमतं चानुवदतीति । ननु वाक्यजन्यं ज्ञानमविद्यानिवृत्तये वेदान्तैर्विधित्सितमिति न परमतम् । ज्ञानस्याज्ञाननिवर्तकत्वस्य लोकसिद्धत्वेन विध्यनपेक्षणात् । ज्ञानस्य प्रमाणपरतन्त्रतया पुरुषतन्त्रत्वाभावात्"द्रष्टव्यः' इत्यनुवाद इत्यभ्युपगमाच्च । अत एव, "तस्य विधानमन्तरेणापि वाक्यादेव सिद्धेः' इति भाष्यग्रन्थो न युक्तः । विधानस्यानभ्युपगमेन सिद्धवत्कृत्य व्यवहारस्यायुक्तत्वादिति चेत्-सत्यमेतत् । तथापि "द्रष्टव्यः', "आत्मानं पश्येत्' इति विधिप्रत्ययश्रवणात् तन्मतेऽपि विधेयत्वं बलादभ्युपगमनीयमित्यभिप्रेत्यैतदुक्तमिति द्रष्टव्यम् । ननु वाक्या-र्थज्ञानस्य प्रमाणपरतन्त्रत्वेन विधेयत्वसंभवेऽपि तदनुकूलश्रवणरूपव्यापारस्य विधेयत्वं भविष्यतीत्याशङ्कयाह - तच्छ्रवणे पुरुष-स्येति । अध्ययनविधिरेवेति ।

वाचस्पतिमते अध्ययनविधेरर्थज्ञानपर्यन्तत्वाभ्युपगमादधीतेन स्वाध्यायेनार्थज्ञानसंपादनस्य विचा-रमन्तरेणासंभवात् प्राप्नोत्येव विचारः । उक्तं च मीमांसकैः,

"धर्मे प्रमीयमाणे तु वेदेन करणात्मना ।इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ।।'

इति । ततश्च पूर्वभागविचारवत् उत्तरभागविचारोऽप्यध्ययनविधिवशादेव सिध्यति । यद्यप्यध्ययनविधिरक्षरराशिग्रहणमात्रफलः, तथापि पूर्वभागतुल्यशीलवादुत्तरभागविचारोऽपि सिध्यत्येवेति विधिवैयर्थ्यमिति भावः । न च प्रमाणज्ञानस्य श्रेयः साधनत्वमलौ-किकमिति । विदेवनादेः रागप्राप्तस्यापि, "अक्षैर्दीव्यति' इति क्रत्वपूर्वार्थतया विधानवदिति भावः । यावन्न विमोक्ष्येऽथ संपत्स्य इति । "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' इति हि श्रुतिः । तस्य=ब्रह्मविदः । तावदेव चिरम्=तावानेव विलम्बः । यावन्न विमोक्ष्ये=यावत् शरीरारम्भकप्रारब्धकर्मणा न विमोक्ष्यत इत्यर्थः । अथ संपत्स्ये=अथ संपत्स्यत इत्यर्थः । पुरुषव्यत्यय-श्छान्दसः । यद्वा तस्य । "मे' इत्यध्याहारः अतो न पुरुषव्यत्ययः । नैरर्थक्यं प्रसजेदि (ज्येते)ति । वाक्यजन्यज्ञानस्यैव निरपे- क्षतया अविद्यानिवर्तकत्वादित्यर्थः । विधिवाक्यविशेषकीर्तनं विना, "विधानमन्तरेणापि सिद्धेः' इति सामान्योपदेशस्य प्रयोजनमाह-अनेकश्रुतिविरोधस्य प्रदर्शनार्थमिति । विप्रतिषेधोऽधिकबलेन प्रतिषेध इति । विशब्दो हि विशिष्टवाची । विशिष्टप्रतिषेधो विप्रति-षेधः । तस्य च विशिष्टत्वमधिकबलनिरूपितत्वम् । यद्यपि, "विप्रतिषेधे परं कार्यम्' इत्यत्र विप्रतिषेधशब्दस्य परस्परविरोध एव लोकप्रसिद्धोऽर्थ इति भाष्यकैयटयोः स्पष्टीकृतम् - तथापि प्रकृते विप्रतिषेधशब्दस्य परस्परविरोधरूपप्रसिद्धार्थाश्रयणे शास्त्रैरिति तृतीयानुपपत्तिरिति भावः ।

ननु सर्वस्य पुंसोऽज्ञाननिवृत्तेः कः प्रसङ्ग इत्यत आह - अविद्याया एकत्वादिति । अनिवर्तकत्वं दोषाय न भवतीति । "ज्ञानस्य' इति शेषः । ननु-एकैवाविद्या, एकमुक्तौ सर्वमुक्तिः, अथापि कस्यचित् ज्ञानमप्युत्पन्नम्, अथापीदानीं वतर्मानः सर्वस्य पुंसः प्रपञ्चप्रतिभासो दग्धपटन्यायेनानुवर्तत इति केनापि नाभ्युपगतमिति चेत् - सत्यम् । सर्वस्य पुंसः इत्यत्र सर्वशब्दः कायव्यू-हस्थलीयैकाविद्योपाधिकैकजीवसंबन्धिनानान्तःकरणोपाधिकप्रदेशभेदाभिप्राय इत्यदोषात् । केचित्तु सर्वस्य इति पदं न सर्वपुरुषपरम्, अपितु उत्पन्नज्ञानपुरुषमात्परमिति व्याचक्षते । छिन्नाविद्याख्यमूलत्वेनेति । न च कथं मूलनिवृत्तौ मूल्यनुवृत्तिरिति वाच्यम्-अवि-द्यासंस्कारादपि तदनुवृत्त्युपपत्तेः । न च क्रियाज्ञानयोरेव स इति वाच्यम्-निःसारितपुप्पायां संपुटिकायां पुष्पवासनानुवृत्तिदर्शनात् संस्कारनाशव्यतिरिक्तनाशमात्रस्य संस्कारव्याप्ततया अविद्यानाशस्यापि संस्कारव्याप्ततया अविद्यानाशस्थलेऽपि संस्कारावश्यम्भावेन तद्वशेन भेदप्रतिभासोपपत्तेरित्यर्थः । परैर्हि जीवन्मुक्तौ त्रयः प्रकारा वर्णिताः अविद्या सर्वात्मना नष्टा, संस्काररूपा तद्वासना अनुवर्तते, तन्मूलोऽयं देहादिप्रतिभासः कुलालचक्रवत् इत्येकः । आवरण विक्षेप शक्तिमत्या मूलविद्यायाः प्रारब्धकर्मणा वतर्मान देहाद्यनुवृत्ति प्रयोजको विक्षेपशक्तयंशोऽविद्या लौश रूपोऽनुवर्तते तन्मूलोयऽयं प्रतिभास इत्यपरः । दग्धपट न्यायेन मूलाऽविधैव अनुवर्तते तन्मूलोयं प्रतिभास इत्यपरः । एतत् सर्वं "छिन्नमूलत्वेन' इति भाष्ये "छिन्नाविद्याख्यमूलत्वेन' इति टीकायांच विवक्षितम्

आप्तोपदेशादीनां क्रमेणोदाहरणान्याह - क्वचिद्देशे सपर् इति वाक्यादित्यादिना । भ्रमित इति ण्यन्तात् कर्मणि क्तः । न च कथं वाक्यस्य चिरतरानुवृत्तभ्रमहेतुत्वमिति वाच्यम् - वाक्यार्थस्मृतिपरंपरासंभवेन चिरानुवृत्तभ्रमहेतुत्वसंभवादिति भावः । अत्र साक्षा-त्कारिभ्रमस्य साक्षात्कारिविशेषदर्शननिवर्त्यत्वेनाप्तोपदेशनिवर्त्यत्वाभावात्, "सर्प इति वाक्याच्चिरभ्रमितः' इत्युक्तम् । निवर्तका-न्तरमपि ज्ञानत्वाविशेषादिति । न चेष्टापत्तिः, त्वया वासनाया अप्यावृत्तात्मसाक्षात्कारनिवर्त्यत्वाभ्युपगमादिति भावः । स्वेनैव स्वविनाशकरणं विवक्षितं चेदिति । पूर्वपक्षे एवकारेण बाधकज्ञानमात्रस्यैव व्यवच्छेद्यत्वम् । इह तु

स्वव्यतिरिक्तं सर्वं व्यवच्छेद्यमिति विवेकः । व्याघात इति । प्रतियोगिव्यतिरिक्तनिरपेक्षत्वे वासनायाः स्थिरत्वव्याघातः, स्वस्य स्वनाशे निरपेक्षकारणत्वे अपेक्षणी-यान्तराभावात् क्षणिकत्वमेव स्यादिति । केचित्तु स्वस्यैव स्वनाश्यत्वनाशकत्वयोरभ्युपगमे कर्मकर्तृव्याघात इत्यर्थ इति वदन्ति । फलोपान्त्येति । अपूर्वादिकं फलनाश्यम् । उपान्त्यनाश्यः शब्दः, "सुन्दोपसुन्दन्यायेनान्त्योपान्त्यनाश' इत्यभ्युपगमात् । आश्रय-नाशजन्यरूपादिनाशस्थले कारणनाशनाश्यत्वमिति द्रष्टव्यम् । विनाशविषयभ्रमः पुनस्तिष्ठतीति । मिथ्यात्वस्य प्रतीतिव्याप्त-त्वादिति भावः । छिन्नवासनाख्यमूलमिति । यद्यपि"छिन्नमूलत्वेन न बन्धाय भवति' इति भाष्ये "छिन्नाविद्याख्यमूलत्वेन' इत्यर्थ उक्तः, स एवेह दूषयितुमुचितः-तथापि वासनाकायत्वकथनात् वासनाया एव मूलत्वं वक्तव्यमिति तथोक्तमिति द्रष्टव्यम् । व्यावहा-रिकतयापि परेणाभ्युपगन्तव्यमिति । यद्यपीदं व्यावहारिकत्वं दार्ष्टान्तिके वासनादावप्यस्त्येव, तथापि ब्रह्मात्मैकत्वविज्ञानस्य विश्वबाधकत्ववत् चन्द्रैकत्वविज्ञानस्य तिमिरादिदोषाधिष्ठानयाथात्म्यानवगाहिनस्तिमिरादिदोषनिवर्तकत्वं नास्तीत्यत्र तात्पर्यम् । द्विचन्द्रज्ञानस्य विस्मयादिजनकस्य भयाद्यजनकत्वमभिप्रयन्नाह - रज्जुसर्पादिभ्रान्तिमत्पुरुषापेक्षयेति । द्विचन्द्रस्यौत्पातिकतया भयहेतुत्वेऽपि न दोष इत्यपि द्रष्टव्यम् ।

आप्तोपदेशस्यापरोक्षविषयासत्यत्वनिश्चयाधायकत्वे, "शास्त्रप्रत्यक्षयोर्विरोधे प्रत्यक्षप्राबल्यम्' इति सिद्धान्तो व्याकुप्येदित्यस्वरसादाह - यद्वा यथावदर्थस्वरूपेति । आप्तोपदेशेन संदिहानः सावधाननिरीक्षणे प्रवर्तते; निरीक्ष-णेनैव तादृशस्थले भ्रमनिवृत्तिरिति भावः । दृष्टद्वारा हि भेदनिरासा इति । अदृष्टद्वारत्वे ह्यल्पस्यापि निदिध्यासनस्य भूयोवासना-निर्वर्तकत्वं न संभवतीत्यर्थः । ततश्च"नायं सर्पः' इत्यस्य साक्षान्निवर्तकत्वात् दृष्टद्वारत्वं नास्तीति शङ्का पराकृता, अदृष्टद्वारकत्व-मात्रस्यैव दृष्टद्वारत्यनेन विवक्षितत्वात् । नन्वदृष्टद्वारा निवर्त्यत्वे किं व्यवहारदशायां बाधाभाव आपाद्यते, उत सर्वदा ? नाद्यः, इष्टापत्तेः । न द्वितीयः, दृष्टान्तासंप्रतिपत्तेः ।

"तत्त्वमस्यादिवाक्योत्थसम्भग्धीजन्मात्रतः ।

अविद्या सह कार्येण नासीदस्ति भविष्यति ।।'

इत्युक्तरीत्या ध्याननिवृत्तसर्पस्यापि चरमज्ञानेन बाधादिति शङ्कते - नन्वदृष्टद्वारेति । न कदाचिदपि बाध्यत्वं सिद्धमिति । यद्वि-षयकज्ञानेन यत् अदृष्टद्वारा निवर्त्यम्, न तत् तज्ज्ञानबाध्यमिति हि व्याप्तिः । ततश्च दृष्टद्वारा गरुडज्ञाननिवर्त्यसर्पस्य तत्त्वमस्यादि-वाक्यजन्यचरमज्ञाननिवर्त्यत्वेऽपि न गरुडज्ञानबाध्यत्वम् । बाधो हि मूलभूताज्ञानेन सह निवृत्तिः न गरुडज्ञानात् सर्पमूलज्ञाननिवृत्तिः, येन बाधः स्यात् । ततश्च भेदवासनाया अदृष्टद्वारा ध्यानरूपब्रह्मज्ञाननिवर्त्यत्वे चरमवृत्तिरूपब्रह्मज्ञानबाध्यत्वं न स्यात् । इष्यते च त्वया तज्ज्ञानबाध्यत्वमिति भावः । यद्वा भेदवासनाया अदृष्टद्वारा ध्यानरूपब्रह्मज्ञाननिवर्त्यत्वे सत्यत्वमात्रमापद्यते, उत अदृष्टाद्वा-रकज्ञाननिवत्यर्त्वलक्षणमिथ्यात्वाभावो वा । नाद्यः, इष्टत्वात् । न द्वितीयः, निवृत्ताया अपि भेदवासनाया अदृष्टाद्वारकचरमवृत्ति-निवर्त्यत्वेन ध्याननिवर्त्यसर्पवत् मिथ्यात्वसंभवादित्याशङ्कते - नन्वदृष्टद्वारेति । अदृष्टद्वारा पूर्वनिवृत्तसर्पस्य चरमवृत्तिनिवत्यर्त्व-वाचोऽसंगतत्वात् नष्टस्य नाशनासंभवात् भेदवासनाया अदृष्टाद्वारकचरमवृत्तिनिवर्त्यत्वासंभवेन मिथ्यात्वं न स्यात् । न च मुद्गर-प्रहरादिविनष्टघटस्यापि सत्यत्वप्रसक्तया ध्याननिवर्त्यसर्पमात्रदृष्टान्तीकरणमसंगतमिति वाच्यम्, तद्वृष्टान्तस्यापीष्टत्वात् । ततश्च मुद्गरादिनिवर्त्यघटवत् ध्याननिवर्त्यसर्पवच्च सत्यत्वं स्यादित्यभिप्रेत्य परिहरति - नेति । ज्योतिष्टोमवाक्यवदिति । इतरथा भाव-नासहकृतज्योतिष्टोमवाक्यस्यापि ज्योतिष्टोमादिधर्मप्रत्यक्षजनकत्वप्रसङ्ग इति भावः ।

भा व प्र का शि का

(भक्तेरुपायत्वम्)

"चायृ दर्शने' इति हि धातुरिति । "चायृ पूजानिशामनयोः' इति पठितत्वादिति भावः । सन् रहितज्ञानविशेषवाचि वाक्यान्तरं विवक्षितमिति । "ओमित्यात्मानं ध्यायथे'त्यादि वाक्यं विवक्षितमिति भावः । सर्वशाखाप्रत्ययन्यायादिति । ननु नानाशाखाप-ठितानामग्निहोत्रज्योतिष्टोमादीनां संभवत्यैक्यम्, संयोगरूपचोदनाख्याविशेषात् । इह चोदनाया अविशेषाभावादाख्यैक्याभावाच्च कथमेतन्न्यायप्रवृत्तिः ? इतरथा"श्रोतव्यः' इत्यनेनैकार्थ्यं किं न स्यादिति चेत्-न । सर्वशाखाप्रत्ययन्यायस्य प्रत्यभिज्ञापकसद्भावो हि मूलयुक्तिः । अस्ति चेहापि मोक्षरूपफलसंयोगसाम्यं ब्रह्मविषयत्वलक्षणरूपसाम्यं च । तथा "मन्तव्यो निदिध्यासितव्यः', "विज्ञाय प्रज्ञां कुर्वीत' इति निदिध्यासनप्रज्ञाशब्दयोः स्थानसाम्यम् । अतस्तदेव प्रत्यभिज्ञायते । अत एवेक्षत्यधिकरणे, "सदेव सोम्येदमग्र आसीत्' इति सच्छब्दशब्दितं ब्रह्मैव, गतिसामान्यात्=सर्ववेदान्तेषु "आत्मावाइदमग्र आसीत्', "ब्रह्म वा सदमग्र आसीत्' इत्यव-गतिसामान्यादिति वर्णितम् । तदेव गतिसामान्यं सर्वशाखाप्रत्ययन्यायः । किंच प्रज्ञाशब्दितज्ञानसामान्यस्य बह्मप्राप्तिसाधनत्वे ध्या-नलक्षणगुरूपासनार्थक्यप्रसङ्गश्च । तस्मात्तत्र पर्यवसानं वक्तव्यमित्यैकार्थ्यं संभवतीति भावः । स ह्यनुक्ताकाङ्क्षितस्वीकारफल इति । न तूक्तपरित्यागफलः । एवं च "निदिध्यासितव्यः' इत्यत्र ज्ञानमात्रविधावुक्तपरित्याग एव सिध्येत् । अतो ज्ञानसामान्यवाचिनापि शब्देन विशेष एव विधेय इति भावः । ननु सामान्यवाचिशब्देन विशेषाभिधाने लक्षणा स्यादित्याशङ्कय, सामान्यस्य प्रतिव्यक्ति पर्यवसितत्वात् सामान्येन विशेषाभिधानं न दोषायेति, छागोवा मन्त्रवर्णात् इत्यत्र निर्णीतं इत्यभिप्रयन्नाह - तत्र छागोवा मन्त्रवर्णादिति । "छागो वा मन्त्रवर्णात्' इत्यत्र विधिवाक्यस्थसामान्यशब्दानां मन्त्रवर्णप्र-तिपाद्यविशेषे पर्यवसानमात्रं विषयः । अतः कथं विधिवाक्यस्थसामान्यशब्दानां विधिवाक्यस्थविशेषे पर्यवसानमित्याशङ्कय, "न्या-यस्य न केवलं विधिमन्त्रमात्रविषयत्वम्, अपि तु सर्वसामान्यविषयत्वम्' इति दर्शयितुं स्मृतिष्वपि सामान्यशब्दानां विशेषपर्यवसानं दृष्टमित्याह - एवं स्मृतिष्वपीति । विलेखनपठनादेरप्रतिषिद्धत्वादिति । अप्रतिषेध्यत्वादित्यर्थः। एतद्वाक्यबोध्यनियमेनव्यावर्त्यत्वादिति यावत् । यद्वा अप्रति-षिद्धत्वात् । अनुमतत्वादित्यर्थः । अत्र लेखनोपन्यासो दृष्टान्तार्थः । ननु गुरुमुखानधीनविचारव्यावृत्त्यर्थः श्रवणविधिर्भविष्यतीत्या-शङ्कयाह - गुरूपसत्तावि ति । ननु श्रवणशब्दस्य गुरूपसत्त्यर्थकत्वाभावेऽपि श्रवणस्य गुरूपसदनाङ्गकत्वादङ्गविध्युपेतश्रवणविधि-बलादेव गुरुमुखानधीनविचारव्यावृत्तिः सिध्यतीत्यरुचेराह - तस्याश्चात्राविहितत्वेऽपीति । न चाङ्गविध्यभावे कथं तदनुवादेनो-पसदनविधिरिति वाच्यम्-"स्नात्वा भुञ्जीत' इत्यत्र रागप्राप्तभोजनानुवादेन स्नानविधानवदुपपत्तेरिति भावः । "सहकार्यन्तरविधिः' इत्यत्र विधेयत्वेन समर्थयिष्यमाणयोः पाण्डित्यमौनयोः, "श्रोतव्यो मन्तव्यः' इत्याभ्यां विधिरस्त्वित्याक्षिप्य परिहरति - न्यायोपेतेत्यादिना सति गत्यन्तरे विशिष्टविधानाश्रयणस्यान्याय्यत्वाच्चेति । ननु श्रवणमननयोः पाण्डित्यमौनरूपयोः परस्परविशेषणत्वं न सिद्धम्;येन विशिष्टविधिः स्यात् । यदि हि "श्रुत्वा मन्तव्यः' इत्याकारा वचनव्यक्तिः स्यात्, स्यात् तदा विशिष्टविधिशङ्का । इतरथा, "विष्णु-रुपांशु यष्टव्यः' "प्रजापतिरुपांशु यष्टव्यः' "अग्नीषोमावुपांशु यष्टव्यौ' इत्यादावपि यागद्वयविशिष्टतृतीययागविधिसंभवात् वाक्यभेदेन सिद्धान्तोऽनुपपन्नः स्यात् । "समिधो यजति' इत्यादावपि समिदादिचतुष्टयविशिष्टस्योत्तमप्रयाजस्य विधिरित्यापाद्येतेति चेत्-अत्र केचित् -"आर्पेयं वृणीते त्रीन् वृणीते' इत्यत्राऽऽख्यातभेदसत्त्वेऽपि त्रित्वविशिष्टार्षेयवरणविधानवत्,"श्रोतव्यो मन्तव्यः' इत्यत्रापि श्रवणविशिष्टमननविधिशङ्काया उत्थितिसंभवादिति वदन्ति । यादवमिश्रोक्तनिर्वाह इति । श्रवणमनेन अदृष्टार्थतया विधीयेते इति निर्वाह इत्यर्थः । स तु, "नानाशब्दादिभेदात्' इत्यत्र स्पष्टीभविष्यति । व्याख्यास्यत इति । अधुना भाष्ये तदव्याख्यानं न दोष इति भावः । द्रष्टव्य इति तव्यतेति । यद्यपि तव्येनापि रूपं सिध्यति, अथापि

स्वरविशेषमभिप्रेत्याचार्यैस्तव्यत्प्रत्यय उपात्तः । केचित्तु - बृहदारण्यकवाक्ये स्वरासंप्रतिपत्तेतव्यतेति तित्त्वमविवक्षितम्; तव्यत्तव्ययोरन्यतरस्मिन् प्रत्यय उपादातव्ये तव्यतः प्रथमोपदि-ष्टत्वात्तदुपादानमिति मन्यन्ते । आवृत्तिद्वयत्रयव्यावृत्त्यर्थमसकृदिति सौत्रं पदमिति । यद्यप्यसकृच्छब्दोऽनेकत्वमात्रपरः । अनेकत्वं च द्वित्रादिसाधारणम्-तथापि बहुतरेष्वेव प्रसिद्धिप्राचुर्यादेवमुक्तमिति द्रष्टव्यम् । अत्र, "सूत्रमुपादत्ते - आवृत्तिरिति । आवृत्तिद्वयत्रयव्यावृत्त्यर्थमसकृदिति सौत्रं पदम् । उपासनशब्दाश्रवणात् सूत्रस्य तत्परत्वमस्फुटमिति तस्यार्थमाह - तदिदमिति' इति पाठः समीचीनः । केचित्तु सिंहाबलो-कितकेनाह - आवृत्तिद्वयत्रयेती'ति वदन्ति । रात्रीरुपेयादितिवदिति । यद्यपीदं वाक्यं नास्त्येव । "ज्योतिर्गौरायुः' इत्येव रात्रिस-त्रोत्पत्तिवाक्यम् । तत्रापि सत्रविषये उपेयादित्येकवचनं च न संभवति; उपेयुरित्येवं बहुवचनान्ततयैव वाक्यस्य कल्पनीयत्वात्-तथापि नोदाहरणमादरणीयमिति न्यायेन, "वैश्वानरं द्वादशकपालं निर्वपेत्', "यस्मिन् जान एतामिष्टिं निर्वपति' इति वाक्यद्वयं दृष्टान्ततयो-दाहर्तव्यम् ।

एतद्वाक्यपूर्वकत्वादिति । "अथ योऽन्यां देवतामुपास्ते' "अन्योऽसावन्योऽहमस्मि' इति, न स वेद । अकृत्स्नो ह्येषः । आत्मे-त्येवोपासीत' इति हि श्रुतिः । सिंहावलोकितकेनाव्याख्यातच्छान्दोग्यवावयांशं व्याचष्टे - यस्तद्वेदेत्यादिना । "यथा कृताय विजि-तायादरेऽयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद स मयैतदुक्तः' इति हि श्रुतिवाक्यम् । इदं च, "यो नु कथं सयुग्वा रैक्वः?' सति हंसेन रैक्वस्वरूपं पृष्टस्य हंसान्तरस्य प्रतिवचनम् । यथा कृतायविजिताय । कृतो नाम अयो द्यूतसमये प्रसिद्धः । स यदा जयति, तदा इतरे त्रिव्द्येकाङ्काः अधरे अयाः संयन्ति-संगच्छन्ते=अन्तर्भवन्ति । चतुरङ्के अये कृते त्रिव्द्येकाङ्कानां तत्र विद्यमानत्वात् तस्मिन्नन्तर्भवन्तीत्यर्थः । एवमेनं रैक्वं कृतायस्थानीयं सर्वं तदभिसमेति=संगच्छते, यत्किंच लोके सर्वाः प्रजाः साधु शोभनं कर्म कुर्वन्ति=धर्मजातं कुवर्न्ति, तत् सर्वमेतस्य धर्मेऽन्तर्भवति । तस्य फले सर्वप्राणिफलमन्तर्भवतीत्यर्थः । यस्तद्वेदेत्यादि । अत्रायमन्वयः-यत्स वेद । स रैक्वो यद्वेद्यं वेद, तद्वेद्यं योऽन्योऽपि वेद, एनमपि रैक्वमिव सर्वशुभधर्मजातफलमप्यभिसमेतीत्यनुषङ्गः । स मयैतदुक्तः । स रेक्वः मया एतत् इत्थमुक्त इत्यर्थः इति रैक्ववेद्यब्रह्मवेदितृमाहात्म्यकथनाद्रैक्वस्य ब्रह्मणश्च माहात्म्यं कथितं भवती-त्यभिप्रायेणाचार्यैः, "रैक्वस्तद्वेद्यं ब्रह्म चोभयं मयोक्तमित्यर्थ' इत्युक्तम् । न तु स मयैतदुक्त सति शब्दार्थतयेति द्रष्टव्यम् ।

असकृदावृत्तेर्व्यवहितत्वशङ्कानिरासार्थमिति । "मासस्य द्विरधीते' इति न्यायेन विच्छिद्य कृतस्मृतेर्न ध्यानत्वमिति भावः । रागादीनां जीवर्धमत्वेनान्तःकरणर्धमत्वाभावादित्यस्वरसादाह - यद्वा मञ्चाः क्रोशन्तीतिवदिति । "स वा एष आत्मा हृदि । तस्यैतदेव निरुक्तं हृद्ययमिति । तस्माद्धृदयम्' इति वाक्यमभिप्रयन्नाह - हृत्थानमयतीति । हृदयग्रन्थिशब्दे कर्मधारयमभिप्रयन्नाह - हृदयशब्दोपलक्षितमिति । ननु "तस्मिन् दृष्टे परावरे' इत्येतत् उपायदशायां ज्ञानस्य दर्शनरूपतां कथं गमयेत् ? तत्रत्यदर्शनशब्दस्य "शास्त्रार्थदशी' इत्यादाविव ज्ञानसामान्यपरतयाप्युपपत्तेरित्यत्राह - दर्शनशब्दस्य ज्ञानसामान्यपरत्वसंभवेऽपीति । श्रवणादीनां पृथगुक्तत्वादिति । ततश्च सामान्यवाचिपदस्य वैयर्थ्यप्रसङ्ग इति भावः । न चैवं निदिध्यासनदर्शनयोरपि, "न वायुक्रिये पृतगुपदेशात्' इति न्यायेन पार्थक्यापत्तिः; परमात्मनो दर्शनायोग्यत्वात् दर्शनशब्दस्य चाक्षुषज्ञान एव मुख्यत्वात् गौणत्वस्याश्रयणीयत्वादिति भावः। दृष्टशब्दश्च तत्तुल्यार्थ इति । "तस्मिन् दृष्टे परावरे' इत्यत्र दृष्टशब्दश्च तत्तुल्यार्थः साक्षात्कारार्थः, तत्प्रत्यभिज्ञानात् । न च "तस्मिन् दृष्टे', "द्रष्टव्यः' इत्यनयोरर्थनिर्णये परस्परसापेक्षत्वेनान्योन्याश्रय इति वाच्यम्- "तस्मिन् दृष्टे' इत्यत्र दृष्टशब्दस्य न ज्ञानसामान्यपरत्वमित्यत्र द्रष्टव्यादिपदसापेक्षत्वम्, द्रष्टव्यादिशब्दस्योपायदशापन्नवृत्तित्वमित्यत्र "तस्मिन् दृष्टे' इति वाक्यसापे-क्षत्वमिति

द्वारभेदेनान्योन्याश्रयस्यादोषत्वात् । पूर्वापरवाक्येषु फलस्य निर्दिष्टत्वादिति । "आत्मा वारे द्रष्टव्यः' इत्यस्य पूर्वापर-वाक्येष्वमृतत्वस्यैव फलस्य निर्दिष्टतया न साक्षात्कार एव फलमित्यर्थः । तस्याष्टदोषदुष्टत्वमिति । विकल्पस्येत्यर्थः । व्रीहियवयो-रेकेनानुष्ठात्रा प्रयोगभेदेनोपादनसंभवात् युक्तमष्टदोषदुष्टत्वम्; एकेन विद्याद्वयोपादानायोगात् कथमत्राष्टदोषदुष्टत्वमित्याशङ्कयाह - इहापि यथासंभवं दोषप्राप्तिरिति । अनुष्ठातृभेदेन एकैकस्मिन् दोषद्वयप्राप्त्या चतुष्टयसंभवादिति भावः । दर्शनोपायभूतस्य व्या-पारस्येति । यद्यपि दर्शनस्यैव विधेयत्वसंभवात् दर्शनध्यानयोः समुच्चयः संभवतीत्याक्षेप एवोचितः । न च दर्शनस्य विधानयोग्यत्वम्; "पन्त्यवेक्षितमाज्यम्' इत्यादाविव (त्यादौ ?) ज्ञानविधेरभ्युपेतत्वात् । तथापि पररीतिमनुसृत्य व्यापारविधेयत्वमाक्षिप्तमिति द्रष्टव्यम् । अतो न मानान्तरेण तयोः साध्यसाधनभावेति । मानान्तरसत्त्वे तत एव साध्यसाधनभावप्रतीतेस्तत्सापेक्षमिदं व्यर्थमित्यत्र तात्पर्यम् । यदि साक्षात्कारं प्रति ध्यायेन सहेति । साक्षात्कारमित्युपलक्षणम् । साक्षात्कारं मोक्षं प्रति वा ध्यायेन सह समुच्चित्य दर्शनसमानाकारज्ञानान्तरम्, "दृष्टव्य' इत्यनेन विधेयमिति यद्युच्येतेत्यर्थः । तस्य च ध्यानस्य च द्वारद्वारिभावानापन्नतया एकत्र किंचित्कारान्वयः संभवतीति समुच्चयसंभवः । न च दर्शनसमानाकारज्ञानस्य ध्यानसाध्यतया द्वारद्वारिभावापन्नत्वादेकत्र किंचित्कारान्वयः कथं सिध्येदिति वाच्यम्-तन्नास्तीत्यभिमानवतः शङ्केयमिति संभवादिति (वदन्ति) । चतुर्ष्वंशेषु तात्पर्यकल्प-नादपीति । औपदेशिकार्थाधिगमारम्भणसंशीलनदर्शनसमानाकारत्वध्यानरूपेष्वित्यर्थः । ननु "द्रष्टव्यः' इति दर्शनसमानाकार-ध्यानविधाने "निदिध्यासितव्यः' इत्यत्रापि निदिध्यासनसमानाकारं मननं विधीयत इति किं न स्यात् ? "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः' इतिवत्, "मत्वा धीरो न शोचति' इति मननानन्तरमेव मोक्षप्रतिपादनात् । यदि मनननिदिध्यासनशब्दयोर्भिन्नार्थत्वा-देकस्य गौणत्वे प्रमाणाभावान्न निदिध्यासनशब्दस्य गौणत्वमाश्रयणीयमिति, तर्हि (तुल्यं प्रकृतेऽपि ?) "निचाय्य तं मृत्युमुखात् प्रमुच्यते', "तं दृष्ट्वा भुच्यते योगी', "तस्मिन् दृष्टे परावरे', "ततस्तु तं पश्यते निष्कलं ध्यायमानः' इत्यादिश्रुत्यनुग्रहाय विशुद्ध-मनोजन्यसाक्षात्कारस्यापि विधेयत्वसंभवात् । "विधिस्तु धारणेऽपूर्वत्वात्' इति न्यायेन विधेः स्वीकर्तव्यत्वात् । प्रकृते विस्पष्ट-विधिश्रवणाच्चेति चेत्-न-मानससाक्षात्कारे चाक्षुषज्ञानवाचिनो दृशेर्गौणत्वस्य तथाप्यविशेषात् । मानससाक्षात्कारस्य मोक्षकाल-साक्षात्कारसदृशस्य फलरूपत्वेनाविधेयत्वाच्च ध्यानं दर्शनसमानाकारं विधीयत इत्येव युक्तमिति भावः । जगत्कारणविषयं चेत् दर्शनसमानाकारनिदिध्यासनरूपमित्यवगम्यत इति । ननु कथमनेन वाक्येनास्यार्थस्य प्रतीतिः ? आत्ममननश्रवणादिकमेव सर्वविषयम्, उपादानोपादेययोरभेदादित्यर्थः परमनेन प्रतीयते, न तु जगत्कारणविषयं सर्वं दर्शनसमानाकारमितीति चेत्-न-आत्मनि दृष्टे विज्ञाते दर्शनसमानाकारध्यानविषये सत्येव सर्वं विदितं भवति, सार्वज्ञ्यं भवति, मोक्षो भवतीत्यस्यार्थस्य प्रतीयमानतया तथो-क्तयुपपत्तेः । एतदस्वरसादेवाह - किं च नानाविद्यानामिति । सामर्थ्यस्य प्रकरणाद् बलीयस्तया चेति । अत एव सत्यत्वज्ञान-त्वादीनां विद्याविशेषप्रकरणपठितानामपि, "आनन्दादयः प्रधानस्य' "अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्याम्' इत्यधिकरणेषु सर्वविद्यासाधारण्यं वक्ष्यति । दर्शपूर्णमासशब्दयोर्लक्षणयेत्यादि । कालविशेषवाचिनो दर्शपूर्णमासशब्दयोः कर्मलक्षकत्वदर्शनात् । तथा, "श्येनेनाभिचरन् यजेत' इत्यादौ श्येनादिशब्दानां "यथा वै श्येनो निपत्यादत्ते' इति वाक्यशेषेण निपत्यादानरूपगुणयोगेन कर्मणि श्येनशब्दो गौण इत्यभ्युपेतत्वाच्चेत्यर्थः । मध्यदेशलक्षणाया अङ्गीकृतत्वाच्चेति । "अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदि' इत्यत्रान्तर्वेदीति वेद्येकदेशो यूपाङ्गत्वेन चोद्यते, उत बहिर्वेसहितो यूपमानदेशं लक्ष्यतीति विशये, वेद्येकदेशो यूपाङ्गत्वेन विधीयते, लक्षणाया अन्याय्यत्वात्; "अर्धं बहिर्वेदि' इति चार्थसिद्धानुवाद इति पूर्वपक्षं कृत्वा, "अर्धमन्तर्वेदि' इत्येकस्य यूपार्धस्यान्तर्वेदिमाने यूपार्धान्तरस्यान्तर्वेदि बहिर्वेदि वा मानमिति शास्त्रस्याभावेनार्धान्तरमपि

कदाचित्पुरुषेच्छावशादन्तर्वेद्यपि प्राप्नोति । न चेष्टापत्तिः, "अर्धं बहिर्वेदि' इत्यस्य पाक्षिकानुवादत्वप्रसङ्गात् । तस्यापि विधाने वाक्यभेदः । अतो यस्मिन् देशे मीयमाने अन्तर्वेदि अर्धं भवति बहिर्वेदि अर्धं च, तादृशे देशे मिनुयात् । "डुमिञ् प्रक्षेपणे' इति हि धातुः; प्रक्षिपेदित्यर्थ इति देशविशेषलक्षणेति पूर्वतन्त्रे शेषलक्षणे (३-७-६) स्थितमिति भावः । वाक्यचतुष्टयेनेति । "वेदनमुपासनं स्यात् तद्विषये श्रवणात्', सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात् प्रयाजादिवत्', "सिद्धं तूपासनशब्दात्', "उपासनं स्याद् ध्रुवानुस्मृतिर्दर्शनान्निर्वचनाच्च' इति वाक्यचतुष्टयं द्रष्टव्यम् । न केवलं छान्दोग्य इत्यर्थ इति । "ध्रुवा स्मृतिः । स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः' इति छान्दोग्ये भूमविद्यायां श्रूयते; संवर्गविद्यायाम्, "यां देवतामुपास्से' इति श्रूयते । तेन तत्रैव तदिति न मन्तव्यमित्यर्थः । स्वयमुपस्थितस्य स्वीकार एवेति । अप्रियत्वे स्वयमुपस्थितमपि परित्यज्यते; प्रियत्वे स्वयमुपस्थितं गृह्यते । प्रियतमत्वे तु प्रार्थ-नीयत्वरूपं वरणीयत्वमिति भावः । ननु पत्रपुष्पादीनां भगवति प्रीतिरहितानामपि प्रीतिविषयत्ववरणीयत्वयोर्दर्शनात् कथं "यस्य' इत्यादि भाष्यमुपपद्यत इत्याशङ्कयाह - चेतनत्वे सति भगवता वरणीयत्वमिति । चेनत्वे सति भगवत्प्रियतमत्वमित्यर्थः । तस्यैव तस्मिन् वाक्ये प्रस्तुतत्वात् । यद्वा प्रियतमत्वपूर्वकं वरणीयत्वमित्यर्थः । स्वतः प्रियत्वं स्वस्मिन् प्रीतिमत एवेति । यस्य च स्वतः प्रियत्वम् तस्यैव स्वतो वरणीयत्वमिति भावः । आशंसायां भूतवच्चेति कर्तरि क्त इति । "गत्यार्थाकर्मक' इत्यकर्मकत्वविवक्षायां यः क्तो विहितः, सः आशंसायां भूतवच्चेत्यनेन आशंसायां मविष्यतीति भावः । ननु "आशंसायां भूतवच्च' इति प्रयोक्तृाशंसायामेव दृष्टम् । यथा-"देवश्चेद् वृष्टः, संपन्नाः शालयः', "उपाध्यायश्चेदागतः, अधीतं व्याकरणम्' इति । यथा, "आशिषि लिङ्लोटौ' इति लिङ्लोटौ प्रयोक्त्रशंसाविषयावेव-तद्वदिति चेत्-न; प्रयोक्तृाशंसाया-मेवेति ग्रन्थकृतां व्यवहारादर्शनात् उदाहरणमात्रप्रदर्शनेन तद्विषयत्वस्य निश्चेतुमशक्यत्वात् । लिङ्लोङ्विषये तु प्रयोक्तृांशसायामेव प्रयोगात् तथात्वमुचितमिति भावः । अनुभूयमानोऽनुभव इतिवदिति । प्रियशब्दस्य प्रीतिविषयत्वमेवार्थ इति प्रथमतृतीयपक्षयोः समानम् । प्रथमपक्षे प्रीतावेव प्रीतिविषयत्व निश्चयः औपचारिकः । तृतीये आगामि प्रीतिरूपज्ञानस्यापि प्रीत्यन्तरविषयत्वसंभवान् मुख्य इति विवेकः । द्वितीयपक्षे तु प्रियेत्यस्यानुकूलत्वमेवार्थः, न प्रीतिविषयत्व-मेवार्थ इति भिदा । यद्यपि प्रियशब्दः, "इगुपधज्ञाप्रीकिरः कः' इति कर्त्रर्थकप्रत्ययान्तः, "कर्तरि कृत्' इति विधानात्-तथापि "देवदत्ताय रोचते मोदकः' इतिवत् विषयत्वपर्यवसित एवेति विषयत्वार्थकत्वे नानुपपत्तिरिति द्रष्टव्यम् । इदं त्ववशिष्यते-प्रीतिरू-पत्वस्यैव समर्थनीयतया "स्वायत्ते शब्दप्रयोगे' इति न्यायेन "स्वयमपि प्रीतिरूपा' इत्येव निर्देष्टव्ये, भाष्ये "प्रिया' इति निर्देशो न युक्तः । अतः "प्रिया' इति निर्देशस्यानुकूलत्वमेवार्थ इति द्वितीयपक्ष एव युक्त इति प्रतिभाति । यद्वा ध्रुवानुस्मृतिः स्वयमत्यन्ता-नुकूलत्वादिति । "प्रीतिरूपा' इति शेषः । ततश्च अत एव हि या प्रीतिरित्यादिना सा प्रार्थ्यते इति युज्यते । "प्रीतिरूपा' इति शेषाभावे "सा प्रार्थ्यते' सत्युक्ते ध्रुवानुस्मृतिः प्रार्थ्यत इति प्रतीयेत । न च तद्युक्तम्, "या प्रीतिः' इति श्लोके प्रीतेरेव प्रार्थ्यत्वदर्शनेन ध्रुवानुस्मृतेः प्रार्थ्यत्वादर्शनादिति द्रष्टव्यम् । ननु "या प्रीतिः' इति श्लोके प्रीतिरूपापन्नध्रुवानुस्मृतेः प्रार्थ्यत्वं न प्रतीयत इति चेत्-न-"त्वामनुस्मरतः सा मे' इति स्मृतिसमभिव्याहारात् प्रीतिरूपस्मृतिः पार्थ्यत इत्यर्थलाभसंभवात् । प्रीतिरूपध्रुवानुस्मृतेरिति । न च "स्वयमत्यर्थप्रिया' इत्यत्र भाष्यस्थप्रियशब्दस्य प्रीतिविषयार्थकत्वपक्षे प्रीतिरूपत्वस्य ध्रुवानुस्मृतावलाभात् कथं, "प्रीतिरूपा ध्रुवा-नुस्मृति'रित्युच्यत इति शङ्कयम्-प्रीतिविषयत्वप्रतिपादनस्यापि प्रीतिरूपत्वप्रतिपादनफलकत्वेन प्रीतिरूपत्वोक्तौ विरोधाभावात् । ननु नैघण्टुकोक्तया पर्यायत्वमेवावगतं स्यात्; न त्वेकार्थपर्यवसानमात्रमित्यत्राह- एकार्थवृत्तित्वं चेति । चः एवार्थः; एकार्थवृत्ति-त्वमेवावगम्यते; न तु पर्यायत्वमपि;

तथाहि सति सेवाया अपि पर्यायत्वे, "भूयसी सेवा भक्तिशब्दवाच्या' इत्यभियुक्तव्यवहारविरो-धादिति भावः । वचनबलप्रतिक्षिप्त इति ।

"भक्तया त्वनन्यया वापि प्रपत्त्या वा महामते ।

प्राप्योऽहं नान्यथा प्राप्यः - - - - - - - - ।।'

इति वचनबलेन, "सकृदेव हि शास्त्रार्थः' इति वचनबलेन च प्रतिक्षिप्तः । शक्ताशक्तभेदेन च व्यवस्था कृतेति भावः । इदानीं तु श्रुति-स्मृत्योरेकार्थ्येनेति । उपायान्तरनिषेधकश्रुतिस्मृत्योरविरोधसिद्धयर्थमित्यर्थः । इदं चोपबृंहणोपबृंहणीययोरित्युत्तरत्र स्पष्टम् । पुरुष-सूक्तैकार्थ्यं दर्शयितुमिति । पुरुषसूक्तैकार्थ्यमुपजीव्यावगतपरमपुरुषतात्पर्या श्वेताश्वतरोपनिषदिति दर्शयितुमित्यर्थः । नाहं वेदैरिति वचनमुपात्तमिति । "नाहं वेदैः', "भवत्या त्वनन्यया' इति श्लोकद्वयमुपात्तम्; तत्तुल्यार्थत्वमभिप्रेत्य, "पुरुषः स परः' इति श्लोकोऽप्युपात्तः।

नाहं वेदैर्न तपसा न दानेन न चेज्यया । शक्य एवं विधो ज्ञातुं दृष्टवानसि मां यथा ।।

भवत्या त्वनन्यया शक्य अहमेवविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ।।'

"पुरुषः स परः पार्थ भक्तया लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ।।'

इति त्रयः श्लोकाः । तदनन्तरमित्यनेन पौनरुक्तयप्रसङ्गादिति ।

"भक्तया मामभिजानाति यावान् यश्चास्मि तत्त्वतः । ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।।'

इति श्लोके "ततः' इत्यनेन ज्ञानस्य परामर्शे "तदनन्तरम्' इत्यनेन पौनरुक्तयमित्यर्थः । ननु "तदनन्तरम्' इत्यत्र तच्छब्दो ज्ञानपरः; "ततः' इति तच्छब्दो ज्ञानहेतुभूतभक्तिपरः; "ततः भक्तया मां तत्त्वतो ज्ञात्वा ज्ञानानन्तरं मां विशते' इत्युक्तौ न पौनरुक्तयमिति चेत्- न भक्तेर्ज्ञानहेतुत्वस्य "भक्तया मामभिजानति' इत्यनेनैव सिद्धतया पुनरुक्तिप्रसङ्गात् "ततो विशते' इत्यन्यस्यैव वक्तव्यत्वादिति भावः। न च"भक्तया मामभिजानानि' इति पूर्वनिर्दिष्टभक्तेः प्राप्तिहेतुत्वाभावात् कथं "ततः' इत्यनेन तस्या भक्तेः परामर्श इति वाच्यम्,

"ततः' इत्यस्य तद्व्यक्तिपरामर्शित्वासंभवादेव तज्जातीयव्यक्तिपरामर्शित्वमित्यदोषः ।

अन्योन्याश्रयणं वेति । वाशब्दः समुच्चये; अन्योन्याश्रयणे आत्मश्रयस्यापि सिद्धत्वात् । अज्ञातसुकृतवशादिति । स्ववृत्त्यर्थं व्याधकृतव्याघ्रमरणेन संपादितं गोरक्षणादिकमज्ञातसुकृतमित्युच्यते । यज्ञेन विविदिषन्तीति वाक्यस्य ह्यर्थश्चिन्त्यत इति । न तु स्वल्पायाससाध्यकर्मविधायकवाक्यार्थ इति भावः । आत्माश्रयादिदोषः स्यादेवेति । नन्वन्नद्वेषेण काश्यं प्राप्तस्य तत्परिहाराय अन्नविषयौन्मुख्यलक्षणेच्छायां सत्यामप्युत्कटाजीर्णादिप्रयुक्तधातुवैषम्यदोषात् तत्र प्रवृत्तिपर्यन्ता रुचिर्न जायत इति तद्रोचकौ- षधवत्, "निरतिशयानन्दं बह्म; तत्प्राप्तौ विद्या साधनम्' इत्यस्मिन्नर्थे प्राचीनानन्तजन्मशतानुष्ठितानभिसंहितफलनित्यनैमित्तिक-कर्मोपसंजातचित्तप्रसादमहिम्ना संपन्नविश्वासस्य पुरुषस्य ब्रह्मावाप्तौ तद्विद्यायां चौन्मुख्यलक्षणेच्छायां सत्यामप्यनादिभवसंचिता-नेकदुरितदोषेण विषयप्रावण्यं संपादयता प्रतिबन्धात् विद्यासाधने श्रवणादौ प्रवृत्तिपर्यन्ता रुचिर्न जायत इति प्रतिबन्धकनिरास-पूर्वकतादृशरुचिसंपत्त्यर्थं कर्मसु प्रवृत्तिरुपपद्यत एव । इतरथा "या प्रीतिरविवेकानाम्' इत्यादिष्वगतेरिति चेत्-न- यद्यनन्यथासिद्धं विविदिषासाधनत्वग्राहि प्रमाणमुपलभ्येत, स्यात्तदा यथा कथंचिन्निर्वाहः । न त्वेतदस्ति । "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्' इति सामान्यन्यायापेक्षया "सन्प्रत्ययाभिहिताच्छाविषयस्य प्राधान्यम्' इति विशेषन्यायस्य, "अश्वेन जिगमिषति' इत्यादौ दृष्टस्य प्रबलत्वादिति भावः । अभिधानमात्रस्य प्रागपि कृतत्वात्

तन्मात्रं अप्रयोजकं इत्यभिप्रेत्याह - उपपादयिष्याम इत्यर्थ इति । तच्छब्दो विविदिषापर इति । नच ध्यानोपक्रमात्प्रागेव विविदिषायाः सिद्धत्वात् पुनः तदनुष्ठानं व्यर्थमिति शङ्कयम् । प्रत्यहं अनुष्ठायोपासनायाः हेतुभूत विविदिषाया अपि प्रत्यहं अनुवृत्त्यर्थं कर्मणां अपेक्षितत्वात् इति भावः । यावज्जीवं कर्मणोऽपेक्षितत्वे चेति । साक्षाद्वा परंपरया वा कर्मणस्तदपेक्षितत्व इत्यर्थः । (ततश्च विविदिषार्थ-त्वपक्षेऽप्यपेक्षितत्वमात्रसत्त्वात्) प्रमाणजिज्ञासायां श्रुतिवाक्ये प्रदर्शनीये तदुपेक्ष्य सूत्रसंदर्शनस्य प्रयोजनमाह - सूत्रसंदर्शनेनेति । आश्रमशेषत्वेऽपि विद्याङ्गत्वमपीति; विद्यापेक्षितत्वमित्यर्थः । ततश्च विविदिषार्थत्वपक्षेऽप्यपेक्षितत्वमात्रसत्त्वान्नानुपपत्तिरिति भावः। (साधनसप्तकम्)

वाक्यकारनिर्देश इति । इतरेतरद्वन्द्वस्य साहित्यरूपसमुच्चयावगमकत्वात् । अत एवैकादशाद्ये "दर्शपूर्णमासाभ्याम्' इति द्वन्द्वावगतं साहित्यं मा बाधीति समुच्चितानामेव षण्णां यागानां फलसाधनत्वमिति समर्थितमिति भावः । समुच्चयोऽर्थान्तरमिति । यद्यपि समुच्चान्वाचयेतरेतरयोगसमाहाराश्चत्वारोऽपि चार्थाः वाशब्दार्थभूतविकल्पप्रतिद्वन्द्विसमुच्चयरूपा एव । न हि "गामश्वं चानय' इति समुच्चये वा,"भिक्षामट, गां चानय' इत्यन्वाचये वा, "देवदत्तयज्ञदत्तौ कुरुतः' इतीतरेतरयोगे वा, "छत्रापानहमानय' इति समाहारे वा वाशब्दार्थभूतविकल्पप्रतीतिरिति -तथापि वाशब्दवत् समुच्चयशब्दोऽन्चाचयसैपठिते समुच्चयावान्तरविशेषे विकल्प-प्रतिद्वन्द्विसमुच्चयसामान्ये च वर्तत इति भावः । "जात्याश्रय' इत्यत्र "कायशुद्धिर्विवेकः' इति सामानाधिकरण्यं कथमित्याशङ्कय, "जात्याश्रवनिमित्तादुष्टादन्नात्' इति वाक्ये दुष्टेभ्यो विवित्तादन्नात् कायशुद्धेः साध्यत्वावगमात् कारणवाचिना विवेकशब्देन कार्यभूता शुद्धिर्लक्ष्यत इत्याह - आहारविषयेत्यादिना । जातिदुष्टाः कलञ्जगृञ्जनादय इति ।

लशुनं गृञ्जनं चैव पलाण्डुं कव (त) कानि च । वार्ताकनालिकालाबून् जानीयाज्जातिदूषितान् ।।'

इत्यादि द्रष्टव्यम् । मुख्ये संमवत्युपचारस्यान्याय्यत्वादाह - यद्वेति । देहविवेचनं विवेकोऽस्तु; सामानाधिकरण्यं कथमित्यत्राह - अशुद्धेभ्य इति । मामनुस्मरेत्येवमन्तमिति ।

"यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेबरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः ।।

तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च ।'

इति हि श्लोकक्रमः । सत्यं भूतहितमिति ।

सत्यं भूतहितं प्रोक्तमार्जवं समचित्तता । दया भूतहितैषित्वं क्षमा द्वन्द्वसहिष्णुता ।।'

इत्यादि प्रमाणं द्रष्टव्यम् । आर्जवादिप्रतिपादकवाक्यजातं क्रोडीकृतमिति;

दानं यज्ञः सतां पूजा वेदधारणमार्जवम् ।एष धर्मः परो ज्ञेयः फलवान् प्रेत्य चेह च ।।'

इति वचनजातमिति भावः । भावान्तरमेवाभाव इत्यभिप्रेत्याह - अभास्वरत्वमिति । दैन्यशब्दविवरणमिति । भास्वरत्वाभावो दैन्यादि्भद्यत इति मतमालम्व्याह - भास्वरत्वविरोधीति । चशब्दो भिन्नक्रम इति; "तज्जं च' इत्ययं भिन्नक्रम इत्यर्थः । देश-कालवैगुण्यात् शोकवस्त्वाद्यनुस्मृतेर्दैन्यम्, तज्जं चेत्यर्थः । दैन्यशब्दस्य तज्जशब्दात् प्राक् प्रयोगाभावे तच्छब्दस्य दैन्यपरामर्शा-भावप्रसङ्ग इति द्रष्टव्यम् । यद्वा भिन्नवाक्यतयेति । अस्मिन् पक्षे, "तज्जं दैन्यम्' इत्यस्य वाक्यस्य भेदः, तस्य च पश्चात् प्रयोगः, "तच्च तज्जं दैन्यम्' इति तच्चेत्यस्याध्याहारदोष इत्याद्यस्वरसो बोध्यः ।

(विद्याञ्चेति श्रुत्यर्थः)

अस्य वाक्यस्यार्थमुपजीव्येति । "कषायपक्तिः कर्माणि' इति वाक्यस्यार्थमित्यर्थः उभयोरपि निरासकं स्यादिति तद्व्यावृ-त्त्यर्थमिति । उभयोरपि निरासकं दृष्टम्; तद्वत् कर्मापि स्वप्राचीनं कर्मेव स्वोत्तराधमपि निरस्यत्विति शङ्काव्यावृत्त्यर्थमित्यर्थः । केचित्तु - "प्राचीनम्' इत्येतत् न कर्मापेक्षया प्रचीनपरम्; अनेकजन्मशतानुष्ठीयमानकर्मजातमनुद्भूतावयवभेदम् "अविद्यया' इति परामृश्यते; तत्र च यदि प्राचीनपदं तत्प्राचीनपरामर्शि, तदा तादृशस्यैव कर्मणो विनाशे तदनन्तरभाविनां विनाशो नास्तीत्युप- पादितं स्यात् । न चेतदिष्टम् । न चाविद्याशब्दोऽन्त्यकमर्मात्रपरामर्शीति शक्यं वक्तुम्; "कषाये कर्मभिः पक्वे' इत्यादिविरोधात् । तैस्तैः कर्मभिस्तत्तत्पूर्वभाविनां विनाश इत्येतत्परमपि न वाक्यम्; तथा हि सति आद्येनैव कमर्णा तत्पूर्वभाविनां विनाशप्रसङ्गात्; "तीर्त्वा' इत्युक्ते उत्तराश्लेषशङ्काया अप्यभावेन तच्छङ्काया अप्यव्यावर्त्यत्वात्; तदुत्तरक्षण एव ज्ञानोत्पत्तिप्रसङ्गाच्च । अतो भाष्ये प्राचीनपदमनेकजन्मार्जितमपि सर्वं ज्ञानप्राचीनं कर्म व्यपोह्येति साकल्यसूचनार्थमेव । न तु कर्मप्राचीनपरतया केषांचिन्मृत्युशब्दितानां निवर्त्यत्वपरम्; तस्यानुपयुक्तत्वादिति मन्यन्ते । प्राप्य स्थित इति हि तद्योजनेति । तन्मते तरदिः प्राप्तिवचन इति भावः । इति वा शंकराभिमतयोजना स्यादिति । संभावनायां लिङ् । संभवार्थिके (संभाविते ?)त्यर्थः । ततश्च विद्याम् अन्तःकरणवृत्तिम्, अविद्यां तत्कारणं च कायर्कारणरूपेण सहिते यो वेद, सः अविद्योपादानकत्वेन तन्मय्या अन्तःकरणवृत्त्या तदुपादानं मृत्युमविद्यां तीर्त्वा विद्यया स्वरूपभूतज्ञानेनोपलक्षितममृतत्वमश्नुत इति परैर्योऽर्थो वर्णितः, सोऽनुवादस्याप्यनर्ह इति सूच्यते । अङ्गिज्ञातव्यत्वोक्ता-वङ्गज्ञातव्यत्वस्यानुक्तसिद्धत्वात् तत्समुच्चये प्रयोजनमान्ह्यादन्यथा व्याचष्टे - यद्वा धर्मेचेति । समुच्चेतव्ययोः विरोधिनोः कोशगम्यत्वात् उक्तार्थ समुच्चयपरतया व्याचष्टे यद्वा प्रतिपदद्योतकाविति । "धर्मे चार्थे च' इति श्लोके चशब्दस्य विरोधिसमुच्चयपरत्वमुक्तसमुच्चयपरत्वं च व्याख्यातृभिर्व्याख्यातमिति तस्य दृष्टान्ततयोभयत्राप्युपादानं युक्तमिति द्रष्टव्यम् । पुण्यपापे उभे अपीति । "ज्ञानविरोधि च कर्म पुण्यपापरूपम्' इति भाष्यावतारिकानुसारात् "ब्रह्मज्ञानोत्पत्तिविरोधित्वेन' इत्युत्तर-भाष्यस्य, ततः किमित्यत्राहेत्यवतारिका देयेति मन्यते(न्ते) । न तन्मात्रपापान्तरविषयः पाप्मशब्द इति । "सर्वे पाप्मानः' इत्यत्र पाप्मशब्दस्य दुष्कृतशब्दानुक्तपापमात्रविषयत्वसंभवेऽपि पापशब्दस्य तन्मात्रविषयत्वासंभवात्, "अपहतपाप्मा ह्येष' इति सकल-हेयनिवृत्तिसंवादिसमनन्तरवाक्ये सुकृतविषयत्वावश्यंभावात् तावताप्यस्माकं समीहितसिद्धेरिति भावः । केचित्तु- "सर्वे पाप्मानः' इत्यत्र पाप्मशब्दो न दुष्कृतशब्दानुक्तपापान्तरवाचीत्येवार्थः, शब्दस्वारस्यात् । न चैवं समनन्तरवाक्यस्थपाप्मशब्दस्य सर्वपरत्वं पूर्ववाक्यस्थपाप्मशब्दस्य सर्वपरत्वे कथं हेतुः स्यादिति वाच्यम्, एकप्रकरणस्थयोः शब्दयोर्वैरूप्यस्यासति बाधकेऽयुक्तत्वादिति वर्णयन्ति । ननु "अपहतपाप्मा ह्येषः' इति वाक्येऽपि (अपहत?) पाप्मशब्दस्यानुक्तकतिपयपापनिवृत्तिरित्यर्थोऽस्त्वित्याशङ्कयाह - न ह्यनुक्तकतिपयपापनिवृत्त्युक्ताविति । शोकादिषु पाप्मशब्दस्यामुख्यत्वेऽपीति । "अपहतपाप्मा विजरो विमृत्युर्विशोकः' इति वाक्ये शोकादीनां पाप्मशब्दापेक्षया पृथक्कीर्तनादनुगतप्रवृत्तिनिमित्ताभावाच्च शोकादिषु पाप्मशब्दस्य गौणत्वसंभवेऽपि सुकृतेऽनु-गतप्रवृत्तिनिमित्तसत्त्वेन गौणत्वासंभवात् । न च छत्रिन्यायेन लक्षणास्वीकारे वृत्तिद्वयविरोधान्न कस्यापि मुख्यत्वमिति वाच्यम्-तथापि "सृष्टीरुपदधाति' इत्यादाविव भूम्ना लक्षणासंभवे, "प्राणभृत उपदधाति' इत्यादिवत् लिङ्गसमवायमात्रेण गौण्या वृत्त्याः अनाश्रयणीयत्वादिति भावः । केचित्तु-वृत्तिद्वयविरोधो न दूषणमित्यभिप्रेत्यैतदुक्तमिति वदन्ति । अन्ये तु, "कालजरामृत्युशोकादयः संख्यातत्वात्' इति वाक्यकारवचनानुसारात् शोकादिष्वपि पापशब्दस्य मुख्यत्वमेव । अमुख्यत्वेऽपि न क्षतिः; तावता पाप्म-शब्दप्रयोगविषयत्वसाधारण्यस्य हेतुत्वाभावेऽपि प्रवृत्तिनिमित्तसाधारण्यात् "धर्मेण पापम्' इत्यत्र मुख्यत्वमेवेत्यर्थ इति वदन्ति ।

(उन्निनीषावाक्यार्थः)

यद्वृत्तद्वयमिति । "यमुन्निनीषति', "यमधो निनीषति' इति यच्छब्दद्वयमित्यर्थः । ज्ञानप्रदानद्वारककारयितृत्वविषयमवसीयत इति । यद्वृत्तद्वयाभिप्रेतस्य पुण्यपापाख्यस्य कर्मणः स्वर्गनरकहेतुभूतकर्मकारयितृत्वप्रयोजकोन्निनीषाधोनिनीषाहेतुत्वमस्माद्वाक्यात् प्रतीयत इत्यर्थः । ततश्च कर्मणां कर्मप्रयोजकत्वं ज्ञानद्वारकमिति सिध्यतीत्यर्थः । नन्वेतावता पापशब्दितस्यासाधुकर्मकर्तव्यता-

ज्ञानद्वारा नरकहेतुभूतकर्मानुष्ठानहेतुत्वसिद्धावपि न सम्यग्ज्ञानोत्पत्तिप्रतिबन्धकत्वं सिध्येदिति चेत्, निषिद्धे कर्मणि बलवदनि-ष्टजनकत्वलक्षणसम्यग्ज्ञानप्रतिबन्धकत्वाभावे तत्र प्रवृत्तेरेवानुदयप्रसङ्गेनावश्यं सम्यग्ज्ञानप्रतिबन्धकत्वस्य वक्तव्यत्वात् ब्रह्मज्ञान-प्रतिबन्धकत्वमपि सिध्यति । इतरथा दुरितकर्मप्रवृत्तेरेवासंभवात् । सर्वकर्मदेवतासामान्यविषयमिति । "बुद्धया संयोजयन्ति तम्' इति बुद्धेर्वेद्यरूपकर्मविशेषानुपादानात् सर्वविषयकज्ञानप्रतिबन्धकत्वमेव सिध्येत्, न तु भगवद्विषयमोक्षहेतुज्ञानप्रतिबन्धकत्वम् । तथा, "न देवा यष्टिमादाय' इति देवतासामान्योपादानात्, "एष ह्येव' इति विवक्षितस्य भगवत एव कारयितृत्वस्य न लाभ इत्यर्थः । सम्यग्ज्ञानसामान्याबहिर्भावादिति । इदमुपलक्षणम्-भगवतोऽपि देवतासामान्याबहिर्भावादित्यपि द्रष्टव्यम् ।

(धर्मेण पापमित्येतदर्थः)

फूर्वमेव शिक्षित इति । अत इदानीममुक्तिर्न दोषायेति भावः । अत्र श्रूयमाणत्वादिति । "धर्मेण पापमपनुदति' इति प्रकरणे "तस्माद्यज्ञं परमं वदन्ति', "तस्मात् सत्यं परमं वदन्ति' इत्यादिवाक्येषु श्रूयमाणत्वादित्यर्थः । अपनुदं दिति ह्यर्थः स्यादिति । ननु पापशब्दस्य तादात्विकानिष्टसाधनत्वरूपार्थाश्रयणे स्वर्गार्थेन कर्मणा कस्यचित् पुंसस्तन्कालविशेषेऽनिष्टपुत्रपश्चादिसाधन-कमर्णामपि विनाशप्रसङ्ग इति चेत्-न-योगसिद्धयधिकरणोक्तन्यायेन (मी.४-३-१२) फलान्तरार्थमनुष्ठितस्य कर्मणस्तस्मिन्नेव प्रयोगेऽनिष्टपश्चादिसाधनपापनिवर्तकत्वासंभवात् । प्रकृते च "यज्ञेन' इत्यादिवाक्येन विनियुक्तानां यज्ञादीनां द्वारविशेषाकाङ्क्षायां "धर्मेण पापमपनुदति' इत्यस्य द्वारविशेषसमर्पकतया विद्यार्थमनुष्ठितेनापि पापनिवृत्त्युपपत्तेः । पापशब्दवाच्यान्तर्भावाच्चेति । ननु धर्मत्वेन प्रसिद्धानां ज्योतिष्टोमादीनां मुमुक्षुं प्रत्यनिष्टसाधनत्वेन तं प्रति पापत्वे, यस्य पुंसो यदा यदनिष्टम्, तं प्रति तदा तस्याधर्म-त्वप्रसङ्गेन व्यवस्था न स्यादिति चेत्-न । इष्टापत्तेः । पुरुषविशेषं प्रत्येव धर्माधर्मव्यवहारात् । तत् इत्यस्य तस्मादित्यर्थकत्वमभि- प्रेत्य व्याचष्टे -श्रुतिस्मृतीति । एवम् इति व्याख्येयं पदम् । उपायत्रतिबन्धकनिरासार्थमिति छेदः । अतः ब्रह्मज्ञानस्य फलाभिसं-धिरहिताश्रमकमर्सापेक्षत्वादिति । नन्वेतावता ब्रह्मोपासनस्य कर्मसाध्यस्य तद्विचारसापेक्षत्वेऽपि न ब्रह्मविचारस्य तदपेक्षेति चेत्-न-कर्मोपासनयोः शेषिणोरनुष्ठानक्रमेणैव शेषभूतयोस्तद्विचारयोरपि क्रम इत्याशयात् । ब्रह्मविचारापेक्षिताधिकारिविशेषणीभूत-कर्मास्थिरफलत्वज्ञानादिनिष्पादकत्वमप्यस्तीत्याहेत्याह - ज्ञानं हीत्यादिना ।

(साधनचतुष्टयपूर्ववृत्तत्वनिरासः)

साधनसप्तकं चेति । विवेकविमोकादीत्यर्थः । इत्यारभ्येति । "नित्यानित्ययोव्रसन्तीति नित्यानित्यवस्तूनि, तद्धर्माः । नित्या-नित्ययोधर्र्मिणोस्तद्धर्माणां च विवेको नित्यानित्यवस्तुविवेकः । एतदुक्तं भवति-माभूत् "इदमृतं नित्यम्, इदमनृतमनित्यम्' इति धर्मिविशेषविषयो विवेकः । धर्मिमात्रयोनित्यानित्ययोस्तद्धर्मयोश्च विवेकं निश्चिनोत्येव । नित्यत्वं सत्यत्वम्; तत् यस्यास्ति, तन्नित्यं सत्यम् । तथा चास्थागोचरः । अनित्यत्वमसत्यत्वम्; तद्यस्यास्ति तदनित्यमनृतम् । तथा चानास्थागोचरः । तदेतेष्वनुभूयमानेषु युष्मदस्मत्प्रत्ययगोचरेषु विषयविषयिषु यदृतं नित्यं सत्यं सुखं व्यवस्थास्यते तत् आस्थागोचरो भविष्यति । यत्त्वनित्यमनृतं भविष्यति, तत् तापत्रयपरीतं त्यक्ष्यत इति । सोऽयं नित्यानित्यवस्तुविवेकः प्राग्भवीयाद्वा, ऐहिकाद्वा कमर्णो विशुद्धसत्त्वस्य भवत्यनुभवोपपत्तिभ्याम्' इत्यन्तेन ग्रन्थेनेति शेषः । "इदं नित्यम्, इदमनित्यम्' इति विशेषनिश्चयाभावेऽपि नित्यत्वानित्यत्व-योर्धर्मिभ्यां भवितव्यमित्येवं योऽयं सामान्यनिश्चयः, स एव नित्यानित्यवस्तुविवेकशब्दार्थ इति भावः । "नित्यस्य धर्मिणो

नित्यत्वं सत्यत्वम्' इति पाठः कोशेषु दृश्यते । तत्र "नित्यस्य इत्येतत् स्वरूपकथनपरम् । यस्य धर्मिणो नित्यत्वं सत्यत्वं च तस्योपादेयत्वम्, यस्य धर्मिणोऽनित्यत्वमसत्यत्वम्, तस्य हेयत्वमित्येवं विवेक इति पर्यवसितार्थः । "यस्य धर्मिणः' इति पाठस्तु सुगम एव । निरू-पकस्य तु हेयमिति चेदिति; अनित्यमिति शेषः । आद्यन्तयोरिति । साधानानुष्ठानफलानुभवदशयोरित्यर्थः । तस्यैतन्नैरपेक्ष्याच्च पूर्ववृत्तत्वानुपपत्तिरिति । तस्यागमान्तरस्य ब्रह्मविचारनैराकाङ्क्ष्यापादकत्वादित्यर्थः । अत एवोपसंहारेऽपि तथैव वक्ष्यति- "शास्त्रान्तराणां ब्रह्मविचारनैराकाङ्क्ष्यापादकत्वात्' इति । स्वार्थोपयोगित्वादिति । आरम्भोपयोगित्वादित्यर्थः । तत्रत्यन्यायाधीन इति । आवृत्तिविधानाद्यधीन इत्यर्थः । किंचाद्यसूत्रादेवेति । यद्यपि सूत्रस्य विषयप्रयोजनाधिकारिप्रतिपादनपरत्वेऽपीदृशान्योन्या-श्रयस्य सुवचनत्वात् शास्त्रारम्भोपयोगवर्णनसूत्रमात्रस्योच्छेदप्रसङ्गः तथाप्याद्यसूत्रस्य शास्त्रान्तराप्रामाण्यादिप्रतिपादनपरत्वेन परै-रव्याख्यातत्वादित्यत्र तात्पर्यात् । अत एव "किंच अनित्यफल' इति दूषणान्तरोपन्यासेन स्वर्गादिफलानित्यत्वावगतौ शास्त्रान्त-स्वोत्प्रेक्षिततर्कयोरेवोत्थापनम्, न तु शास्त्रारम्भसूत्रस्येति द्रष्टव्यम् । शास्त्रान्तरदौर्बल्यमेव वा स्वशास्त्रप्राबल्यमेव वेति । स्वशास्त्र-प्राबल्यविनाकृतशास्त्रान्तरदौर्बल्यं वा, शास्त्रान्तरदौर्बल्यविनाकृतस्वशास्त्रप्राबल्यं वेत्यर्थः । समुच्चितमुभयं वेति । शास्त्रान्तराणां दौर्बल्यं स्वशास्त्रप्राबल्यं चेत्यर्थः । स्वशास्त्रस्य दौबल्र्य इति । स्वशास्त्रप्राबल्याभावे शास्त्रान्तरसमानयोगक्षेमत्वादित्यर्थः ।

अत एव दुःखत्रयाभिघातज्ञानस्येति । न च "तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः' इति भाषणात् तद् विरुध्येतेति शङ्कयम्, तस्यापि कर्मविचारजन्यकर्माल्पास्थिरफलत्वज्ञानाभिप्रायत्वेनादोषात् । ननु कर्मविचारजन्यायाः कर्मणामल्पास्थिरफलत्वादिप्र-तीतेरनन्तस्थिरफलाभिलाषस्य च पराभिमतसाधनचतुष्टयसंपत्तिरूपत्वसंभवान्न विरोध इति चेत्, सत्यमविरोधः-तथापि, "अथातः शेषलक्षणम्' इत्यादिवत् पूर्वपूर्वाध्यायविचारस्य पूर्ववृत्तत्वं युक्तमित्यत्र भाष्यकृतः संरम्भात् ।

व्याक्येयस्वभावात् क्रमनियम उक्तः । व्याख्यानस्वभावादपि तत्सिद्धिरिदानीमुच्यत इति । वेदद्वारा व्याख्येययोः कर्मोपा-सनरूपशेषिणोकार्यकारणभावेन पौर्वापर्यात् तच्छेषभूतविचारयोरपि पौर्वापर्यमुक्तम् । अधुना कर्मकाण्डोक्तन्यायोपजीवित्वादस्य शास्त्रस्य पौर्वापर्यमुच्यत इत्यर्थः । इदं प्रदर्शनार्थमुक्तमिति । अयमभिप्रायः-"एषां साधनत्वं च विनियोगावसेयम्' इति भाष्य-पर्यालोचनायां तृतीयाध्यायव्युत्पाद्यश्रुतिलिङ्गादिनिर्णेतव्यसाधनताकत्वात् साधन चतुष्टयस्य तत्पूर्ववृत्तत्वमिति प्रतीयते । न च तद्युक्तम्; तर्कशास्त्रव्युत्पादितप्रत्यक्षप्रमाणतदितिकर्तव्यताभूततर्कादिग्राह्यकारणताकत्वात् कर्मविचारस्य तर्कशास्त्रस्यापि तत्पूर्व-वृत्तत्वप्रसङ्ग इति वाचाटवचसोऽप्यवकाशप्रसङ्ग इ(ङ्गादि?)ति न शङ्कयम्- अत्र व्युत्पाद्यानां बहूनां प्रायेण तन्निर्णयसापेक्षत्वात् तदुपजीवित्वमित्यत्र भाष्यस्य तात्पर्यादिति ।

(पूर्वमीमांसार्थसंग्रहः)

प्रमाणलक्षणं वृत्तमिति । विध्यर्थवादमन्त्रनामधेयस्मृत्याचारवाक्यशेषसामर्थ्यात्मकप्रमाणस्वरूपं वृत्तमित्यर्थः । शास्त्रभेदो वेति । इदं तु गुरुमते द्रष्टव्यम् । भेदहेतव इति । यजति, जुहोति, ददाति इति चोदनासु यजत्यादिधातुभेदरूपेण शब्दान्तरेण यागदानहोमानां भेदः; "समिधो यजति' "तनूनपातं यजति' इत्यादिविधिषु "यजति' इति पञ्चकृत्वोऽभ्यासेनाविशेषपुनःश्रुतिरूपेण प्रयाजानां भेदः "सप्तदश प्राजापत्यान् पशूनालभते' इत्यत्र देवतासंबन्धभेदिन्या सप्तदशसंख्यया तदनुमेययागानां भेदः; "अथैष ज्योतिः' इत्यादि-वाक्येषु ज्योतिरादिनामधेयैस्तन्नामकयागानां प्रकृतज्योतिष्टोमाद्भेदः; "तप्ते पयसि दध्यानयति; सा वैश्वदेव्यामिक्षा । वाजिभ्यो वाजिनम्' इत्यत्रामिक्षारूपगुणान्तरावरुद्धे यागे निवेशमलभमानेन वाजिनगुणेन वाजिनयागस्यामिक्षायागात् भेदः; प्रकरणान्तरेण नित्याग्निहोत्रात् मासाग्निहोत्रस्य भेद इत्येवं शब्दान्तरादिभिर्भेदः प्रतिपाद्यत इत्यर्थः ।

श्रुति लिङ्गेति । निरपेक्षशब्दः श्रुतिः । सा त्रिधा-विधात्री, अभिधात्री,विनियोक्त्री चेति । लिङ्गादिश्रुतिर्विधात्री । इन्द्रादिश्रुति-रभिधात्री । विनियोक्त्री त्वेकप्रत्ययरूपा, एकपदरूपा, विभक्तिरूपा चेति त्रिधा । तत्राऽऽद्या-"पशुना यजेत' इत्यत्र तृतीया । सा हि स्वोक्तकरणकारकं प्रति स्वोक्तैकत्वरूपसंख्यायाः शेषत्वमर्पयति । द्वितीया, "यजेत' इति पदम् । तेन प्रत्ययोक्तभावानां प्रति प्रकृत्यु-क्तयागस्य शेषतोपनीयते । तृतीया शेषित्वबोधिका शेषत्वबोधिका चेति द्विधा । "व्रीहीन् प्रोक्षति' इत्यादिषु द्वितीया व्रीह्यादीनां प्रोक्षणादिक्रियां प्रतीप्सिततमत्वरूपशेषित्वबोधिका । "क्रीते सोमे भैत्रावरुणाय दण्डं प्रयच्छति' इत्यत्र चतुर्थीश्रुतिः मैत्रावरुणस्य प्रदानक्रियेप्सिततमेन कर्मणाभिप्रेयमाणत्वरूपशेषित्वबोधिका । "अरुणया क्रीणाति' इत्यत्र क्रयभावनां प्रत्यारुण्यस्य, चात्वाला-न्मृदमाहरति' इत्यत्र मृदाहरणक्रियां प्रति चात्वालस्य, "वेद्यां हवींष्यासादयति' इत्यत्र हविरासादनक्रियां प्रति वेद्याश्च तृतीयाप-ञ्चमीसप्तम्यः शेषत्वबोधिकाः । षष्ठी तु क्वचित्, "दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र शेषित्वबोधिका, "यजमानस्य याज्या' इत्यादौ शेषत्वबोधिका च । संबन्धमात्रऽनुशिष्टायाः षष्ठया योग्यताद्यनुसारेणोभयथापि पर्यवसानसंभवात् । वस्तुसामर्थ्यं लिङ्गम् । तद् द्विविधम्-शब्दसामर्थ्यमर्थसामर्थ्यं चेति । तत्र "बर्हिर्देवसदनं दामि' इति मन्त्रस्य लवनप्रकाशनसामर्थ्यरूपाल्लिङ्गाल्लवनशेषता । "स्वधितिनाऽवद्यति' "स्रुवेणावद्यति' "हस्तेनावद्यति' इत्यवदानसामान्ये साधनत्वेन श्रुतानां स्वधित्यादीनां तत्तत्सामर्थ्यरूपा-ल्लिङ्गात् विशिष्य मांसद्रवद्रव्यपुरोडाशाद्यवदानेषु शेषता । शेषत्वस्य शेषित्वस्य वा बोधिकया श्रुत्या रहितपदसमभिव्याहारो वाक्यम् । यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः' इति; यथा वा "मैत्रावरुणः प्रेष्यति चान्वाह च' इति । न हि होमभावनां प्रति स्वर्गस्य भाव्यत्वेन शेषित्वबोधिका द्वितीयादिश्रुतिः, प्रैषानुवचनं वा प्रति मैत्रावरुणस्य कर्तृत्वेन शेषत्वबोधिका तृतीयादिश्रुतिर्वास्ति । प्रथमा तु प्रातिपदिकार्थमात्रऽनुशिष्टा । अतः पदसमभिव्याहाररूपेण वाक्येन शेषशेषिभावबोधः । विधिवाक्येन कर्तव्यतयावगतस्य "केन प्रकारेण कर्तव्यम् ?' इति विशिष्याज्ञायमानस्येतिकर्तव्यताकाङ्क्षा प्रकरणम् । तद् द्विविधम्-महाप्रकरणमवान्तरप्रकरणं चेति । तत्राद्येन दर्शपूर्णमासादिकं प्रति प्रयाजादीनाम्, द्वितीयेन प्रयाजादिकं प्रत्यभिक्रमणादीनां च तत्तत्संनिधिसमाम्नातानां शेषता । स्थानं द्विविधम्-यथासंख्यं संनिधिश्चेति । तत्राद्येन "दब्धिरस्यदब्धो भूयासम्' इति मन्त्रस्योग्नेयाग्नीषोमीयमन्त्रद्वयमध्याम्नातस्य आग्नेयाग्नीषोमीययागद्वयमध्यानुष्ठेयोपांशुयाजशेषता । संनिधिस्तु आम्नानसंनिधिः, अनुष्ठानसंनिधिश्चेति द्विविधः । आद्येन, "शुन्धध्वं दैव्याय कर्मणे देवयज्यायै' इति मन्त्रस्य महाप्रकरणावान्तरप्रकरणरहितसांनाय्यपात्रप्रोक्षण शेषता । द्वितीयेन पशुधर्माणामग्नी-षोमीयपशुशेषता । समाख्या यौगिकी संज्ञा । सा लौकिकी वैदिकी चेति द्विविधा । "होतृचमसः' इति वैदिकसमाख्यया होतुश्चम-सभक्षणं प्रति, "आध्वर्यम्' इति याज्ञिकप्रसिद्धलौकिकसमाख्यया अध्वर्योरवघातादिकं प्रति च कर्तृत्वेन शेषतेत्येवं सापवादः शेष-शेषिभावस्तृतीयाध्याये प्रपञ्चित इत्यर्थः ।

पुरुषार्थैः क्रत्वर्थानामिति । पुरुषार्थैः क्रतुभिः क्रत्वर्थानामित्यर्थः । शेषिभिः शेषाणां प्रयुक्तिरिति यावत् । शेष्येव विधेयं प्रयुङ्क्ते=स्वसिध्यर्थमनुष्ठापयति, न वनुनिष्पाद्यपि । नापि शेषः शेषिणं प्रयुङ्क्ते । अनेकशेषसद्भावेऽपि यत्रान्यप्रयुक्तस्यैवान्यत्र विनियोगः, तत्र यत्प्रयुक्तस्यान्यत्र विनियोगः स एव शेषं प्रयुङ्क्ते, न तु शेष्यपि सन्नन्योऽपि । एवं च, "तप्ते पयसि दध्यानयति' इति वाक्ये विधीयमानस्य दध्यानयनस्य द्विकर्मकस्य कर्मान्तराकाङ्क्षायां समभिव्याहृतं पयः कर्मान्तरत्वेनान्वीयमानं सप्तम्या अधिक-रणत्वेन निर्देशात् प्रधानकर्मतया पर्यवस्यतीति प्रकृतप्रधानभूतपयः परामर्शिना तत्पदेन सामानाधिकरण्येन निर्दिष्टतया पयोरूप-त्वेनावगता आमिक्षैव शेषित्वात् शेषभूतं दध्यानयनमनुष्ठापयति; न तु तदनुनिष्पादि वाजिनमपीत्यामिक्षापचार एव पयोन्तरे दध्यानयनस्य प्रयुक्तिः; न वाजिनापचारे । "कृष्णविषाणया कण्डूयते', "चात्वाले कृष्णविषाणां प्रास्यति' इति कृष्णविषाणायाः

कण्डूयनप्रासनरूपक्रियाद्वयान्वये सत्यपि कृष्णविषाणा तृतीयया कण्डूयनं प्रति शेषः; प्रासनं प्रति तु द्वितीयया शेषिणीति निवृत्त-कण्डूयनप्रयोजननिकायास्तस्याः प्रासनात् प्राक् अपचारे प्रासनार्थं न पुनः कृष्णविषाणान्तरोपादानप्रयुक्तिः । "पुरोडाशकपालेन तुषान् उपवपति' इत्यत्र पुरोडाशप्रयुक्तस्यैव कपालस्य तुषोपवापं प्रति शेषत्वेन विनियोगात्, यत्र पुरोडाशो नास्ति न तत्र तुपोप-वापार्थं कपालप्रयुक्तिरित्येवं सापवादा अनुष्ठानशक्तिरूपा प्रयुक्तिर्निरूपितेत्यर्थः ।

श्रुत्यर्थेति । "अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति' इत्यादौ क्तवाश्रुत्या दीक्षयोः क्रमः । "अग्निहोत्रं जुहोति', "यवागूं पचति' इत्यत्र होमपाकयोः प्रयोजनवशात् क्रमः । "समिधो यजति', "तनूनपातं यजति' इत्यादौ पाठक्रमात् क्रमः । "सप्तदश प्राजापत्यान् पशूनालभते' इति विहितप्राजापत्ययागाङ्गभूतेषूपाकरणनियोजनादिषु प्रथमप्रवृत्तोपाकरणक्रमानुरोधेनैव पशुषु नियो-जनादीनां पाश्चात्यानां क्रमः । साद्यस्के सवनीयस्थाने, "सह पशूनालभते' इति सहालभ्यमानेष्वग्नीषोमीयसवनीयानुबन्ध्यपशुषु सवनीयस्थानानुरोधात् सवनीयस्य प्राथम्यम् । "सारस्वतौ (होमौ) भवतः' इति विहितस्त्रीपुंसदेवत्ययोः कर्मणोर्याज्यानुवाक्यावशात् स्त्रीदेवत्यस्य प्राथम्ये स्थिते तदङ्गभूतानामपि प्रधानक्रमेणैव क्रम इत्येवमादि क्रमलक्षणे निरूपितमित्यर्थः ।

अधिकारिनिरूपणमिति । अधिकारः फलस्वाम्यम् । सामान्यातिदेश इति । "तद्वदिदं कर्तव्यम्' इत्यतिदेशः । स च त्रिविधः; यथा-"समानमितरच्छ्येनेन' इति प्रत्यक्षवचनेन श्येनवैशेषिकाङ्गानामिषुनामके एकाहक्रतावतिदेशः । कुण्डपायिनामयनाग्निहोत्रे नाम्ना नैयमिकाग्निहोत्रधर्माणामतिदेशः क्रियते "मासमग्निहोत्रं जुहोति' इति । सौर्यादिषु विकृतिषु "प्रकृतिवदङ्गानि कर्तव्यानि' इत्या-नुमानिकवचनेन सामान्यतोऽतिदेशः सप्तमे निरूपित इत्यर्थः । विशेषातिदेश इति । "अस्य कर्मण इदं कर्म प्रकृतिः' इति प्रकृति-विकृतिविशेषचिन्ता अष्टमे कृतेत्यर्थः । ऊह इति । प्राकृतपदार्थकार्यापन्नवैकृतपदार्थसंबन्धेन मन्त्रसामसंस्काराणामन्यथाभावात्मक ऊहो नवमे चिन्तित इत्यर्थः । बाध इति । कार्यमुखेन विकृतिं प्राप्तानां प्राकृताङ्गानां द्वारलोपप्रत्याम्नानप्रतिषेधपर्युदासैर्निवृत्तिः । यथा कृष्णलेष्ववघातस्य तुषविमोकरूपाद्वारलोपान्निवृत्तिः; कुशैः शराणां प्रत्याम्नानान्निवृत्तिः; "न तौ पशौ करोति' इति प्रतिषेधेनाज्य-भागयोः पशौ निवृत्तिः; महापितृयज्ञे "नार्षेयं वृणीते' इति पर्युदासेनार्षेयवरणनिवृत्तिः इत्येवं बाधो दशमे निरूपित इत्यर्थः । तन्त्र-प्रसङ्गाविति । अनेकप्रधानोद्देश्यकसकृतङ्गानुष्ठानं तन्त्रम् । यथा-दर्शादित्रिकद्वयोद्देशेनानुष्ठीयमानानां देशकालकर्त्राद्यैक्यादगृह्य-माणविशेषताऽङ्गानां तन्त्रेणानुष्ठानम् । अन्योद्देशेनानुष्ठितेनान्यस्योपकारसिद्धिः प्रसङ्गः । यथा पश्वर्थानुष्ठितैरङ्गैः पशुतन्त्रमध्यपाति-पुरोडाशस्योपकारसिद्धिरित्येवमेकादशद्वदशयोस्तन्त्रप्रसङ्गौ चिन्तितावित्यर्थः ।

संकर्षसापेक्षत्वं चेति । "प्रधानवदेव तदयुक्तम्' इत्यत्र "नाना वा देवतापृथक्तवात्' इति न्यायसापेक्षत्वस्याविष्करिष्यमाण-त्वादिति भावः ।

अभ्युच्चययुक्तिरुच्यत इति । अप्रधानार्थस्यापि साक्षात्संगतत्वेन तदपेक्षितत्वात् कर्मविचारस्य पूर्ववृत्तत्वाश्रयणे, अस्मिन् शारीरकशास्त्रे ब्रह्मकारणत्वविरोधिशास्त्रान्तरप्रतिक्षेपस्यापि तत्पादे करिष्यमाणस्योपयुक्ततया सकलशास्त्रार्थविचारस्यापि पूर्व-वृत्तत्वप्रसङ्गादभ्यूच्चययुक्तिरित्युक्तम् । "कर्मसमृद्धयर्थत्वे तत्प्रयोजनं तन्निर्वचनात्' इत्येतावद्वाक्यकारवचनं द्रष्टव्यम् । ब्रह्मदृष्टि-रूपत्वात् ब्रह्मज्ञानसापेक्षणीत्यर्थ इति । यद्यपि न सर्वेषामुद्गीथाद्युपासनानां ब्रह्मदृष्टिरूपत्वम्, "लोकेषु पञ्चविधं सामोपासीत', "वृष्टौ पञ्चविधं सामोपासीत' इत्यादौ तदभावात्-तथापि ब्रह्मदृष्टिरूपोद्गीथाद्युपासनविशेषाणां ब्रह्मदृष्टिरूपत्वात् ब्रह्मज्ञानापे- क्षेत्यर्थः । यद्यप्युद्गीथाद्युपासनविशेषा भवन्तु ब्रह्मदृष्टिरूपा ब्रह्मज्ञानसापेक्षाः ।
नैतावता "तन्निर्धारणानियमस्तद्दृष्टेः', "अङ्गेषु यथाश्रयभावः' इत्यादिषु क्रियमाणस्योद्गीथाद्युपासने

क्रत्वर्थपुरुषार्थत्वविचारस्य ब्रह्मज्ञानसापेक्षत्वमस्ति; अपि तु प्रसङ्गान्निरूपणम्-तथापि "ब्रह्मदृष्टिरुत्कर्षात्' इत्यादिषु ब्रह्मदृष्टित्वपुरस्कारेण प्रवृत्तेषूद्गीथाद्युपासनविचारेषु ब्रह्मज्ञानसापेक्षत्वमस्तीत्यभिप्रायः ।

ननु "ब्रह्मदृष्टिरुत्कर्षात्' इति विचारस्य "मनो ब्रह्मेत्यूपासीत' इति मनआदिसाधारण्यात् मनआदिस्वरूपशोधकसांख्याद्यागमस्या-प्युपजीव्यत्वप्रसङ्गेन पूर्ववृत्तत्वप्रसङ्ग इति चेत्-न; एतस्याभ्युच्चययुक्तितयैतादृशातिप्रसङ्गस्यादोषत्वात् । ब्रह्मविद्यां शीघ्रं संपाद-यन्तीत्यर्थ इति । नच ब्रह्मज्ञान सापेक्षाणामेषां ब्रह्मविद्योत्पादकत्वं विरुद्धमिति वाच्यम् । आगमोत्थ ब्रह्मज्ञान सापेक्षस्य उद्गीर्थापासनस्य न च ब्रह्मज्ञानसापेक्षस्योद्गीथोपासनस्य विवेकादिजन्योपासनाङ्गत्वेऽविरोधात् । ततश्च ब्रह्मविद्योत्पादकशमद-मादिचिन्तनवदेतच्चिन्तनमप्यत्र संगतमित्यर्थः । अन्यतरापेक्षयोभयापेक्षया वेति । अयं भावः-"ब्रह्मजिज्ञासा' इति सूत्रे ब्रह्मानु-बन्धिनां सर्वेषां विचार्यत्वं प्रतिज्ञातम् । अतस्तदुपासनतत्फलतदनुबन्धिविचारस्य सर्वस्य प्रतिज्ञाततया तत्संगतिः साक्षात्संगतिः । ततश्चोपासनापेक्षिततयोपासनानुबन्धित्वमप्यस्ति; ब्रह्मदृष्टिरूपत्वात् ब्रह्मानुबन्धित्वमप्यस्ति । अतः केवलोपासनमात्रानुबन्धि-शमाद्यपेक्षयाप्यभ्यर्हितत्वमिति । कर्माङ्गाश्रयत्वं पूर्वभागविचारसंगतेरिति । अन्ततो गत्वा इदमपि केवलकर्मविद्याङ्गकर्मसाधा-८रणत्वात् साधारणमित्यभिप्रायः । प्रागुक्तसंगतिविशेषविशिष्टत्वात्तयोरिति । ननु कर्मब्रह्मविचारयोः पौर्वापर्यविचारदशायां कथं तत्सिद्धवत्कारेण, "न हि कर्मविचारात् पूर्वं ब्रह्मविचार उपपद्यते, संगतिविशेषविशिष्टत्वात् तयोः' इत्युक्तिरिति चेत्-न;क्रमवि-शेषनियामकसंगतिविशेषविशिष्टाविरुद्धावान्ततरवाक्यार्थैकप्रयोजनत्वरूपशास्त्रैक्यस्यैव कर्मविचारपूर्ववृत्तत्वे प्रधानयुक्तितया अन्य-स्याभ्युच्चययुक्तित्वेन, सिद्धवत्कृत्य कथने दोषाभावात् । वैषम्यत्रयविशेषिताया इति । उभयापेक्षायाः साम्येऽपि कर्मविचारे कर्तु-मशक्यत्वादुपनिषद्भागविहितत्वाच्च सूत्रकृतेह शास्त्रे विचारितमिति ब्रह्ममीमांसाविचारितत्वमेव फलतया वक्तुमुचितम्, न तु ब्रह्म-मीमांसाविचारितत्वमपि हेतूकर्तुमुचितमिति चेत्-न; वैषम्यद्वय एव तात्पर्यादिति केचित् । अन्ये तु सूत्रकाराणां स्वतन्त्रेच्छत्वात् जैमिनिना न कृतम्, बादरायणेन कृतमित्यपि युक्तयन्तरप्रदर्शकं तदिति वदन्ति । नियमेनापेक्षितत्वरूपः प्रधानहेतुरिति । ननु यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात् देवताविचार एव सर्वापेक्षया पूर्वभावी किं न स्यात् ? किंच अथशब्दस्य देवताविचारा-नन्तर्यमवश्याश्रयणीयम्, न तु व्यवहितकर्मविचारानन्तर्यमिति चेत्-उच्यते - संकर्षकाण्डोऽप्यविचारितकर्मविशेषविषय एव । जैमिनिर्हि द्वादशलक्षणीं प्रणीय तत्राविचारितांशमालोच्य पुनरपि चतुर्लक्षणीं प्रणिनायेति प्रसिद्धिः । अत एव हि "संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेन' इति वृत्तिग्रन्थोऽपि संगतः । अत एव "प्रदानवदेव' इत्यधिकरणे भाष्ये यत् संवादयोपात्तम् "नाना वा देवता पृथक्त्ववात्' इति तज्जैमिनीय एव दृश्यते, न तु देवताकाण्डे काशकृत्स्नीये । अतोऽपि संकर्षः कर्मविषय एव । तत्रैव केषांचि-द्देवताकाण्डत्वव्यवहारोऽप्यस्तीति । भाष्ये-सर्वसंमतेति । सर्वेषां संमता सर्वसंमतेति शेषलक्षणषष्ठयाः समासः "क्तस्य च वर्तमाने' इति षष्ठयास्तु, "क्तेन च पूजायाम्' इति निषेधादिति द्रष्टव्यम् । वक्ष्यमाणवस्तुसामर्थ्यान्तर्भूत इति । ततश्च तत्परिहार एवास्यापि परिहार इति भावः ।

अपिनोपपादयिष्यमाणस्येति । अपिर्हि "अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु' इति समुच्चयार्थकत्वेनान्वाचयार्थक-त्वाभावात् पाधान्यार्थक एवेति भावः । यद्वा निपातानामनेकार्थत्वात् प्राधान्यद्योतकत्वमिति भावः । वक्ष्यमाणज्ञात्रादय इति । विशेषपदविवरणरूपास्त इति भावः ।

विजातीयादिनिवृत्तिपरस्य "सदेव' इत्यादिवाक्यस्य प्रतिज्ञातार्थप्रमाणतयोदाहरिष्यमाणत्वात् विशेषपदस्य विजातीयादिपरत्वमेवोचितमित्यभिप्रायेणाह - विजातीयसजातीयस्वगता वेति । अन्वयिनो व्यावृत्तिरूपाश्चेति । भावरूपा अभावरूपाश्चेत्यर्थः । विशेषसहिष्णोः ब्रह्मणः कथं तत्प्रत्यनीकत्वमित्याशङ्कयाह - स्वज्ञानेन निवर्तकमिति । तुच्छता (शून्यता)स्यादिति । सर्वप्रमाणानां सविशेषविषयत्वादिति भावः । ज्ञेयत्वस्याप्यशेषशब्देन क्रोडीकृतत्वान्मात्रचा तद्व्यवच्छेदो व्यर्थ इत्यन्यथा व्याचष्टे - यद्वा प्रत्यनीकेति । "प्रत्यनीकम्' इति निर्देशात्

प्रत्यनीकत्वरूपो धर्मोऽनुवर्तत इत्याशङ्काया निवर्तनीयत्वादिति भावः । इदमप्यशेषपदसामर्थ्यात् सिध्यतीत्यन्यथा व्याचष्टे - यद्वा मात्रचा वस्तुतः समस्तेति । न चाशेषविशेषप्रत्यनीकमित्यनेन सिद्धत्वात् पौनरुक्तयं शङ्कयम्, अशेषविशेषप्रत्यनीकमित्यस्याशेषविशेषनिवर्तकज्ञानविषयत्वमित्यर्थः । इह तु सर्वदा तच्छून्यत्व-मुच्यत इति भेदात् । एवकारेण सगुणाब्रह्मव्यावृत्तिि◌ीति । इदमुपलक्षणम् - निर्गुणस्यैव ब्रह्मणः पारमार्थिकत्वकथनात् तद्व्यतिरिक्त-सगुणब्रह्मादेः प्रपञ्चस्य पारमार्थिकत्वं व्यावर्त्यत इत्यर्थः । उत्तरत्रैवकारस्य तदतिरेकीत्यादिग्रन्थेन तथा विवरणादिति द्रष्टव्यम् । निषेध्यनानात्वं सिध्यतीति दर्शितमिति । नानाशब्दस्य ब्रह्मवतिरिक्तनिषेध्येऽपि संभवद्वृत्तिकत्वेन ब्रह्मणोऽपि परामर्शस्यानपेक्षि-तत्वादिति भावः । (भाष्ये ?) ज्ञातृज्ञेयतत्कृतज्ञानभेदेति । अत्र ज्ञाता च ज्ञेयं च तत्कृतज्ञानं च ज्ञातृज्ञेयतत्कृतज्ञानानि, तेषां भेदाः; भेदशब्दः प्रत्येकमभिसंबध्यते; अत एवैकैककोटिष्ववान्तरभेदा इति वक्ष्यति । न चैवं भेदशब्दस्य ज्ञानमात्रान्वितत्वप्रदर्शकोत्तर-ग्रन्थविरोध इति वाच्यम्-तेनाप्यन्वयसंभवेन तथा निर्देशोपपत्तेतिरि द्रष्टव्यम् । अनेन वृत्तिस्फुरितेति । अनेन=तत्कृतेति विशेष-णेनेत्यर्थः । तदभावे ज्ञानशब्देन वृत्तिस्फुरितचेतन्यस्यैव ग्रहणं स्यात्, मृषावादि

१.१.१

परमतश्रुत्यर्थः

सदेवेति विजातीयभेदो व्यावर्त्यते; एकमेवेति सजातीयभेदः; अद्वितीयमिति स्वगतभेद इति ।

यद्यपि "एकमेवाद्वितीयम्' इति वाक्ये एकशब्देन स्वगतभेदनिरासः, एवकारेण सजातीयभेदव्युदासः, अद्वितीयपदेन विजातीयभेदव्युदास इत्येवं परैर्व्याक्या- तम् । उक्तं च -

"वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादितः

वृक्षान्तरात् सजातीयः, विजातीयः शिलादितः ।।

सदसद्वस्तुनोभेर्ददत्रयं प्राप्तं निषिध्यते ।

ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात् ।। ''

इति-तथाष्यस्यापि प्रकारस्य तत्र तत्र व्याख्यातत्वादित्थमुपन्यस्तम् । अत एव शंकरभाष्ये कल्पतरौ च, "सदेवेति सृष्टेः प्राक् नामरूपादि व्यावर्त्यते; एकमेवेत्यनेन महदादिकं स्वकार्यपतितं नास्तीति निषिध्यते; अद्वितीयमिति निमित्तान्तरं निषिध्यते' इत्युक्तम्; नाधिकम् । (ननु) "वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादितः' इति स्वगतभेदस्य पत्रपुष्पादिप्रतियोगिकत्वप्रतीत्या पत्रपुष्पादिलक्षणो भेद इति न प्रतीयते; अपितु तत्प्रतियोगिकभेद एव प्रतीयते । अत्र ग्रन्थे तु सजातीयरूपो विजातीयरूपो भेद इत्युच्यते । कथमनयो रैकार्थ्यमिति न चोदनीयम् (?)-तथापि परव्यवहारदर्शनाददोष इति द्रष्टव्यम् । तस्यैव प्रपञ्चनादिति । "यथोर्णनाभिः' इत्यादिना भूतयोनित्वस्यैव प्रपञ्चनादित्यर्थः । यस्येति । यस्य ब्रह्म अमतम्=अविष्य इति निश्चयः, तस्य तद्ब्रह्म मतम्=सम्यक् ज्ञातम्; यस्य तु विषयतया ब्रह्म मतम्, न स ब्रह्म वेद; अविज्ञातम्=विज्ञानतां विषयत्वेनाविज्ञातम्; यथावदविजा-नतां विषयत्वेन विज्ञातमित्यर्थः ।

ज्ञातृत्वनिषेधपरमिति । यद्यपि "न दृष्टेः' इत्यस्य दृष्टेः=चक्षुर्जन्याया अन्तःखरणवृत्तेः द्रष्टारम्=स्वरूपभूतचैतन्येन व्याप्तारं तस्या अपि भासकं तद्भास्यया चक्षुर्जन्यया अन्तःकरणवृत्त्या न पश्येः । प्रत्यगात्मा तद्गोचरो न भवतीति ज्ञेयत्वं प्रतिषिध्यत इत्येव परैरर्थोऽभिहितः-तथापि ज्ञेयत्वप्रतिषेधे ज्ञातृत्वनिषेधस्यापि सिद्धिमभिप्रेत्योक्तं ज्ञातृत्वनिषेधपरं वाक्यमाहेति । केचित्तु-मृषावाद्येकदेशिभिस्तथा व्याख्यातम्; तदनुसारेणैतदुक्तम्; योजनानन्तरं तु सिद्धान्ते, "किं दृष्टेरिति पञ्चमी षष्ठी वे' ति विकल्प- मुखेन स्पष्टीकरिष्यतीति न तदनुपपादनं दोष इति मन्यन्ते ।

सामानाधिकरण्येनेति छेदः । सामानाधिकरण्यं हि बाधार्थं दृष्टमिति । सामानाधिकरण्यं हि चतुर्धा-अध्यासे सामानाधि- करण्यम् । अपवादे सामानाधिकरण्यम् । विशेषणविशेष्यभावे सामानाधिकरण्यम्; ऐक्ये सामानाधिकरण्यं चेति । अध्यासे सामानाधिकरण्यम् "नाम ब्रह्मेत्युपासीत' इत्यादौ । अपवादे सामानाधिकरण्यं नाम्, "यद्रजतमभात् सा शुक्तिः' इति; पूर्वोत्पन्नरजतप्रतीत्यपवादार्थत्वात् सामानाधिकरण्यस्य । इदमेव हि बाधार्थसामानाधिकरण्यमित्युच्यते । विशेषणविशेष्यभावे सामानाधिकरण्यं नीलमुत्पलमित्यादौ । ऐक्ये सामानाधिकरण्यं कोकिलः पिक इत्यादौ ।

विकारो घटादिसंस्थानं नामधेयं चेति । अत्र चः एवार्थः; स्वार्थे च धेयप्रत्ययः; नामधेयं च नाममात्रमेव हीत्यर्थः । एवं हि शरीरकशांकरभाष्यम्-"वाचारम्भणं विकारो नामधेयम् । वाचा केवलमस्तीत्यारभ्यते विकारः, घटः शराव उदञ्चनं चेति । न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति । नामधेयमात्रं ह्येतदनृतम्; मृत्तिकेत्येव सत्यम्' इति । अतोऽयमपि ग्रन्थस्तदनुवादत्वात् तदनुगुण एव नेतव्यः । ननु, "अथ तस्य भयं भवति' इति वाक्यस्य, (स्यापि), "मृत्योः स मृत्युमाप्नोति' इति वाक्यानन्तरमुपा- दानं युक्तम्, अनर्थप्रतिपादकत्वसाधारण्यादित्यत्राह - यदा ह्येवेत्यादेरिति । एकन्यायपरिहार्यत्वादिति । अब्रह्मात्मकनाना-त्वनिषेधपरत्वेन परिहार्यत्वादित्यर्थः ।

अभयलिङ्गत्वं साकारत्वं निराकारत्वं चेति पाठः । "न स्थानतोऽपि' इत्यधिकरणे श्रुति- बलात् सविशेषत्वनिर्विशेषत्वरूपलिङ्गद्वयसमुच्चय इति पूर्वपक्षस्य निरस्तत्वादिति द्रष्टव्यम् । केचित्तु-उभयलिङ्गत्वं साकारनिरा-कारत्वं साकारत्वं चेत्यन्वयः । तस्मिन्नधिकरणे उभयलिङ्गत्वरूपस्य साकारनिराकारत्वस्यान्यतरलिङ्गत्वसमाश्रय (त्वत्वानाश्रय?) णेऽपि केवलसाकारत्वपक्षस्य (साकारनिराकारत्वपक्षस्य) च प्रतिक्षिप्तत्वात् तथोक्तम्; न तूभयलिङ्गशब्दार्थतयेति वदन्ति । दुर्निरूप (स्वरूप) त्वात् बाधितत्वादित्यर्थ इति । बाधितदेशकालनिमित्तकत्वादित्यर्थः । न तावत् स्वाव्यापवरकनिद्राणपुरुष-दृश्यमानैककोणविश्रान्तगिरिनदीसमुद्रादीनां मुहूर्तमात्रशयितपुरुषानुभूयमानविवाहपुत्रोत्पादनतदुपलालनादीनामुचितो देशः कालो वा संभवति । न वा तदुत्पत्तौ ज्ञप्तौ वोचितं निमित्तमस्ति । अतो देशकालनिमित्तानां दुर्निरूपत्वेन बाधेतत्वान्मिथ्यात्व-मित्यर्थः । स्वाप्नार्थमिथ्यात्वप्रदर्शकसूत्रोपन्यासस्य प्रपञ्चमिथ्यात्वप्रसाधनदशायामसंगतिमाशङ्कयाह - स्वाप्नार्थमिथ्यात्व- मिति ।

परमतपुराणार्थः

"प्रत्यस्तमितभेदम्' इत्ययं श्लोकः षष्ठांशे सप्तमेऽध्याये योगप्रकरणे केशिध्वजवचनम् । "ज्ञानस्वरूपम्' इति श्लोकस्तु प्रथमां-शद्वितीयाध्याये नमस्कारश्लोकः । "परमार्थस्त्वमेवैकः' इतीयं चतुःश्लोकी प्रथमांशे चतुर्थेऽध्याये रोमान्तरस्थानां मुनीनामादि-वराहस्तुतौ । "तस्यात्मपरदेहेषु' इति श्लोकः "वेणुरन्ध्रविभेदेन' इति श्लोकश्च द्वितीयांशे चतुर्दशाध्याये आदिभरतश्लोकौ । "यद्यन्योऽस्ति' इति श्लोकस्तत्रैवांशे त्रयोदशाध्याये आदिभरतश्लोकः । "सोऽहं स च त्वम्' इति श्लोकस्तत्रैवांशे षोडशायाये आदिभरतोपदेशान्ते श्लोकः । "विभेदजनके' इति श्लोकः षष्ठांशे सप्तमाध्याये केशिद्वजस्य योगप्रकरणान्तरे वचनम् । "ज्ञानस्व- रूपः' इत्यादिश्लोको द्वितीयांशे द्वादशाध्याये पठितः ।

मिथ्यात्वलक्षरम्

शक्तिमदीश्वरादिसंकल्परूपज्ञाननिवर्त्ये इति । शक्तिमान् य ईश्वरः, तत्संकल्परूपज्ञाननिवर्त्य इत्यर्थः । शक्तिसहकृतज्ञाननिवर्त्य इति यावत् । ज्ञानमात्रनिवर्त्यत्वस्य विवक्षितत्वादिति । अत एव छत्रपादुकादिवैधुर्यरूपनियमसहकृतसेतुदर्शननिवर्त्यपापादौ नातिव्याप्तिः । प्रबलभ्रान्तिज्ञाननिवर्त्येति । निवृविर्हि स्वाभावः; स च कल्पिताकल्पितसाधारणः । ततश्च भ्रान्तिज्ञानेन प्रबलेन "शुक्तिः (सजतं?) नास्ति' इति कल्पना

भवत्येवेति कल्पितोऽभावस्तज्जन्य इति तन्निवर्त्यत्वं सत्यरजतस्योपपद्यते । यद्वा "नास्ति' इति प्रतीयमानत्वमेव निवृत्तिः; सा च सत्यरजतस्यापि संभवतीति भावः । न तु निवृत्तत्वमितीति । यद्यपि निवृत्त-त्वमित्युक्ते निर्वर्तिष्यमाणमिथ्यापदार्थाव्याप्तिः, तथापि ज्ञानजन्यनिवृत्तिप्रतियोगित्वमिति नोक्तमित्यत्र तात्पर्यात् । प्रतीयमान-त्वयतावस्थितज्ञाननिवर्त्यत्वखण्डद्वयेन ख्यातिबाधपर्यवसितेन तत्साध्यमसद्विलक्षणत्वे सति सद्विलक्षणत्वं लक्ष्यते; अतस्तदेव हि लक्षणं विवक्षितमिति स्वसिद्धान्तमाविष्करोति - अनेन लक्षणेन सदसद्वैलक्षण्यं फलितमित्यादिना ।

सर्वज्ञत्वादिगुणकत्वेन प्रतीते ब्रह्मणि कथं वाऽध्यास इति । ननु सर्वज्ञस्याध्यासद्रष्टृत्वेन परं विरोधः, न त्वध्यासाधिष्ठानत्वेन; न च सर्वज्ञत्वादिगुणकत्वेन प्रतिपन्नत्वं किंचिज्ज्ञत्वाध्यासाधिष्ठानत्वविरुद्धमिति वाच्यम्-अधायासदशायां तथा प्रतीत्यभावात् । ततश्च कथमयमाक्षेपः? कथं वा सर्वज्ञत्वगुणानन्वयेन परिहार इति चेत्-न; सर्वज्ञत्वादिगुणकत्वस्य कल्पितत्वेन कथमध्यासाधि-ष्ठानत्वमिति चोद्याभिप्रायसंभावात् ।

अविद्यारूपदोषनिरूपणम्

एकस्या एवावस्थाद्वयमिति । अंशद्वयमित्यर्थः । नात्र बहुवचने तात्पर्यमिति । येन तद्बहुत्वं प्रामाणिकं स्यादिति भावः । अदितिः पाशानिति । अग्नीषोमीयपशौ, "अदितिः पाशान् प्रमुमोक्तु' इति बहुवचनान्तपाशशब्दयुक्तमन्त्रः श्रूयते । स किं पशु-गणेषूत्कूष्यते, उत प्रकृतावेव निविात इति विशये, एकस्मिन् पाशे बहुवचनस्यान्याय्यत्वात् बहुपाशवत्सु पशुगणेषूत्कृष्यत इति प्राप्ते-"प्रकृत्यर्थस्य पाशस्य विभकत्यर्थस्य कमर्णश्चाग्नीषोमीय एव संभावादप्रदानभूतसंख्यानुरोधेनोत्कर्षासंभावात्, पाशसंख्या अविवक्षिता; अतो निर्देशमात्रार्थं बहुवचनमिति, "विप्रतिपत्तौ विकल्पः स्यात् समत्वात् गुणे त्वन्याय्यकल्पनैकदेशत्वात्' इति नवमे (पू.मी.९-३-१५) व्यवस्थापितमित्यर्थः । प्रकृतिरुच्यत इति शङ्कायामिति । सांख्यमतप्रत्यभिज्ञानादिति भावः । मायां तु प्रकृतिं विद्यादिति । मायां सदसद्विलक्षणामविद्यां प्रकृतिम्=उपादानं विद्यादित्यर्थः । "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इत्यादौ प्रकृतिशब्दस्योपादनार्तत्वदर्शनात् परैरपि तथा व्याख्यातत्वाच्चेति द्रष्टव्यम् । केचित्तु प्रकृतिं मायां मिथ्याभूतां विद्यादित्यर्थ इत्यप्युद्देश्योपादेयभावं वर्णयन्ति । दोषप्रतिपादनतत्पराणामिति । निर्विशेषस्यापि ब्रह्मणः प्रपञ्चाधिष्ठानत्वं दोषवशादिति वक्तुं प्रवृत्तानाम्, "इन्द्रो मायाभिः' इत्यादीनां न भेदप्रतिपादनेऽपि तत्परत्वं संभवतीति भावः । सहपठितस्वगतनानात्वमिति । तथा हि सति सजातीयविजातीययोः संग्रहो न स्यादिति भावः । उपपाद्यप्रमेयाधिक्याभावादिति । जगदुपलब्धिरूपमिथ्यात्वोपपाद-कप्रकारभेदे सत्यष्युपपादनीयांशभेदाभावादित्यर्थः ।

अविद्याया ऐक्यज्ञाननिवर्त्यत्वम्

अभयम्=अभयार्थमिति ।अथोभावे "अव्ययम्' इति समासः । ततश्चतुर्थ्याः "नाव्ययीभावात्' इत्यम्भावे रूपम् । यथोपासनं हीति । यद्यपि मृषावादिमते ब्रह्मज्ञानं नोपासनात्मकम्, तथापि तुल्यन्यायतया यथाज्ञानं फलमित्येवम्परं तदिति द्रष्टव्यम् । तद्धेतुभूताविद्येति । मोहहेतुभूतयथावदप्रतिपत्तिलक्षणानवदानरूपेत्यर्थः । ऐक्यविषयतां ज्ञापयितुमिति । पारमार्यिकैक्यविष- यतां दर्शयितुमित्यर्थः । ततश्च, आत्मेत्येवोपासीत' इत्युपासनविधिवाक्यनिर्दिष्टमैवयं स्वरूपोपदेशपरवाक्यप्रमितत्वात् पारमार्थि-कमिति भावः । उपदेशानुगुणमुपासको देवतां प्रत्याहेति । "तत्त्वमसि' इति छान्दोग्यवाक्यगतस्यैवयप्रतिपादनपरत्वादेव, "त्वं वा अहमस्ति भगवो देवते' इति जाबालवाक्यं "तद्योऽहं सौऽसौ' इत्यैतरेयवाक्यमपि तदनुगुणं दृश्यत इति भावः । न तु "तत्त्व- मसि' इत्युपदेशानन्तरम्, "त्वं वा अहमस्मि' इति देवतां प्रति प्रतिवचनमिति मन्तव्यम्, उभयोरपि भिन्नप्रकरणस्थत्वात् । आत्म-त्युपासीतेति । आत्मेति प्रतिपद्येतेत्यर्थः । अत एव हि शांकरभाष्ये, "आमेति प्रतिपत्तव्यः' इत्युक्तम्, तस्य सूत्रस्य मृषावादिमते वास्तवात्मत्वसमर्थनपरत्वेन, "आत्मेत्युपासीत्' इत्यात्मत्वेनोपासनसमर्थनपरत्वाभावात् । केचित्तु-वस्तुत आत्मानमेव आत्मे-त्युपासीतेत्यर्थः ; ततश्च वास्तवात्मत्वसमर्थनद्वारा आत्मीपासनस्य

प्रतीकोपासनत्वव्यवच्छेदश्च सिध्यति । तस्य सूत्रस्य वास्त-वात्मत्वसमर्थनद्वारा प्रतीकोपासनत्वव्यवच्छेदपरत्वादित्याहुः ।

प्रत्यक्षविरोधे शास्त्रप्राबल्यम्

"ननु च सकलभेदनिवृत्तिः प्रत्यक्षविरुद्धा' इति भाष्यस्यायमर्थः-सकलभेदाभावः प्रत्यक्षविरुद्धः शास्त्रजन्यज्ञानेन कथं विषयी- क्रियते? कथं शास्त्रपतिपाद्यः स्यादिति । एवमुत्तरत्रापि द्रष्टव्यम् । दुष्टकारणजन्यत्यतद भावौ बाध्यबाधकभावे प्रयोजकाविति शङ्कायामिति । अयमर्थः-क्वचिन्मूलमूलिभावः, क्वचित् परोक्षत्वादिः, क्वचिद्विपरीतप्राबल्य(दौर्बल्य)हेतुराहित्यलक्षणतुल्यत्वे सति दुष्टकारणजन्यत्वतदभावाविति । उत्तरत्र सर्वेषां प्रयोजकानां निरसिष्यमाणत्वात् । तुल्यत्वे सति दुष्टकारणजन्यत्वतद-भावयोर्बाध्यबाधकभावप्रयोजकत्वे शङ्किते तुल्यत्वस्य प्रयोजकत्वनिराकरणमनुचितमित्याशङ्कय व्याचष्टे-तुल्यत्वे सति दुष्टकारणेत्यादि । तुल्यशब्दः प्रयुक्त इति । तुल्यत्वशब्दः प्रयुक्त इत्यर्थः । तुल्यशब्देनैकदेशोपादानमिति । तुल्यत्वस्यापि हेतुत्वप्रसक्तिसद्भावेन तन्निषेधार्थं तुल्यत्वशब्देन विशेषणांशोपादानं युज्यत इत्यर्थः । तुल्यत्वे सतीत्यस्य विवरणं विपतीतप्रा-बल्यदौर्बल्यदौर्बल्यकारणाभावे सतीति । तुल्यत्वशब्देन विशेषणमाचिना विशिष्टोपस्थानं क्लिष्टमित्यस्वरसादाह - यद्वा अप्रयोजकत्वेनेति । तुल्यत्वं दृष्टान्ततयानूदितमिति । केवलतुल्यत्वमित्यर्थः । तर्हि प्राधान्येन शङ्किकतस्य तुल्यत्वे सति दुष्ट-कारणजन्यत्वदभावरूपप्रयोजक्स्यात्रानुपादानात् तस्याप्रयोजकत्वं न प्रतिपादितं स्यादित्याशङ्कय, आदिशब्देन तदुपादानमि- त्याह - वैषम्यान्तराभावे सतीति । विविधविकल्पशब्दः प्रपञ्चविशेषणं भेदविशेषणं वेति । षष्ठीसामासपक्षे प्रपञ्चविशेषणम्; कर्मधारये तु भेदविशेषणमिति भावः । कार्याविद्येति । उक्तं हि वाचस्पतिना आद्यपादे-"अनिर्वाच्याविद्याद्वितयसचिवस्य' इति । तद्वयख्याने च, "एकाऽनादिर्भावरूपा देवताधिकरणे वक्ष्यते; अन्या च पूर्वपूर्वविभ्रमसंस्कारः' इति । शंकरभाष्ये च "एवमविरुद्धः प्रत्यगात्मन्यनात्माध्यासः । तमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते' इति भेददर्शनस्याविद्यात्वमावि- ष्कृतम् । अन्यपरमिति परस्याभिप्राय इति । अन्यपरम्, अतो न प्रत्यक्षबाधकमिति परस्याभिप्राय इत्यर्थः ।

अभेदश्रुतिप्राबल्यम्

ननु भेदाबलम्बिनो बाध्यत्वं प्रसज्येतेत्यापादनं न संभवति, तस्येष्टापादनत्वादित्याशङ्कय, तस्यापि बाद्यत्वे तत्प्रयोजकं दुष्ट-कारणजन्यत्वमपि स्यादित्यनिष्टापादनमाहेत्याह - थन्निर्दोषमुक्तमिति । दुष्टकारणजन्यत्वेऽनङ्गीकार इति । ननु-बध्यत्वं वक्तव्यम्; दुष्टकरणजन्यत्वं च न संभवति; अतः कथं निर्वाह इति चोदिते, सत्यमित्युक्तेर्बाव्यत्वमङ्गीक्रियत एव; दुष्टकारणज- न्यत्वं नास्तीति यदुक्तं तदप्यङ्गीक्रियते; यदुक्तं "कथं निर्वाहः' इति तन्नङ्गीक्रियत इत्येव वक्तव्यम्; कथं दुष्टकारणजन्यत्वेऽनङ्गी- कार इत्युक्तिरिति चेत्- न; "कथं निर्वाहः' इत्यस्य दुष्टकारणजन्यत्वमपि स्यादित्यत्र पर्यवसानमिति प्रगुपपादितत्वेनादोषात् । वस्तुततस्तु ज्योतिष्टोमादिवाक्ये भेदेवासनारूपदोषस्य वा तात्पर्यभ्रमरूपपुरुषापराधदोषस्य वा सत्त्वेन दुष्टकारणजन्यत्वमस्ती-त्यत्र तात्पर्यम्; दोषाभावेऽप्यप्रमोत्पत्तावप्रमायस्य स्वतस्त्वप्रसङ्गादिति बोध्यम् । केचित्तु- भेदवासनारूपदोपजन्यतया भेदप्रत्य- क्षस्य बाध्यत्वे ज्योतिष्टोमादिवाक्यजन्यभेदज्ञानस्यापि भेदवासनारूपदोषजन्यतया बाध्यत्वं स्यात्; न चेष्टापत्तिः, अपौरुषेयत्वेन निर्दोषत्वस्य त्वयैव प्रतिपादितत्वादित्याशयेन शङ्कत इत्येवं "ननु च' इत्यादिभाष्यावतारिकामाहुः । अस्मिन् पक्षे, "भेदावल-म्बिनः' इत्यादिभाष्यस्वारस्यमस्ति । ग्रन्थस्यानिर्धारितान्यतरबाध्यत्वपरत्वे तत् पीड्येतेत्यादि द्रष्टव्यम् । प्रमित्युत्पत्तिक्रमा- दिति । एतस्य प्रयोगशास्त्रतया प्रतिप्रयोगमावृत्त्यैव बोधकत्वात् प्रयोगभेदानयप्रमितिनिबन्धनं परैर्वापर्यं सुवचमिति भावः । एक- स्मिन् प्रयोगे यौगपद्येनापच्छेदे सतीति । यदोद्गातृप्रतिहर्त्रोर्युगपदपच्छेदो भावति,

तदा किं प्रायश्चितं वर्तव्यं न वेति शंशयः । तत्रोभाभ्यां क्रियमाणोऽपच्छेदो नैकेन व्यपदेषुं शक्यते । तस्माद्यौगपद्ये निमित्तविधातात् प्रायश्चितं न कर्तव्यमिति पूर्वपक्षे प्राप्ते,

"स्यादेवम्, यदि सापेक्षं कर्तृत्वमुभयोर्भवेत् ।

एकैकस्य तु यत्वेन निरपेक्षेण ज्ञायते ।।

विच्छेदस्तेन कर्तृत्वं द्वयोः प्रत्येकमस्ति नः ।' (शास्त्रदी)

कालमात्रं परमेकम् । अतः प्रायश्चित्तं कर्तव्यमिति ("कालमात्रं तु तत्रैकं प्रायश्चित्तमतो भवेत्' इति?)
व्यवस्थापितं षष्ठे (६-५-४९) "विभागश्रुतेः प्रायश्चित्तं यौगपद्ये न विद्यते' सत्यत्रेति भावः । ननु"तन्न विप्रतिषेधात् विकल्पः स्यात्' इति विकल्पस्यैव सिद्धान्तितत्वाद्विरोध इत्यरुचेराह - विकल्पेनानुष्ठानं वेति ।
पूर्वशास्त्रमुत्तरोत्पत्तिप्रतिबन्धकं किं न स्यादिति । असंजात-प्रतिपक्षतया प्रक्रमस्य
प्राबल्यमित्युपक्रमाधिकरणन्यायादित्यर्थः । निमित्तस्योत्पन्नत्वादिति । निमित्ते हि सति तन्निमिवमपि शास्त्रं दुर्वारप्रवृविकमेव, तस्यैव तत्सामग्रोत्वात् । तत्र विरोधिनि जाते सति यदुत्तरं विरोध्यवश्यं जायते तत् पूर्वोपमर्दकतयैवोदे- तीति स्वभावसिद्धम् । अतो वस्तुस्वभावादुत्तरं शास्त्रं पूर्वधीस्थोपमर्दनादेव स्वार्थधीकारणम् । पूर्वं तु जायमानं कस्यचिद्विरोधि- नो न बाध्यतया नापि बाधकतया जायते; किंतु स्वरूपेणैव । तत्रैकस्मिन् प्रयोगे द्वयोः शास्त्रार्थयोरशक्तेर्यस्योपमर्दरतस्य बाध्य- त्वम्, यस्योपमर्दकत्वम्, तस्यावाधकत्वमेव युक्तमिति भावः । पूर्वसिद्धार्थस्योत्तरशास्त्रेणान्यथाकरणं न संभवतीति श्रद्धालुं प्रति नैमित्तिकशास्त्रप्रतिबन्दीमाह - किंच यथोदितेति । पूर्वसिद्धार्थान्यथाकरणप्रकरणत्वादिति । प्रकरणं प्रक्रिया; प्रकार इति यावत् ।
नित्यपूर्वसिद्धानत्यप्रयोगान्यथाकारिपूर्वनैमित्तकशास्त्रतुल्यशीलत्वादिति भावः । यदि तूत्तरशास्त्रं पूर्वशास्त्रं न बाधेन, नैमित्तिकशास्त्रमपि नित्यशास्त्रं न बाधेतेत्यर्थः । पाठक्रमस्य स्पष्टतया अनुपपादनीयत्वादर्थक्रममुपपादयति - त्रिवर्गफलत्वेनेति । तत्त्वपरस्य हि मुमुक्षेति । निमित्तपौर्बापर्यान्नैमित्तिकशस्त्रपौर्वापर्यवदधिकारिपरैर्वापर्यात् परैर्वापर्यमिति भावः । मुमुक्षानन्तर-
भाविविचारितवेदान्तवाक्यजन्यज्ञानस्यानादिप्रवृत्तकर्मकाण्डादिजन्यनिखिलभेदज्ञानोपमर्दरूपप्रयोजनाय प्रवृत्तत्वाद्वेदान्त-वायानामित्यत्र तात्पर्यम् । अतश्च मृषावादिमते कर्मविचारस्य प्राक् प्रवृत्तिनियमाभावात् तद्भेदोपमर्दो न स्यादिति दूषणम- लग्नकं वेदितव्यम् । नन्वपच्छेदन्यायो नावतरतीति वदन्तं प्रति तत्फलस्य दर्शनादित्युक्तिरसङ्गता; न हि तत्फलभूतनिर्गुणत्व-प्रतीतिदशनं परसंप्रतिपन्नमित्यत आह - जक्षत् क्रीडन् रममाण इत्यादि इति । निरूपको हि निर्गुणपरब्रह्मवेदनाधिकारिति ।

"निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।

ये मन्दास्तेऽनुकस्ष्यन्ते सविशेषनिरूपणैः ।।

वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।

तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम् ।।'

सत्युक्तेरिति भावः । यद्वा यः सर्वज्ञ इत्यादिवाक्यानामपीति । अस्यां

योजनायाम्, "सगुणब्रह्मोपासनपराणाम्', "ब्रह्मस्वरूप-प्रतिपादनपराणाम्' इति वाक्ये वैलक्षण्येन

निर्देशस्यास्वारस्यम् । किं च "उपासनपराणाम्' इत्यस्य सर्वेषामुपासनपरत्वादित्य-भिप्रायाश्रयणं च क्लिष्टमिति द्रष्टव्यम् ।

सत्यज्ञानादि समानाधिकरणवाक्यार्थः

अन्यथा व्येकेष्विति हि वक्तव्यमिति । द्वयोरेकस्य च बहुत्वोपजनकत्वादिति भावः । "एकस्मिन्नर्थे वृत्तिः' इत्यत्रैकशब्दस्यैक-त्वसंख्या-प्रधानत्वान्यत्वादिवाचित्वसंभवाल्लक्षणस्य न सम्यक्त्वमित्याशङ्कय समानपदव्याख्यानत्वादेकशब्दस्य विवक्षितार्थ- लाभः संभवतीत्यभिप्रायेण समानाधिकरणशब्दयोरर्थमाह - समानमेकमधिकरणमिति । ततश्च, "भिन्नप्रवृत्तिनिमित्तानाम्' इति सामानाधिकरण्यनिरुक्तिव्याख्यानसमये, "एकस्मिन्नर्थे' इत्यस्मिन्नंशे व्याख्यातव्ये समानाधिकरणशब्दव्याख्यानं न संगतिमिति शङ्का पराकृता । समानशब्दसामर्थ्यादेकशब्दः साधारणपर इति । न चैवमन्योन्याश्रय इति वाच्यम्; परस्परसाहचर्यस्य "गुरु-भार्गवौ' इत्यादावर्थविशेषप्रतिपादकत्वदशर्नादिति भावः । न चैकशब्दस्यैकसंख्यापरत्वे कानुपपत्तिसंख्यापरत्वे कानुपपत्तिः? नीलोत्पलशब्दयोरेकत्वसंख्याश्रयार्थवृत्तित्वसंभवादिति वाच्यम्; "बहून्युत्पलानि' इति शब्दयोरेकत्वसंख्याश्रयभूतार्थवअत्तित्वा-

संभवेन सामानाधिकरण्याभावप्रसङ्गत् । अत एव, "समानकर्तृकयोः पूर्वकाले' इत्यत्रापि सामानशब्दार्थभूतमेकत्वमपि साधा-रणत्वमेव; न तु संख्याविशेषरूपम्; "पक्त्वा भुक्ते' इत्यादौ कर्तुरेककत्वसंख्याश्रयत्वाभावादिति द्रष्टव्यम् । इदं च शङ्कापरि-हारव्याजेत; "ननु नीलान्युत्पलानि' इत्यत्र स्पष्टयिष्यते । पूर्वोक्तार्थः साधीयानिति । विवक्षितार्थविशेषाणां शाब्दत्वसिद्धेरिति भावः । तत्स्था समानविभक्तिर्विशेष्यैक्यपरेति । नन्वेवं विशेषणविभक्तेरैक्यार्थकत्वे निषाधस्थपत्यधिकरणविरोधः; षष्ठी- तत्पुरुषे लुप्तविभक्तयर्थे प्रातिपदिकलक्षणावत् विशेषणविभक्तयर्थे ऐक्ये निपादपदलक्षणाया अङ्गीकर्तव्यत्वात् । तस्माद्विशेषण-विभक्तेः साधुत्वार्थकत्वमेव; न त्वैक्यार्तकत्वमिति चेत्-न; ऐवयस्य विभत्तयर्थकत्वेऽपि तत्र प्रातिपदिकलक्षणायां प्रमाणाभा- वात् । विग्रहसमासयोः समानार्थत्वनियमाभावात् । षष्ठीतत्पुरुषे संबन्धस्य शाब्दबोधे प्रकारतया भानस्यानुभवसिद्धत्वेन तदर्थं लक्षणाश्रयणेऽपि कर्मवारर्यऽभेदस्य संसर्गमर्यादया भानस्यैवानुभवसिद्धत्वेन न तत्र लक्षणेत्याशयात् । केचितु-"एकस्मिन्नर्थे वृत्तिः' इत्यस्यैकार्थवृत्तिमद्विभक्तिद्वयवत्वमित्यर्थः । ततश्च विशेषणविभक्तेर्विशेष्यविभक्तयार्थैवयात् विशेष्यविभक्तयर्थानुवा-दितया साधुत्वमात्रार्थत्वमेव । "विभक्तयैक्यबोधनं वृत्तिशब्देन विवक्षित' मित्यस्यापि तत्रैव तात्पर्यम् । अत एव "घटस्य स्व- रूपम्' इत्यादावपि नातिप्रसङ्गः; तत्र विभक्तयोर्मिन्नार्थत्वात् । नन्वेवं "देवदत्तः पचति' इत्यत्र सुप्तिङोः सामानाधिकरण्यं न स्यात्, तिङो यत्रादिरूपातिरिक्तार्थाभिधायित्वादिति चेत्-नः तत्र सामानाधिकरण्यव्यवहारस्यामुख्यत्वादिति वदन्ति ।

एकशब्दस्य साधारणार्थत्वमुक्तं विस्मृस्य चोदयति - ननु नीलान्युत्पलानीति । समभिव्याहृतपदान्तरेति । समनिव्याहृतपदा-न्तरोपस्थोपिताकारान्तराधिकरणवृवित्वमेवैकाथवृत्तित्वम्; न तु व्यक्तिद्वयावृत्तित्वमित्यर्थः । नीलत्वानधिकरणेषूत्पलत्वं वर्तत इति १ नीलावानविकरणेष्वेवोत्पलत्वं वतर्त इत्यर्थः । खलेकपोतिकान्यायेन युगपदुपस्थितानामन्वय इति पक्षे आह - संभवेऽपि विशेषणानामिति । प्रवृत्तिनिमित्तभेदाभावेन सामानाधिकरण्यलक्षणहानिश्चेति । अत्र केचित्-"प्रवृत्तिनिमित्तभेदाभावेन' इत्येतत् पर्यायत्वे, पदान्तरवैयर्थ्येऽपि हेतुः; अतः काकाक्षिन्यायेन पूर्वत्राष्यन्वयो वक्तव्यः; एवमुत्तरत्रापि । न च सत्यत्वज्ञान- त्वादीनां प्रवृत्तिनिमित्तानां भेदस्य सत्त्वात् कथं पर्यायत्वमिति वाच्यम्, सत्यत्वादीनां शुद्धादन्यत्राभावेन सत्यादिवाक्यानां लक्ष- णया स्वरूपमात्रपरत्वेन शुद्धेऽपि तदसिद्धया प्रवृविनिमित्तभेदाभावेन पर्यायत्वं स्यादिति वदन्ति । अन्ये तु पर्यायत्वमन्यूनान-तिरिक्तार्थत्वम्; विशेषणतो विशेष्यतश्चानतिरिक्तार्थकत्वम् । तत्र प्रवृत्तिनिमित्तभेदाभावमात्रं न हेतुः; भिन्नविशेष्याभिप्रायेण प्रयुक्तयोर्घटकुम्भशब्दयोः प्रवृत्तिनिमिवभेदाभावेऽप्युक्तपर्यायत्वाभावात्; अतः सामानाधिकरण्यलक्षणहानावेन हेतुरिति वदन्ति ।

अत एव जगत्कारणत्वेति । यत एव सत्यज्ञानादिशब्दानामनृतजडपरिच्छिन्नविरोधिस्वरूपोपस्थापकत्वम्, अत एव सत्यज्ञा-नादिपदैः कारणत्वशङ्किकतानृतजडादिभ्रान्तिव्युदासः क्रियत इत्यर्थः । व्यापर्त्यभेदेन यथा न पर्ययत्वमिति । काष्ण्यर्रक्तिमादीनां भिन्नतया तत्तदवच्छिन्नव्यावृत्तीनां (प्रवृत्तिनिमित्तानां) भेदात् यथा अपर्यायत्वमर्थवत्वं चेत्यर्थः । न चानृतजडपरिच्छिन्नव्या-वृत्तीनामपर्यायत्वसिद्धयर्थं भेदस्याभ्युपेतत्वे कथमेकार्थत्वं चेत्यर्थः । न चानृतजडपरिच्छिन्नव्यावृत्तीनामपर्यायत्वसिद्धयर्थं भेद-स्याभ्युपेतत्वे कथमेकाथर्त्वं सिध्येदिति वाच्यम्, पदार्थोपस्थितिदशायां व्यावृत्तीनां भानेऽपि वाक्यार्थप्रतीतिदशायां तत्तद्वया-वृत्त्युपलक्षितस्वरूपमात्रस्यैव प्रतीयमानतयैकार्थत्वाविरोधात् । न च वाक्यार्थप्रतीतिदशायामपि व्यावृत्तिवैशिष्टयं भासतामिति वाच्यम्-शौवल्यस्वयूपमात्रवुभुत्सायामेव काष्ण्यादिव्यावृत्तमित्युत्तरस्यावतीर्णतया अस्य वाक्यस्य स्वरूपातिरिक्ताथर्प्रतिपाद-कत्वासंभवात् । अत एव सत्यज्ञानादिवाक्यानां ब्रह्मस्वरूपमात्रप्रश्नोत्तरतया व्यावृत्तिवैशिष्टयाबोधकत्वम् । अत एव संसर्गागो-चरप्रमाजनकत्वलक्षणमख्डार्थत्वं युज्यत इति भावः । केचित्तु-अनृत जडपरिच्छिन्नव्यावृत्तिवैशिष्टयं सत्यज्ञादिवाक्ये भासत एव । न चैवं संसर्गागोचरप्रमाजनकत्वलक्षणमखण्डार्थत्वं भज्येतेति वाच्यम् - अभिन्नविशेषणविशेष्यार्थत्वरूपाखण्डार्थत्वस्य वैशिष्टयगोचरत्वेऽप्यविरोधात् । सत्यपदजन्यप्रतीतिविषययोरेव विशेषणविशेष्ययोर्वस्तुतो भेदरहितयोर्व्यावृत्तिब्रह्मस्वरूपयोरेव ज्ञानपदजन्यप्रतीतिविषयविशेष्यविषषणत्वात् । ब्रह्मस्वरूपाया अनृतव्यावृत्तेर्जडव्यावृत्तिरूपत्वे विशेषणयोर्व्यावृत्त्योर्भेदाभावात् । न चैवमेकप्रवृत्तिनिमित्तकतयो पर्यायत्वं स्यादिति वाच्यम्, अन्यूनानतिरिक्ताथर्कत्वस्यैव पर्यायशब्दार्थतया व्यावृत्तिरूपविशेष-णविशेषणभूतानां भिन्नमिन्नानां प्रतियोगिनां भानेन पर्यायत्वस्याप्रसक्तेरिति वदन्ति ।

ननु शक्तया पदजन्यपदार्थोपस्थिते; शक्यतावच्छेदप्रकारकत्वावश्यंभावात् शक्तया पदजन्यब्रह्मस्वरूपोपस्थितेरपि शक्यता-वच्छेदकीभूतसत्यत्वादिप्रकारकत्वप्रसङ्गेन कक्यस्याखण्डार्थत्वभङ्गप्रसङ्गः; अतोऽनृतजडपरिच्छिन्नव्यावृत्तब्रह्मस्वरूपोपस्थि- तिरपि लक्षणयैवेतेयभ्युपगन्तव्यमित्यरुचेत्याह - लक्षणाभ्युपगमेऽपीति । समानविभक्तिवलादैक्यतात्पर्यनिश्चय इति । इदमु-

पलक्षणम् । लक्षणवाक्यत्वात् ब्रह्मस्वरूपमात्रप्रश्नोपेत्तरत्वाच्चेत्यपि द्रष्टव्यम् । सर्वपदानां लक्षणा न दोष इति । सर्वप्रातिपदिक-ानामित्यर्थः । विभक्तेरैक्यार्थाया लक्षकत्वाभावात् । यद्वा विभक्तयर्तस्यैकत्वस्य संसर्गप्रतीतौ वाक्यस्याखण्डार्थत्वभङ्गात्तस्य सत्यत्वादितुल्यशीलत्वात् । न चैवं समानविभक्तिबलादैक्यतात्पर्यनिश्चय इति पूर्वग्रन्थविरोध इति वाच्यम्-प्रातिपदिकार्थमात्र-प्रश्नोत्तरावेन ब्रह्मस्वरूपमात्रे तात्पर्यावगमादिति तदभिमायादिति वर्णयन्ति । "सत्यज्ञानादगुणाः प्रतीयन्ते' इति परिचोदिते सति, "नेत्युच्यते' इति वदतः प्रतीत्यपलापदोषः स्यादित्याशङ्कयाह - नेत्युच्यत इति वदतोऽयं भाव इति । सर्वपदानामेका-भिधयपर्यवसानमिति । एकस्य पदस्याभिधेयम् (एकाभिधेयम् । तत्र पर्यवसानम्?) एकप्रातिपदिकार्थमात्रनिष्ठत्वमित्यर्थः । न तु वाक्यस्येत्यर्थ इति । न त्वेकवाक्यार्तपर्यवसायित्वमेव पदानामखण्डार्थत्वमित्यर्थः । तथा सति सर्ववाक्यमप्यखण्डार्थं स्यादिति भावः । पदानामेवैकार्थपर्यपसायित्वमिति । एककारो भिन्नक्रमः । पदानामेकप्रातिपदिकार्थपर्यवसायित्वमेवाखण्डा-र्थत्मव्; न त्वेकप्रधानार्थपर्यवसायित्वमात्रमित्यर्थः । ततश्च पदानामेकार्यपर्यवसायित्वे वाक्यस्यापि तदम्त्येव; वाक्यस्यैकार्थपयर्-वसायित्वे पदानामपि तदस्त्येव; पदव्यतिरेकेण वाक्यस्याभावादिति शङ्का प्रत्युक्ता । कृत्स्नवाक्येनेति । "विशेषणभेदेन अर्त-भेद'इत्यंशेन विशेषणमात्रपरत्वे दूषणमिति भावः । विशेषण भेदेनेति व्याख्येयं पदम् । युगपदभिधानपक्षे दूषणमुक्तं भवतीति । इदमुपलक्षणम्, क्रमेणाभिधानपक्षे विशेषणान्तरान्वयो बोध्यत इति द्वितीयविकल्पेऽन्योन्यसमवायरूपदूषणमुक्तमिति द्रष्टव्यम् । सामानाधिकरण्यलक्षणासिद्धिरित्यर्थ इति । एकवस्तुमात्रपरत्वरूपसामानाधिकरण्यलक्षणासिद्धिरित्यर्थः । चोद्यद्वयमभिप्रेत- मिति । अत्र केचित्-पदान्तरवैयर्थ्यमात्रस्य पर्यायत्वस्य चैकवस्तुमात्रपरत्वरूपसामानाधिकरण्येऽवश्यंभावमाशङ्कय एक-वस्तुमात्रपरत्वेऽप्यपर्यायत्वं पदान्तरावैयर्थ्यं च संभवतीति पदान्तरवैयर्थ्यपर्यायत्वरूपदूषणद्वयप्रसङ्गस्यैव परिहरिष्यमाणतया दूषणद्वय एव तात्पर्यम् । ततश्चैकवस्तुमात्रपरत्वे पर्यायत्वं पदान्तरैवयर्थ्यं च स्यात् । तस्य

कथंचित्परिहारे एकवस्तुमात्रनिष्ठत्व-रूपसामानाधिकरण्यभङ्गप्रसङ्ग इत्येवं परतया टीकाग्रन्थोऽपि योजनीय इति वदन्ति । व्युदासस्तु फलित इति । अयं भावः- यद्यपि सत्यपदोपस्थापितस्वयूपव्यतिरिक्तं न पदान्तरेण प्रतिपाद्यते, अथापि सत्यपदेनैवानृतभ्रान्तिव्युदासः; ज्ञानपदेनैव जड-भ्रान्तिव्युदासः; अनन्तपदेनैव च परिच्छिन्नभ्रन्तिव्युदासः; अनृतजडपरिच्छिन्नव्यावृत्त्युपस्थितेस्ततत्पादाधीनत्वात्; तत्तद्वया-
वृत्तिपूर्वकस्वरूपोपस्थितेरेवानृतजडपरिच्छिन्नभ्रान्तिव्युदासकत्वात् । यथा अभिज्ञाभ्यामवगतस्वरूपस्यैव प्रत्यभिज्ञाविषय- त्वेन विषयकृतविशेषाभावेऽपि
कालद्वयप्रतिसंधानादिलक्षणकारणकृत्रोभिज्ञाद्वयानिवर्त्यभेदभ्रमनिवर्तक्रत्वलक्षणो विशेषः प्रत्यभिज्ञायां दृश्यते,एवं सत्यपदजन्योपस्थितेरनृतप्रतिसंदानपूर्विकाया एवानृतभ्रन्तिनिवर्तकत्वम्; जडप्रतिसंधानपूर्विकाया एव ज्ञानपदजन्योपस्थितेर्जडभ्रान्तिनिवर्तकत्वमित्येवमनृतजडपरिच्छिन्नव्युदासः फलित इति भावः । प्रयोजकरूपेणेति अनेकपदार्थसंग्राहकानृतत्वाद्याकारेणेत्यर्थः ।

(एतस्य कारणत्वानुवादेन) लक्षणपरत्वादिति । लक्षणत्वविधिपरत्वादित्यर्थः । उपलक्षणं नाम चन्द्रस्येति । मायाशवलस-गुणब्रह्मगतं कारणत्यवं तदनुगतस्य लिलक्षयिषिताखण्डचैतन्यस्य तटस्थतयोपलक्षणम्, शाखाग्रमिवातन्निष्ठं चन्द्रमसः । तस्य प्रकृष्टप्रकाशत्वमिव सत्यज्ञानानन्दरूपं स्वरूपलक्षणम् । न चावश्यमपेक्षितेन सत्यज्ञानानन्दत्वरूपस्वरूपलक्षणेनैवेतरव्या-वृविसिद्धेर्जगत्कारणत्वरूपतटस्थलक्षणं व्यर्थर्म्; चन्द्रादौ तु "प्रकृष्टप्रकाशः' इत्यनेनैव स्वरूपे प्रतिपन्नेऽपि तद्दिदृक्षया चन्द्र-बुभुत्सोर्गगते सर्वतश्चक्षुर्विक्षेपे क्लेशः स्यात्, स मा भूदिति देशविशेषे चक्षुर्नियमानार्थतया तटस्थलक्षणमुपयुज्यत इति वक्तुं शक्त-्यमिति वाच्यम् प्रकरणोपपदादिसंकोचकभावेन त्रिविधपरिच्छेदपरिपन्थिनिरतिशयबृहत्त्ववाचिब्रह्मशब्दार्थस्य निष्प्रपञ्चस्य लिल-क्षयिषितस्य ब्रह्मणः "यद्रजतमभात् सा शुक्तिः' इतिवदध्यारोपापवादन्यायेन "यत्प्रपञ्चविवर्तोपादानं तद्ब्रह्म' इति निष्प्रपञ्चत्व- सिध्यर्थं जगदुपादानत्वस्य ब्रह्मणि वक्तव्यत्वेन तटस्थलक्षणसाफल्यात्; स्वररूपविशेषप्रतिपत्त्यर्थतयो स्वरूपलक्षणस्याष्याव-श्यकत्वमिति हि मृषावादिनां मतनिति भावः ।

मुख्यार्थत्वमुत्तरत्राभिधास्यत इति । आनन्दमयाधिकरण इति शेषः । सा चात्र लक्षणावृत्तिर्विवक्षितेति । इदं तु "तात्पर्यादा- गता' इति पक्षे बोध्यम्, लक्षरावीजस्य तात्पर्यस्यैव लक्षणशत्वासंभवत् । अन्यैश्च संमतमित्यर्थ इति । "क्तेन च पूजायाम्' इति षष्ठीसमासनिषेधात् भूतक्तान्तेन, "कर्तृकरणे कअता बहुलम्' इति तृतीयासमास इति भावः । तात्पर्याविरुद्धेति । यत्र क्वचि- दिति शेषः । न हि तात्पर्याविरुद्धस्थले मुख्यार्थः स्वीकृत इत्येतावता तात्पर्यविरुद्धस्थलेऽपि मुख्यार्थ एव स्वीकर्त- व्य इति निर्बन्धोऽस्तीति भावः । अभ्युपगमहेतुसद्भावादभ्युपगमः फलित इति । वस्तुगत्याभ्युपगमाभावेऽष्यकामेनाप्यभ्युप-

गन्तव्यमिति भावः ।

सर्वलाक्षणिकत्वे प्राभाकरोदाहरणम्

भाष्ये-अपूवर्कार्य एव लिङादेर्मुख्यवृत्तत्वाल्लिङादिभिः क्रियाकार्यं लक्षणया प्रतिपाद्यत इति । "स्वर्गकामो यजेत' इत्यादौ हि स्वर्गकामरूपनियोज्यं प्रति क्रिया लिङ्शब्देन कायर्तया बोधयितुमशक्या । कामी हि काम्यादन्यात् काम्याव्यवहितसाधनमेव कार्यतया अवैति; न तु व्यवहितसाधनम् । क्रियारूपसाधनं तु अस्थायित्वेन काम्याव्यवहितसाधनत्वाभावान्न कामिनियोज्या-न्वययोग्यम् । तस्मात् फलपयर्न्तस्थाय्यपूर्वमेव लिङो वाच्यमिति सिद्धे, लोके क्रियारूपे कार्ये प्रयुज्यमाना लिङ् लाक्षणिक्येव, नानार्थत्वस्यान्याय्यत्वादिति हि प्राभाकरैरभ्युपगम्यत इति भावः । तदन्विताभिधायिनामिति । निमीलनपदलाक्षणिकार्थान्वि-ताभिधायिनामित्यर्थः । तत्कार्यसमर्पकपदलाक्षणिकत्व इति । लाक्षणिकत्वे प्राप्नुवति तद्धेतुनान्येषामपि लाक्षणिकत्वमित्यर्थः; न तु हेतु । हेतुमद्भाव इति भ्रमितव्यम्, तस्याप्रसक्तेः । न हि पदान्तरलाक्षणिकत्वं पदान्तरलाक्षरिकत्वे प्रयोजकम्; अपितु मुख्या-र्थासंभव एव । ततश्च क्रियातिरिक्तकार्यरूपमुख्यार्थासंभवेन क्रियातिरिक्तकार्यप्रतिपादकलिङः

क्रियाकार्यप्रतिपादने लक्षणावदितर-पदानामपि क्रियातिरिक्तकार्यान्वितरूपमुख्यार्थासंभवेन तदर्थप्रतिपादकानां क्रियान्वितार्थप्रतिपादने लक्षणावश्यंभाव इति भावः । अत एव वक्ष्यति -
विशिष्टस्थायिकार्यैकदेशपरत्वप्रहाणस्येयाद । किं लिङादिः कार्यमात्रपरः स्यादिति । ननु लोके कार्य-त्वाश्रयस्य क्रियास्वरूपस्य प्रकृत्युपात्तत्वात् कार्यत्वमात्र एव लिङादेः शक्तिः; यथा
एकवचनादीनामेकत्वादिसंख्यामात्रवाि◌ाच- त्वम्; न तु तदाश्रयवाचित्वम्, तस्य प्रकृत्युपात्तत्वात् । ततश्च लिङादेः कार्यत्वमेवार्थः । ततश्च प्रकृत्युपात्तक्रियायाः प्रत्ययोपात्त-कार्यत्वस्य च धर्मधर्मिभावेनान्वय इति लौकिकवाक्यमर्यादा । वेदे तु कार्यत्वाश्रयस्यापूर्वस्यान्यतो लाभासंभवात् कार्यत्वविशि-ष्टकार्यस्वरूपाभिधायित्वं वक्तव्यम् । ततश्च यदि विशिष्टाभिधायी लिङादिः, ततोऽपूर्वमेवाभिदध्यात्, न क्रियाम् । अथ विशेष-णाभिधायी, ततः क्रियागतमेवाभिदध्यात्, नापूर्वगतम् । अतो लोकवेदसाधारणस्यार्थस्यैकस्यालाभा (भावा) दुभयत्रापि शक्ति-कल्पने गौरवाल्लौकिकपदानुपारेण वैदिकपदस्यामुख्यार्थत्वस्यान्याय्यत्वात् कार्यमेव मुख्योऽर्थः; लोके तु लक्षणया कायर्त्वं प्रति-पाद्यत इत्येवं लिङादेर्लक्षणाया आवश्यकत्वेऽपीतरेषां लौकिकपदानां लक्षणायां हेत्वभावात् । न हि वैदिकस्य लिङादेर्लौकि-कलिङादिगतव्युत्पत्तिविरुद्धव्युत्पत्त्यन्तरकल्पनवत् तदतिरिक्तवैदिकपदेषु लौकिकपदगतव्युत्पत्तिवि◌ुद्धव्युत्पत्त्यन्तरमस्ति; कार्या-न्विताभिधायित्वस्य लिङादिव्यतिरिक्तलौकिकपदेष्विव लिङादिव्यतिरिक्तवैदिकपदेष्वष्यविशिष्टत्वात् । इयांस्तु विशेषः-लोके क्रियारूपं कार्यम्; वेदे तु तदतिरिक्तम् । कार्यान्विताभिधायित्वं तु सर्वसाधारणम् । यदि व्यक्तिभेदमात्रेण व्युत्पत्त्यन्तरम्, तदा "गामानय', "गां बाधान' इत्यादीनामपि प्राथमिकव्युत्पतिविरुद्धव्युत्पत्त्यन्तरं, कल्पनीयं स्यादिति चेत्-सत्यम्, सर्वत्र कार्या-भिधाय्येवायं लिङादिशब्दोऽस्तु । स यदा क्रियापरो भवति, तदा तत्स्वरूपस्य प्रकृतित एव प्राप्तत्वाद्विशेषणपरो भवति । तद्यथा-"दण्डी प्रैषानन्वाह' इति विशिष्टाभिधाय्यपि दण्डिशब्दो विशेषणपरो भवति; नापि लक्षणा । ततश्च कार्यवचनः शब्दो यदा क्रियायां प्रयुज्यते, तदा कार्यत्वरूपविशेषणपरत्वं श्रुतिवृत्त एव सन् प्रतिपद्यते । नैतावता लक्षणा भवतीत्युभयत्रापि मुख्यत्वमेव । यस्तु वदति-नन्वेवं सति कार्यसामान्यवाचित्वे कामाविकारेऽपि समानपदोपात्तो धात्वर्थं एव कार्यतया अभिधेयः स्यादित्यपूर्वा-भिधानमुत्सादेत्; तेन यदैव कामिनियोज्यसंबन्धादपूर्वामिधायित्वमवगतम्, तदैव तन्निवार्हार्थं क्रियालाक्षणिकत्वमध्यवसित- मिति-स एवमनुशासितव्यः-हन्त तर्हि किं नाश्रौषीः, "यो हि पाषाणान् भक्षयति,ईषत्का(का)रास्तस्य मुद्गशष्कुलाः' इति; यो हि नियोज्यसंबन्धो लिङ्शब्दं कार्यत्ववाचिनमवगतमपि तत उद्धृव्यापूर्वं नयति, स कथं कार्यसामान्यवाचितमपूर्वं नेतुं न क्षमते । तस्मात् कर्तव्यतासामान्यवाची सन्नपि यत्र फलकामस्य नियोज्यत्वं तत्र तद्वलेनापूर्वमभिधत्ते; अन्यत्र समानपदोपादा- नात् क्रियाम् । अतः कार्यसामान्यवाचित्वाल्लिङ्शब्दस्यापूर्वक्रिययोः साधारणत्वान्न क्वापि लक्षणा समाश्रयणीया स्यात् । एव- मपि लौकिकवाक्ये लक्षणां लिङादेरभ्युपगच्छता तदितरपदानां कुतो लक्षणा नाभ्युपगम्येति सर्वपदलक्षरावादिनां मृषावदिना- माशयः ।

उक्तैरुपपत्तिसहितैः श्रुतिवाक्यैरिति । अत केचित् -अत इत्यस्य "उक्तेभ्यो हेतुभ्यः' इत्युसंहाररूपत्वमेव । अन्यथा "उपपत्ति-सहितवाक्यैरिदमेवार्तजातं प्रतिपादयन्तो वेदान्ताः' इत्यन्वयस्य क्लिष्टत्वं स्यात्, वाक्यानां वेदान्तानां च भेदामापादिति वदन्ति ।

प्रत्यक्षस्य सन्मात्रप्रहित्वम्

अव्यवहितं वृत्तं परित्यज्य व्यवहितवृत्तकीर्तनमनुचितमित्याशङ्कयाह - शास्त्रप्रत्यक्षविरोध इति । संगतिप्रदर्शनार्थं व्यवहितकीर्तन-

मिति भावः । विरोधाभ्युपगमेऽपीत्यर्थ इति । न च चशब्दस्याष्यर्थत्वे पूर्वोक्तसमुच्छयार्थत्वविरोध इति वाच्यम्, अपेरपि समुच्छ-यार्तत्वसंभवेन विरोधाभावात् । ननु "विरोध एव न दृश्यते' इत्ययुक्तम्,

विरोधप्रतिपत्तेर्दुरपह्नवत्वात् हेतुवैयर्थ्याच्चेत्याशङ्कयाह - अविरोधं प्रतिजातीत इति । "निर्विशेषसन्मात्रग्राहित्वात्' इत्यस्य व्यधिकरणतया अहेतुत्वशङ्कां निवर्तयति - हेतुमाहेति । प्रत्यक्षं न शास्त्रविरुद्धं निर्विशेषसन्मात्रग्राहित्वादिति भाष्याभिप्राय इति भावः । प्रतीतेभ्रान्तिरूपत्वसंभवादिति । सन्मात्रग्राहि-प्रत्यक्षे विलक्षणविषयविषयक्रत्वप्रतीतेरित्यर्थः । न तु भेदप्रतीतेरित्यर्थः; तथा हि सति सन्मात्रग्राहिप्रत्यक्षवादविरोधापत्तेः; तच्छङ्काया विलक्षणेत्यादिभाष्यग्रन्थानिवृत्तेश्च; भ्रन्तेरपि विलक्षणव्यवहारहेतुत्वात् । "तयोभ्रिन्नकालज्ञानफलत्वात् प्रत्यक्ष- ज्ञानस्य चैकक्षणवृत्तित्वात्' इति भाष्यस्यायमर्थः-प्रत्यक्षज्ञानं किं युगपदेव व्यवहारद्वयमुत्पादयति, उत क्रमेण? नाद्य इत्याह - तयोरिति । भिन्नकालं यत् ज्ञानं प्रतियोगिस्मरणादिरूपं तत्फलत्वादित्यर्थः । एकस्मिन् काले प्रतियोगिज्ञानसापेक्षनिरपेक्षयो-र्द्वयोर्व्यवहारयोरुत्पव्यसंभवादित्यर्थः । द्वितीयं दूषयति - प्रत्यक्षज्ञानस्य चेति । न च पश्चादुत्पन्नप्रत्यक्षज्ञानान्तरेण भेदव्य-वहारोऽस्त्विति वाच्यम्, पश्चादुत्पन्नस्य प्रत्यक्षत्वे प्रमाणाभावादिति भावः । किं युगपदुभयग्राहीति । युगपद्वयवहारद्वयो-त्पादकमित्यर्थः; भाष्यानुरोधात्, "यगपद्वा क्रमेण वा मूलं स्यात्' इत्युत्तरग्रन्थानुगुण्याच्चेति द्रष्टव्यम् । असाधारणव्यपहारेऽपि घटस्य पटाद्वयावृत्ततया प्रतीतौ अपेक्षितायामिति शेषः । प्रत्यक्षस्य स्वरूपमात्रविषयत्वे कथं भेदव्यवहारसंभव इति । स्व-रूपमात्रविषयत्वे घटादिस्वरूपाविषयत्वे कथं घटादिरूपभेदव्यवहारसंभव इत्यर्थः ।

भेददूषणम्

ननु घटादिस्वरूपमात्रग्रहणस्य प्रतियोगिज्ञानादिसापेक्षत्वाभावात् घटदिस्वरूपस्य प्रत्यक्षविषयत्वे काऽनुपपत्तिरिति चेत्, उच्यते-इन्द्रियव्यापारानन्तरं प्रतीयमानो घटादिः सर्वतो भिन्न एव प्रतीयते तत्र तदितरभेदे संशयविषर्ययादर्शनात् । तत्र च भेद- स्य प्रतियोगिसहोपलम्भनियमवतो न प्रत्यक्षेण ग्रहणसंभवः, देशकाल दिव्यवधानेनासंनिकृष्टानामपि प्रतियोगितां संभवात् । तस्मात् प्रत्यक्षायोग्यस्य प्रतियोगिनः प्रतिभासो भ्रान्तिरूप इति तदेकवित्तिवेद्यस्य भेदस्य भेदैकवित्तिवेद्यस्य घटादेश्च भ्रमैकविषय-त्वात् प्रत्यक्षं निर्विशेषसन्मात्रग्राह्येव; न घटादिस्वरूपग्राहीति मृषावादिनामाशयात् ।

सर्वस्माद्भेदव्यवहारप्रसक्तिर्नानिष्टा स्वरूपभेदवादिनः, स्वरूपग्रहणानन्तरं प्रतियोगिनः स्मरणे सति व्यवहारस्येष्टत्वादित्या- शङ्कय व्याचष्टे - प्रतियोगिनिरपेक्षभेदव्यवहारप्रसक्तेरिति । स्वरूपग्रहणस्य शब्दच्युत्पत्तीति । अतिरिक्तभेदपक्षेऽपि भेद-स्वरूपग्रहणस्येत्यर्थः । तथा प्रतियोगिग्रहण(स्मरण)मपीति । स्वरूपानतिरिक्तभेदपक्षेऽपीति शेषः । अतिरिक्तभेदवादिनैया-यिकादिपक्षे व्युत्पन्नशब्दस्मरणादिर्भेदव्यवहार एव कारणम्, न तु भेदज्ञाने; तथास्मन्मते प्रतियोगिग्रहणादिकमपि भेदव्यवहार एवेति भावः । स्वरूपभूतं भेदान्तरमिति । न च स्वरूपभूतत्वभेदान्तरत्वयोर्विरोध इति शङ्कनीयम्, काल्पनिकभेदमादाय भेदा-न्तरत्वधर्मधर्मिभावोपपत्तेरिति भावः । ननु व्यक्तयन्तरानभ्युपगमान्नानवस्थेत्यरुचेराह - किं च शब्दान्तरेण धर्म इत्युक्तमिति । कल्पितभादमादाय धर्मवर्मिभावोपपादने घटस्यापि घटाश्रयत्वप्रसङ्गः । अत कल्पितभेदमादाय धर्मधर्मिभाव उपपद्यत इति वदता स्वरूपपक्षं परित्यज्यधर्मपक्ष एवावलम्बितः स्यादित्यर्थः । घटस्य भेदव्यवहारे कृत इति । अनुगतस्य भेदाख्यधर्मस्याभावात् भेद-शब्दो यस्यां व्यक्तौ गृहीतसंगतिकस्तत्रैव प्रयुज्येत, नान्यत्रेत्यनुगतव्यवहारोच्छेदप्रसङ्ग इत्यर्थः । धर्मश्चेत् पूर्वदोष इति । व्यावृत्त-धर्मत्वेऽनुगतव्यवहारोच्छेद इत्यर्थः । सन्मात्रमङ्गीकृतं स्यादिति । तस्यैवानुवृत्तस्वरूपत्वादित्याशयः । धर्मपक्षे पूर्वपदिति । न च प्रमेयत्वे प्रमेयत्ववत् अनुवृवभेदरूपधर्मस्य स्वपरनिर्वाहकत्वान्नानवस्थादोष इति वाच्यम्, तस्याष्यसंप्रतिपत्तेरिति भावः । तत्ख-ण्डस्यापि तथा स्यादिति । द्विधाभूतस्यापि द्विधाभावः स्वादिति भावः । भाष्ये - तस्यापि भेदस्तद्धर्मस्तस्यापीति । "भेदस्त-द्धर्मः' इति शेषः । ततश्च तस्यापि भेदस्तद्धर्मः. तस्यापि भेदस्तद्धर्म सत्यनवस्तेत्यर्थः । भाष्ये - भेदं च तस्यापि भेदस्तद्धर्म इत्यत्र षष्ठयन्ततच्छब्देन "भेदे च' इत्यव्यवहितपूर्वनिर्दिष्टस्य भेदरूपधर्मनिष्ठस्य स्वरूपप्रतियोगिकस्य द्वितीयभेदस्य ग्रहणसंभवे व्यवहितस्य प्रतमभेदस्य ग्रहणमन्याथ्यम्, तथाहि सति "भेदस्तद्धर्मः'

इत्युक्तेरेवोचितत्वेन "तस्य भेदः' इति निर्देशस्य व्यर्थत्वा-च्चत्यपरितोषादाह - यद्वा धर्मस्य स्वरूपाद्यो भेद इति । प्रथमपक्षे "तस्यापि भेदस्तद्धर्मः' इति वाक्यखण्डेन भेदधर्मिकभेदान्त-रसिद्धिमात्रम्; द्वितीयपक्षे "तस्यापि भेदस्तद्धर्मः' इति वाक्यखण्डेन भेदधर्मिकभेदान्तरसिद्धिमात्रम्; द्वितीयपक्षे "तस्यापि भेदस्तद्धर्म' इत्यनेन भेदधर्मिकभेदेऽपि भेद्धसिद्धिरिति विशेषः । जात्यादिधर्मविशिष्टवस्तुग्रहणे सतीत्यत्र भाष्ये आदिशब्देन धर्मित्वप्रतियोगित्वधर्मवर्मित्वानां ग्रहणमित्याह - त्रिधा च तदित्यादिना । घटस्य पटात् भेदज्ञाने हि त्रीणि कारणानि - घट-

पटरूपधर्मिप्रतियोगिज्ञानमेकम्; भेदतदाश्रयरूपधर्मधर्मिज्ञानं द्वितीयम् । विशिष्टज्ञाने विशेषणविशेष्यज्ञानस्य हेतुत्वात् घटस्य पटव्यावृत्त(त्व)घटत्वाश्रयत्वज्ञानं तृतीयमिति पर्यवसितोऽर्थः । न च धर्मिप्रतियोगिज्ञानस्याभावज्ञानहेतुत्वऽपि धर्मित्वप्रति-योगित्वप्रकारकज्ञानस्याहेतुत्वात् कथमन्योन्याश्रयः? धर्मित्वप्रतियोगित्वप्रकारकज्ञाने परं भेदज्ञानापेक्षा, न धर्मिप्रतियोगिज्ञान इति वाच्यम्, भेदज्ञानात् प्राक् प्रतियोगित्वत्वादिविशिष्टप्रतियोगित्वादिप्रकरकज्ञानाभावे प्रतियोगित्वादिविशिष्टप्रतियोगिवि-शेषणकभेदप्रत्ययाभावेन प्रतियोगित्वप्रकारकज्ञानस्य हेतुत्वात् । अत एव भोदतदाश्रययोरपि धर्मवर्मिणोर्धर्मवर्मित्वेन ज्ञानाभवे विपरीतधर्मधर्मिभावप्रतीतिप्रसङ्गेन तेन रूपेण धमिर्ज्ञानमपेक्षितमित्यत्र तात्पर्यात् ।

अथ बाधकप्रमाणमुपन्यस्यतीति । न केवलं साधकाभावः; बावकमष्यस्तीति किं चशब्दार्थ इत्यर्थः । न च "भेदः स्वरूपं धर्मो वा' इत्यादिबाधकं प्रागष्युपन्यस्तमिति वाच्यम्, तस्य तर्करूपत्वेन प्रमाणत्वाभावादित्यत्र तात्पर्यात् । विपरीतोपाधिसद्भापा- च्चेति । साध्यविपर्ययरूपसत्यत्वप्रयोजकाबाधितत्वसत्त्वादित्यर्थः । किं संवादफलभूता, उत बाधफलभूतेति । पटसत्त्वग्राहि प्रमाणं संवादः; तदसत्त्वग्राहि प्रमाणं बाधः । भावग्राहि प्रमाणं संवादः; अभावग्राहि प्रमाणं बाधः । फलत्वं च विषयत्वमेव । घटादौ दृष्टा पटव्यावृत्तिः पटसत्त्वग्राहिप्रमाणरूपसंवादफलभूता, उत पटाभावप्रतीतिलक्षरबावफलभूता वेति भवन्त एव विमृश-न्त्विवत्यर्थः ।"पटव्यावृत्तेः पटसत्तारूपत्वे हि संवादफलत्वशङ्कापि स्यात्; अभावरूपत्वेच बाधितत्वमकामेनापि (अकामेऽपि?) सिध्यतीति भावः । ननु "घटोऽस्ति' इति पटाभावसिद्धिमात्रेण पटादीनां कथं बाधितत्वसिद्धिरित्याशङ्कय बाधफलूताभाव्या-वव्यतिरेकेण बाधित्वस्याभावात् बाधफलभूतोऽभाव एव बाधितत्वमित्यभिप्रायेणाह - यज्जौ भूदलनादीनामभाप इति ।

सदनुभूत्योरैक्यम्

भेदस्य भ्रान्तिसिद्धत्वमपिना समुच्चीयत इति । न प्रमाणपदवीमनुसरति =भ्रन्तिसिद्धः इति हि तस्यार्थो वर्णितः । ततश्च विषय-विषयिभावो भेदश्च भ्रान्तिसिद्ध इत्यर्थ इति भावः । यद्यष्यपिना भेदः समुच्चीयत इति विवक्षितार्थसिद्धः, तथापि फलितमादाय तथो-क्तमिति द्रष्टव्यम् । भाष्ये-तस्मात् सदनुभूतिरेवेति । ननु घटादिकमपि सदनुभूतिभ्यामभिन्नमेव स्यात्, भेदस्य दुर्निरूपत्वादिति चेत्-न, एतस्याभ्युच्चयमात्रत्वेनैतदतिप्रसङ्गस्यादोषत्वात् ।

अनूभूतेः स्वयम्प्रकाशत्वम्

किंचशब्दसमुच्चितापन्यस्येति । यदि प्रत्यनुमाननिरासः किं चशब्देन समुच्चीयते, तदा "अनुभवापेक्षा च' इति चशब्देनानुमाना- न्तरं समुच्चीयते । यदि चानुमानान्तरं किंचशब्देन समुच्चीयते, तदा अनेन चशब्देन प्रत्यनुमाननिरासः समुच्चीयत इत्यर्थः ।

क एवं नियामक इत्यत्राहेति । ज्ञानस्य सत्तया प्रकाशककोटिनिवेशः कुत इति शङ्कानिवारकं प्रागुक्तोपसंहारपरं तस्मादिति पदमिति भावः । अस्मदुक्तहेत्योः सोपाधिकत्वनिरासाच्चेति; ज्ञानं परप्रकाश्यं, वस्तुत्वात् भासमानत्वाद्वेति हेत्वोः स्वसत्तया प्रकाश-मानत्वाभावस्य परोद्भावितोपाधेर्निरासादित्यर्थः । स्वरूपै भासत्वादिति । या मातता यत्पुरुषवेद्या सा तदीयज्ञानजन्येति व्या- प्त्या स्वीयमेव ज्ञानमनुमीयते, नान्यदीयमिति भावः ।।

असाधारण्यप्रतिक्षेपः फलित इति । पुरुषविशेषासाधारण्येत्यर्थः । अयमर्थः,"अनुभूतिव्यतिरेकी विषयधर्मः' इत्युत्तरग्रन्थे स्पष्टः । ये पुनर्द्वित्वादिकं नाभ्युपगच्छन्तीति । यादृशादपेक्षाबुद्धिविषयाद्द्वित्वाद्युत्पत्तिः, तादृशापेक्षाबुद्धिविषयवस्तुविशेषोपलम्भ एव द्वित्वादिव्यवहारं जनयति, न द्वित्वादिरूपं किंचितस्तीति सिद्धान्तिमते प्रतिबन्दी न संभवत्येवेत्यर्थः । आत्ममनःसंयोगे व्य-भिचारः स्यादिति । क्षणिके आत्ममनः संयोगविशेष इत्यर्थः । दृष्टान्तश्च साधनविकल इति । सुखदुःखदीनामन्तःकरणर्मत्वा- दिति भावः । तदबुभुत्सितग्राह्यं दृष्टमिति ।

अबुभुत्सितग्राह्यम् = "इदमहं न बुध्येयम्' इति विपरीतेच्छायां सत्यामपि भ्राह्य-मित्यर्थः । तस्याष्बुभुत्सितग्राह्यत्वान्मानसप्रत्यक्षवेद्यत्वं स्यादिति । तस्यापि मानसप्रत्यक्षवेद्यत्वेनाबुभुत्सितग्राह्यत्वान्मान-सज्ञानान्तरविषयत्वमवश्यंभावात्यर्थः । ज्ञाते सतीच्छेति । ज्ञाने सति बुभुत्सेत्यर्थः । सामान्यतो विदिते विशेषतश्चाविदिति एव बुभुत्साया उदयादिति भावः । अबुभुत्सितग्राह्यत्वपक्षेऽनुव्यवसायधाराप्रसङ्गमुकत्वा बुभुत्सितग्रह्यत्वपक्षपि बुभुत्सान्तरितज्ञान-परंपरामाह - किं च मान सेति । ज्ञानं बुभुत्सितग्राह्यं सुखादि तु नेति चेदिति । ततश्च सुखादिषु प्रतीतिव्याप्तिसंभवेऽपि ज्ञानस्य न प्रतीतिव्याप्तत्वम्; बुभ ुत्साभावे तत्प्रतीतेरनुत्पत्तेः । न च बुभुत्साया अन्योन्याश्रयग्रस्ततया न हेतुत्वमिति वाच्यम्, नानाशब्दसंकीणर्वीणाशब्दश्रवणादौ बुभुत्साहेतुत्वस्य दर्शनादिति भावः । यदा प्रत्यक्षेण गृह्यत इति । प्रत्यक्षाग्राह्यत्वं हेतुविशे-षणमिति भावः । पक्षो हेतुश्चेति । प्रत्यक्षग्राह्यं ज्ञानं मानसग्राह्यम्, प्रत्यक्षग्राह्यत्वे सति क्षणिकात्मविशेषगुणत्वादिति वक्तव्यम्

स्यात् । न च तथोक्तम् । अत इयं विवक्षा न संमतेति भावः ।

स्वयम्प्रकाशत्वप्रयोगशिक्षणम्

तद्वयवहारहेतुत्वादिति । स चासौ व्यवहारस्तद्वयाहारः; न तु तस्य व्यवहार इति भ्रमितव्यम् । तथा हि सति द्वितीयहेतौ कृत्स्न-स्यापि प्रविष्टत्वाद्विभागो न स्यात् । न च धर्मश्च व्यवहारश्च धर्मव्यवहारौ, तौ च तौ धर्मव्यवहारौ च तद्धर्मव्यवहाराविति्युक्तावेव विभागात्, द्वितीयहेतौ न कृत्स्नानुप्रवेश इति वाच्यम्-तत्पदस्यैव धर्मपदस्थानीयत्वात् । अनुभूतिसामग्रीव्यतिरिक्तेति । न
चानुभूतित्वस्यानुभूतिव्यतिरिक्ततत्सामग्रीसापेक्षत्वेनान्याधीनत्वं स्यादिति वाच्यम् -
अनुभूतिसामग्रयैवानुभूतित्वस्याष्युत्पत्तावनु-भूतित्वस्यानुभूत्यन्याधीनत्वाभावात् ।
सत्यामष्यनुभूतावितरव्यतिरेकेणानुभूतित्वव्यतिरेके ह्यनुभूतित्वस्येतराधीनत्वम् । अनुभूति-
सामग्रीमात्रेणैवानूभूतित्वस्यापि सिद्धावितराधीनत्वाभावात् । अत एव ज्ञानसामग्रीमात्रजन्यस्य प्रामाण्यस्य स्वतस्त्वमिति भावः । यद्वा अनुभूतिसामग्रीव्यतिरिक्तेत्यस्य सजातीयान्तरानपेक्षत्वमित्यर्थः ।

अत्रेत्थं ह्यनुमानं प्रयोक्तव्यम्-अनुभूतिः स्ववश्यंभाविप्रकाष्टयजनने सजातीयापेक्षानियमशून्या, स्वसंबन्धादर्थान्तरे प्राकटयहेतु-त्वात्; यः स्वसंबन्धादर्थान्तरे प्राकट्यहेतुत्वात्; यः स्वसंबन्धादर्थान्तरे यद्धर्महेतुः स स्वस्मिन्नवश्यंभावितद्धर्म जनने सजातीया-पेक्षानियमशून्यः । एवं द्वितीयमप्यनुमानम् । यथा-तद्गेहं तदा मैत्राभाववत्, तदा मैत्रवत्तयानुपलभ्यमानत्वात्; यत् यदा यद्वत्तया नोपलभ्यते, तत् तदा तदभाववदिति सामान्यव्याप्तिवत्(प्तिः?) । ननु परत्र स्वोत्पाद्यधर्मस्य स्वधर्मत्वे कथमनूभूतेस्तद्वत्त्वं स्यत्? अनुभूतौ स्वोत्पाद्यपरगतधर्माभावादित्याशङ्कयाह - स्वसाध्यधर्मात्यन्तसजातीयेत्यर्थ इति । धमर्शब्दस्य परत्र स्वोत्पाद्यवर्म-परत्वे प्रमाणं दर्शयति- अर्थान्तरे तद्धर्महेतुत्वादिति हेतूक्तेरिति । अर्थान्तर इति हेतौ दर्शनात् साध्येऽपि परत्रेति वक्तव्यम् । धर्महेतुत्वादित्युक्तेऽनुभूतिहेतुकधर्म एवी ग्राह्यः । ततश्च यो धर्मो हेतौ निर्दिष्टः, स एव साध्यधर्मशब्देन ग्राह्यः; तस्यैव धर्मस्ये-हासंभवात् तत्सजातीयधर्मवत्त्वं साध्यमिति भावः । स्वस्मिन्नवश्यं भावीति । ननु प्राकट्यस्य नावश्यंभावित्वमनुभूतौ परप्रका-शवादिनां परेणाभ्युपेतम्, अभ्युपगमे त्वनवस्थ भीत्या स्वप्रकाशत्वस्यैवाभ्युपगन्तव्यत्वप्रसङ्गादिति चेत्-न; उत्पन्ने ज्ञाने संशया-द्यदर्शनेन प्राकट्यं स्वावश्यंभावी यभि(नु)मानेनदृशप्रयोगोपपत्तेः । परज्ञानस्यानुमेयत्वदर्शनाद्बाधप्रसङ्गादिति । इतरानपेक्षप्राक-ट्यपद्भावेऽपि परत्र

स्वोत्पाद्यधर्मसजातीयेषु सर्वेष्यपीतरापेक्षाभावस्यभावाद्बाधः स्यादिति भावः । नन्वीदृशानुमानवादिनो मते ज्ञानस्यानुमेयत्वानभ्युपगमात् कथमनूमेयत्वमादाय बाध धत्याशङ्कयाह - न हि ज्ञानान्तगगोचरत्वमिति । सजातीयानपेक्षो हेतुरनूभूतिरितीति । अनुभूतिरनन्याधीनव्यवहारेत्युक्ते हेतुहेतुमद्भावलक्षणसंबन्धेनानन्याधीनघटादिव्यवहारवत्त्वमनूभूतावस्तीति सिद्धसाधनमिति भावः । अनैकान्त्यं स्यादिति । हेतौ तच्छब्दाभावे स्वोत्पाद्यसजातीयधर्मस्यैवानन्याधीन्त्वमित्यर्थस्य साध्ये-ऽप्यलाभेन चाक्षुषत्वहातोः रूपस्य स्वावश्यंभाविद्वित्वादिजनने स्वात्यन्तसजातीयेरसापेक्षत्वात् व्यभिचार इत्यर्थः ।

ननु स्वसंबन्धः स्वनिरूप्य(षित)संबन्धः; ततश्च योऽग्निसंबन्धः न स स्वनिरूपितः । यद्यपि संबन्ध एकः, अथाष्यग्निनिरूपितः संबन्धो घटे,घटनिरूपितः संबन्धोऽग्नाविति व्यवहारानुसारेण स्वप्रतियोगिकत्ववेषेण स्वस्मिन् स्वसंबन्धस्य वृत्त्यभावात् । अत एव हि "न हि स्वयं स्वसंयुक्तः' इति व्यवहरन्ति । किं च रूपान्तरोत्पत्तावग्निसापेक्षत्वेपि स्वसजातीयघटानपेक्षणान्न व्यभिचार इत्यरुचेराह - किंचार्थान्तरशब्द इति । निर्दिष्टजातीयाद्विजातीयपर इति । आंवश्यक इति शेषः । न हि घटः स्वसंयुक्तत्वादा- विति । न च पटादौ घटसंयुतत्वमापादयतो घटस्य स्वस्य घटसंयुक्तत्वे घटान्तरापेक्षणात् पुनरपि व्यभिचार इति वाच्यम्, स्वाव-श्यंभाविपदेनैव तद्वारणात् । न हि घटजातीयस्य घटसंयुक्तत्वमवश्यंभावि । ननु-स्वसंबन्धादचेतने चेतनसंयुक्तत्वमापादयतश्चेत- नस्य स्वावश्यंभाविचेतनसंयुक्तत्वे सजातीयसापेक्षत्वदर्शनाद्वयविचारः तदवस्थ एव; तता चेतननियाम्यत्वमचेतने आपादयतः चेतनस्य स्वनियाम्यत्वे चेतनान्तरापेक्षणात् व्यभिचारश्च । न चावश्यंभाविपदेनैव तन्निरास इति वाच्यम्, परमात्मनोऽपि भक्त-नियाम्यत्वात् । तथा स्वसंबन्धेन क्षत्रिये शिष्यत्वमापादयति ब्राह्मणे स्वस्मिन् शिष्यत्वस्य ब्राह्मणान्तरसापेक्षत्वेन व्यभिचारः । न च ब्राह्मणानां शिष्यत्वं नावश्यंभावि, उपनयनात् प्रागपि मरणसंभवादिति वाच्यम्-दृष्टान्ते रूपादावपि चाक्षुषत्वं नावश्यंभा- वीति वक्तुं शक्यत्वात् । अनुभूतेरपि प्राकट्यं नावश्यंभावीति वक्तुं शक्यत्वाच्च । तस्मादप्रतिष्ठितमिदमनुमानमिति चेत् ।-

अत्र केचित्-यत् स्वव्यतिरिक्ते सर्वस्मिन् यद्वयवहारे प्रवृत्तिनिमिवम्, तत स्वस्मिन् तद्वयवहारे नेतरापेक्षमिति पर्यवसितोऽर्थः । ततश्चानुभूतिव्यतिरिक्ते सर्वत्र "अनुभूयते, प्रकाशते' इत्यादिव्यवहारे प्रवृविनिमित्तभूतानुभूतिः स्वस्याम् (स्मिन्?) "अनुभूयते, प्रकाशते' इत्यादिव्यवहारे नेतरापेक्षा सत्तावदिति सत्तास्थानीयानुभूतिरेकेत्यभि-मानवतामीदृशनुमानमित्याहुः ।

पुत्रे पुत्रत्वतद्वयवहारहेताविति । न च पुत्रस्यापि पितृत्वेनार्थान्तरपदेनैव तद्वारणमिति वाच्यम्-षण्डपुत्रस्य पितृत्वानधिकरण- स्यापि संभवादिति भावः । स्वसंबन्धतुल्यकालेति । स्वंसंबन्धतुल्यत्वं स्वसंबन्धानवारकालावृत्तित्वम् । ततश्च ज्ञानसंबन्धानन्त-रोत्पन्नप्राकट्येपि तदस्तीति बोध्यम् । न हि पित्रादिप्रवासनिधनयोरिति । ननु प्रवासनिधनयोरपि जन्यजनकभावः संबन्धो- ऽस्त्येव, तपायेऽपि पितृषुत्रत्वयोरनपायात् । प्रोषिते प्रेते च संयोगः परं नास्ति । तादृशसंयोगाभाव एकग्रामगतेऽप्यस्त्येवेति प्रवा-सनिधनोपन्यासो व्यर्थ एवेति चेत्-न; पञ्चाग्निविद्योक्तप्रकारेण चरमधात्वादिरूपस्य पुत्रस्य पितुश्च यः संबन्धः स पुत्रत्वोत्पादकः ।"रेतःसिभ्योगोऽथ' इति सूत्रोक्तस्तु नातिचिरस्थायी । अत एव, "पितुरुत्पादनक्रिया उत्पत्तिक्षण एवोत्पाद्यसंबन्धकरी, नान्यदा' इत्युक्तं नयविवेक इति भावः ।

उक्तमर्थं संकलय्य दर्शयति-एतदुक्तं भवतीति ।अनुभूतिः स्वजन्यपरगतधर्मात्यन्तसजातीयधर्मभाक्तवे स्वात्यन्तसजाती-पापेक्षानियमरहितेति । अनुभूतिरपेक्षारहितेत्युक्ते स्वरूपस्य करणसापेक्षत्वेन बाधः स्यात्; तत्परिहारार्थं धर्मभक्तव इत्युक्तम् । तथात्वे रूपस्य चक्षुषत्वे चक्षुराद्यपेक्षत्वेन साध्यविकलता स्यात्; तत्परिहारार्थं सजातीयापेक्षारहितेत्युक्तम् । तथापि चक्षुरादीनां सत्ताजात्या सजातीयत्वेन साध्यवैकल्यं तदवस्थमित्यत उक्तम् अत्यन्तसजातीयेति । तथापि परज्ञानस्य ज्ञानान्तरसापेक्षव्यव-हारानुगुण्यतया अंशे बाधः स्यादित्यत उक्तम् अपेक्षानियमरहितेति । तथाष्यनुभूतित्वस्यानुभूत्यन्तरानपेक्षतया तेन सिद्धासा- ध्यता स्यादिति तत्परिहारार्थं

परगतेत्युक्तम् । परगतधर्मस्यानुभूतिनिष्ठत्वाभावाद् बाधः स्यादिति परगतधर्मसजातीयेत्युक्तम् । परगतधर्मसजातीयधर्मभाक्तवेऽयन्तसजातीयानपेक्षत्वेन सिद्धसाध्यता स्यात्; तत्परिहाराय स्वजन्येति विशेषणम् । स्वविजातीये स्वावश्यं भाविधर्मसजातीयस्वसंबन्धतुल्यकालधर्महेतुत्वादिति । धर्महेतुवादित्युक्ते घटादिभिरनैकान्त्यं स्यात्, तेषां स्व-पाकजरूपहेतुत्वात् । परेत्युक्तेऽपि द्रव्यान्तरे संयुक्तत्वजनके, स्वस्य संयुक्तत्वे द्रव्यान्तरसापेक्षे द्रव्ये व्यभिचारः स्यादित्यत उक्तं स्वविजातीयेति । तथापि सिद्धान्तिमते विजातीये शरीरे शरीरत्वमापादयति स्वस्य शरीरत्वे स्वसजातीयपरमात्मसापेक्षे चेतने व्यभिचारः स्यात्; तत्परिहाराय स्वाश्यंभावीति । अनेन स्वसजातीयव्यापकत्वमभिप्रेतम् । तथापि पुत्रगतपुत्रत्वहेतौ स्वस्य पुत्र- त्वे पित्रन्तरसापीे पितरि, काष्ठद्वैधीभावहेतौ स्वस्य द्वैधीभावे परश्चन्तरसापेक्षे परशौ व्यभिचारः स्यात्; अतः स्वसंबन्धतुल्य- कालेति च विशेषणम् । अनुमानान्तरे चैवमेव पदप्रयोजनं द्रष्टव्यम् । "अनुभूतिरिति व्यवहारे चेत्यर्थः ' इत्ययं ग्रन्थः लेख-कस्खलनकृतः, परत्र "प्रकाशते' इति व्यवहारस्यैवोत्पाद्यत्वेन अनुभूतिः' इति व्यवहारस्यानुत्पद्यत्वादिति द्रष्टव्यम् । सोपाधि-कमिति । संबन्धविशेष एवोपाधिरित्यर्थः । निरासको हीति । दीपस्य हि स्वप्रकाशत्वं स्वीयतमोनिरासकत्वं वा स्यात्, स्व-विषयज्ञानात्पादकत्वरूपं वा स्यात् । ज्ञानस्य स्वप्रकाशत्वं च स्वविषयव्यवहारोत्पादकत्वमेव । अत्र न क्कापि विरोधं पश्याम इति भावः । यदि हि स्वस्यैव कार्यत्वं कर्तृत्वं च स्यात्, तदा हि परं विरोधः । स्वविषयव्यवहारो वा, स्वविषयज्ञानं वा, स्व-संबन्धितमोनिरासो वोत्पाद्यः, स्वयं च कर्तेत्युक्तौ हि को विरोधः? तत्र चाकारान्तरेण चेदिति । तत्राष्याकारान्तरं चेत्, अवि- रोध एव । तथा(?) "तदात्मानं स्वयमकुरुत' इत्यादौ स्थूलचिदचिद्विशिष्टरूपेण कर्मत्वं सूक्ष्मचिदाचिद्विशिष्टवेषेण कर्तृत्व-मित्यस्यार्थस्य दर्शनादिति भावः । अज्ञातस्यैव ज्ञानस्येति । अनवभासमानस्यैवेत्यर्थः । "तस्मादवभासमानस्यैव' इत्युप-संहारग्रन्थानुसारादिति द्रष्टव्यम् । ज्ञानकर्मतापूवर्कत्वविरहः प्रसज्यते चेदिति । ज्ञानं प्रति कर्मकारकत्वपूर्वत्वनियमाभङ्ग इष्ट इति भावः । न च तद्वयवहारस्तत्कर्मकज्ञानपूर्वक इति निय आवश्यकः, अन्यथा अन्यज्ञानादन्यस्य व्यवहारप्रसङ्ग इति वाच्यम्- व्यवहारो ज्ञानपूर्वक इत्येव सामान्यव्याप्तिः; जडस्थलेऽतिप्रसङ्गभङ्गाय तद्विषयज्ञानस्य तद्विषयव्यवहारहेतुत्वमिति नियामकान्तरमपि कल्प्यते; न ज्ञानस्थलेऽपीति भावः ।

सेयं स्वयंप्रकाशानुभूतिरित्यत्र तच्छब्देन सैव सतीत्युक्तं, सदैक्यं परामृश्यते, इदंशब्देन प्राकट्यानुमाननिराकरणसिद्धं प्रमौ-णान्तराविषयत्वं परामृश्यत इति व्याचष्टे-सेयमिति । सदैक्यपरामर्शस्य वक्ष्यमाणानुपयुक्तत्वादन्यथा व्याचष्टे-यद्वा स्वयं प्रका-शत्वेति । द्वितीयः कल्पो ग्राह्याभावाद्दूषित इति । अनुमित्यादौ ग्राह्यस्यावारणत्वेन तदभावेन दूषणासंभवादिति भावः । अतो भावरूपविकारेति । नाशस्तु न भावरूपो विकारः तस्याभावरूपत्वादिति भावः । ननु भावरूपविकारराहित्वे साध्ये अनुभूतेर्नाशराहित्यं न सिध्यतीत्यस्वरसादाह - यद्वा भावस्य विकार इतीति । भावत्वे सत्यनुत्पन्नत्वं विकारान्ताराभावे प्रयोजकमिति फलितमिति । यद्यष्युत्पत्त्यभावात् भावस्य विकारा न सन्तीत्युक्तेऽनुत्पन्नत्वविशेषणत्वम् । तावतापि प्रागभावे व्यभिचारवारणासंभवाच्च । प्रागभावस्याभावरूपतया भावसंबन्धिविकाराभावात् -तथापि भावविकारित्वाभावस्य विशिष्टा-

भावस्य विकारित्वरूपविशेष्याभावपर्यवसानार्थं भावत्वे सत्यनुत्पन्नत्वादित्यनुमानान्तरमावश्यकमित्यभिप्रेत्यैतदुक्तमिति ध्येयम् ।

अनुभूतेर्नित्यत्वादिसमर्थनम्

व्यापकजन्मनिवृत्त्येति । नानात्वनिवृत्त्यैव जन्मनिवृत्तेरुक्तत्वादिति भावः । अत्र व्याप्तिग्रहस्थलाभावश्चाधिकदूषणं द्रष्टव्यम् । यथावस्थितान्वयेऽपि पर्यवसानबलाद्व्यापकत्वसिद्धिं दर्शयति - यद्वा यथेति । अनुभूतिर्न व्यावृत्तिरूपधर्मभागिति । इदमनु-मानद्वयं नित्यत्वादिधर्मराहित्यरूपद्वितीयपक्षानुमानयोरष्युपलक्षणं द्रष्टव्यम् । "यतो निर्धूतनिखिल' इत्यस्य ज्ञात्रसद्भावसमर्थन-मुखेन संविदात्मत्वहेत्वं स्वरसतः प्रतीयत इत्यभिप्रेत्य व्याचष्टे-सकलभेदनिषेधेनेति । निर्धूतनिखिलभेदत्वस्यात्मत्वेऽद्वारकहेतु-संभवमभिप्रेत्य व्याचष्टे-यद्वा वेदान्तैरात्मन इति

। "आश्रयो ज्ञाता' इत्यनयोः पौनरुक्त्यमाशङ्क्य ज्ञातृशब्दविवरणरूपत्वान्न पौनरुक्त्यमित्यभिप्रेत्याह- स्वरूपातिरिक्त आश्रयो हीति । तर्हि ज्ञात्रभावस्य को हेतुरित्याशङ्कायां स्वरूपातिरिक्तपदेन ज्ञात्र- भावे हेतुरुक्त इति दशर्यति-संवित्स्वरूपातिरिक्तत्वादेवेति । "स्वप्रकाशरूपा सैषात्मा' इति भाष्यप्रथमव्याख्यायामजडत्वा- च्चेति भाष्यस्य पौनरुक्त्यं परहरति-स्वयंप्रकाशत्वं स्वतन्त्रसाधकं चेत्याहेति । पूर्वं संविदात्मनोः स्वयंप्रकाशत्वस्य प्रमाण-सिद्धत्वात्, स्वयंप्रकाशस्य प्रागभावाद्यभावेनानुत्पन्नत्वात्, अनुत्पन्नस्य च नानात्वायोगात्, संविदात्मनोर्न भेद इति नाना-त्वाभावसाधनद्वारा संविदात्मत्वसाधकत्वं स्वयंप्रकाशत्वस्योक्तम्; इदानीं व्याप्तिबलेन संविदात्मत्वसाधकत्वमुच्यत इति भावः । कर्तरिक्त इति । आप्नोतेर्गत्यर्थकत्वात्, अकमर्कत्वविवक्षया वा, "गत्यर्थाकर्मक' इति कर्तरिक्त इति भावः ।

आत्मनो ज्ञातृत्वाभावसमर्थनम्

ननु "अहं जानामि' इत्यहमर्थे ज्ञातृत्वस्य प्रत्यक्षसिद्धत्वेपि नात्मनो ज्ञातृत्वं प्रत्यक्षसिद्धमित्याशङ्क्याह - आत्मनोऽहंप्रत्यय-गोचरत्वस्य स्वानुभवप्रत्यक्षसिद्धत्वेनेति । यद्वा ज्ञातृत्वे प्रतीयमान इति । अंशवाचिना शकलशब्देनायमर्थः स्मार्यत इति भावः । ज्ञातृत्वं हीति भाष्यं पूर्वोक्तहेतोरसिद्धिशङ्कापरिहारपरमित्यभिप्रायेण कर्तृत्वायोगमुपपादयति-ज्ञातृत्वं हीति । अस्मिन् व्याख्याने स्वात्मशब्दस्वारस्याभावात् उपपादनसापेक्षकर्तृत्वायोगं हेतुमभिधाय तदुपपादनात्पूवर्मेव, ततः किमिति शङ्कापरहि ारानौचित्याच्चान्यथा व्याचष्टे-यद्वा ज्ञातृत्वं नामेत्यदिना ।स्वरूपभूतज्ञानाश्रयत्वविवक्षायां कर्तृत्वशब्दः कथं घटत इत्याशङ्क्याह - कर्तृत्वमाश्रयत्वमिति । स्वात्मनि कर्तृत्वायोगहेतोरुपपादननिरपेक्षत्वेपि विकल्पितशिरोन्तरनिराकरणात् प्राक्,ततः किमिति शङ्कापरिहारस्यानुचितत्वात्, "अतो मनुष्योऽहम्' इत्यादिभाष्यं हेत्वन्तरपरतया व्याचष्टे-ज्ञातृत्वं भ्रान्तपुरु- षेति । अस्मिन् पक्षे अतः- शब्दस्य पूर्वोक्तपरामर्शिनो न स्वारस्यमिति द्रष्टव्यम् । जडत्वविक्रियात्मकत्वसाम्यादिति । जडत्व-विकारित्वसाम्यादित्यर्थः । विकारिद्रव्याहंकारेति, अविक्रियेति, साक्षिणि चेति भाष्ये दर्शनात् । अन्यथा विक्रियाद्रव्याहं- कारेति, अविक्रियायां साक्षिणीति च भाषणीयं स्यात् । न च ज्ञातृत्वस्य विकाररूपस्य कथं विकारित्वमिति वाच्यम्, विका-रत्वविकारित्वयोरविरोधात् । यद्यष्याश्रयाश्रयिभावे साम्यमप्रयोजकम्, द्रव्यगुणजातिव्यक्तयादौ तथाऽभावात् । तथापि जडं जडशश्रितमेव दृष्टम्; विकारि च विकार्याश्रितमेव दृष्टमिति भावः । केचित्तु, "विकारिद्रव्याहंकारग्रन्थिस्थमविक्रिये साक्षिणि' इति भाष्यपर्यालोचनायाम्, निविर्कारे विकारस्यावस्थानं न संभवतीत्येव प्रतीयते; न समयोरेवाश्रयाश्रयिभाव सति मन्यन्ते ।"नाह खल्बयमेवं संप्रत्यात्मानं ज्ञानात्ययमहमस्मीति; नो एवेमानि भूतानि' इति सुषुप्तिविषयिणी श्रुतिः । अयं सुषुप्तः, "अय-महमस्मि' इत्येवं न जानाति खल्वित्यर्थः ।

शरीरप्रतिबन्द्या निरस्तेति । शरीरस्य कर्तृत्वेऽप्यात्मनो भोक्तत्वदर्शनादिति भावः । वस्तुतस्तु भोक्तृत्वमप्यात्मनो नास्त्येव । नन्वेवं संसारमोक्षयोर्वैयधिकरण्यप्रसङ्गः, मोक्षस्य चिन्मात्रगतत्वात्, बन्धस्य कर्तृत्वादिरूपस्यान्तःकरणगतत्वादिति चेत्-न; कर्तृत्वभोक्तृत्वादिविशिष्टान्तःकरणाध्यासाधिष्ठानभाव एव चिन्मात्रगतः संसार इत्यभ्युपगमेन दोषाभावात् । "अहंप्रत्ययगोचरात्' इति भाष्यं दृष्टान्ते शरीरेऽनात्मत्वासिद्धिशङ्काया अतिमन्दत्वादपरितुष्यन्नाह - यद्वा अप्रामाणिकाहंप्रत्ययगोचरत्वेन हीति । अस्मिन् पक्षे "प्रमाणिकानां प्रसिद्धमेव' इति भाष्यस्थ एवकारो यथाशब्दार्थः । अथवा तथाशब्दबलात् यथाशब्दोऽध्याहर्तव्यः । अस्मिन् पक्षे "अहंप्रत्ययगोचरात्' इति भाष्यस्थप्रत्ययापदस्य भ्रान्तिरर्थ इति द्रष्टव्यम् । केचित्तु - "ज्ञातुरपि विलक्षणत्वेन प्रमा-णसिद्धत्वात्तथाभ्युपगन्तव्यमित्यर्थः' इत्यस्यानन्तरं यद्वेति पदं कोशेषु दृश्यते । न तस्य सम्यवत्वं पश्यामः; "अप्रामाणिकाहं-प्रत्ययगोचर' ति ग्रन्थस्य तथाहमर्थादिति भाष्यगतस्याहमर्थादिति

पदस्यावतारिकारूपत्वस्यैव युक्तत्वात् । ततश्चार्हप्रत्ययगोच-रादिति प्रतीकग्रहणमपि न युक्तम् । अहमर्थादित्येव प्रतीकग्रहणं युक्तम् । न चैतत्पूर्वग्रन्थस्थस्या अहंप्रत्ययगोचरादित्यस्य ग्रहणं

युक्तम्, देहातिरिक्तत्वसमर्थनपरे तस्मिन् वाक्ये देवातिरिक्तत्वं सिद्धवत्कृत्य शङ्कया अनुथितेरितयाहुः ।

ज्ञातृरष्यात्मानं प्रमाण-बाधितं चेदिति । प्रामाणिकाहंप्रत्ययगोचरस्यापीति शेषः । "अविक्रिये साक्षिणि' इत्यादिना पूर्वमात्मनि ज्ञातृत्वासंभवस्योक्त- त्वात्, उत्तरत्र तत्कृतोऽयं जानाम्यहमिति भ्रमः' इत्यत्मनि ज्ञातृत्वभ्रमोपपत्तेर्वक्ष्यमाणत्वाच्च पूर्वापरनुगुण्येनात्मनि ज्ञातृत्वाव-

भासनोपपादनपरतया, "एवमविक्रियानुभवस्वरूपस्यैव' इत्यादि भाष्यं व्याचष्टे-अविक्रियात्मन इति । स्ववराक्यस्वारस्यानु-रोधेनान्यथा व्याचष्टे-यद्वा ज्ञातृत्वमिति ।

एवं ज्ञातृत्वस्यापारमार्थिकत्वमुक्तमिति । "यतोऽहं जानामि' इति भाष्यस्या, अहमर्थस्यैव ज्ञातृतया चिन्मात्रात्मनो यतो ज्ञातृ- त्वं न पारमार्थिको धर्म इत्यर्थ इति भावः । विशेष्यपर इत्यपौनरुक्तयमिति । धर्मिस्वरूपपर इत्यर्थः । भ्रान्त्या विवर्तत इति कथं निर्देशः? भ्रान्त्या प्रतीयत इति हि विवर्तशब्दार्थः । ततश्च पौनरुक्तयमित्याशङ्क्याह - करिकळभवन्निर्देश इति । "कपोले जान-क्याः करिकलभदन्तद्युतिमुषि' इतिवदिति भावः ।

महासिद्धान्तः

प्रतिजानाति-तदिदमितीति । वक्तुमुत्कण्ठत इत्यर्थः । "संप्रतिभ्यामनाध्याने' इत्याध्याने प्रतिषेधादात्मनेपदं न भवति । आध्या-नमुत्कण्ठा । अत्र च प्रतिपूर्वस्य जानातेरुत्कण्ठार्थत्वस्य विवक्षितत्वात् । प्रतिजानीते । इति पाठः सुगम एव । केचित्तु, "परम-पुरुषशब्देनोपेयम्' इत्यादिग्रन्थे "प्रतिजानाति' इति पाठो युक्तः, अर्थौचत्यात्; तत्र परमपुरुषादिशब्दैः स्मरणमात्रस्य युक्तत्वात् । इह तु, "प्रतिजानीते' इत्येव युक्तम् । लेखकदोषवशादिदं व्यत्यस्तमिति वदन्ति । प्रमाणप्रमेयविशेषसंबन्ध इति । प्रमाणविशेष उपनिषत्; प्रमेयविशेषः परमपुरुषः; तयोः प्रतिपाद्यप्रतिपादकभावः संबन्धः "तं त्वौपनिषदं पुरुषम्' इति श्रुत्यैव स्पष्टीकृत इत्यर्थः । अत्र भक्तया शुद्धभावं गत इति । न च "भक्तया शास्त्राद्वेह्मि' इत्येवान्वयोऽस्तु, न तु "भक्तया शुद्धभावं गतः' इति भक्तेर्भावशुद्धि-हेतुतयेति वाच्यम्-शास्त्रादित्यनेनैव हेत्वाकाङ्क्षाशान्त्या तत्र भक्तेर्हेतुत्वेनानन्वयात्;

भावशुद्धेर्हेतुसाकाङ्क्षत्वाच्च "भक्तया शुद्धभावं गतः' इत्येवान्वय इति भावः ।
अनादिपापवसनेत्यादिकमौपनिषदेत्यादिपूर्वविशेषणहेतुत्वेन व्याख्यायेदानीं कार्यत्वेन व्याचष्टे-यद्वा सम्यग्ज्ञानेति । दुनिर्रासत्वमिति । दुःखेन निरासो यस्येति बहुव्रीहिः । दुनिर्रसत्वमिति पाठः सुगम एव । यद्वा तत्तद्द्वाद्यभि-मतेति । अयं भावः-सकलाभिमतं प्रमाणं सकलप्रमाणम्; येन येन यदभिमतं तत् सर्वमित्यर्थः । अत एव भाष्ये वक्ष्यति- "प्रमाण-संख्याविवादेऽपि सर्वाभ्युपगतप्रमाणानामयमेव विषयः' इति । प्रत्यक्षादि च सकलप्रमाणं चेति द्वन्द्वः । न तु कर्मधारय इति भ्रमि-तव्यम्; तथोत्वेऽर्थापत्त्याद्यसंग्रहापत्तेः । आदिशब्दादनुमानमिति प्रागुक्तेः । यद्वा आदिपदेनासंकोचेनार्थापत्त्यादिप्रमाणान्तर- स्यापि परिग्रहार्थः सकलशब्द इति ।

प्रमाणानां सविशेषयत्वम्

तद्वयावृत्त्यर्थमिदंशब्दः इति । ृङ्गग्राहिकया संप्रतिपन्नं किंचिन्निर्दिश्य, इदं प्रमाणमिति न शक्यते दर्शयितुमिति भावः । एक-वचनानुसारेणान्यथा व्याचष्टे-यद्वा न काचिदपीति । अत्र केचित् - यद्वेति पदं लेखकस्खलनकृतम्, तद्राहित्येनैव ग्रन्थस्वारस्य-मस्तीति मन्यन्ते । गन्धोऽनुभूयत इति । अनुभूतेर्विशेषणत्वेन भानात्

सर्वस्याप्यर्थस्यानुभूतिरूपविशेषणविशिष्टत्मेव, न निर्विशेषत्वमित्यर्थः । ननु "यस्तु स्वानुभवः प्रमाणत्वेनोपन्यस्तः' इत्येवं तुशब्देन स्वानुभवलक्षणप्रमाणविशेषे प्रदर्शनीये तुशब्देन समयविशेषप्रदर्शनमसंगतमित्याशङ्कय समयवैषम्यप्रदर्शनस्यापि मूलभूतस्वानुभवलक्षरप्रमाणवैषम्यप्रदर्शनपर्यवसन्नत्वान्न दोष इत्याह - तुशब्देन समयं

विशिंषन्निति । ननु विशिष्टो विषयः स्वयमेव चेत्, विशिष्टो विषयो यस्येति बहुव्रीहिनिर्देशः कथमित्या-शङ्कयाह - शिलापुत्रकस्य शरीरमितिवदयं निर्देश इति । स्वानुभवसिद्धमित्यनेनैकार्थ्यादिति । अनुभवान्तरव्युदासपरग्रन्थै-कार्थ्यादौपचारिकत्वस्यैव वक्तुं युक्तत्वादित्यर्थः । ननु स्वानुभवशब्दस्याष्यनुव्यवसायरूपज्ञानान्तरपरत्वसंभवत् कथं तदैका-र्थ्येनोक्तार्थपरत्वनिश्चय इत्यत्राह - न चानुभवशब्दोऽनुव्यवसायपर इत्यादिना । अतीतविषयतयेति । वर्तमानज्ञानस्य स्वप्रका-शतया अनुव्यवसायस्य वर्तमानविषयत्वासंभवेनातीतविषयत्वनियमादतीतविषयकस्य प्रत्यक्षत्वानुपपत्तेरित्यर्थः । प्रमुषितसंस्का-रमिति । अनुद्बुद्धसंस्कारमित्यर्थः । अन्यदिति । उद्बुद्धसंस्कारमित्यर्थः । न च घटानुभवसंस्कारात् घटस्यैव स्मृतिविषयत्वम्, न घटज्ञानस्येति वाच्यम्-तस्य स्वप्रकाशतया तज्जन्यस्मृतेरेवानुभवस्मृतित्वोपपत्तेः । नन्वनुमितिसामग्री स्मृतिसामग्र्यपेक्षया बल- वती । अनुमित्मासत्त्वे तु ततस्तराम् । ततश्चाप्रमुषितसंस्कारस्यापि ज्ञानस्यानुमिति विषयत्वं संभवत्येवेतिचेत्-न; "स्वानुभव-प्रत्यक्षसिद्धम्' इति तद्गोष्ठीसमयस्य तथाष्यनिर्वाहादित्याशयात् । परोक्षत्वं विषयद्वारेति । अनुमित्यादिज्ञानस्यापि स्ववृत्ति-वर्तमानस्य सर्वस्यापरोक्षत्वादिति भावः । पक्षाविशिष्टो हेतुः स्यादिति । पक्षाभिन्नो हेतुः स्यादित्यर्थः । ततश्च स्वरूपासिद्धो हेतुः स्यादिति भावः । पक्षव्यापको हि हेतुरिति । पक्षवृत्तिर्हेतुरित्यर्थः । किंचान्यस्येति । स्वसंबन्धादर्थान्तरे तद्व्यवहारहेतोरेव स्वव्यावृत्तिरूपत्वादिति भावः । व्यधिकरणासिद्धीति । स्वरूपासिद्धीत्यर्थः । ततश्च "स्वासाधारणैः' इत्यनेन स्ववृत्तित्वे सति व्याप्यत्वमिति सिध्यति । ततश्च सत्तातिरेकित्वं स्वासाधारणत्वोपयुक्तमित्यत्र तात्पर्यम् । अतो न "सत्तारिरेकिभिः' इत्यस्य वेैयर्थ्यं शङ्कनीयम् । धीत्वस्वप्रकाशत्वे सिध्यत इत्यर्थ इति । धीत्वे साधिते तेन स्वप्रकाशत्वं सिध्यतीत्यर्थः । ननु धीत्वं स्वप्रकाशता च ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेरिति भाष्ये धीत्वस्वप्रकाशत्वयोः साक्षात् साधिका (स्व)विषयप्रकाशनतयोपलब्धिरिति प्रतीयते । तस्याधीत्वसाधकत्वं धीत्वस्य च स्वप्रकाशतासाधकत्वमिति व्याख्याने भाष्यस्वारस्यं नास्तीत्यपरितोषादन्यथा व्याचष्टे-यद्वा धीत्वं धीस्वरूपमात्रमिति । धीस्वरूपं तस्य स्वप्रकाशत्वं च विषयप्रकाशनस्वभावतयोपलब्धेः सिद्धमिति भाष्यार्थ इत्युक्तं भवति । आत्मस्फुरणमिति ।आत्मस्वरूपस्फुरणमित्यर्थः । भाष्ये-स्वाभिमततद्विदाभेदैश्चेति । "अनुत्पन्नत्वान्नित्यत्वम्; नित्य-त्वादात्मनो नानात्वमपि न सहते' इत्येवं परेण साधनादिति भावः । पूर्वं सविशेषत्वनिरासकहेतुभिः सविशेषत्वमुक्तमिति । "अतः कैश्चिद्विशेषैर्विशिष्टस्य' इति भाष्येणेत्यर्थः । ततः कतिपयेति । "ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेः' इति भाष्येणेत्यर्थः । केचित्तु-"स्वाभिमततद्विधाभेदैः' इति भाष्येणेत्यर्थः सति व्याचक्षते ।

शब्दप्रत्यक्षयोः सविशेषविषयत्वम्

स्वप्रकाशवृवि निरूप्येति । पूर्वस्मिन् पक्षे स्वप्रकाशवृत्तिः प्रतिज्ञातसर्वप्रमाणसविशेषविषयत्वाननुप्रविष्टा; द्वितीयपक्षे तु सापि तत्र निवेशितेति विवेकः । अन्तरङ्गत्वेनोभयवादिसंमतस्येति । पूर्वस्मिन् पक्षे परोक्तं बलीयस्त्वं न सिद्धान्तिसंमतम्; सिसि-द्धान्तिसंमतः सविशेषवस्तूबोधकत्वातिशयो न परसंमतः । अस्मिन् पक्षे अन्तरङ्गत्वाकार उभयसंमतः इति विवेकः । ननु निर्विशेषशब्देनेति । "निर्वशेषं वस्तु नास्ति' इत्यत्र निविर्शेषशब्देनेत्यर्थः । निषेधोऽनुपपन्न इति । प्रतीतेः सर्वस्या अपि प्रमारूपत्वादित्यभिमानः । भ्रान्तिप्रमितिविभागादिति प्रमितिविषयनिषेधे हि दोषः, न भ्रान्तिविषयनिषेधे इति भावः । निर्विशेषशब्दजनितेति । प्रमाणाभावसप्रसक्ता भ्रन्ति "निर्विशेषं नास्ति' इति प्रमाणेन बाध्यत इत्यर्थः । भ्रान्तित्वे हेतुमाह-मिथोऽन्वयानर्हार्थगोचरेति । परस्परानन्वितार्थान्वयविषयत्वमेव भ्रान्तित्वमिति भावः । केचित्तु-ननु निर्विशेषशब्देन निर्वि- शेषं वस्त्विति ग्रन्थमन्यथा व्याचक्षते-"न निर्विशेषवस्तुनि शब्दः प्रमाणम्' इति भाष्यवाक्यस्थनिर्विशेषशब्देनेत्यर्थ इति । अस्मिन् पक्षे निर्विशेषवस्तुनः शब्देन प्रतिपादने निषेधोऽनुपपन्न इति ग्रन्थः स्वरस्यः । तथा, नैवम्, भ्रन्तिप्रमितिविभा- गात् । निर्विशेषशब्दजनिता मिथोऽन्वयानर्हार्थगाचरा भ्रान्तिः प्रमितिजनकैः शब्दैः इत्यस्यायमर्थः-निर्विशेषशब्दजनित

परम्परन्वयायोग्यधर्मधर्मिविषयकनिर्विशेषशाब्दत्वभ्रान्तिः "निविर्शेषं न शाब्दम्' इति शब्दप्रमाणकत्वाभावप्रमितिजनकैः शब्दैर्बाध्यते, भ्रान्तित्वेन माष्यते । भ्रमत्वबुद्धिर्हि बाध इति । अधिकरणतदसाधारणेति । अधिकरणत्वतः अधिकरणासा-धारणनिषेध्यप्रतिपक्षात् धर्मतश्चेत्यर्थः । विशेषाभावाधिकरणस्य निर्विशेषशब्दार्थस्य ब्रह्मणः परेणाष्यङ्गीकृतत्वादधिकरणशब्दो भावप्रधान एव । तदसाधारणभूतो निषेध्यप्रतिपक्षधर्मः तदसाधारणनिषध्प्रतिपक्षधर्मः । अधिकरणालणान्निषेधकशब्दस्यानन्वय एव स्यादिति । विशेषाभावाधिकरणत्वरूपनिर्विशेषशब्दप्रवृत्तिनिमित्ताभावे निर्विशेषशब्दस्यापार्थकत्वमेव स्यादित्यर्थः । दूषणान्तरमाह - न हि निर्विभक्तिक इति । ततश्च विभक्तयर्थसंख्यान्वयोऽपि स्यादिति भावः । पदान्तरानन्वित इति । ततश्च निर्विशेषयं वस्त्वस्ति' इत्युक्ते वस्तुत्वास्तित्वान्वयावश्यंभाव इति भावः । अन्यपदार्थाभिधानमिति । "अनेकमन्यपदार्थे' इत्यनुशासनादन्यस्वरूपार्थाभिधानमवर्जनीयमिति भावः । इदमुपलक्षणम् । मत्वर्थे बहुेव्रीहेरनुशिष्टत्वात् मत्वर्थात्मकसंबन्ध-रूपविशेषाभिधानमवर्जनीयमित्यपि द्रष्टव्यम् । तत्पुरुषपदप्रयोगं चेति । "निर्गतो विशेषत्' इत्येवं "निरादयः क्रान्ताद्यर्थे पञ्च- म्या' इति समानेन निर्गमनक्रियाश्रयत्वस्य प्रतीत्यवश्यंभावादिति भावः ।

निर्विकल्पकसविकल्पकनिरूपणम्

निर्विकल्पकानुभूतार्थस्येति । सविकल्पकानुभूयमानार्थप्रतिसंधानहेतुत्वेन निर्विकल्पकस्य निरूपणीयतया तस्य सविकल्पक-ज्ञानसाध्यत्वात् सविकल्पकं प्रथमं निरूपितमिति भावः । पश्चादुद्दिष्टस्य सविकल्पकस्य बुद्धिस्थत्वं चकारात् समुच्चीयत इत्यपि द्रष्टव्यम् । सविकल्पकस्वरूपं प्रदर्शितमिति । पश्चादुद्दिष्टमपि प्रागिति शेषः । कल्पनामपि व्युदस्यति-त्रिकोणेति इति ग्रन्था-नन्तरम्, "यद्वा अनुपपत्तिं व्युदस्यति-त्रिकोणेति' इति पाठः सुगमः । अध्याहृतशङ्कावाक्येन ग्रहणायोगादिति पञ्चम्या अन्वय

इति । सर्वविशेषवियुक्तस्य ग्रहणं कल्प्यमिति शङ्कावाक्यप्राप्तप्रतिक्षेपकत्वेनेतेयर्थः । कस्यचिदपि पदार्थस्य ग्रहणायोगान्न सव-र्विशेषवियुक्तस्य ग्रहणं कल्प्यमित्यध्याहृतकल्प्यपदेनान्वय इति भावः । तमेवान्वयं दर्शयति-दृष्टव्याप्तीत्यादिना । प्रथम-द्वितीयपिण्डयोरिति । प्रथमद्वितीयपिण्डग्रहणयोरिर्थः । गोत्वानुवृविप्रतीत्यप्रतीत्योरिति । चक्षुषा पृथिवीग्रहणेऽपि न गन्ध-ग्रहणम्, गन्धस्य चक्षुरयोग्यत्वात्; इह तु न तथेति भावः । अपृथविसद्धत्वेन तन्नास्तीति परिहरतीति । "संस्थानेन विना संस्थानिनः प्रतीत्यभावात्' इत्यस्य भाष्यस्य संस्थानेन विना संस्थानिनोऽभावादित्येवार्थः । प्रतीत्यभावकथनं तदुपपादनायेति भावः । संस्थानरूपशब्देनाभिप्रेतोऽर्थ इति । अपृथक्सिद्धत्वमेव संस्थानशब्देनाभिप्रेतमिति भावः । यद्वा "इत्थम्' इत्यनेन विवृतो भवतीति योजनां । प्रकारप्रकारिभावेन ग्रहणोपपत्तेरिति । जातिव्यक्तिमात्रयोरिति शेषः । जात्यादयो विशेष्यं चेति । अत्र विशेषणमात्रमेव गृह्यते, न विशेष्यमिति कश्चित् पक्षः । विशेषणवत् विशेष्यं च गृह्यते एव; वैशिष्टयमात्रं न गृह्यत इत्य- परः । ननु विशेषणविशेष्यभावस्य सप्रतियोगिकत्वादिति । दण्डविशिष्यज्ञाते दण्डे पुरुषप्रतियोगिकविशेषणत्वं भासते; पुरुषे च दण्डप्रतियोगिकविशेष्यत्वम् । ततश्च विशिष्टज्ञानविषयाभूतस्य विशेषणविशेष्यभावस्य सप्रतियोगिकत्वात् तज्ज्ञानं पूर्वमपेक्षितमिति भावः । न च निर्विकल्पकवादिना विशेषणज्ञानस्यैव हेतुत्वमभिप्रेतम्; न विशेष्यमानस्यहति वाच्यम्; अस्य मतान्तरत्वेनादोषात् । तस्यापि स्वभावस्य स्वविशेष्यभूतमिति । जात्यादेर्विशेषरत्वस्वभावलक्षणविशेषणत्ववैशिष्टयं न प्रथ-मतोऽवगतम्, येन प्रथमतो विशिष्टप्रतीत्यभ्युपगमः स्यादिति भावः । विशेषणत्वं न प्रथममिति विशेषणत्ववैशिष्टयमित्यर्थः । किंतु स्वरूपमात्रमिति चेदिति । परस्परावशिष्टानि व्यक्तिजातितद्विशेषणत्वानि प्रतिपन्नानीत्यर्थः । तावतापि विशेषणविशे-ष्यभावव्यत्याससंभवादिति भावः । विशेषणतत्स्वभावयोरिति । परस्परानन्विततया गृहीतयोर्विशेषणतत्स्वभावयोर्विशिष्ट-प्रतीतिदशायां व्यत्यासः प्रसज्येत । अतस्तस्यापि धर्मान्तरभानेऽत्रानवस्थेति भावः । यदि व्यत्यासविशिष्टप्रतीतिप्राथम्यप्रसङ्ग-परिहारायेति । जात्यादिस्वरूपस्यैव विशेषणत्वरूपतया वस्तुस्वभावादेव न व्यत्यासप्रसक्तिः । धर्मान्तरस्याभावात्

वैशिष्टया-प्रसक्तेर्न विशिष्टप्रतीतिप्राथम्यप्रसङ्गः, नाष्यनवस्थेति भावः । विशेषणतया विशेष्यतया च स्यादिति । न च विशेषणत्वस्य स्व-रूपरूपस्य प्राग्गृहीतत्वेऽपि विशेषणतावैशिष्टयस्याभानान्न विशेषणतया प्रतीतिप्रसङ्ग इति वाच्यम्-तद्वैशिष्टयस्यापि स्वरूपरू-पतया तस्यापि भानावश्यंभावादित्यत्र तात्पर्यात् ।
भिन्नसामग्रीवेद्यवस्तुगोचरत्वमुपाधिः स्यादिति । ननु निर्विकल्पकवादिमते विशिष्टज्ञाने विशेषणज्ञानघटिता सामग्री; विशेषणज्ञाने तु न तथेति भिन्नसामग्रीवेद्यत्वस्योपाधेः दूषितत्वादित्यभिमानात् । पक्षव्यवच्छेद्यत्वसिद्धेरिति; पक्षव्यवच्छेद्यत्वस्य सिद्धिर्येन, स पक्षव्यवच्छेद्यत्वसिद्धिः; पक्षमात्रव्यावर्तकस्येत्यर्थः । यद्वा पक्षे साध्यव्यवच्छेदस्य सिद्धेरित्यर्थः । बाधोन्नीतपक्षेतरत्वस्येवानुकूलतर्के सत्युपाधित्वसंभवादिति भावः । तर्कबलादुपाधित्वस्वीकारे दृष्टान्तद्वयमाह-यथा प्रध्वंसाभावेत्यादिना । अयं भावः-यथा साधनावच्छिन्नसाध्यव्यापके भावरूपत्वे सति आदिमत्त्वरूपे आर्द्रिेन्धनसयोगरूपोपाधौ च भावत्वार्द्रत्वरूपविशषषणयोः
साध्यव्यापकत्वानुपयुक्तयोरप्यनुकूलतर्कवशादुपाधिकोटिप्रवेशः, एवं भिन्नसामग्रीवेद्यत्वमित्यत्र साध्यव्यापकत्वानुपयुक्तस्यापि भिन्नेत्यस्योपाधिविशेषणत्वं संभवतीत्यपि द्रष्टव्यम् । सर्वत्राग्नि- मतीति । आर्द्रेन्धनशून्यस्थलेऽपीत्यर्थः । ननु जन्यविशिष्टज्ञानत्वस्य बाधकं विना कार्यमात्रवृत्तिधर्मत्वेन कार्यतावच्छेदकत्वात् तदवच्छिन्नेऽनुगतकारणत्वस्य वक्तव्यत्वात् जन्यविशेषणज्ञानस्य हेतुत्वसिद्धौ जागराद्य-सविकल्पकज्ञानहेतुतया कारणभूतं विशेषणज्ञानं सिध्यन्निर्विकल्पकमेव सिध्यतीति चेत्-न; विशिष्टमानत्वं हि विशेषणविशेष्यसंबन्धविषयकज्ञानत्वम्; तच्च विशेषणविशेष्यतत्संबन्धभानसामग्रैवोपपन्नम्; न तु कार्यतावच्छेदकं, नीलघटत्ववदर्थवशसंपन्नत्वात् । ननु विशिष्टज्ञाने विशेषणज्ञानहेतुत्वमवश्याश्रयणीयम्; इतरथा जातिव्यक्तयोरिन्द्रियसंनिकर्षेऽविशिष्टेऽपि कताचिज्जातिविशेषणिका व्यक्तिविशे-ष्यिका प्रतीतिर्जायते कदाचिच्च तद्वैपरीत्येनेति सर्वासिद्धव्यवस्था भज्येत । विशेषणज्ञानकारणत्वेऽभ्युपगते तु यस्य प्रागवगतिः, तद्विशेषणकं विशिष्टज्ञानमुत्पद्यत इति व्यवस्था सुवचेति चेत्-न; यत्रोभयविषयकं निर्विकल्पकं तत्र द्वयोरपि प्रागवगतत्वाविशे-षाद्विशेषणविशेष्यभावव्यवस्थापकस्य कस्याष्यभावादव्यवस्थाप्रसक्तिरतदवस्थैव स्यात् । यदि च तत्रादृष्टं व्यवस्तापकम् । तदेव सर्वत्र व्यवस्थापकमस्तु; किं विशेषणज्ञानकारणत्वाभ्युपगमेन? ननू गोत्वप्रत्यासत्तिजन्यंज्ञानं गोत्वप्रकारकमेव, न व्यक्तिप्रकार-कमिति सिद्धम् । तत्र यदि विशेषणज्ञानं विशिष्टज्ञाने कारणं न भवेत्, तदा सामान्यप्रत्यासतिजन्यं ज्ञानं पूर्वानवगतव्यक्तिविशे-षणकमपि कदाचित् स्यात्, पूर्वावगतमेव विशेषणमिति नियमाभावादिति चेत्-न; सामान्यप्रत्यासतिजन्यसकलव्यक्तिविषय-कज्ञानस्यैवाभावात् । तस्माद्विशिष्टज्ञानस्य विशेषणविशेष्यतद्वैशिष्टयभानसामग्रैवोपपन्नत्वान्न विशेषणज्ञानत्वं कारणतावच्छे-

दकम् । यदि ह्यनुमित्यननुमितिरूपज्ञानद्वयवन्निर्विकल्पकसविकल्पकरूपज्ञानद्वयं प्रामाणिकं स्यात्, तदा सामान्यसामग्रीत एव विशिष्टज्ञानोत्पत्तशै सर्वमपि ज्ञानं विशिष्टज्ञानं स्यादिति भयेन विशेषसामग्री कल्प्येत । न च तदस्ति, निर्विकल्पकस्याद्याष्य- सिद्धेः; सर्वस्यापि ज्ञानस्य सविकल्पकत्वात् । "इदमित्थम्' इति हि सर्वापि धीः । अन्यथा निष्प्रकारकधीवन्निर्विषयापि धीः स्यात् । इच्छाऽपि काचिन्निर्विषयाऽतीन्द्रिया च स्यात् । एवं द्वेषादयोऽपीत्यलमतिचर्चया । तदेतःसर्वमभिसंधायोपसंहरति-अतो यथोक्तस्वरूपे एव निर्विकल्पकमबविकल्पकं इति । द्वितीयादित्वेन पिण्डग्रहणेष्विति । अयं भावः-अनुवृत्तग्रहणरहितेषु प्रथमेतरग्रहणेषु सविकल्पकत्वाभावापादनं तु न संभवति, प्रथमेतरत्वेन ग्रहणेऽनुवृविग्रहणनैयत्यादिति ।

भेदाभेदवादनिरासः

अत्र सहोपलम्भनियमसमानाधिकरणप्रत्ययौ भेदाभेदसाधकाविति । ननु केवलभेदे केवलभेदे च सामानाधिकरण्यानुपलम्भा- दस्तु सामानाधिकरण्यं भेदाभेदसाधकम् । कथं सहोपलम्भनियमो भेदाभेदसाधकः? न तावत् सहोपलम्भनियम एकज्ञान- विषयत्वम्, तस्यैक्येऽपि दृष्टत्वात् । नाष्येककालीनोपलम्भद्वयविषयत्वम्, जातिव्यवत्योस्तदभावात् । नाप्युपलम्भसामग्री-द्वययौगपद्यनियमः, उपलम्भैक्येन सामग्रया अप्येकत्वात् । न च घटपटसमूहालम्बने उपलम्भैक्येऽपि सामग्रीद्वित्वं दृष्टमिति वाच्यम्-घटेन्द्रियसंनिकर्षो घटज्ञानसामग्री,

पटेन्द्रियसंनिकर्षः पटज्ञानसामग्रीत्यन्यत्र सामग्रीभेदनिधारणसंभवात् तत्र तथा; इह तथा अभावात् । न च जातीन्द्रियसंनिकर्षो जातिज्ञानसामग्री; व्यक्तीन्द्रियसंनिकर्षो व्यक्तिज्ञानसामग्रीतिभेदः संभवतीति वाच्यम्, भेदस्य वा अभेदस्य वाऽध्याष्यसिद्धेः, भेदसिद्धौ च तदधीनस्य सहोपलम्भनियमस्य न भेदसाधकत्वम्, अपित्वभेद-मात्रसाधकत्वमित्येव स्यात् । किंच एकशब्दानुविद्धप्रत्ययस्य "पुरोवर्त्येकः' इत्येवंरूपस्य जातिव्यक्तयैक्यसाधकत्वेऽपि प्रथम- पिण्डे भेदाग्रहणस्य कथमभेदसाधकत्वम्? न हि प्रथमतोऽगृहीतां सर्वमसदित्यस्ति । न हि विशेषादर्शनदशायामप्रतीतत्वाद-सत्त्वमिति काचिद्युक्तिरस्तीति चेत्-उच्यते- सहोपलम्भनियमो ह्येकोपलम्भविषयत्वमेव । तच्चैक्यसाधकमेव । तद्द्वारा भेदाभेद-साधकम् । उत्तरत्र तदनुगुणवाक्यानां बहूनामुपलम्भात् । नन्वेवमेकशब्दानुविद्धप्रत्ययप्रथमपिण्डग्रहणाभेदग्रहणयोरष्यभेदद्वारा भेदाभेदसाधकत्वसंभवात् पृथक्क्यृ, तयोरभेदसाधकत्वमित्युक्तरयुक्ता स्यात्,(?) त्रयाणमष्येकीकरणस्यैव युक्तत्वादिति चेत्-सत्यंमभेदद्वारा भेदाभेदसाधकत्वांशे (?) त्रयाणामष्यैकराश्यम् । अपितु तयोर्युक्तयोरभ्युच्चययुक्तित्वमिति तयोरेकराशीकरणम् । अत एव न तद्विषयदूषणस्याष्यवकाशः, तयोरभ्युच्चयमात्रत्वादिति । स्वपर्यवसितेति । स्वनिष्ठेत्यर्थः । पाररन्न्यस्वभावशून्येति यावत् । ननु सहोपलम्भनियमस्य भेदाभेदसाधने नासाधारणत्वम्, भेदाभेदवतः सपक्षस्यैवाभावेन तद्व्यावृत्तिरूपासाधारणत्वा-प्रसक्तः । अत एव पृथिव्यामितरभेदे साध्ये जलदित्रयोदशभेदवतः सपक्षरयाभावान्नासाधारण्यमित्यस्वरसादाह - किं च विरुद्ध एवेति । द्वित्वसाधकसहोपलम्भनियम इति । द्वित्वसाधकस्य सहोपलम्भस्य नियम इत्यर्थः । उभयत्र विशेषणविशेष्यभावः समानः' इति भाष्यमुभयत्र विशेषणविशेष्यभावे विप्रतिपव्यभावेनः मन्दप्रयोजनमित्याशङ्कय शङ्काविशेषनिरासपरतया व्याचष्टे- यद्येवं जातिकुण्डलादिरित्यादिना । भाष्यस्थं समानपदं व्याचष्टे- उभयसंप्रतिपत्तेरिति । एवं तात्पर्यवर्णनस्य क्लिष्टत्वादन्यथा व्याचष्ट-यद्वा पृथक्संस्थानसंस्थितानामिति । सहोपलम्भनियमोनान्यत्रेति व्यवस्थासिध्द्यर्थमिति । सहोपलम्भप्रयोजका-पृथ्सिद्धत्वनियम इत्यर्थः ततश्च सहोपलम्भव्यवस्थाया अपृथक्सिद्धत्वेन प्राक् समर्थितत्वात् कथमस्याः शङ्काया उत्थानमिति न चोदनीयम् । इयांस्त्विति भाष्ये तुशब्द एवकारार्थ इत्यङ्गाकृत्यान्ययोगन्यवच्छेदपरतया व्याचष्टे-इमानेवेति । तुशब्दस्यावधार-णार्थत्वमस्वरसमित्यन्यथा व्याचष्टे-यद्वा विशेषणविशेष्यमावप्रसक्तेति । घटे पटस्याभाव इति । तादात्म्यसंबन्धेनेति शेषः । यद्वा पटस्याभावः पटत्वाभाव इत्यर्थः । भेद इति । पटाद्भेद इत्यर्थः ।

अनुमानादेः निर्विशेषविषयत्वनिरासः

वस्तुगतस्वभावविशेषैस्तदेव वस्तु निर्विशेषमिति भाष्ये सर्वप्रमाणविषयस्य सविशेषस्य वस्तुनः स्वभावविशेषैर्निर्विशेषतया निष्कर्षे निर्विशेषत्वासिद्धिर्वाग्विर्विरोधश्चोच्यत इति प्रतीयते । तच्चायुक्तम्, अनुक्तोपालम्भत्वात् । स्यानुभवविषये हि परैर्निष्कर्ष उक्त इत्यांशङ्कय स्वानुभवविषयनिष्कर्ष एव दूषणमनेनोच्यत इत्याह -प्रमाणानीत्यादिना । तानि तर्कपराहतानीति । अतो निरपवादस्वानुभवसिद्धं निर्विशेषमिति शेषः । स्मरणमात्रस्य मन्दप्रयोजनत्वमाशङ्कयान्यथा व्याचष्टे-यद्वा पूर्वं स्वानुभव- सिद्ध इति ।

सन्मात्रग्राहिप्रत्यक्षभङ्गः भेददूषणनिरासश्च

न केवलं सविशेषेति । यद्यपि "यदुक्त तदपि निरस्तम् इत्युक्ते परोक्तेन पूर्वनिरस्तेनार्थान्तरेणैव समुच्चयो वक्तुमुचितः; न तु सवि-शेषविषयत्वोपपादननिर्विशेषविषयत्वोपपादनानुपपत्त्योः; तथापि "इष्टं च सिद्धम्, अनिष्टं च निरस्तम्' इत्यादौ तथापि दर्शना-देवमुक्तमिति द्रष्टव्यम् । निर्विशेषविषयत्वोपपादनानुपपत्तिश्चेति । सन्मात्रग्राहिप्रत्यक्षस्य दूरोत्सारितत्वान्निर्विशेषयविषय-त्वोपपादनानुपपत्तिः फलितेति फलितानुपपत्त्या समुच्चयः । एतदम्बरमादाह-न केवलं भिन्नविषयत्वं स्थापितमिति । प्रति-योगिस्मरणकृतविलम्बे सत्यपीति । एकक्षणमात्रवर्तिनः सद् ग्राहिप्रत्यक्षस्य प्रतियोगिस्मरणसापेक्षभेदोल्लेखव्यवहारसामर्थ्यं नास्तीति पूर्वपक्षे यदुक्तम्, तत्र भेदस्यातिरिक्तत्वपक्षेऽपि भेदस्य दुर्निरसतया प्रत्यक्षस्य क्षणमात्रस्थायित्वनियमं परित्यज्य

भेदो(दव्यवहारा)ल्लेखार्थमनेकक्षणस्थितिरष्यन्यथानुपपत्त्या कल्प्या । यदि हि तादृशक्लिष्टकल्पनमन्तरेणैव जात्यादेरेव भेदत्वं सुघटम्, तदा परोक्तयुक्तेर्दूगेत्सारितत्वं किमु वक्तव्यमिचाशयः । प्रथमचशब्दस्येति । ननु-अतःशब्दपरामृष्टस्वपरनिर्वाहकत्व-स्यानवस्थादिपरिहारे निरपेक्षहेतुतया अतः

शब्दान्वितचशब्दप्रतिपाद्यसमुच्चेतव्यान्तराभावात् "न च' इत्यादिवत् च शब्दो वाक्यालङ्कार इति चेत्-न; चशब्दं भिन्नक्रममाश्रियानवस्था च अन्योन्याश्रयणं च(दूषणान्तरञ्च) नास्तीत्यभ्युपगमेनादोषात् । अनवस्थापरिहारसिद्धाविति । यद्यपि संवेदनरूपादिवदनवस्ताभीत्या स्वपरनिर्वाहकत्वसिद्धिरिति वदन्तं प्रति नास्याः शङ्काया उत्थानम्, तथापि तदनादरेणेयं प्रवृत्तेति द्रष्टव्यम् । कारणनिरूपणायापह्नवमर्हतीति । कारणनिरूपणं प्रसजेदित्येवं भीत्या-स्फुटावधारितं कार्यं नापह्नवमर्हतीति भावः । प्रपञ्चस्य बाध्यत्वज्ञानमिति । बाध्यत्वरूपभेदविषयज्ञानमित्यर्थः । पञ्चमं पक्षं प्रतिक्षिपति-न च बाध्यविषयत्वमिति । तथा सतीति । भेदस्य सर्वस्य बाध्यत्वे प्रपञ्चबाध्यत्वरूपभेदस्यापि बाध्यतया प्रपञ्च-सत्यत्वमेव स्यादित्यर्थः । "स्वशास्त्र निर्णये सत्य इति । बाध्यत्वात्मकभेदलक्षणशास्त्रार्थे सत्ये सति भेदस्य दुर्निरूपत्वयुक्तेर-प्रवृत्तेस्तुल्यन्यायतया प्रामारिकस्य भेदान्तरस्यापि सत्यत्वं स्यादित्यर्थः । स्वशास्त्राथर्स्य भेदमिथ्यात्वस्यासत्यत्वे तद्विरुद्धसत्य-त्वोन्मज्जनप्रसङ्ग इत्यर्थः । केचित्तु स्वशास्त्रार्थनिर्णये सत्ये सत्येव लोके निणर्या अस याःस्युः । तस्यैपासत्यत्वे लोकनिर्णयसत्यत्वं कुतो न भवेदित्यर्य इति वदन्ति । शब्दस्वभावायत्तत्वान्नाथर्दूषणत्वमिति । यथैकस्यैवार्थस्य स्वशब्दोल्लेखने निरपेक्षस्यापि कठितत्वलधुत्वादिशब्दोल्लेखने सापेक्षत्वम्, यथा वा ज्ञानानन्दाद्यभेदो ब्रह्मस्वरूपमिति वदतस्तव मते ब्रह्मशब्दोल्लेखने निरपेक्ष-स्यापि अभेदशब्दोल्लेखने सापेक्षत्वम् , तथेहापि घटशब्दोल्लेखने निरपेक्षस्यापि भेदशब्दोल्लेखने सापेक्षत्वमित्यस्तु; एकस्यैव गम-नस्य गच्छति, चलति' शब्दोल्लेखाभ्यां, प्रयत्नस्य च "करोति, प्रयतते' शब्दोल्लेखाभ्यां कर्मसापेक्षत्वनिरपेक्षत्वयोः शब्दस्व-भावप्रयुक्तत्वदर्शनादिि◌ीत भावः । तदवच्छेदकमहिषादिपदार्थेति । व्यावृत्यवच्छेदकेत्यर्थः । महिषादिप्रतियोगिकव्यावृत्तिबुद्धि हेतुत्वप्रवृत्तिनिमित्तपुरस्कारेण भेदशब्दो गोत्वं दर्शयतीयर्थः । तटस्थोपाधिभेदादिति । घटकोपाधिभेदादित्यर्थः । कत्रैच्छौ प्रयोगाप्रयोगाविति । महिषादिपदार्थान्तरपुरस्कारेण गोत्वे ज्ञातेऽपि प्रयोगाप्रयोगावैच्छावित्यर्थः । न तु गोत्वज्ञानमात्रेणेति मन्तव्यम्, तावता भेदव्यवहारासंभवादिति द्रष्टव्यम् । तद्योगकार्यव्यावृत्तीति । भेदरूपधर्मान्तरयोगवार्या या व्यावृत्तिधीस्त-द्भेदत्वादित्यर्थः । अभेदेऽपि तुल्या इति ।

"भेदः स्वरूपं धर्मो वेत्यादिभेदविभीषिका ।

अकारमात्रप्रदलेषे स्यादिभेदविभीषिका ।।'

इत्युक्तेरिति भावः । ब्रह्माद्वितीयमित्यादिपदानां पर्यायत्वं च स्यादिति । द्वितीयपदस्य भेदपरत्वेनाद्वितीयमित्यस्याभेदार्थकत्व- मिति भावः ।

ज्ञाततयैव परमर्शप्रसङ्ग इत्यर्थ इति । न च - प्रत्ययमात्रस्य सन्मात्रग्राहित्वादज्ञाततयाऽपि "परमर्शसंभवः; किंच सन्मात्रांशे ज्ञातत्वापादनमिष्टमेव; अंशान्तरे तु न ज्ञातत्वमिति कथं तदापादनसंभव इति वाच्यम्-पूर्वोक्तदूषणे तात्पर्यात् । समवेतशब्दो विशेषणौकस्वभावपर इति । सिद्धान्ते सवमायानभ्युपगमादिति भावः । त्तत्तत्संस्थानवत्तयेति । असाधारणधर्मवत्तयेत्यर्थः । कालविशिष्टतयेति ; कालस्य सर्वेन्द्रियग्रह्यत्वादिति भावः । सविकल्पके तु देशादीनां बहूनां विशेषणत्वमिति । यद्यपि सिद्धान्ते निर्वकल्पकेऽपि देशादग्रोपि विशेषणं भवन्त्येव, तथाष्यनुवृत्तत्वादेनिर्र्विकल्पके भानं नास्तीत्यत्र तात्पर्यात्(र्यम्?) । गन्धस्थले देशग्रहणस्य प्रथमतोऽभावमभिप्रेत्य तथोक्तमित्यापि केचित् ।

जातेः संस्थानरूपत्वसमर्थनम्

संस्थानातिरेकिणोऽनेकेष्वेकाकारबुद्धिबोध्यस्येति भाष्ये संस्थानातिरिक्तैकाकारबुद्धिबोध्यनिषेधस्य पर्यवसाने द्वेधा घटते । संस्थानस्यैवैकाकारबुद्धिबोध्यत्वाद्वा तदतिरिक्तस्यैकाकारबुद्धिबोध्यस्याप्रामाणिकत्वाद्वेत्यभिप्रेत्य द्वेधापि व्याचष्टे-अयं सास्त्रा-दिमानित्यादिना । नामान्तरेणेति । अतिरेकवादद्रपीति । भाष्यस्य मतद्वयसंप्रतिपन्नसंस्थानस्यान्यतरसंप्रतिपन्नजात्यैक्यं न युक्तमिति तात्पर्यमिति भावः । केचित्तु-उभयसंप्रतिपन्नेनोपपत्तौ नातिरिक्तं कल्प्यमित्येव अतिरेकवादेऽपीति । भाष्ये स्वरसतः प्रतीयत इति वर्णयन्ति । परैरवयविनोऽसमवायिकारणत्वेन संस्थानं स्वीकृतमिति । यद्यपि द्रव्यविशेषविषय एवेदम्; न सर्वत्र-तथापि क्वचिज्जात्यपलापे तयैव रीत्याऽन्यत्रापि तदपलापः सिध्यतीति भावः । जातिमात्रोच्छेदश्च स्यादिति । सिद्धान्तेऽप्याकृ-तिरूपजातेः क्वचिदभ्युपगमात् स न स्यादित्यर्थः । जात्यजातिसाधारणमिति । अवयवसंयोगविशेषशौक्लयादिसाधारणमित्यर्थः ।

ननु स्वासाधारणमित्यत्र स्वशब्दः किमित्यादि । यद्यपि स्वशब्दस्य प्रकृतवाचिशब्दत्वात् यो यस्यासाधारणो धर्मः स तस्य संस्थानम्, यथा "असाधारणधर्मो लक्षणम्' इत्यत्र । संस्थानशब्दो हि सिद्धान्ते लक्षणशब्दापरपर्याय एव । अतो न विकल्पाव-काशः-अथापि शिष्यबुद्धिविशदीकरणायायं प्रपञ्च इति द्रष्टव्यम् । एकशब्दप्रवृत्तिनिमित्तत्वाभावादितीति । न च गृष्टिधेनुवश-ावष्कयण्यादिशब्दवत् खण्डयोवाचकमपि किंचित्पदं किं न स्यादिति वाच्यम्, अनुपलब्धेरिति भावः । कस्तर्हि जातिरूपसं-स्थानानामिति । अवयवसंयोगविशेषरूपसंस्थानानां शौक्लयादिभ्यः संस्थानेभ्यः कथं भेदः? उभयोरपि संस्थानत्वस्याविशिष्ट-त्वेन, "जातिवाचिन उत्पलशब्दस्य प्राधान्यम्; गुणवाचिनो नीलादिशब्दस्य गुणत्वम् । ततश्च नीलादिशब्दस्य विशेषणत्वमेव । अत एव, "विशेषणं विशेष्येण बहुलम्' इत समासो"नीलोत्पलम्' इत्येव; न तु "उत्पलनीलम्' इति' इति व्यवस्था कथं स्या-दित्याक्षेपाभिप्रायः । जातिरूपसंस्थानलक्षणमिह विवक्षितं चेदिति । ननु "यो यदसाधारणो धर्मः, स तस्य संस्थानम्' इति संस्तानसामान्यलक्षणोस्थिते जातित्वे सति असाधारणधर्मत्वं जातिरूपसंस्थानलक्षणं भविष्यतीति कोऽसौ विचारः? किंच शौक्लयादिसंस्थानेष्वपि प्रकृताकारेण सुसदृशव्यक्तयः समस्ता इति विवक्षा आवश्यकी, शौकल्यादेरपि प्रकृताकारेण सुसदृश-व्यक्तयसाधारणधर्मत्वस्यावश्यवक्तव्यत्वात् । संस्थानरूपा घटत्वादिजातयः प्रतिव्यक्ति भिन्नाः; संस्थारूपाः शौक्लयादयश्च प्रति-व्यक्ति भिन्नाः ।

सौसादृश्येनैकीकरणं जात्यजातिसाधारणमेव । को विशेष इति चेत्-भावानवबोधात् । "संस्थानं नाम स्वा-साधारणं रूप' मिति भाष्यस्य जात्यजातिसाधारणसंस्थानस्वरूपनिर्वचनपरत्वमिति पूर्वमुक्तं पक्षं परित्यज्य जातिरूपसंस्था-नस्यैव लक्षणमुच्यत इति व्याख्यायामित्यर्थः । नन्वेवं व्याख्यायां पूर्वपक्षे किमस्वरसवीजमिति चेत्, उच्यते- "वस्तुसंस्तानरूप-जात्यादिलक्षणभेदविशिष्टमेव प्रत्यक्ष' मिति भाष्ये संस्थानशब्दस्यासाधारणधर्मरूपसंस्थानपरत्वविवक्षायां नैयायिकादीनामपि जातेरसाधारणधर्मत्वं सिद्धमेवेति संस्थानमेव जातिरिति प्रसाधनं व्यर्थं स्यात् । संस्थानस्योभयसंप्रतिपन्नत्वादिति । भाष्येऽष्य-साधारणधर्मस्योभयसंप्रतिपन्नत्वाच्चेति न युज्यते । अतः प्रांक्तनसंस्थानशब्दानामवयवसंयोगविशेषपरत्वं सिद्धम् । अतस्तदवै-रूप्यायेदमपि तथैव वक्तुमुचितमित्याकृतिरूपसंस्थानमात्रपरतया "संस्थानं नामे'ति भाष्ययोजनायामित्यर्थः । अत आकृति- रूपो धर्मविशेषः संस्थानमिति न काष्यनुपपत्तिरिति द्रष्टव्यम् । देशतः कालतश्च नोपपद्यत इति । गकारदेशानन्तरदेशत्वलक्षणं वा गकारोत्तरकालत्वलक्षणं वा आनुपूर्व्यमौकारस्य नोपपद्यते, वर्णानां नित्यत्वाद्विभुत्वाच्चेति भावः । तस्या उच्चारणनिबन्ध-नत्वादिति । गकारोच्चारणानन्तरोच्चारणविषयत्वमेवौकारस्यानुपूर्व्यमित्यर्थः । वृविविकल्पादिदौर्घट्यमिति । सादृश्यमेकदेशेन वर्तते चेत्, सादृश्यपर्याप्त्यधिकरणत्वाभावात् द्वित्वपर्याप्त्यनधिकरण एकस्मिन् "द्वौ' इति शब्दस्याप्रयोगवत् सादृश्यपर्याप्त्य-नधिकरणे "सादृशः' इति प्रयोगो न स्यात्; सावयवत्वप्रसङ्गश्च । कार्त्स्न्ेन वर्तते चेत्, सादृश्यस्य द्विष्ठत्वं न स्यादिति दूष-णानामनवकाश इत्यर्थः । गवासुसदृश इत्येव प्रयोगः स्यादिति । एवकारः

चार्थः । इति च प्रयोगः स्यादित्यर्थः । गौरिति । गौ-रित्येव प्रयोगो न स्यादित्यर्थः । यद्वा गोशब्दस्य व्यक्तिविशेष एव गृहीतसंकेततया "तत्सदृशः' इत्येव प्रयोगः स्यादित्यर्थः । इदं च व्युत्पत्तिदशायाम्, "एवमाकृतिकाया, सा गौः' इति ग्रहणाभावमभिप्रेत्योक्तम् । अनुगतधर्माभावे सामान्यधर्मपुरस्कारेण वह्निधूम-योर्व्याप्तिग्रहो न स्यादित्याशङ्क्याह - व्याप्तिग्रहणं चेति । सौसादृश्येनैकीकृतेन संस्थानलक्षरपरिण सर्वेषां क्रोडीकारसंभवा- दिति भावः । प्रतिपन्नसंस्थानविरोध्याकारग्रमस्यैवेति । यद्यपि प्रतिपन्नस्य शुक्तदीत्वस्य रजतत्वं विरोध्येव, तथापि तस्य विरो-वित्वास्फुरणाद्भ्रम इति भावः । शौक्लयं हि शुक्लस्यासाधारणमिति । ततश्च शौक्ल्स्याशुक्लभेदरूपस्य दर्शनादशुक्लत्वाध्यासः परं निवर्तते; न त्वठुक्तयध्यास!, अशुक्तभेदस्य शुक्तित्वस्याग्रहादिति भावः ।

संस्थापनस्य भेदरूपत्वसमर्थनम्

पूर्वं प्रतियोग्यपेक्षयेति । "जात्यादेरेव प्रतियोग्यपेक्षया' इति भाष्यग्रन्थेनेति भावः । यद्यपि "जात्यादेरेव प्रतियोग्यपेक्षया' इति ग्रन्थे भेदव्यवहारे प्रतियोगिस्मरणसापेक्षत्वमिति नोक्तम् । अपितु जात्यादेरेव स्वपरभेदत्वम्- अथापि सोऽप्यर्थस्तत्र विवक्षित इति भावः । तर्हि भेदव्यवहार इति । यद्यपि प्राक् "प्रतियोग्यपेक्षया भेदव्यवहारः' इत्युक्तमब्, तथापि निष्प्रतियोगिकगोत्वादेरेव भेदत्वे तदयुक्तमेव स्यादिति तदष्याक्षिष्यतेऽनेन भाष्यग्रन्थेनेति वाक्यस्याभिप्रायात् । ननु सकलेतरसजातीयबुद्धिव्यवहारयो- रिति कथमुक्तिः? इतरेषां महिषादीनां स्वसजातीयत्वासंभवेन "इतरे च ते सजातीयाश्च' इत्युत्त्यसंभवादित्याशङ्क्याह - निर्दि-ष्टसामान्यानन्तरेति । निर्दिष्यसामान्यं गोत्वसामान्यम्; तदनन्तरपरसामान्यं तत्साक्षाद्व्यापकं पशुत्वादि । भाष्ये सजातीय- ग्रहणं विजातीयादेरप्युपलक्षणम् । सजातीयभ्रमनिर्वतकत्वे कथिते विजातीयभ्रमनिवर्तकत्वं किंपनर्न्यायसिद्धमित्यभिप्रेत्य सजा-तीयग्रहणं कृतमिति द्रष्टव्यम् । परनिर्वाहकत्वाभाव इति । यद्यपि "गोत्वादिरेव हि सकलेतरव्यावृत्तिः' इति भाष्ये गोत्वादौ घटादिव्यावृत्तिरूपवसमर्थनमात्रमभिप्रेतम् । न तु स्वनिर्वाहकत्वात् परनिर्वाहकत्वम्, परनिर्वाहकत्वाभावे स्वनिर्वाहकत्वा-संभवादित्येतत्पर्यन्तम् ।किंच "स्वसंबन्धादर्थान्तर-' इत्यनुमानानुरोधेनस्वनिः र्वाहकत्वाभावे परनिर्वाहकत्वासंभवादित्येव प्रदर्शनीयम्-तथापि तावत्पर्यन्तविवक्षामभिप्रेत्य तथोक्तमितत द्रष्टव्यम् । अतो धर्माणामिति । ननु रूपादिधर्मस्यापि न सर्वथा भ्रमविरोधित्वम्, तत्रापि गुण्यभेदभ्रमादिदर्शनात्; तदवलम्ब्य मतभेदप्रवृत्तेरद्यापि दर्शनात् "पटद्रव्यस्य रूपाव्यतिरेकभ्रमः' इति स्वयमुक्तत्वाच्च धर्मिणोऽपीतरधर्मापेक्षया स्वधर्मव्यावर्तकत्वाच्च घटस्यापि स्वाश्रयभूतलादिव्यावर्तकत्वाच्च ब्रह्मणोऽपि स्वविषय-ज्ञानव्यावर्तकत्वाच्च कथमियं व्यवस्तेति चेत्-न; रूपादिधर्मेषु व्यावर्तकधर्मान्तरसत्त्वेऽप्यनिष्टाभावात्, प्रामाणिकत्वेऽ(ना)नन्त-वस्त्वभ्युपगमस्याष्यदोषत्वाच्च । अत एव भेदत्वसंभव इत्येवोक्तम्; न तु "तस्यैव भेदत्वसंभव' इतीति द्रष्टव्म् । धर्माणां स्व-रूपस्यैवेति ।धर्मस्वरूपमेव स्वाश्रयस्य घटस्य स्वविरुद्धधर्मान्तराश्रयधर्ग्यन्तरापेक्षया भेद इत्यर्थः । विशेषणापेक्षया विशेष्यस्य स्वरूपमेव भेद इति । न च "धर्मिस्वरूपस्य स्वगतधर्मापेक्षया भ्रमविरोधी भेदो धर्मान्तरान्वयः' इति पूर्वग्रन्थविरोध इति वाच्यम्-"विशेष्यस्य स्वरूपम्' इत्यस्य विशेष्यस्य स्वरूपमसाधारणधर्म इत्यर्थात् स्पर्शादिविशेषणान्तरमेव रूपादिविशेषणाद् भेद इत्यर्थपर्यवसानात् । कस्य को वाऽसाधारणशब्द इत्यत आह-स च शब्दो व्युत्पत्तिसिद्ध इति । अस्यार्थस्यायमसाधारणशब्द इत्येतल्लोकव्युत्पतिसिद्धमित्यर्थः । प्रतियोगितग्राभिमतार्थान्तैक्यधीविरोधि वा स्वरूपमिति । अस्मिन् पक्षे वस्तु(ब्रह्म्न)स्व-रूपस्याविरोधितया स्वरूपत्वं न स्यादित्यस्वरसो बोध्यः ।

मिथ्यत्वानुमानभङ्गः

वस्त्वन्तरस्योपाधित्वादिति । देशकालान्तराणामुपाधिभूतानां सद्भावात् प्रतिपन्नोपाधौ बाधितत्वं तत्राप्यस्तीति भावः । अनु-तिबाधकज्ञानेषु भ्रान्तिष्विति व्यधिकरणे सप्तम्यौ । अनुदितबाधकज्ञानेषु पुरुषेषूत्पन्नासु भ्रन्तिष्वित्यर्थः । अतोऽनुदितबाध-कज्ञानास्वित्यनुक्तिः । चोदयितृपुरुषज्ञानेनेति । यस्तु चोदयिता पुरुषः. तज्ज्ञानेनेत्यर्थः ।

भ्रमत्वबुद्धेरेव बाधरूपत्वादिति भावः । विशेषणविशेष्यांशसिद्धरिति । प्रतिपन्नोपधिर्विशेषणम्; बाधितत्वं विशेष्यम् । अप्रामाणिकधर्मपरंपरापादिनेनेति । यथा उत्पत्तेरुत्पत्तावनवस्था; अनुत्पत्ताबुत्पत्तिर्नित्या स्यादित्यत्र उत्पत्त्युत्पत्तेरत्यन्तासंभावितायाः आपादनात् । इह तु मिथ्यात्वमिथ्यात्वस्यात्यन्ताप्रामारिकत्वाभावात् । ब्रह्मणि मिथ्यात्वमिथ्यात्वस्य संप्रतिपन्नत्वादिति भावः । इदमुपलक्षरम्-

"धर्मस्य तदतद्रूपविकल्पा(कल्पना)नुपपत्तितः ।

धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेत् ।।'

इति तल्लक्षणम् । न चात्र मिथ्यात्वस्य सत्यत्वे धर्मिणो मिथ्यात्ववैशिष्टयभङ्ग उक्तः, किं त्वद्वैतहानिः । प्रत्युत भेदः किं भिन्ने वर्तते, उताभिन्न इति त्वदुक्तेरेव भिन्नदिविशिष्टमात्रनिरासकत्वेन स्वव्याधाताज्जातित्वम् । उक्ते हि, "एतामेव जातिमवष्टभ्य शुष्कतर्क-वादिनां बौद्धचार्वाकवेदान्तिनां बालव्यामोहहेतवः कण्ठकोलाहलाः' इति । मुद्गरे नष्टेऽपीति । न च नष्टस्यापि मुद्गरस्य घटस्येव पारमार्थ्यमस्तीति वाच्यम्-न हि पारमार्थ्याभावे स दृष्टान्तः । यथा नाशकनाशे नाश्यानुन्मज्जनम्, एवं प्रपञ्चसत्यत्वबाधकस्य मिथ्यात्वसाधकहेतोर्बाधेऽपि बाध्यानुन्मज्जनमित्येतावता साम्येन दृष्टान्तत्वात् । बाधकज्ञानस्य मिथ्यात्वेऽपीति । बाधकज्ञा-नविषयस्य दृश्यत्वादिहेतोर्बाधेऽपीत्यर्थः । साधनपारमार्थ्यापारमार्थ्यविचारस्यैव प्रस्तुतत्वादिति द्रष्टव्यम् । कारकज्ञापकयोर्वैष-म्यादिति । ननु नाशकस्यापि बाधितत्वे नाशोऽसत्य एव । न हि मुद्गरस्य मिथ्यात्वे नाशस्य सत्यत्वमस्ति । अतः साम्यमेवेति

चेत्-न; बाधकबाधे बाध्यसत्यत्वं स्यादिति मयोक्ते नाशकारकनाशे कार्यस्य नाशस्यानाशो दृष्ट इति त्वद्वचनमत्यन्तासंगतमिति तत्तात्पर्यात् । वृन्तविषयभ्रमरत्वभ्रमबाध्रेपीति । कस्याश्चिद्भ्रमर्याः पलाशपुष्प उत्पन्नो दावभ्रमः पलाशवृन्तविषयभ्रमरबुद्धया निवृत्तः, सोऽपि यत्र वृन्तविषयभ्रमरभ्रमो विशेषदर्शनान्तरेण निवृत्तः, तादृशभ्रस्थल इत्यर्थः । वक्ष्यति-"भ्रमरी भ्रमरभ्रमेण वृन्ते यददावभ्रममाश्लिषत् पलाशम्' इति । परमार्थभृतवअन्तबाध्यत्वदर्शनादिति । इदमुपलक्षणम्-पलाशपुष्पबाध्यत्वादित्यपि द्रष्ट- व्यम् । ततश्च त्वन्मत इति । दावज्ञानान्तरोत्पविप्रतिबन्धकत्वलक्षणमेव दावबाधकत्वं भ्रमरपारमार्थिकत्वभ्रमस्य । एवं च प्रपञ्चे दृश्यत्वमिथ्यात्वादित्यापिरूपसाध्यसाधनपारमार्थ्यभ्रमस्य प्रपञ्चसत्यत्वज्ञानान्तरोत्पत्तिप्रतिबन्धकत्वलक्षणं बाधकत्वं वक्तव्यम् । ततश्च तस्यापि भ्रमस्य निवर्तकान्तरमपि किंचिद्धर्मपारमार्थ्यज्ञानमेवेति भ्रमपरंपरानुवृत्तिरेव स्यात्; निःशेषाविद्यानिवृत्तिर्न स्या- दिति भावः । नन्वेवं दावादिभ्रमस्थल इव प्रकअते भ्रमस्य भ्रमनिवर्तकत्वे निःशेशाविद्यानिवृत्तिर्न स्यादित्येव सुवचम्; किमर्थमे-तावान् सरम्भ इति चेत्-सत्यम्, तत्तत्पदार्थस्वरूपशिक्षार्थत्वेनादोषात् । भ्रान्तिरूपोतरोत्तरेति । साधनधर्माणामपारमार्थ्या- दिति भावः । स्वयं नाश इति । ननु (ज्ञानान्तरेण ज्ञानेन) नाशेऽपि घटादिनाशान्तरवत् काल्पनिकत्वं सिद्धमेवेति, निःशेषा-विद्यानिवृत्तिर्न स्यादिति दोषः समान इति चेत्-इष्टापविरिति केचित् । अन्ये तु ज्ञानजन्याया अविद्यानिवृत्तेर्ब्रह्मस्वरूपत्व-पञ्चमप्रकारत्वपक्षावलम्बनेन परिहारस्य कथंचित् कृतत्वेन ज्ञानात्तिरिक्तजन्यनाशस्य स्वकारणे प्रविलयरूपतया परैरभ्युपगत- त्वेन कारणभूताविद्याया अनुवृत्तिः स्यादेवेति भाव इति वदन्ति । तथापि सन्मात्रस्येति । इदमुपलक्षणम्-नभसोऽप्यध्यस्त-नीलिमपुरस्कारेण चक्षुषा ग्रहणसंभवात् पञ्चीकरणप्रक्रियया रूपवत्त्वसंभवेन चाक्षुषत्वादेकवितिवेद्यत्वं सिध्यतीति भावः ।

दृश्यत्वनियमरूपहेतुभङ्गः

ननु दृश्यत्वनियमोऽत्रेति । स्वव्यवहारे स्वातिरेकिसंविदपेक्षानियतदृश्यत्वमित्यर्थः । सदनुभूत्योर्वेदाभावादिति । स्वप्रकाशा-नुभूत्यभिन्नत्वेन स्वप्रकाशत्वं वक्तव्यमित्यर्थः । स्वप्रकाशत्वेन दृश्यत्वनियमासिद्धेरिति । यदि दृश्यत्वहेतुनैव भेदमिथ्यात्वं साध्यते, तदा सदनुभूत्तिभेदमिथ्यात्वाधीनं दृश्यत्वहेतुसामीचीन्यम्, सद्रूपे ब्रह्मणि व्यभिचाराभावात्; सामीचीन्ये सति भेदमिथ्यात्वमित्यन्योन्याश्रय इत्यर्थः । यद्यनुबमानान्तरेणेति ।

जडत्वपरिच्छिन्नत्वादिनेत्यर्थः । तर्ह्यस्मिन् सिद्धसाध्यतेति । दृश्यत्वहेतोरित्यर्थः । दृश्यतैकस्वभावत्वमिति । स्वप्रकाशताशून्यत्वमित्यर्थः । परमार्थभूताश्चेति । नित्यत्वादीनामपारमार्थ्ये-ऽनित्यत्वादिकं प्रसज्येतेति भावः ।

व्यावर्तमानत्वहेतुभङ्गः

अनृतादितिभ्यो व्यावृत्तत्वेनाभ्युपगमादिति । ननु यद्यष्यनृतव्यावृत्तत्वमनृतविलक्षणत्वमङ्गीकृतम्, तथाप्यनुवर्तमानत्वप्रति-द्वन्द्विव्यावर्तमानत्वं नाङ्गीकृतमिति चेत्-न; विलक्षणत्वरूपव्यावर्तमानत्वे सत्यननुवृत्तत्वरूपव्यावृत्तत्वमपि सिध्यतीति भावातः । ततस्वकार्यकरमिति । व्यभिचारज्ञानसंपादनमुखेनानुमितिप्रतिबन्धकमित्यर्थः । अनुभूतित्ववदिति । स्वरूपानति-रिक्तानुभूतित्वस्य स्वप्रकाशत्वरूपसाध्यसाधकत्वादिति भावः । अपरमार्थशब्दश्चेति । अत्र के चित्-अपरमार्थशब्दपदं लक्ष- णया ब्रह्मशब्दपरम् । ततश्च "ब्रह्मणो जडव्यावृत्तत्वमपरमार्थः' इत्यत्र ब्रह्मशब्दो व्यर्थः, व्यावृत्तत्वमात्रस्यापरमार्थ्यात् । अत एव "घटादावपि' इत्युत्तरग्रन्थस्वारस्यमपीति वदन्ति । अन्ये तु-परमार्थ इत्युत्तया न कोऽपि परिहारः कृतः व्यावर्तमानत्वान्तर- स्यापि तादृवत्वेन परमार्थव्यावर्तमानत्वस्य हेतूकरणासंभवात् वैलक्षण्यासिद्धेरिति भावं वर्णयन्ति । तर्ह्यसिद्धो हेतुरिति । नन्वपरमार्थभूतव्यावर्तमानत्वस्य हेतूकृततया तस्य नासिद्धिः । व्यावर्तमानत्वस्य तत्रासत्त्व एवापरमार्थव्यावर्तमानत्वसिद्धिः । इतरथा परमार्थव्यावर्तमानत्वमेव स्यादिति चेत्-न; तथा सति अपरमार्थव्यावर्तमानत्वं व्यावृत्तिशून्यत्वमिति स्यात् । ततश्च व्यावृत्तिशून्यत्वमेव हेतुः स्यात्, न तु व्यावृत्तिरिति भावः । प्रतिपन्नोपाधौ बाधितस्यैवेति । अत्र प्रतिपन्नोपाधौ बाधितस्यैव व्यावृत्तिर्मिथ्यात्वसाधिकेति योजना, "न त्वगृहीतत्वमात्रम्' इत्युत्तरग्रन्थानुसारात् । पक्षान्तरमाह-अत्र ेव्यावृतिविशेषो व्या-वृत्तिशब्दोक्त इति । बाधितस्यैव मिथ्यात्वसाधकव्यावृत्तिविशेषः संभवतीत्येवं योजनेति भावः । निषेधधीबोध इति । निषेध- धीजन्या पूर्वज्ञाने भ्रमत्वबुद्धिर्बाधः । निषेधरूपत्वं बाधकत्वमिति । पूर्वज्ञानविषयाभावावगाहि ज्ञानं बाधकमित्यर्थः । सर्व-सपक्षाननुयायित्वेनेति । न चैवं प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपमिथ्यात्वस्यामावेन कथं तेषां सपक्षत्वमिति वाच्यम्-ज्ञान-निवर्त्यत्वरूपमिथ्यात्वस्य सत्त्वात् सपक्षत्वमस्तीति तदमिप्रायसंभवात् । इतरथा साव्योपाध्योरैक्यप्रसङ्गात् । उपाधिकवच्छेदक इति । आश्रय इत्यर्थः । न तु साध्यव्यापकादिलक्षण इति भ्रमितव्यमिति भावः । देशकालभ्रमे वस्त्वन्तरबुपाधिरिति । देशभ्रमे कालादिर्व्यावहारिके वस्त्वन्तरेऽध्यस्यत, प्रातिभासिकं रजतमिव शुक्तिशकल इत्युक्तौ नान्योन्याश्रयः । न हि रजतस्य शुक्ति-शकलेऽध्यासोऽन्यत्र शुक्तिशकलाध्याससापेक्षः । अतो नान्योन्याश्रयशङ्का ।

नापि "भ्रमव्यक्तिभेदात्३ इति परिाहारश्च युज्यते, अनवस्थादि'भरुत्पतिप्रतिबन्धप्रसङ्गादिति चेत्-मैवम्; भ्रमव्यक्तिभेदात् इत्यस्य प्रतिभासिकव्यावहारिकव्यक्तिभेदात् प्रातिभा-सिकस्य व्यवहारिकेऽध्यासोपपत्तावन्योन्याश्रयानवस्थाद्यभावादित्येव तदमिप्रायात् । यदवच्छेदकावच्छिन्नमिति । न च यत्र यत् प्रतिपन्नम्, तत्र तस्याभावो मिथ्यात्वप्रयोजक इत्येवास्त्विति वाच्यम-संयोगाद्यतिप्रसिङ्गापारणाय यद्देशकालावच्छिन्नमि-त्यस्यावश्यकत्वात् । क्रियान्तरावच्छिन्नस्येति । अयं भावः- नात्र कालस्याध्यासः, येनोपाध्यन्तरसदसद्भावशङ्का स्यात् । अपि तु काले सायंत्वरूपादित्यक्रियासंबन्धाव्यासः । न च-सायंत्वेन प्रतीतस्य न सायंत्वभ्रमाधिष्ठानत्वम्, आत्माश्रयप्रस- ङ्गात्; नापि दिवात्वेन प्रतीस्य, विरोधादिति वाच्यम्-तदुभयविलक्षणगोदोहनादिक्रियासंबन्धित्वेन प्रतीते काले सायं- त्वाध्यास उपपद्यत इति । नियमः क्रियत । इति । अस्तित्वनास्तित्वयोः प्राप्तौ नियमः क्रियत इत्यर्थः । घटशब्दप्रतिपन्न-ऽस्तित्वरूपधर्मान्तरसंबन्धो बाध्यते; इतरथा "नीलो घटः' "शुक्लः पटः' इत्यदावपि विकल्पावतारप्रसङ्ग इति भावः ।

अनुवर्तमानत्वदूषणम्

प्रथमे शिरसि सिद्धसाधनत्वं दूषणमुक्तमिति । अत्र केचित्-सन्मात्रं सर्वासु प्रतिपत्तिष्वनुवर्तमानं दृश्यत इति तत् रमार्थः' इति सन्मात्रशब्दितसत्तासामान्यसनयानुवर्तमानतया पास्मार्थ्यमुपक्षिप्तं पूर्वपक्षे । तत्र

सत्तासामान्यस्यानुवर्तमानतया पारमार्थ्यो-पपादनं सिद्धसाधनमेव । विशेषणां व्यार्तमानतयाऽपारमार्थ्योपपादनं ह्यनिष्टमिति भाष्ये स्पष्टोऽर्थः प्रतीयते । न तत्र विकल्प मुखेन ग्रन्थावतरणं युज्यते । तथाहि सति सच्छब्दस्य प्रमाणसंबन्धार्हस्यैव वस्तुत्वेन सिद्धान्तेनोऽपि संमतत्वात् । किंच ननु सदेष परमार्थ इति हि ग्रन्थकाराभिप्रायः इत्याक्षेप समाधाने अष्यमानविजृभ्रिमते । अनुवर्तमानत्वं सत्यारमाथ्यर्साधकम्;
व्यावर्तमानत्वमितरापारमार्थ्यसाधकम् । द्वाभ्यां च हेतुभ्यं सन्मात्रशब्दितसत्तारूपसामान्यस्यैव पारमाथ्यर्म्, नेतरेषामित्युक्त- तया अनुवर्तमानत्वहेतुसाध्यतया पराभिमतस्य सत्तापरमार्थ्यस्य स्वमतेऽपि सत्त्वेन सिद्धसाधनस्य, सिद्धतयाक्षेपस्य वा, विक- ल्पमुखेन सामाधानस्य वा अप्रसक्तेरिति मन्यन्ते-तदिदमसारम्;
अधिष्ठानतयानुवर्तमानस्य पराभिमतस्य सच्छब्दितस्यापि पार- मार्थ्यं सिद्धान्तिसंमतमिति शङ्काव्युदासार्थं विकल्पमुखेनैव ग्रन्थस्यावतारणीयत्वात् । न चैवम्-अतो न सन्म्रात्रमेव वस्तुः' इत्यु-त्तरभाष्यसङ्गतिरिति वाच्यम्, "न सन्मात्रमेव वस्तु' इत्यत्र"साधनार्हम्' इति शेषः पूरणीयः । प्रमाणसंबन्धार्हवस्तुनः पारमाथ्यस्य सिद्धत्वेन तस्य साधनानर्हत्वादित्याशयात् । यदुक्तम्, "ननु सदेव परमार्थ इति हि ग्रन्थकाराभिप्रायः' इत्याक्षेपसमाधानयोर-स्थानविजृम्भितत्वमिति - तन्न; "सदेव परमार्थ इति हि ग्रन्थकाराभिप्रायः' इत्यत्र, "वणिर्त' इति शेषः । ततश्च यद्यनुवर्तमान- त्वात् सत्त परमार्थ इत्युच्येत, तदा हि सिद्धसाधनशङ्का स्यात् । अनुवतर्मानत्वात् सदेव परमार्थ इत्येतावत्साध्यतम्; अतो न सिद्धसाधनमित्याक्षेपसंभवात् । व्यधिकरणासिद्धतेति । अनुभूतिव्यतिरिक्तमपरमार्थः, अनुभूतेरनुवर्तमानत्वादित्युक्ते हेतोः पक्षा-वृत्तिवादसिद्धिः स्यादित्यर्थः ।
तृतीर्येऽशतः(शे) सिद्धसाध्यतेति । अनुभूतिरूपसत्तद्वयतिरिक्तौ परमार्थापरमार्थौ, अनुवर्त-मानत्वादित्युक्तावित्यर्थः ।

आश्रयासिद्धिमेवोपपादयति-सच्छब्दवाच्यस्येति । व्यावृत्तशब्दवदुपपन्न इतीति । इतरथा "घटो व्यावृत्तः', "पटो व्यावृत्तः' इत्यनुगतव्यवहाराद्व्यावृत्तिशब्दितमनुवृत्तपदार्थान्तरं सर्वाध्यासाधिष्ठानभूतमुपेयं स्यात् ।
तथा "स्वपुष्पमसत्', "नृृङ्गमसत्' इत्यनुवृत्तव्यवहारादनुवृत्तेऽसति व्यावृत्तनृृङ्गादिकं कल्प्यमिति स्यादिति भावः ।

तदसंभवे परोक्तमनुमानमिति । अनुभाव्यत्वासंभवसाधनं परोक्तमित्यर्थः । शब्दार्थसंबन्धग्रहणायोगादिति । प्रयोज्यवृद्धस्य गवानयनप्रवृत्त्या तदीयकार्यताज्ञानमनुमाय तत्र पदशक्तेर्ग्राह्यत्वादिति भावः ।
अतीतानुभवव्यावृत्त्यर्थमिति । अतीतानुभवे तल्लक्षणातिव्याप्तिनिवृत्त्यर्थमित्यर्थः । अतीतदशायां प्रकाशस्यावर्तमानतया शानजभिहितप्रकाशवर्तमानत्वस्याभावात् सत्तयैव प्रकाशमानत्वस्य तत्रासंभवः प्रसज्येतेति तद्व्यावृत्त्यर्थमित्यर्थः । यद्यष्यतीतानुभवस्येति । अयमर्थ-अतीतानुभवस्थले स्वसत्ताया एवाभावात् प्रकाशाव्यभिचारिस्वसत्ताकत्वमस्त्येव; अतीतदशायामवस्थाविशेषविशिष्टस्वरूपस्यैवाभावाल्लक्षणस्य नाव्याप्तिः - तथाप्यर्थविशेषव्युत्पादनाय वर्तमानदशायामित्युक्तमिति । अयमत्रान्वयः-ज्ञानान्तरमन्तरेण प्रकशानुपपत्तेः प्राप्तस्यातीतानुभवे लक्षणाभावस्य सत्तयेति पदेनैवार्थाद्व्यवच्छेदसिद्धेर्वर्तमानदशायामिति निरर्थकमिति । नेति उपाधित्वनिरासाय पक्षे तत्प्रस- ज्जय-तीति ।
अननुभूतित्वलक्षणसाध्यव्यापकस्याज्ञानाविरोधित्वस्यानुपाधित्वस्फोरणाय-साधनव्यापकत्वं पक्षवृत्तित्वप्रसज्जतेन दर्शयतीत्यर्थः । अनुभूतेरनुभाव्यत्वेऽननुभूतित्वस्येति । अनुभूतिरनुभाव्यत्वे आपाद्यमानस्याननुभूतित्वस्येत्यर्थः । समीपस्थैं- रिति । उपेत्युपसर्गवशात् समीपस्थैरित्यर्थलाभ इति भावः ।

संविदनुत्पत्त्यादिनिरसनम्

तदानीमित्यभावविशेषणमिति । तदानीं तनाभावमित्यर्थः । भिन्नकालीनाभावावगाहने विरोधस्याभावात्; "न ह्यनुभूतिः स्व-समकालवर्तिनमेव' इत्युत्तरभाष्यस्याप्रसक्तप्रतिषेधत्वापातादिति भावः । नेति प्रतिज्ञाऽध्याहर्तव्येति । उक्तविकल्पपक्षानुगुणा प्रतिज्ञेत्यर्थः । अयं भावः-अनुभूतेः स्वसमकालवर्तिग्रहणनियमो न ग्राह्यसामान्यप्रयुक्त इति

वा, न ग्राहमानुभूतिस्वभावप्रयुक्त इति वा प्रतिज्ञेति । ग्राह्यविशेषपक्षं दूषयितुं शङ्कते-अथ मन्यत इतीति । इदमुपलक्षणम्-किं ग्राह्यानुभूत्यभावस्वभावादिति द्वितीयपक्षस्यापीति द्रष्टव्यम् । दर्शनपूर्विकैव स्यादिति । अदर्शने त्वादृश इत्थं न वदेत् । अतो दृष्ट्वैव वदसीति दर्शनं सिद्धव- त्कृत्य, तच्च दर्शनं क्केत्युपालभत इति भावः । प्रत्यक्षशब्दस्य विषयसाधारण्यादाह - प्रथ्यक्षशब्देन प्रत्यक्षज्ञानमुच्यत इति । इदं च इन्द्रियजन्मन इति पदसमभिव्याहारलभ्यम् । यद्वा कर्मेन्द्रियजन्मनो गमनादिलक्षणस्य प्रत्यक्षविषयस्य व्यावृत्त्यर्थं प्रत्यक्षज्ञानमुच्यत इत्युक्तम् ।

प्रमाणप्रमाणज्ञानयोः कथं वैषम्यमिति । अयं भावः-सर्वेषां ज्ञानानं स्वसमकालवर्तिग्राहित्वनियमानभ्युपगमेऽपि प्रमाणज्ञा- नानां स्वसमकालवर्तिग्राहित्वनियमोऽभ्युपेयः; इतरथा प्रमाणाप्रमाणव्यवस्था न स्यात् । प्रमेयाविनाभावसदसद्भावाभ्यां हि प्रमाणाप्रमाणव्यवस्था उपपाद्या । यदि प्रमेयमन्तरेणापि प्रमाणमुत्पद्येत, तदा कथं तस्य तदविनाभावः? अतः स्वसमकालवर्ति-त्वनियमोऽभ्युपेयः । अतः स्वसमकालवर्तिग्राहित्वमेवोषेयमिति । ज्ञानमात्रस्येति । प्रमाणज्ञानमात्रस्येत्यर्थः । तत्रैव नियमस्य शङ्कितत्वादिति द्रष्टव्यम् । वर्तमानविषयालाभादसमकालर्विग्राहिणामिति । अत्र सामकालवर्तिग्राहिशब्देन नञ्ःसमासः । वर्तमानविषयस्यालाभेन समकालवर्तिविषयग्रहणासंभवादसमकालवर्तिनश्च विषयत्वाभावस्य त्वयाऽभ्युपेतत्वान्निर्विषयाणा- मेषां प्रमेयस्यैवाभावेन प्रमेयाविनाभावः कथं स्यादित्यर्थः । तत्सिद्धः कथमित्यपेक्षायामिति । भिन्नकालवर्तिग्रहणेपि भिन्न-कालवर्तिनाप्रमेयेण विना कालान्तरे वर्तमानानामेषां कतं तदविनाभावः सिध्येदित्यर्थः । प्रमाणस्यार्थसंबन्ध इत्यन्वय इति । स्वसमकालवर्तिना अर्थसंबन्धोऽविनाभावो नेत्य वयः । मिथ्यात्वस्य प्रमाणं प्रत्यनीकं भवतीति । प्रमाणगतं प्रमेयमिथ्या-त्वप्रत्यनीकत्वमेव प्रमेयेणाविनाभावसंबन्ध इत्यर्थः । व्यवहितस्य समकालवर्तित्वनियमाभावस्यातःशब्देन परामर्शादष्यनन्तरनि-र्दिष्टस्य प्रमाणतयाभिमतेषु कालान्तरवर्तिग्रहणदर्शनस्य हेतुतया परामर्शो न्याय्य इत्यस्वरसादाह-एवं वार्थ इति । पूर्वस्मिन् पक्षे प्रमाणस्य प्रमेयाविनाभावः समाकल्ग्राहित्वबाधकः; अस्मान् पक्षे तस्य साधकत्वनिरासरणमिति भिदा । गवये गोसादृश्य-लक्षणादुपमानाद्गविगवयसादृश्यप्रतीतिरूपोपमितिर्जायत सति केचित् । ग सादृश्यविशिष्टपिण्डज्ञान त् "अयमत्तौ गवयशब्द- वाच्यः पिण्डः' इति संज्ञासंज्ञिसंबन्धप्रमितिरूपोपभितिर्जायति इत्यन्ये । मतद्वयमप्यनुभाषते-उपमानस्य प्रतिपन्नेत्यादिना ।

चेद्यदिशब्दयोरैकार्थ्यात् पौनरुक्तयमाशङ्क्याह - यदिशब्द इति । चच्छब्दो यद्यर्थ इति । चेच्छब्दः चेदर्थ वेत्यर्थः । अत एव तथा चेत् । इति वक्ष्यति । तथाशब्दाध्वाहारमभिप्रेत्याह-तथा चेदित्यर्थ इति । भावरूपावस्थान्तरोपलब्धिरिति । यथा घट-स्याभावः पिण्डत्वादिरूपं भावरूपमस्थान्तरम्, एवं घटज्ञानानुपलब्धिनार्म घटज्ञानोपलब्धित्वावस्थापरित्यागेन भावरूपं पटादिवस्त्वन्तरोपलब्धिरूपमेवेत्यर्थः । क्वचित् संकोचोऽपि । अत एव वक्षयति ज्ञानस्य संकोचोऽवस्थान्तरं वेति । ततश्च भाव- रूपा या अवस्थान्तरोपलब्धिर्वस्त्वन्तरोपलब्धिः; सैव घटज्ञानाद्यनुपलब्धिरिति भावः । अत्र केचित्-"ज्ञानस्य योग्यानुपलब्धि- र्नाम भावरूपावस्थान्तरोपलब्धिः । पिण्डत्वाद्युपलब्धिरेव हि घटस्य योग्यानुपलब्धिः' इति । ग्रन्थपर्यालोचनायाम्, तथोत्तरत्र, अतीतकालावच्छिन्नज्ञानाभावो नाम ज्ञानस्य संकोचोऽर्थान्तरज्ञानं वा' इति ग्रन्थस्य, "अतीतकालावछिन्नो गज्ज्ञानाभावो नाम ज्ञानस्य संकोचोऽर्थान्तरज्ञानं वा३ इति ग्रन्थस्य, "अतीतकालावछिन्नो गजज्ञानस्य योरयानुपलब्धिः' इति ग्रन्थस्य च पर्यालो-चनायां घटाभावोपलब्धिरेव घटानुपलब्धिः, गजज्ञानाभात्तोपलब्धिरेव गजज्ञानानुपलब्धिरिति प्रतीयते । न च तद्युज्यते, घटा-भावोपलम्भस्य घटापलम्भाभावस्य च भिन्नत्वात् । किंच घटाभावोपलम्भस्यैव घटोपलम्भाभावत्वे घटानुपलब्ध्या लिङ्गेन घटा-भावोऽनुमीयत इत्येतद्विरुच्येत । न ह्यभावोपलब्ध्याऽभावोऽनुमीय इति शक्यते वक्तुमिति चोदयन्ति-तन्न; उक्तरीत्या अभावो-पलम्भस्य तदनुपलब्धिरूपत्वाभावेन ज्ञानसंकोचो वा अवस्थान्तरं वानुपलब्धिः' इत्यत्रैव तात्पर्यात् ।

पूर्वग्रन्थस्य प्रागभावसमर्थनपरत्वदुत्तरग्रन्थस्यानित्यत्वसमर्थनपरत्वादेकविषयत्वाभावात् किंचेत्ययुक्तमित्याशङ्क्य, उत्तरग्रन्थानु-

सारेण पूवग्रन्थस्याप्यनित्यत्वपरत्वमभिप्रयन्नाह-ज्ञानस्य स्वावभासेति । अथ विषयप्रकाशनिरूपणमुखेनेति । विषयप्रकाश-कादाचित्कत्वनिरूपणमुखेनेत्यर्थः । अतो न साध्याविशिष्टतेति । अयं भावः-तदप्रतीतिश्च संवेदनस्य कालपरिच्छितया प्रती-तेरिति वाक्ये संवेदनस्याप्रतीतिः साध्यतया प्रतीयते; प्रतीतेः कालपरिच्छिन्नत्वं हेतुतया प्रतीयते; कालपरिच्छिन्नत्वत् कालान्तरे-ऽसत्त्वत् अप्रतीतिः प्रतीत्यभाव इत्युक्ते साध्याविशेष इत्यर्थः । इदं चोपलक्षणम्-संवेदनस्य तदप्रतीतिरित्यनन्वयश्च । न च संवे-दनस्येत्यस्य कालपरिच्छिन्नतयेत्यनेनान्वय इति वाच्यम्, प्रतीतेरित्यनेनान्वितस्य कालपरिच्छिन्नतयेत्यस्य निराकाङ्क्षत्वात् । तस्मादस्य भाष्यस्य संवेदनस्य तदप्रतीतिः घटादिसत्ताविषयव्यवहारानुगुण्याभावः प्रतीतेः कालपरिच्छिन्नत्वादित्यर्थ इति भावः । केचित्तु-कालपरिच्छिन्नतया प्रतीतेरित्यत्र प्रतीतेरित्यतदविवक्षितम्; संवेदनस्य कालपरिच्छिन्नत्वादित्येवार्थः । एवं च न तदप्रतीतिरिति साध्याविशेष इति वर्णयन्ति । अर्थापत्यन्तरमाहेति । ननु प्रत्यक्षज्ञानं स्वविषयस्य स्वसमकालवतिर्तावग-मकस्वभावमिति सिद्धम् । घटप्रत्यक्षे "इदानीं घटोऽस्ति, न वा' सति तत्काले संदेहादर्शनात् । ततश्च प्रत्यक्षं स्वयं सर्वकालवर्ति- त्वेन भातं चेत्, स्वविषयमपि सर्वकालवर्तित्तया भासयेत् स्वविषये घटादौ कालापरिच्छिन्नत्वलक्षणसार्वकालिकत्वावभासाभा- वात् ज्ञानेऽपि कालानवच्छिन्नत्वलक्षणसार्वकालिकत्वेन क्रतीतिर्नास्ति । अपितु कालावाच्छन्नत्वलक्षणानित्यत्वेनैव ज्ञानस्य प्रतीतिः । न च ज्ञाने नित्यत्वमाने हि विषयेऽपि तथात्वप्रसङ्गः; नित्यानित्यत्वौदासीत्येनैव प्रतीतिसम्भवात् इति वाच्यम्, स्वप्रकाशज्ञाने नित्यत्वधर्माभानेनित्यत्वरूपधर्मभानावश्यंभावादित्येकग्रन्थतया योजयितुं शक्यत्वात् इति चेत्-सत्यं सा यो- जना प्रतीयते, युक्तिर्न समीचीना । ज्ञाननित्यत्वे विषयस्यापि तथात्वमित्युक्ते ईश्वरप्रत्यक्षेऽतथात्वात् (स्व)व्यवहारानुगुण्य-कादाचित्कत्वमेव वक्तव्यमवशिष्यते । अत एव वक्ष्यति"अनुग्राहकतयोक्तौ भवतः' इति । पूर्वापरावधिद्वयास्वयंप्रकाशत्वा-देवानित्यत्वस्याप्रकाशे अवधिद्वयराहित्यरूपनित्यत्वस्याप्यप्रकाशः सुवच एव । कालापरिच्छिन्नत्वलक्षणनित्यत्वपक्षेऽपि कालपरिच्छेदस्यास्वयंप्रकाशत्वादेव तदभावलक्षणनित्यत्वस्य न प्रकाशोपपत्तिरित्यस्वरसादाह - यद्वा घटादिनित्यत्वप्रसङ्ग इति । अनुगतं नित्यत्वलक्षणमिति । सर्वकालसंबन्धित्वलक्षणनित्यत्वस्य कालसाधारण्याभावादिति भावः । लिङ्गादेः प्रत्यक्षज्ञानविषयत्वादिति । इदमुपलक्षणम् । "अधुनेदमतीतम्' इति ज्ञानं स्वाधारकालवृत्तिध्वंसंप्रतियोगित्वलक्षणमतीतत्व-मतीतवस्तुनि विषयीकरोति । इदमिदानींमतीतम्' इति शब्दप्रयोगस्थलेऽपि "इदानीम्' इति शब्दप्रयोगाधारकालवृत्तिध्वस-प्रतियोगित्वलक्षणमतीतत्वमेव भासते । ततश्च ज्ञानस्य नित्यत्वे सर्वस्यापि कालस्य तज्ज्ञानाधारकालतया अतीतानागतव्यव-स्थानुपपत्तिः । न चैवमीश्वरज्ञार्नेऽतीतत्वोल्लेखाद्यनुपपत्तिः स्यादिति वाच्यम्, तत्राप्यवस्ताभेदेन ज्ञानभेदमादायैवातीतत्वोल्ले- खस्य समर्थनीयत्वादित्यपि द्रष्टव्यम् । वस्तुतस्तु अनुमित्यादीनां नित्यत्वे अजन्यज्ञानत्वेन प्रत्यक्षत्वमेव स्यात् । ततश्च तद्विषयाणामपि नित्यत्वमेव स्यादिति दूषणे तात्पर्यमित्याहुः ।

निर्विषयसंविदस्फूर्तिः

अनुभवानभ्यासश्चास्मरणमात्रहेतुतया हि प्रसिद्धा इति । अस्मरणनियमहेतुया प्रसिद्धा इत्यर्थः । अनुभवानभ्यासश्चेति च- शब्दात् प्रायणनारक्लेशादिः संगृह्यते । एते निखिलसंस्कारतिरस्कृतिकरदेहविगमादीत्यत्रादिपदग्राह्या इत्यर्थः ।

"तदन्यधीरतात्पर्यं पटुत्वविरहो धियः ।

दुःखादि तीव्रमुन्मादोऽनभ्यासो दीर्घकालताः ।।

एतैश्चादृष्टवैगुण्यं कल्प्यं संस्काररोधिषुः ।

एतेष्वसत्स्वरमरणात् ज्ञानाभावोऽनुमीयतेः ।।'

इति सिध्यति (?) (सिद्धिः?) । अतो नियमशब्द इति । अस्मरणनियमहेतुभूतदेहविगमादेरभाव इत्युक्तेः अस्मरणनियमादि- त्येव वक्तुमुचितम्, न त्वस्मरणमिति । अस्मरणनियमहेतुभूतव्यासङ्गाद्यभावो यद्युच्यते, तदा अस्मरणमिति वक्तुं युज्यते । अस्मरणनियमहेतुभूतदेहविगमाद्यभावकीर्तनादस्मरणनियमादित्येव वक्तुमुचितमित्यर्थः । यद्वा अनुभवानभ्यासश्चेति चशब्दा-द्विषयानतरव्यासङ्ग उच्यते । ततश्चैते अस्मरणमात्रहेतवः । ततश्चास्मरणनियमहेतुदेविगमप्रसूतिनारकक्लेशाद्यभावेऽपि विषयान्त-
रव्यासङ्गाद्यस्मरणमात्रहेतुवशादनुभूतस्याष्यस्मरणसंभावात् तद्वयावृत्त्यर्थं नियमशब्द इत्यर्थः । उक्तंतिरस्कारकाभावे इति । उक्तंतिरस्कारकरूपप्रतिबन्धकरहितानुभवो यत्र तत्र स्मरणमित्यप्रतिबद्धानुभवस्य स्मरणं व्यापकम् । अतश्च स्मरणरूपव्यापका-भावेनाप्रतिबद्धानुभवाभावे साध्ये देहविगमादिप्रतिबन्धकाभवरूपस्य विशेषणस्य सिद्धतया विशेषणवति विशेष्टाभावः सिध्यन्,

विशेष्यरूपानुभवाभावमादाय पर्यवस्यतीति भावः । न त्वनुभवस्योक्तरिरस्कारभावायुक्तस्मरण व्यापकमिति भ्रमितव्यम्, तथा व्याप्तेरसंभवात् । अनुषङ्ग इति । न केवलमस्मरणनियमादनुभवाभाव इति प्रथमान्तसानुभवाभावशब्दस्य षष्ठयन्ततया विप-रिणमिनानुषङ्ग इत्यर्थः । अहंकारशब्दस्य महत्तत्त्वजन्याहंकारतत्त्वभ्रान्ति व्युदस्यति-अहंप्रत्ययेति । अहमिति प्रत्ययो यस्य सोऽहंप्रत्ययः-अन्तःकरणम् । अत एव वक्ष्यति, "ज्ञातृज्ञेययोरपि स्मरणं प्रत्यकारणत्वमकामेनापि स्वीकार्यम्' इति । न तु ज्ञातृविषयकज्ञानज्ञेययोरिति द्रष्टव्यम् । नन्वहमर्थस्यानुवृत्तौ प्रकाशप्रसङ्ग इत्यत्राह-प्रकाशत इति । अत्र चशब्दोऽध्याहर्तव्यः; अनुवर्तते प्रकाशते च; ततो हेतुरसिद्ध इत्यर्थः । न त्वनुवर्तते इत्यस्य प्रकाशत इति विवरणम् यथाश्रुतेऽनुपपत्त्यभावात् ।

तदालम्ब्य व्याघात्ताभिप्रायेणेति । अनुभवशब्दमात्रमालम्ब्याक्षिपतीति भावः । केवलैव संविदात्मानुभव इति भाष्ये - आत्मा-नुभव इति सप्तम्यन्ततया वैयधिकरण्येन व्याख्यानस्य क्लिष्टत्वादन्यथा व्याचष्टे-केवलैवेत्यादेरेवं चार्थ इति । धर्मिस्फुरणरूपा या संविदिति । ननु स्फुरणस्य संविद्रूपत्वे स्फुरणस्य व्यवहारानुगुण्यरूपसंविद्धर्मत्वप्रतिपादकोत्तरग्रन्थविरोध इति चेत्-न । धर्म-धर्मिणोरभेदोपचारेण स्फुरणे संविच्छब्दप्रयोगोपपत्तिरिहेति द्रष्टव्यम् । व्यवहारानुगुण्यमिति । ततश्च साश्रयत्वं सिद्धमिति भावः । ननु संविन्निर्विशेषत्ववादिनं प्रति व्यवहारानुगुण्यापरपर्यायभासमानत्वरूपस्य संविद्धर्मस्फुरणस्य संविशेषत्वसाधनम-नुचितमिति चेत्-न ।अस्मस्फुरणरूपा संविन्निर्विशेषेति वदता आत्मस्वरूपसंविदतिरिक्तस्य स्फुरणस्य निर्विशेषत्वमभ्युपेत्य स्फुरणस्य स्फुरत आत्मनश्चाभेदासंभवादित्यभ्युपेत्य तथोक्तयुत्पपत्तेः । न हि परेण आत्मरूपा संविन्निर्विशेषेत्युक्तम् । अपि-त्वात्मस्फुरणरूपैवेत्युक्तम् । अत आत्मस्फुरणस्य संविशेषत्वोपपादनं युज्यत इति द्रष्टव्यम् । स्मर्तव्यास्मरणलिङ्गेनेति । अने-नादराविशयविषयत्वमुच्यते । तेन तृणादिव्यावृत्तिः । जायमानेन चेति शेषः । ततश्च स्मर्तव्यास्मरणलिङ्गजन्येन तस्मिन् काले "न किंचिदवेदिषम्' इत्यनुभूतिरूपपरामर्शेन स्वाभावोऽपि गृह्यत इत्यर्थः ।

तद्धि उक्तिदूषणमिति । अनुभूतावनुत्पन्नवेन नित्यत्वे हि परेण प्रतिज्ञातम् । तद्विहाय भावत्वविशिष्टानुत्पन्नत्वेन साध्यत इति हेत्वन्तरपरिग्रहे प्रतिज्ञान्तरमिति यद् दूषणम्, तत् उक्तिदूषणम् । व्यभिचारस्तु अर्थ (वस्तु) दूषणम् । अतस्तदेव तर्ककुशलते-त्युद्भावनार्हमिति भावः । अस्य विशेषणस्य व्यापर्त्याभावादिति । एवं हि वदता पारमार्थिकविकारभावः साध्य इत्युक्तं भवति । ततश्च पारमार्थिकविकाररूपसाध्याभावस्योत्पत्तिरूपस्य साधनाभावस्य च व्याप्तिग्रहस्थानस्याभावाद्वयाष्यत्वासिद्धिरित्वर्थः । एतश्चोत्तरत्र स्पष्टम् ।

अनुभूत्यविभागत्वनिरासः

तस्यापरमार्थ्ये विशेषणषैयर्थ्यादिति । अनुत्पन्नत्वात् परमार्थविभागशून्या' इत्यत्र परमार्तविशेषणस्य पूर्वोक्तरीत्या व्याष्य-त्वासिद्धिसंपादकत्वादित्यर्थः । न तु, "मिथ्याभूत' इति विशेषणस्येति मन्तव्यम्, तस्याविशेषणत्वात् ।

तुळयन्यायतया दर्श-नभेदोऽपि सिद्ध इत्यर्थ इति । ननु-"दृश्यभेदसमर्तनेन दर्शनभेदोऽपि समर्थित एव, छेद्यभेदात् छेदनभेदवत्'ति कर्मभेदस्य क्रिया-भेदहेतुत्वे प्रतीयमाने किमिति तत् परित्यज्य तुल्यन्यायतयोति व्याक्यानमिति चेत्-सत्यम्, एकस्मिन् समूहालम्बने दृश्यभेद-सत्त्वेऽपि दर्शनभदाभावात् तस्य प्रवानयुक्तिव्यसंभवात्, छेद्यभेदात् छदनभदवदित्यस्य शङ्कान्तरपरिहारार्तत्वरूपयुक्तयन्तापद्भा- वाच्चैवं व्याख्यातमिति द्रष्टव्यम् । संयोगोदेरपि संबन्धिव्यङ्ग्यत्वमात्रेणेति । संबन्धिव्यङ्ग्यभेदवत्त्वमात्रेणेत्यर्थः । सबन्धी हि द्वेधेति । भेदव्यञ्जकः संबन्धीत्यर्थः; तस्यैव प्रस्तुतत्वात् । इतरथा प्रकृतानुपयुक्तत्वप्रसङ्गात् । संबन्धिव्यङ्ग्यभेदमपि वस्तु द्विवि- धम्, सम्बन्ध्यधीनसत्ताक्रमतादृशं चेति । पूर्वस्य तु स्वतो भेद एव, उत्तरस्त्वौपाधिक इति भावः ।

साध्यव्यावृत्तावपि साधनाव्यावृत्तत्वलक्षणानियतत्वमात्रमिति । साध्याभाववद्गामित्वलक्षणानियतत्वमात्रमेष । न तु पक्षत्र-यवृत्तित्वलक्षणम् । व्यतिरेवयनुमाने सपक्षस्याभावात् अनैकान्तिकमित्यस्यानियतमिति व्याख्यानं युज्यत इति भावः । न तु पराभ्युपगमादिति । ननु, "आनन्दो विषयनुभवो नित्यत्वं चेति सन्ति धर्माः । ते चापृथक्तवेऽपि पृगिवावभासन्ते३ इति परै-नित्यत्वादीनां भावरूपाणामेव ब्रह्मस्वरूपत्वमभ्युपेतमिति चेत्-न । तत्र नित्यत्वादेः कालानवच्छिन्नत्वादिरूपत्वसंभवादिति भावः । उभयत्रानुगतप्रकाशशब्दार्थमाहेति । उभयत्र चिदचितोरित्यर्थः । "ज्ञानं प्रकाशते, घटः प्रकाशते' इति व्यवहारसा-म्यादुभयसावारण्यमिति भावः ।
स्वव्यपहारसामग्र्यन्तर्भूतज्ञानवत्त्वमिति । स्वव्यवहारानुगुण्ज्ञानविषयत्वमित्यर्थः । न चास्मिन् पक्षेऽनुगम्ः; ज्ञानावेद्यत्वतदन्यान्यत्वेनानुगमसंभवात् । एतदस्वरसादेवाह - यद्वा एवं चाहुरिति । सर्वत्र व्यवहार-प्रतिसंबन्धित्वमेवानुगतं प्रकाशशब्दार्थः । तत्तु द्वेधा-क्कचित् ज्ञानविषयत्वात्, क्कचितदभेदादिति भावः । अत्र चिदचिशेषपदार्थ-

साधारणं व्यवहारानुगुण्यमिति भाष्यं चिदचिदशेषपदार्थनिष्ठं स्वव्यवहारानुगुण्यमिति व्याख्याय चिदचिदशेषपदार्थविषयक-व्यवहारानुगुण्यं चिद्गतमेव प्रकाशशब्दाथर् सति व्याचष्टे-यद्वा ज्ञानगतप्रकाशेति । व्यवहारप्रतिसंबन्धित्यं प्रति हेतुत्वरूपमिति । व्यवहारहेतुत्वरूपमित्यर्थः । व्यवहर्तव्यत्वमुभयसाधारणम् । व्यवहारहेतुत्वं तु ज्ञानासाधारणमिति भावः । प्रत्यक्तवानुकूलत्वेति । प्रत्यवत्वानुकूलत्वैकत्वविशिष्टस्वव्यवहारं प्रतीत्यर्थः ।

सदकारणकत्वं च नित्यत्वं प्रसिद्धमिति । सत्त्वे सति अकारणकत्वमित्यर्थः । सत्त्वे सतीति विशेषणमसति प्रागभावे चाति-व्याप्तिवारणार्थमिति द्रष्टव्यम् । अस्ति चेत् पक्षापात् स्यादिति । अस्मात्पक्षपातः स्यादित्यर्थः । प्रतीतिश्चेत् कस्यचिदिति । साश्रया सकर्मिका च वक्तव्येत्यर्थः । ननु भाष्यानुगुण्येन सिद्धिश्चेत् कस्यचित् किंचित् प्रतीति वक्तव्ये, प्रतीतिश्चेदिति वदतः कोऽपिप्राय इति चेत्-उच्यते-सिद्धेरकमर्कतया सिद्धिश्चेत् सर्कर्मिका स्यादित्युक्तेरयोगात् । किंच सिद्धिश्चेत् कस्यचित् कं (किं) चित्प्रतीत्युक्ते घटस्य सिद्धिर्देवदत्तं प्रतीति वक्तव्यम् । घटो दवदत्तं प्रति सिधेयतीति हि वक्तुमुचितम् । न तु देवदत्तो घटं प्रति सिध्यतीति । ततश्च "कस्यचित् पुरुषस्य किंचिदर्थजातं प्रति सिद्धिरूपतया' इत्युत्तरभाष्यविरोधापत्तिः । अतः सिद्धिाब्दः प्रती-तिमात्रपर इति प्रदर्शनार्थं सकर्मकप्रतीतिशब्दो व्यवहृत इति द्रष्टव्यम् । ननु भाष्ये संविच्चेत् कस्यचित् किंचित् प्रत्येव भवतीति वक्तुं सुशकत्वात् सिध्यति चेदित्येवं प्रणाड्या प्रतीतेः सिद्धित्वसमर्थनपुरस्कारेण दूषणे न हेतुं पश्याम इति चेत्-न-तस्यो-क्तिमात्रभेदरूपत्वेनादोषात् । कस्यचिदित्युक्तज्ञात्रपेक्षाप्रतिक्षेपं शङ्कत इति । कस्येति निर्दिष्टसिद्धिप्रतिसंबन्ध्यपेक्षाप्रतिक्षेपं शङ्कत इत्यर्थः । आत्मानं प्रतीत्युत्तरग्रन्थानुसारात् आत्मन इति चतुर्थीमभिप्रेत्याह-आत्मानं प्रतीति । यद्यपि कस्य सिद्धि-प्रतिसंबन्धिन इत्यपेक्षायामात्मन इत्युक्ते आत्मासिद्धेप्रतिसंबन्धीत्यर्थलाभ त् तदर्थमात्मानं प्रतीति न व्याख्येयम् । किंच कस्येत्यस्योत्तरं षष्टयन्तमेव भवितुमर्हति, न द्वितीयान्तम्-तथापि स्पष्टार्तमुक्तमिति द्रष्टव्यम् । आत्मशब्दः स्ववाचीति । आत्मशब्दस्य ज्ञातृत्वलक्षणसिद्धप्रतिसंबन्धिपरत्वे कः सिद्धिप्रतिसंबन्धीति प्रश्नस्य सिद्धिप्रतिसंबन्धीत्युत्तरमसंगतं स्यात् ।

अतोऽन्यप्रतिद्वन्द्विपर इति भावः । न चार्थजातं प्रति सिद्धिरूपस्य कथमात्मानं प्रत्यपि सिद्धिरूपत्वमिति वाच्यम्, एकस्य प्रतिसंबन्धितया प्रतिशब्दार्थीभूतलक्षणत्वम्, अपरस्य विषयतया लक्षणत्वमिति "आत्मानं प्रति, अथजातं प्रति' इति च सुव- चमिति द्रष्टव्यम् । सिद्धिप्रतिसंबन्ध्यात्मा क इति । आत्मशब्दस्य स्वपरत्वेन व्याख्याततया तदंशस्याक्षेप्तुमशक्यत्वात् सिद्धि-तिसंबिन्धत्वमात्मशब्दनिर्दिष्टस्य स्वस्य कथमित्यर्थः । स्वस्यैव स्वप्रतिसंबन्धित्वे विरोधादिति भावः । न त्वात्मत्वमष्याक्षेष्य-कोटिप्रविष्टमिति द्रष्टव्यम् ।

संविदात्मत्वनिरासः

संविदात्मभावस्येति । अ◌ात्मशब्दः सिद्धिप्रतिसंबन्धिपरः; न तु स्वपरः;
अन्यत्वप्रतिसंबन्धित्वस्योपपादननिरपेक्षत्वादिति द्रष्ट- व्यम् । धर्मधर्मिभावेति । अतो निष्प्रकारकज्ञानस्य नावकाश इति भावः । इह किमर्थ इति । किमुत्पत्तिवाची, उत ज्ञप्तिवाची- त्यर्थः । कर्तुरपि प्रत्यभिज्ञाविषयत्वादिति ।
ननु "पूर्वं मयानुभूतो यः, स एवायम्३ इति प्रत्यभिज्ञाया पूर्वानुभूतवि◌ेयाभेदस्य पुरो-वर्तिनि सिद्धावपि कथमनेनानुभवित्रभेदसिद्धिः? तदानीमनुभवितुश्च मदर्थस्य, इदानीमनुभवितुश्च मदर्थस्याभेदाविषयत्वेन भेदेऽप्यस्याः प्रतीतेः संभवात् । न चान्यानुभूतेऽन्यस्मरणासंभवादभेदसिद्धिरिति वाच्यम्, तर्ह्यभेदस्तया युक्तया सिध्यतु; न तु प्रत्यभिज्ञाप्रत्यक्षेण । यदि च तावन्मात्र एव संरंभस्तर्हि वक्ष्यमाणायाः प्रत्यभिज्ञाश्रायत्वयुक्तेरेव प्रमाणीकरणसंभवात् प्रत्यभि-ज्ञाविषयत्वस्य प्रमाणीकरणमयुक्तमिति चेत्-न; २यः पूर्वं मयानुभूतः, स एवायमर्थस्तेनैव मयानुभूयते, इति प्रत्यभिज्ञायाः प्रमा-णीकरणसंभवादित्यत्र तात्पर्यात् । उत्पत्तिस्थिती सिद्धे इति । "जानामि' इति ज्ञानानुकूलकृतिमत्त्वप्रतीतेरुत्पत्तिप्रतीतिः, लटा धात्वर्थवर्तमानत्वप्रतीतेः स्थितिप्रतीतिरिति भावः । ननु "जानामि' इत्यादौ धात्वर्थाश्रयत्वमेव प्रतीयते; न तु तदनुकूल-कृतिमत्त्वम् । अत एव नित्यज्ञानाश्रयस्यापि परमात्मनः "वेदाहं समतीतानि' इति ज्ञानाश्रयत्वप्रतीतिरिति यद्यपरितोषः, तर्हि "मम ज्ञानमुत्पन्नम्' इति प्रतीतिरुत्पत्तौ प्रमाणीकरणीया । ज्ञातुरेव ममेत्युक्तिरिति । तृचः कर्तृत्वार्थकत्वेनानन्तरकालोत्पन्न-त्वप्रतीतेरिति भावः । निरोधो नाम पटसंविदिति । यद्यष्युत्पत्तेः प्रथमक्षणयोगित्वरूपत्ववत् विनाशस्य चरमक्षणयोगिवमपि सुवचम्-तथाष्युत्तरोत्तरावस्थासबन्धस्यैव पूर्वपूर्वावस्थाविनाशत्वमिति द्रष्टव्यम् ।

आत्मा हि प्रतिसंधत्त इति । न त्वन्तःकरणमिति शेषः । अनुभूतेरात्मत्वे अनुभवित्रभेदप्रतिसंधानमनुभूतेः कथं स्यादिति भावः । उभयाभ्युपेता संविदेवेति । भाष्ये ज्ञातुरुभयानमिमतत्वं प्रतीयते । मृषावादिभिश्च तदभ्युपगमात्तदीयशङ्कापरिहारपरत्वमयुक्तमिति

ज्ञातृस्वरूपानभ्युपगन्तृबौद्धैकदेशिमतं प्रसङ्गान्निराकरोतीत्याह-बौद्धैकदेशिभिरिति ।
उपलब्धिपराहतत्वात्संविदात्मत्वमनु-पपन्नमिति । संविद एवात्मत्वम्, तद्व्यतिरिक्तस्यात्मत्वाभाव इत्येतस्य तद्व्यतीरिक्तोपलब्धिपराहितत्वादित्यर्थः । अत एव- अस्तु ज्ञातुरप्युपलम्भः । नैतावता संविदत्मत्वममुप'लब्धिपराहतम् । न हि संविदनात्मेति कश्चिदुपलम्भोऽस्तीति चोद्यं पराकृतं वेदितव्यम् । एतादृशक्लिष्टार्थाश्रयणप्रसङ्गपरिहाराय मृषावदिशङ्कापरिहारपरतया व्याचष्टे-यद्वा संविदः परमार्थत्वेनेति ।

अहमर्थात्मत्वसमर्थनम्

अस्मत्प्रत्ययत्वेन पराभ्युपगत इति । मृषावादिमत्रेपि "अहम्' इति प्रत्ययरूपेऽस्मत्प्रत्यये चिदचिदंशद्वयभानाभ्युपगमाद्यया श्रुते- ऽपि न दोष इति द्रष्टव्यम् । अन्वयित्रयमिति । यद्यपि "अनुभूतिरात्मा प्रत्यक्तवात्', "अनुभूतिः प्रतीची स्वयंप्रकाशत्वात्', अनुभूतिः स्वप्रकाशा, अभुभूतित्वात्' इति व्यतिरेकिक्रयवत् "अहमर्थो नात्मा पराक्तवात्' "अहमर्थः पराक् ज्ञानाधीनप्रका- शत्वात्' "अहमर्थो ज्ञानाधीनप्रकाशः चिद्ययतिरिक्तत्वात्' इत्येवमुत्तरोतरस्य पूर्वपूर्वसाधकतयोपन्यास एव सुश्लिष्टः-तथापि

साधनकमवैचित्रप्रदर्शनार्थमेवमुक्तमिति द्रष्टव्यम् । भाष्ये-चिन्मात्रातिरेकी युष्मदर्थ एवेति । युष्मदर्थ एव अनात्मैवेत्यर्थः । "स आत्मा' इत्यस्य प्रतिनिर्दोरूपत्वादिति द्रष्टव्यम् । इतरानुमानचतुष्टयमिति । "अनुभूतेश्चित्त्वात् स्वप्राशत्वम्', "अहमर्थस्य चित्त्वादस्वप्रकाशत्वम्' इत्यनुमानद्वयं विहाय,"अनुभूतेः स्वप्रकाशत्वात् प्रत्यवत्वम्', "प्रत्यक्तवाच्चात्मत्वम्' इत्यनुमानद्वयस्य च, "अहमर्थस्यास्वप्रकाशत्वात् परोक्तवम्', "ततश्चानात्मत्वम्' इत्यनुमानद्वयस्य च दूषणमाहेत्यर्थः । ननु "अहं जानामि' इत्यत्र ज्ञानशेषित्वलक्षणप्रत्यक्तवस्य कथं भानमित्याशङ्कयाह-धर्मितयावभासादेवेति । ननु "अहम्' इत्यत्र चिदंश्रोपि भासत इति वदन्तं प्रति नेदमुत्तरम्, अंशद्वयेऽपि वृत्तिज्ञानाश्रत्वप्रतीतेरिति चेत्-न;"अहम्' इत्यत्रांशद्वयानुपलम्भात् । उप- लम्भे च चित्रोप्यहमर्थतया अहमर्थानात्मत्वोक्तिर्विरुध्येतेति भावः ।

प्रत्यक्तवं विपरीतसाधकं चेत्याहेति । अहमर्थात्मत्वसाधकमित्यर्थः । स्वंप्रकाशत्वहेतोः सत्प्रतिपक्षत्वं चेति । तुल्यबलत्वा- भावात् बाधितार्थत्वमित्यत्र तात्पर्यम् । इतरथा प्रत्यक्तवहेतोरसिद्धिदार्ढ्यमिति पूर्वग्रन्थविरोधात् । यद्वा विशेषः(ष) दर्शनाभि- प्रायेण सत्प्रतिपक्षतोक्तिरिति द्रष्टव्यम् । संवित्प्रत्यत्तवहेतोरसिद्धिश्च सिद्धेति । पूर्वमहमर्थव्यतिरिक्तत्वाहतुना असिद्धिरुक्ताः; अधुना अहंप्रत्ययाविषयत्वहेतुतेति भेदः । यद्वा संवित्प्रत्यक्तवसाधकस्वप्रकाशत्वहेतोर्न्याष्यत्वासिद्धिश्च सिद्धेत्यर्थः । अतो न पौनरुक्तयप्रसङ्ग इति द्रष्टव्यम् । यत्संबन्धित्वेन दुःखज्ञानमिति । उद्वेगहेतुर्भवतीति शेषः न हि शास्त्रं श्रवणादिनिरपेक्षमिति । यद्यपि कृतसाङ्गाध्ययनस्य शब्दोऽर्थप्रत्यायको भवत्येव, तथाप्यनुष्ठानपर्यवसायिप्रमितिजनकत्वं शास्त्रस्य श्रवणादिसापेक्षम् । श्रवणं च बुभुत्साधीनम् । स च पुरुषार्थत्वपर्यवसायित्वावीनेति भावः । ज्ञातव्यस्येति । मुमुक्षुज्ञातव्यस्येत्यर्थः । अहमर्थस्य नियत्वकथनमपीति । यद्यपि, 'नात्मा श्रुतेः' इत्यत्राहमर्थस्य नित्यत्वं न साधितम्, अपि त्वात्मनः-तथापि तस्यात्मत्वं सिद्धि-मित्याभिमानेन तथोक्तमिति द्रष्टव्यम् ।

ज्ञानस्वरूपत्वज्ञानगुणकत्वे

तद्व्यतिरिक्तवादहमर्थ इति । भाष्ये न चासौ ज्ञाताहमर्थः इत्यत्र ज्ञातेति हेतुगर्भं विशेषणम् । वक्ष्यति च-न हि दीपादेः स्व-प्रभावलनिर्भासितत्वेनाप्रकाशत्वमिति । ततश्च स्वधर्मभूतज्ञानप्रभावलनिर्भास्यतया कथं ज्ञातृरनन्यप्रकाशत्वमित्याक्षिष्या-नात्मत्वसाधकहेतोरन्याधीनप्रकाशत्वस्यासिद्धिमभिप्रायन्नाहेत्यर्थः । तच्च कथमित्यत्राहेति । प्रकाशाश्रयस्य तस्यानुभूत्यादि-शब्दितसकर्मकसकर्तृकज्ञानरूपप्रकाशत्वं कथमित्याक्षेपभिप्रायः । चैतन्यं ज्ञानत्वमिति । व्यवहारानुगुणत्वमित्यर्थः । आत्मनि ज्ञानाब्दस्यस्वप्रकाशत्वाभिप्रायत्वात्, आत्मनि प्रयुज्यमानो ज्ञानशब्दः स्वप्रकाशे रूढ इत्युक्तत्वाच्च व्यवहारानुगुणत्वलक्षण-स्वप्रकाशत्वमेव ज्ञानशब्देनेह विवक्षितम् । तच्चातुभूतिसंविदादिशब्दानभिलापनीयस्याष्यकर्मकस्यकर्तृकस्य युज्यत इति भावः । अहमर्थस्य चैतन्यस्वभावत्व इति । "अन्नायं पुरुषः स्वयं ज्योतिः' इत्यादिवाक्यैरनन्याधीनप्रकाशत्वलक्षणचैतन्यस्वभावत्वे प्रमाणं दर्शयिष्यन्, प्रकाशगुणकस्य कथमनन्याधीनप्रकाशत्वं सजातीयान्वयदर्शनरूपयोग्यताया अभावादित्याशङ्कय प्रका-शत्वस्वभावस्य प्रकाशगुणकत्वं दीपादौ दृष्टतिि योग्यतां प्रदर्शयतीत्यर्थः । न तु स्वप्रकाशत्वलक्षणचैतन्यस्वभावत्वमिति मन्त- व्यम् । एतेन-"अहमर्थस्य चैतन्यस्वभावत्वे श्रुतिप्रमाणं वक्ष्यन्' इति ग्रन्थपर्यालोचनायां चैतन्यस्वभावत्वमेवानन्याधीनप्रकाश-त्वमिति प्रतीयते । "यः प्रकाशस्वभावः सोऽनन्याधीनप्रकाशः' इति तर्कस्यानन्यादीनप्रकाशत्वप्रतिपादकश्रुत्यतुग्राहकत्वस्यैव युक्ततया चैतन्यस्वभावत्वानन्याधीनप्रकाशत्वयोरैक्यावश्यंभावात् । ततश्चाहमर्थोऽनन्याधीनप्रकाशः स्वप्रकाशत्वादिति साध्यसाधनयोरविशेषः, द्वयोरपि चैतन्यस्वाभावत्वरूपत्वात्-इति शङ्का परास्ता, चैतन्यस्भावत्वस्यैकरूपत्वाभावात् । केचित्तु-अहमर्थोऽनन्याधीनप्रकाशः स्वयंप्रकाशत्वादिति पूर्वोक्तानुमाने व्याप्तिं दर्शयतीत्यापि व्याचक्षते । न च-"तत्र स्वयंप्रकाशत्वं हेतुः, इह तु प्रकाशस्वभाव इत्युच्यत' इति वैरूप्यं शङ्कयम्, द्वयोरष्येकत्वात् । स्वपयं

प्रकाशत्वादित्यस्यापि प्रकाशस्वभावत्वादित्ये- वार्थ इति । तस्मिन्नपि व्याख्याने न दोषः । आत्मदीपेति । अत्र समाहारगर्भो द्वन्द्वः । अतश्चतुर्ष्वपि न द्विवचननिर्देशानुपपत्ति- रिति द्रष्यव्यम् । यादृशमिति साक्षात्परं-परौदासीन्येन व्यवहारानुगुणत्वमित्यर्थः । यद्वा आत्पदीपयोर्धर्मभूतज्ञानप्रभयोरित्यर्थः । तादृशमिति । दीपतत्प्रभयोरौज्जापल्यम्, आत्मधर्मभूतज्ञानयोः स्फुरणमित्यर्थः । साध्यवैकल्यनाशङ्कयेति । इदमुपलक्षणम् - साधनवैकल्यमित्यपि द्रष्टव्यम् । रूपितत्समवेतार्थेति । द च रुपितत्समवेतार्थयोः रूपपेक्षेया-धर्म्यन्तरत्वात्तेन कतं तद्वारणमिति वाच्यम्, धर्म्यन्तरशब्दस्य स्वाश्रयेतरद्रव्यार्थकत्वस्योत्तरग्रन्थे स्पष्टत्वात् । चैतन्यस्वाभावतेत्यादि भाष्यमिति । यद्यपि "यः प्रकाशस्पभावः' इत्यारभ्य तर्करूपत्वं प्रागुपन्यस्तम्, तथापि चैतन्यस्वभावतेत्यारभ्य तर्करूपत्वेऽपि विरोधाभावादेवमुक्तमिति द्रष्टव्यम् । ज्ञानधर्मकत्वज्ञानस्वरूपतोक्तेरिति । हेतुसाध्ययोः प्रदर्शनादिति भावः । ननु कर्पूरादीनां द्वरोपलब्धगन्धानामिति (दूयोपलब्धगन्धानामिति) हेतुगर्भविशेषणम् । कर्पूरादीनां द्वरोपलब्धगन्धत्वादि- त्यर्थः । अतश्च यत् कैश्चिदुक्तम्-"द्वरोपलब्धगन्धानामित्येतत् प्रक्षिप्तम् । तथाहि सति समुद्गसंपुटादीति ग्रन्थस्याप्रसक्तप्रतिषेधता-प्रसङ्गात्' इति-तन्निरस्तम् । अत्र समुद्गसंपुटयोः सामान्यविशेषरूपेणार्थभेदसत्त्वान्न पौनरुकत्यशङ्का । उभययादिसंप्रतिपन्नाना-मेवेति । उपलभ्यमानगन्धश्रयणामेषामेवावयवानां निश्चलतयावस्थितिमात्रमेव लघु; न तु-तेषामवयवानां संयोगविशेषरूप उपनिषातः, तद्धेतुकधर्म्यन्तरोत्पत्तिः, तदुत्तरक्षणे विशरणम्, तदधीनधर्मिनाशः, पुनरपि तदुवरक्षणे पुञ्जीभावेन धर्म्यन्तरोत्पत्ति-रित्यादिकल्पनम् । अतो न गौरवमिति भावः । अकृतिरिति । निर्व्यापारः, निश्चल इत्यर्थः । वायुतेजःप्रभृतिभिः संबन्धादिति । रश्मिमत्त्वे तेज संबन्ध एव प्रयोजक इति द्रष्टव्यम् । गत्वगणां रश्मीनामिति । कपालं निर्मिद्य सलिले प्रविष्टानामपि ततो-ऽचिरादूर्ध्वनिर्गमनमेव स्यात्; न तु तत्र विश्रम इति भावः । अग्न्यवयवसंक्रान्त्यैवौष्णयोपलम्भ इति । विशरणमन्तरेणै-वाग्निसहचरिताग्न्यवयवसंक्रान्त्यैवौष्ण्योपलम्भं इत्यर्थः; "आतपतप्तेष्वपि न किरणविशरणादवयवसंक्रम' इत्युत्तरग्रन्थानुसा- रात् । केचित्तु-अग्नितप्ते विशीर्णावयवसंक्रमणमभ्युपेतम् । अत एव हि सिद्धं नः समीहितम्, तेषामेव विशीर्णावयवानां प्रभा-त्वावगमादित्याशङ्कय निषिध्यते "सलिलादौ सङ्क्रमन्तः' इत्युत्तरग्रन्थेनेति वर्णयन्ति । तदुपात्तमुक्ताग्न्यवयवकार्यमिति प्रती- यत इति । अत्र केचित् - सौर्यरश्मीनां संतापहेतुत्वस्याग्न्यवयवद्वारकत्वेऽग्नीनां संतापनहेतुत्वमादित्यरश्म्यवयवानुप्रवेशकृत- मिति किं न स्यात्? उभयोरपि परस्परानुप्रवेशस्य प्रामाणिकत्वात् । तस्मादष्युभयोरष्युष्णत्वाविशेषात् संतापहेतुत्वमेव वक्तव्यम् । न त्वन्यतरस्यान्यतरद्वारकत्वम् । न हि "वायुर्धूलिं वर्षति शोषयति' इत्युक्ते शोषणस्यापि किंचिद् द्वारतयापेक्षितम् । न चाग्नीनां दिवापि तापहेतुत्वदर्शनात् । तदा सूर्यरश्म्यवयवानुप्रअवेशाभावात् स्वत एवाग्नेस्तापहेतुत्वमिति वक्तुं शक्यम्, "रश्म्यनुसारी' इति सूयोक्तन्यायेन रात्रौ सूर्यरश्मीनां संतापहेतुत्वस्य सिद्धतया तदानीमग्न्यनुप्रवेशाभावात् संतापहेतुत्वं न स्यादिति साम्यात् । अग्न्यवयवादीनामनुप्रवेश त् सौरकिरणानामनुप्रवेशे दोषाभावाच्चेत्यपि द्रष्टव्यम् (वदन्ति?) ।

ननु ष्लोषणद्रवीभूतेति । अत्र केचित्-अयं ग्रन्थः ऊर्ध्वमुद्गग्येति ऊर्ध्वगमनतिर्यग्गमनस्वभावविरोधप्रदशर्कभाष्यस्यावतारिका; न तु विशरणपिण्डीभावस्वभावविरोधप्रदर्शक्स्य । न हि विशरणस्वभावेति पूर्वभाष्यस्य तत्पूर्वमेवावतारितत्वात् । अतश्च ऊर्ध्वमुद्गम्येतीति प्रतीकग्रहणं युक्तमिति वदन्ति । ऋजुर्दश एव छायायोगादवगम्यत इति । यदि प्रभाय ऋजुप्रसरणनियमो न स्यात्, तदा दीपप्रभाव्यवधायकस्तम्भान्तरितान्वकारस्थले प्रभाया वक्रमार्गेण वायुनीतपांसूनामिव गमनप्रसङ्गेन तत्रत्यान्ध-कारेऽष्यार्जवं न स्यादित्यर्थः । ननु तिरोधायकपदार्थं प्रति ऋजुप्रदेश एव छायायोगे नियमो नास्ति; तथा हि सति व्यवधायकस्य पदार्थस्य दीपसंनिकृष्टत्वे पृथ्वग्रा सूक्ष्मसूला छाया नोपलभ्येतेत्यत्राह - छायावैपुल्यमिति । छायापृथ्वग्रन्वं निरुप्यमानरश्मीनां पृथ्वग्रसूक्षममूलत्वनिबन्धनमित्यर्थः । अयं भावः- यावद्देशप्रसरणशीलाग्रवन्तो

रश्मयो निरुध्यन्ते तावद्देशप्रसृता छाया भवतीति । उत्पत्तिविनाशसामग्रीभ्यामिति । अयमिहनुमानक्रमः - द्वितीयादिवर्त्यवयवाग्निसंयोगो दीपोत्पादकः वर्त्यवयवाग्निसयंयोगत्वात्, प्रथमवर्त्यवयवाग्निसंयोगात् । प्रथमवर्तिकावयवनाशो दीपनाशहेतुः, वर्तिकावयवनाशत्वात् चरमवर्तिकावयवनाशवदिति । भाष्ये औष्णयाधिक्यमित्याद्युपलब्धिव्यवस्थाष्यमिति । इदमुपलक्षणम्-औष्ण्याधिक्यं न प्रभाधर्मः, अपितूद्भूतस्पर्शानां तत्सहचरि- तानां तेजोवयवानां धर्म इत्यपि सुवचमिति द्रष्टव्यम् । अनेन पक्ष्यमाणश्रुतिवाक्य इति । ननु ज्ञानादिव्यपदेशस्य स्वप्रशाशत्व-

मादाय निर्वाहः । स्वप्रकाशत्वस्य तु चैतन्यस्वभावत्वमादाय निर्वाहः; चैतन्यम्बभावता हि स्वप्रकाशतेयुपपादनात्; अतोऽन्यो-न्याश्रय इति चेत्-न; चैतन्यस्वभावत्वमित्यत्र चैतन्यलक्षणज्ञानत्वं व्यवहारानुगुणत्वमात्रमेव, न तु संविदनुभूत्यवगत्यादिशब्द-प्रवृत्तिनिमित्तत्वमभिप्रेत्येति पूर्वोक्तत्वाददोषात् ।

व्यतिरेकशब्देन निःशेषग्रहणं कृतमिति । अन्तरङ्गः कृत्स्नः सैन्धवघन इत्यपेक्षया बहिरङ्गव्यतिरिक्तः, कृत्स्नः सैन्दवधन इत्युक्ते, असंकुचितसर्वान्तरङ्गप्रतीतिरनुभवसिद्धेति भावः ।

स्वसंबन्धितया प्रतीतमिति । स्वसंबन्धाप्रतीतौ स्वसंबन्धितया अप्रतीतमित्यन्वयः । ज्ञानान्तरवेद्यत्वं स्यादिति । ज्ञातृज्ञान-संबन्धविषयकज्ञानस्य संबन्धिभूतज्ञातृज्ञानविषयकत्वावश्यंभावादिति भावः । नन्वेवं ज्ञानत्ववैशिष्टयमात्मनि च प्रत्यकत्वा-नुकूलत्वैकत्ववैशिष्टयं कथं भायात्? वैशिष्टयानुयोगिनः स्वस्य स्वविषयत्वासंभवादित्यपि वक्तुं शक्यमिति चेत्, तस्याष्याक्षेप-स्येष्टत्वात् । संबन्धविषयकज्ञानेन सह ज्ञातृसंबन्धस्यापीति । ज्ञातृव्यवसायसंबन्धविषयकानुव्यवससायेन सह ज्ञ तुः संबन्ध- स्यापि वेद्यत्वायानुव्यवसायानुव्यवसायः स्वीकतर्व्य इत्यर्थः । अहमर्थो हि विशेष्यतैकस्वभावः स्वात्मनामुपस्थापयतीति । न च प्रत्यवत्वानुकूलत्वैकत्वभिन्नात्मधर्मग्रहे आत्मनः सामर्थ्याभावात् कथं विशेष्यत्वस्य ग्रहणमिति वाच्यम्, विशेष्यत्वस्य स्वभावानतिरिक्तत्वेन ग्रहणसंभावात् । न च विशेषणत्वविशेष्यत्वस्वभावग्रहणेऽपि परस्परनिरूपितत्वाग्रहात् कथं विशिष्टव्य- वहार इति वाच्यम्, परस्परनिरूपितत्वासंसर्गाग्रहस्यैव संसर्गग्रहकार्यजनकत्वात्, तस्यापि तदुभयस्वरूपत्वाद्वा ग्रहणोपपत्तेः । ननु प्रत्यक्पदजन्योपस्थितेरात्मविषयत्वं वक्तव्यम्, तत्र प्रकाशद्वयस्याभ्युपगन्तव्यत्वात् । तत्रावेद्यत्वलक्षणस्य स्वप्रकाशत्व-स्यास्मदिष्टत्वाभावात् प्रकाशद्वयसत्त्वे न दोष इत्येव परिहर्तव्यमिति चेत्-सत्यम्,"घटमहं जानामि' इति ज्ञानं चक्षुरिन्द्रियज- न्यम्; न तु नैयायिकमत इवानुव्यवसायरूपं मनोजन्यम् । न हि चक्षुर्जन्यज्ञान आत्मनो विषयत्वं संभवति । अतोऽहमित्येव धर्मी स्फुरति । घटज्ञानांशः स्वप्रकाशतया भासत इत्येव वक्तुमुचितमति भावः । जडत्वप्रयुक्तम् हि तत्रेति । जडस्थलीयसहा- वभास एवैकज्ञानगम्यत्वप्रयोजक इत्यर्थः ।

व्युत्पत्तिनिमित्तमस्त्विति । यथा "वासस्वी देवदत्तपदवाच्यः' इत्यत्र वासो देवदत्तपदव्युत्पविदशायां निमित्तमेव, न तु शक्यको-टिप्रविष्टम् - तथेत्यर्थः । धर्मभूतज्ञाने सावकाशोऽस्मन्मत इति । ननु परमत्रेपि "ज्ञायतेऽनेन' इति व्युत्पत्त्या अन्तःकरणवृत्ति-र्ज्ञानमिति वृत्तिज्ञाने संबन्धिशब्दः सावकाश इति चेत-न । जडायामन्तःकरणवृत्तौ ज्ञानत्वोक्तेरसंगतत्वात्; भावप्रत्ययान्तज्ञान-पदवाच्य एव संबन्धित्वव्यवहाराच्चेति भावः ।

उत स्वस्मै स्वयंप्रकाशमानत्वमिति । अत्र केचित्-स्वस्मै भासमानत्वमिति तृतीये विकल्पे संविदि असिद्धया दूषिते सति स्वस्मै स्वयंभासमानत्वमिति चतुर्थविकल्पस्योत्थानासंभवेन, "तस्मात् स्वात्मानं प्रति स्वसत्तयैव सिध्यन् अजडोऽहमर्थ एवात्मा' इति भाष्यस्य चतुर्थविकल्पदूषणत्वं न युक्तम् । तस्मादित्यादिभाष्यस्य पूर्वप्रस्तुतविकल्पदूषणोपसंहारे स्वरसस्य पक्षान्तरप्रतिक्षेपक-परतया व्याख्यानमपि क्लिष्टम् । तथा तस्यैव भाष्यस्य ज्ञानकर्मतामन्तरेण व्यवहारानुगुणत्वं ज्ञानान्तरनिरपेक्षप्रकाशत्वमित्वेव-

विधपञ्चमपक्षविकल्पद्वयनिरसनपरत्ववर्णनमपि क्लिष्टम् । न हि "तस्मात् स्वात्मानं प्रति स्वसत्तयैव सिध्यन्नजडोऽहमर्थ एवात्मा' इति भाष्यं ज्ञानकर्मतामन्तरेण व्यवहारानुगुणत्वरूपपञ्चमपक्षविकल्पस्य

दूषणीभवितुमर्हति । तस्मिन् हि पक्षेऽहमर्थे एव व्य- भिचार उद्भाव्यः, न त्वहमर्थ एवात्मेति । ज्ञानकर्मतामन्तरेण व्यवहारानुगुणत्वस्याहमर्थ इव संविद्यपि सत्त्वेनाहमर्थोऽप्यात्मेत्येव वक्तुमुचिततया "अहमर्थ एवात्मा' सति वक्तुमचितत्वात् । ततश्च स्वसत्ताप्रयुक्तप्रकाशत्वं वा, अव्यभिचरितप्रकाशमत्ताकत्वं वा, तत्त्वे सति स्वस्मै भासमानत्वं, वा, अन्यसंबन्धानपेक्षप्रकाशत्वं वेति । चतुर्धा विकल्पोऽभिमतः । भाष्येऽपि तथैव प्रतीयत इति वदन्ति ।

प्रत्यक्षबाधः सर्वसाधारणं दूषणमिति । "अहम्' इति भासमानस्यैवात्मत्वेन तस्य ज्ञानाश्रयतया ज्ञानभेदनैव प्रतीतेरिति भावः । यद्वा "अहं जानामि' इति तस्याहमर्थधर्मत्वग्राहिप्रमाणबाध इत्यर्थः । अनैकान्त्यांवरोधयोरन्यतरेणेति । स्वदर्शने पक्षत्रयवृत्ति-त्वरूपमनैकान्त्यम्; परदर्शने पक्षविपक्षमात्रवृत्तित्वरूपविरोध इत्यर्थः । न व्यभिचरति प्रकाशो यस्य सत्ता-मिति । अत्र केचित् - न व्यभिचरति प्रकाशं यस्य सत्तेति पाठः समीचीनः, तस्यैवार्थस्योचितत्वात् । सत्ताया एव प्रका-शव्याप्यत्वस्य विवक्षितत्वात्, भाष्यस्थाव्यभिचरितशब्दस्य कर्मणि क्तप्रत्ययान्तत्वेन कर्तरि क्तप्रत्ययोन्तत्वाभवादिति वदन्ति ।

परस्मै भासमानत्वमुपपादयतीति । "अहं सुखी' इत्यत्राहमथर्स्य सुखशेषित्वभानात् सुखस्यैव प्रकाशरूपत्वात् सुखप्रकाश-शेषित्वलक्षणं प्रकाशफलित्वमपि "अहं सुखी' इत्यत्र भासत इति भावः ।

अथाहमर्थस्य भ्रान्तिसिद्धत्वमिति । न च भाष्ये ज्ञातृतयावभासते इति । ज्ञातुरेव भ्रान्तिसिद्धत्वं प्रतीयते, नाहमर्थस्येति वाच्यम् - अहमर्थस्यैव ज्ञातृत्वात् । अत एव परिहारभाष्ये अनुभविताहमर्थः प्रतीयते अनुभूतिरह मितीत्युक्तम् । भाष्ये-अनुभूतिः पर- मार्थतो निर्विषया निराश्रायेति । अत्राश्रयविषयशब्दौ भावप्रधानौ । ज्ञानाश्रयत्वज्ञानविषयत्वशून्येत्यर्थः । "सा ज्ञातृता भ्रान्ति-सिद्धा रजततेव शुक्तिशकलस्य,' अनुभूतेः स्वात्मनि कर्तृत्वायोगा'दिति पूर्वपक्षभाष्यानुरोधात् । अत एव ज्ञातृत्वस्य भ्रान्ति-सिद्धत्वोपपादने परमार्थतो विषयाश्रयशून्यविषयत्वोपपादमनुपयुक्तमिति शङ्काऽपि निरस्ता । अत्र च ज्ञानविषयत्वाशून्यत्वोप- पादनं दृष्टान्ततया, न प्रकृतोपयोगितयेति द्रष्टव्यम् । यद्वा निराश्रया तादात्म्यसंबन्धेनाध्यस्यमानज्ञातृशून्येत्यर्थः । अत एव अनुभवसामाधिकरण्येनाहमर्थः प्रतीयेतेति ग्रन्थस्वारस्यं द्रष्टव्यम् । तत्र न संबन्धमात्राध्यास इति ।

येनाहमर्थवैयधिकरण्येन प्रतीतिः "दपर्णे मुखम्' इतिवदुपपद्येतेति भावः । प्रभा मणिसामानाधिकरण्येनैव हि भातीति । ननु प्रभायां प्रभाश्रयमण्यध्या-सवदनुभूतावनुभूत्याश्रयाहमर्थाध्यामः कुतो न संभववेदिति चेत्-न । तत्राधिषांनप्रभातिरिक्तप्रभाश्रयाभेदाध्यासः संभवेत् । अनु- भूतौ द्वित्वाभावान्न तथा संभवतीति भावः । पदद्वयप्रवृत्तिनिमिवयोरिति । ननु मालिन्यपदप्रवृत्तिनिमिवस्य मालिन्यत्वस्य राग-पदप्रवृत्तिनिमित्तस्य रागत्वस्य च कथं दिङ्नभोवृत्तित्वम्? कथं वा "सर्वदिक्ष्वपि सैव मे' इति सर्वासु दिक्षु कामिन्यध्यासे दिव- त्वकामिनीत्वसामानाधिकरण्यमिति चेत् - न; तादृशस्थले संसर्गारोपरूपतया वैयधिकरण्येन भ्रमसंभवात् । न चात्रापि संस-र्गारोपोऽस्त्विति वाच्यम्, तथा हि सति 'दिक्षु कामिनी', "दिक्षु मालिन्यम्' इतिवत्"अनुभूतावहम्' इति प्रतीतिप्रसङ्ग इति भावः । तदधिकरणाध्यासातुदय इति । अनुभूतित्वास्फुरणस्य भ्रमहेतुत्वं वदता अनुभूत्यस्फुरणमध्यासहेतुरित्युक्तं स्यात् । तत-श्चाधिष्ठानस्फुरणरूपहेत्वभावादध्यसानुदयप्रसङ्ग इति भावः । अधिष्ठानस्फुरणस्य हेतुत्वाभावादध्यासोदयः संभवतीत्याक्षिपति-नन्वध्यासानुदयो दुर्वच इति । तदप्रकाशादध्यासोदय इति । तत्प्रकाशस्याहेतुत्वादध्यासोदय इत्यर्थः । अप्रतिपन्नस्याधिष्ठा-नत्वायोगादिति । अध्यासदशायामप्रतिपन्नस्येत्यर्थः । दूषणान्तरमाह-विषयाश्रयशून्याया इति । केचित्तु-अप्रतिपन्नस्य । सर्वथा अप्रतिपन्नस्येत्यर्थः । तदुपपादकमुवरवाक्यमिति वदन्ति ।

ज्ञातृत्वस्यान्तः करणधर्मत्वनिरासः

ज्ञातृत्वपरश्रुतिवाक्यादिति । "परात् परं पुरिशयं पुरुषमीक्षते' "सर्वं ह पश्यः पश्यति' इत्यदिवाक्यादित्यर्थः । तादृशाहंकार-ग्रन्थिस्थमिति । विकारिजडद्रव्यस्थमित्यर्थः; न तु विक्रियात्मकजडद्रव्यस्थमिति मन्तव्यम्, अविक्रियस्येति पूर्वग्रन्थानुसारात् विकारास्पदेति । भाष्यानुगुण्याच्च । दृश्यत्वादित्यर्थ इति । दृश्यत्वादिति शेष इत्यर्थः । देहात्मभेद इति । देहस्य ज्ञातृत्वाभाव इत्यर्थः । क्वचिज्ज्ञातृत्वाभावप्रयोजकस्येति । नन्वेवं ज्ञातृत्वस्य चित्त्वप्रयोज्यत्वं स्यात् । न चेष्टापात्तिः । धर्मभूतज्ञाने ज्ञातृत्व- प्रसङ्गः । न च चित्त्वमात्मत्वम्, तदभावो ज्ञातृत्वाभावप्रयोजक इति वाच्यम्, आत्मत्वज्ञातृत्वयोः प्रयोज्यप्रयोजकभावस्य क्वाष्य-ग्रहादिति चेत्-न-आत्मत्वज्ञातृत्वयोः प्रयोज्यप्रयोजकभावाग्रहेऽष्यात्मत्वाभावस्य ज्ञातृत्वाभावप्रयोजकत्वदर्शनादिति भावः । वस्तुतस्तु अचेतनत्वादीत्यत्र तद्गुणसंविज्ञानत्वहुव्रीहिणा दृश्यत्वादिकमुक्तमिति ध्येयम् । पूर्वोक्तव्याप्तिस्थापनायेति । "चेत-नासाधारणधर्मत्वाच्च ज्ञातृत्वस्ये'ति पूर्वोक्तव्याप्तिस्थापनायेत्यर्थः । न हि वयं द्रष्टृत्वादीति । देहस्य जडत्वान्न द्रष्टृत्वम् । तत-श्चानात्मत्वमिति चार्वाकं प्रति न देहात्मभेदं साधयामः । अपि त्वात्मनो दृशिस्वरूपत्वात् देहस्य चातथात्वात् देहस्यानात्मत्व- मित्येव साधयाम इत्यर्थः । द्रष्टृत्वाभावस्याचेतनत्वादिप्रयोज्यत्व इति । अचेतनत्वादीत्यत्र अतद्गुणसंविज्ञानबहुव्रोहिवशात् दृश्यत्वस्य ग्रहणात् । द्रष्टृत्वाभावेऽप्यचेतत्वादिकमित्युत्तरत्रापि दृश्यत्वमेव विवक्षितम् । मृषावाद्यसाधारणेति । यदि दृश्यस्य द्रष्टृत्वम्, तर्हि दृशित्वमपि किं न स्यात्? यदि च कर्मणः क्रियात्वं न संभवतीत्युच्येत, तर्हि कर्मणः कर्तृत्वमपि न संभवति; कर्म-त्वकर्तृत्वक्रियात्वानां परस्परविरोधादिति भावः । यद्यपि सिद्धान्ते दृशेरपि दृश्यत्वमभ्युपगतम्-तथापि परमतानुसारादेवमुक्तमिति द्रष्टव्यम् । रजतप्रत्ययगोचरत्वमात्रेणेति । रजतप्रत्ययस्य रजतविषयत्वबत् अहंप्रत्ययोऽप्यात्मविषयः, अहंत्वमेवात्मत्वमिति स्थि-तत्वात् । ततश्चाहंप्रत्ययविषयत्वं नात्मत्वबाधकम्; प्रत्युतात्मत्वसाधकमेवेति भावः । परमात्मन्यनात्मत्वादिप्रसङ्गश्चेदिति । यदि परमात्मा कर्ता स्यात्, अनात्मा स्यादित्यापादने, तस्मान्न कर्तेति विपर्यये पर्यवसाने, कर्तृत्वादिश्रुत्या बाधप्रसङ्ग इत्यर्थः । द्वितीये परमात्मन्यसिद्धिरिति । कर्तृत्वेऽहंप्रत्ययगोचरत्वे चाभ्युपगम्यमान इत्यस्य परमात्मनः स्पन्दरूपक्रियाश्रयत्वेऽहं प्रत्योचरत्वे

चाभ्युपगम्यमान इत्यर्थः पर्यवसितः ततश्च तथाभ्युपगमोऽसिद्ध इत्यर्थः; तर्के पराभ्युपगतस्यैवापादकत्वादिति भावः ।

प्रसरमपेक्ष्योदेयास्तमयाव्यपदेश इति भाष्ये प्रसरशब्दस्य प्रसरणार्थत्वमाश्रित्य प्रसरणान्वयव्यतिरेकाभ्यां मानस्यांशिन उदया-स्तमयव्यवहार इत्यर्थः प्रतीयते । प्रसरशब्दस्य पचाद्यजन्ततया प्रसरणकर्तृपरत्वमाश्रित्य प्रसृतांशमपेक्ष्य तन्मात्र एव प्रसरण-संकोचदशायामुदयास्तमयव्यपदेशः, न त्वंशिनीत्यष्यर्थः प्रतीयते । अतोऽर्थद्वयपरतया व्याचष्टे - प्रसरान्वयव्यतिरेकाविति । मुखान्तरेणापीति । तच्च न स्वाभाविकं रूपम् इति भाष्ये तत् स्वाभाविकं च न भवतीति च शब्दो भिन्नक्रम इति भावः । स्वाभाविकं रूपं कथमित्यत्राहेति । अत्र केचित्-निर्विकारत्वश्रुत्यः स्वाभाविकविकारनिषेधरा इत्येका व्याख्या । उपा-धिविनिर्मुक्तस्वाभाविकमुक्तस्वरूपे विकारमात्रनिषेधोपरा इत्यपरा । तत्र पूर्वव्याक्यायाम्, तच्च न स्वाभाविकम्, अपि तु कर्मकृतमिति भाष्ये तच्छब्दः कर्तृत्वपरः । ततश्च कर्तृत्वाश्रयभूतं (भूत)जीवस्वरूपं न स्वाभाविकम्, अपि त्वौपाधिकम् । स्वाभाविकरूपं तु अविक्रियमेव । विकारनिषेधश्रुतयश्च स्वाभाविकस्वरूपपरा इत्यर्थः । इमां द्वितीयव्याख्यामभिप्रेत्य स्वा- भाविकं रूपं कथमित्यत्राहेति ग्रन्थः प्रवृत्तः । पूर्वस्यां व्याख्यायां स्वाभाविकं रूपं कथम् इत्याक्षेपस्य वा अविकारित्ववचना-न्युपाधिविनिर्मुक्तस्वाभाविकरूपपराणीत्युत्तरग्रन्थस्य वा असामञ्जस्यात् व्याक्याद्वयमेवेदमित्याहुः । न कदाचिदपि जडस्या-हंकारस्येति । जडत्वस्य प्रतिद्वन्द्वितया निर्देशात् स्वरूपपरशब्दस्वारस्याच्चान्यथा व्याचष्टे - यद्वा स्वरूपशब्दो धर्मिपर इति ।

परोक्तज्ञातृत्वनिर्वाहनिरासः

समासान्तर्गता विभक्तिरिति । छायापत्तिः प्रतिफलनम् । ततश्रच "दर्पणस्य करवालसंनिधानेन करवाला प्रतिफलनात्' इत्युक्ते यथा करवाले दर्पणस्य प्रतिफलनमित्यपि प्रतीयते, करवालस्य दर्पणे प्रतिफलनमित्यपि प्रतीयतेः एवं चित्प्रतिफलनमित्युक्ते चेति प्रतिफलनं, चेतो वा प्रतिफलनमित्यर्थद्वयमपि संभवत्येव । एतेन-

"देवदत्तस्य यज्ञदत्तधनप्राप्तिः' इत्युक्ते यज्ञदत्ते देवदत्तधनप्राप्ति-रित्यर्थो यथा न लभ्यते, एवम् "अहंकारच्छायापविः संविदः' इत्युक्ते, अहंकारे संविच्छायापविरित्यर्थः कथं लभ्येतेति शङ्का गलःस्तिता । न हि व्यं छायापविशब्देन ।

प्रतिफलनं च षष्ठयन्तमिव सप्तम्यन्तमष्याकाङ्क्षतीति नानुपपत्तिगन्धोऽपि । अत्र केचित्-भाष्ये "केयं तच्छायापत्तिः' इति पाठो युक्तः, पूर्वत्र तच्छायापत्त्येत्युक्तेः । ततश्च तच्छब्दस्य किमहंकारपरामर्शित्वम्? उत संवित्परामर्शित्वम् इति विकल्पो युज्यते चिच्छायापत्तिरिति पाठेऽपि ज्ञातृत्वच्छायापत्तिरिति न व्याख्येयम्, भाष्ये तथाऽप्रतीतेः; ज्ञातृत्वच्छायापत्तिपक्षस्य परैरनुद्भावितत्वाच्च । अत एव ज्ञानच्छायासंपवि संपर्कौ कस्मान्न निरस्ताविति चोद्यस्यापि नावकासः ।

"तस्मावत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।

गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ।।'

इत्युक्तरीत्या चैतन्यसामानाधिकरणकृत्याश्रयत्वलक्षणज्ञातृत्वस्य चिदचित्संनिधानेन परस्परच्छायापत्त्या संभव इति चोदयति- भाष्ये जडस्वरूपस्येति । सामान्यतो ज्ञातृत्वसंभवमात्रप्रदर्शनेऽपि अन्तःकरणस्येति वा चैतन्यस्येति वा धर्मिविशेषस्यानुक्तेः चिच्छायापत्त्येत्यत्रापि षष्ठीसप्तमीसमासद्वयसंभवं चाभिप्रेत्य तत्संभव इत्यत्र ज्ञातृत्वोत्पत्तिपरत्वं निश्चित्य कस्य छायापत्त्या तदुत्पद्यत (कुत्र ज्ञानमुत्पद्यते) इति पृच्छति-केयं चिच्छायापत्तिरिति । किमहङ्कारच्छायापत्तिः संविद इति । ततश्च तया छाया-पत्त्या संविद्येव ज्ञातृत्वमित्यर्थसिद्धम् । एवमुवरत्रापि उभयत्रापि ज्ञातृत्वासंभवभाष्यस्यायमर्थः । चैतन्यसमानाधिकरणकर्तृत्वं हि ज्ञातृत्वम् । यत्र चैतन्यं न तत्र कर्तृत्वं, यत्र च कर्तृत्वं न तत्र चैतन्यमिति नोभयत्रापि छायापत्त्या वास्तवज्ञातृत्वोत्पत्तिः सिध्यतीति भावः । अत एव नोभयत्रावास्तवज्ञातृत्वमित्युत्तर-भाष्यं च स्वरसमिति वदन्ति ।

संपर्कश्चोपलम्भानुगुण्येनेति । प्रमात्वस्यौत्सर्गिकत्वात् रुमाकाष्ठलावण्यवदेवाभ्युपगन्तव्यम् । न त्वयःपिण्डौष्ण्यवदेवेति भावः । दण्डदेवदत्तयोरिति । अयः-पिण्डाग्न्यादिषु तथा दर्शनादित्यर्थः । अपृथगवस्थितयोः संपर्कश्चानुपपन्न इति । नन्वपृथगवस्थि-तयोर्वह्निधूमयोर्वा देहात्मनोर्वा संपर्को दृष्ट इति चेत्-मैवम्, ज्ञानाहंकारयोर्धर्मभावेनोपलम्भानुगुण्येनापृथक्सिद्धत्वे ज्ञातृत्वमपि वास्तवमेव किं न स्यादिति भावः ।

अनुत्पन्नस्येति । अन्वयव्यतिरेकाभ्यामुत्पत्तेरभिव्यक्तिहेतुतयोत्पत्तिरभिव्यक्ति◌ाब्दव्यपदेश्या भवति । अभिव्यज्यते अस्या इति व्युत्पत्त्या अपादाने क्तिनि अभिव्यक्तिशब्दस्योत्पत्तिपरत्वसंभवादिति भावः । एतदस्वरसादाह-किंचेति । प्रकाशोत्पत्तिरूपा-भिव्यक्तिरिति । ननु च तत्प्रकाशनमिति द्वितीयपक्षाभेदः स्यादिति चेत् न; द्वितीयपक्षे विषयविषयिभावो भेदगर्भः, इह तु न तथेति द्रष्टव्यम् । एतदभिप्रायेण प्रकाशनमनुभवविषयप्रकाशोत्पत्तिरिति वक्ष्यति । स्वतः सिद्धशब्दस्यानन्यप्रकाश्यत्वानन्या-

त्पाद्यत्वरूपार्तद्वयसंभवादुभयश्रा व्याचष्टे-स्वतः सिद्धतया हीत्यादिना । पूर्वमिति । तत एवेति भाष्येणेत्यर्थः । अनुग्राह्येति । अनुग्राह्यमनुग्रहसाधनम् । अनुग्रहस्य कोटिद्वयेऽप्यनन्तर्भावादिति । सर्वस्याष्यनुग्रहस्य कोटिद्वयेऽप्यनन्तर्भावादित्यर्थः । व्या-प्तिस्मरणादिरनुग्रह इति । तद्धेतुभूतव्याप्त्यनुभवादिरनुमानानुग्राहकः । न चानुग्रहः फलरम्भौन्मुख्यंधसामर्थ्योर्द्बोधनमन्यदेवेति कथं व्याप्तिस्मरणादेरेवानुग्रहरूपत्वमिति वाच्यम्,

साधनव्यतिरेकेणानुग्रहसद्भावे प्रमाणाभावात् । व्याप्तिस्मरणानुगृहीतमनु-मानमित्युक्तिस्तु "अनुभवेनानुभूयते' इतिवदुपपन्नेति भावः । इन्द्रियसंबन्धहेतुत्वेनेत्युक्तमिति । वस्तुतस्तु इदमनुमानदिरण्यु-पलक्षणम् । नेन्द्रियाणि, नानुमानमिति निषेधस्य तुल्यत्वादिति द्रष्टव्यम् । अनुपङ्गेणेति । उत्तरभाष्यानुषङ्गेणेत्यर्थः । आचा-

यैंरुभयैरुक्तमपि तद्विकल्पमुखेन भाष्यभिप्रेतमित्याह-अयं तु भाष्याभिप्राय इत्यादिना । अहंकारोऽमूर्तद्रव्यमिति । अक-ठिनद्रव्यमित्यर्थः पक्षद्वयनिरासानन्तरमेवान्यपक्षनिरासस्य युक्तत्वात् न तावदित्यनेन तन्निरासोऽनुपपन्न इत्यन्यथा व्याचष्टे-यद्वाऽहंकारस्येति ।

भाष्ये - न केनापि कदाचित् संविदाश्रयमज्ञानमुच्छिद्येतेति । नन्वहं कारापनेयत्वयं ज्ञानस्य वदन्यं प्रति कथमज्ञानस्यानुछेदा-पादनमिति चेत्-न । अहंकारनिवर्तकत्वपक्षस्य गर्भस्त्रावेण गतत्वात् ज्ञानमात्रनिवर्त्यत्वस्यैव वक्तव्यत्वं सिद्धवत्कृत्य तत्प्रसङ्गा- दिद दूषणरपादनमिति द्रष्टव्यम् । अत एवानुभूतेरनुभाव्यत्वाभ्युपगमेऽपीत्यनुभाव्यत्वमभ्युपगम्यप्रवृत्ते ग्रन्थे विषयभावविरहिते ज्ञानमात्र इति विषयत्वाभावकथनं पूर्वोत्तरविरुद्धमिति शङ्कापि निरस्ता, न च संविदाश्रयत्वमित्यादिभाष्यस्य प्रासङ्गिकत्वा-दिति ध्येयम् । व्यतिरेकव्याप्तिर्दर्शितेति । ज्ञानविषयत्वाभावादज्ञानविेयत्वं नास्तीत्यनुमाने ज्ञानविषयत्वाज्ञानविषयत्वाभावयोः पक्षादन्यत्रावृत्तेर्व्यतिरेकव्याप्तिरिति भावः । ज्ञाननिवर्त्याज्ञानत्व इति बहुव्रीहिः । प्रतीतिर्व्यवहारानुगुण्यमिति । प्रतीतिशब्देन ज्ञानस्य परिग्रहे ज्ञानानुगुण्यस्य ज्ञानेऽभावात् प्रतीत्यनुगुणस्वभावत्वात् ज्ञानतत्साधनयोरित्यस्यासंगतिः स्यादिति भावः ।

प्रामाण्याप्रामाण्ययोर्द्वयोरपि परतस्त्वमिति कोऽर्थः? यथा पृथिव्याः शीत्तत्वमुष्णत्वं च परतः, स्वतस्त्वनुष्णाशीतत्वम्, एवं वा; उत ज्ञानसामान्यसामग्रतिरिक्तोत्पाद्यत्वे सति यावत्तद्ग्राहकसामग्राह्यत्वमिति विकल्प्य प्रथमं दूषयति-निःस्वभावत्वादिप्रसङ्गा- दिति । प्रामाण्याप्रामाण्ययोर्द्वयोरष्यभावे सर्वस्यापि वस्तुनस्तद्वत्त्वतदभाववत्त्वयोर्द्वयोरण्याभावेन तुच्छत्वमेव स्यादित्यर्थः । दूषणान्तरमाह-प्रामाण्याप्रामाण्येति । तत्संबन्धात् ज्ञाने तथात्वमिति । यथा रुमासंबन्धात् काष्ठे लावण्यम्, अनुष्णाशीत-पृथिव्यामुष्णशीतयोरग्निजलयोः संपर्कादुष्णत्वादिप्रतिभासो वा तद्वत् प्रामाण्याप्रामाण्ययोस्तत्वतिभासस्य वोपपत्तिरित्यर्थः । परतस्त्वननुपपन्नमिति । प्रामाण्याप्रामाण्ययोस्तुच्छत्वमेव स्यात्, अन्यत्राष्यभावात् अत्राष्यसत्त्वात् । उष्णत्वशीतत्वयोस्त्व- न्यत्र वृत्तिसंभवान्न तुच्छत्यमित्यर्थः । द्वितीयं दूषयति-प्रामाण्यबुभुत्सेति । गृहीतृप्रामाण्यस्यैव निश्चयरूपतया तत्रापि प्रामा-ण्यग्रहापेक्षायामनवस्थेत्यर्थः । यद्वा निःखभावत्वादिप्रसङ्गादित्यादिशब्देनानवस्थापरिग्रहः । उभयं विवृणोति-प्रामाण्यप्रा- माण्ये इत्यादिना ।

क्वचिदात्मस्थतयाभिव्यञ्जनमभ्युपेत्येति । दीपादिष्वनैकान्त्यप्रदशर्नमेव क्वचिदभ्युपगमसूचनमिति भावः । भाष्ये चाक्षुषतेजः-प्रतिफलनेनेति । प्रतिफलनम् प्रतिहतिः । भाष्ये वस्तुतो दोषतो वा न किंचिदिह कारणमितीति । वस्तुरूपं वा दोषरूपं वा न किंचित् करणमित्यर्थः । प्रत्यक्षप्रमायां हि वस्तुशब्दवाच्यो विषयो हेतुः अतो वस्तुनः कारणत्वमुपपद्यत इति द्रष्टव्यम् । धर्मधर्मि-भावेन वस्तुत इति । तसेः सार्वविभक्तिकत्वात् वस्तुना=धर्मधर्मिभावेनेत्यर्थः । मूर्तस्वच्छस्थूलद्रव्यत्वमिति । मूर्तस्वच्छस्थूल-द्रव्यत्वप्रयुक्तं चाक्षुषतेजःप्रतिफलनरूपं तात्स्थ्ेनोपलब्धौ दोषरूपं कारणमित्यर्थः । वस्तुतः कारणाभावान्न ज्ञातृत्वं विद्यत इति । धर्मधर्मिभावात्मकस्य वस्तुरूपकारणस्याभावान्न ज्ञातृत्वं प्रतीयत इत्यर्थः । अतः प्रत्यक्तवमपीति ज्ञप्तेरपि न प्रत्यक्त-वसिद्धिरिति भाष्ये अपिर्भिन्नक्रमः । प्रत्यक्तवसिद्धिरपि नेत्यन्वय इति । अनुभूतेरपि तथैवं प्रथेति वक्तव्यमिति भाष्ये तथैवे- त्यस्यो विशदावभासत्वेनेत्यर्थमभिप्रेत्यावतारयति-विादावभासाभावादिति । ननु तथा -शब्दस्याहंत्वेनेत्यर्थ एवास्तु । एवं च न हि सुप्तोत्थितः इति भाष्यमपि तदुपपादकतया तच्छेषभूतमस्त्विति चेत्-सत्यम्, युक्तयन्तराविष्करणार्थमेवं व्याख्योपपत्तेः । जागरितावस्थायोमेवेति । अविशदावभासायोग्यावस्थायामप्यविशदावभासाभ्युपगमे तद्योग्यंवस्थायां तदभ्युपगन्तृणां का नः क्षतिरित्यर्थः ।

प्रत्यक्तवसिद्धयर्थमिति । अतोऽहंभाववियुक्तेत्यनेन विरोध इति भावः । प्रत्यभिज्ञाविशेषोऽयमिति । "सुखमहम्' इत्यंशे स्मृतिरूपः, "अस्वाष्सम्' इति स्वापांशे कालांशे च प्रत्यभिज्ञायोग्यानुपलब्धिरूपलिङ्गाद्वयप्रतिसंधानजन्यानुमितिरूपो नृसंहा-

कारज्ञानविशेष इत्यर्थः । ननु-स्मृते पर्वते वह्निव्याप्यधूमवत्त्वज्ञानात् "पर्वतो वह्निमान्' इत्यनुमितिः पर्वतांशेऽप्यनुमितिरूपा;

न स्मृतिरूपा । एवं स्मृते सुखरूपे आत्मनि स्वापकालयोः संबन्धानुमितिरात्मांशेऽप्यनुमितिरूपैव; न तु परामर्शरूपा । अनु-मितित्वस्याव्याप्यवृत्तित्वासंभवत् । अस्तु वाऽनुमितत्वमव्याप्यवृत्ति । तथापि"सुखमहम्' इति ज्ञानमिदानींतन्सुखरूपाहमर्थ-विषयकं कुतो न स्यात्? न हि तदंशे तत्तोल्लेखोऽस्ति, येन स्मृतित्वं स्वध्यवसानं स्यात् । स्वापवालीनानुभवस्य देशकालाद्यगो-चरत्वेन स्वापंकालीनात्मनि व्यावर्तकाकारस्य कस्याष्यभावेन तस्य पक्षीकरणासंभवेनानुमानेन कीदृशे आत्मनि स्वापसंबन्धो बोध्येत? तस्मादात्मनि स्वापदशायां यावत् धर्मान्तरसंबन्धोऽवभासत इति नाङ्गीक्रियते, तावत्"सुखमहम्' इत्यस्य स्वापकाली-न्सुखानुसंधानरूपत्वं न सूषष्दम् । तस्मादेतत्प्रघट्टकं सर्वं न सुन्दरमिति चेत्-अत्राहुः-सुषुप्तिदशायां जाग्रद्दशाविलक्षणमानुकूल्यं भासत इति सिद्धम् । तच्च न स्वरूपभूतज्ञानेन । तथात्वे जागरितदायामपि तदानुकूल्यं भासेत । ततश्च यता कैवल्यदशायां भासमानस्य विलक्षणस्यानुकूल्यस्य न स्वरूपभूतज्ञानप्रकाश्यत्वम्, एवं सुषुप्तिदशायामपि भासमानानुकूल्यं धर्मूतज्ञानेनैव भासते । जाग्रद्दशायां तु जाग्रद्भोगप्रदकर्मप्रतिबन्धवशात् तदनुकूल्यं धर्मभूतज्ञान न विषयः । सुषुप्तिदशायां तु विषय एव । ततश्च तादृशविषयलाभात् तज्ज्ञानस्य स्वप्रकाशत्वम् । अत एव सुखित्वं ज्ञातृत्वं च ज्ञायत इति भाष्यमपि सुसंगतम् । बहिर्विषयप्रसरे परमिन्द्रयापेक्षा । अत एव, "इन्द्रियद्वारेण व्यवस्थितमिति भाष्यमपि संगतमेव । ततश्च धर्मभूतज्ञानेनानुकूल्यविशेषवत्तया जाग्र-दादिविलक्षणस्मरणं संभवति । तस्मानुभवस्य संस्काराधायकतासंभवेन स्मरणमपि संभवति, तद्दशायां कालस्यापि धर्मभूत- ज्ञानेन विषयीकरणसंभवात्, कालस्य ज्ञानमात्रविेयत्वात्, तत्कालीने आनुकूल्यविशेषवत्तया स्मृत आत्मनि ज्ञानाभावरूपस्वा- पस्य योग्यास्मरणलिङ्गगम्यत्वसंभवात्, स्वापांशस्यापि तदानुभवेऽपिबाधकाभावात्, सर्वांशे परमर्शस्य स्वरससिद्धत्वाच्चेति । वस्तुतस्तु धर्मभूतज्ञानेन व्यावर्तकाकारास्फुरणेऽपि जाग्रद्दशाविलक्षणे प्रमृष्टत्ताकस्मृतिगोचरेऽतिशयितसुखविशेष आत्मनि तदानींतनार्थास्मरणलिङ्गेन ज्ञानाभावरूपस्वापस्य वा तस्य स्वापस्येदानीमसत्त्वेन लिङ्गेन स्वापगतातीतत्वस्य वानुमाने दोषा-भावान्नानुपपत्तिरिति द्रष्टव्यम् ।

अहमर्थात्मस्फुणसमर्थनम्

तच्चेन्द्रियद्वारेण व्यवस्थितमिति भाष्यस्वारस्यविरुद्धं चेति । "क्षेत्रज्ञावस्थायां कर्मणा संकुचितस्वरूपं तत्तत्कर्मागुणतरतम- भावेन वर्तते । तच्चेन्द्रियद्वारेण व्यवस्थितम्' इति भाष्यविरुद्धमित्यर्थः । न किंचिदवेदिषसित्यज्ञानसाक्षित्वेन स्थितिं वदतेति । सुप्तोत्थितस्य न किंचिदवेदिषम्' इत्याकारकस्मरणान्यथानुपपत्तिकल्पितं सुषुप्तिकालीनं "न जानामि' इति यदज्ञानसाक्षित्वम्, तेनेत्यर्थः । ततश्च सुषुप्तिदशायां "न वेह्मि' इत्यज्ञानानुभवसंभवेऽपि "नावेदिषम्' इत्याकारकाज्ञानानुभवासंभवात् कथमेतदिति न चोदनीयम् । अज्ञानाश्रयभूताहमर्थेति । अहमर्थस्याज्ञानाश्रयत्वमप्यभ्युपगन्तव्यसम् । तद्भानमप्यभ्युपगन्तव्यमित्यर्थः । यथा प्रातश्चत्वरे गजो नास्तीति । इदं गजाभावविशिष्टतयानुभूतस्य चत्वरस्य यदा स्मरणं तदेति द्रष्टव्यम् । परमते "न किंचिदवेदिषम्' इत्यस्य सर्वांशे परामर्शरूपत्वात्तदनुसारेण दृष्टान्तस्य वक्तव्यत्वात् । उत्तरत्र तु सिद्धान्ते धर्म्यंश एव परामर्शरूपत्वात् तद्दृष्टा- न्ततया स्वमतानुगण्येन वक्ष्यमाणा "त्वत्वरे गजो नास्ति' इति योग्यानुपलब्धिलिङ्गकगजाभावानुमितिश्चत्वरांश एव परामशर्- रूपा । अतश्चत्वरमात्रं यत्र प्रागनुभूतं तादृशमेवोत्तरत्रोदाहरिष्यते, स्वमतानुगुण्यादिति द्रष्टव्यम् । परमतवत् त्वन्मतेऽपि "सुख-महमस्वाप्सम्' इति सर्वांशेऽपि परामर्शत्वमेव स्यादिति शङ्कते-अस्वाप्समिति परामर्शेनेति । अनुसंधानमस्ति चेत् स्वाप्ता एव न स्यादिति । ननुःबाह्यान्तःकरणजन्यसमरतज्ञानाभावेऽपि साक्षिणैव स्वापशब्दिताज्ञानानुभवसंभवान्न सुषुप्तिव्याघात इति चेत्-न; अज्ञानस्य साक्षिभास्यत्वे प्रमाणाभावादिति भावः ।

परोक्तान्यथासिद्धिमिति । सुषुप्तौ सुखानुभवानभ्युपगन्तृनैयायिकाद्युक्तान्यथासिद्धिमित्यर्थः । न तु मृषावाद्युवतेति मन्तव्यम्, मृषावादिभिः सुखानुचभवस्यैवाभ्युपेतत्वात् । न च "सुखपरमर्शो दुःखाभावनिमित्तः' इति पञ्चपादिकायामुक्तत्वात् मृषावादि- भिरपि सुखानुभवाभावोऽभ्युपेत इति वाच्यम्, तद्वयाख्यात्रा विवरणकृता तस्य परमतोपन्यासरूपत्वाविष्करणात् । वस्तुतस्तु अहमर्थसदसद्भावचिन्तनप्रकरणत्वात् यथेदानीं सुखं भवतीति भाष्यस्य "सुखं यथेदानीमहं(?) भवति तथास्वाष्सम्' इत्येव-मर्थपरतया व्याख्येयत्वात् मृषावादिमेऽपीदृशोक्तेः संभवात् तन्मत्रेपि नानुपपत्तिरिति द्रष्टव्यम् । अस्थिरत्वमनुभवाभावो वेति । तदानींमहमर्थतदनुभवाभावे अहमर्थसुखित्वप्रतिसंधानानुपपत्तिवशात् "इदानीं यथा सुखम्' इत्याद्यनुभवप्रकारः पर्यवस्यतीति भावः । अहमर्थस्य निषेधविषयत्वेपि । अहमर्थानुभवस्येत्यर्थः । भाष्ये-नाहमवेदिषमिति वेदितुरिति । "नाहमवेदिषम्' इत्य-त्राहामत्यंशस्य सुषुप्त्यनुभूतार्थस्मृतिरूपतया स्मृतेश्च स्मर्यमाणस्वरूपमात्रे प्रामाण्यसंभवात् । न च नैयायिकादिमत इव तदंशे-ऽप्यनुभवत्वमस्त्विति शङ्कयम्, स्मअतित्वस्यानुभवसिद्धत्वादिति भावः । एतेन "राममहं नाद्राक्षम्' इत्यादाविव तदानींमहमर्था-भावेऽपि "नाहमवेदिषम्' इत्यहमर्थेऽतीतज्ञानसंबन्धित्वादिनिषेधेऽनुपपत्त्यभावात् कथमेतादिति शङ्का निरस्ता । वेद्यप्रतिंभाष- विषय इति । न वेदितृप्रतिभासविषया इत्यर्थः । अताष्यहमर्तनिवृतीति । अहमर्थज्ञानाभावेत्यर्थः । चत्वरनिवृत्तीति चत्वरज्ञान-निवृतीत्यर्थः । "अहमर्थानुभवाभावसाधकं परामर्शं शङ्कते' इत्यवतारिकाप्रदर्शनादित्थं द्रष्टव्यम् । यद्वा अहमर्थानुभवाभावो-ऽप्यहमर्थाभावपर्यवसित इति न विरोध इति द्रष्टव्यम् ।

अहं न ज्ञातवान् इत्यादि भाष्यं पूर्वव्याख्यानद्वयानुरोधेनः द्वेषाः विरोधप्रदर्शतपरतया व्याचष्टे-अहं न ज्ञातवानित्यादिना । विधिनिषेधयोरिति । "अहम्' इत्यस्य सौषुप्तिकाहमर्थपरामशर्रूपतयाऽहमर्थप्रमाणत्वेन तद्विधिरूपत्वम्, "मां न जानामि' इत्य-स्यज्ञाननिषेधमुखेनाहमर्तनिषेधरूपत्वं चेति भावः ।

भाष्ये साक्षित्वं च साक्षात् ज्ञातृत्वमिति । मुख्यज्ञातृत्वमित्यर्थः । ज्ञातृत्वस्यमुख्यत्वं द्रष्टृत्वे पर्यवस्यति । तेन साक्षाच्छब्दस्य कृद्यं (ज्यो)ग एव गतिसंज्ञा विधानेन ज्ञाधात्वर्थान्वयः कथमिति चोद्यस्य नावकाश इति द्रष्टव्यम् । ननु अजानत इति शतुर्लडा-देशतया ज्ञानवर्त मानत्वं विवक्षितदं स्यात् । ततश्च तत्साक्षात्काररूपज्ञानात्ययोऽपि "साक्षी३ सति व्यपदेशो न स्यादित्या-शङ्क्याह-अज्ञातुरित्यर्थ इति । तृजादेः सर्वकालसाधारणत्वात् तृजादिषु वर्तमानकालोपादानमिति पूर्वपक्षं (तृजादिषु) वर्त-मानकालोपादानमध्यायक वेदाध्यायार्थमिति पूर्वपक्षं कृत्वा, "न वा कालमात्रे दर्शनादन्येषाम्' इति वार्तिककृता सिद्धान्तित्वा- दिति भावः । भाष्ये साक्षाद्द्रष्टर्येवेति । साक्षान्छब्दात् द्रष्टर्यभिधेये साक्षिशब्दं स्मरतीत्यन्वयः । अनेन सूत्रं व्याख्यातम् । एवं हि सूत्रार्थः-साक्षाच्छब्दात् द्रष्टर्यभिधेये संज्ञायं विेये इनिप्रत्ययो भवतीति । जाग्रदात्मा सपक्ष इति । आत्मा अहमित्यवभासते, स्वस्मै भासमानत्वात् जाग्रदात्मवदित्यनुमानशरीरम् । न च जाग्रदात्मनः "अहम्' इति भासमानत्वमसिद्धमिति वाच्यम्,"अहम्' इति बुद्धेश्चिदचित्संबलविषयत्वस्य तैरभ्युपेतत्वात्, "अहं भूयासम्' इति प्रतीतिबलेनात्मनि परमप्रमास्पदत्वस्योपपा-दितत्वाच्च "अहम्' इति भासमानत्वं जाग्रदात्मनः सिद्धमेवेति सपक्षत्वं युज्यत एवेति मन्तव्यम् ।

मुक्तावहमर्थानुवृविसमर्थनम्

अपि च यः परमार्थत इति भाष्यस्य, यः परमाथर्त आध्यात्मिकादिदुः-खैरात्मानम् "अहं दुःखी' इति दुःखितयानुसंघत्ते, भ्रान्त्या वा आत्मानमनुसंघत्ते "अहं भ्रान्तिमान्' इति, स एवेति योजना । भ्रान्त्येति इत्थंभूते तृतीयेत्यभिप्रयन्नाह-यः स्वात्मानं भ्रम-वन्तमनुसंघत्त इत्यादि । स एव भ्रमनिवृविसाधन इति । दुःखित्वंभ्रन्तिसिद्धमिति वदता हि दुःखित्वनिवृत्तये न प्रवृत्तिर्वयुक्त-मुचिता, दुःखित्वस्य स्वतो निवृत्तत्वात् ।

ततश्च "मम दुःखित्वभ्रान्तिरनुवर्तते, सा निवर्तताम्' इति प्रतिसंधाय भ्रान्तिनिवृत्ति- साधने प्रवर्तत इति वक्तव्यम् । तदपि त्वन्मते अनुभूतेर्न संभवति, भ्रान्तिमत्त्वप्रतिसंधातृत्वस्याष्यनुमूतावभावात् । अतोऽहमर्थ- स्यैव स्वभ्रान्तिनिवृत्त्यै प्रवृत्तिर्वक्तव्या; न तु स्वविनाशायेत्यर्थः । अनुमानमाहेति । मुक्तावहमिति भासमानत्व इति शेषः । अनुमानमप्यस्तीति चार्थ इति । चशब्दस्य गत्यन्तराभावादेवमन्वयो दर्शित इति द्रष्टव्यम् । तथावभासमानत्वेन इति व्या- ख्येयं पदम् । स्वस्मै भासमानत्वेनेति तद्वयाक्यानम्। अहमिति भासमानत्वेन चेति शेषः । साध्यसाधनयुोभयोरपि प्रदर्शनी-यत्वादिति द्रष्टव्यम् । न साध्याविशिष्टतेति । अहमिति प्रकाशत इत्यस्याहमिति वकयवहारार्हत्वं ह्यर्थः; तच्च संप्रतिपन्नमेव संसारदशायाम् "अहम्' इति व्यवह्रियमाणतया योग्यतायाः सर्वदा सत्त्वात् (इति?)सिद्धसाधनमिति न वाच्यमित्यर्थः । साध्या-विशिष्टत्वम् । साध्यस्यसाधनेनाविशिष्टत्वम्, सिद्धत्वमित्यर्थः । अहमित्येव प्रकाशत इत्येवकारेण सर्वदा व्यवहारानुगुण्यं प्रकाशे विवक्षितम् । तत्तु परसंमतं न भवतीति न सिद्धसाधनमित्यर्थः । ततश्चान्यशेषतयाऽभासमानत्वरूपस्य संप्रतिपन्नस्य स्वस्मै भासमानत्वस्य, मुक्तौ विप्रतिपन्नस्य "अहम्' इति भासमानत्वस्य चैक्याशङ्काया असंभवात् कथं साध्याविशिष्टत्वनिमि शङ्का निरस्ता ।

साध्यविपरीतविशेषसाधकतयेति । पक्षधर्मतावललभ्यस्य साध्यस्य मुक्तनिष्ठस्य"अहम्' इति भासमानत्वस्य विरुद्धं संसारि- त्वम् । तत्साधकतयाभिमतविशेषविरुद्धत्वं शङ्कत इत्यर्थः । बाधस्य तर्कानुगुणत्वात् दूषणान्तरमाहेत्याह- सोपाधिकत्वमाहेति । संसारित्वज्ञत्वादिहेतुः कर्मरूपाविद्यान्वयः । सोऽत्र नास्तीति भावः । धर्म्यैक्ये सतीति । संसर्गारोपो रजोजन्यः । तादात्म्यारो-पस्तमोजन्य इति भावः । केचित्तु-तद्भिन्ने तदारोपमात्रं रजसा; तद्विरोधिनि तदारोपस्तमसा; यथा धर्मप्रकाशदौ धर्मतमस्वादि-

बुद्धिरित्याहुः । अज्ञत्वाद्यहेतुत्वादित्यस्याविद्यारूपोपाद्यवगमकत्वस्य क्लिष्टत्वम् पक्षान्तरमाह-अथवेति ।

कथं तर्हीति भाष्यमवतारयति-महाभूतान्यहंकार इति क्षेत्रान्तर्भावचनमेकमित्यादिना । उत्तरत्र परिहारादिति छेदः । अहंभावः अहमिति बुद्धिरिति । ननु करणशब्दस्य बुद्धिपरत्वसंभवात् अहंभावकरणम्, अहंभावप्रतीतिः, अहंत्वप्रतीतिरिति यावदिति कुतो नाश्रीयत इति चेत्-सत्यं तथा स्वारस्यमस्ति । तथापि

अयमेवोत्कृष्टजनावमानहेतुरित्युत्तरभाष्ये "अयम्' इत्यनेनः करण-शब्दार्थः परामर्शानर्हः, तस्यानपुंसकत्वात् । तेनाभावशब्दार्थस्य परामर्शो वक्तव्यः । अत्र चाहंभावशब्दस्य यद्यहंत्वमर्थ स्यात्, तस्य गवर्शब्दितत्वायोगादसंगतिः स्यात् । अतोऽहंभावशब्देनाहंबुद्धिरेव पराभ्रष्यव्येत्यभिप्रायः । अयंशब्देनाप्रस्तुताद्दंभावो विव-क्षित इति । अयमेव त्वहंकार इति भाष्यस्य, उत्कृष्टजनावमानहेतुर्गवोपरनामायोऽहंकारः शास्त्रेषु हेयतया प्रतिपाद्यते, सोऽयमे- वेति योजनेत्यभिप्रायः । इतरथा "अयमेव त्वहंकार' इत्यनेन प्रस्तुतस्य महत्तत्त्वकार्याहंकारस्यैव परामर्शप्रसङ्गात् । अहंभाव-लक्षणाहंकारस्य प्रागसिद्धत्वात् । अयमेवाहंकार इति सिद्धवनिनर्देशासंभवाच्च । करोर्तबुद्धिपरत्वं युक्तमिति । "शब्ददर्दुरं करोति' इत्यत्र करोतेर्ज्ञानार्थकत्वाभिधानात् । अत एव "शब्दं करोति, शाब्दिकः' इत्युपपद्यत इति द्रष्टव्यम् । अनहम्यहंबुद्धिगर्भाविमाव-हंभावाहंकारशब्दाविति बहूषु कोशेषुः पाठो दृश्यते । तत्राहंभावशब्दो लेखकस्खलनकृतः । अनात्मनि देहेऽहंभावेत्यत्राहं-भावशब्दस्य "अविद्याऽहंमतिः स्त्रियाम्' इत्यत्राहंमतिशब्दवत् । च्विप्रत्ययान्तत्वाभावात् । अत्र भावे व्युत्पत्तिः पूर्वत्र करणे व्युत्पत्तिरित्युपरितनवाक्ये अहंकारशब्दस्यैव व्युत्पत्तिप्रदर्शनाच्च । अत्र भावे व्युत्पत्तिरिति । अनात्मन्यात्मबुद्धिरूपे भ्रमे इत्यर्थः । पूर्वत्रेति । अहंकाराख्ये महतत्त्वकार्य इत्यर्थः । उपादेयगोचरतयेति । "अथातोऽहंकारादेशः' इत्यहंबुद्धेः कर्तव्य-त्वाभिधानादिति भावः । स त्वहंकारशब्द इति । अयमत्र विवेकः-अहंकारशब्दो द्विविधः । च्विप्रत्ययान्तादुत्पन्नोऽनुत्पन्नश्च । उत्पन्नश्च द्विविधः-भावसाधनः करशसाधनश्चेति । च्विप्रत्ययान्तरदुत्पन्नो भावसाधनो गर्ववाची । च्विप्रत्ययान्तादुत्पन्नः करण- वाची त्वहंकारशब्दोऽहंकारतत्त्ववाचीं ।

अच्व्यन्तोत्पन्नभावसाधनशब्द उपादेयभूताहंप्रत्ययवाचीति । ननु "श्रूयतां चाष्यवि- द्यायाः' इत्यस्मिन् श्लोके अनात्मन्यात्मबुद्धेः परमनुपादेत्यवमुच्यते, न त्वनात्मन्यहंबुद्धेः । अतः कथमस्योक्तार्थे प्रमाणत्वमिति शङ्कायामाह- अत्रैव पुराण इत्यादिना । अनन्तरोक्तभ्रान्तियोग इति । अनात्मन्यात्मबुद्धिरूपभ्रान्तियोगः इत्यर्थः । अविद्याया अयोग इति छेदसंभवमभिप्रेत्य तमेवार्थं विपर्ययतो व्याचष्टे-अहमर्थस्यानात्मत्वा इति । भ्रान्तेरयोग इति । आत्मभ्रान्तित्वयोगः इत्यर्थः ।

प्रत्यक्षविरोधे शास्त्रप्राबल्यनिरासः

एतेन प्रत्यक्षान्तराणां दोषमूलत्वमनुमीयते चेदिति । केषुचित् प्रत्यक्षेषु काचादिदोषमूलत्वदर्शनेन प्रत्यक्षान्तराणां कचादिदोष-मूलत्वमनुमीयते चेदित्यर्थः । एवमुत्तरत्र सर्वत्रापि दोषपदं काचादिदोषपरं द्रष्टव्यम् । ततश्च मुख्यमृषावादिनः स्वैकदेशिनं प्रति स्वव्याधातकरीयमुक्तिः कथं स्यादिति शङ्का निरस्ता । कोऽयं दोष इति भाष्यस्य यदुक्तमित्यनेनान्वयं घटयितुमुपयं प्रदर्शयति- कोऽयं दोष इत्यनया वचनव्यक्तयेति । दोषमूलत्वेनान्यथासिद्धिसंभावनया सकलभेदप्रत्यक्षस्य शास्त्रबाद्यत्वमिति यत् दोष-रूपमूलमुक्तम्, तत् किमित्येवं "को दोष' इति वचनव्यक्तया पृष्ट इत्यर्थः । यदुक्तमिति नपुंसकस्य को दोष इति पुंलिङ्गस्य च सामानाधिकरण्यसंपादनस्याति क्लष्यत्वादन्यता व्याचष्टे-यद्वा यच्छब्दसामर्थ्यादिति । हेतुत्वेन व्याप्तेरदृष्टतयेति । भेदवा-सनात्वस्येति शेषः । भेदवासनाया विपरीतज्ञानहेतुत्वेन व्याप्तेः=सावल्येन संबन्धस्येत्यर्थः ।

भाष्ये श्रवणावगतनिखिलभेदोपमर्दीति । श्रवणवेलायां निखिलभेदोषमर्दित्वेन प्रकारेणावगतस्य ब्रह्मात्मैकत्वविज्ञानस्याभ्या-सरूपत्वान्मननादेरित्यर्थः । न च मननस्य ब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वेऽपि ब्रह्मात्मैकत्वविज्ञानस्य निखिलभेदोषमर्दि-त्वाभ्यासरूपत्वं किमर्थमिति शङ्कनीयम्, ब्रह्मात्मैकत्वसिद्धयर्थं तदितरमिथ्यात्वसिद्धयै ब्रह्मात्मैकत्वविज्ञानस्य भेदोपमर्दित्वस्य चिनत्यत्वात् । आरम्भणाधिकररष मननात्मकत्वचिन्तायाः क्रियमाणत्वाच्च । भेदवासनामूलत्वं तावत् संप्रतिपन्नमिति । प्रकृतिप्रत्ययादिभेदवासनामूलत्वादिति भावः । तस्याश्च दोषत्वमिति । ननु दोषस्य भ्रान्तिवल्ष्यत्वाद्वेदान्तजन्यचिन्मात्रवि-षयकज्ञानस्य प्रामात्वेन दोषजन्यत्वं कुतः कल्प्यत इति चेत्- न;वृविरूपज्ञानस्यापि ब्रह्मव्यतिरिक्तवेन मिथ्यात्वात् दोषजन्य-त्वस्यावश्यकत्वात्, योग्यताभ्रमजन्यतया शास्त्रजन्यज्ञानस्यापि भ्रमत्वस्य वक्तव्यत्वाच्चेति भावः । मिथ्यात्वावगतिश्च ज्ञान-निवर्त्यत्वावगमादिति । ननु श्रवणवेलायां ब्रह्मव्यतिरिक्तमिथ्यात्वस्य "नेहे नानास्ति' इति शास्त्रेणैव प्रतीतेः मिथ्यात्वावगतेश्च दोषमूलत्वेन भेदासनाय एव दोषत्वं पर्यवस्यतीति । ऋजुमार्गे सति किमनेन वक्रमार्गानयणेनेति चेत्-अत्र केचित्-ननु श्रवणवे-लायां दोषजन्यत्वं नावगतम्, आरम्भणाधिकरण एव ब्रह्मव्यतिरिक्तमिथ्यात्वस्य, भेदप्रतीतेर्दोषजन्यत्वस्य च निरूप्यमाणतया आरम्भणाधिकरणस्य च मननात्मकद्वितीयाध्यायगतत्वात् श्रवणवेलायां दोषजन्यत्वाज्ञानात् शास्त्रजन्यज्ञानस्य परतया बाध-कत्वंभविष्यतीत्याशङ्कानिराकरणार्थं श्रवणावगतेत्यादि भाष्यम् । ततश्च मननस्य श्रवणावगतार्थदृढीकरणार्थतया श्रवणवेला- यामपि भेदमिथ्यात्वप्रतीत्यवश्यंभावेन तत्प्रतीतेर्दोषजन्यत्वप्रतीत्यवश्यंभावात् । अन्यथा श्रवणकालीनशास्त्रजन्यावगतेः परत्वेऽपि भेदमिथ्यात्वविषयत्वेन बाधकत्वाप्रसक्तेरिति भाव इत्याहुः ।

शब्दराशिव्यावृत्तिरिति । अशास्त्रभूतशब्दाराशिव्यावृत्तिरित्यर्थः । त्वयेति व्याख्येयं पदम् । स्वतःसिद्धत्वेन निर्धूतनिखिल-विशेषत्वमिति । स्वतः सिद्धत्वे प्रागभावभावेनोत्पत्त्यभावात्, "उत्पत्तिप्रतिबद्धाश्चान्ये विकारा न सन्ती'ति पूर्वमुक्तत्वादिति भावः । परमाथर्त्वविकल्पशिरसि परवाद्यतभ्युपगमरूपदूषणाय स्पष्यत्वादपरमार्थ(त्व)पक्षं दूषयति-साधकं चेदिति । यद्यपि भाष्ये कोऽयं व्यापहारिको नामेत्यादिना व्यावहारिकत्वं दूषयिष्यत सति तत्रैवेदं

वक्तुमुचितम्, तथाप्यस्मिन्नपि वाक्य एषां दूष-णानां संभवमनिप्रेत्यैतदुक्तमिति द्रष्यव्यम् । युक्तये बाधो यौक्तिकबाध इति । "तेन दीव्यति' इति दीव्यत्याद्यर्थे उगिति भावः ।

लेखकस्वलनकृत इति । अत्र केचित्-तदभावावगाहिप्रत्यक्षादिज्ञानाबाधितस्यापि दोषजन्यज्ञानविेयत्वैकशरणा अपरमार्थत्व-प्रतीतिर्भवतीत्यस्यार्थस्य प्राक् प्रस्तुतत्वात् तस्यैवात्रापि प्रतिषिपादयिषिततया ज्ञातस्वतिमिरस्य तैमिरिकजनस्य चन्द्रद्वित्वे नास्तीत्येवं बाधकप्रमारानवतारेऽपि स्वदोषप्रतिसंधानमात्रेणे चन्द्रद्वित्वं दोषजन्यज्ञानविेयत्वान्तिथ्याभूतमिति मिथ्याभूतप्रति-पत्तेषामेव दर्शनात् निर्विशेषब्रह्मण्यपि नास्तिताग्राहकस्य परोक्षस्यापरोक्षस्य वा प्रमाणस्य कस्यापि जनस्याप्रवृत्तावपि दोष-जन्यज्ञानविषयत्वेनैव ब्रह्ममिथ्यात्वं ज्ञास्यत इत्येतत्परत्वात्, पुरुषान्तरागोचरत्वोक्तेश्च उपदेशादिलक्षरपरोक्षरूपाभावग्राहि-प्रमाणानुदयप्रतिपादनपरत्वेन साफल्याच्च, तैमिरिकजनस्य तिमिरान्वये आप्तवाक्यादिकमन्वेष्टव्यमिति क्लेशस्याष्यभावाच्च । अत एव पुरुषान्तरज्ञानेन मिथ्यात्वनिश्चय इत्युतरग्रन्थोऽपि न युक्तः । पुरुषान्तरज्ञानेन बाधोदये बाधकज्ञानेनैव मिथ्यात्व-निश्चय आपन्न इति बाधकज्ञानशून्ये कथमिव मिथ्यात्वप्रत्यय उपपदितः स्यात् । यदि पुरुषान्तगणां प्रकारान्तरेण बाधकज्ञा-नानुदयेऽपि दोषजन्यज्ञानविषयत्वैकशरणामिथ्यात्वप्रतीतिः, तर्हि ज्ञातस्वतिभिराणामेव तैमिरिकजनानां दोषजन्यज्ञानविष- यत्वेन मिथ्यात्वप्रतीतिसंभवात् पुरुषान्तरोप्यासो व्यर्थः । अतो ज्ञातस्वतिमिरस्येति पाठमाद्रियन्ते । ननु स्वविषयेण ब्रह्मणा सह मिथ्यैवेति । भाष्यमयुक्तम्, दोषजन्यज्ञानविेयस्यैव मिथ्यात्वस्यापादनार्हत्वाद्दोषजन्यज्ञानस्वरूपस्य मिथ्यात्वाभावादि-त्याशङ्कयाह - परमताभ्युगमादुक्तमिति । चन्द्रद्विवजनस्य विपर्यण सह मिथ्यात्वमित्यभ्युपगमादिहापि ज्ञानविषययोद्वेयोरपि मिथ्यात्वभापाद्यत इति भावः । ननु परमते चन्द्रैकत्वज्ञानमपि मिथ्यैवेति विशिष्य कतं द्विचन्द्रज्ञानस्य दोषजन्यतया मिथ्यात्व-मुच्यते? न च चन्द्रैकत्वज्ञानं व्यावहारिकम्; द्वित्वज्ञानं तु न तथेति वाच्यम्-ब्रह्मप्रमान्याबाध्यत्वेन द्वयोरप्येकरूपत्वादिति चेत्- न; इदमंशावाच्छिन्नचैतन्यस्थाविद्या रजतज्ञानाभासकारेण विवर्तते इत्युपगमेन रजतज्ञानस्याष्याभासत्वप्रदर्शनात्, प्रतिभासिक- त्वेन द्विचन्द्रज्ञानस्य चन्द्रकत्वज्ञानविलक्षणत्वात् आगन्तुकदोषजन्यत्वाच्चेति द्रष्टव्यम् ।

अनुमान एव प्रयोगशब्दौचित्यात् कथं तर्के प्रयोगशब्द इत्याशङ्कयाह-व्याप्तिप्रदर्शनवचनत्वादिति । अन्यतगसिद्धमिति । मन्मते अप्रसिद्धमित्यर्थः ततश्चापादकान्यतरासिद्धिर्न दोष इति दूषणमलग्रकं वेदितव्यम् । केचित्तु-तर्कत्वं विस्मृयासिद्धिदूषणो-द्भावनम्; अत एव तर्कत्वावलम्बनेनैव परिहरिष्यत इति वदन्ति ।

असत्यात् सत्यप्रतिपत्तिनिरासः

भाष्ये सत्यैवादष्टेऽपीति । पूर्वमात् भयदिहेतुरित्यनुषज्यत इति द्रष्टव्यम् । भाष्ये वस्तुमृत एव जालादाविति । वस्तुभूत इति मुखादिप्रतिभासविशेषरम्; न जादिविशेषणम् । प्रतिभासमानत्वमेव विषयत्वमित्यर्थ इति । प्रतिभासमानत्वमेवलम्बनत्वव्य-वहारेऽपेक्षितमिति भाष्यार्थ इति भावः । तेन रूपेणासत्यतेति । न तु प्रतिभासमानत्वरूपेणापीत्यर्थः । तथा साक्षादवभासमान इति । विद्यमानतया साक्षात्क्रियमाण इत्यर्थः । अतः परेक्षज्ञानस्थलेन व्यभिचार इति दोषो निराकृतः । न ज्ञानस्य हेतुतयापे- क्षित इति । हेतुत्वं नास्ति, विषयत्वमस्ति । विद्यमानस्थले तु द्वयमप्यस्तीति वाक्यार्थः । वस्तुतो विद्यमानत्वमेवेति । प्रति-भासंमानत्वरूपेण विद्यमानस्यापि वस्तुतो विद्यमानत्वं नास्तीति भावः । अयं भावः - केचन धर्मा धर्मिसत्तासापेक्षाः । केचन तन्निरपेक्षाः । तत्र च प्रतिभासमानत्वासत्त्वातीतत्वानागतत्वादयो धर्मास्तन्निरपेक्षाः । कारणत्वरूपित्वादयो धर्मास्तत्सापेक्षाः । तत्र धर्मिसवासपेक्षैर्धर्मैर्विशिष्टतयावस्थितिरेव वस्तुतो विद्यमानत्वमिति । व्यावृत्तिश्च स्वालम्बनेनेति । न च व्यावृत्तिजनकत्वे

आलम्बनस्यासत्यत्वादसत्यात् सत्यसिद्धयापत्तिरिति वाच्यम्, व्यावृत्तिधीजनकज्ञानविेयत्वरूपं तदीयतानियाकस्वरूपविशेषरूपं वा व्यावतर्अकत्वं तत्र तदाऽविद्यमानस्याप्युपपद्यत इति भावः । अन्यथाक्यातिपक्षेऽपीति । नन्वविद्यमानानामेव दोषवशादालम्ब-नत्वं तत एव व्यावर्तकत्वं च संभवति,

व्यावर्तकत्वस्य हेतुत्वरूपत्वाभावादिति समर्थनेनैव समीहितसिद्धेः किमेतन्निरूपणेनेति चेत्-सत्यम् । आलम्बनत्वमप्यत्यन्तासतो न संभवतीति प्रासङ्गिकत्वदुपपद्यत इति द्रष्टव्यम् । क्वचिदर्थात्तत्प्रतिपत्तिरिति । दर्पणप्रतिहतनयनरश्मिसंपृक्तादर्थादित्यर्थः । क्वचित्प्रतिभासादिति । स्वाप्नस्थल इति भावः ।

असतो निरुपाख्यस्येत्यनयोः पौनुक्तयं च(?)परिहरन् पक्षद्वयदूषणपरतया व्याचष्टे - असतः सद्व्यतिरिक्तस्येत्यर्थ इत्यादिना । भाष्ये उपायोपेययोरित्यादि । यद्यपि "अकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः' इति आरम्भणाधिकरणशांकरभाष्यं व्याकुर्वता वाचस्पतिना-"यद्यपि रेखास्वरूपं सत्यम्, तथापि तत् यथासंकेतमसत्मयम् । न हि संकेतयितारः संकेतयन्ति, "ईदृशेन रेखाभेदेनायं वर्णः प्रत्येतव्यः' इति, अपि तु ईदृशो रेखाभेद एवाकार इति । ततश्चासमीचीनात् संकेतात् समीचीनवर्णावगतिः' इत्यनृताक्षरप्रतिपत्तेः सत्याक्षरप्रतिपत्तिहेतुत्वकथनान्न साध्यसाधनयोरभेदः-तथापि पूर्वदूषण एव तात्पर्यम् । सिंहावलोकनेनेति । ननु वर्णात्मना प्रतीता रेखेति तृतीयपक्ष एव-बुद्धयंशहेतुत्वपक्षे दूषणमुक्तम्; वर्णात्मतांशे दूषणमुच्यत इत्युपपत्तौ सिंहाबलोकनं किमर्थमिति चेत्-अत्र केचित्-वर्णात्मतां-शस्य प्रथमपक्षानुप्रविष्टत्वाभिप्रायेण सिंहावलोकनोक्तिरुपपन्नेति वदन्ति । केचित्तु-संहावलोकनेनेत्येतदशविकल्पमुखेन ग्रन्थप्रवृत्तिमनभ्युपगच्छतामिदं व्याख्यानान्तरम् । अतो वाशब्दोऽध्याहर्तव्य इति मन्यन्ते । अविद्यामानवर्णात्मनेत्यत्र अविद्यामानत्वं वर्णात्मकत्वविशेषणं, वर्णस्य विद्यमानत्वेऽपि वर्णात्मताया अविद्यमानत्वमभिप्रेत्य तद्विशेषणतया व्याचष्टे-अविद्यमानवर्णात्मत्वेनेति । रेखागवयादपीति भाष्यस्यायमर्थः-रेखायामारोपितेनासत्यगवयेनसत्य-गवयप्रतीतिरिति नाभ्युपगन्तव्यम्, रेखायां गवयारोपे प्रमाणाभावात् । अपि तु गवयसदृशरेखां प्रदर्श्य "एतत्सदृशो गवयः' इति बोधयन्ति । तथैव प्रतिपद्यन्ते च । तच्च सादृश्यं सत्यमेवेति ।

स्फोटवादनिरासः

कत्वखत्वादिभेद इति । अत्रादिपदेनोदात्तत्वानुदात्तत्वतारत्वमन्द्रत्वदीर्घत्वादयो गृह्यन्ते । शब्दो आरोपित इति । स्फोटरूपशब्दे आरोपित इत्यर्थः । खत्वादिकमुदात्तत्वादिकं च सर्वं नादगतमेव, स्फोटनादोभयव्यतिरेकेण कत्वाद्याश्रया वर्णा एव न सन्तीति हि स्फोटवादिनां प्रक्रिया । वर्णनित्यत्ववादिनां तु कत्वाद्याश्रयवर्णा नित्याः । तारत्वदीर्घत्वादिकं तु नादगतमिति विवेकः । अभिव्यक्तिविशेषः सत्य इति । अभिव्यक्तिः ज्ञानम् । अत एवोत्तरत्र कत्वाद्यालम्बनाभिव्यक्तिविशिष्टरूपेणेति । वक्ष्यति । ननु दुन्दुभ्यादिः कुतो न व्यावर्त्यत इत्यत्राह-स त्वनभिव्यक्तेति । तस्यापि गकारादित्वेन तद्भिन्नत्वाभावात् एवकारेण न व्यावृत्तिरित्यर्थः । अनुभूतार्थान्तरप्रतीतिहेतुत्वाभावेनेति । अयं भावः-संस्काराणां साचिव्यं किं पदादर्थप्रतीतौ साक्षात्? उत स्वीवर्णविषयस्मृतिद्वारा? नोभयथापि संस्कारस्य हेतुत्वं संभवति, शब्दार्थानुभवस्य शब्दार्थप्रत्ययस्य वणर्संस्काराजन्यतया तत्प्र-तीतौ न साचिव्यम् । नापि सवर्वर्णस्मृतिद्वारत्वम्; संस्काराणां स्वविषयमात्रस्मारकत्वेन समूहालम्बनस्मृत्यसंभवादिति । अत एवोत्तरत्र वक्ष्यति-युगपत्कार्यकरत्वं युक्तमिति । एकार्थावच्छिन्नवर्णमम्मुदायत्वलक्षणपदत्वपरित्यागेनैकविभक्तयन्तानेकवर्ण-समुदायस्य पदत्वाश्रयणादन्योन्याश्रयणं निरस्तमित्याह-न चार्थैकत्वादिति । पदैकत्वादर्थैकत्वमिति । अनुगतप्रवृत्तिनिमिव-रूपार्थकल्पनस्यैकपदप्रयोगानुगत्यधीनत्वादिति भावः । उक्तं च - "एकशब्दप्रवृत्तिनिमित्तत्वादेकसंस्थानत्वं निलेन्दीवरत्वस्य खण्डगोत्वं तु न तथा, एकशब्दाभावात्' इति । यद्वा घटव्यक्तीनां नानात्वेन स्वत ऐक्याभावाद्वावकशब्दैक्यनिबन्धनमेव वाच्यै-क्यमिति भावः । अव्याप्तिर्न स्यादिति । सुबन्धतमात्रत्वस्य वा तिङन्वमात्रत्वस्य वा पदत्वप्रयोजकत्वेऽव्याप्तिः स्यात् । विभक्ति- त्वेन द्वयोरष्येकीरणे तु न तथेति भावः । केचित्तु-एकविभक्तीत्यत्र एकपदं व्यर्थम्, विभक्तयन्तत्वमात्रस्यानतिप्रसक्तत्वात् । "नीलो घटः' इत्यादिपदसमुदायस्य प्रत्ययग्रहणपरिभाषया वित्तयन्तत्वाभावात् । न हि समुदायात् विभक्तयुत्पत्तिः, अन्यथा "सुप्तिङन्यं पदम्' इति पदत्वस्यापि प्रसङ्गात् । समासावयवपदेष्वष्यन्तर्वर्णिनीं विभक्तिमाश्रित्य पदसंज्ञासंभवान्नाव्याप्तिरित्यर्थ इति वदन्ति । सैन्धवादिशब्दनामनेकार्थयतीत्युपयुक्तकानां पदत्वं न स्यात् । अत आह-एकव्युत्पत्तिसिद्धेति । तत्र चेनेकार्थप्रति-पादकत्वं व्युत्पविभेदेनेति भावः । अतश्च वाक्यस्यापि संसर्गलक्षरविशिष्टरूपैकार्थप्रत्यायकत्वेनातिप्रसङ्गः

परिहृतः । वाक्यस्य विशिष्टरूपार्थप्रत्यायकत्वनाकाङ्क्षादिमत्पदसमभिव्याहारलभ्यम्,न व्युत्पत्तिलभ्यमिति द्रष्टव्यम् । चाक्षुषत्वज्ञाने न चक्षुरपेक्षेति । यथा चक्षुर्जन्यज्ञानविषयत्वलक्षणचाक्षुषत्वज्ञानं न चक्षुर्जन्यम् , एवं श्रोत्रग्राह्यत्वलक्षरशब्दत्वज्ञानं न श्रोत्रजन्यमित्यर्थः ।

चाक्षुषत्वश्रावणत्वादिज्ञानमिति । ननु श्रावणत्वस्य चाक्षुषत्वस्थानाभिषिक्तत्वेऽपि न शब्दत्वं चाक्षुषत्वस्थानाभिषिक्तम्; अपि तु रूपत्वस्थानाभिषिक्तम् । ततश्च यथा चाक्षुषत्वाद्रूपत्वं भिद्यते, एवं शब्दत्वं श्रोत्रग्राह्यत्वात् भिन्न भवितुमर्हति । इतरथा "शब्दः' श्रावणः' इति पुनरुक्तिः स्यादिति चेत्-न; चाक्षुषत्वस्यैव रूपत्वस्वरूपत्वे घटादावपि रूपत्वप्रसङ्गेन रूपत्वस्य चाक्षु-षत्वभिन्नत्वेऽपि शब्दत्वस्य श्रोत्रग्राह्यत्वरूपत्वे च(?)बाधकाभावात् । न च श्रोत्रग्राह्यत्वं कत्वादावतिप्रसक्तमिति वाच्यम्, श्रोत्रग्राह्यगुणत्वस्य शब्दत्वरूपत्वे बाधकाभावात् । केचित्तु-रूपत्वमपि चक्षुग्राह्यनुरत्वमेवेति वर्णयन्ति । व्युत्पन्नशब्दस्मरण-पूर्वकमिति । कत्वखत्वादेः श्रोत्रग्राह्यत्वलक्षणशब्दत्वव्याप्तिमवगतवतः पुंसो व्याप्तिरस्मरणादिपूर्वकमेव शब्दत्वानुमितिरित्यर्थः ।

शास्त्रसत्यत्वशङ्कापरहिारः

सत्यप्रतिपविहेतुष्विति । प्रपञ्चसत्यत्ववादिमत इति शेषः । न तु स्वमतानुसारेण; स्वमते सत्यप्रतिपत्तिहेतोर्वदान्तातिरिक्तस्य कस्याष्यभावादिति द्रष्टव्यम् । भाष्ये-मिथ्याभूतशास्त्रजन्यज्ञानस्येति । असतिं शास्त्रे "अस्ति शास्त्रम्' इति भ्रान्तिजन्यायाः प्रतीतेभ्रान्तित्वावश्यंभावादित्यर्थः । पूर्वग्रन्थे "अस्ति शास्त्रम्' इति बुद्धेर्भ्रान्तित्वस्योपपादितत्वात् । इत्तरथा पूर्वोत्तरग्रन्थयोरुप-पाद्योपपादकभावाभावत् पूर्वग्रन्थवैयर्थ्यमेव स्यात् । मिथ्याभृतशासजिन्यज्ञानस्येत्यादिनैव चारितार्थ्यादिति द्रष्टव्यम् । स्तुति-परत्वाद्यूपादित्यैक्याप्रतिपादनमित्यपसिद्धान्त इति । ननु - स्तुतितात्पर्यवती श्रुतिः प्रत्यक्षात् प्रबला । आदित्यो पूप इत्यादेः न यूपादित्यैक्ये तत्पर्यम् । स्तुतिपरस्य तत्रापि तात्पर्ये वाक्यभेदप्रसङ्गात् । अतोऽतत्परत्वात् "आदित्यो यूपः' इत्यादेर्न प्रत्यक्षबाध-कत्वम् । न चैवं देवताविग्रहादेरपि सिद्धेर्न स्यात्, तात्पर्याभावादिलि शङ्कनीयम् - असति मानान्तरविरोधे तात्पर्याभावेऽपि प्रमाण्यं प्रतीयमानार्थे उपपद्यते । देवताविग्रहादौ मानान्तरविरोधाभावात् तात्पर्याविषयस्य विग्रहादेः सिद्धावपि यूपादित्यैक्य- स्थले मानान्तरविरुद्धस्य तस्य तात्पर्याभावे न सिद्धिः । प्रपञ्चमिथ्यात्वस्थले षड्िवतात्पर्यलिङ्गसत्त्वान्न प्रत्यक्षविरोधाद्धयमिति हि तत्सिद्धन्त इति चेत्-न । स्तुतिपरस्यार्थवादस्य स्तुतिद्वारभूतार्थेवान्तरतात्पर्येऽपि वाक्यभेदाभावात् । इतरथा देवताविग्रहा-देरष्यसिद्धिप्रसङ्गात् तात्पर्यविषय एव वेदानां प्रामाण्यमिति सर्वैरपि वैदिकैरभ्युपेतत्वाच्च स्तुतिपरत्वान्न यूपादित्यैक्यप्रतिपादन-मित्ययुक्तमेव । अपि तु मानान्तरविरोधेन यूपादित्यैक्यतात्पर्यासंभवात् न यूपादित्यैक्यमित्येव परमा गतिः । ततश्च प्रपञ्चमिथ्या- त्वेऽपि मानान्तरविरोधान्न तात्पर्यमिति सिद्धमिति भावः । असंनिकृष्टेति श्लोकस्यायमर्थः -"शास्त्रं शब्दविमानादसंनिकृष्टऽर्थे' इति शास्त्रलक्षणे असंनिकृष्यादेन द्वयं व्यावर्त्यतयाभिप्रेतम्-किं तत्? ताद्रूष्येण परिच्छित्तिः, तद्विपर्ययतः परिच्छित्तिश्च । साधक-बाधकप्रमाणाभाव इति यावत् । प्रमाणान्तरागोचरत्वलक्षणमिति । प्रमाणान्तराबाधितत्वमित्यर्थः । इत्यलसप्रतिष्ठितेति भाष्ये इति शब्दस्य संनिहितशास्त्रप्राबल्यनिरासपरत्वमुचितमित्यभिप्रयन्नाह - शास्त्रप्राबल्यनिरसनमिति । कुतर्केति तर्कशब्दस्वार-स्यमभिप्रयन्नाह - यत्तु प्रत्यक्षमिति ।

श्रुतिघट्टः

तत्रापीति । दृष्टान्तोऽपीत्यर्थः । विकारो घटत्वाद्यवस्थेति । ननु पूवर्त्र मृन्मयशब्देन विकारार्थमयडन्तेन यस्य परामर्शः, तस्यै- वेहापि विकारशब्देन परामर्शो युक्तः । ततश्च पूर्वत्र मृन्मयशब्देनावस्थाश्रयस्य परामृष्टतया विकारशब्देनापि धर्मिण एव परामर्शो युक्तः; न त्ववस्थाया इति चेत् - सत्यं पूर्वत्र मृन्मयशब्देनावस्थावतः परामर्शः । इहतु न तत्परामर्शो युज्यते । तथा हि सति कार्यकारणाभेदो नोपपादितः स्यात् । न हि मृत्पिण्डेन कार्यविशेषाय घटः स्पृश्यत इत्येतावता स्पृष्टस्प्रष्टव्ययोरभेदः सिध्यति । अतो मृन्मयविकारशब्दयोर्भिन्नार्थत्वमेव वक्तव्यम् । अत

एव "मृत्तिकेत्येव सत्यम्' इत्यत्राव्यवहितविकारशब्दनिर्दिष्टावस्थाया न परामर्श इति भावः । मृदयं घट इति प्रत्यभिज्ञयेति । अत्र केचित् - इतिशब्दबलात् प्रतीतेः शब्दस्य वा पराभ्रष्टव्यत्वात् मृत्तिकेति ज्ञानमेव सत्यमिति श्रुत्यर्थः । तस्य ज्ञानस्य सत्यत्वे मृद्द्रव्यत्वस्याबाधितत्वं सिद्धमित्युत्तरग्रन्थः फलितार्थकथनपरो द्रष्टव्यः । न च मृन्मयं मृत्तिकेत्येव सत्यं प्रामाणिकं प्रामाणत्ः प्रतीयत इत्यर्थाश्रयणे को दोष इति वाच्यम्, प्रमाणतो मृविकेति प्रतीयत इति वा, मृत्तिकेत्याकारकं यत् प्रमाणं तेन प्रतीयत इति वा इतिशब्दस्य प्रमाणप्रतीत्यन्यतरान्वयो वक्तव्यः । प्रमाणतः प्रतीयत इति हि निर्देशे कृते तथान्वयप्रतीतिरुपपद्यते । सत्यशब्दात् प्रतीतौ तथा गमकत्वादशर्नादिति वदन्ति । अन्ये तु मअत्तिकेत्येव प्रमाणतः प्रतीयत इत्यत्रेव सत्यपदेऽपि तथावगतेरनुभवसिद्धतया प्रत्याख्यातुमशक्यत्वात् मृन्मयं मृविकेत्येव सत्यं प्रमाणप्रति-पन्नमित्युक्तौ न दोषः । अत एव मृद्द्रव्यत्वेनैव प्रामाणिकमित्यर्थ इति टीकावाक्येऽपि न चोद्यावकाशः । तस्यापि वाक्यस्य गमकत्वादिति वदन्ति । ननु उपादानोपादेयाभेदयतिपादनमुखेनासत्कार्यवादे निराकरणीये विकार आलभ्यत इति प्रतिपादनस्यैव सप्रयोजनतया नामधेयस्याष्यालभ्यामानत्वप्रतिपादनं किमर्थमिति चेत्-सत्यम् । घटादिनामापि मृत्पिण्डस्यैवेत्युपपादनाभावे उपादानोपादेयाभेदो न प्रतितिष्ठतीति तदप्युपपादनीयमिति द्रष्टव्यम् । ननु नैयायिकादिभिरपि मृन्मये घटशरावादौ मृविकात्वस्य सत्त्वाभ्युपगमात् अनेनासत्कार्यवादनिरासः कथं फलित इति चेत्-न । "मृत्तिकेत्येव सत्यम्' इति श्रुतेर्न मृविकात्वमात्रप्रति- पादने संरम्भः; किंतु "तदेवेदं मृद्द्रव्यम्' इत्यभेदप्रत्यभिज्ञाया उपादनभूतमृद्द्रव्याभेदप्रसाधनपरत्वात् । सर्वविज्ञानमुपपन्नमिति शङ्कायामिति । यद्विज्ञानेन सर्वं ज्ञातं भवति, तादृशं वस्तु किमिति भगवांस्त्वेष मे तत् ब्रहीत्विति पृच्छायामित्यर्थः ।

भ्रान्तः शङ्कते-यद्यपि सद्विजातीयमसदिति न विजातीयत्वाकारेणेति । अयं भावः-"इदं सदेव' इत्येकारेण इदंशब्दनिर्दिष्टे जगति सृष्टेः प्राक्सद्विजातीयत्वं तदन्यत्वं तद्विरोधित्वं वा व्युदमनीयम् । न तु गर्वस्मिन् लोके विजातीयभेदनिषेधः । यथा "घटः पूर्वाह्णे सदेव' इत्युक्ते एवकारेण घटे सद्विजातीयत्वं वा सदन्यत्वं वा सद्विरोधित्वरूपं वा निषिव्यते, न तु सर्वस्मिन् लोके पटा-दिविजातीयभेद इति । ननु"सदेव' इत्यनेन सृष्यिप्राक्कालीनसत्ता प्रतीयते चेत्, ब्रह्मकारशकत्वमनुपपादितं स्यात् । सच्छब्देन ब्रह्मप्रतिपादने वा मानसंबन्धयोग्यत्वलक्षणसत्तायाः सदित्यनेनाप्रतिपादितत्वादसत्कार्यवादो न निराकृतः स्यादित्याशङ्क्याह - सच्छब्दो हि मानसंबन्धयोग्यतेति । प्रवृविनिमित्तस्य ब्रह्मण्येव पुष्कलत्वादिति भावः । नन्विदानीमपि जगतः सदात्मत्वात् "अग्र' इति व्यर्थम् । किंच "एकमेवासीत्' इत्यनेनैवासत्कार्यव्युदाससिद्धेः "सदेवासीत्' इति व्यर्थम् किंच इदंशब्देन जगतः परामर्शे तस्य ब्रह्मणैक्यासंभवात् सदासीदित्ययुक्तम् । तच्छरीरकब्रह्मपरत्वं चायुक्तम्, अश्रुतवेदान्तं श्वेतकेतुं प्रति इदंशब्दस्य ब्रह्मपर्यन्तबोधकत्वासंभवादिति चेत्-न; इदं जगत् सृष्टे। प्राक् सदेव सद् ब्रह्मैव सत् एकमविभक्तनामरूपमासीदित्यर्थः । अधुना जगतस्तादृशसद्रूपत्वाभावादग्र इति सार्थकमेव । "एकमेवासीत्' सत्युक्ते अविभक्तनामरूपमासीदिति प्रतीतावपि तादृशब्रह्मा-त्मकत्वस्यापि प्रतिषिपादयिषिततया सच्छब्दसार्थक्यम् । ननु "सदेवेदं जगत् प्राक् सृष्टेरेकम्' इति वेदार्थसंग्रहश्रुतप्रकाशिकायां व्याख्यातत्वात् कथमेवमिति चेत्-न; सिद्धस्यैवोद्देश्यविशेषणतया सदित्यस्यासिद्धत्वेन विधेयकोटावेवनिवेश्यतया तस्याष्यत्रैव तात्पर्यात् । यद्यष्यश्रुतवेदान्तेन श्वेतकेतुना न तद्वाक्योप्रकमदशायामेवं ज्ञायते, अथापि शरीरात्मभावप्रतिपादनानान्तरमिदंशब्देन जगच्छरीरकं ब्रह्म ज्ञास्यतीति बुद्धया, "सदेव सोम्येदमग्र आसीत्' इत्याचार्येणोपदिष्टमित्युक्ते विरोधाभावात् । ननु घटदेरावदि पूर्वाह्णे मृदेवासीत्; पश्चात् घटादिरूपेणाभवत्; तस्मान्मृदात्मकमेव घयशरावादीति निर्देशवत् किं न स्यादिति चेत्-न-"अनेन जीवेनात्मनाऽनुप्रविश्य' इत्यादि वाक्यं श्रुतवतः स्वरूपेण ब्रह्मपरिणामत्वशङ्काया अभावेन शरीरात्मभावस्यैव प्रतीत्या इदंशब्दे- नापि जगच्छरीरकब्रह्मप्रतीतेरेव संभवात् ।

परतन्त्ररूपविशेषणानामिति । कालादृष्टादीनामित्यर्थः उपरितनवाक्यसंगतिमेव दर्शयति - एकमेवेत्यादिना । ब्रह्मणः सर्वदा सत्त्वेनेति । सच्छब्दप्रवृविनिमिवपौष्कल्याधारभूतब्रह्माभेदस्य "सदेवेदम्' इति बोधनात् कार्यस्य कदाष्यसत्त्वशङ्काव्यावृविरि- त्यर्थः । वैशेषिकमतनिरासपरमिति । न च तथा सति, "तद्धैक आहुरसदेवेमग्र आसीत् एकमेवाद्वितीयम्' इत्यनुवादोऽनुपपन्नः, तैस्तथानभ्युपगमादिति वाच्यम् - शून्यवादनिराकरणेऽपि दोषसाम्यात् । न हि शून्यवादिनैकमद्वितीयं किंचिदभ्युपेतम्, सर्वदा सवर्शून्यत्वस्यैव तेनाभ्युपेतत्वात् । यदि च तद्वाक्यस्यैकत्वाद्वितीत्यत्वयोर्न तात्पर्यम्, तर्हि वैशेषिकस्यापि तत् तुल्यमिति भावः । वैशेषिकादिमतनिरासापेक्षत्वादिति । ननु "मृतिकेत्येव सत्यम्' इत्यत्रैव तन्निराकृतम् । इतरथा एकविज्ञानेन सर्वमानसंभवम-भ्युपगम्य, "भगवांस्त्वेव मे तद्ववीतु' इत्युपदेशप्रार्थनानुपपत्तेरिति चेत् -न; मतानुवादपूर्वकं सयुक्तिकं प्रत्याख्यातमित्यत्र तात्प- र्यात् । मृद उत्पन्नस्यमृदात्मकत्ववदिति । न च सतः कायर्स्या दुत्पन्नत्वस्यानभ्युपगतत्वात् कथमापादनमिति वाच्यम्-"जगत् पूर्वमसदासीत्; इदानीं सदासीत्' इत्युक्ते सतोऽसदुपादानकत्वमुक्तं स्यात्, यथा "घटशरावादिः पूर्वं मृदासीत्, पश्चात् घटादिरा- सीत्' इत्युक्ते तयोरुपादानोपादेयभाव उक्त एव स्यादिति निश्चित्यैतद् दूषणापादनमिति द्रष्यव्यम् । कथं निगश्रयावस्थासंभव इत्यर्थ इति । अयं भावः-यनि प्रकृत्युपादानकस्यमहदादेः प्रकअतित्वाभाववत् असदुपादानकस्यापि सतो नासव्वप्राप्तिः, सत्त्वा-वस्ताप्राप्तेरेवासंभवान्निराश्रयावस्था कथं लभ्येतेति । तदात्मकत्वेनैवेति । ऐतदात्म्यमिदं सर्वम्' इति पूर्ववाक्ये ऐतदात्म्यम्=एत-दात्मकमित्यर्थः; स्वार्थे ष्यञ् । ततश्च, "तत्सत्यम्' इत्युतरत्रापि पूर्वनिर्दिष्टवेषविशिष्टस्य पराभ्रष्यव्यतया तदात्मकस्यैव जगतः सत्यत्वसिद्धिरिति भावः । ननु "एतदात्म्यम्' इत्यनेनैव जगद्ब्रह्मणो। शरीरशरीरिभावे कथिते "स आत्मा' इति निर्देशवैयर्थ्यमिति शङ्कां परिहरति-रामानुजं लक्ष्मणपूर्वजं चेतिवदिति । यद्वा स त आत्मा इति । अस्मिन् पीष "स आत्मा,' "तत्त्वमसि' इत्यनयोः पौनरुक्त्य परहि◌ारः कथचिदनुसंधेय । तत्पर्यन्ता इति तत्त्वमसीत्यस्यार्थ इति । तत्त्वंशब्दादीनां तदर्थपर्यन्तत्वम्, "तत्त्वमसि' इत्यस्य प्रघट्टकस्य फलितार्थ इत्यर्थः; न तु "तत्त्वमसि' इत्यस्यैवार्थ इति मन्तव्यम्, "तत्त्वमसि' इत्यस्य तावदर्थकत्वाभावात् ।

इगुपधात्क इत्यपवादसूत्रेणेति । "इगुपधज्ञाप्रीकिरः कः' इत्यपवादसूत्रेणेत्यर्थः । नन्विगुपधलक्षणकप्रत्ययस्य न पचाद्यज्वाधक- त्वम्, तथा हि सति देवमेषादिरूपासिद्धिप्रसङ्गात्; पचादित्वाश्रयणस्य कप्रत्ययबाधकत्वार्थकत्वादिति चेत्-न । भावानवबो- धात् । "नन्दिग्रहिपचादिभ्यः' इति सूत्रे "सर्वधातुभ्योऽज्वक्तव्यः' इत्यौपसंख्यानिकस्योत्सृष्टस्याच्रत्ययस्य शङ्कितततया तस्ये-गुपधलक्षणकप्रत्ययबाध्यत्वाभिधानेऽदोषात् । औपसंख्यानिकेऽष्यचि "प्रचाद्यच्' इति व्यवहारस्य ग्रन्थेषु दर्शनादिति द्रष्टव्यम् ।

प्रकृत्यर्थः शासनमिति । अत्र केचिच्चोदयन्ति-यत्तावदुच्यते प्रसिद्धिप्राचुयात् प्रकृत्यर्थः शासनमितिः सत्यमेव तत् । "शासनं विविच्य ज्ञापनम्' इति धातुवृत्तिकृता व्याख्यातत्वादुपदेश एव पर्यवसानम्; "उपदेशेऽजनुनासिक इति,' "स्थनिवदादेशोऽन- ल्विधौ' इत्यादिसूत्रेषु "दिशि◌ुच्चारणक्रिय' इति महाभाष्योक्तेः । "अथोतोऽहंकारादेशः' इत्यादावादेश उपदेश इत्यर्थः । "इदं शास्याचार्यः' इति भाष्यस्य "इदमुपदिशति' इति ह्यर्थः । "तदशिष्यम्' इत्यादौ "अवक्तव्यम्' इति व्याख्यातम् । ततश्चादेशनं शासनमुपदेशनम् । तत्कर्मत्वं च "अनु म एतां भगवो देवतां शाधि' इति ब्रह्मणः सिद्धमिति प्रकृतिप्रत्ययययोरविरोधसंभवात् प्रत्ययास्वारस्यानुसरणस्यायुक्तत्वात् । न चानुशासनकर्मत्वेऽपि न शासनकर्मत्वमिति वाच्यम्, "शासु अनुशिष्टौ' इति शास-नस्यैवानुशासनरूपत्वात् ।

ततश्च करशत्वाध्यारोपेण घञ्समर्थनमप्यनुचितम्, आरोपस्यानुचितत्वात् । ननु करणत्वस्य ना- ध्यारोपः, तस्यापि सत्त्वादिति चेत्-न; तथा सति सिद्धान्ते प्रत्ययास्वारस्याभ्युपगमस्यायुक्तत्वात् । अत एव "असिꣳछनत्ति' इत्यादौ सौकर्यातशयविवक्षया "ब्रह्मदृष्यिरुत्कर्षात्' इतिन्यायंन करणे कर्तृत्वाराप्रेपि न कर्तरि करणत्वारोपसंभवः, तथा सति राजनि भृत्यत्वारोपभ्येवानर्थावहत्वात् । अत एव "साधकतमं करणम्' इति सूत्रे अधिकरणस्थाल्याः तनुकपालतया साधकत- मत्वविवक्षया "स्थाल्या पचति' इति प्रयोगमुपपाद्य, "न चैवं कर्तुरपि करणत्वविवक्षाप्रसङ्गः, भिन्नजातीयत्वात् । सकलसाध-नविनियोगकारी खल्वसौ । न हि शतधनो निष्कधनेन स्पर्धितुमर्हती'ति कर्तुः करणत्वविवक्षाभाव उपपाद्यते । किं च करणत्वे विवक्षिते "करणाधिकरणयोश्च' इति परेण ल्युटा बाधितत्वेन घञोऽप्रसङ्गः । न च "हलश्च' इत्यनेन घञः प्रसङ्गः । तत्रापि "संज्ञायाम्' इत्यनुवृत्तेः । न च त्वन्मतेऽपि कर्मणि घञ् न स्यात्, "अकर्तरि च कारके संज्ञायाम्' इति संज्ञायामेव घञो विधा-नादिति वाच्यम्- "अकर्तरि च "इत्यत्र चकारस्य भिन्नकमत्वामाश्रित्यासंज्ञायामप्यस्तीति पदमञ्जर्यादौ समर्थितत्वात् । "संज्ञा-ग्रहणानर्थक्यं च सर्वत्र घञो दर्शनात्' इति वार्तिककृतोक्तत्वाच्च । किं च घञः करणार्थत्वे, उपक्रम आदेशशब्देन प्रशासिताभि- धीयत इति यदभिहितं तद्विरुध्येत, प्रशासनकरणत्वस्यैवाभिहितत्वेन प्रशासनकर्तुरनभिहितत्वात् । यच्चोक्तम्-प्रशासितृत्वमसाधा-रणमिति । तदपि न, आदेशशब्देन प्रशासनकरणत्वमात्राभिधानेऽपि प्रशासितृत्वानभिधानात् । तदभिधानेऽपि निरुपाधिकप्रशा-सितृत्वस्येव मुख्योपदोयत्वस्यैव ब्रह्मासाधारणत्वात् । अत एव"ब्रह्मजिज्ञासा' इति सूत्रे "ब्रह्मणः' इति कर्मरि षष्ठीपरिग्रहात् ब्रह्मण एवाभिधानिकजिज्ञासाकमर्त्वम्, तदुपासनादीनां त्वाक्षेष्यमित्युक्तम् । किंच आदेशशब्दमात्रस्य अतिप्रसङ्गमाशङ्कय तमित्येवंविशेषणदानादवश्यं तमित्यस्यादेशविशेषकत्वमभ्युपेयम् । यदि ह्यादेशशब्दस्यैव निरुपाधिकप्रशासितृत्वमर्थः, तदा तस्य परमात्मासाधारणत्वात् तच्छब्दो विशेषको न स्यात् । यदपि चोक्तं प्रष्टव्यत्वकथनेनोपदेश्यत्वं सिद्धमिति तत्कथनस्यानपेक्षित- त्वात् प्रशासिदृत्वमेवार्थ इति-तन्न,"यद्यपि पूर्वं नाप्राक्षम्, अधुना स्वयमेव ज्ञास्यामि' इति बुद्धिं व्युदसितुमुपदेष्टव्यत्वकथन-स्यैवापेक्षितत्वात् । अत एव, "तं त्वौपनिषदं पृच्छामि' इत्यादौ प्रष्टव्यस्योपदेश्यत्वलक्षणौपनिषदत्वकथनम् । यच्चोक्तम्-सर्व-विज्ञानप्रतिज्ञासिद्भयर्थं निमिवत्वमपेक्षितमिति । तन्न, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाबलादुपादानत्वस्येव तदन्यथानुपपत्या निमित्तत्वस्यापि लाभसंभवेन तस्य पृथगवक्तव्यत्वात्, तदनुपपत्तेर्भवतैवोक्तत्वाच्च । वस्तुतस्तु निमित्तान्तरसद्भावे एकविज्ञानेन सर्वविज्ञानमनुपपन्नमित्युक्तिरष्यसंगता, नित्यविभूत्या अज्ञानेऽप्येकविज्ञानेन सर्वविज्ञानं यथोपपद्यते, कार्यवर्गस्य ज्ञातत्वात् सर्वशब्दस्येदंकारगोचरबहुभवनसंकल्पपूर्वकसृष्टिमात्रविषयत्वात्-तथा तादृशनिमित्तान्तरसद्भावेऽप्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा कुतो न संगच्छत इति ।

अत्रोच्यते-"एष उपदेशः' इत्येवं पृथगपदिष्टयोः "न वायुक्रिये पृथगुपदेशात्' इति न्यायेनादेशोपदोयोर्भेदावश्यंभावात् निमन्त्र-णामन्त्रणयोरिव, वृक्षवनस्पतिशब्दयोरिव, वृक्षवनस्पतिशब्दयोरिव च, स्नेहभक्तिशब्दयोरिव च क्वचिदकविषये प्रयोगमात्रेणानु-भवभेदस्य दुरपह्नवत्वात् । "आदिशाति' इत्युक्ते हि यद्वाक्योल्लङ्घने दण्डा भवतितादृशशब्दप्रयोक्तृत्वं नियमयितृत्वमाज्ञापयि- तृत्वं प्रतीयते । आदिशतीति व्यवहारः प्रभुविषय एव । अत एव न्यासकारेणादेशोपदेशयोर्भेदो वर्णितः-"आङ्पूर्वोदिशतिर्नियोक्तृ-

प्रयोजनवचनः' इति; "अन्तः प्रविष्टः शास्ता जानानम्' इत्यादौ तथैव प्रतीतेः । ततश्च प्रकृतिस्वारस्येन नियमनापरपर्यायाज्ञापन-रूपार्थे प्रतीते घञ्प्रत्ययस्य कर्तृव्यतिरिक्तकारकमात्रवाचिनो योग्यतावशात् त्वन्मते कर्माथकत्ववत् अस्मन्मतेऽपि कारकवाचिनो घञ्प्रत्ययस्य सकलकारकप्रयोक्तृकर्तृलक्षणा समाश्रीयते । प्रष्यव्यवस्तुनस्तादृग्रूपत्वात् असंजातविरोधिमुख्यप्रकृत्यर्थानुग्रहेण जघ-न्यलक्षणाय आश्रयणीयत्वात्

। "पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः' इत्यादावहःपरत्वस्वरसत्रिवृदादिपदमुख्यत्वानुसारेण जघन्य-संवत्सरपदस्यैव सौरचान्द्रमासाद्यनेकार्थसाधारण्येन निश्चयासमर्थस्याजहल्लक्षणाया अभ्युपेतत्वात् । तथा "प्रयाजशेषेण हर्वीष्य-भिदारयति' इत्यादौ प्रयाजशेषप्रातिपदिकानुरोधेन तृतीयायां द्वितीयार्थलक्षणाया आश्रितत्वात् । तथा "प्राणा वा ऋषयः' इत्या- दौ ऋषिशब्दानुसारेण बहुवचनश्रुतेः पाशन्यायेन गौणार्थकत्वस्य "गौण्यसंभवात् तत्प्राक्छ्रुतेश्च' इत्यत्रोपपादितत्वाच्च । नन्वा-देशपदस्य प्रशासनापरपर्यायाज्ञापन इवोपदेशे प्रसिद्धिप्राचुर्याभावेऽप्युपदेशार्थकत्वे प्रकृतेः सर्वात्मना मुख्यार्थत्यागावात् प्रत्य- यस्य त्वन्मते कर्तृलक्षणायां मुख्यार्थत्यागात् कास्यभोजिन्यायेन जघनायद्यावापृथिव्येककपालानुरोधेन मुख्यैन्द्राग्रादीनां प्रसूनब-र्हिर्नियमाश्रयणवत्, "एकधा ब्रह्मण उपहरति' इत्यव सकृत्त्वसहत्वसाधारणस्यैकधाशब्दस्य भक्षान्तरप्रापकदुर्बलचोदकानुग्रहणे सहत्वार्थत्वस्वीकारवत् "सप्तदश प्राज्ञापत्यान्' इत्यत्र प्रजातिसंबन्धविशिष्टान्वययोग्यस्यापि बहुत्वस्यैकपशुनिष्पन्नैकादशावदा-नप्रापकदुर्बलचोदकानुसारेण विशिष्टान्वयाभ्युपगमेन द्रव्यदेवतासंबन्धाक्षिप्तयागभेदाभ्युपगमवच्च जघन्यघञ्प्रत्ययानुसारेण मुख्यादिशेरुपदेशार्थकत्वमेव युक्तम् । प्रकृतेः मुख्यार्थत्यागाभावात् । प्रचुरप्रसिद्धार्थत्यागमात्रं त्ववशिष्यते । तत्तु न दोषाय । अत एव "पत्नय उपगायन्ति' इत्यादौ गीतिशब्दस्य शारीरगाने प्रसिद्धिप्राचुर्ये सत्यपि अशारीरवादित्रादिगानस्यापि गीतिशब्दप्रयो-गविषयत्वेन मुख्यार्थत्वात् संनिहितस्य दुन्दुभ्यादिगानस्यैव काण्डवीणादिभिरुपचयं कुर्वत्यः पन्त्यो नत्विर्जां निवर्तिका इति दशमे सिद्धान्तितमिति चेत्-मैवम्; गानशब्दस्य बर्हिराज्याधिकाणान्यायेन गीतिमत्रा वाचित्वात् युक्तं तत्र संनिहितदुन्दुभ्यादि-गानवाचित्वम् । इह त्वादेशशब्दस्य क्वचिदपि "शिष्यो गुरुमादिदेश' इत्यादिप्रयोगाभावेन साधारणोच्चारणाद्यर्थकत्वाभावात् उपदेशातिदेशाब्दयोरिवादेशोपदेशशब्दयोरपि भिन्नार्थकत्वेनादेशशब्दस्योपदेशार्थकत्वे मुख्यार्थत्यागास्यावर्जनीयत्वेन जघन्य- प्रत्यय एव लक्षणाया उचितत्वात् । वस्तुतस्तु "उपदेशेऽजनुनासिक इत्' इति सूत्रे "करणाधिकरणयोश्च' इति ल्युटा बाधितस्य घञः,"अकर्तरि च कारके' इत्यनेनाप्रसङ्गमाशङ्कय,"कृत्यल्युटो बहुलम्' इति घञो भाष्यकृता समर्थितत्वात् तन्न्यायेन कर्तर्यपि तेनैव सूत्रेण घञसिद्धौ लक्षणाया अप्रसङ्गात् प्रशासितृत्वार्थकत्वमेव युक्तमिति युक्तमुत्पश्यामः ।

तस्य तावदेव चिरमिति । तस्य सद्विद्यानिष्ठस्य । तावदेव चिरम्-तावनेव विलम्बः, यावत्प्रारब्धकृतदेहान्न विमोक्ष्यते । अथ अनन्तरं ब्रह्म संप्रत्स्यत इति तदर्थः । अथर्वादश्च लब्ध इति । "पारिप्लवार्थाः' इत्यधिकरणे विद्या संनिधिपठितानां "श्वेतकेतुर्हारुणेय आस' इत्याद्याख्यायिकानां तदर्थवादतया तच्छेषत्वस्य स्थापितत्वादिति भावः । यद्यप्ययमर्थवादो न सविशेषत्वैकान्तः, तथापि लिङ्गान्तरेण सविशेषत्वतात्पर्ये निश्चिते अर्थवादस्यापि तदेकान्तात्वं सिध्यतीति भावः । द्वितीयेंऽशे सप्तमे यमस्य स्वपुरुषं प्रति वचनम् -

"कटकमकुटकर्णिकादिभेदैः कनकमभेदमपीष्यते यथैकम् ।

सुरपशुमनुजादिकल्पनाभिर्हरिरखिलाभिरुदीयते तथैकः ।।

क्षितितलपरमाणवोऽनिलान्ते पुनरपि यान्ति यथैकतां धरित्र्याम् ।

सुरपशुमनुजादयस्तथान्ते गुणकलुषस्य सदा(ना)तनेन तेन ।।'

इति । तदर्थैकवियत्वादिति । ऐदंपर्येण प्रवृत्तत्वादिति भावः ।

परविद्यायाः सविशेषविषयत्वम्

अव्ययत्वस्य दोषाभावरूपस्य कथं भाष्ये कल्याणगुणत्वेन निर्देश इत्याशङ्कयाह-दोषविरोधित्वं नाम गुण इत्यभिप्रायेणेति । पूर्ववदर्थ इति । सगुणब्रह्मव्यावृत्तिरित्यर्थः ।

वकयावर्त्यानेकत्वादिति । व्यावृत्तिप्रतियोगिनामनृतजडपरिच्छिन्नानामनेकत्वेनेत्यर्थः । पदानां पर्यायत्वप्रसङ्गादिति । "प्रवृति-निमित्तभेदाभावेन' इति उत्तरंवाक्यस्थमिहापि काकाक्षिन्यायेन संबध्यते । ननु"कुचम्भाद्यनुगता सत्ता परजातिः सत्यपदप्रवृत्ति-निमित्तम् । अन्तःकरणवृत्त्युपधानलब्धभेदचिदानन्दानुगते ज्ञानानन्दत्वे अपरजाती । एवं च सत्यज्ञानानन्दशब्दानां लक्ष्या-र्थाभेदेऽप्युक्तजातिवाचित्वान्न पर्यायता' इति कल्पतरूर्क्तन पर्यायत्वमिति चेत्-न; कुम्भाद्यनुगतसत्तायाः सत्याब्दवाच्यत्वे सत्य-त्वस्यातिप्रसक्तस्य ब्रह्मलक्षणत्वाभावप्रसङ्गात् । अभ्युपगम्यते च त्वया सत्यत्वस्य ब्रह्मलक्षणत्वम् । सत्यमिथ्यार्थानुगतसवा-सामान्यासंभवाच्च ।
तस्यानृतसाधारणतयानृतव्यावढत्त्यसिद्धेश्च । कालत्रयाबाध्यत्वरूपं परमार्थिकसत्त्वं ब्रह्मणि श्रौतमिति त्वत्सिद्धान्तव्याकोप्रसङ्गाच्च । धर्मिसमसवाकभेदं विना औपाधिकभेदमात्रेणाकाशत्वादेरिव ज्ञानत्वानन्दत्वयोरपि जातित्वायो- गाच्च । ज्ञानत्वादेः धर्मिसमसत्ताकभेदवदुपहितचैतन्यवृत्तित्वे शुद्धलक्षणत्वायोगाच्च । ज्ञानत्वादेः धर्मिसमसत्ताकभेदवदुपहित-चैतन्यवृत्तित्वे शुद्धलक्षणत्वायोगाच्च । एतेन सत्यादि(?) विशिष्टशबलब्रह्मवाचिनां सत्यादिशब्दानां शुद्धब्रह्मणि लक्षणेति न पर्यायत्वमिति निरस्तम् । अनृतास्वप्रकाशपरिच्छिन्नरूपे शबले सत्यत्वादेरयोगात् । योगे वा तस्यैवानृतास्वप्रकाशपरिच्छिन्न-व्यावृत्तिः स्यात् । न तु सत्यत्वाद्यानाश्रायस्य शुद्धस्य । तस्मात् सत्यत्वादीनां शुद्धादन्यत्रासंभवात् सत्यादिवाक्यस्य च लक्षणया अखण्डार्थत्वे शुद्धेऽपि तदसिद्धेः सत्यत्वादीनामत्यन्तासत्त्वेनतद्भेदमादायपर्यायत्वस्य दुःसमाधानत्वात् (दुःसाधत्वात्?) पर्या- यत्वं सिद्धमित्यर्थः । उपलक्षणतया विशेषणतया वेति । किं व्यावृत्तीनां वाक्यार्थीभूतब्रह्मप्रतीत्युपयुक्तपदार्थप्रतीतिविेयत्वमा- त्रमेव, उत वाक्यार्थप्रतीति विषयत्वमप्यस्तीति विकल्पार्थः । उपलक्ष्यात् बहिर्भूतमित्यस्याष्ययमेवार्थः । न च -अवच्छेदकत्वं विशेषणत्वोपलक्षणत्वातिरिक्तमेव । "कर्णशष्कुल्यवच्छन्नं नभः श्रोत्रम्' इत्यत्र कर्णशष्कुल्या विशेषणत्वे तस्या अपि श्रोत्र-त्वप्रसङ्गात्; विशेष्यान्वयिनो विशेषणान्वयित्वनियमात् । नाष्युपलक्षणत्वम्, कदाचित् कर्णशष्कुल्युपलक्षितस्यापि नभसः श्रोत्रत्वेऽतिप्रसङ्गादिति वाच्यम्-तत्राष्युलक्षणकोटावेव निवेशसंभवात् । विद्यमानकर्णसंयोगस्योपलक्षणत्वेन दोषाभावात् । उपलक्ष्यात् बहिर्भूतमिति । अयं भावः- किं स्वरूपप्रतिपत्त्यर्थं ज्ञानादिपदम्? उत ज्ञानत्वादिप्रतिपत्त्यर्थम्? नाद्यः, पूर्वं प्रतीतत्वात् । न द्वितीयः, उपलक्षणत्वव्याघातादिति । वाक्याथाभिदानदशायां सर्वैः पदैरिति । सर्वैः पदैः वाक्यार्थाभिधानदायामित्यन्वयः । यद्वा सर्वैः पदैः एकज्ञानजनकत्वेन=एकज्ञानजननेनेत्यर्थः । अतो नान्वयानुपपत्तिरिति द्रष्टव्यम् । ननु युगपदभिधाने श्रुतिवाक्यादिषु बलाबलविभागनिर्णयोऽसंगत एव स्यात्; वाक्यापेक्षया पदश्रुतेः प्राबल्यम्; पदश्रुत्यपेक्षया प्रत्ययश्रुतेरिति व्यवस्था दत्तजलञ्जलिः स्यादित्यस्वरसादाह-क्रमग्रणाभिधानेऽपीति । क्रमेणाभिधानानभ्युपगम इति । क्रमेणाभिधानानभ्युपगमवादिपक्ष इत्यर्थः । युगपत्प्रतिपादनेऽपि नापैतीति । उद्देश्योपादेयभावे हि तद्वाक्यज्ञातत्वाज्ञातत्वे अप्रयोजके । अपितुतद्वाक्यप्रवृत्तेः प्राक् माना-न्तरावगतमनूद्यते; अप्राप्तं हि(?) विधीयत इत्येव हि विवेक इति भावः । पौर्वापर्यस्योद्देश्योपादेयलक्षणत्वाभावे कथमुद्देश्योपादे-यविभागज्ञानमित्याशङ्कयाह-एकेन वाक्येनेति । परामर्शदशायां हि संभवत्येवेति । ननु ज्ञातत्वाज्ञातत्वलक्षणोद्देश्येपादेय-विभागज्ञानं न वाक्यार्थप्रतीतावुपयुक्तम्, येन वाक्यार्थप्रतीतेः; प्राक् परामर्शदशायां तदवगतिः समर्थनीया स्यादिति चेत्-न; "ग्रहं संमार्ष्टि' इत्यादौ ग्रहं संमृज्यात्, एकं संमृज्यात्, यत् संमृज्यात् तदेकमित्यादिवचनव्यक्तिनिरूपणाभावे निर्विचिकित्सवा-क्यार्थप्रतीतेरनुदयेन न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधकम्' इतीति भावः । विशेष्यमात्रैक्यपरत्वात् समानविभक्तेरिति । अयं भावः-यदुक्तं विशिष्टक्यप्रतिपादनं नेति, तदिष्टमेव; विशिष्टैक्यप्रतिपादनस्यानभ्युपगमात् । न च विशेष्यैक्यमात्रप्रतिपादनं परस्यापीष्टमिति वाच्यम्, विशेषणान्वयस्यापि प्रातिपदिकावगतस्यात्यागात् । एकस्मिन् विशेष्ये "एकस्य द्वयम्' इति न्यायेन प्राप्तयोर्विशेषणैकत्वयोरपरित्यागादिति । व्युत्पविश्च प्रत्यक्षमूलेति । न तु स्वर्गादिशब्दव्युत्पत्तिवत् श्रुतिमूलेत्यर्थः ।

प्रत्यक्षं च विशेष्यैक्यमेवावगमयतीति । "दण्डी, कुण्डली' इत्यादौ विशेषणविभक्तेर्भिन्नविशेषणाश्रये एकस्मिन्नेव विशेष्ये पूवर्-पूर्ववृद्धव्यवहारं प्रत्यक्षीकृत्य तथैव व्युत्पत्तेर्ग्रहात् । इतरथा विशेषणविभक्तेरभेदार्थकत्वमपि त्याज्यं स्यात् । न हि विशेणवि-भक्तिरैक्यपरेत्यत्र पूर्वपूर्ववृद्धव्यवहाराधीनव्युत्पत्तिमन्तरेणान्यन्निमिवमस्तीति भावः । विशेष्यभेदकत्वं प्रत्यक्षेण तत्रापोद्यत इति चेदिति । प्रत्यक्षागोचरे ब्रह्मणि विशेषणभेदप्रयुक्तो विशेष्यभेदो दुर्वार इति भावः । धर्मिवाचकपदैक्यात् समानविभक्ति-निर्देशाच्चैक्यप्रतीतेरिति । इदमुपलक्षणम्-विशेषणभेदे विशेष्यभेद इत्युत्सर्गः, "देवदत्तः श्यामो युवा' इत्यादावदर्शनात् । "खण्डो मुण्डः' इत्यादौ विरुद्धत्वात् भेदकत्वम्, अविरुद्धं त्वभेदकमेव । विशेषणानां भेदकत्वादस्तु विशेषणानाश्रयापेक्षया, न तु विशेषणान्तराश्रयापेक्षयापि । न हि "नीलमुत्पलम्' इत्यादौ नैल्यं दीर्घादपि व्यावतर्यतीत्यपि द्रष्टव्यम् । यच्चोक्तं समान-विभक्तीति । न च समानविभकत्या ऐक्यावगमे परस्याखण्डार्थत्वभङ्गप्रसङ्गात् परस्य कथमियमाशङ्का घटतामिति वाच्यम्, "एकप्रातिपदिकार्थमात्रनिष्ठत्वमखण्डार्थत्वम्' इत्यनेन प्रातिपदिकार्थान्तरसंबन्ध एव व्यावर्त्यते; न तु विभक्तिसंबन्धोऽपीति । मन्यमानस्य शङ्कासंभवादिति ध्येयम् । अनतिरिक्तपक्षे हेत्वसिद्धिरिति । समानाविभक्त्यवगतैक्यरूपहेत्वसिद्धिरित्यर्थः, ऐक्या-वगमविरोधू ापहेत्वसिद्धिरित्युत्तरत्रोपसंहारादिति द्रष्टव्यम् । अशक्यासदृशान्वयप्रतियाग्युपस्थितिर्वा शक्यसंबन्धो वा लक्षणा शक्ये न संभवतीत्यभिप्रेत्याह-आलक्षणिकत्वेऽपीति । विमतं वाक्यमखण्डार्थपरमित्यादि । एतेन- "सत्यादिवाक्यमखण्डा- र्थनिष्ठं लक्षणवाक्यत्वात्, तन्मात्रप्रश्नोत्तरत्वाद्वा प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवत्' इत्यनुमानं प्रमाणम् । "नीलमुत्पलम्' इत्या-दिसमानाधिकरणवाक्यानां लक्षणवाक्यत्वाभावान्नातिप्रसङ्ग इति निरस्तम्; असाधारणरूपलक्षणवाक्यत्वस्य सखण्डार्थत्वेनैव व्याप्तेः । कर्मकाण्डस्यापि तन्मात्रप्रश्नोत्तरत्वेनाखण्डार्थत्वप्रसङ्गात् ; "प्रकृष्टप्रकाशश्चन्द्रः' इत्यत्र व्यावर्तकासाधारणप्रश्नोत्त- रत्वेन दृष्टान्तासिद्धेन्चेत्यपि द्रष्टव्यम् । यदि च भावरूपखण्डार्थप्रतिपादनासमर्थमिति प्रतिज्ञेति । ततश्च प्रतिज्ञावाक्यस्य खण्डार्थत्वाभावरूपखण्डार्थवैशिष्टयप्रतिपादनसामर्थ्येऽपि भावरूपखण्डाथर्प्रतिपादनासामर्थ्यान्न व्यभिचार इति भावः । प्रातिपदिकेनैव विशेषणान्वयस्येति । प्रातिपदिकस्मारितयोर्विशिष्टयोर्विभाकत्या ऐक्यमात्रप्रतिपादनादित्यर्थ; न तु नील-ातिपदिकेनोत्पलेनीलत्वान्वय इति मन्तव्यम्; तथा हि सति उत्पले नीलत्वान्वयस्य नीलप्रातिपदिकेनैव सिद्धेर्विभकत्या ऐक्य-बोधनस्य वैयर्थ्यापातादिति द्रष्टव्यम् । अनेन शङ्काद्वयं परिहृतं भावतीति । कारणपरत्वप्रतिपादकेन सिसृक्षोरिति पदेन साक्षात्पूर्वपक्षिचोद्यनिरासः । उपादानकार- णत्वं "सदेव सोक्येदमग्र असीदेकमेव' इति प्रतिपादितमिति भाष्यखण्डेन पार्श्वस्थचोद्यनिरास इति भावः । स्वतन्त्र वस्तु-निषेधपरमद्वितीयपदमित्यर्थः इति । अत एव शाङ्करोपनिषद्भाष्येऽपि, "आद्वतीयमिति; मृद्वयतिरेकेण मृदो यथान्यत् घटाद्या- कारेण परिणमयित् कुलालादि निमित्तकारणं दृष्टम्, तथा सद्वयतिरेकेण सतः सहकारि कारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषि- ध्यते-आद्वितीयमिति । नास्य द्वितीयं वस्त्वन्तरं विद्यत इत्यद्वितीयम्' इति निमित्तान्तरनिषेधपरतयैव व्याक्यातम् । किंच "प्राक् सृष्टेरेकप्रद्वितीयं सदेवासीत्' इति सृष्यिप्राक्कालपरतया परैरेव व्याक्यातत्वेन सृष्टिप्राक्कालेऽद्वितीयत्वमात्रेण कथं मिथ्या-त्वप्रसक्तिरित्यपि द्रष्टव्यम् ।

निर्गुणवाक्यविरोधपरिहारः

किं ज्ञानत्वात् ज्ञानानाश्रयत्वमुच्यते, उत एकजातीयद्रव्ययोर्नियतधर्मधर्मिभावानुपपत्तेरिति विकल्पे, प्रथमस्य दूषणं ज्ञातुरेव ज्ञानस्वरूपत्वादिति भाष्यम्-ज्ञातुरपि ज्ञानस्वरूपत्वसंभवादिति तस्यार्थः । द्वितीयस्य तु दूषणं ज्ञानस्वरूपस्यैवेत्यादिभा- ष्यम् । ज्ञातृत्वमेव हि सर्वाः श्रुतयो वदन्तीति भाष्यं तु प्रथमविकल्पदूषणस्योपपादकं तच्छेषभूतमिति प्रथमव्याख्या । अस्याञ्च व्याख्यायाम्, ज्ञातृत्वमेव हीति भाष्यस्य ज्ञातुरेव ज्ञानस्वरूपत्वादिति

व्यवहितभाष्योपपादकत्वमाश्रयणीयम्; एवकारस्य अप्यर्थत्वं च क्लिष्यमित्यस्वरसो द्रष्टव्यः । द्वितीयव्याख्यायांतु पूर्ववदेव विकल्पमुखेन प्रवृत्तत्वं समानम् । तत्र ज्ञातुरेवे-त्यादि-भाष्यस्यायमर्थः-ज्ञातृशब्दो भावप्रधानः पञ्चम्यन्तः । एवकारश्च यत् ज्ञातृत्वं त्वया ज्ञानत्वविरुद्धतयोपन्यस्तम्, तदेव ज्ञान-त्वसाधकमिति स्फोरणार्थः ज्ञानत्वाभावव्यापकाभावप्रतियोगितया ज्ञातृत्वस्य न तद्विरुद्धत्वमिति । अस्मिन् पक्षे ज्ञातृत्वमेव हि सर्वाः श्रुतयो वदन्तीति भाष्यं ज्ञातृत्वस्य श्रौतत्वप्रतिपादनद्वारा तद्दृढीकरणार्थम् । अस्यां च व्याख्यायं भावप्रधानतया-निर्देशाद्याश्रयणं क्लिष्टमित्यस्वरसो द्रष्टव्यः । तृतीय्वयाख्यायां तु ज्ञातुरेवत्यादिभाष्यस्य ज्ञातुरेव सतो ज्ञानस्वरूपत्वाविरोधादि- त्यर्थः । इदं च भाष्यं न विकल्पकोट्योरन्यतरनिरासकम्; अपि त्वविरोधप्रतिज्ञामात्रपरम् । किं ज्ञातुर्ज्ञानाश्रयत्वं सजाती-ययोर्धर्मधर्मिभावाभावादुच्यते, उत ज्ञानत्वात् ज्ञानाश्रयत्वमिति विकल्प्य प्रथमं प्रतिवक्ति-ज्ञानस्वरूपसयैवेति । द्वितीयं प्रतिवक्ति-ज्ञातृत्वमेव हीति इति विवेको द्रष्टव्यः । पूर्ववदभिप्राय इति । "किं व्याप्त्या उच्यते, उतश्रुत्या' इत्यादीत्यर्थः । ज्ञातृ- त्वं यथा फलितं भवतीति । "तमीश्वराणाम्' इत्यादिश्रुतावित्यर्थः । फलितत्वप्रकारश्चोत्तरत्र स्पष्ययिण्यते । ज्ञानस्य सर्व-विषयकत्वमिति ।"यः सर्वज्ञः सर्ववित्' इत्यत्र ज्ञानस्य सर्वविषयत्वम्, "तदैक्षत' इति समष्टयुपयोगित्वम् , "सेयं देवतैक्षत'इति व्यष्टयुपयोगित्वम्, "सृजै' इत्युत्तम्पुरुषेणात्मसंबन्धित्वं च दर्शितमित्यर्थः । कामप्रदत्वं चेति । कामितार्थज्ञानाभावे तत्प्रदत्वासं-भवादिति भावः । देवतात्वं कर्माराध्यत्वम् । आराधान महनीयप्रीतिहेतुभूता क्रिया । ततश्च प्रतीरूपज्ञानवत्त्वं सिध्यति । पतित्वं शेषित्वमिति । शेषिचेतनत्वमित्यर्थः,प्रयाजादिशेषिदर्शपूर्णमासादौ पतित्वव्यवहाराभावात् । अतो ज्ञातृत्वसिद्धिरिति भावः । द्वितीयविशेषपर्यवसायित्वं सूचितमिति । ततश्च "न तस्य कार्यं करणं च' इत्याद्यंशस्यापि प्रकृतोपयोगित्वमस्तीति भावः विशे-षविधानं विशेषनिषेधश्चेति । "अपहतपाप्मा' इत्यादिना विशेषविधानमित्यर्थः । वैयर्त्यपरिहाराय संकोचश्चेत् गोबलीवर्दन्याय इति । अत्रोपावविशेषव्यतिरिक्तविषय इत्यनुषज्यते । उपात्तविशेषविषये तस्य संकाचे इति । न च-अयं छागपशुन्याय एव; उत्सर्गापवादन्याय एव हि सामान्यविशेषन्यायः । एवमेव व्यवहारदर्शनादिति वाच्यम्-सामान्यशब्दस्य विशेषातिरिक्तविषयत्व-

मादायोत्सर्गापवादन्याये सामान्यविशेषन्यायशब्दप्रवृत्तिवत् सामान्यवाचिशब्दस्य विशेषपर्यवसानमादाय छागपशुन्यायेऽपि सामान्यविशेषन्यायशब्दव्यवहारे दोषाभावात् । अत्र गोबलीवर्दन्यायकथनं शिष्यानुग्रहार्थं प्रसङ्गात् कृतमिति द्रष्टव्यम् । ननु गुणसामान्यविधानं श्रुतिषु न दृश्यत इति कथमुच्यत, "यः कालकालो गुणी सर्वविद्यः' इत्यादौ तथा दर्शनादित्याशङ्कयाह-दोषसमभिव्याहृतेति । दोषाभावसमभिव्याहृतेत्यर्थः । अत्र हि कालकाल्यत्वलक्षणदोषभावरूपाकालकाल्यत्वसमभिव्या- हृतस्य गुणशब्दस्य गुणविशेषपरत्वेन गुणसामान्यविधानासिद्धेरभ्युपगमवाद एव शरणमिति भावः । स्मृतिवचनाभिप्रायेण सगुणवाक्यानामित्युक्तमिति । अत्र च वाशब्दोऽध्याहर्तव्यः, वचनाभिप्रायेण वा सगुणवाक्यानामित्युक्तमित्यर्थः । यद्वा कथमत्यन्तानुपलभ्यमानस्य गुणसामान्यविधानस्याभ्युपगम इत्याशङ्कयाह - वषायुतैरित्यादि । स्मृतिवचनाभिप्रायेणेति । एताभिः स्मृतिभिरेतत्तुल्यगुणसामान्यविधायकश्रुत्यनुमानेन सगुणवाक्यानामित्युक्तमित्यर्थः । दोषप्रतिपक्षवचन इति । (गुणदोष इत्यत्रैव)"गुणदोषौ' इत्यत्रेव दोषप्रतिद्वन्द्विगुरसामान्यपर उपादेयसामान्यपर इत्यर्थः । प्रकरणवशाच्छागपशुन्यायेनेति । ततश्च स्मृतिगतानामपि सामान्यवचनानां विशेषपर्यवसानस्यापेक्षितत्वादेतत्संग्रहार्थं भाष्ये सगुणनिर्गुणवाक्ययोर्विरोधाभावादिति वाच्यं समाप्तम् । अन्यतरस्य मिथ्याविषयतानोयणमपि न युक्तमिति वाक्यान्तरम् । अत्र "विरोधाभ्युपगमे' इति शेषः पूरणीयः । अपिशब्दश्च भिन्नक्रमः । अतः विरोधाभ्युपगमेऽप्यन्यतरस्य मिथ्याविषयताश्रयणं न युक्तमित्यर्थः । सिध्यतीति भावः । अतश्च पूर्वं विरोधो नास्तीति परिहृतमित्याद्युत्तरग्रन्थोऽपि संगतः । इतरथा एकवाक्यत्वे पूर्वमिथ्युक्तेरसंभवात् । यद्वा अत्रायमभिप्राय इत्यपिशब्दोऽध्याहर्तव्यः । "पूर्वम्, इदानीम्' इति पदद्वयमप्यविवक्षितम् । वस्तुस्थितिमनुरुध्य विरोधो नास्तीत्युक्तम्;

विरोध-सत्त्वेऽपि नास्माकं क्षतिरित्यर्थः । उभयोरप्यपच्छेदनियमो नास्तीति । अन्यतरमात्रापच्छेदस्यापि संभवादिति भावः । प्रया-ेगावधिकविरोध इति । अपच्छेदद्वयनिमित्तकनैमित्तिकप्रयोगद्वयस्य युगपदनुपसंहरणीयतया शास्त्रयोर्विरोधः; अतश्च स कादा- चित्क इति भावः । अनियतविरोधपौर्वापर्यविषय इति उक्तं हि-

"पौर्वापर्यं विरोधश्च पूर्वाप्रामाण्यमेव च ।

नियमान्नास्ति तत्रासावपच्छेदनयो भवेत ।।'

इति । ननु प्रत्यक्षविरुद्धश्रुत्यनुमानं न प्रवर्तत इति विरोधाधिकरणन्यायः । स नात्र प्रवर्तते । यदि प्रत्यक्षानुमानवत् शीघ्रमन्थरगा-मित्वसामान्यात् सगुणनिर्गुणवाक्ययोस्तद्विषयत्वम्, तर्हि निगुर्णवाक्यस्य स्मृतिवदप्रामाण्यमेव स्यात् । यदि चाप्रामाण्यमिष्टम्, तर्हि अपच्छेदन्यायो वा किमिति न प्रवर्तते? अपच्छेदन्यायस्य नियतपौर्वापर्यविषयप्रवृतौ सर्वात्मनाऽप्रामाण्यप्रसङ्गभायाद्धि अपच्छेदन्यायस्याप्रवृत्तिरुच्यते । अतः श्रुतिविषये न विरोधाधिकरणान्याय इत्यस्वरसादाह-यद्वा मा भूदिति । उपक्रमाधिकर-णन्याय एवेति । "प्रजापतिर्वरुणायाश्वमनयत् । स स्वां देवतामार्च्छत् । स पर्यदीर्यत । स एतं वारुणं चतुष्कपालमपश्यत् । तन्नि-रवपत्' इत्युपक्रम्य, उपसंहारे श्रूयते- "यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान्निर्वषेत्' सति । तत्र उपक्रमेऽर्थ-वादेऽश्वदातुः प्रजापतेर्वारुणेष्टिः प्रतीयते; उपसंहारे च प्रतिग्रहीतुः । द्वयोर्विरोधे सति

"गुणत्वादनुवादत्वादर्तवादस्य लक्षणा ।

विध्युद्देशो जघन्योऽपि स्वार्थहानिं न गच्छति ।।'

इति पूर्वपक्षे प्राप्ते, गुणभूतस्याप्यर्थवादस्यासंजातविरोधित्वेन प्रबलत्वाद्विध्युद्देशस्य प्रधानत्वेऽप्यलब्धात्मकत्वात् प्रधानभूतो विध्युद्देशः स्वयमलब्धात्मा लब्धात्मानमर्थवादं प्रक्रमस्थं बाधितुमसमर्थः स्वयमेव तदानुगुण्यं भजत इति, प्रतिगृह्णीयादित्यस्य प्रतिग्राहयेदित्येवं णिजर्थमन्तर्भाव्य दातुरेवेष्टिरिति सिद्धान्तितम् । ततश्च सगुणवाक्यस्य भेदग्राहिप्रत्यक्षस्य वा प्राक् प्रवृत्तत्वेनो-पक्रमाधिकरणन्याय एव प्रवर्तत इत्युपक्रमनयः । सत्तया मायमानतया वेति । ननु - "रजतम्' इति ज्ञानस्याप्रामाण्यशङ्कास्क-न्दितत्वात्तदनास्कन्दितज्ञानस्यैव विपरीतज्ञानप्रतिबन्धकत्वात् "नेदं रजतम्' इति ज्ञानोत्पत्तौ न विरोधः । न चाप्रामाण्यशङ्काया अपि विषयसंशयपर्यवसन्नतया तस्याप्यनुत्पत्तिः शङ्कनीया, अप्रामाण्यशङ्कासामग्रयाः फलबलादुवेजकत्वकल्पनादित्येतावतैव परिहारसंभवात् व्यर्थोऽयं प्रपञ्च इति चेत्, शिष्यशिक्षार्थतया प्रपञ्चनोपपत्तेः । न च सगुणत्वज्ञाने तद्विरुद्धनिर्गुणत्वमानस्योप-क्रमाधिकरणन्यायेनानुत्पादे षोडशिग्रहणप्रतीतौ तद्विरुद्धाग्रहणप्रतीतेरनुदयप्रसङ्गः; तथा अपच्छेदस्थलेऽपि पूर्वविरुद्धप्रतीत्य-नुत्पादप्रसङ्ग इति वाच्यम्-उपक्रमाधिकरणन्यायस्यैकवाक्यतास्थल एव प्रवृत्तेः; ग्रहणाग्रहणादिस्थले तु तदभावात् । न च सगुणनिर्गुणवाक्ययोरप्येकवाक्यता नास्तीति वाच्यम्-

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ।।'

इत्यादावेकवाक्यत्वप्रतीतेः तत्तुल्यात्वाच्च निर्गुणवाक्यान्तस्यापि न तद्विरुद्धार्थप्रतीतिजनकत्वमिति भावः । इदं रजतमिति परा-मर्शसापेक्षत्वादिति । "इदं रजतम्' इति ज्ञानस्य, "नेदं रजतम्' इति ज्ञानोपजीव्यत्वादुपजीव्यविरोधेन कथं तद्विरुद्धोत्पत्तिरिति शङ्कार्थः । शुक्तित्वविषया ह्युत्तरप्रमितिरिति । इदमुपलक्षणम्-रजतत्वाभावविषयत्वेऽपि "इदं रजतम्' इति ज्ञानस्य प्रतियोगि-विषयत्वमात्रांश उपजीव्यत्वेऽपि पुरोवर्तिनि रजतविषयत्वांशेऽनुपजीव्यत्वेन तदभावावगाहने दोषाभावात् । उदीयमानमिति पाठे "इण् गतौ' इति धातो रूपमिति द्रष्टव्यम् । आनन्दं ब्रह्मण इत्यादितात्पर्यलिङ्गप्राचुर्यादिति । ब्रह्मापेक्षयापि तद्गुणभूतानन्दवेद-नस्यैव फलवत्त्वावेदनेन श्रुतेर्ब्रह्मानन्दे तात्पर्यावगतेरिति भावः ।

आनन्दवल्लयाः सगुणविषयत्वम्

पर्यवसितं युक्तमिति पाठः । पर्यवसानं युक्तमित्यर्थः । पर्यवसितुं युक्तमिति क्वचित् पाठो दृश्यते । तत्र "असु क्षेपणे' इत्यस्मात् अवपूर्वात् "वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः' इति अवशब्दान्तलोपे तुमुन्प्रत्यये सति कथंचित् निर्वाहो द्रष्टव्यः; "षो अन्त-कर्मणि' इत्यस्मात् तुमुन्प्रत्यये तस्य कित्वाभावात् "द्यतिस्यतिमास्थाम्' इतीत्वप्राप्तेरभावात् । अत एवानन्दमयाधिकरणे वक्ष्य-त्याचार्यः, "पर्यवस्यन्तः पर्यवसातुं प्रवृत्ताः' इति । नित्यनवं यथा भवति तथेति । युवा चासावध्यायकश्चेति समासः । अध्याय- कस्य च युवत्वमध्ययनद्वारा पर्यवस्यतीति भावः । आशुतरक्रिय इति आशुतरक्रियावति वर्तमानात् आशुशब्दात् इष्ठन्प्रत्यये टिलोपे रूपम् । आशुमच्छब्दात् "विन्मतोर्लुक्' इति लुकि वा रूपं द्रष्टव्यम् । अशनक्षम इति । अशनम् आशः, ततो मत्वन्तात् इष्ठन् प्रत्ययः । आशीर्वादविषये वतर्मानादाशीशाब्दात् मत्वन्ताद्वा इष्ठनि आशिष्ठ इति रूपम् । सर्वत्र "विन्मतोर्लुक्' इति इष्ठन् प्रत्ययः; मतोश्च लुक् । पूरणगुणसुहितार्थेति । सुहितशब्दस्य तृप्तयर्थत्वात् पूरणस्यापि तृप्तिरूपत्वादिति भावः । न तु पूरणगुणे- त्यत्र पूरणशब्द इह मन्तव्यः, तस्य पूरणप्रत्ययपरत्वात् । षष्ठयनुज्ञानादिति । षष्ठीसमासनिषेधपरेणानेन सूत्रेण षष्ठयनुज्ञाना- दित्यर्थः । निवर्त्यानिष्टत्वेति । अनिष्टनिवर्तकत्वेत्यर्थः । चतुर्मुखानन्दाधिक्याभिप्राय इति । "ते ये शतम्' इत्यत्र शतशब्दोऽधि-कसंख्यापरः । अतो न परिच्छिन्नत्वमिति भावः । प्राकररिकवाक्यानां संख्याविशेषपरत्वात् "ते ये शतं प्रजापतेः' इत्यत्रापि संख्याविशेषपरत्वमेवोचितमित्यन्यथा निर्वाहमाह - यद्वा ते ये शतं स एक इत्यस्येति । कालत्रयवर्तिप्रजापत्यानन्दत्वे कथिते अपरिच्छिन्नत्वं सिध्यतीति भावः । त्रिपाद्विभूतिमत्तया चेति । ननु भगवदानन्दस्यापरिच्छितामिति वदन्तिं प्रति त्रिपाद्विभूति- मत्तया आनन्दानन्त्यकथनं कथमुपयुज्य(पद्य)तामिति चेत्, अत्र केचित् - कथमपरिच्छिन्नत्वमिति चेदित्येव पाठः । तस्य चाय-मर्थः-"ते येशतम्' इति वाक्येन कथमपरिच्छिन्नत्वं प्रतीयताम्? प्रत्युत परिच्छन्नत्वमेव प्रतीयते । अतोऽपरिच्छिन्नत्वं न सिध्ये-दित्येतावत्पर्यन्तमाक्षेपं वर्णयन्ति । अतस्तत्परिहर्त्रा चानेन श्रुतिवाक्येन परिच्छिन्नत्वासिद्धिरप्युपपादनीया । आनन्दस्यापरि-च्छिन्नत्वमप्युपपाद्यत इति वदन्ति । अपरे तु-"शतं प्रजापतेरानन्दाः' इति श्रुतिस्वारस्यविरोधेन कालत्रयवर्तिप्राजापत्यानन्द-मात्रपरतया वा शतशब्दस्याधिकसंख्यामात्रपरतयावा किमिति व्याक्यायते? यथाश्रुतार्थ एव ग्राह्य इति तटस्थशङ्कामपाकरोति - मेरोरिवाणुरितीति वदन्ति ।

सोऽश्नुत इत्यादिश्रुत्यर्थः

ननु "ब्रह्मविदाप्नोति परम्' इति ब्राह्मणे ब्रह्मण एव प्राप्यत्वप्रतिपादनात् "एषोऽस्य परमानन्दः' इति ब्रह्मण एव विदुषामानन्द-त्वश्रवणेन कामानां च तदभेदप्रतीतेः ब्राह्मणस्य मन्त्रविवरणरूपत्वेन प्रबलत्वात् ब्राह्मणानुसारेणैव "सह ब्रह्मणा' इति मन्त्रार्थो वर्णनीयः । यथा पैङ्गिरहस्ये ब्राह्मणानुसारेण "द्वासुपर्णा' इति मन्त्रार्थवर्णनमित्याशङ्कयाह-मन्त्राणां ब्राह्मणविवरणरूपत्व-दर्शनादिति । मन्त्राणामपि ब्राह्मणविवरणरूपत्वदर्शनाद्विवरणरूपत्वरूपः प्राबल्यहेतुर्द्वयोरप्यविशिष्य इति भावः । स्फुट-प्रतीतिहेतुत्वेति । प्रायेण ब्राह्मणानां स्फुटप्रतिपत्तिहेतुत्वमस्ति; मन्त्रास्तु गहना भवन्तीत्येतावता ब्राह्मणप्राबल्योक्तिश्चेत्-इष्टमेवेत्यर्थः । नन्वानन्दमयाधिकरणे मन्त्राणां प्राबल्यं केचिद्वदन्तीति मन्त्रप्राबल्यस्यैव परोक्तत्वोपन्यासात् तद्विरोध इति चेत्- न; तस्यापि मतान्तरत्वेनाविरोधादिति द्रष्टव्यम् । विपश्चित्त्वश्रवणात् तस्य च भोक्तृत्वानुगुणत्वात् ब्रह्मणो भोक्तृसाहित्यशङ्कां व्युदस्यति-विपश्चित्त्वमपि भोग्यगुणत्वेनोक्तमिति । न च तस्यापि कामशब्दनिर्दिष्टत्वात् पृथङ् निर्देशवैयर्थ्यमिति शङ्कनीयम्; गोबलीवर्दन्यायेन प्राधान्यविवक्षया पृथङ् निर्देशोपपत्तेरिति भावः । व्यतिरेकानिर्देशादिति । "कामान् सह ब्रह्मणा' इति भिन्नतया

निर्देशादित्यर्थः । अव्यवहितप्रयोगस्वारस्याच्चेति । "ब्रह्मणा सह सोऽश्नुते सर्वान् कामान्' इति यदि स्यात् तदा स्यादपि भोक्तृ-स्तच्छब्दनिर्दिष्टस्य साहित्याश्रयत्वशङ्केति भावः । तत्परिहारायेति । इष्यापत्त्या तत्परिहारायेत्यर्थः । तस्मिन् यदन्तस्तदन्वेष्टव्य-मितिवदिति । इदं च "तस्मिन्' इत्यस्य दहराकाशपरत्वमित्यभ्युपेत्य गुणस्यैवान्वेष्टव्यत्वमुच्यत इत्यभिप्रेत्योक्तम् । वस्तुतस्तु "तस्मिन् यदन्तः' इत्यत्र तच्छब्दस्य पुण्डरीकाकाशरूपवस्तुद्वयपरामर्शित्वस्य वक्ष्यमाणत्वात् तेन ब्रह्मतद्गुणयोर्द्वयोरुपास्यत्व- मिति समप्राधान्यमेव सिध्येत् न गुणानां प्राधान्यमिति द्रष्टव्यम् । यद्वा सहशब्दस्याप्राधान्यद्योतकत्वे ब्रह्मणोऽप्राधान्यस्य वक्तुमयोग्यत्वात् दहरविद्यावाक्यानुरोधाच्च समत्व एव तात्पर्यमिति भावः । गुणप्राधान्यं वक्तुमित्यनेनापीति । गुणप्राधान्यं वक्तुमित्यनयोक्तया श्रुतिगतसहशब्दस्य भोग्यसाहित्यमेव भाष्यकाराभिप्रेतमिति सिध्यतीत्यर्थः । अन्यथा भोक्तृप्राधान्यं हीति । भोक्तृसाहित्यपरत्वे भोक्तृब्रह्मापेक्षया भोक्तुर्जीवस्यैव प्राधान्यं सिध्येदिति भावः ।

यस्यामतमित्याद्याशयवर्णनम्

सगुणानामेव ज्ञेयत्वं दृष्टमितीति । अत्रैवकारो भिन्नक्रमः । सगुणानां ज्ञेयत्वमेव दृष्टम्, अमेयत्वं न दृष्टमित्यर्थः पर्यवस्यति । ततश्च ज्ञेयत्वस्य व्यापकत्वं सिध्यति। ततश्च तद्व्यतिरेकात् सगुणत्वव्यतिरेकापादनं संभवतीति द्रष्टव्यम् । भाष्ये-ब्रह्मज्ञानासद्भा-वसद्भावाभ्यामिति । ननु "असन्नेव स भवति' इत्यसत्त्वप्रकारकज्ञानस्यैवात्मनाशहेतुत्वमुच्यते, न तु तदज्ञानस्येति चेत्-"असद्ब्र-ह्मेति वेद चेत्' इत्यस्य "ब्रह्म वेद' इत्येतत् असच्चेदित्यन्वयः । ब्रह्म न जानाति चेदित्यर्थः । "अस्ति ब्रह्मेति चेत्' इत्यत्रापि "ब्रह्म वेद' इत्येतदस्ति चेत्=ब्रह्म जानाति चेदित्यर्थः । इति भगवद्भाष्यकाराभिप्रायात् । यद्वा श्रुत्यनुसारेण भाष्यार्थो वर्णनीयः । अतः केषुचिद्वाक्येषु इत्यत्र "अतः' इति व्याख्येयं पदम्; सर्वा श्रुतय इति च । ननु सर्वशाखाप्रत्ययन्यायः प्रधानस्वरूपानन्तर्गतानुक्त-ांशस्वीकारफलः । अत्र च न वाक्यान्तरविहितं मोक्षसाधनं ज्ञानमनूद्य ब्रह्मविषयत्वं क्वचिद्गुणतया विहितम्; अपि तु ब्रह्मज्ञानमेव विहितम्; येन तन्न्यायप्रवृत्तिरित्यस्वरसादाह-यद्वा केषुचित् ब्रह्मविषयत्व इति । ज्ञानमात्राविेयत्वस्यैव निर्गुणत्वाक्षेपकतया परैरुक्तत्वादुपासनाविषयत्वादिविकल्पनिरासपरत्वमस्य ग्रन्थस्यानुचितमित्यपरितोषादाह-यद्वा ज्ञानं चोपासनात्मकमिति । गुणविधानबाधितेति । बाधितापीत्यर्थः । ततश्च ज्ञेयत्वाभावरूपहेत्वसिद्धिमात्रं नेत्यर्थः । अज्ञेयत्वं बाधित्वा ज्ञेयत्वमाक्षिप- तीति । मा भूत् ज्ञेयत्वे प्रमाणान्तरगवेषणा; इदमेव सगुणत्वं ज्ञेयत्वसाधनेपर्याप्तमित्यर्थः । ननु सगुणत्वस्य सर्वप्रकरेण समर्थ- नीयस्य सिद्धौ सगुणत्वेन ज्ञेयत्वसाधनं मुधा, उत्तरसिद्धौ किं पूर्वेणेति न्यायादिति चेत्-अत्र केचित्-यद्यपि सगुणत्वमेव परम-साध्यम्; तत्रैव भाष्यतात्पर्यं च - तथापि तत्रेयं शङ्का समुच्चिषति-कथं सगुणत्वं श्रुतिसहस्रमपि प्रतिपादयेत्, तद्व्यापकज्ञेयत्वा-भावादिति । तस्याःपरिहारोऽभिधीयते-अज्ञेत्यव बाधित्वेत्यादिना । यथा यागस्य क्षणभङ्गुरस्य फलपर्यन्तं व्यापारशून्यस्य कथं स्वर्गसाधनत्वमित्याक्षेपे स्वर्गसाधनत्वप्रतिपादनबलादेव तत्पर्यन्तस्थायिव्यापारवत्त्वमपि कल्प्यत इत्युच्यते, एवमिति वदन्ति । तत्रैवेति व्याख्येयं पदम् ।

नदृष्टेरितिश्रुत्यर्थः

आगन्तुकत्वाद् गुणत्वाच्चेति । आगन्तुकचैतन्यगुणयोगितया चेति । भाष्ये आगन्तुकगुणशब्दौ भावप्रधानौ; चैतन्यपदं धर्म्युपस्थापकम् । ततश्च चैतन्यस्यागन्तुकत्वगुणत्वयोगितयेत्यर्थः पर्यवस्यतीति भावः । आगन्तुकचैतन्यगुणयोगितया ज्ञातु-रज्ञानस्वरूपतामिति भाष्ये ज्ञातुरात्मनः पक्षत्वम्, अज्ञानस्वरूपत्वलक्षणजडत्वस्य साध्यत्वम्, "ज्ञोऽत एव' इति सूत्रे काणा-दाभिमतजडत्वसाधकत्वेनोपन्यसिष्यमाणस्यागन्तुकचैतन्यत्वस्य साधनत्वं च स्वरसतः प्रतीयते । तद्विहाय ज्ञानपक्षकानात्मत्व-साधकागन्तुकत्वगुणत्वरूपहेतुद्वयपरत्वं वाक्यशैलीविरुद्धमित्यपरितोषादाह-यद्वा चैतन्यं नाम विषयप्रकाश इति । स्वतश्चैतन्य-स्वभावस्यागन्तुकचैतन्यत्वं न

संभवतीति भावः । जवात्मानं प्रतिषिध्य सर्वभूतात्मानं परमात्मानमेवोपास्स्वेति भाष्ये जीवा- त्मानं प्रतिषिध्येति प्रतिषेधक्रियायाः श्रुतिकर्तृकत्वादुपासनस्यच जीवकर्तृकत्वात् सामानकर्तृकत्वाभावात् कत्वाप्रत्ययानुपपविमा-शङ्कय श्रुतिकर्तृकोक्तिक्रियावाचिपदाध्याहारेण व्याचष्टे-दृष्टिश्रुतिमतिनिदिध्यासनानामिति । अस्मिन् पक्षेउपास्स्वेत्ययमर्थ उक्तो भवतीत्येव युक्तम्; वाक्यपदमयुक्तमित्यस्वरसादाह-यद्वा अभिदधादीत्यनुषङ्ग इति । इति वाक्यार्थ सति वाक्यान्तर- मिति । "उपास्स्वेत्यभिदधातीति वाक्यार्थ' इत्यत्र इतिशब्दः संनिहितं न अभिदधातीत्यर्थं परामृाति, अपि तूपास्स्वेत्येतदंश- मिति भावः । इतिशब्दस्य विप्रकृष्टपरत्वमदृष्टमित्यपरितोषादाह-यद्वा प्रतिषिध्य परित्यज्येति ।

आनन्दश्रुत्यर्थः

भाष्ये-ज्ञानमेव ह्यनुकूलमानन्द इत्युच्यत इति । अत्र एवकारेण प्रतिकूलज्ञानस्यानन्दत्वं व्यवच्छिद्यते; न तु विषयस्यापि । अतो विभूत्यानन्दत्ववादस्य न विरोध इति द्रष्टव्यम् । धर्मभूतानन्दस्य हीति । न त्वानन्दमात्रस्येत्यर्थः ।

द्वैतनिषेधश्रुत्यर्थः

ननु यदिदमुक्तमिति भाष्ये "यत्र हि' इत्यादिवाक्यखण्डः प्रथममुदाहृतः । पूर्वपक्षोपन्यासवेलायां तु कृत्स्नं वाक्यं "मृत्योः स मृत्युमाप्नोति' इति वाक्यस्य पश्चादुदाहृतम् । पूर्वपक्षोदाहृतप्रकारं विहाय प्रकारान्तरेणोपादाने को हेतुरित्याशङ्कय परिहरति-यत्र हीत्यादिवाक्याभ्यामिति । पूर्वं भेदनिवृत्तिप्रतिपादनपरतयापश्चादुदाहृतम् । इदानीं तु इवशब्दयुक्ततया भेदनिषेधप्रदर्शनपरतया, "नेह नानास्ति' इति भेदनिषेधकवाक्यखण्डेन सहोपादानमिति द्रष्टव्यम् । निषेधक्रियाऽऽवृत्तिार्थ इति । बहुशः=बहुषु स्थलेष्वित्यर्थः । "बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्' इति कारके शसो विधानात् । अधिकरणस्यापि कारकत्वात् । ततश्चावृत्तिः फलितेति फलितार्थकथनम्; न प्रत्ययार्थतयेति द्रष्टव्यम् । बहुभवनभ्रमरूपमिति । सार्वज्ञ्यस्य पूर्वसिद्धत्वे हि पाश्चात्त्या भ्रान्तिर्नोपपद्यते; न हि ब्रह्मणि बहुभवनभ्रमात् प्राक् सर्वाज्ञ्यमस्ति, बहुभव नभ्रमस्यैव सार्वज्ञ्यरूपत्वात्, तस्य चाविद्याधीनत्वात् नाविद्याविरोधित्वमिति भावः । अतो विरोधोऽभ्युपगन्तव्य इति । ततश्च न्यायानुगृहीतश्रुत्यन्तरसिद्धार्थविरुद्धं भेदनिषेधं "नेः नानास्ति' इत्यादिकं कथंप्रतिपादयेदित्यर्थः । ननु भेदनिषेधश्रुतीनां न्यायानुगृहीतविरुद्धश्रुत्यन्तरसाद्भावेऽपि "मृत्योः स मृत्युमाप्नोति' इति भेदज्ञानानर्थत्वप्रतिपादकोदाहृतश्रुतौ "द्वतिनोऽनथ्यदर्शिनः इति मृत्युपवृहितायां तादृशविरोधाभावान्न दोषइत्याशङ्कयाह-इह च विरोधोऽवगम्यत इति । संसारहेतुत्वं श्रूते; तत्रापि विरोधोऽवगम्यत इति योजना । ततश्च पपरविरुद्धार्थप्रतिपादनस्य सर्वत्र साम्यात् न्यायानुगृहीत एवार्थ स्वीकर्तव्यः । भेदश्रुतिश्च न्यायानुगृहीता, अभेदश्रुतिस्तद्विरुद्धेति न्यायानुगृहीतभेदश्रुतिविरुद्धार्थकथनमभेदश्रुतेर्न संभवतीति भावः । एतेन केवलं वाक्ययोः परस्परविरोधमात्रप्रतिपादनं प्रकृतासंगतमिति शङ्का पराकृता, उक्तरीत्या प्रकृतसंगतत्वात् । उपास्तिफलभूतमुक्तिदशायामिति । अत्रोपास्तिफलभूतत्वं परंपरया द्रष्टव्यम् । अत्र सामर्थ्याज्जगत इत्यधायाहार इति । ततश्चाध्याहृतजगच्छब्दस्य न विशेष्यपर्यन्तत्वमिति भावः । कथं तदनत्वेन तदन्तर्यामित्वसिद्धिरिति । ननुतदनमित्यनेनासिद्धावपि "अन्तः प्रविष्टः शास्ता जनानाम्' इत्यादिवाक्यान्तरेण तत् सिध्यातीति चेत्-न; अस्यैव वाक्यस्य तदर्थप्रतिपादनसामर्थ्यमस्तीति शिष्यशिक्षार्थतया तद्वाक्यार्थविचारोपपत्तेः । हेतुत्रयशङ्कास्यादिति । तत्कार्यत्वं च तदन्तर्यामिकत्वोपपाद्यम्, तदात्मत्वं चैक्योपपादकम्; न तु तदन्तर्यामिकत्वमपि साक्षादैक्योपपादकमिति भावः । यद्यपि "जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वनैक्यात्' इत्युक्ते ब्रह्मकार्यत्वतदन्तर्यामिकत्वयोस्तदात्मकत्वोपपादकत्वशङ्काप्रसङ्गेन वरुद्धमिति कार्यत्वं (

अव्ययत्वस्य दोषाभावरूपस्य कथं भाष्ये कल्याणगुणत्वेन निर्देश इत्याशङ्कयाह - दोषविरोधित्वं नामगुण इति । पूर्ववर्दर्थ इति । सगुणब्रह्मव्यावृत्तिरित्यर्थः ।

व्यावर्त्यानेकत्वेनेति - व्यावृत्तिप्रतियोगिनामनृतजडपरिच्छिन्नानामनेकत्वेनेत्यर्थः । पदानां पर्यायत्वप्रसङ्गादिति - प्रवृत्तिनिमित्तभेदाभावेनेत्युत्तर वाक्यस्थमिहापि काकाक्षिन्यायेन सम्बध्यते । ननु कुम्भाद्यनुगता सत्तापरजातिस्सत्यपदप्रवृत्तिनि-मित्तम्, अन्तःकरणवृत्त्युपधानलब्धभेदचिदानन्दानुगते ज्ञानानन्दत्वे अपरजाती; एवञ्च सत्यज्ञानानन्दादिशब्दानां लक्ष्यार्था- भेदेपि उक्तजातिवाचित्वान्न पर्यायतेति कल्पतरूक्तेर्न पर्यायत्वमिति चेन्न, कुम्भाद्यनुगतसत्तायाः सत्यशब्दवाच्यत्वे सत्य-त्वस्यातिप्रसक्तस्य ब्रह्मलक्षणत्वाभावप्रसङ्गात् । अभ्युपगम्यते च त्वया सत्यत्वस्य ब्रह्मलक्षणत्वं सत्यमिथ्यार्थानुगतसत्तासामान्य-सम्भवाच्च तस्यानृतसाधारणतयाऽनृतव्यावृत्त्यसिद्धेश्च, कालत्रयाबाध्यत्वरूपं पारमार्थिकसत्त्वं ब्रह्मणि श्रौतमिति तत्सिद्धान्त-व्याकोपप्रसङ्गाच्च धर्मिसमसत्ताकभेदं विना औपाधिकभेदमात्रेणाकाशत्वादेरिव ज्ञानत्वानन्दत्वयोरपि जातित्वायोगाच्च ज्ञानत्वादेः धर्मिसमसत्ताकभेदवदुपहितचैतन्यवृत्तित्वे शुद्धलक्षणत्वायोगाच्च; एतेन सत्यादिविशिष्टशबलब्रह्मवाचिनां सत्यादिशब्दानां शुद्ध- ब्रह्मणि लक्षणेति न पर्यायत्वमिति निरस्तम् । अनृतास्वप्रकाशे परिच्छिन्नरूपे शबले सत्यत्वादेरयोगात् । योगे वा तस्यैवानृता-स्वप्रकाशपरिच्छिन्नव्यावृत्तिस्स्यात्, न तु सत्यत्वाद्यनाश्रयस्य शुद्धस्य; तस्मात् सत्यत्वादीनां शुद्धादन्यत्रासम्भवात्सत्यादिवा- क्यस्य च लक्षणया अखण्डार्थत्वे शुद्धेपि तदसिद्धेस्सत्यत्वादीनामत्यन्तासत्त्वेन तद्भेदमादायापर्यायत्वस्य दुस्समाधानत्वात् पर्या- यत्वं सिद्धमित्यर्थः । उपलक्षणतया विशेषणतया वेति - किं व्यावृत्तीनां वाक्यार्थीभूतब्रह्मप्रतीत्युपयुक्तपदार्थप्रतीतिविषयत्व-मात्रमेव? उत वाक्यार्थप्रतीतिविषयत्वमप्यस्तीति विकल्पार्थः । उपलक्ष्याद्व्रहिर्भूतमित्यस्याप्ययमेवार्थः । न चावच्छेदकत्वं विशेष-णत्वोपलक्षणत्वातिरि-क्तमेव, कर्णशष्कुल्यवच्छिन्ननभःश्रोत्रमित्यत्र कर्णशष्कुल्याविशेषणत्वे तस्या अपि श्रोत्रत्वप्रसङ्गात् विशेष्यान्वयिनो विशेषणान्वयित्वनियमात् । नाप्युपलक्षणत्वम्, कदाचित् कर्णशष्कुल्युपलक्षितस्यापि नभसः श्रोत्रत्वेतिप्रसङ्गा-दिति वाच्यम्, तत्राप्युपलक्षणकोटावेव निवेशसम्भवात्, विद्यमानकर्णसंयोगस्य उपलक्षणत्वेन दोषाभावात् । उपलक्ष्याद्व्रहिर्भूत- मिति । अयं भावः,- किं स्वरूपप्रतिपत्त्यर्थं ज्ञानादिपदम्? उत ज्ञानत्वादिप्रतीत्यर्थम्? नाद्यः,- पूर्वप्रतीतत्वात् । न द्वितीयः,-उपलक्षणत्वव्याधातादिति । वाक्यार्थाभिधानदशायां सर्वैः पदैरिति । सर्वैः पदैः वाक्यार्थाभिधानदशायामित्यन्वयः । यद्वा, सर्वैः-एकज्ञानजनकत्वेन एकज्ञानजननेनेत्यर्थः, अतो नान्वयानुपपत्तिरिति द्रष्टव्यम् । ननु युगपदभिधाने श्रुतिवाक्यादिषु बला-बलविभागनिर्णयोऽसङ्गत एव स्यात् वाक्यापेक्षया पदश्रुतेः प्राबल्यम्, पदश्रुत्यपेक्षया प्रत्ययश्रुतेरिति व्यवस्था दत्तजलाञ्जलिः स्यादित्यस्वरसादाह - क्रमेणाभिधाने-पीति । क्रमेणाभिधानानभ्युपगम इति । क्रमेणाभिधानानभ्युपगमवादिपक्ष इत्यर्थः । युगपत्प्रतिपादनेपि नापैतीति - उद्देश्यो-पादेयभावे हि तद्वाक्यज्ञातत्वाज्ञातत्वे अप्रयोजके, अपितु तद्वाक्यप्रवृत्तेः प्राक् माना-न्तरावगतमनूद्यते, अप्राप्तं हि विधीयत इत्येव हि विवेक इति भावः । पौर्वापर्यस्य उद्देश्योपादेयलक्षणत्वाभावे कथमुद्देश्योपादे-यविभागज्ञानमित्याशङ्कयाह - एकेन वाक्ये- नेति । परामर्शदशायां सम्भवत्येवेति । ननु ज्ञातत्वाज्ञातत्वलक्षणोद्देश्योपादेय-विभागज्ञानं न वाक्यार्थप्रतीतावुपयुक्तम्, येन वाक्यार्थप्रतीतेः प्राक् परामर्शदशायां तदवगतिस्समर्थनीया स्यादिति चेन्न, "ग्रहं सम्मार्ष्टी'त्यादौ ग्रहं संमृज्यादेकं संमृज्यात् यत्संमृज्यात् तदेक'मित्यादिवचनव्यक्तिनिरूपणाभावे निर्विचिकित्सवाक्यार्थप्रती-तेरनुदयेन न्यायसम्पादितवचनव्यक्तिपश्चाद्वाक्यार्थबोधकमिति भावः । विशेष्यमात्रैक्यपरत्वात्समानाविभक्तेरिति । अयं भावः,- यदुक्तं विशिष्टैक्यप्रतिपादनमिति तदिष्टमेव, विशिष्टैक्यप्रतिपादनस्यानभ्युपगमात् । न च विशेष्यैक्यमात्रप्रतिपादनं परस्यापीष्ट- मिति वाच्यम्,-विशेषणान्वयस्यापि प्रातिपादिकावगतस्यात्यागात् । एकस्मिन् विशेष्ये एकस्य द्वयमिति न्यायेन प्राप्तयोर्विशेष-णैकत्वयोरपरित्यागादिति । व्युत्पत्तिश्च प्रत्यक्षमूलेति । न तु स्वर्गादिशब्दव्युत्पत्तिवच्छ्रुतिमूलेत्यर्थः । प्रत्यक्षञ्च विशेष्यैक्य-मवगमयतीति - दण्डी कुण्डलीत्यादौ विशेष-

णविभक्तेर्भिन्नविशेषणाश्रये एकस्मिन्नेव विशेष्ये पूर्वपूर्ववृद्धव्यवहारं प्रत्यक्षीकृत्य तथैव व्युत्पत्तेर्गरहात्, इतरथा विशेषणविभक्तेरभेदार्थकत्वमपि त्याज्यं स्यात्, नहि विशेषणविभक्तिरैक्यपरेत्यत्र पूर्वपूर्ववृद्धव्य-वहाराधीनव्युत्पत्तिमन्तरेणान्यन्निमित्तमस्तीति भावः । विशेष्यभेदकत्वं प्रत्यक्षेण तत्रापोद्यत इति चेदिति - प्रत्यक्षागोचरे ब्रह्मणि विशेषणभेदप्रयुक्तो विशेष्यभेदो दुर्वार इत्य-भिप्रायः-धर्मिवाचिपदैक्यात् समानविभक्तिनिर्देशाच्च एक्यप्रतीतेरिति । इदमुप-

लक्षणम् विशेषणभेदे विशेष्यभेद इत्युत्सर्गः, देवदत्तश्श्यामो युवेत्यादावदर्शनात्, खण्डो मुण्ड इत्यादौ विरुद्धत्वात्, भेद-कत्वमविरुद्धन्त्वभेदकमेव विशेषणानां भेदकत्ववादस्तु विशेषणानाश्रयापेक्षया, न तु विशेषणान्तराश्रयापेक्षयापि,नहि नील-मुत्पलमित्यादौ नैल्यं दीर्धादपि व्यावर्तयतीत्यपि द्रष्टव्यम् । यच्चोक्तं समानविभक्तीति - न च समानविभक्तया ऐक्यावगमे पर-स्याखण्डार्थत्वभङ्गप्रसङ्गात् परस्य कथमियमाशङ्का घटतामिति वाच्यम्, एकप्रातिपदिकार्थमात्रनिष्ठत्वमखण्डार्थत्वमित्यनेन प्रातिपदिकार्थान्तरसम्बन्ध एव व्यावर्त्यते, न तु विभक्तसम्बन्धोपीति मन्यमानस्य शङ्कासम्भवादिति ध्येयम् । अनतिरिक्तपक्षे हेत्-वसिद्धिरिति - समानविभक्तयवगतैक्यावगमविरोधरूपहेत्वसिद्धिरित्यर्थः । ऐक्यावगमविरोधरूपहेत्वसिद्धिरित्युत्तरत्रोपसंहा-रादिति द्रष्टव्यम् । अशक्यासदृशान्वयप्रति-योग्युपस्थितिर्वा शक्यसम्बन्धो वा लक्षणाशक्ये न सम्भवतीत्यभिप्रेत्याह - अललक्ष-णिकत्वेपीति । विमतं वाक्यमखण्डार्थमि-त्यादि - एतेन सत्यादिवाक्यमखण्डार्थनिष्ठं लक्षणवाक्यत्वात्, तन्मात्रप्रश्नोत्तरत्वाद्वा प्रकृष्टप्रकाशश्चन्द्र इति वाक्यवदित्यनुमानं प्रमाणम्, नीलमुत्पलमित्यादिसमानाधिकरणवाक्यानां लक्षणवाक्यत्वाभावात् नाति- प्रसङ्ग इति निरस्तम् । असाधारणरूपलक्षण-वाक्यत्वस्य सखण्डाथर्त्वेनैव व्याप्तेः कर्मकाण्डस्यापि तन्मात्रप्रश्नोत्तरत्वेनाखण्डा-र्थत्वप्रसङ्गात् प्रकृष्टप्रकाशश्चन्द्र इत्यत्र व्या-वर्तकासाधारणप्रश्नोत्तरत्वेन दृष्टान्तासिद्धेश्चेत्यपि द्रष्टव्यम् । यदि च भावरूपखण्डार्थ-प्रतिपादनासमर्थमिति प्रतिज्ञेति - ततश्च प्रतिज्ञावाक्यस्य खण्डार्थत्वाभावरूपखण्डार्थवैशिष्टयप्रतिपादनसामर्थ्येऽपि भाव-रूपखण्डार्थप्रतिपादनासामर्थ्यान्न व्यभिचार इति भावः-प्रातिपदिकेनैव विशेषणान्वयस्येति । प्रातिपदिकस्मारितयोर्विशष्टयो-र्विभक्तया ऐक्यमात्रप्रतिपादनादित्यर्थः । न तु नीलप्रातिपदिकेन उत्पले नीलत्वान्वय इति मन्तव्यम्, तथाहि सति उत्पले नील-त्वान्वयस्य नीलप्रातिपदिकेनैव सिद्धेर्विभक्तया ऐक्यबोधनस्य वैयर्थ्यापातादिति द्रष्टव्यम् ।

अनेन शङ्काद्वं य परिहृतं -भवतीति - कारणपरत्वप्रतिपादकेन सिसृक्षोरिति पदेन साक्षात्पूर्वपक्षिचोद्यनिरासः ।

उपादा-नकारणत्वं "सदेव सोम्येदमग्र आसीदेकमेव' इति प्रतिपादितमिति भाष्यखण्डेन पार्श्वस्थचोद्यनिरास इति भावः - स्वतन्त्रवस्तु-निषेधपरमद्वितीयपदमित्यर्थ इति । अत एव शाङ्करोपनिषद्भाष्येपि अद्वितीयमिति मृद्वयतिरेकेण मृदो यथान्यद्धटाद्याकारेण परिणमयित्तकुलालादिनिमित्तृकारणं दृष्टम् , तथा सद्वयतिरेकेण सतस्सहकारिकारणं द्वितीयं प्राप्तं प्रतिषिध्यते । अद्वितीयमिति नास्य द्वितीयं वस्त्वन्तरं विद्यत इत्यद्वितीयमिति निमित्तान्तरनिषेधपरतयैव व्याख्यातम् । किञ्चप्राक् सृष्टेरेकमद्वितीयं सदेवासी- दिति सृष्टिप्राक्कालपरतया परैरेव व्याख्यातत्वेन सृष्टिप्राक्काले अद्वितीयत्वमात्रेण कथं मिथ्यात्वप्रसक्तिरित्यपि द्रष्टव्यम् ।।

किं ज्ञानत्वाज्ज्ञानाश्रयत्वमुच्यते? निर्गुणवाक्यविरोधपरिहारः उत एकजातीयद्रव्ययोर्नियतधर्मधर्मिभावानुपपत्तेरिति विकल्पे प्रथमस्य दूषणं ज्ञातुरेव ज्ञानस्वरूपत्वादिति भाष्यम्; ज्ञातुरपि ज्ञानस्वरूपत्वसम्भवादिति तस्यार्थः । द्वितीयस्यतु दूषणं ज्ञानस्वरूपस्यैवेत्यादि-भाष्यम् ; ज्ञातृत्वमेव हि सर्वाः श्रुतयो वदन्तीति भाष्यन्तु प्रथमविकल्पदूषणस्योपपादकम् । तच्छेषभूतम्- इति प्रथमव्याख्या, अस्यां च व्याख्यायां ज्ञातृत्वमेव हीति भाष्यस्य ज्ञातुरेव ज्ञानस्वरूपत्वादिति व्यवहितभाष्योपपादकत्व-माश्रयणीयम्, एवकारस्य अप्यर्थत्वञ्च क्लिष्टमित्यस्वरसो द्रष्टव्यः । द्वितीयव्याख्यायान्तु पूर्ववदेव विकल्पमुखेन प्रवृत्तत्वं समानम्; तत्र ज्ञातुरेवेत्यादिभाष्यस्यायथमर्थः,- ज्ञातृशब्दो भावप्रधानः पञ्चम्यतः, एवकारश्च यज्ज्ञातृत्वं त्वया ज्ञानत्वविरुद्धतयोपन्यस्तं तदेव ज्ञानत्वसाधकमिति स्फोरणार्थः । ज्ञानत्वाभावव्यापकाभावप्रतियोगितया ज्ञातृत्वस्य न तद्विरुद्धत्वमिति अस्मिन् पक्षे ज्ञातृ-त्वमेव हि

सर्वाः श्रुतयो वदन्तीति भाष्यं ज्ञातृत्वस्य श्रौतत्वप्रतिपादनद्वारा तद्वद्वीकरणार्थम्, अस्याञ्च व्याख्यायां भावप्रधानतया निर्देशाद्याश्रयणं क्लिष्टमित्यस्वरसो द्रष्टव्यः । तृतीयव्याख्यायान्तु ज्ञातुरेवेत्यादिभाष्यस्य ज्ञातुरेव सतो ज्ञानस्वरूपत्वाविरोधादि- त्यर्थः । इदञ्च भाष्यं न विकल्पकोट्योरन्यतरनिरासकम्, अपि त्वविरोधप्रतिज्ञामात्रपरम्, किं ज्ञातुर्ज्ञानानाश्रयत्वं सजातीययो-र्द्धर्मधर्मिभावाभावादुच्यते? उत ज्ञानत्वात् ज्ञानानाश्रयत्वम्? इति विकल्प्य प्रथमं प्रतिवक्ति । ज्ञानस्वरूपस्यैवेति -द्वितीयं प्रतिवक्ति । ज्ञातृत्वमेव हीति -इति विवेको द्रष्टव्यः -पूर्ववदभिप्राय इति । किं व्याप्त्या उच्यते? उत श्रुत्येत्यादीत्यर्थः-ज्ञातृत्वं यथा फलितं भवतीति । तमी-श्वराणामित्यादिश्रुताविवत्यर्थः । फलितत्वप्रकारश्च उत्तरत्र स्पष्टयिष्यते । ज्ञानस्य सर्वविषयत्व- मिति - यस्सर्वज्ञस्सर्वविदित्यत्र ज्ञानस्य सर्वविषयत्वम्, तदैक्षतेति समष्टयुपयोगित्वम्, सेयं देवतैक्षतेति व्यष्टयुपयोगित्वं सृजा इत्युत्तमपुरुषेणात्मसम्बन्धित्वञ्च दर्शितमित्यर्थः-कामप्रदत्वञ्चेति । कामितार्थज्ञानाभावे तत्प्रदत्वासम्भवादिति भावः । देवता-त्वम्,-कर्माराध्यत्वम् । आराधनामहनीयप्रीतिहेतुभूता क्रिया । ततश्च प्रीतिरूपज्ञानवत्त्वं सिध्यति । पतित्वं शेषित्वमिति-शेषि-चेतनत्वमित्यर्थः । प्रयाजादि-शेषिदर्शपूर्णमासादौ पतित्वव्यवहाराभावात्; अतो ज्ञातृत्वसिद्धिरिति भावः । द्वितीयविशेषपर्य-

वसायित्वं सूचितमिति - ततश्च "न तस्य कार्यं करणञ्च' इत्याद्यशंस्यापि प्रकृतोपयोगित्वमस्तीति भावः - विशेषविधानं विशे-षनिषेधश्चेति । अपहतपाप्मेत्यादिना विशेषनिषेधः, सत्यकाम इत्यादिना विशेषविधानमित्यर्थः - वैयथ्यर्परिहाराय सङ्कोचश्चेत् गोबलीवर्दन्याय इति । अत्र उपात्तविशेषव्यतिरिक्तविषय इत्यनुषज्यते । उपात्तविशेषविषये तस्य सङ्कोच इति । न चायं छाग-पशुन्याय एव, उत्सर्गापवादन्याय एव हि सामान्यविशेषन्यायः । एवमेव हि व्यवहारदर्शनादिति वाच्यम्,-सामान्यशब्दस्य विशे-षातिरिक्तविषयत्वमादाय उत्सर्गा-पवादन्याये सामान्यविशेषन्यायशब्दप्रवृत्तिवत्सामान्यवाचिशब्दस्य विशेषपर्यवसानमादाय छागपशुन्यायेपि सामान्यविशेषन्यायशब्दव्यवहारे दोषाभावात्, अत्र गोबलीवर्दन्यायकथनं शिष्यानुग्रहार्थ प्रसङ्गात्कृतमिति द्रष्टव्यम् । ननु गुणसामान्यविधानं श्रुतिषु न दृश्यत इति कथमुच्यते? "यः कालकालो गुणी सर्वविद्य' इत्यादौ तथा दर्शनादि-त्याशङ्कयाह - दोषसमभिव्याहृतेति । दोषभावसमभिव्याहृतेत्यर्थः । अत्र हि कालकाल्यत्वलक्षणदोषाभावरूपा कालकाल्यत्व-समभिव्याहृतस्य गुणशब्दस्य गुणविशेषपरत्वेन गुणसामान्यविधानासिद्धेरभ्युपगमवाद एव शरणमितिभावः - स्मृतिवचनाभि-प्रायेण सगुणवाक्यानामित्युक्तमिति । अत्र च वाशब्दोऽध्याहर्तव्यः, वचनाभिप्रायेण वा सगुणवाक्यानामित्युक्तमित्यर्थः । यद्वा,-कथमत्यन्तानुपलभ्यमानस्य गुणसामान्यविधानस्याभ्युपगम इत्याशङ्कयाह -वर्षायुतैरित्यादि । स्मृतिवचनाभिप्रायेणेति-एताभिः स्मृतिभिरेतत्तुल्यगुणसामान्यविधायकश्रुत्यनुमानेन सगुणवाक्यानामित्युक्तमित्यर्थः । दोषप्रतिपक्षवचन इति । गुणदोषौ इत्यत्रेव दोषप्रतिबन्दिगुणसामान्यपरः उपादेयसामान्यपर इत्यर्थः - प्रकरणवशाच्छागपशुन्यायेनेति । ततश्च स्मृतिगतानामपि सामान्यवचनानां विशेषपर्यवसानस्या-पेक्षित्वात्, एतत्सङ्ग्रहार्थं भाष्ये सगुणवाक्यानामित्युक्तिरुपपद्यत इति भावः । अत्रायमभि- प्राय इति । भाष्ये-सगुणनिर्गुणवाक्ययोर्विरोधाभावादिति वाक्यं समाप्तम् । अन्यतरस्य मिथ्याविषयताश्रयणमपि न युक्तमिति वाक्येन्तरम् । अत्र विरोधाभ्युपगमो इति शेषः पूरणीयः, अपिशब्दश्च भिन्नक्रमः, अतो विरोधाभ्युपगमेपि अन्यतरस्य मिथ्या-विषयताश्रयण न युक्तमित्यर्थस्सिद्धयतीति भावः । अतश्च पूर्वं विरोधो नास्तीति परिहृतमित्युत्तरग्रन्थोपि सङ्गतः । इतरथा एक-वाक्यत्वे पूर्वमित्युक्तेरसम्भवात् । यद्वा, अत्रायमभिप्राय इत्यपिशब्दोऽध्याहर्तव्यः, पूर्वमिदानीमिति पदद्वयमप्यविवक्षितं वस्तु-स्थितिमनुरुध्य विरोधो नास्तीत्युक्तम्, विरोधसत्त्वेपि नास्माकं क्षतिरित्यर्थः । उभयारप्यपच्छेदनियमो नास्तीति - अन्यतर-मात्रापच्छेदस्यापि सम्भवादिति भावः । प्रयो-गावधिकविरोध इति । अपच्छेदद्वयनिमित्तिकनैमित्तकप्रयोगद्वयस्य युगपदनुप-संहरणीयतया शास्त्रयोर्विरोधः, अतश्च स कादाचित्क इति भावः । अनियतविरोधपौर्वापर्यविषय इति - उक्तं हि-

"पौर्वापर्यं विरोधश्च पूर्वाप्रामाण्यमेव च ।

नियमान्नास्तितत्रासावपच्छेदनयो भवेत् ।।'

इति । ननु प्रत्यक्षविरुद्धश्रुत्यनुमानं न प्रवर्तत इति विरोधाधिकरणन्यायः । स नात्र प्रवर्तते । यदि प्रत्यक्षानुमानवत् शीघ्रमन्थर-गामित्वसामान्यात् सगुणनिर्गुणवाक्ययोस्तद्विषयत्वम्, तहि निर्गुणवाक्यस्य स्मृतिवदप्रामाण्यमेव स्यात् । यदि चाप्रामाण्यमिष्टम्, तर्हि अपच्छेदन्यायो वा किमिति न प्रवर्तते ? अपच्छेदन्यायस्य नियतपौर्वापर्यविषयप्रवृत्तौ सर्वात्मनाऽप्रामाण्यप्रसङ्गभयाद्धि अपच्छेदन्यायस्याप्रवृत्तिरुच्यते । अतः श्रुतिविषये न विरोधाधिकरणन्याय इत्यस्वरसादाह-यद्वा मा भूदिति । उपक्रमाधिकरण-न्याय एवेति । "प्रजापतिर्वरुणायाश्वमनयत् । स स्वां देवतामार्च्छत् । स पर्यदीर्यत । स एतं वारुणं चतुष्कपालमपश्यत् । तन्निर- वपत्' इत्युपक्रम्य, उपसंहारे श्रूयते- "यावतोऽश्वान् प्रतिगृह्णियात् तावतो वारुणांश्चातुष्कपालान्निर्वपेत्' इति । तत्र उपक्रमेऽर्थवादे-ऽश्वदातुः प्रजापतेर्वारुणोष्टिः प्रतीयते; उपसंहारे च प्रतिग्रहीतुः । द्वयोर्विरोधे सति

"गुणत्वादनुवादत्वादर्थवादस्य लक्षणा ।

विध्युद्देशो जघन्योऽपि स्वार्थहानिं न गच्छति ।।'

इति पूर्वपक्षे प्राप्ते, गुणभूतस्याप्यर्थवादस्यासंजातविरोधित्वेन प्रबलत्वाद्विध्युद्देशस्य प्रधानत्वेऽप्यलब्धात्मकत्वात् प्रधानभूतो विध्युद्देशः स्वयमलब्धात्मा लब्धात्मानमर्थवादं प्रक्रमस्थं बाधितुमसमर्थः स्वयमेव तदानुगुण्यं भजत इति, प्रतिगृह्णीयादित्यस्य प्रतिग्राहयेदित्येवं णिजर्थमन्तर्भाव्य दातुरेवेष्टिरिति सिद्धान्तितम् । ततश्च सगुणवाक्यस्य भेदग्राहिप्रत्यक्षस्य वा प्राक् प्रवृत्तत्वेनो-पक्रमाधिकरणन्याय एव प्रवर्तत इत्युपक्रमनयः । सत्तया ज्ञायमानतया वेति । ननु - "रजतम्' इति ज्ञानस्या प्रामाण्यशङ्कास्क-न्दितत्वात्तदनास्कन्दितज्ञानस्यैव विपरीतज्ञानप्रतिबन्धकत्वात् "नेदं रजतम्' इति ज्ञानोत्पत्तौ न विरोधः । न चाप्रामाण्य- शङ्काया अपि विषयसंशयपर्यवसन्नतया तस्याप्यनुत्पत्तिः शङ्कनीया, अप्रामाण्यशङ्कासामग्र्याः फलबलादुत्तेजकत्वकल्पनादित्येता-

वतैव परिहारसंभवात् व्यर्थोऽयं प्रपञ्च इति चेत्, शिष्यशिक्षार्थतया प्रपञ्चनोपपत्तेः । न च सगुणत्वज्ञाने तद्विरुद्धनिर्गुणत्वज्ञान-स्योपक्रमाधिकरणन्यायेनानुत्पादे षोडशिग्रहणप्रतीतौ तद्विरुद्धाग्रहणप्रतीतेरनुदयप्रसङ्गः; तथा अपच्छदस्थलेऽपि पूर्वविरुद्धप्रती-त्यनुत्पादप्रसङ्ग इति वाच्यम्-उपक्रमाधिकरणन्यायस्यैकवाक्यतास्थल एव प्रवृत्तेः; ग्रहणाग्रहणादिस्थले तु तदभावात् । न च सगुणनिर्गुणवाक्ययोरप्येकवाक्यता नास्तीति वाच्यम्-

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।

कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ।।'

इत्यादावेकवाक्यत्वप्रतीतेः तत्तुल्यत्वाच्च निर्गुणवाक्यान्तरस्यापि न तद्विरुद्धार्थप्रतीतिजनकत्वमिति भावः । इदं रजतमति परा-मशर्सापेक्षत्वादिति । इदं रजतम्' इति ज्ञानस्य, "नेदं रजतम्' इति ज्ञानोपजीव्यत्वादुपजीव्यविरोधेन कथं तद्विरुद्धोत्पत्तिरिति शङ्कार्थः । शुक्तित्वविषया ह्युत्तरप्रमितिरिति । इदमुपलक्षणम्- रजतत्वाभावविषयत्वेऽपि "इदं रजतम्' इति ज्ञानस्य प्रतियोगि-विषयत्वमात्रांश उपजीव्यत्वेऽपि पुरोवर्तिनि रजतविषयत्वंशेऽनुपजीव्यत्वेन तदभावावगाहने दोषाभावात् । उदीयमानमिति पाठे "इण् गतौ३ इति धातो रूपमिति द्रष्टव्यम् । आनन्दं ब्रह्मण इत्यादितात्पर्यलिङ्गप्राचुर्यादिति । ब्रह्मापेक्षयापि तद्गुणभूतानन्दवेद- नस्यैव फलवत्त्वावेदनेन श्रुतेर्ब्रह्मानन्दे तात्पर्यावगतेरिति भावः ।

(आनन्दवल्लयाः सगुणविषयत्वम्)

पर्यवसितं युक्तमिति पाठः । पर्यवसानं युक्तमित्यर्थः । पर्यवसितुं युक्तमिति क्वचित् पाठो दृश्यते । तत्र "असु क्षेपणे' इत्यस्मात् अवपूर्वात् "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इति अवशब्दान्तलोपे तुमुन्प्रत्यये सति कथंचित् निर्वाहो द्रष्टव्यः; "षो अन्तकर्मणि' इत्यस्मात् तुमुन्प्रत्यये तस्य कित्वाभावात् "द्यतिस्यतिमास्थाम्' इतीत्वप्राप्तेरभावात् । अत एवानन्दमयाधि- करणे वक्ष्यत्याचार्यः, "पर्यवस्यन्तः पर्यवसातुं प्रवृत्ताः' इति । नित्यनवं यथा भवति तथेति । युवा चासावध्यायकश्चेति समासः । अध्यायकस्य च युवत्वमध्ययनद्वारा पर्यवस्यतीति भावः । आशुतरक्रिय इति आशुतरक्रियावति वर्तमानात् आशुशब्दात् इष्ठन्- प्रत्यये टिलोपे रूपम् । आशुमच्छब्दात् "बिन्मतोर्लुक्' इति लुकि वा रूपं द्रष्टव्यम् । अशनक्षम इति । अशनम् आशः, ततो मत्व-न्तात् इष्ठन् प्रत्ययः । आशीर्वादविषये वर्तमानादाशीश्शब्दात् मत्वन्ताद्वा इष्ठनि आशिष्ठ इति रूपम् । सर्वत्र "विन्मतोर्लुक्' इति इष्ठन् प्रत्ययः; मतोश्च लुक् । पूरणगुणसुहितार्थेति । सुहितशब्दस्य तृप्तयर्थत्वात् पूरणस्यापि तृप्तिरूपत्वादिति भावः । न तु पूरणगुणेत्यत्र पूरणशब्द इह मन्तव्यः, तस्य पूरणप्रत्ययपरत्वात् । षष्ठयनुज्ञानादिति । षष्ठीसमासनिषेधपरेणानेन सूत्रेण षष्ठयनु-ज्ञानादित्यर्थः । निवर्त्यानिष्टत्वेति । अनिष्टनिवर्तकत्वेत्यर्थः । चतुर्मुखानन्दाधिक्याभिप्राय इति । "ते ये शतम्' इत्यत्र शत-शब्दोऽधिकसंख्यापरः । अतो न परिच्छिन्नत्वमिति भावः । प्राकरणिकवाक्यानां संख्याविशेषपरत्वात् "ते ये शतं प्रजापतेः' इत्य-त्रापि संख्याविशेषपरत्वमेवोचितमित्यन्यथा निर्वाहमाह - यद्वा ते ये शतं स एक इत्यस्येति । कालत्रयवर्तिप्रजापत्यानन्दत्वे कथिते अपरिच्छिन्नत्वं सिध्यतीति भावः । त्रिपाद्विभूतिमत्तया चेति । ननु भगवदानन्दस्यापरिच्छिन्नत्वं निश्चित्य, "ते ये शतम्' इति वाक्येन प्रतिपाद्यमानं परिच्छिन्नत्वं कथं संगच्छतामिति वदन्तं प्रति त्रिपाद्विभूतिमत्तया आनन्दानन्त्यकथनं कथमुपयुज्य-(पद्य)तामिति चेत्, अत्र केचित् - कथमपरिच्छिन्नत्वमिति चेदित्येव पाठः । तस्य चायमर्थः-"ते ये शतम्' इति वाक्येन कथम-परिच्छिन्नत्वं प्रतीयताम्? प्रत्युत परिच्छन्नत्वमेव प्रतीयते । अतोऽपरिच्छिन्नत्वं न सिध्येदित्येतावत्पर्यन्तमाक्षेपं वर्णयन्ति । अत-स्तत्परिहर्त्रा चानेन श्रुतिवाक्येन परिच्छिन्नत्वासिद्धिरप्युपपादनीया । आनन्दस्यापरिच्छिन्नत्वक्रमोऽपि प्रदर्शनीय इत्यभिप्रेत्यानेन वाक्येन परिुच्छिन्नत्वासिद्धिमुपपाद्य प्रमाणान्तरेणापरिच्छिन्नत्वमप्युपपाद्यत इति वदन्ति । अपरे तु-"शतं प्रजापतेरानन्दाः' इति श्रुतिस्वारस्यविरोधेन कालत्रयवर्तिप्राजापत्यानन्दमात्रपरत्या वा शतशब्दस्याधिकसंख्यामात्रपरतया वा किमिति व्याख्यायते? यथाश्रुतार्थ एव ग्राह्य इति तटस्थशङ्कामपाकरोति - मेरोरिवाणुरिति वदन्ति ।

(सोऽश्नुत इत्यादिश्रुत्यर्थः)

ननु "ब्रह्मविदाप्नोति परम्' इति ब्राह्मणे ब्रह्मण एव प्राप्यत्वप्रतिपादनात्-"एषोऽस्य परमानन्दः' इति ब्रह्मण एव विदुषा-मानन्दत्वश्रवणेन कामानां च तदभेदप्रतीतेः ब्राह्मणस्य मन्त्रविवरणरूपत्वेन प्रबलत्वात् ब्राह्मणानुसारेणैव "सह ब्रह्मणा' इति मन्त्रार्थो वर्णनीयः । यथा पैङ्गिरहस्ये ब्राह्मणानुसारेण "द्वा सुपर्णा' इति मन्त्रार्थवर्णनमित्याशङ्कयाह-मन्त्राणां ब्राह्मणविवरण-रूपत्वदर्शनादिति । मन्त्राणामपि ब्राह्मणविवरणरूपत्वदर्शनाद्विवरणरूपत्वरूपः प्राबल्यहेतुर्द्वयोरप्यविशिष्ट इति भावः । स्फुटप्रतीतिहेतुत्वेति । प्रायेण ब्राह्मणानां स्फुटप्रतिपत्तिहेतुत्वमस्ति; मन्त्रास्तु गहना भवन्तीत्येतावता ब्राह्मणप्राबल्योक्तिश्चेत्-इष्टमेवेत्यर्थः । नन्वानन्दमयाधिकरणे मन्त्राणां प्राबल्यं केचिद्वदन्तीति मन्त्रप्राबल्यस्यैव परोक्तत्वोपन्यासात् तद्विरोध इति चेत्-न; तस्यापि मतान्तरत्वेनाविरोधादिति द्रष्टव्यम् । विपश्चित्त्वश्रवणात् तस्य च भोक्तृत्वानुगुणत्वात् ब्रह्मणो भोक्तृसाहित्यशङ्कां व्युद- स्यति - विपश्चित्त्वमपि भोग्यगुणत्वेनोक्तमिति । न च तस्यापि कामशब्दनिर्दिष्टत्वात् पृथङ् निर्देशवैयर्थ्यमिति शङ्कनीयम्; गोबलीवर्दन्यायेन प्राधान्यविवक्षया पृथङ् निर्देशोपपत्तेरिति भावः । व्यतिरेकनिर्देशादिति । "कामान् सह ब्रह्मणा' इति भिन्न- तया निर्देशादित्यर्थः ।

अव्यवहितप्रयोगस्वारस्याच्चेति । "ब्रह्मणा सह सोऽश्नुते सर्वान् कामान्' इति यदि स्यात्, तदा स्यादपि भोक्तुस्तच्छब्दनिर्दिष्टस्य साहित्याश्रयत्वशङ्केति भावः । तत्परिहारायेति । इष्टापत्त्या तत्परिहारायेत्यर्थः । तस्मिन् यदन्तस्तद-न्वेष्टव्यमितिवदिति । इदं च "तस्मिन्' इत्यस्य दहराकाशपरत्वमित्यभ्युपेत्य गुणस्यैवान्वेष्टव्यत्वमुच्यत इत्यभिप्रेत्योक्तम् । वस्तु- तस्तु "तस्मिन् यदन्तः' इत्यत्र तच्छब्दस्य पुण्हरीकाकाशरूपवस्तुद्वयपरामर्शित्वस्य वक्ष्यमाणत्वात् तेन ब्रह्मतद्गुणयोर्द्वयोरुपास्य-त्वमिति समप्राधान्यमेव सिध्येत्, न गुणानां प्राधान्यमिति द्रष्टव्यम् । यद्वा सहशब्दस्याप्राधान्यद्योतकत्वे ब्रह्मणोऽप्राधान्यस्य वक्तुमयोग्यत्वात् दहरविद्यावाक्यानुरोधाच्च समत्व एव तात्पर्यमिति भावः । गुणप्राधान्यं वक्तुमित्यनेनापीति । गुणप्राधान्यं वक्तुमित्यनयोक्तया श्रुतिगतसहशब्दस्य भोग्यसाहित्यमेव भाष्यकाराभिप्रेतमिति सिध्यतीत्यर्थः । अन्यथा भोक्तृप्राधान्यं हीति । भोक्तृसाहित्यपरत्वे भोक्तृब्रह्मापेक्षया भोक्तुर्जीवस्यैव प्राधान्यं सिध्येदिति भावः ।

(यस्यामतमित्याद्याशयवर्णनम्)

सगुणानामेव ज्ञेयत्वं दृष्टमितीति । अत्रैवकारो भिन्नक्रमः । सगुणानां ज्ञेयत्वमेव दृष्टम्, अज्ञेयत्वं न दृष्टमित्यर्थः पर्यव- स्यति । ततश्च ज्ञेयत्वस्य व्यापकत्वं सिध्यति । ततश्च तद्व्यतिरेकात् सगुणत्वव्यतिरेकापादनं संभवतीति द्रष्टव्यम् । भाष्ये-ब्रह्मज्ञा-नासद्भावसद्भावाभ्यामिति । ननु "असन्नेव स भवति' इत्यसत्त्वप्रकारकज्ञानस्यैवात्मनाशहेतुत्वमुच्यते, न तु तदज्ञानस्येति चेत्-"असद्ब्रह्मेति वेद चेत्' इत्यस्य "ब्रह्म वेद' इत्येतत् असच्चेदित्यन्वयः । ब्रह्म न जानाति चेदित्यर्थः । "अस्ति ब्रह्मेति चेत् इत्यत्रापि "ब्रह्म वेद' इत्येतदस्ति चेत्-ब्रह्म जानाति चेदित्यर्थः इति भगवद्भाष्यकाराभिप्रायात् । यद्वा श्रुत्यनुसारेण भाष्यार्थो वर्णनीयः । अतः केषुचिद्वाक्येषु इत्यत्र "अतः' इति व्याख्येयं पदम; सर्वा श्रुतय इति च । ननु सर्वशाखाप्रत्ययन्यायः प्रधानस्वरूपानन्त-र्गतानुक्तांशस्वीकारफलः । अत्र च न वाक्यान्तरविहितं मोक्षसाधनं ज्ञानमनूद्य ब्रह्मविषयत्वं क्वचिद्गुणतया विहितम्; अपि तु ब्रह्मज्ञानमेव विहितम्; येन तम्न्यायप्रवृत्तिरित्यस्वरसादाह-यद्वा केषुचित् ब्रह्मविषयत्व इति । ज्ञानमात्राविषयत्वस्यैव निर्गुण-त्वाक्षेपकतया परैरुक्तत्वादुपासनाविषयत्वादिविकल्पनिरासपरत्वमस्य ग्रन्थस्यानुचितमित्यपरितोषादाह-यद्वा ज्ञानं चोपासना-त्मकमिति । गुणविधानबाधितेति । बाधितापीत्यर्थः । ततश्च ज्ञेयत्वाभावरूपहेत्वसिद्धिमात्रं नेत्यर्थः । अज्ञेयत्वं बाधित्वा ज्ञेयत्वमाक्षिपतीति । मा भूत् ज्ञेयत्वे प्रमाणान्तरगवेषणा; इदमेव सगुणत्वं ज्ञेयत्वसाधने पर्याप्तमित्यर्थः । ननु सगुणत्वस्य सर्व-प्रकारेण समर्थनीयस्य सिद्धौ सगुणत्वेन ज्ञेयत्वसाधनं मुधा, उत्तरसिद्धौ किं पूर्वेणेति न्यायादिति चेत्-अत्र केचित्-यद्यपि सगुण- त्वमेव परमसाध्यम्; तत्रैव भाष्यतात्पर्यं च - तथापि तत्रेयं शङ्का समुन्मिषति-कथं सगुणत्वं श्रुतिसहस्रमपि प्रतिपादयेत्, तद्व्यापकज्ञेयत्वाभावादिति । तस्याः परिहारोऽभिधीयते- अज्ञेयत्वं बाधित्वेत्यादिना । यथा यागस्य क्षणभङ्गुरस्यफलपर्यन्तं व्यापारशून्यस्य कथं स्वर्गसाधनत्वमित्याक्षेपे स्वर्गसाधनत्वप्रतिपादनबलादेव तत्पर्यन्तस्थायिव्यापरावत्त्वमपि कल्प्यत इत्युच्यते, एवमिति वदन्ति । तत्रैवेति व्याख्येयं पदम् ।

(नदृष्टेरितिश्रुत्यर्थः)

आगन्तुकत्वाद् गुणत्वाच्चेति । आगन्तुकचैतन्यगुणयोगितया चेति । भाष्ये आगन्तुकगुणशब्दौ भावप्रधानौ; चैत-न्यपदं धर्म्युपस्थापकम् । ततश्च चैतन्यस्यागन्तुकत्वगुणत्वयोगितयेत्यर्थः पर्यवस्यतीति भावः । आगन्तुकचैतन्यगुणयोगितया ज्ञातुरज्ञानस्वरूपतामिति भाष्ये ज्ञातुरात्मनः पक्षत्वम्, अज्ञानस्वरूपत्वलक्षणजडत्वस्य साध्यत्वम्, "ज्ञोऽत एव' इति सूत्रे काणादाभिमतजडत्वसाधकत्वेनोपन्यसिष्यमाणस्यागन्तुकचैतन्यत्वस्य साधनत्वं च स्वरसतः प्रतीयते । तद्विहाय ज्ञानपक्षकाना-त्मत्वसाधकागन्तुकत्वगुणत्वरूपहेतुद्वयपरत्वं वाक्यशैलीविरुद्धमित्यपरितोषादाह - यद्वा चैतन्यं नाम विषयप्रकाश इति । स्व-तश्चैतन्यस्वभावस्यागन्तुकचैतन्यत्वं

न संभवतीति भावः । जीवात्मानं प्रतिषिध्य सर्वभूतात्मानं परमात्मानमेवोपास्स्वेति भाष्ये जीवात्मा प्रतिषिध्येति प्रतिषेधक्रियायाः श्रुतिकर्तृकत्वादुपासनस्य च जीवकर्तृकत्वात् समानकर्तृकत्वाभावात् कत्वाप्रत्य-

यानुपपत्तिमाशङ्कय श्रुतिकर्तृकोक्तिक्रियावाचिपदाध्याहारेण व्याचष्टे-दृष्टिश्रुतिमतिनिदिध्यासनानामिति । अस्मिन् पक्षे उपा-स्स्वेत्ययमर्थ उक्तो भवतीत्येव युक्तम्; वाक्यपदमयुक्तमित्यस्वरसादाह-यद्वा अभिदधातीत्यनुषङ्ग इति । इति वाक्यार्थ इति वाक्यान्तरमिति । "उपास्स्वेत्यभिदधादीति वाक्यार्थ' इत्यत्र इतिशब्दः संनिहितं न अभिदधातीत्यर्थं परामृशति, अपि तूपा-स्स्वेत्येतदंशमिति भावः । इतिशब्दस्य विप्रकृष्टपरत्वमदृष्यमित्यपरितोषादाह-यद्वा प्रतिषिध्य परित्यज्येति ।

(आनन्दश्रुत्यर्थः)

भाष्ये-ज्ञानमेव ह्यनुकूलमानन्द इत्युच्यत इति । अत्र एवकारेण प्रतिकूलज्ञानस्यानन्दत्वं व्यवच्छिद्यते; न तु विषयस्यापि । अतो विभूत्यानन्दत्ववादस्य न विरोध इति द्रष्टव्यम् । धर्मभूतानन्दस्य हीति । न त्वानन्दमात्रस्येत्यर्थः ।

(द्वैतनिषेधश्रुत्यर्थः)

ननु यदिदमुक्तमिति भाष्ये "यत्र हि' इत्यादिवाक्यखण्डः प्रथममुदाहृतः । पूर्वपक्षोपन्यासवेलायां तु कृत्स्नं वाक्यं "मृत्योः स मृत्युमाप्नोति' इति वाक्यस्य पश्चादुदाहृतम् । पूर्वपक्षोदाहृतप्रकारं विहाय प्रकारान्तरेणोपादाने को हेतुरित्याशङ्कय परिहरति- यत्र हीत्यादिवाक्याभ्यामिति । पूर्वं भेदनिवृत्तिप्रतिपादनपरतया पश्चादुदाहृतम् । इदानीं तु इवशब्दयुक्ततया भेदनिषेधप्रदर्शन-परतया, "नेह नानास्ति' इति भेदनिषेधकवाक्यखण्डेन सहोपादानमिति द्रष्टव्यम् । निषेधक्रियाऽऽवृक्तिरर्थ इति । बहुशः-बहुषु स्थलेष्वित्यर्थः । "बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्' इति कारके शसो विधानात् । अधिकरणस्यापि कारकत्वात् । ततश्चावृत्तिः फलितेति फलितार्थकथनम्; न प्रत्ययार्थतयेति द्रष्टव्यम् । बहुभवनभ्रमरूपमिति । सार्वज्ञ्यस्य पूर्वसिद्धत्वे हि पाश्चात्त्या भ्रान्ति-र्नोपपद्यते ; न हि ब्रह्मणि बहुभवनभ्रमात् प्राक् सार्वज्ञ्यमस्ति, बहुभवनभ्रमस्यैव सार्वज्ञ्यरूपत्वात्, तस्य चाविद्याधीनत्वात् नावि-द्याविरोधित्वमिति भावः । अतो विरोधोऽभ्युपगन्तव्य इति । ततश्च न्यायानुगृहीतश्रुत्यन्तरसिद्धार्थविरुद्धं भेदनिषेधं "नेह ना-नास्ति' इत्यादिकं कथं प्रतिपादयेदित्यर्थः । ननु भेदनिषेधश्रुतीनां न्यायानुगृहीतविरुद्धश्रुत्यन्तरसद्भावेऽपि "मृत्योः स मृत्युमा- प्नोति' इति भेदज्ञानानर्थत्वप्रतिपादकोदाहृतश्रुतौ "द्वैतिनोऽतथ्यदर्शिनः' इति स्मृत्यु बृंहितायां तादृशविरोधाभावान्न दोषइत्या-शङ्कयाह-इह च विरोधोऽवगम्यत इति । संसारहेतुत्वं श्रूयते; तत्रापि विरोधोऽवगम्यत इति योजना । ततश्च परस्परविरुद्धार्थ-प्रतिपादनस्य सर्वत्र साम्यात् न्यायानुगृहीत एवार्थ स्वीकर्तव्यः । भेदश्रुतिश्च न्यायानुगृहीता, अभेदश्रुतिस्तद्विरुद्धेति न्यायानु-गृहीतभेदश्रुतिविरुद्धार्थकथनमभेदश्रुतेनर् संभवतीति भावः । एतेन केवलं वाक्ययोः परस्परविरोध-मात्रप्रतिपादनं प्रकृतासंगतमिति शङ्का पराकृता, उक्तरीत्या प्रकृतासंगतत्वात् । उपास्तिफलभूतमुक्तिदशायामिति । अत्रोपास्ति-फलभूतत्वं परंपरया द्रष्टव्यम् । अत्र सामर्थ्याज्जगत इत्यध्याहार इति । ततश्चाध्याहृतजगच्छब्दस्य न विशेष्यपर्यन्तत्वमिति भावः । कथं तदनत्वेन तदन्तर्या-मित्वसिद्धिरिति । ननु तदनमित्यनेनासिद्धावपि "अन्तः प्रविष्टः शास्ता जनानाम्' इत्यादिवाक्यान्तरेण तत् सिध्यतीति चेत्-न; अस्यैव वाक्यस्य तदर्थप्रतिपादनसामर्थ्यमस्तीति शिष्यशिक्षार्थतया तद्वाक्यार्थविचारोपपत्तेः । हेतुत्रय-शङ्कास्यादिति । तत्कार्य- त्वं च तदन्तर्यामिकत्वोपपाद्यम्, तदात्मकत्वं चैक्योपपादकम्; न तु तदन्तर्यामिकत्वमपि साक्षादैक्योपपादकमिति भावः । यद्यपि "जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात्' इत्युक्ते ब्रह्मकार्यत्वतदन्तर्यामिकत्वयोस्तदात्मकत्वोपादकत्व-शङ्काप्रसङ्गेन विरुद्धमिति कार्यत्वं (मतिकारित्वं?) पक्षद्वयसाधारणम्-तथापि विद्यमानस्य निर्वाहमात्र-प्रदर्शनपरत्वात् तद्योज- नाया अपि वक्ष्यमाणत्वेनेष्टत्वाच्च न दोष

इति द्रष्टव्यम् । ऐक्य शब्दस्यार्थभेदः स्यादिति । सकृत्प्रयुक्तपद-स्यार्थद्वयपरत्वम्, विना वृत्त्या न लभ्यत इति भावः । ततश्च जगतस्तदात्मकत्वेनेति । सकृत्प्रयुक्तस्यैकस्मिन्नेवार्थे समाश्रयणीये, अमुख्यस्य प्रकार्यैक्यस्य स्वीकर्तुमयुक्ततया अभेदरूपार्थस्य समाश्रयणीयत्वे सति जगतस्तदात्मकत्वेनैक्यादिति वक्तुमयुक्तमेव, जगद्रब्रह्मणोरभेदस्य बाधितत्वादिति भावः । ततश्च-जगतस्तदात्मकत्वेनैक्यादिति वक्तुमयुक्तमिति कथमुच्यते? तत्कायर्त्वेनैक्यादिति वकुमयुक्तमिति कुतो नोच्यते, विनिगमकाभावादिति शङ्का पराकृता । जगद्विशिष्टब्रह्मपर इत्युक्तत्वादिति । अध्याहृतनिष्कर्षकजगच्छब्दार्थे-नैक्यस्यान्वयानभ्युपगमादिति भावः । ऐकशब्दस्य च नार्थभेद इति । यद्यपि जगद्विशिष्टब्रह्मपर इत्यनेनैवेयमपि शङ्का पराकृते-त्यैक्यप्रपञ्चनं वृथा, तथापि शिष्यशिक्षार्थमैक्यस्वरूपं विविच्य दर्शयतीति द्रष्टव्यम् । अवस्थाद्वयापन्नचिद-चिद्विशिष्टवस्त्वैक्य-मिति । स्थूलत्वसूक्षमत्वरूपावस्थाद्वयापन्नयोन्श्रिदचिद्विशिष्टवस्तुनोरैक्यमित्यर्थः । यथा रूपस्पर्शादीति । यथा रूपस्पर्शवि-शिष्टस्य पिण्डत्वावस्थापन्नस्य रूपस्पर्शविशिष्टेन घटत्वावस्थापन्नेनैक्यम्-अत्र घटगतरूपस्पर्शादिस्थाने चिद-चितौ, पिण्डत्व-घटत्वादिस्थाने अवस्थाद्वयापन्नेत्युक्तम् । इयांस्तु विशेषः-ब्रह्मणि चिदचिद्द्वारा अवस्थायोगित्वम्; घटादिस्थले तु (न?)

रूपस्पर्शादिद्वारिकावस्थेति द्रष्टव्यम् । अत्र च बालत्वयुवत्वावस्थाद्वयापन्नशरीरविशिष्टवस्त्वैक्यमनुरूपो दृष्टान्तः । अत एव वक्ष्यति "स एवायं तरुणोऽभूत्' इति । यद्वा अवस्थाद्वयापन्नत्वं चिदचितोर्विशेषणम् । भिन्नकालीनावस्थारूपसद्वारकविशेषणाश्र-यधर्म्यैक्यमिति वक्ष्यमाणग्रन्थस्वारस्यादिति द्रष्टव्म् । वस्त्वैक्यहानिरिति । विशिष्टवस्त्वैक्यहानिरित्यर्थः । नन्वस्यां योजनायां निष्कृष्टजगद्वाचिजगच्छब्दोऽध्याहर्तव्यः ; ब्रह्मशब्दस्य च तज्जत्वतल्लत्वहेतुके तदभेदे साध्ये सूक्ष्मचिदचिद्वि-शिष्टपरामर्शित्वं वक्त-व्यम् । सर्वमिदं स्थूलशरीरकं तज्जत्वतल्लत्वाभ्यां सूक्ष्मशरीरकं ब्रह्मेत्यर्थस्याश्रयणीयत्वात् । तदनत्वे तु हेतौ ब्रह्मशब्दो ब्रह्मत्वविशि-ष्टपरः; विशिष्टस्यान्तर्यामित्यात् । अतो ब्रह्मशब्दवैरूप्यम् । तज्जलानित्यत्रैकस्यैव तच्छब्दस्य जन्मलययोः सूक्ष्मचिदचिद्विशिष्ट-परामशिॅत्वम् । अनेन तु ब्रह्मत्वविशिष्टविशेष्टमात्रपरामर्शित्वम् । "सर्वं खल्विदं ब्रह्म' इति जगद्विशिष्टस्य ब्रह्माभेद प्रतिज्ञाय विशे-षणभूते जगति तदनत्वलक्षण तदन्तर्यामित्वरूपहेतूपन्यासे हेतोर्वैयधिकरण्यम्, ब्रह्मकार्यतया तदन्तर्यामिकतया चेति चशब्देन ब्रह्मकार्यत्वतदन्तर्यामिकत्वयोस्तदात्मकत्वोपपादनत्वं च स्वरसतः प्रतीयते इत्येतत्सर्वं हृदि निधायाह -यद्वा कृत्स्नस्य जगत इति निष्कर्षकः शब्द इति । नन्वस्मिन् पक्षे भाष्ये तत्कार्यत्वमात्रं विवक्षितम्? उत तदुपादेयत्वम्? नाद्यः, कार्यत्वमात्रस्यापृथ-क्सिद्धत्वरूपतदात्मकत्वाप्रयोजकत्वात् । इतरथा घटस्य दण्डापृथक्सिद्धत्वरूपतदात्मकत्वप्रसङ्गात् । ब्रह्मोपा-देयत्वं तु जगतो नास्त्येव, तद्भिन्नत्वात् । उपादानोपादेययोरभेदावश्यंभावात् । किंच तदुपादेयत्वं मुख्यैक्यसाधकं लोके दृष्टम् । तदन्तर्यामिकत्वं तु अमुख्यैक्यसाधकम् । अतः कथं द्वयोरेकस्मिन्नैक्ये समुच्चयेन साधकत्वमिति चेत्, उच्यते- उपादेयत्वमेवापृथक्सिद्धत्वरूपत-दात्मकत्वसाधकम् । न चोपादानोपादेययोरभेदात् उपादेयत्वं कथमपृथक्सिद्धत्वसाधकं स्यादिति वाच्यम्, मृद्घटयोरभेदेऽप्य-पृथक्सिद्धि संभवात् पृथक्सिद्धयभावमात्रस्य अभेदेऽप्यविरुद्धत्वात् । न च जगतो ब्रह्मभिन्नस्य कथमुपादेयत्वमिति वाच्यम् , भाव्यवस्थायोगि ह्युपादेयम्, पूर्वावस्थायोगि ह्युपादानमित्यभ्युपगम्यते, भाव्यवस्थावत्त्वं च जगतोऽप्यस्ति; तद्द्वारा ब्रह्मणो- प्यस्ति । अतो द्वयोरपि पूर्वावस्थावत्सूक्ष्मजगद्विशिष्टब्रह्मापेक्षयोपादेयत्वम् । ननु जगतोऽप्युक्तरीत्या पूर्वावस्थात्त्वात् उत्तराव-स्थायोगि ब्रह्म प्रत्यप्युपादानत्वप्रसङ्ग इति चेत्, तस्योपादानत्वे प्रमाणाभावात् । न च पूर्वावस्थायोगित्वादन्यस्योपादानत्वस्या-भावात् कथं नातिप्रसङ्ग इति वाच्यम् , तदतिरिक्तधर्मविशेषस्य तल्लक्षणत्वात् । उपादानमित्यभियुक्तव्यवहारविषयत्वमेवोपादा-नत्वमित्येवंरूपस्य लक्षणस्य संभवात् । नन्वस्मिन् पक्षे "सर्वं खल्विदं ब्रह्म' इति वाक्ये ब्रह्मशब्दस्य ब्रह्मापृथक्सिद्धे लक्षणाप्रसङ्गः । सर्वस्यापि जगतो ब्रह्मोपादेयत्वात् ब्रह्मान्तर्यामिकत्वाच्च ब्रह्म पृथक्सिद्धमित्यर्थस्याश्रयणीयत्वादिति चेत्, इष्टापत्तिरिति भावः ।

विशिष्टान्तभार्व एवैक्यमित्यर्थ इति । ततश्च तदात्मकत्वेनैक्यादिति भाष्ये तृतीयार्थो न विवक्षितः । तदात्मकत्वप्रयोज्यस्यै क्यान्तरस्याभावात्, तदात्मकत्वमेवैक्यमित्यर्थः इति भाष्याभिप्राय इति भावः । अत्र केचित्- यथा ज्ञानाकारस्वरूपतया सर्व-जीवानामैक्यम्, एवं चिदचिद्वस्तूनां

ब्रह्मणश्चैक्यमेकविशिष्टान्तर्गतत्वमित्यर्थः, "एकधैवानुद्रष्टव्यम्' इत्युत्तरत्र तथार्थविवरणादि- त्येव भाष्यार्थं वर्णयन्ति । नेह नानास्तीति प्रकरणे श्रूयते इति । कठवल्लयमपि "यदेवेह तदमुत्र यदमुत्र तदन्विह' इत्यैक्यविधि-

शेषत्वमेव, "नेह नानास्ति' इति वाक्यस्येति द्रष्टव्यम् । केषुचिद्वाक्येषु तस्य कण्ठोक्तत्वादिति । भाष्यकृता केषुचिद्वाक्येषु समाभ्यधिकनिबेधस्य कण्ठोक्तत्वात् भाष्ये केषुचिद्वाक्येषु छागपशुन्यायस्य कण्ठोक्तत्वादिऽयर्थः । अत्र भेदनिषेधकतयोदाहृत-वाक्यानां प्रकारिभेदनिषेधकत्वस्यैव प्रतिपिपादयिषितत्वात् तदुपपादकतया प्रकारभेदविधायकवाक्यमुदाहृत्य तेन कार्यभेदप्रति-पादकवाक्यस्य प्रदर्शनं कर्तुमुचितम्; न तु कार्यभेदविधायकवाक्यमुदाहृत्य तेन प्रकारभेदविधायकवाक्यप्रदर्शनमुचितमित्यपरि-

तोषादुदाहृतवाक्यस्यैवोभयविधभेदविधिपरत्वं दर्शयति - यद्वा छान्दोग्य इत्यादिना । इयं श्रुतिरिति । अत्र "इयम्' इति व्याख्येयं पदम् । स्वनिष्ठो द्रष्टेति । स्वनिष्ठत्वेन मन्यमानो द्रष्टा स्वनिष्ठत्वेन मन्यमानेनकरणेन स्वनिष्ठत्वेन मन्यमानं कर्म पश्यतीत्यर्थः । कर्तृकरणकर्मसु स्वनिष्ठत्वभ्रमो भवतीति पर्यवसितोऽर्थः । हेत्वन्तरमाह - अस्येत्युक्तेरिति । पुरुषविशेषं प्रत्यात्मत्वमिति वक्तु-मशक्यत्वात् साक्षात्काराभिप्राया एवः "अभूत्' इति शब्द भावः । स्वनिष्ठं किंचिदपि नास्तीत्यर्थ इति । कुत्राधि स्वनिष्ठत्वभ्रमो नास्तीत्यर्थः ।

अदितिः पाशानिति न्यायादिति । "अदितिः पाशान् प्रमुमोक्तु' इत्यत्र बहुवचनप्रतिपादितमपि बहुत्वं न विवक्षितम् । एवम् "अस्मिन्' (एतस्मिन्) इति विभक्तिविकारसूचितं पुनपुसकान्यतरत्वमपि न विवक्षितमित्यर्थः । तथाप्यस्वारस्यमवर्ज-नीयममिति । अत एव हि दशमे, "बार्हस्पत्यं ग्रहं गृह्णाति' इत्यत्र प्राकृतग्रहानुवादेन देवताविधाने तेषां बहुत्वादेकवचनमयुक्त- मिति उद्देश्यगतत्वेनाविवक्षायामप्यभिधानबाधोऽवर्जनीय इत्युक्तम् । किंच "प्रास्मा अग्निं भरते' इति मन्त्रस्य सारस्वत्यामेवेष्टयं

प्रातिपदिकार्थभूतलिङ्गविरोधादप्रवृत्तिरिति नवमे स्थापितत्वाच्चेति भावः । तथाप्यस्वारस्यमिति चेदिति । समभिव्याहृतपदाप्रति-पन्नत्वादिति भावः । अभयहेतुप्रतियोगित्वादिति । पूर्ववाक्येऽभयहेतुतया यदुपन्यस्तं तद्विरुद्धस्यैव भयहेतुत्वेन प्रदर्शनौचित्या- दिति भावः । पूर्वसिद्धैक्येति । "विद्लृ लाभे' इति धातोरेव शविकरणपठितादस्य रूपस्य संभवात् । "विद ज्ञाने' इत्यस्यावग-त्यर्थस्य लुप्तवकरणपठिततया परस्मैपदितया चास्य रूपस्यासंभवत् । न च लाभार्थत्वेऽप्यैक्यमिदानीं लभत इति वक्तुं शक्यमिति शङ्कयम्, ऐक्यस्य पूर्वसिद्धत्वादिति भावः । प्रतियोगित्वाबधित्वेति । साहित्यप्रतियोगित्वविवक्षायां "घटेन सह भेदः' इति तृतीया; अवधित्वविवक्षायां "घटाद्भेद' इति पञ्जमी संबबन्धविवक्षायां "घटस्य भेदः' इति षष्ठीति भावः ।

(पुराणघट्टः)

अथप्रतिपादनार्थमिति । पूर्वेणान्वयः ।

"यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।

असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ।।'

इत्ययं श्लोको दशमेऽध्याये । "मत्स्थानि सवर्भूतानि' इत्यारभ्य सार्धश्लोको नवमेऽध्याये । "अहं कृत्स्नस्य जगतः' इति सार्ध- श्लोकः सप्तमेऽध्याये ।

"अथवा बहुनोक्तेन किं ज्ञानेन तवार्जुन ।

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।।'

इति श्लोको दशमे ।

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।।

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।

अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।।

यो मामेवसंमूढो जानाति पुरुषोत्तमम् ।

स सर्वविद्भजति मां सवर्भावेन भारत ।।

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।

एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ।।'

इति पञ्चदशेध्याये । अकर्मवश्य इति । इदमकर्मवश्यत्वं परमत्वं चाक्षरशब्दनिर्दिष्टे मुक्तशरीरके भगवति मुक्तद्वारा अन्वेति, "महानुदारः' इत्यादौ महत्वस्योदार्यद्वारान्वयदर्शनात् । न च पारम्यस्वाराज्ययोः साक्षाद्भगवत्यन्वयसंभवे सद्वारकान्वयो न युक्त इति वाच्यम्, ब्रह्मत्वादीनां, सद्वारकान्वयवत् पारम्यस्वाराज्ययोरपि प्रायपाठात् सद्वारकान्वयस्यैव वक्तव्ययता संनिहिताक्षरशब्द-निर्दिष्टमुक्तस्यैव द्वारत्वौचित्यादिति भावः । यद्वा अस्मिन् प्रकरणे ब्रह्मादिशब्दा न परमात्मपर्यन्ताः, अपितु भगवद्वाचितच्छब्द एव लक्षणयानच्छरीरपरः । ततश्च परमः स्वाराडक्षरोमुक्तः । स एव तच्छरीरभूत एवेत्यर्थः । पत्यन्तरराहित्यविवक्षायामिति । भगवतो विश्वपतित्वे कथितो तस्यापि पन्यन्तरमाशङ्कय, "आत्मेश्वरम्' इत्यनेन पत्यन्तरं निषिध्यते । अतः पतीश्वरशब्दयोः तुल्यार्थत्व- मिति भावः । समासमादुथ्वं न संशयितव्य (समासासाधुत्वमशङ्कनीय)मिति । उतमश्चासौ पुरुषश्चेति सामानाधिकरण्यवि-वक्षायाम् "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासे उत्तमपुरुष इति रूपप्रसङ्गात् । "यतश्च निर्धारणम्' "पञ्चमी विभक्ते' इति षष्ठीपञ्चमीसप्तमीपक्षेषु "पञ्चमी भयेन' इत्यादौ उत्तमशब्दाभावात् पञ्चमीसमासाप्रसङ्गात्, षष्ठीसमासस्य "न निर्धारणे' इति निषेधात्, सप्तमीसमासस्य च लक्षणाभावात् साधुत्वसंशय इति भावः । आप्ततमत्वाच्चेति । "सप्तमी' इति योगविभागात् समासो भविष्यतीति भावः । सामानाधिकरण्यविवक्षायामेवेति । "सन्महत्परमोत्तम्' इति सूत्रेण समासे हि उत्तमशब्दस्य समासशास्त्रे प्रथमानिर्दिष्टत्वात् "प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्युपसर्जनसंज्ञायाम् "उपसर्जनं पूर्वम्' इत्युत्तमशब्दस्य पूर्वनिपातः स्यात् । "पञ्चमी' इति वा "सप्तमी' इति वा योगविभागेन समासाश्रयणे पञ्चम्यन्तस्य सप्तम्यन्तस्य वा पुरुषपदस्यैव प्रथमानिर्दिष्टत्वेनो-पसर्जनत्वात् पूर्वनिपातावश्यंभावादिति भावः ।

"स सर्वभूतप्रकृतिम्' इत्यारभ्य पञ्चश्लोकी षष्ठांशपञ्चमाध्यायसमाप्तौ पठिता । "शुद्धे महाविभूत्याख्ये' इत्यारभ्य सप्त- श्लोकी तस्मिन्नैवाध्याये "स सर्वभूतप्रकृतिम्' इत्यतः प्राक् पठिता । "समस्ताः शक्तयः' इत्यारभ्य त्रिश्लोकी षष्ठांशे सतमाध्याये केशिध्वजं प्रति खाण्डिक्यवचनम् । "एवंप्रकारम्' इति श्लोकः प्रथमांशसमाप्तौ । "परः पराणाम्' इत्यारभ्य पञ्चश्लोकी पुराणादौ पठ्यते । "प्रकृतिर्या मयाख्याता' इति श्लोकद्वयं षष्ठांशे चतुर्थाध्याये प्रतिसंचरणप्रकरणे । "द्वे रूपे' इत्यारभ्य सार्धश्लोकद्वयं प्रथ-मांशसमाप्तौ । "विष्णुशक्तिः परा प्रोक्ता' इत्यारभ्य

श्लोकत्रयं षष्ठांशे सप्तमाध्याये खाण्डिक्यवाक्यम् । "प्रधानं च पुमांश्चैव' इत्या-रभ्य "पुरुषात्मनः' इत्यन्तं द्वितीयांशे सप्तमाध्याये । "तदेतदक्षयं नित्यम्' इत्येतत् प्रथमांशसमाप्तौ ।

सर्वावरणपदे कर्मधारयमभिप्रेत्य व्याचष्टे - तत्सर्वमतीतं येनेति । आवरणशब्दस्य विषयसापेक्षत्वात् षष्ठीसमाप्ततया व्याचष्टे - यद्वा सर्वविषयज्ञानावरणमिति । ज्ञानमात्रे संकोचो न युक्त इति व्याचष्टे - ज्ञानशक्तयादिति । समस्तकल्याणत्वं गुणः स्वभावो यस्येति । अत्र बहुव्रीहिगर्भबहुव्रीहिमनाश्रित्य कल्याणत्वरूपो गुणः कल्याणगुणः, स आत्मा स्वभावो यस्येत्या-श्रयणेऽप्ययमर्थः सिध्यत्येवेति वदन्ति । अभिप्रायविशेषेणेति । गुणेभ्योऽपि दिव्यविग्रहस्यात्यन्ताभिमतत्वाभिप्रायेणेत्यर्थः । अभिमत्यर्हत्वमिति । अनुरूपत्वमित्यर्थः । अहार्थे निष्ठेति । "कृत्यल्युटो बहुलम्' इति बहुलग्रहणादिति भावः । अभिमत-स्याननुरूपत्वमिति । अत्राभिमतशब्दः इच्छागृहीतार्थकः, अनुरूपत्वमभिमतशब्दार्थ इति प्रागेवोक्तत्वात् । केचितु इच्छागृही-तपदस्यानुरूपत्वमर्थः, तथात्व एव ग्रन्थस्वारस्यमिति वर्णयन्ति । तत्तु न सम्यगिव, इच्छागृहीतपदस्यानुरूपत्वार्थकत्वाश्रयणा-पेक्षया अभिमत्यर्हशब्दस्यानुरूपत्वार्थाश्रयणस्य युक्तत्वात् । नित्येच्छाया इति । ततश्च नित्यविग्रहस्यापि नित्येच्छागृहीतत्वं सिद्धमिति भावः । ननु"ज्ञानबलैश्वर्य' इति निर्देष्टव्ये "तेजोबलैश्वर्य' इति निर्देशः कथमित्यत आह-नात्र क्रमविवक्षेति । सवर्-गुणसाधारणाविति । ननु "महाबुद्धिर्महावीर्यः' इत्यादौ प्रत्येकं महत्त्वेन विशेषणादस्तु सर्वत्र महत्त्वम्; तथापि नानेन वाक्येन सर्वगुणसाधारण्यं सिध्यति, महच्छब्दात् प्राङ् निर्दिष्टेषु तेजोबलैश्वर्येषु महत्त्वान्वयोपायासंभवादिति चेत् - न; न्यायसाम्येन सिद्धिरस्तीत्यत्र तात्पर्यात् । अविद्याऽस्मितेति । अस्मिता=अस्मित्वम् अहन्त्वम् । अनात्मन्यहन्त्वबुद्धिरिति यावत् ।

श्लोकोपात्तयोः रूपस्वरूपशब्दयोरर्थमाह - रूपं शरीरं, स्वरूपं स्वासाधारणमिति । सर्वं विन्दतीति वा सर्ववेत्तेति । अत्र "विदिर् लाभे' इत्यस्य सेट्त्वेऽपि इडभावश्छान्दस इति द्रष्टव्यम् । नित्यमुक्तविषयानेकरूपज्ञानाद्व्यावृत्तिरिति । अनेक-नित्यमुक्तविषयकज्ञानाद्व्यावृत्तिरित्यर्थः । यद्वा अज्ञानं ज्ञानाभाव इति । न चेतरज्ज्ञानं कथं ज्ञानाभावः स्यादिति वाच्यम्, सिद्धान्ते भावस्या भावरूपत्वे विरोधाभावात् । ज्ञानविशेषणत्वे वाक्यद्वयमिति । ब्रह्मविशेषणत्वपक्षे येन ज्ञानेनास्तदोष-त्वादिविशिष्टं वस्तु संज्ञायते संदृश्यते गाम्यते वा तदेव ज्ञानम्, अन्यत्त्वज्ञानमित्येकवाक्यत्वमेव । ज्ञानविशेषणत्वपक्षे तु येन ज्ञानेन परमात्मा ज्ञायते संदृश्यते गम्यते वा, तज्ज्ञानमस्तदोषत्वादिविशिष्टम्; तदेव ज्ञानमिति वाक्यद्वयं स्यात्, इतरथा तच्छब्दद्वयवैयर्थ्यप्रसङ्गात् । न च "तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते' इतिवत् स्यादिति वाच्यम् - तत्राप्यगत्या वाक्यभेद-स्याभ्युपगन्तव्यत्वादिति भावः । अशब्दगोचरस्येत्यादिके पूवश्लोके इति ।

"अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विज ।

पूजायां भगवच्छब्दः क्रियते ह्युपचारतः ।।'

इति श्लोक इत्यर्थः । औपचारिक इत्युक्तमिति । ननु

"श्रुतिवाक्योदितं ब्रह्म तद्विष्णोः परमं पदम् ।

तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ।।

वाचको भगवच्छब्दस्तस्याद्यस्याक्षयात्मनः ।।'

इति तत्पूर्वश्लोके परमात्मन एव प्रस्तुततया, "अशब्दगोचरस्यापि' इत्यत्र श्लोके तच्छब्दः कथं मुक्तात्मानं परामृशेत् इति चेत्; सत्यम्,

"तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।

शब्दोऽयं नोपचारेण ह्यन्यत्र ह्युपचारतः ।।'

इति परमात्मनि भगवच्छब्दस्यौपचारिकत्वासंभवात् पूर्वोत्तरवाक्ययोः परमात्मनो भगवच्छब्दमुख्यार्थत्वप्रतिपादनविरोधाच्च तच्छब्दस्याप्रस्तुतमुक्तपरामर्शित्वं वक्तव्यमिति भावः । प्रत्ययविशेषयुक्तस्य भरतेः स्वामिनि रूढत्वमिति । तृचूप्रत्ययविशेष-युक्तस्येत्यर्थः । भरतेः स्वामिनि रूढत्वमित्यत्र भरतेरित्येतदुपलक्षणम्; बिभर्तेर्वेत्यपि द्रष्टव्यम् । धातुमात्रस्येति । यद्यपि डप्रत्ययययुक्तस्य च इत्यस्यैव स्वामिवाचित्वम्, न तु प्रत्ययविनिर्मुक्तस्य - तथापि तृच्प्रत्ययरहितस्यापीत्यत्र तात्पर्यम् । अथवा डप्रत्ययस्य साधुत्वमात्रार्थत्वमेव । अत एव "भकारोऽथर्द्वयान्वितः' "गकारार्थः' इत्युक्तमिति द्रष्टव्यम् । प्रवृत्तिनिमित्ते निष्कृष्यो-च्येते इति । अयमर्थः - अत्र भशब्दस्य संभर्तृत्वभर्तृत्वे द्वे अपि प्रवृत्तिनिमित्ततापर्याप्त्यधिकरणे, अतः अर्थद्वयान्वित इत्युक्तम् । गकारे तु नेतृत्वादीनां न प्रत्येकं पर्याप्त्यधिकरणत्वम्, अपितु मिलितानामेव । यथा कृतिसाध्यत्वेष्टसाधनत्वबलवदनिष्टाजन-कत्वानां मिलितानां विध्यर्थत्वम् । अत एव "गकारार्थः' इत्येकवचनोक्तिरिति । केचित्तु संभर्तृत्वरूपप्रवृत्तिनिमित्ते आश्रयान्निष्कृष्य इतिकरणेनोच्यते । ते च द्वे इति कृत्वा अर्थद्वयान्वितः इत्युक्तम् । गकारस्थले इतिकरणाभावेन प्रवृत्तिनिमित्तस्याश्रयान्निष्कर्षा-भावात् प्रवृत्तिनिमित्ताश्रयस्यैव ग्रहणे तस्यैकत्वात् "गकारार्थः' इत्युक्तिरिति भाव इत्याहुः । धातुलीनत्वादिति । यदि सोपसर्गा-णामेव क्रियावाचित्वम्, तर्हि सोपसर्गाणां भ्वादिषु पाठभावात् धातुसंज्ञानभावप्रसङ्गात् क्वचिदुपसर्गमन्तरेणापि तदर्थावगमाच्च धातुरेवानेकार्थाभिधायी; प्रादयस्तु प्रकरणादिवद्विशेषस्मृतिहेतवो द्योतकाः । द्योतकापेक्षा च शब्दशक्तिस्वाभाव्यात् क्वचिदेव । यथा-हरिशब्दो भेकादावेव प्रकरणादिसापेक्ष इति भावः । उद्गमयिता गमयिता संगमयितेति । इदं च सृष्टिस्थितिलयक्रमेणोपात्तम्, न तु "नेता' इत्यादिश्लोकक्रमेणेति द्रष्टव्यम् । नेतेत्यनेन गमयितृशब्दार्थ उक्त इति । रक्षकत्वमुक्तमित्यर्थः । "अधिभूर्नायको नेता' इत्यादो रक्षकत्वस्यैव प्रतीतेरिति भावः । गमयिता इत्यस्य समित्युपसर्गमन्तरेणैव संहारर्थप्रकाशकत्वप्रकारं दर्शयति-यद्वा कार-णभूतमिति । केचित्तु-स्त्रष्टेत्यस्य स्त्रष्टृत्वमर्थः । गमयितेत्यस्य गमयितृत्वरूपं रक्षकत्वमर्थः । न तयोर्विवादः । नेतेत्यस्य तु द्विकर्म-कत्वात् कारणभूतं स्वात्मानं कार्यवर्गं नेतेति संहर्तृत्वमुच्यते । यद्वा एतस्यापि नेतृशब्दार्थप्रदर्शकत्वमेवेति वदन्ति । उत्पतिं प्रलयं चैवेत्यादि श्लोकस्येति ।

"उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।

वेत्ति विद्यामविद्यां च सा वाच्यो भगवानिति ।।'

इति श्लोकस्येत्यर्थः ।

कथं चिन्तयितु शक्यत्वमित्यत्राहेति । नन्वस्याः "समस्तशक्ति रूपाणि' इति श्लोकेन कथं परिहार इति चेत्, अत्र केचित्-देवादिसजातीयरामकृष्णादिविग्रहसजातीयतया सर्वशक्तयाश्रयपरविग्रहस्य चिन्त्यत्वं संभवतीति श्लोकाभिप्राय इति । केचित्तु-रामकृष्णाद्यवतारस्यैव योगयुकचिन्त्यत्वम्, योगयुक्तस्य परविग्रहश्चिन्त्योऽस्त्विति मन्यन्ते । केचित्तु-परविग्रहस्य समस्तशक्तित्वसर्वविग्रहकारणत्वप्रतिपादनप्रवृत्तत्वेनैतच्छङ्कानिवर्तकत्वाभावादियगवतारिका चिन्तनीयेति मन्यन्ते । लीलायाः पश्चाद्भावित्वेन प्रयोजनत्वे (नत्वात्) कथं हेतुत्वमित्याशङ्कयाह-तदभिसन्धिर्हेतुरिति । लीलाशब्दस्तदभिसन्धिलक्षक इति भावः । किं प्रयोजनमित्यत्राहेति । लीलामात्रस्य प्रयोजनत्वे असमञ्जन्यायप्रसङ्गात् लीलामात्रं न प्रयोजनं भवितुमर्हतीति भावः । परमात्मन्यतिदिशन्तं श्लोकमिति । "ननु देवदत्तो गुणशून्यः, तद्वदेव यज्ञदत्तोऽपि' इत्युक्ते यज्ञदत्ते मानान्तरावगतस्यान्नदातृत्वा-दिगुणविशेषस्यापि देवदत्ते सिद्धयदर्शनात् परमात्मनि मानान्तरसिद्धस्य धर्मान्तरस्य मुक्तात्मन्यापादने किं प्रमाणम्? तथा हि सति वैकृतवैशेषिकधर्माणामपि प्रकृतौ प्राप्तिप्रसङ्गात् । किंच "तद्भावभावमापन्नः' इत्यदीनां मुक्तात्मनि कण्ठरवेण परमात्म-साधर्म्यप्रतिपादकानां प्राकरणिकानामेव वचनानामुपन्यासंभवे परमात्मसाम्याक्षेपकस्य परमात्मनि

मुक्तधर्मातिदेशकवचनस्यो-पन्यासः शिरोवेष्टनेन नासिकाग्रहणन्यायमनुसरतीति चेत्-न; असति बाधकेऽस्यापि न्याय्यत्वात् "देवदत्त इव यज्ञदत्तः पुत्रवान्' इत्युक्त्वा, "यज्ञदत्तस्य चत्वारः पुत्राः' इत्युक्ते देवदत्तस्यापि तावन्तः पुत्रा इति प्रतीतेरनुभवसिद्धत्वादिति भावः । केचित्तु-भाष्ये "एवंप्रकारम्' इति श्लोकोपन्यासः समस्तहेयराहित्यप्रमाणविवक्षयैव कृतः । तथोदाहृतवचनार्थानुक्रमणभाष्ये, "परं ब्रह्म स्वभावतो निरस्तनिखिलदोषगन्धम्' इत्यादि वक्ष्यति । न तु "प्रत्यस्तमितभेदम्' इत्यस्यार्थकथनार्थम् । "यो मामजमनादिं च' इत्यारभ्य, "परमार्थिकमेवेति ज्ञायते' इत्यन्तस्य भाष्यसंदर्भस्य सामान्यतः स्मृतिपुराणप्रतिपाद्यार्थविशेषनिर्णयमात्रार्थप्रवृत्तत्वेन "प्रत्यस्त-मितभेदम्' इति श्लोकविशेषार्थनिर्णयमात्रप्रवृत्तत्वाभावात्, विशिष्य तेषां वचनानामन्यथाकरणस्य पूर्वोत्तरपर्यालोचनयोत्तरत्र करिष्यमाणत्वादिति वदन्ति । सविशेषपरत्वं दर्शितं भवतीति । नित्यत्वव्यापकत्वादीनां प्रतिपादनादस्य श्लोकस्य सविशेष-

परत्वमिति भावः । उपसंहारस्य बुद्धिस्थत्वादिति । "समस्ताः शक्तयश्चैताः' इत्यादीनां योगोपसंहारगतत्वेनोपसंहारसाम्येन तस्यैव बुद्धिस्थत्वादित्यर्थः । निर्व्यापारमनाख्येयमित्यादिनेति ।

"निर्व्यापारमनाख्येयं व्याप्तिमात्रमनूपमम् ।
आत्मसंबोधविषयं सत्तामात्रमलक्षणम् ।।
प्रशन्तमनसं शुद्धं दुर्विभाव्यमवस्थितम् ।
विष्णोर्ज्ञानमयस्योक्तं तज्ज्ञानं परमं पदम् ।।
तत्र ज्ञाननिरोधेन योगिनो यान्ति ये लयम् ।
संसारकर्षणादेते यान्ति निबीजतां द्विज ।।
एवंप्रकारममलं नित्यं व्यापकमक्षयम् ।
समस्तहेयरहितं विष्ण्वाख्यं परमं पदम् ।।'

इति श्लोकक्रमः । एवं भगवति मुक्तगुणातिदेशः कृत इति । ननु "निर्व्यापारम्' इत्यादिकमपि परमात्मस्वरूपपरमेवास्तु । "एवं-प्रकारम्' इत्यपि नातिदेशकम् । अपितूक्तोपसंहाररूपमेवास्तु । न च पूर्वत्र"विष्णोः परमं पदम्' इति व्यतिरेकप्रतीतेः "एवंप्रकारम्' इति श्लोके, "विष्ण्वाख्यं परमं पदम्' इति प्रतिपादनात् भेदोऽवश्यं वक्तव्य इति वाच्यम्-"विष्णोः परमं पदम्' इत्यत्र पदशब्दस्य स्वरूपपरत्वेन घटस्य स्वरूपमितिवदुपपत्तेः । अन्यथा -

"श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ।
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ।।',

"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।'

इत्यादावगतेः । न च पूर्वश्लोकस्यापि ब्रह्मविषयत्वे, "एवंप्रकारममलं नित्यं व्यापकमक्षयम्' इति व्यापकत्वादिकीर्तनवैयर्थ्यम्, व्यापकत्वादीनां "व्याप्तिमात्रमनूपमम्' इत्यादिनोक्तेरिति वाच्यम्-तस्योभाभ्यां समाधेयत्वात् । अत एव "प्रत्यस्तमितभेदम्' इत्य-स्यापि न मुक्तपरत्वम् । तत्र हि प्रकरणे वेदान्तवेद्यस्यादित्यवर्णस्य मूर्तस्य शुभाश्रयत्वमुच्यते । तत्र च मूर्तस्यैव शुभाश्रयत्वं वदता

दिव्यात्मस्वरूपस्यालम्बनत्वं हि प्रथमतः प्रतिक्षेप्तव्यम्, न तु जीवस्वरूपस्य । परमात्मनो ध्येयत्वे सिद्धे परमात्मनः परिशुद्धस्वरूपे ध्येयत्वचिन्ताऽवतरति । ततश्च तन्निराकरणमन्तरेण
शुद्धजीवस्वरूपध्येयत्वनिराकरणेऽपेक्षितपरित्यागोऽनपेक्षितस्वीकारश्च स्या-दिति चेत्-न अस्याक्षेपस्य अद्वैतपर्यवसितत्वेन पार्थक्येन निरसनीयत्वासंभवात् । अद्वैतविषये च पूर्वाचार्यैरेव पराकृतत्वेन इदानीं निरसनीयांशाभावादुपरम्यते । पाठक्रमाधीनोपक्रमत्वं हि मुख्यं, न त्वर्थक्रमाधीनमित्यपरितोषादाह-यद्वा
प्रथमांशोपक्रम इति । महावाक्यस्वारस्यविरोध इति । "प्राणस्तथानुगमात्' इत्यत्र महावाक्यविरुद्धप्रक्रमस्य दुबर्लत्वप्रतिपादनादिति भावः । तच्छेष-भूतस्तनुगुणार्थो वर्णनीय इतीति । मुख्याया अपि दीक्षणीयायाः
प्रधानसोमयागविरोधात् न पर्वकालानुग्रह इति "अङ्गगुण- विरोधे च तादर्थ्यात्' इत्यत्र निर्णीतत्वादिति भावः । उपक्रमोपक्रमभूतेति । विधिशेषभूतस्याप्यर्थवादस्य प्रक्रमस्थत्वेन प्राबल्य-मित्युपक्रमाधिकरणे निर्णीतत्वादिति भावः । प्रश्नोत्तरवरलाभेति ।

"सोऽहमिछामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत् ।

बभूव भूयश्च यथा महाभाग भविष्यति ।।',

"देवतापारमार्थ्यं च यथावद्वेत्स्यते भवान् ।

प्रवृते च निवृत्ते च कर्मण्यस्त्वमला मतिः ।।'

इत्यादिना जगत्सृष्टितत्क्रमातत्प्रकारादिप्रश्नतदुत्तरग्रन्थनिर्माणानुगुणवरदानाद्यसंगतिप्रसङ्गात् । निर्विशेषविषयत्वे किमधिष्ठान- मिति प्रश्नः (प्रश्नस्य)निर्विशेषमधिष्ठानमित्येवोत्तरं स्यादिति भावः । तृतीयातत्पुरुषाश्रयणे आत्मशब्दस्य भावप्रधानत्वाश्रयणं क्लिष्टम् । संस्थितशब्दस्य विशिष्टत्वार्थाश्रयणं च क्लिष्टम् । सर्ववस्तुरूपविशेषणप्रतिपत्तिगौरवं चेत्यस्वरसादाह - यद्वा आत्मत्वेन

संस्थिततयेति । अत्रात्मसंस्थित इत्यस्य "आत्मनि संस्थितः' इति सप्तमीतत्पुरुषः । तदर्थोपपादकः "आत्मत्वेन संस्थिततया सर्वशरीरकत्वात्' इत्यंश इति द्रष्यव्यम् । सर्वपर्यवसानभूमिः स्वनिष्ठ इति छेदः । इति वस्त्वपरिच्छेद उक्त इति ग्रन्थ उक्त-पक्षद्वयशेषः । द्विविधो हि वस्त्वपरिच्छेदः, सर्ववस्तुसामानाधिकरण्यार्हत्वं, गुणैः समाभ्यधिकराहित्यं चेत्यभिप्रेत्याह - सर्व-वस्तुसामानाधिकरण्यार्हत्वमित्यादिना समत्वाभ्यधिकत्वासंभावदित्यन्तेन ।
देशकालापरिच्छेदयोः, "परः पराणां, परमा- त्मा' इत्येताभ्यां सिद्धत्वात् नित्यत्वविभुत्वव्यतिरिक्तगुणैरित्युक्तम् । पञ्चकल्पनान्वितत्वमिति । संज्ञाजातिगुणक्रियावयव-लक्षणपञ्चकल्पनान्वितत्वमित्यर्थः । शब्दवाच्यास्त एव विशेषणमिति । रूपवर्णादेनिर्र्देशो रूपवर्णादिनिर्देशः । षष्ठीतत्पुरुषः । ततो निर्देशविषयो विशेषणं निर्देशविशेषणमिति मध्यमपदलोपिसमास इति भावः । अस्मिन् पक्षे निर्देशविशेषणपदं व्यथर्म्, तेन विनैव तदर्थप्रतीतेरित्यस्वरसात् द्वन्द्वमभिप्रेत्याह - यद्वा रूपवर्णादितद्वाचिशब्दरूपैरिति । अनित्येषु रूपादिषु रूपादिमत्त्वाभा- वात् नानित्यत्वव्यापकं रूपादिमत्त्वमित्यस्वरसादाह-यद्वा अनित्यत्वव्याप्येति। जायते
अस्तीत्यवस्थाद्वयमिति । अत्र केचित्-इतराणि हि वस्तूनि, "अस्ति जायते' इत्यादिभिः षड्भिः शब्दैर्व्यवह्रियन्ते । ब्रह्म तु "अस्ति' इति शब्देनैव सर्वदा व्यवह्रियते । न तु तद्वयतिरिक्तैः
पञ्चभिरित्युक्तेरुचितत्वादवस्थाद्वयापरिग्रहेऽपि न दोष इति वदन्ति । औणादिकप्रत्ययस्येति । "अणादयो बहुलम्' इति बहुलग्रहणादिति भावः । निरचिनोदनन्तमिति । "सत्यं ज्ञानमनन्तं ब्रह्म' इत्यत्रानन्तमिति श्रुतिरित्यर्थः ।

परमात्मशब्दस्य क्वचिज्जीवेऽपि प्रयोगदर्शनादिति । "अभेदव्यापिनो वायोस्तथासौ परमात्मनः' इत्यादौ परमात्म-शब्दस्य क्वचिज्जीवेऽपि प्रयोगदर्शनात् । "प्रकृतिर्या मयाख्याता' इति श्लोकानुपन्यासेनैव"परमात्मा च सर्वेषामाधारः परमेश्वरः' इति श्लोकोक्तौ जीवस्यापि परिग्रहप्रसङ्गात् लयाधारस्य साक्षात्परमात्मन एव

परमेश्वरत्वविष्णुनामत्वादिकं प्रतिपाद-नीयमित्यभिप्रेत्य लयाधारत्वं "प्रकृतिर्या मयाख्याता' इति पूर्वश्लोके वर्णितम् । ततश्च प्रकृतिपुरुषौ यस्मिन् परमात्मनि लीयेते, स परमात्मा सर्वाधारः परमेश्वरो विष्णुनामा वेदान्तप्रतिपाद्य इति श्लोकद्वयैकवाक्यतयेति भावः । एतेन "लीयेते' इत्यनेन कथं जीव-व्यावृत्तिरिति शङ्का निरस्ता । काठिन्यवान् यो विभर्तीतिवदिति । "काठिन्यवान् यो बिभर्ति तस्मै भूम्यात्मने नमः' इत्यत्र परमात्मस्वरूपे भूमिद्वारा काठिन्यवदित्यर्थः । अर्हार्थे क्त इति । बहुलग्रहणादिति भावः । एतदस्वरसादेवाह-यद्वा बद्धस्य स्व-रूपेणेति । बद्धजातीयस्येत्यर्थः । असंकीर्णस्वभावत्वमुक्तमिति । परस्परासंकीर्णस्वभावाग्निज्योत्स्नादृष्टान्तबलेन दार्ष्टान्तिकेऽपि तथा सिध्यतीति भावः । चिदचिदात्मकं जगदुच्यत इति । "गच्छति = नश्यति' इति व्युत्पत्त्या जगच्छब्दस्य विनाशिमात्र-परत्वेन मुक्तपरत्वासंभवेऽपि तुल्यन्यायतया मुक्तस्यापि ग्रहणं सिध्यतीति भावः । ब्रह्मशब्दानामेकप्रकारणस्थानामिति । "द्वे रूपे ब्रह्मणस्तस्य', "परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्' इत्यादीनां ब्रह्मपरत्वात् "अक्षरं तत्परं ब्रह्म' इति परशब्दसामाना-धिकृतब्रह्मशब्दस्य जीवेऽत्यन्तास्वारस्याच्चेति भावः । ननु क्षराक्षरशब्दाभ्यां कार्यकारणावस्थब्रह्मपरामर्शे कार्यकारणभावाना-पन्नपरस्परभिन्नाग्निज्योत्स्नादृष्टान्तासंप्रतिपत्तिरित्याशङ्कयाह-जगतो ज्योत्स्नास्थानीयत्वं चेति । स चेति । व्यतिरेकनिर्देशस्वा-रस्यभङ्ग इत्यर्थः । ननु रूपशब्दः स्वरूपपरोऽस्तु; ब्रह्मणो द्वे रूपे मूर्तामूर्ते इत्येवं किं न स्यात्? ततश्च न भावप्रधानत्वं विवक्ष- णीयम्, नापि षष्ठयस्वारस्यमित्याशङ्कयाह - भावप्रधानत्वाविवक्षायामिति । स्वरूपरूपगुणविभूत्यादिषु स्वरूपरूपशब्दयो-भैदेनोपात्तयोः स्वरूपशब्दास्वारस्यप्रसङ्गेन रूपशब्देन स्वरूपपरिग्रहासंभवात् भावप्रधानत्वमवश्यं विवक्षणीयम् । अतो मूर्तामूर्त-शब्दास्वारस्यमिति भावः । यद्युच्येत ब्रह्मणो द्वे रूपे इति । ब्रह्मणो द्वे रूपे सति प्रतिज्ञाय ब्रह्म मूर्तं चामूर्तं चेति कथिते मूर्तत्वा-मूर्तत्वे एव रूपे फलिष्यत इति भावः । धर्मिपर्यन्तक्षराक्षरेति । क्षराक्षरस्वरूपे ते मूर्तामूर्ते इति सामानाधिकरण्यं न स्यादित्यर्थः । अवस्थावद्वाचिजगच्छब्देति । "अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत्' इत्यत्रावस्थावद्वाचिब्रह्मजगच्छब्दयोः क्षराक्षरशब्द-सामानाधिकरण्यायोगाच्चेत्यर्थः । शक्तिशब्दस्य कार्यवाचित्वायोगाच्चेति कार्यावस्थब्रह्मवाचित्वायोगाच्चेत्यर्थः । शक्तिशब्दस्य कार्यवाचित्वाभावेऽप्युपचारेण कार्यपरत्वमस्त्वित्यत आह-उपचारतोऽपीति । अपृथक्सिद्धकार्योपयोग्यद्रव्यविशेषः शक्तिशब्दस्य मुख्यार्थः । औपचारिकप्रयोगे तु कार्योपयोगिविशेषणत्वमात्रं निमित्तमित्यर्थः । केचित्तु-अत्र विशेषणपदमपृथक्सिद्धविशेषण- परम् । वाशब्दश्चाध्याहर्तव्यः । ततश्च कार्योपयोगि वा अपृथक्सिद्धविशेषणं वा शक्तिशब्देन व्यपदेशमर्हतीति व्याचक्षते । मुख्य-त्वमस्मन्मत इति । मुख्यकल्पत्वमित्यर्थः । अत एवोक्तं वेदान्तचार्यैर्न्यायसिद्धाञ्जने शक्तिनिरूपणे - "क्षेत्रज्ञाविद्यानां जगतश्च परब्रह्मशक्तित्वव्यपदेशोऽपि गौण्या लक्षणया वा' इति भावनात्रित्रयान्वयकथनादिति ।

"ब्रह्माख्या कर्मसंज्ञा च तथा चैवोभयात्मिका ।

सनन्दनादयो ब्रह्मन् ब्रह्मभावनया युताः ।।

कर्मभावनया चान्ये देवाद्याः स्थावरावराः ।

हिरण्यगर्भादिषु च ब्रह्मकर्मात्मिका द्विधा ।।'

इत्युक्तप्रकारेण कर्मभावनाब्रह्मभावनोभयभावनारूपभावनात्रित्रयम् । भावना वासना संस्कार इति (यावदिति) द्रष्टव्यम् । ब्रह्म-शब्दार्थवैरूप्यमिति । "तपसा चीयते ब्रह्म' इति मुण्डके, "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते' इत्यत्र ब्रह्मशब्दः प्रधाने प्रयुक्तः । तत्रैव प्रकरणे "तपसा चीयते ब्रह्म' इत्यत्र ब्रह्मशब्दः परमात्मनि प्रयुक्तः । इदं च, "अदृश्यत्वादिगुणको धर्मोक्तेः', "स्याच्चैकस्य ब्रह्मशब्दवत्' इत्यादौ स्पष्टम्

। सर्वशरीरस्थत्वस्यैकस्मिन् जीवेऽसंभावात् जीव-मात्रपरत्वे जीवानां बहुत्वात् बहुवचनं प्राप्नोतीत्याशङ्कयाह-जातावेकवचनमिति । यथा "मनुष्यः सर्वदेशगः' इत्यादाविति द्रष्ट- व्यम् । तत्तारतम्यं चेति ।

"अप्राणिमत्सु स्वल्पा सा स्थावरेषु ततोऽधिका ।

सरीसृपेषु तेभ्योऽन्याप्यधिका च पतत्रिषु ।।

पतत्रिभ्यो मृगास्तेभ्यस्तच्छकत्या पशवोऽधिकाः ।

पशुभ्यो मनुजाश्चापि शकत्या पुंसः प्रभान्विताः ।।

तेभ्योऽपि नागगन्धर्वयक्षाद्या देवता नृप ।

शक्रः समस्तदेवेभ्यस्ततश्चापि प्रजापतिः ।।

हिरण्यगर्भश्च ततः पुंसः शकत्युपलक्षितः ।।'

इत्यादिनेत्यर्थः । तद्वयावृत्त्यर्थमिति । जातित्वनिबन्धनरूपत्वव्यावृत्त्यर्थमित्यर्थः । ननु "विष्णुशकत्या' इत्यत्र विष्णुरूपशकत्ये- त्यर्थः किं न स्यादित्याशङ्कयाह-अन्यथा शक्तिः सापीति । अत्रशब्दाथर्माह - कारणादीति । जगस्य कणिका इति । जलस्य कारणत्वं कणिकानां कार्यत्वमिति भावः । प्रथमव्याख्यानुसारेण दृष्टान्तं व्याख्याय द्वितीयव्याख्यानुसारेण व्याचष्टे - संयोग-कत्वववियोजकत्वयोर्वेति । अस्मिन् पक्षे सक्तमसक्तं च विभतिर्=संयोज्य च वियोज्य च विभर्तीत्यर्थः । प्रधानपुरुषयोरात्मन इति । "प्रधानपुरुषात्मन' इति षष्ठयन्तमेतत् विष्णोरित्यस्य विशेषणं द्रष्टव्यम् । अध्याहारदोषादाह-यद्वा प्रधानशब्दानन्तर इति । "तदेव सर्वमेवैत'दित्यत्र तच्छब्दसामानाधिकरण्यमिति । यद्यपि व्याख्येयभाष्यक्रमानुरोधेन शरीररूपतन्वंशेत्यादिभाष्यं व्या-ख्यायैव तच्छब्दसामानाधिकरणेनेत्येतद्भाष्यं व्याख्यातुमुचितम्, तथाप्युदाहृतपुराणवचनक्रमानुसारेण तच्छब्दसामानाधिकरण्यं व्याख्यातम् । भाष्यकारेण तु शरीरतन्वादिशब्दानां शरीरत्वसाधकस्फुटप्रमाणत्वादुदाहृतपुराणवचनक्रममतिलङ्घ्य व्याख्यातमिति द्रष्टव्यम् ।

(परोदाहृतपुराणवचनार्थः)

देवादिशरीरं चोपाधित्वेन प्रतीयत इति । जपाकुसुमादिवदात्मनिष्ठभेदादिधर्मासञ्जकत्वेनोपाधित्वम् । ननु मुक्ताना-मुपास्यत्वाभावादिति । मुक्तात्मान्तरस्य स्वाप्राप्यत्वाभावेन तस्य शुभाश्रयत्वस्य वा योगयुक्चित्तालम्बनत्वस्य वाऽप्रतिषेध्य- त्वात् उपासकस्वरूपस्य च कर्तृत्वादिबन्धाश्रयत्वस्याप्राप्यत्वेन शुभाश्रयत्वप्रसक्तेरेवाभावेन तत्प्रतिषेधेऽप्रसक्तप्रतिषेधत्वापातादयं श्लोकः परमात्मस्वरूपस्यैव योगयुङ्गमन आलम्बनत्वप्रतिषेधकः किं न स्यादित्याशङ्कय मुक्तावाविर्भविष्यतः स्वरूपस्य प्राप्यत्वेनोपा-स्यत्वप्रसक्तिसद्भावात्तस्योपासननिवृत्तयेऽयमुपदेश इत्याहेत्यर्थः । अनुसान्धानाणेपदेश इति निर्देशो "मशकेभ्यो धूमः' इतिवत् द्रष्टव्यः । तथाननुसन्धानायेति वा पाठः । केचित्तु-तथानुसन्धानाय । अनुपास्यत्वेनानुसन्धानायेत्यर्थ इति वदन्ति । अस्मिन् प्रकरणे इति व्याख्येयं पदम् । कथं विष्णोर्विग्रहैकदेश इति । विष्णोः शरीरतया विष्णुधार्यस्य तद्धारकत्वायोगादित्यर्थः । शक्ति-त्रितयसमावेशे एकैकस्या एव शक्तेः कृत्स्नविग्रहाश्रयत्वासंभवमभिप्रेत्य विग्रहैकदेशाश्रायत्वोक्तिः । यद्वा विग्रहरूपोऽयमेकदेशः परिच्छिन्नः तदाश्रित इत्यर्थः । ननु विष्णोः शक्तित्रयाश्रयभूतविग्रहासंभवेऽपि ब्रह्मणस्तादृशो विग्रहः संभवेदिति शङ्कामपाकरोति - तदाश्रयभूतो विग्रह इति । परसंज्ञरूपगोचर इति । "तच्च विष्णोः परं रूपम्' इत्यादौ व्यतिरेकिनिर्देशेन पररूपस्य विष्णुभिन्नत्वा-

वगमात् परशक्तिशब्देन पररूपस्यैव निर्देशात् "विष्णुशक्तिः' इत्यत्र षष्ठीसमास एव युक्त इति भावः । विभज्यनिर्देशः कृत इति । विभज्यस्य निर्देशो विभज्यनिर्देशः, विभक्तव्यनिर्देश इत्यर्थः । द्वितीयान्तो विभागशब्दः

कर्मणि घञन्त इत्यर्थः । अयं भावः-यद्यपि पूर्ववाक्ये "मूर्तामूर्तविभागेन' इत्यत्र विभागशब्दो न कर्मार्थकः, तथापि पूर्ववाक्ये विभागशब्देन विभजनस्य प्रस्तुतत्वात् तत्कर्मण इह द्वितीयान्तविभागशब्देन परामर्शे नानुपपत्तिरिति । केचित्तु ननु विभज्यनिर्देशः मूर्तामूर्तशब्देनैव क्रियताम् । किं विभागशब्देने-त्याशङ्कयाह - मूर्तामूर्तविभागेनेत्युक्तत्वादितीति वदन्ति । अपि तु शक्यत्वा-भिप्राय इति । "कृत्याश्च', "शकि लिङ् च' इति शक्यार्थे कृत्यप्रत्ययविधानात्, "न तद्योगयुजा शक्यम्' इति च प्रतिपादनादिति भावः । बहुव्यक्तिक्रोडीकारार्थमिति । सकलव्यक्तिक्रोडीकारार्थमित्यर्थः । "परशक्तिरूपम्' इत्यत्र रूपप्रतिसंबन्धितया परमात्म-प्रतीतौ विलम्बादाह- परशकत्यात्मकं वेति । मूर्ते भगवतो रूपे इति ।

"मूर्ते भगवतो रूपे सर्वापाश्रयनिस्पृहा ।
एषा वै धारणा प्रोक्ता यच्चितं तत्र धार्यते ।।'

इति वचनार्थ इत्यर्थः । अन्यत्रास्यानर्हत्वकथनमिति । श्लोकान्तरेऽस्यानर्हत्वकथनमित्यर्थः । प्रकरणसिद्धिमेवोपपादयति - अन्ये तु पुरुषव्याघ्रेत्यादिना । बद्धनामेव शुद्धिविरहः प्रतिपाद्यते, न मुक्तानामित्याशङ्कय सिंहावलोकितकेनाह - अन्ये त्विति ग्रन्थे- नेति । स्तम्बसमभिव्याहारादिति । ननु पर्यन्तपदवैयर्थ्यप्रसङ्गात् "स्तम्बपर्यन्ताः' इति वा "स्तम्बपर्यन्तम्' इति वा रूपप्रसङ्गेन "स्तम्बपर्यन्ताः' इति रूपासिद्धेश्च आङित्यस्य वाक्यस्मरणान्यतरार्थकत्वस्यैव युक्ततया "आङभिविधौ' इत्यस्यायुक्तत्वात् तत्सिद्धवत्कारेण स्तम्बसमभिव्याहारादित्युक्तिरयुक्तेति चेत्, उच्यते-आङित्यस्याभिविध्यर्थकत्वसंभवे गत्यभावकल्प्यस्य वाक्य-स्मरणार्थकत्वस्यायुक्तत्वात् आङित्यस्य ब्रह्मशब्देन समासः । स्तम्बपर्यन्ता इति पृथक्पदम् । ततश्च समभिव्याहृतस्तम्बपर्यन्तपदे स्तम्बस्याभिविधित्वदर्शनात् आब्रह्मशब्देऽप्याङभिविधाविति भावः ।

भाष्ये-जगद्ब्रह्मणोः सामानाधिकरण्येनैक्यप्रतीतेरेति । "ज्योतीषि विष्णुः' इत्यादिना सर्वस्य जगतः सामानाधिकर-ण्येनैक्योपदेशादित्यर्थः । न शुक्तिकाशकलेन सामानाधिकरण्यं दृष्टमिति । "सर्व जगत् ब्रह्म' इतिवत् "सर्वं रजतं शुक्तिः' इत्युपदेशादर्शनादित्यर्थः । तथा सति निषेधवचनस्यापीति । यदि विधिवाक्यमपारमार्थिकं भेदं परमार्थिकत्वेन बोधयेत्, तर्हि निषेधवाक्यमपि वस्तुतः पारमार्थिकमेव भेदमपारमार्थिकत्वेन किमिति न प्रतिपादयेदित्यर्थः । न केवलमाकारद्वय इति । त्वया हि सामानाधिकरण्यं बाधसापेक्षमित्युच्यते, मया तु सामानाधिकरण्यस्य बाधसापेक्षत्वप्रतिषेधमात्रं न क्रियते, प्रत्युत बाधविरो-धित्वमपीत्युच्यते । अन्यरविरोधे सामानाधिकरण्यभङ्गप्रसङ्गादिति भावः ।

भाष्ये - जगञ्जन्मादिकारण ब्रह्मेत्यवसिते सति इतिहासपुराणाभ्यामुपबृंहणं कार्यमित्ययमर्थः "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति वाक्येन ज्ञायत इति योजना । श्रुत्वोपबृंहणं कर्तव्यमिति "इतिहासपुराणाभ्याम्' इति श्लोकात् प्रतीयत इत्यर्थः । न चोपबृंहणं श्रवणानन्तर्यं नास्माद्वचनात् प्रतीयते, श्रुत्वोपबृंहयेदित्याद्यश्रवणात् "उपबृंहयेत्' इत्येतावत एव श्रवणा- दिति वाच्यम, उपबृंहणस्य श्रुतार्थविशदीकरणरूपत्वेनोपबृंहणे श्रवणानन्तर्यलाभात् । ततश्च, "अवसिते सत्यस्माद्वाक्यादुपबृंहणं कार्यमिति ज्ञायत इति कथमुच्यते? श्रवणात् प्रागप्यस्माद्वाक्यादर्थावगतिसंभवादिति शङ्का पराकृता । केचित्तु पूवर्स्माद्वाक्याद-र्थावगतिसंभवेऽप्यश्रुतवेदान्तस्य प्रवृत्त्यौपयिकोपबृंहणकर्तव्यताज्ञानस्यानुत्पत्तेः श्रवणानन्तरमेव प्रवृत्त्यौपयिकोपबृंहणकार्यता-प्रतीतिरुत्पद्यत इत्यर्थ इति मन्यन्ते । भारतादिप्रबन्धविशेषश्रवणायेति । ननु न्यायसिद्धानुवादित्वे कथमस्य वाक्यस्य भारता-दिप्रबन्धविशेषश्रवणप्रवर्तकत्वमिति चेत् - न; अनुवादकस्याप्यस्य वाक्यस्य "अक्षैर्मा दीव्यः कृषिमित् कृषस्व' इति वाक्यवत् स्वाभाविकप्रवृत्तिविषयविमुखीकरणद्वारेण प्रवृत्त्युपयोगाददोषात् । नन्वेवं तर्हीति । "मामयं प्रतरिष्यति' इति दृष्टार्थत्वप्रति-पादनमनुपपन्नमिति शङ्कार्थः । ततश्च दृष्टादृष्टरूपोभयविधप्रतिक्षेपकत्वं विरुद्धमिति न

मन्तव्यम् । "किं ते कृष्वन्ति कीकटेषु गावः' इत्यादेरयमर्थः- हे मघवन् कीकटदेशेषु ते गावः किं कुर्वन्ति, न कचिदप्युपकारं कुर्वन्तीत्यर्थः । तदेवोपपादयति - आशिरं=प्रवग्यार्थं पयः न दुहन्ति, घर्म्यं प्रवग्र्यार्थं घृतं न तापयन्ति, धर्मोपयुक्तं क्षीरं न प्रयच्छन्ति तद्देशस्थानां नास्तिकत्वात् । प्रमगन्दस्य कीकटाधिपतेः राज्ञः वेदः धनं नैचाशाखं नीचाशखिनगरस्थम् आभर रन्धय वर्धय-इति । अयमर्थः द्राक् प्रतीयते । अत्र प्रमगन्दनामकराजवृत्तान्तप्रतिपादने नित्यायाः श्रुतेरनित्यार्थप्रतिपादकत्वेनाप्रामाण्यप्रसङ्गात् प्रमगन्दशब्देन प्रकृष्टं धमं मामागमिष्यतीति प्रमगन्द इति व्युत्पत्त्या वार्धुषिकः प्रतिपाद्यते । नैचाशाखशब्देन षण्डसंबन्धिधनं प्रतिपाद्यते । एवं च सति

बार्धुषिकादीनां प्रवाहतो नित्यत्वात् नानित्यार्थसंयोगविरोधः । तथैव "अहल्यायै जार' इत्यत्रापि अह्नि लीयते इत्यहल्या रात्रिः, तस्या जारो जरणहेतुः सूर्यः इत्यादिरेवार्थः । अतो नानित्यार्थसंयोगविरोधः । एवं च सति शब्दसाम्यात् प्रमगन्दाहल्यादिवृत्तान्तः स्फुरतीति चेत्-सोऽविवक्षित एवेति मीमांसकानां स्थितिः । तद्वदेव वेदान्तभागेष्वपि नारायणपरब्रह्मादिशब्दप्रतिपन्नार्थेषु देवता-विशेषादिष्वविवक्षितार्थत्वशङ्काव्युदासार्थमुपवृंहणं कार्यमिति प्रघट्टार्थः ।

"पढइ परासरसद्दं सोवि जुआ सरसकव्वदुल्ललिओ ।

अह्मो कालस्स गई अह्मेवि णिअ पइं गमिअ ।।'

छाया= पठिति पराशरशब्दं सोऽपि युवा सरसकाव्युदर्ललितः ।

अहो कालस्य गतिः वयमपि निजं पतिं गमिताः ।।

इति पठ्यते । इदं चासत्काव्यालापप्रवणस्योपपत्तेः कालविशेषे विष्णुपुराणपाठबद्धादरतामात्मनश्च स्वैरविहारनिवृत्तिं च स्मृत्वा विस्मितायाः कस्याश्चिद्वचनम् । अतोऽन्यार्थप्रवृत्तत्वमस्येति द्रष्टव्म् । ननु पराशरपुराणेऽपि पराशरशब्दशब्दो भवत्येव । तत्र चामूलाग्रं शिवपारम्यमेव प्रदर्श्य (दृश्य)त इति चेत् -न ; तस्मिन् विष्णुपुराण इव पराशरशब्दशब्दप्रसिद्धयभावेन श्लोकस्थ-पराशरशब्दशब्देन विष्णुपुराणस्यैव विवक्षितत्वादिति भावः ।

(विष्णुपुराणप्राशस्त्यम्)

अग्नेः शिवस्येति ।

"संकीर्णाः सात्त्विकाश्चैव राजसास्तामसास्तथा ।

कल्पाश्चतुर्विधाः प्रोक्ता ब्रह्मणो दिवसाश्च ते ।।'

इति कल्पानामेव सात्त्विकादिविभागकथनात् "सात्त्विकेष्वथ कल्पेषु' इति दर्शनात् "तामसेषु, राजसेषु' इत्येतत्सर्वं कल्पविशे- षणम् । ततश्च तामसेषु कल्पेषु प्रकीतितं ब्रह्मणा अग्निशिवमाहात्म्यं, राजसेषु कल्पेषु ब्रह्मणो माहात्म्यं प्रोक्तं विदुरित्यर्थः । यस्मिन् कल्पे तु इत्यस्यायमर्थः- उत्तरार्धे तस्य तस्येति श्रवणात् यस्य यस्यान्यादेः पुराणं माहात्म्यप्रतिपादकं यत् प्रोक्तं, तस्य माहात्म्यं माहात्म्यस्य प्रतिपादकं तदिति, तदिति पदमध्याहतर्व्यम्, पूर्वत्र यत्प्रोक्तमिति श्रवणात् । तस्य तस्य माहात्म्यप्रतिपादकं तत्पुराणम्, तत् तत्स्वरूपेण तस्य कल्पस्य स्वरूपमेव स्वरूपं यस्य; सात्त्विकत्वादिकं हि कल्पस्य स्वरूपम्; सत्त्वादिगुणप्रचुरेण ब्रह्मणा वर्ण्यत इति फलितार्थः । ततश्च तमःप्रचुरेण ब्रह्मणा अग्निशिवमाहात्म्यं वर्ण्यते, रजःप्रचुरेण ब्रह्ममाहात्म्यं, सत्त्वप्रचुरेण विष्णुमाहात्म्यमिति फलितार्थ इति द्रष्टव्यम् । केचित्तु "यस्मिन् कल्पे तु यत्प्रोक्तम्' इत्यत्र यद्दैवतमधिकृत्य पुराणं प्रवृत्तम्, तस्य माहात्म्यं तत्स्वरूपेण वर्ण्यत इत्यर्थ इति वदन्ति । अन्ये तु "तत्स्वरूपेण' इत्यत्र तदिति पृथक् पदम् । यस्म्ि कल्पे यत्पुराणं प्रोक्तं तस्य तन्माहात्म्यं तस्य स्वरूपेण वर्ण्यत इति योजना । एवं हि तस्य तस्येति षष्ठयन्तद्वयसाफल्यम्

। तस्य च स्वरूपमसाधारणा- कारः सत्त्वरजस्तमांस्येव । ततश्च सत्त्वरजस्तमोभिर्वर्ण्यत इत्यर्थ इति वदन्ति । ननु-

"तत्रस्ते कारणात्मानो जाताः साक्षान्महेश्वरात् ।

ब्रह्मणा सर्गे हरिस्त्राणे रुद्रः संहरणे पुनः ।।

तथाप्यन्योन्यमात्सर्यादन्योन्यातिशयार्थिनः ।

तपसा तोषयित्वा तु पितरं परमेश्वरम् ।।

कल्पान्तरेऽसृजद्ब्रह्मा विष्णुरुद्रौ जगन्मयः ।

कल्पान्तरे तथा विष्णुर्ब्रह्मरुद्रौ तथा हरः ।।

नानेन तेषामाधिक्यं न्यूनत्वं वा कथंचन ।

तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः ।

तानि तानि प्रणीतानि विद्वांस्तत्र न मुह्यति ।।'

इति पुराणवचनानुसारेण तत्तत्कल्पवर्तिपारमार्थिकवृत्तान्तप्रतिपादनमुखेन सकलपुराणप्रामाण्यप्रतिपादनपरमिदं वचनं किं न स्यात्? "तस्य तस्य तु माहात्म्यम्' इत्यत्र यस्मिन् कल्प इति पूर्वनिर्दिष्टकल्पपरामर्शस्योचिततया कल्पसंबन्धिमाहात्म्यमेव तत्स्वरूपेण तत्कल्पप्रवृत्तपुराणस्वरूपेण वण्यर्त इति वक्तुं शक्यत्वादिति चेत्-न; "त्रयस्ते कारणात्मनः' इति श्लोकस्य पूर्वैरनु-दाहृतत्वेन प्रामाण्यस्य निश्चेतुमशक्यत्वात् । यस्मिन् कल्पे यत् पुराणं प्रोक्तम्, तस्य कल्पस्य माहात्म्यं तेन पुराणेन वर्ण्यत इत्य- स्य विवक्षितत्वे तत्स्वरूपेण वर्ण्यत इत्यस्यायुक्तत्वाच्च यथोक्त एवार्थः ।

अन्यथाज्ञानविपरीतज्ञानेति । अन्यथाज्ञानं धर्मान्यथाभावज्ञानम् । विपरीतज्ञानं धर्म्यन्तरज्ञानम् । केचित्तु इमे सं-सर्गारोपतादान्यारोपरूपे, धर्म्यंशे भ्रान्तेरभावादिति वदन्ति । सत्त्वं लघु प्रकाशकमिति ।"गुरुवरणकमेव तमः' इत्यत्र एवकारः सर्वत्र संबध्यते, सत्त्वं लघु प्रकाशकमिष्टं साङ्खयाचार्यैः । उद्गमनहेतुः गौरवप्रतिद्वन्द्वी हि धर्मो लाघवम्, यतोऽग्नेरूर्ध्वज्वलनम्, यतो वायोस्तिर्यग्गमनं च । तच्च लाघवं करणानां चक्षुरादीनां स्वस्वविषयप्रवृत्तौ हेतुः । अतः प्रकाशकं भवति । तद्धि सत्त्वं स्वयमक्रियत्वात् स्वकार्यं प्रति अवसीदति । तच्च रजसा उपष्टभ्यते प्रवत्यर्ते । अतः प्रवर्तकत्वद्रजः उपष्टम्भकम् । तत्र च हेतुश्च- लत्वं । यतः स्वयं चलस्वभावं भवति, अतश्चाचलं चलयद्रजः प्रवर्तकम् । तादृशं च रजो गुरुणा आवृण्वता च तमसा तत्र तत्र प्रवृत्तिप्रतिबन्धकेन क्वचिदेव प्रवर्त्यत इति"गुरु वरणकमेव तमः' इत्युच्यते । वरणकं नियमनहेतुरित्यर्थः । सत्त्वरजस्तमसां प्रकाशप्रवृत्तिनियमार्थत्वात्सत्त्वस्य प्रकाशकत्वम्, तमसश्च गुरुत्वेन करणमान्द्यहेतुत्वं च सिद्धमिति भावः । तस्मान्नास्य वचन- स्येति । वस्तुतस्तु सात्त्विके गारुडपुराणेऽस्य वचनस्योपलम्भादेतस्य तामसमात्स्यपुराणवचनस्य प्रामाण्यासिद्धावपि न क्षति- रिति द्रष्टव्म् । अनेन वचनेन सत्त्वादिमूलत्व इति । नन्वेवं द्वैताद्वैतग्राहिप्रमाणाविरोधेऽपि "जनै स्वकर्मास्तिमितात्मनिश्चयैः', "ततो हि शैलाब्धिधरादिभेदान्' इत्यादिप्रमाणानुसारात् द्वैतज्ञानस्य सर्वस्यापि दोषमूलत्वनिश्चयसंभवात् द्वैतग्राहिप्रत्यक्षस्या-द्वैतश्रुतिपरिपन्थित्वं न स्यादिति चेत्-न; तेषां वचनानां भेदेप्रत्यक्षादेर्दोषमूलत्वप्रतिपादकत्वस्याद्याप्यसिद्धेः । "न ह्येतस्मादिति नेत्यन्यत्परमस्ति' इति । अस्यायमर्थः-"अथात आदेशो नेति नेति' इत्येवम्, इतिनेतिशब्दनिर्दिष्टादेतस्माद् ब्रह्मणोऽन्यत्परं नास्तीति । कारणवाचिशिवादिशब्दानामिति । "यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः', "शिव एको ध्येयः' इत्यादीनाम् "आकाशादेव समुत्पद्यन्ते' इत्यादिवाक्यतुल्ययोगक्षेमत्वादिति भावः ।

दश साहस्त्रसंमितमिति । षट्साहस्त्रप्रति-पादकवचनविरोधस्तु वृत्तभेदादिना, आधिक्यमात्रपरतया वा, सङ्खयाया अविवक्षितत्वेन वा समाधेयः । आश्रितेत्यानृशंस्यत इति । स्वयमाश्रिता । (?) अतो रामस्य स्वस्यामनृशंसतेति सीतावचनादिति भावः । तत्रापि यतो यथेति पदयोरिति । "यतो यथा बभूव' इत्यत्रेव "यतो यथा भविष्यति' इत्यत्रापीत्यर्थः । प्रश्नान्तरव्यवधानेनेति । इदमुपलक्षणम्; "यतश्चैतच्चाराचरम्' इति चशब्दादीनामपीति द्रष्टव्यम् । आत्मतया हि व्याप्तिरिति । यद्यपि "यन्मयम्' इति मयडर्थप्राचुर्यबलेन व्यापकत्वमात्रं सिध्येत्, नात्मत्वम्, अथापि सृष्टिलयसमभिव्याहारात् स्थितिहेतोर्व्यापकस्यैव प्रष्टव्यतया आत्मत्वसिद्धिरिति भावः । ननु यस्य यथोत्प-त्तिस्थानत्वं तस्य तथा लयस्थानत्वं च सिद्धमिति लयस्थानतत्प्रकारप्रश्नावयुक्तावित्यत्राह-लयस्थानप्रश्न इति । सद्वारकत्वा-द्वारकत्वेति । सद्वारकत्वं सिद्धान्ते; अद्वारकत्वं यादवभास्करमतयोः; कार्यभ्रमनिवृत्तिरूपत्वं शंकरमत इति विभागो द्रष्टव्यः । स च कर्तृभेदशङ्कानिबन्धन इति । लोके उत्पादकसंहर्त्रोर्भेददर्शनादिति भावः । "यत्प्रमाणानि भूतानि' इत्यादिप्रश्नश्लोकानां भाष्ये कण्ठतोऽनुपादाने हेतुमाह-स्वरूपप्रश्नश्लोकद्वयमिति । स्थितिलययोरकर्मकत्वात् "स्थितिलयकर्मभूतम्' इत्युक्तिरसंगता स्यादित्याशङ्कयाह - स्थितिलयशब्दाभ्यां रक्षासंहारौ विवक्षितावेति । इदमिति पदं व्याचष्टे-सामानाधिकरण्यप्रतिपन्नमि- त्यर्थ इति । अत्र केचित्-"इदं च तादात्यम्' इति भाष्ये इदंशब्दस्य सामानाधिकरण्यपरत्वं युक्तम् । तादात्म्यशब्दश्च तत्प्रति-पादकसामानाधिकरण्यपर एव व्याख्यातुमुचितः । तदात्म्यप्रतिपादकं सामानाधिकरण्यं जगदन्तर्यामिणो जगच्छब्दार्थस्य तच्छब्दार्थस्य परमात्मनश्चैक्यनिबन्धनम्; न तु व्याप्यव्यापकयोर्जगद्ब्रह्मणौरैक्यनिबन्धनम् । "यन्मयम्' इति प्रश्नोत्तरत्वात् "जगच्च सः' इति सामानाधिकरण्यस्येति योजनैव स्वरसतः प्रतीयते । यदि च तादात्म्य शब्दः सामानाधिकरण्यप्रतिपन्नैक्यपरः, तदा "न तु व्याप्यव्यापकयोर्वस्त्वैक्यकृतम्' इति भाष्यस्यास्वारस्यम् । न हि तादात्म्यलक्षणस्यैक्यस्यैक्यनिबन्धनत्वशङ्कास्ति । अत-स्तादात्म्यशब्द एव सामानाधिकरण्यपरतया योजनीयः । टीकाया अपि तत्रैव तात्पर्यमिति वदन्ति । व्याप्तिमात्रेण तादात्म्यं न दृष्टमिति । "गमनं घटः' इति सामानाधिकरण्यं न दृष्टमित्यर्थः । न त्वैक्यमिति भ्रमितव्यम्, शरीरात्मनोरपि तादात्म्यलक्षणैक्या-भावादिति द्रष्टव्यम् । श्रुतिसिद्धत्वादिति भाव इति । व्याप्यत्वव्यापकत्वरूपविरुद्धधर्माध्यस्तयोरैक्यासंभवादिति भावः । ब्रह्मा-ज्ञानवादिनोऽभिमतमिति । यद्यपि विकारार्थत्वमप्यभिमतं, तथापि यत इत्यनेन सिद्धत्वादिदमेव तस्याभिमतमिति भावः । ननु त्वन्मतेऽपि मयटः प्राचुर्यार्थत्वाश्रयणमात्रेणात्मत्वपर्यन्तार्थालाभात् तत्कल्पने च प्रतिपत्तिगौरवात् मयटो निरर्थकत्वमविशि-ष्टमित्यत आह-श्रुतार्थस्वीकारेणेति । असाधारणं दूषणमाहेति । अर्थवत्त्वे संभवत्यानर्थक्याश्रयणमन्याय्यमित्यस्य भेदाभेद-वादिसाधारणत्वादिति भावः । ननु "विष्णुरेवेत्युत्तरमभविष्यत' इति भाष्यमयुक्तम् । किमत्र जगत्पदं न प्रयोक्तव्यमित्यभिप्रायः? उत एवकारः प्रयोक्तव्य इति? न प्रथमः, "जगत् किम्?' इति जगद्धर्मिकप्रश्ने उत्तरस्यापि जगद्धर्मिकस्यैवोचितत्वात् । नाप्ये-वकारप्रयोगः, "सर्वं वाक्यं सावधारणम्' इति न्यायेन सिद्धेः । किंच जगद्विष्णुरेवेत्युत्तरं चासंगतम् । न हि शुक्तिरेव रूप्यमि- त्युत्तरं क्वचिद् दृष्टचरमित्याशङ्कय मिथ्यैवेत्युत्तरमभविष्यत्, न तु विरुद्धाकारद्वयसामानाधिकरण्येनेति भाष्यतात्पर्यार्थं हृदि निधायाह-स्वार्थिकत्वपक्ष इत्यादिना । अन्यतराकारोपस्थापक इति । सत्यत्वमिथ्यात्वयोरन्यतराकारोपस्थापक इत्यर्थः विष्णुरित्यन्यतराकारोपस्थापकशब्द इति । "विष्णुरेव' इति भाष्ये विष्णुशब्दस्य न विष्णुत्वे तात्पर्यं, किंतु सत्यत्वमिथ्या-त्वयोरन्यतराकारे तात्पर्यमित्यर्थः । प्रभूतं प्रचुरमित्यर्थ इति । यद्यपि काशिकायाम्,"प्राचुर्येण प्रस्तुतं प्रकृतम्' इति व्याख्यातम् । तद्व्याख्यात्रा हारदत्तेनापि, "यद्यपि प्रस्तुतमात्रं वक्ति प्रकृतशब्दः-तथापीह वचनग्रहणादयं विशेषो लभ्यते । वचनग्रहणं हि या- दृस्य प्रकृतस्य लोके मयङ्वचनं प्रत्यासन्नं तत्र यथा स्यादित्येवमर्थम्' इत्युक्तम्-तथाप्यस्य ततोऽपि सुन्दरत्वादिदमेव ज्याय इति ध्येयम् । शङ्कते-यन्मयमित्यस्येति ।

आकारद्वयोपस्थापकसामानाधिकरण्यस्योत्तरत्वायोगादिति । यद्यपि "जग- न्मिथ्या' इत्याकारद्वयोपस्थापकसामानाधिकरण्यस्योत्तरत्वं संभवति-तथापि जगत् विष्णुरेवेति सामानाधिकुरण्यस्योत्तरत्वं न संभवतीत्यत्र तात्पर्यम् । न तु तस्य शरीरात्मभावनिबन्धनत्वायोगादिति । स्वार्थिकत्वमपास्तमिति पूर्वेणान्वयः । सामानाधि-करण्यस्य शरीरात्मभावनिबन्धनत्वायोगप्रसङ्गात् स्वार्थिकत्वं नापास्तम्, येन शरीरात्मभावनिबन्धनत्वस्याद्याप्यसिद्धत्वाद-न्योन्याश्रयः स्यादित्यर्थः । अर्थविरोध इति । जडाजडयोरैक्यविरोध इत्यर्थः । यन्मयमित्युक्तप्रश्नस्योत्तरत्वानुपपत्तिश्चेति । मयटोऽर्थवत्त्वाय विकारप्राचुर्ययोरेव प्रष्टुमुचितत्वादिति भावः । ननु न मयडवैयर्थ्यं, यन्मयमिति विकारप्रश्नसंभवादित्याशङ्कयाह- यत इत्युपादानस्य पृष्टत्वादिति । "निखिलहेयप्रत्यनीकता च बाध्येत', "सर्वाशुभास्पदं च ब्रह्म भवेत्' इत्यनयोः पौनरुक्तयं परिहरति- सत्यसंकल्पेत्यादिनेति । असंकोचादेकेनैव पदेनोभयदोषप्रसङ्गोक्तिसंभवादन्यथा पौनरुक्तयं परिहरति-यद्वोभय-लिङ्ककत्वहानिरित्यादिना । ननु "स्थापयिष्यते' इत्यर्थे कथं "स्थाप्यते' इत्यस्य साधुत्वमित्यत आह- अनन्तरभावित्वादिति । "वर्तमानसामीप्ये वर्तमानवद्वा' इत्यनुशासनादिति भावः । सप्तश्लोकी नमस्कारविषयामिति ।

"अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ।।
नमो हिरण्यगर्भाय हरये शंकराय च ।
वासुदेवाय ताराय सर्गस्थित्यन्तकर्मणे ।।
एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः ।
अव्यक्तव्यक्तरूपाय विष्णवे मुक्तिहेतवे ।।
सर्गस्थितिविनाशानां जगतो यो जगन्मयः ।
मूलभूतो नमस्तस्मै विष्णवे परमात्मने ।।
आधारभूतं विश्वस्याप्यणीयांसमणीयसाम् ।
प्रणम्य सर्वभूतस्थमनन्तं पुरुषोत्तमम् ।।
ज्ञानस्वरूमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ।।
विष्णुं ग्रसिष्णुं विश्वस्य स्थितिसर्गे महाप्रभुम् ।
प्रणम्य जगतामीशमजमक्षरमव्ययम् ।।'

इति सप्तश्लोकी । विस्तररूपत्वं च सिद्धमित्यर्थ इति । "अतः' इत्यस्य "संग्रहेणोक्तं विस्तरेण वक्तुम्' इत्यनेन संनिहितेनैवान्वय इति भावः । विस्तररूपत्वं सिद्धमित्यर्थ इत्युक्तिस्तु अन्वयफलितार्थाभिप्रायेति द्रष्टव्यम् । बाह्यस्थितिप्रश्नस्य चेति । मातापित्रा-दिक्रियमाणस्थितिप्रश्नस्य चेत्यर्थः । कण्ठोक्तार्थस्येति । आत्मत्वस्येत्यर्थः । वक्ष्यमाणमहाविस्तरस्येति । अत्र प्रथनस्य शब्द-द्वारकत्वात् "प्रथने वावशब्दे' इति शब्दविषये घञः प्रतिषेधात् विस्तरेत्युक्तिः । ईक्षत्यानन्दमयेति । पूर्वार्धेन ईक्षत्यानन्दमयाधि-करणार्थभूतप्रकृतिजीववैलक्षण्यमुक्तम् । "सदैकरूपरूपाय' इत्यन्तरादित्याविद्यार्थ उक्त इति भावः । नृपनभोव्यावृत्तिरिति । विष्णुपदेन नृपव्यावृत्तिः, सर्वजिष्णुपदेन नभोव्यावृत्तिश्चेत्यर्थः । सर्वजिष्णुपदस्य नियन्तरिस्वारस्याभावाद्वयाप्तिबलादेव निय-मनस्यार्थसिद्धेश्च जिष्णुपदं व्याप्यगतदोषास्पृष्टत्वपरं व्याचष्टे-यद्वा विष्णुशब्देनैवेति । कथं विष्णोः कारणत्वमिति ।

यद्यपि "अविकाराय' इति श्लोके जगत्कारणत्वं नोक्तम्-तथापि "विष्णोः सकाशादुद्भूतम्' इति तत्पूर्वश्लोके कारणत्वस्येरितत्वात् तथोक्तमिति द्रष्टव्यम् । विष्णवाख्यावतारविग्रहद्वारेति । विग्रहविशेषद्वारेत्यर्थः । देवमनुष्यादिशब्दव्यपदेशवदिति । रामादिवि- ग्रहेषु सत्त्वादिगुणपरिणामविशेषभूतमनुष्यत्वाभावेऽपि मनुष्यसंस्थानसजातीयतया "रामो मनुष्यः' इति व्यपदेशवत् भगवच्छ-क्तिभूतजीवात्मभिः अत्मत्वेन सजातीयतयौपचारिकः शक्तिशब्दस्य व्यपदेश उपपद्यत इति भावः । केचित्तु-शक्तिशब्दस्यौप-चारिकत्वममृष्यन्तो देवादिशरीरकतया देवादिशब्दवाच्यत्ववत् शक्तिभूतजगच्छरीरके तस्मिन् शक्तिशब्दव्यपदेशो मुख्य इत्य- भिप्राय इति वर्णयन्ति । "एकानेकस्वरूपाय सूक्ष्मस्थूलात्मने नमः' इति वक्तव्ये "स्थूलसूक्ष्मात्मने नमः' इत्युक्तिरयुक्तेत्या-शङ्कयाह-धीस्थामिति । अनेकशब्दस्यात्यन्तसंनिहितत्वादिति भावः । अण्डान्तर्भूतसर्गादेरिति । "सर्गस्थित्यन्तकर्मणे' इत्यु-क्तत्वादित्यर्थः । अण्डबहिर्भूतेति । "विष्णुं ग्रसिष्णुं विश्वस्य स्थितिसर्गे महाप्रभुम्' इति वक्ष्यमाणत्वादित्यर्थः । ननु "आधारभूतं विश्वस्य' इत्युत्तरश्लोको वा कालपरः किं न स्यादित्याशङ्कयाह - उत्तरश्लोकः समष्टिजीवपर इति । अवच्छेदकतया अवच्छे- द्यतया चेति । जगतः कालपरिच्छेद्यत्वात् कालस्यावच्छेदकत्वं निमेषादिभिः परिच्छिन्नत्वादवच्छेद्यत्वमप्यस्तीति भावः । भव- तीति भूतमिति । अकर्मकत्वात् कर्तरि क्त इत्यत्र तात्पर्यम्, न तु वर्तमानत्वेऽपीति द्रष्टव्यम् । क्षेत्रज्ञाव्यष्टिविशिष्टमिति । "ज्ञानस्वरूपम्' इति श्लोकस्यायमर्थः-ज्ञानस्वरूपम्=ज्ञानस्वरूपजीवशरीरकमित्यर्थः । अत्यन्तनिर्मलत्वादिकं च जीवद्वारा विशेषणम् । यथा "महोदारः, महाप्राज्ञः' इत्यादौ महत्त्वस्यौदार्यज्ञानद्वारान्वः । न च साक्षादेवान्वयोऽस्त्विति वाच्यम्, परमा-त्मनि साक्षान्निर्मलत्वस्य "अविकाराय शुद्धाय' इत्यादिवाक्यप्रतिपन्नत्वात् सर्वज्ञे तस्मिन् भ्रान्तिदर्शनतः स्थितत्वस्य च साक्षाद संभवात् सद्वारक वक्तव्य इति ।

यदि निर्विशेषज्ञानस्वरूपब्रह्माधिष्ठानभ्रमप्रतिपादनपरं शास्त्रमिति भाष्ये शास्त्रपदस्य "ज्ञानस्वरूपम्' इति श्लोक-मात्रपरत्वमभिप्रेत्य तस्य परोक्तार्थपरत्वे उपसंहारविरोधप्रतिपादनपरतया यदीत्यादिभाष्यं व्याख्याय शास्त्रशब्दस्य एकश्लोक-मात्रपरत्वमनुचितमिति मत्वा प्रवर्तिष्यमाणप्रश्नोत्तरानुपपत्तिपरतया व्याचष्टे-यद्वा शास्त्रारम्भोपयोगीति । स्वयं निर्गुण इति छेदः । कर्मवश्यत्वकर्मसंबन्धार्हत्वयोः पर्यायत्वं परिहरति-अकर्मवश्यत्वं मुक्तस्यापीत्यादिना । ब्रह्मण एव वस्तुत्वात् ब्रह्मणः शक्तय इति निर्देष्टव्ये ब्रह्मणो भावशक्तय इति निर्दशो न युक्त इत्याशङ्कयाह-निर्देशो ब्रह्मतादात्म्यमिति निर्देशवदिति । ब्रह्मा-त्मकमिति वक्तव्ये ब्रह्मशब्दनिर्दिष्टस्य पुनरपि तच्छब्देन परामर्शवदित्यर्थः । तादात्म्यशब्दस्याभेदपरत्वात् ब्रह्मतादात्म्यमित्यत्र नानुपपत्ति;, प्रकृते तु, "ब्रह्मणो भावशक्तय' इत्युक्ते भावस्य ब्रह्मण इत्यर्थो न लभ्यते, न हि घटस्य भावरूपमित्युक्ते भावस्य घटस्येत्यर्थो लभ्यते इति चेत्-सत्यम्, समासैकदेशस्य नान्यविशेषणत्वं, तथापि "शिवस्य भागवतः' इत्युक्ते शिवस्य भगवत्त्व-लाभवत् ब्रह्मणो भावशक्तय इत्युक्ते अर्थात् ब्रह्मण एव भावरूपत्वं पर्यवस्यतीति भावः । एतदस्वरसादेवाह-यद्वा ब्रह्मणो भाव-शक्तय इति । अतत्पर्यन्तो मिथ्येत्यर्थ इति । त्वमेव स्वनिष्ठः । त्वदन्यः स्वनिष्ठो नास्तीत्यर्थः । ततश्च परमार्थशब्दः स्वनिष्ठपरः । परमः=उत्कृष्टोऽर्थः परमार्थः । स्वतन्त्र इति यावत् । व्याप्यत्वसहचरितं हीति । व्याप्यत्वविशेषितमित्यर्थः । शरीरलक्षण-द्योतकमिति । यस्य चेतनस्येत्युक्तशरीरलक्षणद्योतकमित्यर्थः । जगच्छरीरकेति संबुद्धिः । अतत्पर्यन्तस्येति । अतच्छरीरक- स्येत्यर्थः । परमार्थशब्दस्य परमप्रयोजनवचनसंभवे स्वनिष्ठवस्तुपरत्वमयुक्तमित्यस्वरसादाह-यद्वा एकशब्दः प्राधान्यपर इति । असहायपदव्यवच्छेद्यं हीति । नन्वन्यप्रधानासहायसंख्यासाधारणवाचिन एकशब्दस्यासहायपदव्यवच्छेद्यमर्थान्तरमपि संभवति,

न तु प्रधानत्वमेवेति कथमिदमसहायपदमेकशब्दस्य प्रधानार्थकत्वं ज्ञापयेदिति चेत्-न । "असहाये' इति विशेषणस्यार्थान्तरसंभव-मात्रसूचकत्वात् । "ष्णान्ता षट्' इति सूत्रे महाभाष्ये "एकशब्दोऽयं बह्वर्थः ।

अस्त्यसहायवाची-एकाग्नयः एकहलः इति । अस्ति संख्यार्थः-एकः द्वौ बहव इति । अस्त्यन्यार्थे वर्तते-प्रजामेका रक्षत्यूर्जमेका' इत्युक्तेः । "एके मुख्यान्यकेवलाः' इति निघण्टू- क्तेश्चेति भावः । भाष्ये "त्वदात्मकमेवेदं सर्वमिति त्वदन्यः कोऽपि नास्ति' इत्युक्तमयुक्तम्, तदात्मकस्यैव जगतस्तदन्यत्वादि-त्याशङ्कय शेषपूरणेन व्याचष्टे- त्वदन्योऽत्वदात्मक इति । अत्वदात्मकः । स्वनिष्ठ इत्यर्थः । ननु श्लोकार्धैकदेशश्चोक्तार्थोपपादक इत्याहेत्यवतारिका न युक्ता, "अत इदमुच्यते' इत्यादिभाष्येण श्लोकार्धैकदेशशब्दविवक्षितस्य महिमशब्दमात्रस्योपपादकत्वा-कथनात्, सर्वव्याप्तेरप्युपपादकतयोपन्यासादित्याशङ्कयाह-महिम्नो व्याप्तिरूपत्वादिति । सर्वमिथ्यात्वे सर्वव्याप्तिर्नोपपद्यत इति न भाष्याभिप्रायः । अपितु सर्वव्याप्तिर्वा भवतु; यकिंचिद्व्याप्तिर्वा भवतु; अन्यत् वा भवतु । न तस्य महिमत्वप्रतिपादन-मुचितमित्यत्रैव भाष्यसंरम्भ इति भावः । प्रयुक्तपदाविवक्षाकथनमस्वरसमित्याशङ्कयाह-यद्वा व्याप्तेरुक्तार्थोपपादकत्वमिति ।

भाष्ये-न केवलं वस्तुतस्त्वदात्मकं जगत् इत्यत ऊर्ध्वं "तत्र' इति शब्दोऽध्याहर्तव्यः । ततश्च वस्तुतो यत् त्वदात्मकं जगत् तत्रेत्यर्थः । एतेन "वस्तुतस्त्वदात्मकं जगत्' इत्यस्यांशस्य भ्रान्तिदर्शनाकारप्रदर्शकत्वासंभवात् "वस्तुतस्त्वदात्मके जगति' "वस्तुतस्त्वदात्मकस्य जगतः' इति वा षष्ठीसप्तम्यन्यतरान्ततया निर्देश एवोचितः, नान्यथेति शङ्का पराकृता । मामेभ्यः परम-व्यममित्यत्रेति छेदः । नन्वपरोक्षस्य देहात्मभ्रमस्य शास्त्रजन्यज्ञानेव परोक्षेण बाधाभ्युपगमे द्वैतग्राहिप्रत्यक्षस्यापि शास्त्रजन्य- ज्ञानेन बाधः किं न स्यादिति शङ्काम्, सादृश्यादिरूपभ्रमहेत्वभावात् कथं देहात्मभ्रम इति शङ्कां च परिहरन् देहात्मभ्रममुपपादयति-देहात्मभ्रमश्च संसर्गकृत इति । यथा "जलमुष्णम्' इति प्रत्यक्षं तेजोद्रव्यसंपर्कात् दोषसाहित्यात् शङ्कितदोषं सत् जलस्य शैत्य-स्वभावत्वग्राहकशास्त्रेण बाध्यते इत्यर्थः । (भावः) । न चैवं ब्रह्मप्रपञ्चयोरप्युपादानोपादेयभावेन परस्परसंसृष्टतया ब्रह्मगतसत्त्व-प्रतीतिः प्रपञ्चे किं न स्याति वाच्यम्, ब्रह्मसंसगर्स्यैव दोषत्वे अद्वैतशास्त्रमसदेव अप्रमाणमेव अव्यावहारिकमेव सत्त्वेन प्रमाण- त्वेन व्यावहारिकत्वेन च गृह्यत इति शङ्कितदोषतया तदपि न बाधकं स्यात् । किं च प्रपञ्चस्य सत्त्वाभावे ब्रह्मसंसर्गस्याप्यसंभवेन तस्य दोषत्वाभावादित्यन्यत्र विस्तरः । अनुभवसाधनयोगयोग्येति भाष्यम् । अनुभवसाधने ध्यानयोगे योग्यानि परिशुद्धानि मनांसि येषां ते तथोक्ताः । योग्यतायां च परिशुद्धिर्हेतुः । परिशुद्धौ च कर्मयोगो हेतुरित्येवंपरतया व्याख्याययोगयोग्येत्यत्र तृती-यातत्पुरुषो विवक्षितः । योगशब्दश्च कर्मयोगपरः । योग्यतापरिशुद्धयोश्च भेदाभावात् पूर्ववत्तयोर्हेतुहेतुमद्भावश्च न विवक्षितः । योग्यपरिशुद्धेति व्यपदेशश्च "घटजननयोग्यदृढदण्डः' इतिवदुपपन्न इत्यभिप्रयन्नाह-योगेन योग्यता परिशुद्धिरिति वार्थ इति । अखिलजगच्छब्देनाचिद्रूपं जगद्विवक्षितमिति । अत्र केचित्- पूर्वश्लोक इव चिद्रूपजगद्विवक्षायामपि न दोषः । चिद्रूपं जगत् ज्ञानात्मकं पश्यन्तीत्युक्तेऽपि दोषाभावात् । यद्वा पूर्वश्लोकेऽपि जगच्छब्दोऽचित्पर एव । ततश्चार्थस्वरूपं जगत् देवमनुष्यादि- रूपं ज्ञानस्वरूपमात्मस्वरूपं पश्यन्तः देहात्मभ्रमवन्त इत्यर्थः । ततश्च जगच्छब्दद्वयस्यापि न वैरूप्यमित्यपि वदन्ति । प्रथम-श्लोकसंक्षिप्तमित्यादि । अयमर्थः-प्रथमश्लोकं संक्षिप्तं तच्छ-लोकमात्रविषयतयोक्तमनुक्तदूषणैः सह पौनरुक्त्यार्थविरोधशास्त्रता-त्पर्यविरोधैः सह विस्तरेण सर्वश्लोकसाधारणतया आहेत्यर्थः । सर्वश्लोकसाधारणमित्येतत्तु विस्तरशब्दविवरणम् । न तु संक्षे-पविस्तरशब्दयोर्दूषणस्वरूपसंक्षेपविस्तरपरत्वम् । दूषणस्वरूपं हि प्रथमश्लोके त्वमित्यादिपदानां लक्षणा, महावराहस्य स्तुति-प्रकरणविरोध इति विस्तरेणोक्तम्; उत्तरत्र तु पदानां लक्षणा, प्रकरणविरोध इति संक्षेपेण । अतो यथोक्त एवार्थः । अवान्तर-प्रकरणेति । अवान्तरप्रकरणस्योपक्रमोपसंहारादिविरोध इत्यर्थः ।

(प्रकाराद्वैतप्रकार्यद्वतैविवेकः)

वक्ष्यमाणश्लोकस्थेति । "यद्यन्योऽस्ति परः कोऽपि' इति श्लोकस्यथान्यपरशब्दस्वभावाच्चेत्यर्थः । प्रकाराद्वैममेवेति । एकप्रकारकत्वमित्यर्थः । पुरोडाशविधिवदिति । अष्टकपालपुरोडाशद्रव्यकाग्निदेवताकयागवदित्यर्थः । पौर्णमास्यधिकरणे आग्नेयस्याष्टाकपालपुराडाशस्य विधेः प्रत्याख्यातत्वादिति द्रष्टव्यम् । प्रतिबन्धकाभावे सतीति ।

सुखादिप्रतिसंधानप्रतिबन्ध- काभावे सत्यपि सुखादिप्रतिसन्धानाभावो व्यवस्थेत्यर्थः । मयट् स्वार्थिक इति । "तस्यात्मपरदेहेषु' इति श्लोकस्यायमर्थः-सतो-ऽपीति "षष्ठो चानादरे' इत्यनादराधिक्ये भावलक्षणे द्योत्ये षष्ठो । आत्मपरदेहेषु सत्तामनादृत्य एकमयं समानमेकरूपं विज्ञा-नलक्षणमात्मस्वरूपमेव परमार्थो भवतीत्यर्थः । श्रीविष्णुचित्तार्यैस्तु "सतोऽपि ज्ञानम्' इति व्यतिरेकनिर्देशस्वारस्यात् ज्ञानशब्दो- ऽयं धर्मभूतज्ञानपरतया व्याख्यातः । मयट्स्वार्थिकत्वस्यास्वरसत्वादाह-यद्वा एकशब्दो भावप्रधान इति । ऐकार्थ्यं दर्शितमिति ।

वचनयोरविरोधः प्रदर्शित इत्यर्थः । अविरोधप्रदर्शनप्रकारश्च, "प्रत्यस्तमितभेदम्' इति श्लोकभाष्यव्याख्यायां ग्रन्थकृता कृतो द्रष्टव्यः ।

एकवचनं नोपपद्यत इति । इदमुपलक्षणम् । "सतोऽप्येकमयम्' इत्येकवचनं नोपपद्यत इति द्रष्टव्यम् । देहशब्देऽप्येकवचनं स्या- दिति । ततश्च "तस्यात्मपरदेहेषु' इति बहुवचनं नोपपद्यत इति भावः ।

स्थानत्रय इति । "अन्यः परः' इत्येकं स्थानम् । "एषोऽहम्' इति द्वितीयम् । "अयं चान्यः' इति तृतीयम् । ननु-अहंत्व-तदन्यत्वाभ्यां वैषम्यं वक्तुं शक्यम् । न चाहंत्वमपि परमात्मन्यास्त इति वाच्यम्, तथा सति "अहं ब्रह्मास्मि' इत्यादीनामहमर्थ-ब्रह्माभेदप्रत्यायकानां जीवब्रह्मभेदप्रत्यायकत्वशङ्काया एवाभावेन तत्परिहाराय यत्नो न कर्तव्यः स्यात् । अहंशब्दस्यात्मशब्दा-परपर्यायतया आत्मत्वजातेः सकलजीवपरमात्मसाधारणतया अहंत्वमादीनामात्मत्वमात्रप्रवृत्तिनिमिकत्वेन "तत्त्वमसि', "अहं ब्रह्मास्मि' इत्यादिवाक्यानां ब्रह्मण आत्मत्वजात्याश्रयत्वप्रतिपादकत्वेन विरोधाप्रसक्तेस्तन्निराकरणाय यत्नोऽपि विफलः स्या-दित्यस्वरसादाह-पूर्वं देवादिष्विति । अन्यादृशाकार इत्युक्तमिति । "अयमेतदाकारः, अयमन्याकारः' इति निर्देष्टव्ये "अन्या-दृशाकारः' इत्युक्तेः आकारेऽपि सुसदृशत्वमात्रमेव, न त्वैक्यमस्तीति भावः ।

सर्वथा साम्याभ्युपगमे हीति । एकत्वाश्रयत्वेनापि साम्याभ्युपगम इत्यर्थः । भेदः षड्जादिसंज्ञित इति पाठे सत्यपीति । संज्ञाभेद इत्युक्ते यथैकस्य घटस्य घटकलशादिसंज्ञाभेदः, एवं षड्जादिसंज्ञाभेदमात्रमेव, न तु संज्ञिभेदोऽस्तीति न मन्तव्यम् । संज्ञाभेदाधीनत्वात् संज्ञिभेदस्य । "तदधीनत्वात्तच्छब्द्यम्' इति न्यायेन भाष्ये संज्ञाभेदशब्देन संज्ञिभेद एवोपचर्यत इति भावः । ननु षड्जादिसंज्ञासंबन्धग्रहः केनचिदितरव्यावृत्ताकारेण गृहीत एव धर्मिणीति वक्तव्यम्; ततश्च संज्ञा भेदमन्तरेणापि भेद-काकारस्याभ्युपगन्तव्यत्वात् कथं तदेकभेदत्वमिति चेत्-सत्यम्; संज्ञासंबन्धो भेद्रप्रतीतौ प्रायेण हेतुरित्यत्र तात्पर्यात् । दार्ष्टा-न्तिकेऽपि तथैवेति । दृष्टान्ते भेदसिद्धेर्दार्ष्टान्तिकेऽपि तथैव भवत्वित्यर्थः । यत्र त्वाकाशदृष्टान्त इति । यथैकस्याकाशस्य काल- भेदेन रूपभेदवत्त्वम्, तथैकस्यैवात्मन कालभेदेन देवादिभेदवत्त्वमित्येतावानेवेह वक्तव्योऽर्थः । ततश्च कस्या व्यक्तेः पूर्वत्वम्, कस्या व्यक्तेः परत्वं, कुत्र व्यक्तावुपदेशः, कुत्र वातिदेश इत्यादिविचारे न सन्नद्धव्यमिति द्रष्टव्यम् । वेदान्तिभिर्नभसो निरव-यवत्ववाद इति । अत्र निरवयवत्वेन वादो निरवयवत्ववादः । तस्य च कर्म नभः; ततश्च "उभयप्राप्तौ' इति नियमात् कर्तरि तृतीयासंभवात् तृतीयाया नानुपपत्तिरिति द्रष्टव्यम् । नभस्यंशभेदाभिप्रायेणेति । न चैवं जीवानामप्याकाशवत् प्रदेशभेदमात्रत्वं स्यात्, तच्चात्मैक्यवादिनोऽपि संमतमेवेति वाच्यम्; सुखदुःखव्यवस्थाद्यनन्यथासिद्धभेदग्राहकप्रमाणेन भेदसिद्धेरित्यत्र तात्प- र्यात् । तत्रैव साम्यदृष्टान्ताभिधानादिति । न च "यथाग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेत्' इत्यत्र साम्यमात्रस्य प्रागपि सिद्धतया समानत्वमित्यस्यैक्यमेवार्थः समाश्रयणीय इति वाच्यम्, ऐक्यस्य बाधितत्वेन भेदकाकारविशेषप्रहाणेन साम्यविशेषस्यैव तदर्थ- त्वात् । अध्यायचतुष्टयोक्तमिति । द्वितीयांशत्रयोदशाध्यायप्रभृत्यध्यायचतुष्टयेनोक्तमित्यर्थः । अन्यथा तत्सामानाधिकरण्ये-नेत्यनन्तरोक्तिविरोधादिति । अन्यथा=ज्ञानाकारमात्रपरामर्शित्वे इत्यर्थः । तं भेदमोहमिति । देवाद्याकारहेतुकं भेदमोहमित्यर्थः । ननु "आत्मस्वरूपम्' इत्यस्यैवोपलक्ष्यवाचितया "सर्वमेतदात्मस्वरूपम्' इति सर्वशब्दस्योपादानं

भाष्ये किमर्थमित्याशङ्कयाह- अहं त्वं सर्वमिति त्रयाणामपि पदानामित्यादिना । आत्मस्वरूपपदस्य श्लोकं सर्वशब्दमात्रेण सामानाधिकरण्यं दृश्यत; तत् कथमहंत्वंशब्दयोरात्मस्वरूपपदसामानाधिकरण्यमित्याशङ्कायामाह - अहंत्वमर्थसजातीयेति । अहत्वमर्थसजातीयार्थवाचि-सर्वशब्दस्यात्मस्वरूपशब्देन सामानाधिकरण्यदर्शनात् अहंत्वंशब्दयोरपि तत्सामानाधिकरण्यं फलितमिति ज्ञापनार्थं "सर्व-मेवैतदात्मस्वरूपम्' इति सर्वशब्दस्यापि सहोपादानं कृतं भाष्य इति भावः । अत्र सर्वशब्दस्याहंत्वमर्थवचनसामार्थ्ये सत्यपि गोबलीवर्दन्यायमभिप्रेत्याहंत्वमर्थसजातीयवाचित्वोक्तिरिति द्रष्टव्यम् । इदं चोपलक्षणम् । परमते "सोऽहं स च त्वम्' इत्यत्रापि "सः' इत्यस्यात्मस्वरूपपरामर्शितयोपलक्ष्यसामानाधिकरण्यस्य परेणाभ्युपेतत्वादिति द्रष्टव्यम् । लक्षणयास्त्विति चेदिति । अहं-त्वमादिशब्दानामन्तःकरणविशिष्टात्मवाचिनां विशेष्यस्वरूपमात्रे लक्षणा; यथा"घटाकाश एव महाकाशः' इत्यत्रेति भावः ।

प्रक्रमस्थस्योपलक्ष्यपदस्योपलक्ष्यवाचिशब्दलक्षकत्वापेक्षयोपसंहारगतस्य "आत्मस्वरूपमित्यनेन' इत्यस्यात्मस्वरूपमित्युक्तेनार्थे-नेत्यर्थपरत्वं युक्तमित्यन्यथा व्याचष्टे-यद्वा अनेनेति पदमुपलक्ष्यविशेषणमिति । न तूपलक्ष्यवाचिपदविशेषणमिति भावः । नन्व- स्यां योजनायां "सर्वमेतदात्मस्वरूपम्' इत्यस्य स्थलनिर्देशप्रदर्शनोपक्षीणत्वात् अहंत्वंशब्दसामानाधिकरण्यहेतोः सर्वशब्द-सामानाधिकरण्यस्यानुक्तिरित्याशङ्कयाह - अस्यां योजनायामिति । यद्यपि पूर्वयोजनायामपि सर्वशब्दसामानाधिकरण्यप्रदर्शन-

मर्थसिद्धमेव, तथापि शब्दपरत्वे "सर्वमेतदात्मस्वरूपम्' इत्येतत् सर्वशब्दसामानाधिकरण्यप्रदर्शनपरं भवेत् । द्वितीययोजनायां तूपलक्ष्यनिर्देशस्थलप्रदर्शनमात्रपरमिति वैषम्यम् । द्वितीययोजनायाम् "अहंत्वमादिशब्दानाम्' इत्यत्राहंत्वमादयः शब्दा येषां त इति व्युत्पत्त्या अर्थपरत्वं द्रष्टव्यम्, शब्दस्यार्थसामानाधिकरण्यासंभवात् । ननूपलक्षणत्वेऽपि सामानाधिकरण्यं लक्षणया "घटा- काशो महाकाशः'"शाखाग्रं चन्द्रमाः' इत्यादिना द्रष्टमित्याशङ्कयाह-यद्यं त्वमादिशब्दा इति । तथापि "स ;चात्मस्वरूपम्' इत्यनेनैव सामानाधिकरण्यस्य सिद्धत्वात् अहंत्वमादिसामानाधिकरण्यं व्यर्थमित्यर्थः । सिद्धान्तेऽहमादिशब्दानां प्रयोजनमाह - अहंशब्दस्यापेक्षिकेति । प्रत्यकत्वमात्रस्य प्रवृत्तिनिमित्तत्वे सर्वेषां स्वात्मनां स्वात्मानं प्रति प्रत्यकत्वात् परामात्मन्यप्यहंशब्दप्रयो-गप्रसङ्ग इत्याशङ्कय प्रत्यकत्वस्य प्रवृत्तिनिमित्तत्वेऽपि स्वतन्त्रशब्दोच्चारयितृत्वमुपाधिरित्यभिप्रेत्याह -आपेक्षिकेति । प्रकृतेति । द्वितीयांशत्रयोदशाध्यायमारभ्य प्रस्तुतत्वादित्यर्थः । अयमस्य श्लोकस्यार्थः-अहमपि ज्ञानैकाकारः स आत्मा, त्वमपि तादृशः, सर्वमेतदात्मस्वरूपमपि ज्ञानैकाकारम् । अत आत्मसु देवाद्याकारेण भेदमोहं परित्यजेति । प्रथमं किमात्मस्वरूपैक्यपरमिति । मुक्तपरैक्यं पश्चाद् दूषयिष्यत इति प्रथमशब्दाभिप्रायः । द्वा सुपर्णाविति । सुपर्ण-साम्यात् सुपर्णौ । सयुजौ = सर्वदा सह वर्तमानौ । सत्त्वं ह्यन्तःकरणमिति छेदः । येनेतीत्थंभावे तृतीयेति । उक्तयुक्तिबलात् दुर्बलाप्युपपदविभक्तिः सोढव्येति भावः । द्वावपि कर्तृविशेषाविति । "स्वतन्त्रः कर्त्ता', "तत्प्रयोजको हेतुश्च' इति द्वयोरपि कर्तृ-संज्ञाविधानादिति भावः । चशब्देनोक्तमिति । तथाच श्रुतिरित्यत्रेति भावः । तच्च तत्र सुस्पष्टम् ।

(मुक्तावप्यनैक्यम्)

निराकरणपरत्वाच्च प्रकरणस्येति ।

"धर्माय त्यज्यते किंनु परमार्थो धनं यदि ।

व्ययश्च क्रियते यस्मात् कामप्राप्त्युपलक्षणः ।। (२-१४-१७)

पुत्रश्चेत् परमार्थः स्यात् सोऽप्यन्यस्य नरेश्वर ।

परार्थभूतः सोऽन्यस्य परमार्थो हि तत्पिता ।।
एवं न परमार्थोऽस्ति जगत्यत्र नराधिष ।
परमार्थो हि कार्याणि कारणानामशेषतः ।।
राज्यादिप्राप्तिरत्रोक्ता परमार्थतया यदि ।
परमार्था भवन्त्यत्र न भवन्ति च वै ततः ।।
ऋग्यजु सामनिष्पाद्यं यज्ञकर्म मतं तव ।
परार्थभूतं तत्रापि श्रूयतां गदतो मम ।।
यत्तु निष्पाद्यते कार्यं मृदा कारणभूतया ।
तत् कारणानुगमनाज्जायते नृप मृन्मयम् ।।
एवं विनाशिभिर्द्रव्यैः समिदाज्यकुशादिभिः ।
निष्पाद्यते क्रिया या तु सा भवित्री विनाशिनी ।।
अनाशी परमार्थस्तु प्राज्ञैरभ्युपगम्यते ।
तत्तु नाशि न संदेहो नाशिद्रव्योपपादितम् ।।
तदेवाफलदं कर्म परमार्थो मतस्तव ।
मुक्तिसाधनभूतत्वात् परमार्थो न साधनम् ।।
ध्यानं नैवात्मनो भूप परमार्थोर्थशब्दितम् ।
भेदकारि परेभ्यस्तत् परमार्थो न भेदवान् ।।
परमात्मात्मनोर्योगः परमार्थ इतीष्यते ।
मिथ्यैतदन्यद् द्रव्यं हि नैति तद्द्रव्यतां यतः ।।
तस्माच्छ्रेयांस्यशेषाणि नृपैतानि न संशयः ।
परमार्थस्तु भूपाल संक्षेपाच्छ्रूयतां मम ।।
एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः ।।'
इति प्रकरणस्येत्यर्थः । संक्षेपविस्ताराभ्यां त्विति ।
"इत्युक्तस्ते मया खाण्डेक्य परिपृच्छतः ।
संक्षेपविस्ताराभ्यां तु किमन्यत् क्रियतां तव ।।'
इति श्लोकः । अयं सम्यगर्थं इति । "यथाग्निसङ्गात् कनकम्' इति स्मृत्यानुगुण्यादिति भावः । "आत्मभावं नयत्येनम्' इत्यत्रात्म-शब्दस्य ध्येयब्रह्मापरत्वमाकर्षकपरत्वं चेति प्रथमा व्याख्या । आत्मशब्दस्य ध्यातृपरत्वमिति द्वितीया । पक्षद्वयेऽप्याकर्षकशब्दो योगिकव्युत्पत्त्या अग्निपरः । उत्तरेषु त्रिष्वपि पक्षेष्वयस्कान्त परः । आत्मशब्दस्य ध्येयपरत्वमेव, भावशब्दश्चेष्टापर इति तृतीया व्याख्या । आत्मशब्दो लोहध्यात्रोर्दृष्टान्तदार्ष्टान्तिकयोर्निष्कृष्टस्वरूपपर इति चतुर्थी । आत्मशब्दो ध्येयाकर्षकपरः । भावशब्दश्च प्राप्तिवचन इति पञ्चमीति निष्कर्षो द्रष्टव्यः । अनुसंचरन्नित्यनेन भेदो ेदर्शित इति । अनुशब्देन मुक्तसंचारस्य परमात्मसंचार-पाश्चात्यत्वकथनादिति भावः । समानशब्दोऽप्यैक्ये प्रयुज्यत इति । ननु वाक्शब्दपर्यायगोशब्दस्य

किरणे प्रयोगो न वाक्शब्दस्य किरणार्थत्वसाधकः अप्रयोजकत्वात् । अतः परिहारग्रन्थे सामानाधिकरण्यशब्दविचारोऽपि न युक्त इति चेत्-न । समशब्दाधि-कार्थस्य समानशब्देऽद्याप्यसिद्धया तथोक्तयुपपत्तेः । मुख्यार्थत्वेऽभ्युपगतेऽपीति । हरिशब्दस्य भेकादिष्विवेति भावः । स तु साधारण्यार्थ इति । सादृश्यवाचिना शब्देन लक्षणया साधारण्यं प्रतीयत इत्यर्थः । लक्षणया तत्सिद्धप्रकारमुपपादयति-तथा- हीति । साधारण्यस्यानेकनिरूप्यत्वादनेकप्रतियोगिकेत्युक्तम् । पुत्रं प्रति मातुः, श्वशुरं प्रति स्नुषाया एकस्या एव पुत्रश्वशुरौ प्रति साधारण्याभावात् एकरूपेत्युक्तम् । ताभ्यां संबन्धि धनमिति । ततश्च समशब्दार्थीभूतसदृशसंबन्धित्वं साधारणस्यास्तीति लक्ष-णात्वजभूतमुख्यार्थसंबधिबीसत्त्वात् लक्षणोपपद्यत इति भावः । सादृश्यस्य साधारणधर्मायत्तत्वात् सादृश्यवाचिशब्दः सादृश्य-निर्वाहके साधारणे वर्तत इति निष्कर्षः । एवं दृष्टान्ते समानाधिकरणसमकालादिस्थलेऽप्यमुमर्थं शिक्षयति-तथा नीलत्वोत्पलत्वे इति । द्वाभ्यां संयोगित्वेनेति । ययोः समकालत्वमुच्यते, ताभ्यां द्वाभ्यामित्यर्थः । द्रव्यकालादिषु समसमानादिशब्दा इति । यद्यपि सामानाधिकरण्यं''समकालवर्ती' इत्युदाहरणानुसारेण काले समशब्दस्य द्रव्ये समानशब्दस्य चोपपाद्यतया द्रव्यकालादिषु समानसमशब्दा इत्येव वक्तुमुचितम्, तथाप्यल्पाच्तरत्वात् क्रमाविवक्षणाद्वा नानुपपत्तिरिति द्रष्टव्यम् । युज्यत इति युगिति । अत्र केचित्-संबन्धार्थस्य ''युजिर् योगे' इत्यस्य रौधादिकस्य कर्तरि युज्यत इति रूपस्याभावात् समाध्यर्थस्य च युजेः कतर्र्येत-द्रूपसंभवेऽपि तस्यार्थस्य प्रकृतासंगतेः प्रकृतासंगेतः''युजिर् योगे' इत्यस्यैव कर्मण्येतद्रूपमिति वक्तव्यम् । तत्र च '' ऋत्विग्दधृक्' इत्यादिसूत्रेण क्विनो वा ''सत्सूद्विषा' इत्यादिना ''किष् च' इत्यनेन वा किपो वा कर्तरि विहितत्वेन कर्मण्यसंभवात् युज्यतेऽने- नेति कर्तर्येव क्विन्, पच्यते अनेनेति पाचक इतिवत् । तस्य सहशब्देन सदृशवाचिना बहुव्रीहिः । अस्ति च सहशब्दः सदृशपर्यायः । यथा-सदृशः सख्या ससखीति । तस्यास्वपदविग्रहोऽयं बहुव्रीहिः । समानं युक् गुणजात मस्येत्यर्थः । तत्र च ''उपसर्जनस्य' इति सहस्य सभावः इति । अग्नित्वोपाधेः प्रहणादिति । अपृथग्भूतस्याप्यग्नित्वप्रहाणे अग्नेर्देवताया एवाभावप्रसङ्ग इत्यर्थः । ननु वाक्य्-द्वयेन विरुद्धक्रमद्वये प्रतीयमाने कथमविरोध इत्यस्वरसादाह-किचाग्नेर्वा एतानीति । दत्तमुत्तरमिति । ''उपाधिश्च देहान्तः- करणादिः' इत्युक्तमित्यर्थः ।

प्राप्यस्य सगुणत्वायेति । न च ''विकल्पोऽविशिष्टफलत्वात्' इति सूत्रं निर्गुणविद्याव्यतिरिक्तविषयं किं न स्यात्? येन सर्वविद्याप्राप्यस्यैकरूपतया सर्वत्र सगुणत्वमेव सिध्येदिति वाच्यम्-संकोचे प्रमाणाभावादिति भावः । विद्याविकल्पश्च तत्रैव द्रष्टव्य इति । गुणयुक्तमेव प्राप्यमिति प्राप्यस्यैकरूप्यकथनेनाविशिष्टफलत्वाविष्करणाद्विकल्पोऽपि तस्मिन् वाक्य उक्तप्राय इति द्रष्टव्यमित्यर्थः । भाष्ये-यद्यपि सच्चित्त इत्यादिनेति । ''यद्ययपि सच्चितो न निर्भुग्नदैवतं गुणगुणं मनसानुधावेत्, तथाप्यन्त-र्गुणामेव देवतां भजते । तत्रापि सगुणैव देवता प्राप्यते' इति व्याख्यातमित्यर्थः । अस्य चायमर्थः-सच्चितो न निर्भुग्नदैवतं गुणगणं मनसानुधावेत् । अपहतपाप्मत्वादिगुणं दैवताद्विभक्तं यद्यपि दहरविद्यानिष्ठ इव सच्चित्तो न स्मरेत्, तथाप्यन्तर्गुणामेव देवतां भजते । तत्रापि सगुणैव देवता प्राप्यत इति । देवतास्वरूपानुबन्धित्वात् कल्याणगुणगणस्य केनचित् परदेवताऽसाधारणेन निखिलजगत्कारणत्वादिनोपास्यामानापि देवता वस्तुस्वरूपानुबन्धिसर्वकल्याणगुणविशिष्टैवोपास्यते । अतः सगुणमेव ब्रह्म तत्रापि प्राप्यमिति सद्विद्यादहरविद्ययोर्विकल्प इत्यर्थ इति । ''सोऽयं गौः' इत्यत्र विप्रतिपन्नं प्रत्याह-सोऽयं व्रीहिरित्यादेरुप-लक्षणमिति । मुख्योऽप्यस्वरस इति । जात्यंशे मुख्यत्वं व्यकत्यंशेऽमुख्यत्वमित्यर्थः । अत्यन्तामुख्यो न भवतीत्यर्थः । व्यकत्यं-शप्रहाणादस्वारस्यमिति । जातेर्जात्या सौसादृश्यवत् व्यक्तयन्तरस्य व्यकत्यन्तरेण भेदकाकारोपलम्भेन सौसादृश्याभावादि- त्यर्थः । मुख्य इत्यस्यात्यन्तामुख्यो न भवतीति व्याख्याने वीजमाह-न हि मुक्तस्येति । ''स्वरूपतो गुणतश्च यन्निरवधिकातिशयं सोऽस्य मुख्योऽर्थः' इति पूर्वं भाषितत्वादिति भावः ।

श्लोके प्रकृतोपयुक्तं पदं दर्शयति-अस्मिन् श्लोके तथैवेति । एकप्रकरणत्वज्ञापनायेति ।

"विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव ।

प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ।।

क्षेत्रज्ञः करणी ज्ञानं करणं तस्य वै द्विज ।

निष्पाद्य मुक्तिकार्यं वै कृतकृत्वं निवर्तयत् ।।

तद्भावभावमापन्नस्तथासौ परमात्मना ।

भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ।।

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।

आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ।।'

इति हि श्लोकक्रमः । श्लोके तद्भावेत्युपमानबहुव्रीहिरिति । तद्भाव इव भावोयस्य स तद्भावः, तत्समानस्वभावः । तस्य भावस्त-द्भावभाव इति व्याख्याने द्वितीयभावशब्दस्य प्रयोजनवत्तरत्वमिति भावः । भाष्यस्थतद्भावशब्दस्य श्लोकवैरूप्येण तत्पुरुषत्वमनु-पपन्नमित्यत आह-समासे व्याचिख्यासिते सति हीति ।
श्लोकभाष्ययोवैरूप्यपरिहारार्थमाह-यद्वा भाष्यस्थतद्भावशब्दोऽपीति । ननु भाष्यस्थतद्भावशब्दस्य
बहुव्रहित्वे, "तद्भावो ब्रह्मणो भावः' इति भाष्यमयुक्तमित्याशङ्कयानेकशब्दाध्याहारपूर्वकं व्याचष्टे-तद्भावेति पदे तच्छब्दवाच्यब्रह्मसंबन्धितया प्रतीयमान इति । द्वितीयभावशब्दः सत्तावाचिति । यद्यप्यस्मिन् पक्षे द्वितीयभाव-शब्दस्य परपक्ष इव वैयर्थ्यमस्ति, तथाप्यभेदस्य बाधितत्वात् पराभिमतार्थो न संभवतीत्यत्र तात्पर्यम् ।
अर्थान्तरप्रतीतिनिवारणा-र्थत्वेन साफल्यसंभवे स्वरूपव्याक्रियामात्रमनर्तकमित्यभिप्रेत्याह-यद्वा भेदरहितो भवतीति । अनन्तरनिर्दिेशो न घटत इति । भेदस्य कल्पितत्वेन कृतत्वासंभवादिति भावः । सिद्धान्ते-भेदश्च तस्याज्ञानकृतो भवेत् । देवादिभेदश्चात्मन्यारोपितः तस्य मुक्त-स्याज्ञानकृतो भवेत्, कर्मकृतो भवेत् । कर्मकृतत्वेन ज्ञातो भवेदित्यर्थः । अथवा "अभवेत्' इत्यकारप्रश्लेषः, "अपचसि त्वं जाल्म' इतिवत्, "नञो नलोपस्तिङि क्षेपे' इति द्रष्टव्यम् । प्रकर्षेण जात एकस्वरूपभेद इति छेदः । हेयार्हतापत्तेः स्वाभाविकत्वप्रसङ्गा-दिति । "ब्रह्मणः' इत्यस्य षष्ठयन्तत्वपक्षे देवादिभेदस्य तन्मूलकर्माविद्यादिदोषस्य च ब्रह्मगतत्वेनैवाभ्युपगन्तव्यत्वात् ब्रह्मावार- कस्य चाज्ञानस्य-

"ज्ञानरूपं परं ब्रह्म तन्निवर्त्यं मृषात्मकम् ।

अज्ञानं चेत् तिरस्कुर्यात् कः प्रभुस्तन्निवर्तने ।।'

इति न्यायेन निवर्तकान्तराभावात् स्वाभाविकत्वप्रसङ्ग इत्यर्थः । उपाध्यपगमे नश्यतीति श्लोकार्थ इति । "कः करिष्यति' इत्यस्य कः परिपालयिष्यतीत्यर्थ इति भावः । "असन्तम्' इत्यस्यानित्यवाचिन उपयोगमान्द्यादाह - उपाध्यभावादिति । अस्मिन् पक्षे "करिष्यति' इत्यत्र कृजधातोरुत्पादने स्वारस्यमस्तीत्यपि द्रष्टव्यम् । व्यवच्छेद्याभावादफलत्वमिति । ननु नैतद्वयवच्छेदकतयो-पात्तम् । अपितु कल्पकेऽज्ञाने नष्टे कल्पितत्वरूपसत्त्वं पुनर्भेदानुत्पत्तौ हेतुतयोक्तमिति चेत्-न । पूर्वोक्तदोष एव तात्पर्यात् ।

हृद्देशस्थ आत्मनीत्यर्थ इति । तद्भ्रामणार्थं तदन्तःप्रवेशस्यावश्यकत्वात्, "अन्तः प्रविष्टः शास्ता जानानां सर्वात्मा' "योऽन्तरो यमयति' इत्यादिप्रमाणादिति भावः । केचित्तु सर्वभूतशब्दस्यैव चेतनपर्यन्तत्वात् हृद्देशशब्देन जीवानामन्तःप्रदेश एव विवक्षित इति वदन्ति । नापि चिदचिदीश्वराणामिति भाष्यस्य मृषावाद्यभिमतैक्यनिषेधपरत्वमयुक्तम्, अचिदीश्वरयोस्तैरैक्यान-भ्युपगमादित्यभिप्रेत्य

भास्कराद्यमिमतैक्यनिषेधपरतया व्याचष्टे-जगद्ब्रह्मणोरिति । मृषवादिमतनिरासोपसंहारे इतरमतनिरासो न युक्त इत्यमिप्रेत्य तन्मतनिरासपरतयावतारयति-अथवा मृपावादिनमेवेति । (इति पुराणप्रक्रिया । अथ सप्तविधानुपपत्तिः)

(आश्रयानुपपत्तिः)

१.१.१

कथं भ्रमसंभव इति । निर्विशेषे परिकल्पितशब्दोक्तभ्रमसंभव इति शङ्का स्यात् । अतो दोषपदमिति भावः । "अनृतेन हि प्रत्यूढाः' । प्रतीषं नीताः, वैपरीत्यं प्रापिता इत्यर्थः । "तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुः, एवमेवेमाः संर्वाः प्रजा अहरहर्गच्छत्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः' इति छान्दोग्यम् । भाष्ये आदिशब्देन "नासदासीत्' इत्यादिश्रुतयो विवक्षिताः । भाष्ये जीवैक्यानुपपत्त्येति । विरुद्धधर्माध्यस्तयोर्जीवपरयोरैक्यासंभवेन धर्माणां कल्पितत्वस्य वक्तव्यतया तत्कल्पिकाऽविद्याभायचुपगन्तव्येत्यर्थः । सत्त्वेऽप्यात्मनो भ्रान्तिबाधाश्रयत्वर्योदर्शनात् न भ्रान्तिबाधा- भ्यां सद्विलक्षणत्वसिद्धिः । असिद्धिश्च हेतोः स्यात्, भ्रान्तिबाधयोरतन्निष्ठत्वादित्यत आह-भ्रान्तिविषयत्वबाधविषयत्वेति । भाष्ये भ्रान्तिबाधयोरयोगादित्यत्र शुक्तिरूप्यस्येति शेषः पूरणीयः । उत्तरत्र तद्विवरणभाष्ये "प्रतीतिभ्रान्तिबाधैरपि न तथाभ्युप-गमनीयम्' इत्युपक्षिप्य, "शुकत्यादिषु रजतादिप्रतीतेः' इति दर्शनात् । परैरपि ख्यातिबाधानुपपत्तेः शुक्तिरूप्यविषये उपन्यासाच्च । न चाज्ञानस्य जगदुपादानत्वं सदसद्विलक्षणत्वं च प्रतिज्ञाय तद्धेतुतया शुक्तिरूप्ये प्रतीतिभ्रान्तिबाधोपपादनं कतं संगतं स्यादिति वाच्यम्, उपादानोपादेययोरभेदाभिप्रायेण तथोकत्युपपत्तेः । स्वाभिन्नकायर्जनकत्वमुपादानत्वं विवर्तपरिणामोपादानलक्षणमिति कथयद्भिरुपादानोपादेयाभेदस्याभ्युपेततय शुक्तिरूप्ये ख्यातिबाधसमर्तनस्य उपादाने तत्समर्थनपर्यवसितत्वात् । ननु भामत्या-मारम्भणाधिकरणे "न हि वयमभेदं ब्रूमः, किंतु भेदं व्यासेधामः' इत्युकतेरभेद एवोपादानोपादेययोर्नास्तीति वाच्यम्, ब्रह्मसम-सत्ताकाभेदप्रतिक्षेपमात्रपरत्वात् तदुक्तेः । यद्वा प्रतीतिबाधानुपपत्त्या शुक्तिरूप्यमिथ्यात्वसिद्धौ मित्याभूतस्य मिथ्याभूतमेवो-पादानमन्वेषणीयमित्यज्ञानस्यापि सदसद्विलक्षणत्वं सिध्यतीत्यभिप्रायेण तथोकत्युपपत्तेः । केचित्तु-"अहमज्ञः' इत्यज्ञानप्रतीतेः "नेह नाना' इति श्रुत्या बाधदर्शनात् अत एव भ्रमत्वाच्च प्रतीतिभ्रान्तिबाधानामविद्याविषयत्वमेव; न शुक्तिरूप्यविषयत्वम् । उत्तरत्र शुक्तिरूप्यादिषु प्रतीतिभ्रान्तिबाधैर्मिथ्यात्वसमर्थनं युकत्यन्तरमेव; नैतद्विवरणरूपम् । "तत्र अनिर्वचनीत्वे परोक्तं हेतु विस्तरेण दूषयति' इति तत्रत्य (संक्षिप्तस्य विवरणमिति) श्रुतप्रकाशिकावाक्यमपि कथंचिन्नेयमिति वदन्ति । "ख्यातिबाधयो-श्चायोगात्' इत्यस्य खायातिबाधयोश्चायोगप्रसङ्गादित्यमुमर्थं स्फोरयति- प्रतीतिभ्रान्तिबाधान्यथानुपपत्त्येति । प्रतीतिरसद्विलक्ष-त्वसाधिका, भ्रान्तिस्तु सद्विलक्षणत्वसाधिका, बाधस्तूभयसाधारण इति विवेको द्रष्टव्यः । न च-सद्वादिनं प्रति भ्रान्तैर्हेतुत्वोप-न्यासोऽयुक्तः, तन्मते भ्रान्तित्वस्यानभ्युपगतत्वात् । बाधने भ्रान्तित्वसमर्थने च बाध एव हेतुरस्तु, किमनेन भ्रमत्वसमर्थनेनेति वाच्यम्, "अहं रजततया अभ्राम्यम्' इत्यनुभवसिद्धतया भ्रमत्वस्य सद्वादिनापेयप्रत्याख्येयतया हेतुत्वसंभवादिति भावः । सद्भाव एवमिति । परमतत्वाभावे दृष्टान्तः । ब्रह्माश्रयत्वपक्षं दूषयतीति । ब्रह्मणश्चिन्मात्रत्वेन तस्याश्रयत्वे पूर्वोक्तान्योत्याश्रयदोषा- प्रसङ्गः ।

"आश्रयत्वविषयत्वभागिनी निर्विशेष(र्विभाग)चितिरेव केवला ।

पूर्वसिद्धमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ।।'

इत्युक्तेरिति भावः । ज्ञानत्वेऽपि नैयायिकादिरीत्या जडत्वाभ्युपगमे स्वस्य स्वयाथात्म्यज्ञानविरोधित्वासंभवादाह-स्वप्रकाशत्वं विवक्षितमिति । विषयित्वलक्षणज्ञानत्वाभावात् स्वप्रकाशत्वं विवक्षितमिति केचिद्वदन्ति । ननु

ब्रह्मस्वरूपतद्विषयकज्ञानयोः साधारणं स्वरूपप्रकाशत्वं किं स्वरूपाभिन्नप्रकाशत्वम्? उत स्वरूपविषयप्रकाशत्वम्? नाद्यः, तस्य प्रमाणज्ञानेऽभावात् । न द्वितीयः, अभेदे विषयविषयिभावाभावेन स्वरूपाव्यापनादित्याशङ्कय तद्विषयव्यवहारानुगुण्यलक्षणं तद्विषयकत्वं प्रकृते विव-क्षितमित्यभिप्रयन्नाह-स्वरूपविषयज्ञानत्वे सतीत्यर्थ इति विषयवैषभ्याभावादित्यर्थ इति । विषयवैषम्याभावेन विशेषानव-

गमादित्यर्थ इत्यर्थः । न तु "विशेषानवगमात्' इत्यस्य विषयवैषम्याभावोऽर्थः । तथा सति "कथं विशेषानवगमः' इत्याक्षेपानुत्थि-तेरिति द्रष्टव्यम् । अयमेको देवदत्त इति । एक् इत्यस्याभेदोऽर्थः । स तु स्पाष्टयार्थः । "अयं देवदत्तः' इत्यभिज्ञायाः "सोऽयं देव- दत्तः' इति प्रत्यभिज्ञाया इव पुरोवर्तिनि देवदत्ताभेदविषयत्वमविशिष्यम् । न ह्यभेदे द्वैविध्यमस्ति, येन विषयवैषम्यं स्यात् । तथापि प्रत्यभिज्ञाया एव भेदभ्रमनिवर्तकत्वं नामिज्ञाया इति द्रष्टव्यम् । न च प्रत्यभिज्ञायामेकस्मिन्वस्तुनि कालद्वयसंबन्धो विषयः, नाभिज्ञायामिति वाच्यम्-ऐक्यस्य कालद्वयसंबन्धस्य चाभिज्ञाभ्यामेव सिद्धेः अभिज्ञाद्वयानवगतार्थविषयकत्वाभावे-नाभिज्ञाद्वयानिवर्त्यभेदभ्रमनिवर्तकत्वं न स्यादिति भावः । द्वित्वभ्रमः । भेदभ्रमइत्यर्थः । "सत्यत्वज्ञानत्वादिरस्ति चेत् स स्व-रूपानतिरिक्त इति दर्शयितुं स्वभावशब्दः' इति समीचीनः पाठः । "सत्यत्वज्ञानत्वस्वभावोऽस्ति चेत्' इति स्वभावशब्दो धर्म- परः । सत्यत्वज्ञानत्वादिधर्मोऽस्ति चेत्-स च स्वरूपानतिरिक्त इति दर्शयितुं स्वभावशब्द इत्यर्थः । कालद्वयदेशद्वयसंबन्धित्वं ह्यैक्यमिति । न चैतदप्यभिज्ञाद्वयसिद्धमिति प्रागेवोक्तमिति वाच्यम्, अभिज्ञाद्वये सत्यप्येकस्मिन् कालद्वयसंबन्धौ मया ज्ञात इत्यनुभवाभावात् । सत्यां च प्रत्यभिमायां तथानुभवदर्शनेनानुभवस्यैवात्र साक्षित्वात् । अनुभवापलापे चोपेक्षणीयत्वप्रसङ्गादिति भावः । द्वित्वभ्रमशब्दः सर्वत्र भेदभ्रमपरः ।

ननु न प्रमाणज्ञानत्वं निवर्तकत्वप्रयोजकम्, अपि तु भ्रमविरोधित्वमेव । तच्च ब्रह्मस्वरूपेऽपि संभवतीति शङ्कां व्युदस्यति-अधिष्ठानत्वाच्छुकत्यादिवदिति । यद्वा अनिवर्तकत्वे हेत्वन्तरमप्याह-अधिष्ठानत्वादिति । अधिष्ठानस्य भ्रमविरोधित्वं प्रमाणा-न्तरसापेक्षं, शुकत्यादौ तथा दर्शनादित्यभ्युपगम्यमाने शुकत्यादिवदेवाधिषांनस्फुरणमपि प्रमाणान्तरसापेक्षं स्यादिति प्रतिबन्द्या दूषयति-अधिष्ठानत्वस्य ज्ञानान्तरविषयत्वमिति । अधिषांनत्वनिवृविरितीति । अधिषांनत्वनिवृत्तिः प्रसज्येतेत्यर्थः । यदि शुकत्यादावधिष्ठानस्य भ्रमाविरोधित्वमापाद्यते, तर्हि तद्वदेवा ध्यासाधिषांनत्वार्थं ज्ञानान्तरवेद्यत्वप्रसङ्गः । यदि च तत्र ज्ञाना-न्तरवेद्यत्वं जडत्वप्रयुक्तम् । तर्हि भ्रमाविरोधित्वमपि जडत्वप्रयुक्तमिति न ब्रह्मरि भ्रमाविरोदित्वमिति प्रघट्टार्थः । प्रथमपक्षो दूषित इति । स्वरूपज्ञानस्याज्ञानानिवर्तकत्वे साक्षिवेद्यसुखादावप्यज्ञानप्रसङ्गात् । किंच विवरणे "अन्तःकरणपरिणामे ज्ञानत्वोपचारात्' इत्युक्तत्वेनोपचारिकज्ञानविरोधिनोऽमानत्वायोगाच्च । न च यथा सौरप्रकाशाविरोधित्वम्, एवमज्ञानस्य कल्पिततया न स्वरूपमानविरोधित्वमिति वाच्यम् । सौरप्रकाशविरुद्धतत्समसत्ताकतमोऽन्तरवत् चैतन्यप्रकाशविरुद्धतत्समसत्ता-काज्ञानान्तराभावेनातात्त्विकाज्ञानस्यैव ज्ञानेन विरोधस्य वक्तव्यतया अज्ञानासंभवात् । अहमर्थधर्मभूतवृत्तिज्ञानस्यैव विरोधित्वा-भ्युपगमे ज्ञानाज्ञानयोः समानाश्रयत्वस्य वक्तव्यतया "अहमज्ञः' इति प्रतीत्यनुसारेण जीवाश्रयत्वपक्ष एवाङ्गीकृतः स्यात्, न ब्रह्म-शब्दितचिन्मात्राश्रयत्वपक्ष इत्यादिद्रष्टव्यम् । भाष्ये-प्रपञ्चसत्यत्वरूपाज्ञानविरोधित्यस्य प्रपञ्चसत्यत्वतत्प्रतिभासरूपाज्ञान-विरोधीत्यर्थः, "प्रपञ्चसत्यत्वं तत्प्रतिभासश्च विक्षेपरूपाज्ञानम्' इति टीकायामुक्तत्वादिति द्रष्टव्यम् । अज्ञानं हि ज्ञानप्रतिबन्ध-कमिति । न च ज्ञाननिवर्त्यस्याज्ञानस्य कथं ज्ञानप्रतिबन्धकत्वमिति वाच्यम्, चरमवृत्तिनिवर्त्यस्याज्ञानस्य निरतिशयानन्द-स्वरूपात्मस्फुरणप्रतिबन्धकत्वस्य तैरभ्युपेतत्वादिति द्रष्टव्यम् । पराभ्युपगमादेवमुक्तमिति । अत एव "अनिर्वाच्याविद्याद्वित-यसचिवस्य प्रभवतः' इति प्रबन्धादौ वाचस्पतिनोक्तम् । तत्र ह्येका अनादिर्भावरूपा अविद्या देवताधिकरणोक्ता; अन्या चाध्या-सभाष्य एव प्रदर्शिता-आत्मन्यनात्माध्यासं प्रस्तुत्य "तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते' इति । तथा (अयथा) व्याख्याने हेतुमाह-न हि सत्तयेति । सत्ताया एवाभावेन सत्तया सद्वितीयत्वस्याज्ञानरूपत्वासंभवात्

सद्वितीयत्वज्ञानमेवाज्ञान- मिति भावः । सद्वितीयत्वविशिष्टब्रह्मगोचरज्ञान इति । सद्वीतीयत्वज्ञानरूपे ब्रह्मज्ञाने निवृत्त इत्यर्थः । स्वरूपं तु स्वानुभव-सिद्धमिति भाष्यं केचिदेवमवतारयन्ति-प्रपञ्चमिथ्यात्वं शास्त्रप्रतिपाद्यं चेत्, तस्यैव शास्त्रप्रतिपाद्यतया ब्रह्मणः शास्त्रात् सिद्धय-भावेनाप्रमाणिकत्वमेव स्यादित्यत्राह-स्वरूपं तु स्वानुभवसिद्धमिति ।

(तिरोधानानुपपत्तिः)

तेषां तिरोधिरिति । अत्र "उपसर्गे धोः किः' इत्यस्याप्रवृत्तावपि प्रयोगबाहुल्यात् "कृत्यल्युटो बहुलम्' इति बहुलग्रह-णात् समर्थनीयम् । ज्ञानस्यात्मासाधारणकारस्येति । इदमुपलक्षणम्; प्रत्यकत्वादेरित्यपि द्रष्टव्यम् । तस्यासाधारणत्वास्फुर-णादिति । ननु-असाधारणधर्मत्वं साधारणधर्माद्वयावृत्तिः । सा च नैल्यस्य शौकल्यव्यावृत्तिरिव प्रत्यकत्वादिस्वरूपाभिन्नैव । ततश्च प्रत्यकत्वादिस्वरूपे भासमानेऽपि तदभिन्नायाः साधारणधर्मव्यावृत्तेरभासमानत्वकथनं परोक्तरितरोधानपर्यवसितमेवेति चेत्-न; प्रत्यकत्वादौ साधारणधर्माभेदभ्रमदर्शनेन प्रत्यकत्वादिगतायाः साधारणधर्मव्यावृत्तेः स्वरूपरूपत्वे प्रमाणाभावात् । नैल्यादौ तु शौकत्याभेदभ्रमस्य कदाप्यभावेन तत्र तद्वयावृत्तेः स्वरूपरूपत्वात् । तत्रापि शौकल्याभेदभ्रमसत्त्वे स्वरूपातिरिक्त-तद्वयावृत्तेरिष्टत्वादिति द्रष्टव्यम् । अस्मदवस्थास्थानीय इति । अस्मदभिमतस्वप्रकाशधर्मभूतज्ञानविकासावस्तास्थानीय इत्यर्थः । सदा स्वप्रकाश इति यावत् । स्वरूपनाश एव तिरोधानं स्यादित्यर्थः इति । ननु-अस्तु प्रकाशाभाव एव तिरोधानम् । न च प्रकाशाप्रकाशयोर्विरोधः, अप्रकाशस्यारोपिततयाऽविरुद्धत्वात् । "त्वदुक्तमर्थं न जानामि' इत्यादौ श्रुत एवार्थे अज्ञातत्वस्या-प्यनुभूयमानत्वाच्चेति चेत्-न । अधिष्ठानयाथात्म्येऽवभासमाने अप्रकाशकल्पनाया अप्यनुदयात् । वह्नावारोपितस्यावह्नित्वस्य वह्निकार्याप्रतिबन्धकत्वात् प्रकाशारोपितस्या प्रकाशस्य प्रकाशकार्याप्रतिबन्धकत्वाच्च । "त्वदुक्तमर्थं न जानामि' इत्यादौ सत्ता-वधारणात्मकज्ञानाभावविषयत्वेन प्रकाशाप्रकाशविरोधसाधकत्वाभावात् । अन्यथा "घटः प्रकाशते, न प्रकाशते च' इत्यनुभवा-पातात् । एतेन "नास्ति, न प्रकाशते' इति विपरीतव्यवहारयोग्यत्वमेवावरणमिति निरस्तम् , विपरीतव्यवहारलक्षणावरणकल्प- नाया अपि भासमानेऽधिष्ठाने असंभवात् । आनन्दस्वरूपस्य भासमानत्वेन तदंशे आवरणस्य वक्तुमशक्यत्वाच्च । न चानवच्छि-न्नानन्दाप्रकाशादावरणमस्तीति वाच्यम्, आनन्दे भेदाभावेन तदस्फुरणस्य वक्तुमशक्यत्वात् । न च संसारदशायामानन्दे भास-मानेऽप्यनवच्छेदो न भासत इति वाच्यम्, आनन्दस्य मोक्षकालीनस्य स्फुरणे सिद्धे अनवच्छेदांशस्यापुरुषार्थत्वात् तन्मते संसारमुकत्योरविशेषप्रसङ्गात् । न च निरतिशयानन्दास्फुरणस्फुरणाभ्यां संसारमुकत्योविर्शेष इति वाच्यम्, अद्वैतिमते वैषयिकान-न्दस्य ब्रह्मनन्दातिरिक्तस्याभावेनोत्कर्षापकर्षायोगात् । आनन्दो भासते चेत् स एव मुक्तिकालीनानन्द इति संसारमोक्षयोरानन्दा-नुभवे न वैषम्यं मृषावादिमते सुवचम् । न च-यथा त्वन्मते जीवस्वरूपानन्दस्य, कैवल्यदशायामनुभूयमानस्य च स्वरूपरूप-त्वेनाभेदेऽपि स आनन्द आवृत एव तस्येदानीमसत्त्वव्यवहारात् सातिशयानन्दो भातीत्यभ्युपगम्यते, एवमिहापि स्यादिति वाच्यम्-तत्रानन्दस्यैकत्वेऽपि तस्मिन्नानन्दे तीव्रत्वमन्दत्वादिभेदोऽस्ति, ततश्च संसारदशायामान(न्दे म?)न्दानुकूल्यं स्वरूप-रूपज्ञानेन भासते, तद्गततीव्रानुकूल्यं तु कैवल्यदशायां धर्मभूतज्ञानेन भासत इति ह्यस्माकं प्रक्रिया । न तु तीव्रानुकूलत्वमपि स्वरूपरूपं स्वप्रकाशमित्यस्माभिरभ्युपगम्यते, येन दोषः स्यात् । तस्मात् तिरोधानं भासमानस्वरूपेऽनुपपन्नमिति भावः ।

(स्वरूपानुपपत्तिः)

ज्ञातृत्वादीनां परमार्थतया हीति । अनुभूतेर्निराश्रयत्वे ज्ञातुरभावादेव ज्ञातृत्वादिरप्यपरमार्थो भवतीत्यर्थः । ननु "नि-र्विषया निराश्रया' इत्येतत्परमतानुवादरूपम् । न च पर एव स्वमतदूषणावकाशमभिलषन् विशेषणं प्रयच्छति, अपितु स्वोक्ता-र्थोपयोगितयैव । प्रकृते च स्वाभिमतमिथायात्वापयोगितया तस्य विशेषणस्य साफल्यमेव

वक्तुमुचितम् । न तु परदूषणायेत्यस्वर-सादाह-यद्वा विषयाश्रयभेदानाभिति । असत्त्वप्रतिभासयोरुक्तिरिति । "निर्विषया निराश्रया' इत्यसत्तवोक्तिः, "अनुभूतिः' इति तत्प्रतिभासोक्तिरिति द्रष्टव्यम् । किं स्वरूपव्यनिरिक्तेति । अधिष्ठानब्रह्मस्वरूपव्यतिरिक्तेत्यर्थः । अनवच्छिन्नदृशिद्वयान-भ्युपगमादिति । अनवच्छिन्नाधिष्ठानभूतदृशिंस्वरूपापेक्षया अतिरिक्ताया दोषभूताया अपरमार्थभूताया अनवच्छिन्नदृशेरनभ्युपगमादित्यर्थः । अनवच्छिन्नपक्षेऽपि समानेति । दृशेरवच्छिन्नानवच्छिन्नविकल्पस्य अपरमार्थशिरोऽन्तर्गततया अपरमार्थे सर्वत्र कल्पकान्तरापेक्षाया अविशेषादित्यर्थः । काल्पनिकशब्दस्य कल्पनप्रयोजनकत्वभ्रान्ति व्युदस्यति-अपरमार्थत्वेनेत्यर्थ इति । अनुभूतेरेव दोषत्वादिति । अविद्याकल्पकदोषत्वादित्यर्थः । प्रवाहानादित्वेन परिहृतेति । "तदधीनत्वादर्थवत्' इति सूत्रे वाच-स्पतिना बीजाङ्कुरन्यायोपन्यासादिति भावः । इदं तु स्वरूपानादित्वस्याप्युपलक्षणम् । यथा निरंशेऽप्याकाशे घटस्तटस्थ एव तमुपलक्ष्य एकदेशं संपाद्य तेन संबध्यते, तद्वदविद्यापि तटस्यैव चिन्मात्रमुपलक्ष्य एकदेशरूपजीवं संपाद्य तेद संबध्यते, तद्वद- विद्यापि तटस्थैव चिन्मात्रमुपलक्ष्य एकदेशरूपजीवं संपाद्य तत्रावतिष्ठत इति नेतरेतरानयत्वम् ।

"स्वेनैव कल्पिते देशे व्योग्नि यद्वद् घटादिकम् ।

तथा जीवाश्रयाविद्यां मन्यन्ते ज्ञानकोविदाः ।।'

जीवाज्ञानयोरनादित्वे उत्पतिज्ञप्त्यप्रतिबन्धाच्चान्योन्याश्रयो न दोषः' इति जीवाश्रयाज्ञानवादिवाचस्पतिना स्वरूपानादित्व-स्याप्यभ्युपेतत्वादिति द्रष्टव्यम् । दोषस्य स्वपरनिर्वाहकत्वेनेति । नन्वेवं परिहारचातुर्विध्यात् परैरनवस्था त्रेधापरिहृतेति पूर्वो-क्तिविरोधः इति चेत्-अत्र केचित्-जीवाज्ञानवादिना प्रवाहानादित्वदुर्घटत्वस्वपरनिर्वाहकत्वानामेवोक्तत्वेन स्वरूपानादित्वस्या-नुक्तत्वात्, ब्रह्माज्ञानवादिनापि प्रवाहानादित्वस्यानुक्तत्वाच्च त्रैविध्यमेवेति वदन्ति । परमार्थत्वप्रयुक्तेति । परमार्थे वस्तुनि या उपपविरपेक्षिता, सा परमार्थत्वप्रयुक्तोपपत्तिरित्यर्थः । अपरमार्थत्वप्रयुक्तोपपत्तीति । दोषाऽप्यपरमार्थवस्तुसामग्रीकोट्यनुप्रविष्ट इत्यर्थः । अपारमार्थिकस्य वस्तुनः पारमार्थिकवस्तुसामग्रीनिरपेक्षत्वेऽप्यपारमार्थिकवस्तुसामग्रीसापेक्षत्वमस्त्येव । स्वल्पास्येन विपुलप्रासादनिगरणस्य परमार्थिकप्रसादनिगरणहेतुनिरपेक्षत्वेऽप्यपारमार्थिकप्रादादनिगरणहेतुभूतैन्द्रजालिकमन्त्रौषधादिसा-मग्रीसापेक्षत्वदर्शनादिति भावः । अधिष्ठानाध्यस्तयोरैक्यप्रसङ्ग इति । स्वपरनिर्वाहकत्वपक्षे तस्मिन्नेवाधिष्ठाने तदेवाध्यस्त-मित्यागतम् । ततश्चाधिषांनत्वाधायस्तत्वयोः परस्परविरोधाभावात् सवमपि स्वस्वरूप एव कल्पितमिति वक्तुं शक्यतया अध्य-स्तादि्भन्नमधिष्ठानान्तरं नापेक्षणीयं स्यादिति भावः ।

(अनिर्वचनीयत्वानुपपत्तिः)

व्याप्तिविरोधादिति चेदिति । सत्त्वस्यासत्त्वाभावव्याप्तत्वादिति भावः । सदसदात्मकत्वं दृष्टमिति । भ्रान्तिबाधाभ्यां सदसदात्मकतया प्रतिपन्नत्वात् तदेव स्वीकर्तुमुचितमित्यर्थः । अथस्थितौ सत्त्वमसत्त्वं वा स्यादिति । वस्तुस्थिथौ पर्यालोच्य-मानायां सत्त्वासत्त्वयोरन्यतरदेव स्यादित्यर्थः । सदसद्विलक्षणत्वं दृष्टमिति चेदिति । सन्मात्ररूपत्वेऽप्युगयरूपत्वाभावादिति भावः । अन्यथाख्यानादिभिरिति । आदिपदेनाख्यातियथाथख्यांती विवक्षिते । सत्त्वे सतीति । सत्त्वे सत्येवेत्यर्थः । भेदाग्रहेण ख्यातिबाधोपपत्तिरिति । न च भेदाग्रहस्य ख्यात्युपपादकत्वेऽपि कथं बाधोपपादकत्वमिति वाच्यम्, "वर्षकृतं दुर्भिक्षम्' इतिवदुपपत्तेः । अथवा भेदाग्रहेणेत्युपलक्षणम्-भेदाग्रहेण भेदग्रहेण च ख्यातिबाधोपपत्तिरित्यर्थः । तमर्थमुपपादयति-सत एवेत्यादिना । पुरोकर्त्यगृहीतासंसर्गभेदप्रतियोगितयानुपस्थितस्योपस्थितः ख्यातिः । तत्र गृहीतभेदप्रतियोगितया तस्य वस्तुनः प्रतीतिर्बाध इति वदन्ति ।

(प्रमाणानुपपत्तिः)

तद्विवरणरूपतामेवोपपादयति-अहमज्ञ इति । अज्ञानस्वरूपकीतर्नमिति ।
विषयावरणरूपकार्यविनिर्मुक्ताज्ञानस्वरूपकीतर्नम्-अज्ञ इति;मामन्यं चेत्यत्र तु
विषयावरणकार्यविशिष्याज्ञानकीर्तनमित्यर्थः । अत एव तिवरणव्याख्याने तत्त्वदीपने-"अहमज्ञ इत्यज्ञानस्य साश्रयत्वम्; मामन्यं च न जानामीति सविषयत्वं प्रतीयते' इत्युक्तम् । "अहमज्ञः' इति प्रतीत एवाज्ञानस्वरूपे सविष्यत्वरूपधर्मान्तरवैशिष्टयावगाहित्वेन तद्विवरणरूपत्वमिति भावः । कार्यरूपाज्ञान-व्यावृत्तिरिति । "श्रूयतां चाप्यविद्यायाः स्वरूपं कुरु(ल)नन्दन । अनात्मन्यात्मबुद्धिर्या' इत्यादावनात्मन्यात्मबुद्धेरप्यविद्याऽज्ञा-नादिशब्दप्रोगविषयतया तद्वयावृत्तिरित्यर्थः । वक्ष्यति चानात्मन्यात्मबुद्धेरप्यज्ञानशब्दवाच्यत्वम् ।
सौषुप्तिकममानमिति । सुषु-प्त्यनुवृत्तमज्ञानमित्यर्थः । अहंबुद्धिरूपस्य कार्यज्ञानस्य सुषुप्त्यनुवृत्तत्वाभावात् तद्वयावृत्तिरित्यर्थः । ननु"मामन्यं च न जानामि' इत्यनुभवः सुषुप्त्यनुवृत्ताज्ञाने न प्रमाणीकर्तुं योगयः, सुषुप्तावहमर्थस्य तदन्यस्य वा विषयस्योल्लेखासंभवादित्याशङ्कयाह-जागरि-तावस्तायामिति । सविकल्पप्रत्यक्षरूपसाक्षिणा अहमर्थतदन्यरूपविषयावच्छिन्नाज्ञानानुभवो जाग्रद्दशायाम्; तस्यैवाज्ञानस्य निर्विषयतयानुभवः सुषुप्तावित्यर्थः । ततश्च कारणाज्ञानस्य जाग्रद्दशायाम् तत्त्वशुद्धिकारमते सर्वात्मना अप्रतीतिरिति न मन्तव्यम्, साक्षिभास्यस्याज्ञानस्या=ज्ञातत्वासंभवात् । न चाज्ञानस्य निर्विषयत्वावस्था न संभवति; निर्विषयत्वेनाज्ञानानुभवश्च न संभव- तीति वाच्यम्-सुषुप्तौ प्रत्यगात्ममात्रविषयतयाऽज्ञानस्य भाने दोषाभावात् । ननु-जाग्रद्दशायां साक्षिणः "घटं न जानामि' इति विषयोल्लेखित्ववत् सुषुप्तावपि विषयोल्लेखित्वे को दोषः? न हि साक्ष्युल्लेखानुल्लेखयोर्जागरणाजागरणे उपयुज्येते; अत एव - "सर्वं वस्तु ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य सर्वदा विषय एव' इत्युक्तं विवरण इति चेत्,-सत्यम्; जाग्रद्दशायां "घटं जानामि, पटं जानामि' इति विशिष्य विषयविशेषोलोखवत् सुषुप्तिदशायां विषयाणां विशिष्योल्लेखादर्शनेन तदनुरोधेन कस्य- चिद्धेतोः कल्पनीयत्वात् । न केवलं तत्त्वशुद्धिकारदिभिराधुनिकैरुक्तम् । संप्रदायेऽपि तथैवेत्याह-जागरितावस्तायामेवेति ।
अज्ञानानुभवोऽयमिति । "अहमज्ञः; मामन्यं च न जानामि' इत्ययमज्ञानानुभव इत्यर्थः । ननु "न जानामि' इत्यत्राज्ञानमात्र-मनुभूयते, न तस्य कारणत्वमपि । तत् कथं कारणाज्ञानविषयं प्रत्यक्षमित्युच्यत इत्याशङ्कयाह-न जानामीत्याच्छादकतयेति । कार्याज्ञानस्याच्छादकत्वाभावादिति भावः ।

भाष्ये-कारणाज्ञानविषयं प्रत्यक्षं तावदिति । "अहमज्ञः, मामन्यं च न जाना'ि इत्यपरोक्षावभासः कारणाज्ञानविषयं प्रत्यक्षमिति योजना । ततश्च प्रत्यक्षमपरोक्षावभास इत्यनयर्रान पौनरुकत्यमिति ध्येयम् । भाष्ये स हि षष्ठप्रमाणगोचर इति । षष्ठप्रमाणमात्रगोचर इत्यर्थः । मात्रपदेन प्रत्यक्षगोचरत्वं निषिध्यते । प्रत्यक्षागोचर इत्यर्थः । अत एवोत्तरत्र "अभावस्य प्रत्यक्ष-
गोचरत्वाभायुपगमेऽपि' इत्युक्तम् ।

भवत्वयमपि षष्ठप्रमाणविषय इति । अत्र चोदयन्ति -"अयं तु "अहं सुखी' इतिवदपरोक्षः' इत्यत्र भाष्ये "अयम्' इत्यनेनानुभवः परामृश्यते, न तु विषयः; "अहं सुखी' इतिवदितीतिकरणावमृष्टप्रत्यक्षानुभवस्य दृष्टान्तीकरणात् । न हि 'सुखा-दिवत्' इत्युक्तम् । किंचाभावः प्रत्यक्षायोग्यः । इदं तु ज्ञानं प्रत्यक्षरूपम् । अतो नानयोर्विषयविषयिभावः संभवतीत्यस्यार्थस्यैव प्रतिपादयितुमुचितत्वात्"अयम्' इति ज्ञानपरामर्श एवोचितः, न विषयपरामर्शः । ततश्च "भवत्वयमप्यनुभवः षष्ठप्रमाणजन्यः' इत्येवावतारिकया भवितव्यमिति-तन्न, उपायस्योपायान्तरादूषकत्वात् । परोक्षप्रमाणविषयः प्रागभाव इति । परोक्षैकविषय इत्यर्थः । ततश्च परोक्षप्रमाणविषयस्य वह्नयादेरपरोक्षत्वस्यापि दर्शनात् नेदं युक्तमिति शङ्काया नावकाशः । भावग्राहकप्रमाणे-नेति । प्रत्यक्षस्य संनिकृष्टार्थमात्रग्राहितया संयोगादिलक्षणस्य पञ्चविधस्य संनिकर्षस्य भावेष्वेव संभवेन

भावग्रहणैकशीलस्यापि प्रत्यक्षस्य विशेषणतालक्षणसंनिकर्षान्तरपरिकल्पनेनाभावग्राहकत्वाभ्युपगमेऽपीति भावः । ततश्च-भाष्ये "प्रत्यक्षत्वाभ्युपगमेऽपि' इति स्पष्टमर्थे प्रतीयमाने, "भावग्राहकप्रमाणेनाभावस्य वेद्यत्वाभ्युपगमेऽपि इत्यवतारिकायां न सामञ्जस्यम्; किं च भावग्राहिणां शब्दानुमानादीनामभावग्राहित्वस्य सर्वसिद्धत्वाच्चेति चोद्यस्य नावकाशः ।

ग्राहकाभावान्न तदभावप्रतीतिरित्यर्थ इति । ग्रहणकारणीभूताधिकरणप्रतियोगिज्ञानाभावादभावज्ञानं नोत्पत्तुमर्हती-त्यर्थः; न तु ग्राहकस्याभावाज्ञानस्येत्यर्थः, उत्तरत्र "एतदुक्तं भवति' इति भाष्ये तथैव विवरणदर्शनात् । न च ग्राहकशब्दस्य ग्रहणजनकप्रतियोग्यधिकरणज्ञानपरत्वे अभावविषयकज्ञानस्य ग्राहकत्वादित्यव्यवहितशङ्काया अनुत्थानमिति वाच्यम्, आश-यानभिज्ञस्य तथा चोद्यसंभवात् । केचित्तु ग्राहकाभावात्=अभावग्राहकस्य ज्ञानस्याभावात्; न तदभावप्रतीतिः=न तदभावो- ल्लेख इत्यर्थः, "एतदुक्तं भवति' इत्येतस्य कथंचिदुपपादकत्वमात्रत्वेनाप्युपपत्तेरिति वदन्ति । ज्ञानप्रागभावस्य ग्राह्यत्व इति । अत्र प्रागित्येतदविवक्षितम्; ज्ञानाभावस्य ग्राह्यत्व इत्यर्थः । इतरथा प्रागभावस्य यावज्ज्ञानप्रतियोगिकस्यासंभवेन व्यक्ति-विशेषप्रतियोगिकस्यैव वक्तव्यतया तत्र विरोधाभावादिति द्रष्टव्यम् । अभावधर्मितयात्मनो ज्ञानमस्तीति वक्तव्यमिति । अभा-वधर्मित्वादात्मनस्तज्ज्ञानमस्तीति वक्तव्यमित्यर्थः; न तु धर्मित्वेन प्रकारेण ज्ञानमिति भ्रमितव्यम्, तेन रूपेण तज्ज्ञानस्याहेतु- त्वात् । धर्मितया प्रतियोगितयावगतिरस्ति न वेति भाष्यस्याप्ययमेवार्थः । अस्मिन् पक्ष इति । प्रत्यक्षागोचरत्वपक्षाभायुपगम इत्यर्थः । ततश्चानुमेयत्वमात्रेण कथमपरोक्षत्वविरोधः, वह्नयादावुभयदर्शनादिति शङ्का परास्ता वेदितव्या ।

घटाच्छादकमज्ञानं हि घटज्ञाने न विरुध्यत इति । अयमर्थः-घटज्ञाने सति घटाच्छादकमज्ञानं न हि विरुध्यते; घटा-ज्ञानविषयज्ञानधर्मिज्ञानाभ्यां च न विरुध्यते, भावाभावरूपत्वाभावात् ; उभयोरपि भावरूपत्वादित्यर्थः । भाष्यस्वारस्यात्, "भावरूपाज्ञानप्रत्यक्षवादे तु सत्यप्याश्रयप्रतियोगिज्ञाने ज्ञानाभावस्येव भावान्तरस्यापि नानुपपत्तिर्नियन्तुं शक्यते' इति पुरो-वादिपञ्चपादिकाविवरणग्रन्थानुसाराच्चोक्त एवार्थः । यथाश्रुतार्थग्रहणे साक्षाद्घटविषयज्ञानस्यैव "घटं न जानामि' इति ज्ञानविष-यत्वप्रसङ्गेन ज्ञानासिद्धिप्रसङ्गात् । वस्तुयाथात्म्यज्ञाननिवर्त्यमिति । उभयोर्भावरूपत्वऽपि तेजस्तिमिरयोरिव विरोधः सिद्ध इति भावः ।

भाष्ये-साक्षिचैतन्यं न वस्तुयाथात्म्यविषयमिति । साक्षिचैतन्यं वस्तुयाथात्म्यविषयकप्रमाणज्ञानं न भवतीत्यर्थः; प्रमाणज्ञानस्यैवाज्ञाननिवर्तकत्वात् । अन्यथेत्यस्याज्ञानविषयमिति संनिहितविषयत्वसंभवेऽपि विप्रकृष्टवस्तुयाथात्म्यविषयत्वान-भ्युपगमप्रतिपादकत्वमयुक्तमित्यस्वरसादाह - अज्ञानविषयत्वाभावे वेति । न हि रजतज्ञानेनेति । साधकस्य बाधकत्वायोगादि-त्यर्थः ।

भाष्ये-ननु चेदं भावरूपमप्यज्ञानमिति । अत्र चोदयन्ति-"नन्वज्ञानस्य व्यावर्तको विषयः कथं साक्षिचैतन्येनावभास्यते? प्रमाणयत्तत्वाद्विषयसिद्धेरिति । उच्यते-सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एव; तत्र ज्ञाततया विषयः प्रमा-णव्यवधानमपेक्षते, अन्यस्तु सामान्याकारेण विशेषाकारेण वा अज्ञानव्यावर्तकतया सदा भास्यते' इति पञ्चपादिकविवरण-ग्रन्थानुवादरूपमिदं वाच्यम् । तस्य चायमर्थः-कथं "मामन्यं च न जानामि; त्वदुक्तमर्थं संख्यां वा शास्त्रार्थं वा न जानामि' इति विषयावच्छिन्नमज्ञानं साक्षिभास्यं स्यात्? अज्ञानावच्छेदकस्य विषयस्य साक्षिणा भानासंभवात्; साक्षिणो बहिर्विषये नैयायिकमते मनस इव स्वातन्त्र्ाासंभवात् । इतरथा प्रमाणान्तरवैयर्थ्यप्रसङ्गात् । ततश्चाज्ञानावच्छेदकस्य घटादेः प्रमाणत एव सिद्धिरेष्टव्या । प्रमाणज्ञानं चाज्ञानविरोधि; न तु साक्षिवदज्ञानसाधकम्, येनाज्ञानं न विरुन्ध्यात् । ततश्चाज्ञानानुभवो न संभवतीति

शङ्काभिप्रायः । स्वतो मनोग्राह्यत्वाभावेऽपि परमाणोः,"ज्ञातः परमाणुः' इति ज्ञाततया मनोवेद्यत्ववत्

तत्तदाकारवृत्त्यनुपहितेन परमाणोः, "ज्ञातः परमाणुः' इति ज्ञाततया मनोवेद्यत्ववत् तत्तदाकारवृत्त्यनुपहितेन केवलेन साक्षिणा स्वतो ग्रहणायोग्यमपि वस्तु ज्ञातत्वाज्ञातत्वान्यतराकारेण सदा भास्यत एव । इयांस्तु विशेषः-वस्तुनो ज्ञाततया भादे प्रमाणव्यवधानापेक्षा, ज्ञाततायाः प्रमाणोत्पाद्यत्वात् । अज्ञाततायास्तु स्वतःसिद्धत्वादज्ञाततया भोन न प्रमाणव्यवधानापेक्षा । ततश्च सर्वमपि वस्तु प्रमाणाप्रसर-णदशायामज्ञाततया भासत एवेति न विषयभानार्थं प्रमाणापेक्षा, येनाज्ञानस्य विरोधः स्यात् । साक्षिरूपं च घटादिविषयज्ञानं नाज्ञानविरोधि, साधकतया तस्य बाधकत्वाभावादिति प्रागेवोक्तत्वादिति परिहाराभिप्रायः । एवमेव हीदं वाक्यं व्याख्यातं तत्त्व-दीपनकृता । इह तु कथं तद्विहायान्यथानूद्यत इति ।

तत्रायं परिहारः-सत्यं विवरणवाक्यं तत्त्वदीपनकृता तथा व्याख्यातम् । तथापि जडस्याज्ञानविषयत्वमनभ्युपगच्छतो विवरणकारस्य मते प्रत्यगर्थावच्छिमेवाज्ञानमभूयत इत्येव वक्तव्यम्, न तु घटादिविषयम् । ततश्च शङ्कापरिहारौ प्रत्यगर्थविषयावेव वक्तव्यावित्यभिप्रेत्य भगवता भाष्यकृता तदनुसारेण शङ्कापरिहारग्रन्थौ योजनीाांवित्यभिप्रेत्य तथानूदितमिति द्रष्टव्यम् ।

(भावरूपाज्ञानानुमानविचारः)

उपपादिताकारविशिष्टमिति । प्रत्यक्षेण न्यायानुगृहीतेनाज्ञानस्य भावरूपत्वं "न जानामि' इत्यनेनात्माश्रयत्वं च सिद्ध- मिति पूर्वमुक्तत्वेन स्वप्रागभाव्यतिरिक्तत्वस्वदेशगतत्वयोः सिद्धत्वादिति भावः । न हि तमो दीपगतमिति । दीपस्यैव प्रभाश्रय- त्वात् प्रभादेशस्य प्रभाश्रयत्वं नास्ति, "प्रभादेशः' इतिवत् "प्रभाश्रयः' इति व्यवहाराभावादिति भावः । वेद्यगतवित्त्यभिव्यक्ति-प्रागभाव इति । वेद्यगतवित्तिर्विषयाधिष्ठानचैतन्यम्, तन्निष्ठाभिव्यक्तिप्रागभाव इत्यर्थः । "वेद्यगतं चैतन्यमभिव्यक्तं भवति' इत्यु-त्तरग्रन्थानुसारादयमेवार्थः । अनुलोमव्यावृत्तिरिति । अत्र स्वप्रागभावं स्वोत्पादकादृष्टं विषयगतामज्ञाततां च व्युदसितुं क्रमेण विशेषणानीत्यपि वदन्ति ।

इत्मुत्पत्त्यनुपपत्तिरिति । दीपनिर्वापणसमसमयसौधोदरव्यापिसंतमसोत्पत्तिकारणं दुर्निरूपमित्यप्यनुपपत्तिरनुसन्धेया । निमीलने नीलप्रतिभासवदिति । अयं भावः-अस्ति तावान्निमीलितनेत्रस्य, "नीलं तमः' इति प्रतीतिः । सा तु न प्रमा, बाधि-तविषयत्वात् । तथाहि-किमत्र बाह्यं तमः प्रतीयते, उतान्तरम्? नाद्य।, बहलालोकविततते देशे बाह्यस्यान्धकारस्याभावात् । न द्वितीयः, बहिःप्रसरणशीलानां नायनरश्मीनामान्तरतमोग्राहकत्वाभावात् । इतरथा नयनान्तःस्थाञ्जनग्रहणप्रसङ्गात् । तस्मा-द्भ्रान्तिरेवेति । नीलप्रतिभानं बाधितविषयमिति । यद्यपि विवरणादौ पिहितकर्णपुटस्यान्तरशब्दोपलम्भवत् निमीलितनेत्र-स्यान्तर्मुखैर्नोचनरिामभिरान्तरं तमो गृह्यत इति "नीलं तमः' इति प्रतीतेर्गोलकान्तर्वर्तितर्तमोविषयतया प्रमात्वमेवोपपादितम् । अतस्तथैवानुवादो युक्तः-तथापि तस्य लोकविरुद्धत्वात् भ्रमत्वमभ्युपगम्येह परिहारान्तरमुपन्यस्तमिति द्रष्टव्यम् । रूपोलबिन्ध-वेलायामिति । सजातीयघटादिरूपोपलब्धिवेलायामित्यर्थः । कारणनिरूपणायापह्नवमर्हतीति । प्रयोजनार्थे चतुर्थी । प्रयोजनं च निवर्त्यमानतया, "मशकेभ्यो धूमः' इतिवत् । कारणनिरूपणाभावायापह्नवमर्हतीत्यर्थः । कारणनिरूपणं प्रसज्येतेति भया- दित्यर्थः । स्वच्छद्रव्यत्वादिति । प्रभावात् स्वच्छद्रव्यविशेंषत्वात् स्पर्शानुपलम्भ इत्यर्थः ।

(अविद्याप्रत्यक्षनिरासः)

प्रतिपन्नशब्देन भासनमुच्यत इति । न तु विषयत्वपर्यन्तम् । तथाहि सति प्रत्यगर्थस्य प्रतिपन्नत्वकथनं व्याहतं स्या-दिति भावः । अभावप्रतियोगिभूताविशदज्ञानविषयत्वमिति । अत्र चोदयन्ति-"आश्रयप्रतियोगिज्ञानं त्वविशदस्वरूपंविषयम्' इति भाष्यस्य ह्ययमर्थः-यद्यपि "अहं मां न जानामि' इत्यत्राश्रयज्ञानं प्रत्यगर्थविषयम्, तथा प्रतियोगिज्ञानमपि ज्ञानविषयतया प्रत्यगर्थविषयकम्-तथापि न तद्द्वयमपि विशदप्रत्यगर्थविषयकं, प्रत्यगर्थांशे

तयोरविशदत्वात् । ततश्च मां न जानामि=यथा विशदं भवति तथा न जानामि इत्यर्थः । मदर्थविषयकावधारणात्मकसाक्षात्काररूपज्ञानं नास्तीति पर्यवसितोऽर्थः । ततश्चाभाव-प्रतियोगिभूतज्ञानस्य वैशद्यं विद्यमानस्य प्रतियोगिविषयखमाश्रस्यावैशद्यं चाविरोधसिद्धये समर्थनीयम् । तद्विहाय तुरगारूढस्य तुरगविस्मरणन्यायेन प्रतियोगिभूतज्ञानस्यावैशद्यं कथं समर्थ्यत इति । अत्र ब्रूमः-सत्यं प्रतियोगिभूतज्ञानस्य वैशद्यमेव समर्थनीयम् । तथानि भाष्ये "आश्रयप्रतियोगिज्ञानं त्वविशदस्वरूपविषयम्' इत्युक्तेः साक्षाद्विषयप्रतियोगिभूतज्ञान एवाविशदत्वं समर्थनीय-मित्यत्यभिप्रेत्य तदुपपादनायायं संरम्भः कृतः । स्वविषयं निवर्तकज्ञानमिति । स्वविषयं निवर्तकज्ञानं कमर् । इदानीं ज्ञानं कर्तृ । स्वशब्देन प्रतियोगिविषयकं ज्ञानमुच्यते । निवर्तकज्ञानं प्रतियोगिभूतज्ञानमित्यर्थः । विद्यमानं हि स्वाश्रयमिति । स्ववृत्तिवर्तमान-

स्यापरोक्षत्वादित्यर्थः । वर्तमानर्मापरकीयं न प्रत्यक्षम् । स्वीयमप्यतीतादिकं न प्रत्यक्षम् । स्वीयमप्यतीतादिकं न प्रत्यक्षम् । स्व-वृत्तिवर्तमानं च यज्ज्ञानं तदेव विशदमित्यर्थः । ततश्च स्वरूपतो विषयतश्चेदानीमभावप्रतियोगिभूतं ज्ञानमविशदमिति पर्यवसितो- ऽर्थः । अन्यथा प्रमाणज्ञाननिवर्त्याज्ञानेति । प्रमाणज्ञानाभावानभ्युपगमे प्रमाणज्ञानस्य सत्त्वप्रसङ्गेन तन्निवर्त्यमज्ञानं कथमनु- भूयत? प्रमाणज्ञानस्य विरोधिनः सत्त्वादित्यर्थः । तत्रायं परिहार इति । ननु "विशदतदर्थप्रतीतिर्नास्ति' इति भाष्य एवास्याः शङ्कायाः परिहृतत्वात् किमिति टीकायां परिहारान्तरमुपन्यस्यत इति चेत्-न; विशदतदर्थप्रतिपत्तिनिषेधे विशदप्रतिपत्तेः स्मर-णावश्यंभावेन स्मृत्यारूढाया अपि विशदप्रतिपत्तेः सत्त्वमपेक्षितमिति हि शङ्काभिप्रायः; तत्र च यथाश्रुतभाष्येण परिहारासं- भवात् परिहारन्तरं टीकायामारब्धमित्यदोषः । यद्यपि भानसत्त्वे भासमानसत्त्वमपेक्षितमिति शङ्का मन्दा, अथापि सा मन्दविष-न्यायेन परिहर्तव्येति परिहार उपन्यस्त इति द्रष्टव्यम् । मेरुसाक्षात्कारः कथं निषिध्यत इति । यद्यपि स्वस्य मेरुसाक्षात्कारभावे- ऽपि परकीयमेरुसाक्षात्कारस्य पुराणादिनावगतस्य स्वात्मनि निषेधे नानुपपत्तिः, तथापि स्वीयमेरुसाक्षात्कारनिषेधस्थले स्वी-यमेरुसाक्षात्कारस्याप्रसिद्धत्वादिति शङ्काभिप्रायात् । इहांदृष्टचत्वरद्विरदेनेति । चत्वरीयो द्विरदश्चत्वरद्विरदः । नञर्थप्रतियोग्य-वच्छिन्नतयैवेति । यद्यप्यभावस्येव भावरूपाज्ञानास्यापि विरोधितया नञर्थत्वमविशिष्टम्-तथाप्यभावत्वपक्षे अभावस्य प्रतियो-ग्यवच्छिन्नत्वेन भाननियमवत् भावत्वपक्षे ज्ञानाविरोधित्वेनैव प्रतितिनियमाभावा(ादि)इति भावः । अभावस्य नञर्थत्वसंभवा- दिति । "भावरूपाज्ञानवादिना ज्ञानाभावत्वस्य सर्वात्मनाऽनभ्युपगमेऽपि' इति शेषः । स्वरूपावच्छिन्नाज्ञानप्रतीताविति । प्रत्य-गर्थाज्ञानप्रतीताविवत्यर्थः । स्वरूपभूतज्ञानादन्यतया तत्सिद्धेरिति । यद्यपि प्रमाणज्ञानादन्यतया तत्सिद्धावपि न निवर्त्यनिवर्त-कविरोधः, अन्ततो गत्वा प्रमाणज्ञानविरुद्धतया तत्सिद्धावपि न निवर्त्यनिवर्तकविरोधः । न हि प्रमाणज्ञानविरुद्धमित्युल्लिख्य-मानत्वमात्रेण विरोधिप्रमाणज्ञानमाविर्भूतमुपस्थितं स्यात्, येन विरोधो भवेत् । न हि "तेजोविरुद्धोऽन्धकारः' इत्युल्लेखमात्रेणा-न्धकारस्य तेजसा निवृत्तिर्भवति । इयं च शङ्कापिशाची "स्मृतेः स्मर्यमाणसमकालवर्तित्वनियमाभावात्' इति पूर्वमेव प्रतिक्षिप्ता च । ततश्च किं

वैषम्यमभिप्रेत्य "स्वरूपज्ञानादन्यतया प्रतीतिरस्तु, न तु प्रमाणज्ञानाविरोधितया' इत्युपन्यस्यते इति चेत् । अत्र ब्रूमः-प्रमाणज्ञानास्य तदानीमसत्त्वे प्रमाणज्ञानविरुद्धतयाऽज्ञानस्योल्लेखः साक्षिणा न युक्तः, ज्ञातत्वाज्ञातत्वोपरागाभावे साक्षिणः स्वाध्यस्तविद्यमानमात्रग्राहित्वात् । तथाच प्रमाणज्ञानस्य साक्षिणोल्लेखमभ्युपगच्छता प्रमाणज्ञानस्य सत्त्वमभ्युपगन्त-व्यमिति । न हि स्वरूपभूतं ज्ञानं साश्रयं सविषयं चेति । यद्यपि स्वरूपज्ञानस्याज्ञानादिभासकस्य सविषयत्वमस्ति, तथापि साश्रयत्वाभावेन द्वित्वावच्छिन्नाभावमभ्युपेत्य तथोक्तमिति द्रष्टव्यम् । यद्वा "मामकं न जानामि' इति प्रत्यगर्थकर्मकत्वस्य ज्ञाने प्रतीते स्वरूपज्ञानस्य स्ववृत्तित्वविरोधेन प्रत्यगर्थविषयत्वाभावमभिप्रेत्य स्वरूपज्ञानस्य सविषयत्वाभावकथनमिति द्रष्टव्यम् । ननु "मामहं न जानामि' इत्यत्र न नञर्थप्रतियोगिनि ज्ञाने साश्रयत्वसविषयत्वप्रतीतिः, येनायं दोषः स्यात् । अपितु नञर्थ एवाज्ञान इत्याशङ्कय तत्रापि प्रत्यगर्थविषयत्वं तदावरणत्वम्; तच्च तद्विषयकज्ञानप्रतिबन्धकत्वमिति

घट्टकुटीप्रभातवृत्तान्त इत्याह - स्व- रूपं किमाश्रयतयेत्यादिना । स्वस्मादन्येन केनापीति । स्वरूपभूतज्ञानान्यमात्रार्थकत्वस्य परेणोक्ततया तदन्येन येन केनाप्य-श्रितत्वमात्रं सिध्येदिति भावः । प्रमाणज्ञानप्रतीत्यवश्यंभावादीति । तत्प्रतीतौ प्रत्येतव्यस्य प्रमाणज्ञानस्य सत्त्वमावश्यकमिति भावः पूर्वोक्तो द्रष्टव्यः । प्रतीयते चेति व्याख्येयं पदम् । न तूभयाभ्युपगत इत्युक्तमिति । न तूभयाभ्युपेत एक इत्युक्तमित्यर्थः । "उभयाभ्युपेतो ज्ञानप्रागभाव एव "अहमज्ञो मामन्यं च न जानामि' इत्यनुभूयत इत्यभ्युपगन्तव्यम्' इति भाष्य उक्ततया न तदपलापश्चोदनीयः ।

न तु भ्रमवेलायामपि विद्यमानमिति । यद्यपि स्वानुभवैकस्वभावत्वस्यापि भ्रमवेलायां विद्यामानत्वमस्त्येव, अन्यथा तेन हेतुना अज्ञानानुभवप्रतिक्षेपायोगात्-तथापि तादृशस्य स्वानुभवैकस्वभावत्वस्य भ्रमवेलायां विद्यमानत्वं न पराभ्युपगतम्, अज्ञानानुभवस्वभावत्वस्याप्यभ्युपेतत्वादिति विशेषः ।

नैतदित्यादिना दूषयतीति । ननु-सिद्धान्तेऽपि "पराभिध्यानात्तु तिरोहितम्' इत्यादि कथमनुपपादनीयम्? अतिरोहि-तापहतपाप्मत्वाद्यवस्थस्य पुण्यापुण्यरूपपरमात्मसंकल्पेन तिरोधानं न संभवत्येव, प्रकृत्यात्मत्वस्वतन्त्रात्मत्वभ्रमशून्यावस्थायां कर्मणोऽप्रसक्तेः । अतस्तिरोधानानन्तरं पराभिध्यानस्य लब्धसत्ताकत्वम्, तस्मिश्च सति तिरोधानमित्यन्योन्याश्रय इति चेत्-न । कर्मतिरोधानयोर्बीजाङ्कुरन्यायेन प्रवाहानादितयाऽदोषात् । तन्मते अविद्याया एकत्वाभ्युपगमेन प्रवाहानादित्वानभ्युपगमादिति भावः । यौगपद्यपक्ष इति । यद्यपि हेत्वन्तरेण तिरस्कृतमिति पक्षो न यौगपद्यपक्षः, तस्य दूषितत्वात्-तथापि अनवस्था चेत्यत्र

चशब्दः पूर्वोक्तयौगपद्यपक्षेऽनुभवपूर्वकस्तिरस्कारः, तिरस्कारपूवर्कोऽनुभव इति पक्षद्वयोक्तदूषणद्वयमपि सूचयतीति भावः । ज्ञानानिवर्त्यदूषणद्वस्यापीति । इदं च तिरस्कारकहेत्वन्तरस्याननुभूयमानस्यैव काचादिवत्तिरस्कारकत्वमित्यभिप्रेत्योक्तम् । यदा तु तदपि हेत्वन्तरं हेत्वन्तरतिरस्कृतेनानुभूतमेव तिरस्कारोतीत्यभ्युपगम्यते तदानवस्थैवेति द्रष्टव्यम् ।

अनुमतिप्रदाने (मतप्रदर्शने) वर्तत इति । पक्षन्तरपरिग्रह इत्यर्थः । यः सांशः सविशेषः इत्यादेः अज्ञानकार्यं न संभवतीत्यन्तस्य भाष्यस्यायमर्थः- अविशदप्रकाशत्वं हि अविशदत्वविशिष्टं प्रकाशत्वम् । अविशदत्वं चाप्रकाशमानत्वम् । अप्रकाशमानत्वं च धर्मद्वारा धर्मिगतम् । प्रकाशमानत्वं च साक्षाद्धर्मिगतम् । ततश्चाप्रकाशमानधर्मकत्वे सति प्रकाशमानत्व-मविशदप्रकाशत्वमित्येवावगन्तव्यम् । न त्वविशदत्वप्रकाशमानत्वयोः साक्षादेकनिष्ठत्वम्, विरोधात् । य आकारोऽविशदः, तत्र प्रकाशमानत्वस्याभावेनाविशदप्रकाशमानत्वाभावात् । यश्च प्रकाशमानः, तत्राविशदत्वलक्षणाप्रकाशमानत्वाभावात् ।

ततश्चाविशदत्वलक्षणमप्रकाशमनित्वं धर्मद्वारकम्, प्रकाशमानत्वमद्वारकमित्येवाभ्युपगन्तव्यम् । ततश्च "निर्धर्मके ब्रह्मण्यविश-दप्रकाशमानत्वं न संभवति' इति टीकाग्रन्थस्याप्यत्रैव तात्पर्यम् । विशदस्वरूपं प्रागस्ति न वेति विकल्पे विशदस्वरूपस्य प्राग-सत्त्वे विशदस्वरूपस्यागन्तुकत्वेनानित्यत्वप्रसङ्ग एवापादनीयः । न मोक्षस्य, व्यधिकरणत्वात् । किं च मोक्षस्याविद्यानिवृत्ति-रूपत्वेनाभावरूपतया कार्यत्वेऽपि नानित्यत्वापादनं युक्तमित्याशङ्कय मोक्षस्येत्येतद्वयाचष्टे-मुक्तस्वरूपस्येति । वैशद्यं च भावरूपमिति । विशदस्वरूपं च भावरूपमित्यर्थः ।

तदनवभासेऽज्ञानानुभवायोगादिति । प्रमाणज्ञानानवभासे तदन्यत्वानाज्ञानानुभवायोगात् प्रमाणज्ञानस्यावभासोऽपे-क्षितः ततश्चावभास्यमानस्य प्रमाणज्ञानस्यापि पूर्वोक्तरीत्या सत्त्वमपेक्षितमिति तदन्यरूपमज्ञानं कथमवभासेतेत्यर्थः । निर्वि- कल्पकेन वा सविकल्पकेन वेति । नित्येन वा, अनित्येन वेत्यर्थः । निर्विकल्पकसविकल्पकशब्दयोनिष्प्रकारकसप्रकारकपरत्वे परमतेऽज्ञानान्तःकरणतद्वर्मादिभासकसाक्षिचैतन्यस्वरूपस्य निष्प्रकारकत्वाभावात् अखण्डार्थवाक्यजन्यस्य वृत्तिरूपज्ञानस्य निष्प्रकारकत्वदर्शनेन वृत्तिज्ञानस्य सप्रकारकत्वनियमाभावच्च निर्विकल्पकसविकल्पकशब्दाभ्यां

साक्षिस्वरूपचैतन्यवृत्तिज्ञान- परिग्रहं सिद्धवत्कृत्य दूषणानुपपत्तेः नित्यानित्यज्ञाने एव निर्विकल्पकसविकल्पकशब्दाभ्यां विवक्षिते इत्येव युक्तमिति द्रष्टव्यम् ।

अविद्यानुमाननिरासः

भाष्ये - हेतोरनैकान्त्यमिति । अप्रकाशितार्थप्रकाशत्वरूपलिङ्गजन्यायाः स्वप्रागभावेत्यादिसाध्यविषयकानुमिते-रप्यप्रकाशितार्थप्रकाशकत्वं स्वीकर्तव्यम्, इतरथा तस्याः प्रकाशितप्रकाशकत्वमप्रकाशकत्वं वा स्यात् ततश्चा तस्याबनुमितौ हेतुसत्त्वादनुमितिविषयीभूताज्ञानावारकाज्ञानानभ्युपगमेन स्वविषयावरणपूर्वकत्वलक्षणसाध्याभावेन हेतोरनैकान्त्यमित्यर्थः । यद्यपि परैः परोक्षस्थलमात्र एव वृत्तिनिर्गमाभविनाज्ञानानिवर्तकत्वस्याभ्युपगमेन परोक्षवृत्तिमात्रे व्यभिचारः सुवचः, तथापि परोक्षस्थले विषयावच्छिन्नचैतन्यस्थाज्ञानानिवृतावपि प्रमातृगताज्ञाननिवृत्तेरभ्युपेतत्वात् परोक्षज्ञानमात्रे व्यभिचारो नोद्भावित इति वदन्ति । केचित्तु इदमुपलक्षणं परोक्षज्ञानमात्रस्येति मन्यन्ते । अत्र जडविषयकज्ञानमात्रे व्यभिचारश्च बोध्यः । जडावारका-ज्ञानाभावात्, जडस्याप्रसक्तप्रकाशकत्वेन परैरावरणानभ्युपगमात् । न च जडावच्छिन्नचैतन्यावारकमज्ञानं संभवतीति वाच्यम्, घटविषयकज्ञानस्य घटावच्छ्न्चैतन्यावारकाज्ञाननिवर्तकत्वस्य भिन्नविषयत्वेनासंभवात् । न च "सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यव-स्थिते' इत्युक्तरीत्या घटादिज्ञानमपि तदवच्छ्न्नचैतन्यविषयमिति वाच्यम्, "न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्च- नैनम्' इत्यादिश्रुतिविरोधात् । तथा हि सति "घटोऽस्ति' इति ज्ञाने सद्रूपब्रह्मस्फुरणेन ब्रह्मसाक्षात्कारादविद्यानिवृत्तिप्रसङ्गः । न च तस्य ब्रह्ममात्रविषयकत्वाभावान्नाज्ञाननिवर्तकत्वमिति वाच्यम्, "दण्डी देवदत्तः' इति विशिष्टज्ञानस्य विशेष्याज्ञाननिवर्त-कत्वानापत्तेरितत्यादि दूषणं द्रष्टव्यम् । तस्य प्रमाणज्ञानस्याप्रकाशितार्थप्रकाशकत्वात् इत्यस्यानन्तरं "तस्य हेतोः' इति शेषः पूरणीयः । अतः स्वविषयावरणाज्ञानान्तरसाधनत्वे सतीत्यस्य नान्वयानुपपत्तिरिति द्रष्टव्यम् । तद्विरोधादेव न हेतोरनैकान्त्य-मिति । न चासल्लिङ्गजन्याय अप्यनुमितेर्विषयाबाधेन प्रमात्वसंभवान्न विरोध इति वाच्यम्, असल्लिङ्गस्य प्रमायामसामर्थ्यात् । वह्निमत्पर्वते व्यभिचारिलिङ्गजन्यानुमितेरपर्वतीयवह्निविषयतया वा पर्वतस्थापाषाणादौ वह्नित्वविषयतया वा भ्रमत्वावश्यंभा- वात्, लिङ्गोपहितलैङ्गिभानेन भ्रमत्वावश्यंभावाच्चेति भावः । तत्र वृत्त्यभावादिति । अप्रकाशिकार्थप्रकाशकत्वस्याबाध्यव्यव-हारानुगुण्यरूपप्रमात्वपर्यवसितस्य तत्रानुमितावभावादिति भावः । अज्ञानानुमितेः प्रमात्वे प्रकाशितार्थप्रकाशकत्वस्य व्यभिचा-रित्वावश्यंभावेन व्यभिचारिहेतोः प्रमाजनकत्वविरोधः, अप्रमात्वे प्रमात्वरूपहेतोव्यभिचारित्वेन सल्लिङ्गत्वावश्यंभावेन तस्या-प्रमाजनकत्वविरोध इत्यभिप्रायेण परिहरति - उच्यत इत्यादिना । अन्यतराभावेऽपि साध्यसिद्धयभावादिति । ननु ज्ञानसौष्ठव-मात्रेणापि साध्यं सिध्यतीति चेत् । सत्यम् । तदपि हेत्वनैकान्त्येन सिध्यतीत्यत्र तात्पर्यात् । अभावाद्विवेचनमात्रं क्रियत इति । न चाभावविवेकस्याप्रकाशितस्य प्रकाशकतया व्यभिचारस्तदवस्थ इति वाच्यम्, अभावविवेकावारकाज्ञानसत्त्वेन तन्निवर्तकत्व-स्यानुमितौ संभवेन व्यभिचाराभावात् । अहमर्थधर्मभूतेति । धर्मभूतज्ञानभिन्नेनेत्यर्थः । अज्ञानसिद्धावनुमानप्रामाण्यमिति । उक्तीरीत्या अस्याभावविवेचनुमितित्वेन व्यभिचाराभावादिति भावः । भावरूपाज्ञानसिद्धिरिति । भावरूपतयाऽज्ञानसिद्धिरि- त्यर्थः । ज्ञातुरपि तत्कल्पितत्वादिति । ततश्चाज्ञानकल्पिताहमर्थधर्मभूतज्ञानस्यागन्तुकस्यानाद्यज्ञानभासकत्वासंभवेन । अनाद्य-ज्ञानभासकं नित्यं साक्षिचैतन्यमभ्युपेयमिति भावः । तदुत्तीर्णसाक्षिचैतन्येनेति ननूत्तीर्णचैतन्यसिद्धौ भावरूपाज्ञानसिद्धिर्नापे- क्षिता । साक्षिसिद्धेस्तदेकोपायत्वाभावात्, धारावाहिकज्ञानसुखादिभासकत्वोनापि सिद्धिसंभवात् । किंच "मामन्यं च न जानामि' इति साक्षिचैतन्येनाज्ञानसिद्धौ साक्षिणोऽहमर्थोत्तीणर्त्वसिद्धिरपि नोपजीव्या । न हि "अयं घटः' इति ज्ञानेन घटसिद्धौ घटज्ञा- नस्य देहान्तःकरणात्मधर्मत्वादिविवेकोऽपेक्षित इति चेत्-सत्यम् । तस्याः प्रणाड्य अपि परैरुपन्यस्तत्वात्तद्रीतिमनुसृत्यान्योन्या- यश्रय उपन्यस्त इति द्रष्टव्यम् । भाष्ये-सत्यपि दीप इति । ज्ञानमनुत्पाद्य विषयप्रकाशकत्वायोगादित्यर्थः । ततश्च ज्ञानेन सह-तस्यप्रकाशकत्वमस्तीति

शङ्का निरस्ता । असिद्धिः फलतिेति । ज्ञानस्यैव हि साक्षात् प्रकाशकत्वमिति तस्यार्थ इति भावः । इन्द्रियाणामित्यनेन तृतीयपक्ष इति । "तर्हीन्द्रियाणामप्युपकारकत्वेन तेषामप्यप्रकाशितार्थप्रकाशकत्वमङ्गीकरणीयम्' इति ग्रन्थेनेति भ्रमितव्यम्, एतस्य हेत्वभावसमर्थनपरस्य तद्विरुद्धानैकान्त्यसमर्थनाभिप्रायानुपपत्तेः । "नास्माभिर्ज्ञानतुल्यप्रकाश-कत्वाभ्युपगमेन' इत्येतत्पर्यन्तभाष्यग्रन्थस्य साक्षात्प्रकाशकत्वरूपपक्षव्युदासकत्वेन पक्षान्तराप्रतिक्षेपकत्वात् । ननु यदि सर्वत्र ज्ञानस्यैव प्रकाशकत्वम्, तर्हीन्द्रियस्य प्रकाशकत्वं न स्यादित्याशङ्कयेष्यापत्त्या परिहरति भाष्ये-इन्द्रियाणामपि ज्ञानोत्पत्ति-हेतुत्वमेवेति । मात्रचार्थपरिच्छेदव्युदास इति । अत्र "प्रमाणे द्वयसज्घ्नञमात्रचः' इति मात्रच्प्रत्ययः प्रमाणार्थः । विरोधिनि-रसनपर्यन्तत्वरूपं प्रकाशकत्वं न संप्रतिपन्नमित्यर्थः । ननु "क्षीरमात्रं पिब' इत्यत्रेवोत्तरपदत्वनियतव्यवच्छेदार्थकं मात्रपदम् । तथा हि सति, "विरोधिनिरसनमात्रं न संप्रतिपन्नम्' इत्युक्ते "इतरसहितं तु संप्रतिपन्नम्' इति प्रतीयेत । अतो यथोक्त एवार्थः । तद्धि साध्यं न संप्रतिपन्नमिति । ततश्च भाष्ये संप्रतिपन्नमिति शेषः पूरणीय इति भावः । नन्वपकाशितार्थप्रकाशकत्वहेतौ विक- ल्पेन दूषितेऽपि इन्द्रियादिव्यभिचारवारणार्थं भासमानत्वविशेशिततया पूर्वमुपन्यस्तो हेतुनर् दूषित इत्याशङ्कय विशेष्यदूषणादेव विशिष्टोऽपि दूषित इत्याह-भासमानत्वे सत्यप्रकाशितार्थप्रकाशकत्वादिति हेतौ विशेषितेऽपीति ।

अनुमाने पक्षस्योभयसिद्धत्वस्यापेक्षितत्वान्नेदमनुमानरूपम्, अपितु प्रतिकूलतर्करूपमित्यभिप्रयन्नाह - अथास्यानु-मानस्येति । प्रयोगशब्दस्यानुमान एव प्रयोगप्रसिद्धिमाशङ्कयाह-तर्कस्यापि व्याप्तिमूलत्वादिति । यथाक्रममनुमानत्रयमिति । प्रतिकूलतर्कत्रयमित्यर्थः । ननु कथमेषामेतदनुमानप्रतिरोधित्वम्? प्रत्युस्वविषयावरणस्वदेशगतेतिविशेषणानुकूलत्वमेव । ताभ्यां हि विशेषणाभ्यां ज्ञानसमानाश्रयं ज्ञानसमानविषयं चा(ह्य)ज्ञानं साध्यते । तत् कथं प्रकृतानुमानविरुद्धमिति चेत्-न,अर्थानव- बोधात् । स्वदेशगतत्वस्वविषयावरणत्वस्वनिवर्त्यत्वानां साधनं चिन्मात्राश्रितत्वचिन्मात्रविषयत्वप्रतिकूलं यथाक्रममनुमानत्रयम् अज्ञानं पक्षीकृत्योच्यत इत्यर्थः । अज्ञानं न प्रमात्राश्रितं, नापि प्रमेयजडविषयकम्, अपितु चिन्मात्राश्रितं चिन्मात्रविषयकं चेति वदतः स्वदेशगतस्वविषयावरणेत्यनुमानोक्तिर्विरुद्धेति पर्यवसितोऽर्थः । ज्ञानानाश्रयत्वप्रसङ्ग इत्युक्त इति । अज्ञानं चेत्, ज्ञानं नाश्रयेदित्यर्थः । ब्रह्मणो ज्ञाननिवर्त्याज्ञानत्व इति । ज्ञाननिवर्त्याज्ञानविषयत्व इत्यर्थः । उत्तरोत्तरज्ञानानां सपक्षत्वमपि ह्युप- पद्यत इति । अपिशब्दो भिन्नक्रमः । अज्ञानानुमितिवत् उत्तरोत्तरमानानामपीत्यर्थः । अतो भाष्योक्तस्याज्ञानसाधनप्रमाणज्ञान- स्यापि दृष्टान्तत्वं न विरुध्यत इति द्रष्टव्यम् । यद्वा अज्ञानसाधकप्रमाणज्ञानस्योभयसंप्रतिपन्नत्वाभावात् उत्तरोत्तरमानानां सपक्ष-त्वमुक्तमिति द्रष्टव्यम् । न वस्तुनो विनाशकमिति । प्रागभावस्याभावरूपस्यावस्तुत्वात् वस्तुत्वेऽपि ज्ञानस्य स्वप्रागभावविना-शरूपत्वेन विनाशकत्वाभावाद्वा न बाध इति भावः । व्यतिरेकव्याप्तिं द्विधा दर्शयतीति । ईश्वरयोगज्ञानादौ शक्तिविशेषोपबृंह-णविरहरूपविशेषणविरहेण मुद्गरादौ ज्ञानत्वरूपविशेष्यविरहेणेति दर्शयतीत्यर्थः । भाष्ये-अज्ञानं च दृष्टमिति । ज्ञानभिन्नं च दृष्टमित्यर्थः ।

पूर्वभ्रान्तिज्ञानोत्पन्नानामितीति । भ्रान्तित्वेन ज्ञायमानपूर्वज्ञानोत्पन्नानामित्यर्थः । बाध्यज्ञानोत्पन्नानामिति यावत् । न तु वस्तुसत भ्रान्तित्वं विवक्षितम्, प्रमितिजन्यभयस्यापि भ्रमरूपबाधकज्ञानेन निवृत्तिदर्शनादिति द्रष्टव्यम् । "क्षरिकत्वेन स्वय-

मेव नश्यतीति भाष्यमयुक्तम्; दीपज्वालादौ व्यभिचारात्, तस्य कारणनाशनाश्यत्वेन स्वयमेव नाशाभावात् । किंच नाशका-भावेऽपि नाशे अहेतुककार्योत्पविप्रसङ्गः' इत्याशङ्कय "क्षणिकत्वात् स्वयमेव नश्यति' इत्यस्य कारणनाशाद्यनाश्यं क्षणिकं फलविनाश्यमित्यर्थ इत्याह - फलविनाश्यानि द्वीति । उक्तविशेषणेनेति । यत् क्षणिकं तत् फलविनाश्यमित्युक्ते ज्वालादौ व्यभिचारः स्यात् । समवायिकारणनाशाद्यनाश्यं क्षणिकं फलविनाश्यमित्युक्ते तु न व्यभिचार इति भावः । तथा भयाद्यपीति । तथा च भयाद्यपीत्यर्थः । तर्हि सदा भयसंततिरुपलभ्येतेति । नन्वयं

दोषोऽक्षणिकत्ववादिनोऽपि समान एव, भयस्याक्षणिकत्वे सर्वदोपलब्धिप्रसङ्ग इत्यापादनसंभवादिति चेत्-सत्यम् । कस्यचित् तटस्थस्येदृशशङ्कासंभवात् । केचित्तु-बाधकज्ञानेन तेषामनाशे उत्पन्नबाधकज्ञानस्यापि पुंसो भयोपलम्भः किं न स्यादित्याशङ्कय, किं पूर्वभयोपलम्भ आपाद्यते, उतोत्तरभयोपलम्भ इति विकल्प्य, पूर्वस्य स्वत एव नष्टत्वात् उत्तरस्य च कारणाभावेनानुात्पत्तेर्न भयोपलम्भप्रसङ्ग इत्याह भाष्ये-क्षणिकत्वेन तेषामि-त्यादिनेति टीकातात्पर्यं वदन्ति । अनन्तरनिवृ रन्यथासिद्धिमाहेति । अत्र केचित्-"क्षरिकत्वेन तेषां स्वयमेव नाशात्' इति ग्रन्थेनैव यावद्बाधं भयस्वरूपानुवृत्तेरनन्तरनिवृत्तेश्च हेतोरन्यथासिद्धिः संभवति । किं च "कारणनिवृत्त्या पश्चादनुत्पत्तेः' इत्यने-नानन्तरनिवृत्तेरन्यथासिद्धरपि दुर्वचा, तस्य ग्रन्थस्य तदन्यथासिद्धयुपपादकत्वाभावादिति चोदयन्ति । ननु तन्निवृत्तिर्दोषनिवृ- त्त्या चेत् "नायं सर्पो रज्जुरेषा' इति ज्ञानस्योपदेशो न स्यादित्याशङ्कय रज्जुत्वमानस्य रज्जुत्वरूपविशेषादर्शनरूपदोषनिवृत्ति- द्वारा सर्पपारमार्थ्याभिमानरूपभ्रमोत्पविप्रतिबन्धमुखेन भयानुत्पत्तिहेतुत्वमित्यभिप्रयन्नाह-नायं सर्पो रज्जुरेषेति ज्ञानमिति । स्वविषयव्यवहारहेतुरिति दृष्टान्तार्थम् । यथा साक्षात् स्वविषयव्यवहारहेतुः, नैवं भ्रमनिवृत्तौ साक्षाद्भेतुरिति भावः । न च विशे-षादर्शनरूपदोषस्य तन्निवर्त्यत्वाभ्युपगमेऽपि ज्ञानस्य वस्तुनाशकत्वाभ्युपगमप्रसङ्ग इति वाच्यम्, भावस्यैव विनाश्यत्वानभ्युप- गमेन विशेषादर्शनस्य विनाश्यत्वाभ्युपगमे दोषाभावात् । न च सिद्धान्ते भावातिरिक्ताभावानुभ्युपगमाद्विशेषादर्शनमपि भाव एवेति वाच्यम्, ज्ञानं स्वप्रागभावव्यतिरिक्तविनाशकं नेत्यभ्युपगमे विरोधाभावादिति भावः ।

(अनिर्वचनीयत्वानुपपत्तिः)

विद्यमानभेदाग्रहणेति । विद्यमानस्य भेदस्याग्रहणेत्यर्थः । स्वविषयान्यथात्वेति । अन्यस्यान्यात्मनाऽवभासेत्यर्थः । अत्र, अन्यस्यान्यात्मनेत्येव भ्रान्तिस्वरूपम्; इतरांशेन तत्कार्यकारणयोः कीर्तनमिति द्रष्टव्यम् । स्वविषयोल्लेखमात्रेणेति । किमनिर्वचनीयोल्लेखित्वादासां प्रतीतीनां तत्र प्रामाण्यम्, उत सतो वाऽसतो वा प्रतीतिभ्रान्तिबाधविषयत्वासंभवादनिर्वचनीयत्वं कल्प्यत इत्यर्थः । उपपत्तिनिरपेक्षाणामेवैषां घयादिविषये "अयं घटः' इति प्रत्यक्षस्येव तत्र प्रामाण्यम्, उतोपपत्तिभिर्निष्कृष्यमा-णानामेवैषामिति पर्यवसितोऽर्थः । प्रतीत्युल्लिख्यमानमिति । न च विषयत्वमपि ह्युल्लिख्यमानत्वमेवेति प्रतीत्युल्लिख्यमानमेव प्रतीतिभ्रान्तिबाधोल्लिख्यमानमित्युक्ते प्रयोज्यप्रयोजकाभेद इति वाच्यम्, उल्लिख्यमानमेवोल्लिख्यमानतयाऽभ्युपगन्तुं युक्तमित्यर्थ-कत्वेनादोषात् । विस्तरार्थं परमातमनुवदतीति । ननु प्रतीतिभ्रान्तिबाधौरज्ञानस्यानिर्वच नीयत्वं प्रागुपन्यस्तम् । अधुना शुक्तिरूप्ये प्रतीतिभ्रान्तिबाधा उपन्यस्यन्त इति वैरूप्यात् कथमेतस्य पूर्वोक्तविस्तररूपत्वमिति चेत्-न, पूर्ववाक्यस्यापि शुक्तिरूप्यविष- यत्वेन विरोधाभावात् । नन्वेवमपि "शुक्तयादिषु रजतादिप्रतीतेः' इत्यादिभाष्यस्य पूर्वोक्तार्थविस्तररूपत्वं न संभवति । पूर्वं हि शुक्तिरूप्यादेः प्रतीतिभ्रान्तिबाधविषयत्वं सिद्धवत्कृत्य तदन्यथानुपपत्त्याऽनिर्वचनीयत्वं साधितम् । इदानीम् "अन्यस्यान्यथा-भानायोगाच्च' इत्यन्यथाख्यात्यसंभव एव प्रतिपाद्यते । कथमनयोः संकोचविस्तररूपत्वमिति चेत्-न; अन्यथाख्यातिरूपभ्रमा-संभवात् सद्भिन्नविषयत्वेन च भ्रमत्वस्योपपाद्यत्वात् तादृशभ्रमविषयत्वानुपपत्तिरेवेहापि प्रमाणीकियत इति संक्षेपविस्तररूपत्वे नानुपपत्तिरिति द्रष्टव्यम् । अस्ति चेद्यथार्थैव प्रतीतिरिति । इदं च दूषणं धर्मधर्मिणोर्मिथस्तादात्म्यपक्षेऽपि समानम् । ज्ञानगतमन्यथात्वमित्यत्र किं शुक्तिज्ञानस्य रजतज्ञानत्वमन्यथात्वमित्यर्थः, उत शुक्तिज्ञानस्य रजतरूपत्वमन्यथात्वमिति विकल्प्याद्यं दूषयति-विषयोऽन्यो ज्ञामन्यदेवेति नोपपद्यत इति । अन्यविषयकज्ञानेऽन्यविषयकज्ञानत्वं नास्तीत्यर्थः । ततश्चा- सतो ज्ञानन्तरतादात्म्यस्य ख्याने असत्ख्यातिप्रसङ्गः इति भावः । द्वितीयं दूषयति-आत्मख्यातिप्रसङ्गश्चेति । न हि पुरोवर्तिनि रजतधर्मिसंबन्ध इति । न हि पुरोवर्तिनि रजताभेद इत्यर्थः । अन्यत्र संबन्धमात्रमिति । शुक्तिरजततादात्म्यस्य वा शुक्तिरज-तवैशिष्टयस्य वा असत्त्वेऽपि रजतत्ववैशिष्टयस्य वा रजततादात्म्यस्य वा सत्यरजते प्रसिद्धत्वादिति भावः । संबन्धद्वयानव-भासादिति । अन्यत्र सतः संबन्धस्यान्यत्र भाने संबन्धसंबन्धो भासत इत्यर्थः स्यात् । ततश्च संबन्धद्वयमानप्रसङ्ग इत्यर्थः । शङ्कते-

संबन्धस्य संबन्धान्तरानपेक्षत्वादिति । निरन्तरं भातमिति । अगृहितासंसर्गतयैकप्रतीत्युपारूढमित्यर्थः । न हि प्रतिबन्धेति । ततश्च प्रवृत्तिबाधमात्रस्य न प्रयोजकत्वम् । अपितु प्रवृत्तिबाधसचिवस्य "नास्ति' इति प्रत्ययस्यापीति भावः ।

आरोप्यलिङ्गानुविधायीति । ग्रहणस्मरणात्मकत्वे "इयं रजतम्' इत्यपि स्यादिति भावः । न तु तत्पक्ष उप्यस्त इति । तन्मते ज्ञानैक्यानभ्युपगमादिति भावः । भाष्ये-विषयासद्भावपक्ष इति । माध्यमिकमते ज्ञानमपि नास्ति । यागाचारमते ज्ञाना-भिन्नतया विषयोऽप्यस्ति । एतन्मते तु ज्ञानमस्ति, विषयो नास्तीति विशेषः ।

विद्यमानविषयकारणकत्वेनेति । विषयजन्यत्वेनेत्यर्थः । कारणत्वे विद्यमानत्वमपि सिध्यतीत्यभिप्रेत्य विद्यमानेत्युक्तम् । तस्या वृत्तिज्ञानत्वेनेति । अपरोक्षवृत्तिज्ञानत्वेनेत्यर्थः । ततश्च परोक्षवृत्तिज्ञाने विषयरहितावस्थासंभवेन न दोष इति ध्येयम् । विरम्य व्यापारवचनाच्चेति । निर्वषयमुत्पन्नं सत् विषयमुत्पाद्य पश्चाद्विषयीकरोतीति क्रमिकव्यापारद्वयाश्रयणात् विरम्य व्यापार इति द्रष्टव्यम् । पुरुषगतत्वस्यापि संभवादिति । यद्यपीन्द्रियापेक्षया प्रमात्रपेक्षया दूरत्वं विषयगतमेव; न पुरुषगतम्- अथापि सामान्यतो दूरत्वमात्रस्य दाषत्वमिति वदन्तं प्रतीदं दूषणमिति द्रष्टव्यम् । उभयत्रेति । ननु विषय इव पुरुषेऽप्यविद्यावृत्ति-रूपभ्रान्त्युत्पादनेनोभयत्र कार्यमुत्पाद्यत इति शक्यं वक्तुमिति चेत्-न । उभयत्रैकरूपकार्योत्पत्तिप्रसङ्ग इत्यत्र तात्पर्यात् । तत्र कार्यकरत्वं दृष्टमिति । विषयविषयकज्ञानोत्पत्तेरिति भावः । दोषांशस्याकार्यकरत्वादिति । चउ ूरश्म्यादेर्यथा तथा वस्तु । दोषां- शस्य तु न क्वापि भिन्नाधिकरणे कार्यजनकत्वं दृष्टम् । अतो न प्रमात्राश्रितदोषस्य विषयनिष्ठानिर्वचनीयरजतोत्पादकत्वमिति भावः । ननु दुष्टेन्द्रियसंप्रयोगस्यागन्तुकदोषस्य संभव सत्याशङ्कयाह-इन्द्रियसंयोगस्येति । दृष्टिविषादिन्यायस्येति । दृष्टौ विषं येषां ते दृष्टिविषाः केचन सर्पविशेषाः । ते हि चतुरिन्द्रियसंप्रयोगेण विषमुत्पाद्य पुरुषान् घ्नन्तीति प्रसिद्धिः । तद्वत् दुष्टेन्द्रियसंप्र-योगमात्रेण रजतमुत्पाद्यतामित्याक्षेपाभिप्रायः । तत्रैव कार्यविशषेमिति । पुरुषविशेष एव ज्ञानादिकमुत्पादयति, न तु परुषान्तर इत्यर्थः । यथा देशादिषु दोषाः प्रादुःष्युरिति संभावनायां लिङ् । प्रादुर्भावसंभवः इत्यर्थः ।

भाष्यं-सा किं परमार्थभूता, अपरमार्थभूता वेति । सत्यरजते शुक्तिरूप्यादौ च प्रतीयमानेत्यर्थः । न च सत्यरजते सत्या, मिथायारजते मिथ्येति किं न स्यादिति वाच्यम्, तदा रजतत्वजातेः साधारणत्वाभावेनोभयत्राप्यैकरूप्यस्य वक्तव्यत्वा- दिति भावः । व्यक्तिबाधेऽपि जातेरबाधितत्वप्रसङ्ग इति । न हि "इदं रजतम्' इति प्रतीयमानयोर्जातिव्यक्तयाकारयारेकस्य बाध्यत्वमपरस्य नेति दृष्टम् । आपणस्थरजतव्यक्तीति । रजतत्वजातिमात्रस्यापारमार्थ्याभ्युपगमेनापणस्थरजतनि ेठरजतत्व- जातेरपि तथाप्वावश्यंभावादिति भावः । कदाचित् बाधितत्वप्रसङ्ग इति । व्यक्तिः सती, जातिर्नास्तीति कदाचित् बुद्धिः स्यादि- त्यर्थः । क्वचिदपि परमाथर्बुद्धिशब्दहेतुत्वादर्शनादिति । यद्यपरमार्थभूताति जातिः परमार्थव्यक्तौ क्वचिद्वर्तेत, तदा व्यक्तिगतपरमार्थ-त्वैकार्थसमवायात् जाति परमार्थभूतेत्येवं परमार्थबुद्धिशब्दयोः कथंचिन्निर्वाहकत्वदर्शनात् अपरमार्थव्यक्तिस्थलेऽप्यपरमाथर्जातौ परमार्थबुद्धिशब्दयोर्निवाहः संभवेत् । यदि च क्वापि परमार्थव्यक्तिसंबन्धो न स्यात्, तर्हि क्वापि परमार्थबुद्धिशब्दनिर्वाहकत्वादर्श- नात् भ्रान्तिस्थलेऽपि तन्निर्वाहो न स्यादित्यर्थः ।

(सत्ख्यातिः)

पाठक्रमेणाण्डसृष्टेः पश्चादिति । "नामरूपे व्याकरोत् । तासां त्रिवृत्तं त्रिवृतमेकैकामकरोत्' इति पाठक्रमेणेत्यर्थः । संकल्पे तु (फूलं) पूर्वभावीति । फलेच्छा पूर्वं भवति; पश्चात् तत्साधनेच्छा भवति; उपायेच्छाया इष्टसाधनताज्ञानजन्यत्वादिति भावः । किं केन कथमित्यादाविति । यद्यपीयं जिज्ञासारूपा शाब्द्याकाङ्क्षा, न तु फलोपायेच्छारूपा । अत एव हि "करोति' इत्युक्ते "किं करोति, सर्वस्वापहारं करोति, शिरश्छेदं करोति' इति भाव्ये जिज्ञासा जायते । अथापि फलोपायविषयकेच्छापि फलोपायजिज्ञासातुल्यशीलेति भावः । न च भाव्याकाङ्क्षायाः पूर्वभावित्वे समानपदोपात्तदात्वर्थस्यैव भाव्यत्वेनान्वयः स्यादिति वाच्यम्,

समानप्रत्ययोपात्तविध्यवरूद्धाया भावनायाः समीहितभाव्यापेक्षितया यागस्य भाव्यतया नान्वयः, अपितु करणत्वेनेति स्वर्गकामाधिकरणे स्थितत्वादिति द्रष्टव्यम् । अस्मिन्नर्थे निदर्शनिमिति । "बहु स्यां प्रजायेय' इत्यत्र, "प्रजायेय' इति निर्दिष्ट-प्रजननापेक्षया "ब्रहु स्याम्' इति पूर्वनिर्दिष्टस्य बहुभवनस्य कार्यत्वदर्शनात् तद्वदेव "नामरूपे व्याकरवाणि । तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इत्यत्र संकल्पवाक्ये पूर्वनिर्दिष्टस्य नामरूपव्याकरणस्य कार्यत्वं निश्चीयते । ततश्च "नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकां करवाणि' इत्यत्र संकल्पवाक्ये पूर्वनिर्दिष्टस्य नामरूपव्याकरणस्य कार्यत्वं निश्चीयते । ततश्च "नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' इति वाक्ये पाठक्रमो बाध्य इति भावः । ननु त्रिवृत्करणनामरूपव्याकरणयोः

कार्यकारणभावे यस्य विप्रतिपत्तिः, तस्य बहुभवनप्रजननयोः कार्यकारणभावः कथं संप्रतिपन्नः स्यात्? न ह्ययमर्थस्ततोऽपि सुप- ्रसिद्धः । किं च कथमस्य श्लोकार्धस्येदृशार्थसूचकत्वमिति चेत्-न । बहुभवनप्रजननयोः कार्यकारणभावस्य सुप्रसिद्धत्वात् । इत- रथा भाष्यकृता निर्दानतयोपादानासंभवात् । न च निर्दशनतयोपादानमस्मिन् श्लोकेऽसिद्धमिति वाच्यम्, व्याख्यानतो विशेष-प्रतिपत्तिसंभवात् । अस्याप्तुपनिषदीति । छान्योग्ये तेजः-प्रभृत्तिसृष्टेरेवोपात्तत्वात् आकाशवायुसृष्टेरनुक्तेः "तिस्त्रो देवताः । त्रिवृतं करवाणि' इत्युक्तिः । नैतावता पञ्चीकरणं नास्तीति मन्तव्यम्, त्रिवृत्करणस्य पञ्चीकरणोपलक्षणार्थत्वादिति भावः । अवस्थाद्वयमस्तीति । ततश्च "संहतिं विना, असमागम्य' इति पदद्वयस्य न पौनरुक्त्यमिति भावः । "समेत्यान्योन्यासंयोगम्' इति संहतत्वावस्ताकथनेऽपि कृत्स्नशःसमागतत्वरूपावस्थान्तरं नोक्तमिति शङ्कां व्युदस्यति - उपात्तवचनानन्तरमिति । पुराणे-

"समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।

एकसंघातलक्ष्याश्च संप्राप्यैक्यमशेषतः ।।'

इति पाठक्रमादिति भावः ।

सोमाभावे च पूतीकग्रहणं श्रुतिचोदितम् । सोमावयवसद्भावात् इति भाष्यस्यायमर्थः-"यदि सोमं न विन्देत् पूती-कानभिषुणुयात्' इत्यनेन सामाभावे निमित्ते नैमित्तिकतया फलचमसवत् पूतीका न विधीयन्ते, अपितु सोमावयवस्य सोमसदृश-द्रव्येषु सत्त्वात् प्रतिनिधित्वेन पूतीकानां तदतिरिक्तद्रव्याणां च प्राप्तौ पूतीकानेव गृह्णीयादिति नियमार्थं पूतीकग्रहणं श्रुतिचोदि-तमिति । ततश्च, "सोमावयवसद्भावात् पूतीकग्रहणं श्रुतिचोदितम्' इत्यस्य, चोदनायां सोमावयवसद्भावो हेतुः, अतश्चोदनानु- पपत्त्या सोमावयवसिद्धिरित्यर्थ इति न भ्रमितव्यम्, सोमावयवसद्भावे न्यायस्यैव ज्ञापमतया चोदनाया अज्ञापकत्वात् । भाष्ये-व्रीह्यभावे न नीवारग्रहणं व्रीहिभावत इति नीवारग्रहणं न्याय्यमिति न्यायविदो विदुरिति योजना । षष्ठे प्रतिनिधिपेटिकायामस्य न्यायस्य व्युत्पादितत्वादिति भावः । एतत् सर्वमभिप्रेत्याह-अयं विधिर्नियमार्थ इति । प्रतिनिधिश्रुत्यैवेति । प्रतिनिधिश्रुतेर्निय-मविधित्वसंपादकन्यायेनेत्यर्थः । एवं हि स्थितिः षष्ठे - "ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात्' (६-२-३१) इत्यत्र सोमयागस्य, "वसन्ते वसन्ते ज्योतिषा यजेत' इति वीप्सया विष्सितवसन्तस्य निमित्तत्वावगमात् नित्यत्वं स्थापितम् । नित्ये च यथाशक्तयङ्गोपसंहारेणाप्यधिकारोऽस्तीति सर्वशक्तयधिकरणे स्थितम् । ततश्च सामेद्रव्यरूपाङ्गाभावेऽपि द्रव्यान्तरमादाय शक्याङ्गोपसंहारेण यागस्य कर्तव्यत्वं सिद्धम् । तत्र च सोमद्रव्यसदृशस्य वा तद्विसदृशस्य वा यागनिर्वर्तकतया यागाविध्याक्षेप-बलादुपादानं कर्तव्यमिति, "श्रुतिप्रमाणत्वाच्छिष्टाभावे नागमोऽन्यस्याशिष्टत्वात्' (६-३-१३) इत्यत्र स्थितम् । तत्र च सदृश-द्रव्योपादाने तत्र सोमावयवानामपि सत्त्वात् सोमशास्त्रस्याप्यनुग्रहाय सोमसदृशद्रव्योपादानमेव युक्तमिति, "सामान्यं तच्चिकीर्षा हि' (६-३-२७) इत्यत्र स्थापितम् । तत्र च बहुषु सोमसदृशद्रव्येषु सत्सु पूतीकविधिनिर्यमार्थः-यः सोमलताया अभावेन सामे-जातिपरिच्छिन्नान् सकलावयवान्

उपादातुमशक्तस्तत्सदृशान् विकलावयवान् उपादित्सते स पूतीकानेवेति नियमार्थमिति निर्णीतं "नियमार्था पुनःश्रुतिः' इति (३-६-४०) तृतीयाध्यायधिकरणे, "वचनाच्चान्याय्यमभावे' (६-३-३१) इति षष्ठाधायायाधि- करणे चेति । एवं च न्यायेनैव सदृशे तदवयवस्थितिर्निर्णेया, न तु श्रुत्या । अतो यथोक्त एवार्थः । अत एवास्वरसादाह-यद्वा त्रिवृत्करणेति ।

उपजीव्यत्वाय तदुक्तिरिति । "अदृष्टवशाच्चाम्बुनो ग्रहणम्' इत्युक्ते रुपलक्षणत्वादिति भावः । पूर्वोत्तरज्ञानयोस्तथा-रूपत्वादिति । विद्यमानशुक्तयवयवभूयस्त्वाग्रहणरूपस्य रजतज्ञानस्य बाध्यत्वं विद्यमानभूयस्त्वग्रहस्य शुक्तिज्ञानस्य बाधकत्व-मिति भावः । न च विद्यमानभूयस्त्वप्रतियोगिभूतरजतावयवानां "नेदं रजतम्, किंतु शुक्तिः' इति ज्ञानकालोऽप्रतीतेः कथं तत्प्रति-योगिकं भूयस्त्वं भासेतेति वाच्यम्, वस्तुतो यदवयवा भूयांसः, तज्ज्ञानं बाधकम्; यदवयवा अल्पीयांसः, तज्ज्ञानं बाध्यम् । बाध्यत्वञ्च बाध्यप्रवृत्तिकत्वम्; विफलप्रवर्तकत्वमिति यावत् । अत एव "प्रवृत्तेर्बाधितत्वं विफलत्वं वा३ इति वक्ष्यति । अत एव- क्वापि शुक्तौ शुक्तिज्ञानस्य रजतज्ञानेन बाधो न स्यात्, रजतज्ञानस्य वस्तुतोऽल्पविषयत्वेन वास्तवभूयोवयवविषयत्वाभावादिति शङ्का परास्ता । शुक्तौ शुक्तिज्ञानस्य विफलप्रवृत्तित्वाभावेन बाध्यत्वाभावादिति द्रष्टव्यम् । धर्म्यन्तरनिष्ठत्वेति । रजतत्वादौ रूपे धर्म्यन्तरनिष्ठत्वभानविरहः रूपिणि शुक्तयादौ रजतत्वविरोधिधर्मान्तराश्रितत्वभानविरहोऽप्यपेक्षित इत्यर्थः । अत एव भेदग्रहणादिति । इषंभेदाग्रहः प्रवर्तकः, अनिष्टभेदाग्रहो निवर्तक इत्यभ्युपगमेन भेदाग्रहमात्रस्य प्रवर्तकत्वानभ्युपगमादिति भावः ।

अत्र त्विति । सिद्धान्ते त्वित्यर्थः । विजातीयभूतारब्ध इति । विजातीयभूतावयवप्रचुरारब्ध इत्यर्थः । ततश्च विजातीयपृथिव्य-वयवप्रचुरारब्धे शुक्तिशकले तद्विजातीयतेजोवयवप्रचुरारब्धरजतभ्रमौपरिकमित्यर्थः । अण्डसृष्टेः पूर्वभावित्वादिति । तदानीं रजतोदेरप्रसक्तेः; येन तस्मिश्रणं स्यादिति भावः । पाञ्चभौतिकेष्विति । सत्यरजतस्थले रजतपरिणाभविशेषयोग्यतेजोशसत्त्वात् तत्र रजतावयवारम्भसंभवात् याथाथ्यर्मुपपद्यत इति भावः । त्रिवृत्करणेन कार्यानुप्रविष्टस्येति । मरु करीचिकारूपकार्यानु- प्रविष्टस्य जलरूपस्य भूतस्य समुद्रादिरूपकार्यान्तरावयवजलसमानपरिणामसंभावात् मरुमरीचिकारूपभौतिकान्तरे समुद्रा-दिलक्षणभौतिकान्तरबुद्धियार्थार्थ्यं यथा घटते, तथेत्यर्थः । अतः शुक्तयादौ रजताद्यवयवसद्भाव उपपद्यत इति । ननु त्रिवृ- त्करणं शुक्तौ रजतसद्भावप्रयोजकं चेत् त्रिवृत्कृततेजोंऽशस्य सर्वत्र पार्थिवे सत्त्वात् सर्वत्र रजतसादृश्यं स्यात् । तेजोवयवेषु तारतम्यासंभवात् पार्थिवेषु सर्वेष्वष्टमांशस्य तेजसः सर्वत्र सत्त्वात् सर्वत्र तद्भ्रमः स्यादिति चेत्-न । अदृष्टाधीनपरिणामविशेषस्य कार्यानुरोधेन क्वचिदेव कल्प्यत्वेनादोषात् । अणुमात्रे च शुक्तित्वं पुष्कलमिति । रजतत्वसुवर्णत्वपृथिवीत्वादिवच्छुक्तित्वादि-जातिरवयवावयनिष्ठा । न तु घटत्वपुरुषत्वादिवदवयविमात्रनिष्ठा, शुक्तशकलेऽपि "इयं शुक्तिः' इति व्यवहारात् । यदि चात्र विप्रतिपत्तिः, तर्हि शुक्तपदं रजतभ्रमाधिष्ठानरङ्गादिपरम्, रङ्गत्वस्यावयवावयाविनिष्ठत्वेऽविवादात् ।

ननु पुरुषत्वादेरवयविमात्रनिष्ठत्वे स्थाणौ पुरुषत्वभ्रमः कथं निर्वोढव्यः? पुरुषत्वस्य पाणिपादसंघातवृतितया पुरुषाव- यवेषु पुरुषत्वस्याभावेनान्यथाख्यात्यापत्तेः । किंच व्रीहित्वजातेरप्यवयवावयविनिष्ठत्वाभावात् व्रीहिभ्रमनिर्वाहानुपपत्तिश्च । नीवा-रादौ व्रीहित्वजातिसत्त्वे च मुख्यत्वमेव स्यात्, न प्रतिनिधित्वम् । अत एव मीमांसकैरपि, "सामान्यं तच्चिकीर्षा हि' इत्यत्र,-"व्रीहिसदृशनीवारद्रव्येषु न व्रीहित्वजातिः । नापि व्यक्तिः, नीवारत्वजातितद्वयक्तयोः व्रीहित्वजातितद्वयक्तयपेक्षया भिन्नत्वात् । तथापि सदअशद्रव्योपादाने व्रीहिशास्त्रस्य कियानप्यनुग्रहोस्ति । तथाहि-"व्रीहिभिर्यजेत् इति' व्रीहित्वजातेः साधनत्वं बोध्यते । अमूतार्ययाश्च जातेः स्वतो हेतुत्वासंभावात् व्यक्तिपरिच्छेदमुखेनेति वक्तव्यम् । व्यक्तेरपि पुरोडाशादिनिष्पत्तावधातादिशास्त्र-पर्यालोचनया न तदव्यवद्वारा हेतुत्वं वक्तव्यम् । ततश्च व्रीहित्वजातेव्रीहितदवयवारिच्छेदमुखेनाङ्गत्वात् व्रीहित्वजातेरिव व्यक्तित-दवयवानामप्यङ्गत्वं सिद्धज्ञ् । ततश्च जातिव्यक्तयवयवा व्रीहिशास्त्रार्थाः । तत्र सदृशोपादाने जातिव्यक्तयो।

शास्त्रार्थयोरलाभेऽपि तदवयवरूपशास्त्रार्थलाभेन व्रीहिशास्त्रमपि किंचिदनुगहीतं भवतीत्युक्तमिति चेत्-न । यत्र जातिरवयवावयविवृत्तिस्तत्र तत्प्रतीतेर्या-ताथ्यमस्ति । इतरत्र तु प्राभाकरोक्तरीत्या अख्यातिः । यथा पञ्चलोहारब्धे कार्ये सर्वापि लोहप्रतीतिर्यथार्थेत्यत्रैव भाष्यकृतः संरम्भः ।

स्वप्नं पश्यतीति पूर्ववाक्यमिति । यद्यपि "स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं निहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्यातिषा प्रस्वपिति । अत्रायं पुरुषः स्वयंज्योतिर्भवति । न तत्र रथाः' इत्येव श्रुत्याकारः-तथापीदं वाक्यं तत्समानार्थं लौकिकमुपात्तं द्रष्टव्यम् । मुख्यार्थत्व इति । स्वाप्नानां मुदादीनां जाग्रत्सुखादिवैलक्षण्यायोगात् विषयाणामेव विलक्षणत्वादित्यर्तः । व्याघातपौनरुकत्येति । "न भवन्ति', "रथान् सृजते' इति व्याघातः "सृजते', "स हि कर्ता' इत्यनयोः पौनरुकत्यमिति भावः । शिरश्छेदादय इत्युक्तत्वादिति छेदः ।

दृष्टान्ते चायं भाव इति । तत्र पीतिमविशिष्टसुवर्णद्रव्यस्यापि ग्रहणमस्तीति भावः । चाक्षुपदोषसंसर्गो दुर्वच इति । पित्तानुपहतनयनानामपि स्फटिकेपीतत्वोपलब्धेरित्यर्थः । अदृष्टस्य नियामकत्वादिति । ननु समीपस्थानां स्फटिकेपीतत्वोप-लब्धेरित्यर्थः । अदृष्टस्य नियामकत्वादिति । ननु समीपस्थानां "जलं नास्ति । एतावन्तं कालमिदं जलतयाऽभ्राम्यम् । असदेव जलत्वमभात्' इत्यादिपरीक्षितप्रत्यक्षाणांका गतिः? तेषामसंसर्गाग्रहरूपत्वाभ्युपगमे मरीचिकाजलप्रत्यक्षाणामल्पीयसामेव तद्रूषत्वं किं न स्यादिति चेत्-न । मरीचिकाजलप्रत्यक्षस्य त्रिवृत्करणशास्त्रानुगृहीततस्यासंसर्गाग्रहरूपत्वमनुचितमिति भाष्य-काराभिप्राय इति केचित् । समाधत्ते-आपेक्षिको हि सव्यदक्षिणभाव इति । स्वाभिमुखे दर्पणे स्वापेक्षया विपर्यस्तसव्यदक्षिण- भावः सिद्धः स्वाभिमुखवस्तुनः स्वविरुद्धसव्यदक्षिणभावस्य संप्रतिपन्नत्वात् । तद्ग्रहणपूर्वकस्वमुखग्रहणे मुखस्य दर्पणस्य चान्तरालरूपविप्रकर्षस्याग्रहणात् दर्पणस्थत्वासंसर्गाग्रहोऽपि भवति । (तथा दर्पणगतविपर्यस्तसव्यदक्षिणभावस्य आभि- मुख्यस्य अभिमुखस्य च असंसर्गाग्रहो भवति ।) ततश्च दर्पणस्थत्वस्वाभिमुखत्वविपर्यस्तसव्यदक्षिणभावप्रतीतीनां याथार्थ्यं सिद्धमि(द्धयर्ता)त्यर्थः । ननु सोपाधिकभ्रमे अन्तरालाग्रहणमप्रयोजकम्, दर्पणबिम्बयोरन्तरालं पश्यतामपि पार्श्वस्थानां बिम्बे दर्पणस्थत्वभ्रान्तिदर्शनादिति चेत्, सत्यम्-उपाधिनिवृत्तिसहितान्तरालग्रहणे भ्रमदर्शनादुपाधिनिवृत्तिसहितान्तरालग्रहणस्या-भावोऽपेक्षित इति तात्पर्यम् ।

दिगन्तरप्रतियोगिनो दिगन्तरस्य चेति । यस्मिन् प्रदेशे प्रत्यकत्वभ्रमो जायते, तत्र प्रत्यकत्वमवध्यन्तरापेक्षयाऽस्त्येव । स्वाश्रयदेशापेक्षया परं नास्ति । ततश्चान्यावधिकं प्रत्यकत्वे स्वाश्रयदेशावधिकत्वासंसर्गाग्रह इत्यर्थः । चन्द्रदेशौ द्वाविति प्रतीत्य-भावहेतुरिति । एकस्य चन्द्रस्य द्वौ देशाविति प्रतीत्यभावहेतुरित्यर्थः । भाष्ये-युगपद्देशद्वयेत्यत्र यौगपद्योक्तिः शौघ्र्याभिप्राया, एकस्मिन् क्षणे ज्ञानद्वयासंभवात् । भाष्ये-ग्रहणभेदेन ग्राह्यकारभेदादिति । ग्रहणभेदानोल्लिख्यमानदेशरूपग्राह्याकारभेदादि- त्यर्थः । न तु ग्रहणभेदायतं ग्राह्याकारद्वित्वमिति मन्तव्यम्, ग्राह्याकाररूपदेशद्वित्वस्य ग्रहणभेदानधीनत्वात् । तत्कृतं ग्राह्या-कारद्वित्वं च पारमार्थिकमिति भाष्यस्याप्येवमेवार्थः । केचित्तु-तत्र सामग्रीद्वित्व ग्रहणद्वित्वपारमार्थ्यसाधनसंरम्भात् ग्रहण- द्वित्वेन ग्राह्यकारद्वित्वसमर्थनसंरम्भाच्च ग्रहणगतद्वित्वस्य चन्द्रस्य चासंसर्गाग्रह एव; न तु देशगतद्वित्वस्येति वदन्ति । तन्न; प्राभाकरमतप्रवेशापत्त्या, प्राभाकरमतवैषम्यप्रदर्शकोत्तरटीकाग्रन्थविरोधप्रसङ्गेन चतस्योपेक्षणीयत्वात् । नेत्रवृत्तिर्द्विधाभूतेति । ननु श्लोके द्वित्वं चन्द्रं चेति द्वित्वमात्रं प्रतीयते । वित्तिगतद्वित्वमिति कुतोऽवसीयते? नेत्रवृत्तेर्वित्तिग्रहणसामर्थ्याभावेन वित्तिद्वित्वग्राहकत्वासंभवादिति चेत्-न । "द्वे तु वित्ती वितन्वती' इति वित्तिगतद्वित्वस्य प्रकृतत्वेन स्वप्रकाशत्वेन च तस्यैव ग्रहणोपपत्तेः ।

(अविद्यापरत्वाभिमतश्रुत्यर्थः)

ऋताभावस्य ऋतविरोधिनश्चेति । न च घटस्य घटाभावाश्रयत्वात् ऋतस्य ऋताभावाश्रयत्वे को दोष इति वाच्यम्, भावाभावयोः सामानाधिकरण्यासम्भववत् आधाराधेयभावस्याप्यसंभवात् । न चैवं घटे घटाभावाभावे

घटसत्त्वापत्तिरिति वाच्यम्, घटाभावे घटतदभावयोर्द्वयोप्यभाववत् घटे घटतदभावयोर्द्वयोरप्यभावोपपत्तेः । अत एव प्रपञ्चाभावरूपस्य ब्रह्मणः प्रपञ्चाधिकरणत्वायोग्यतया ब्रह्माश्रितस्य प्रपञ्चस्य स्वाधिकरणत्वायोग्याधिकरणकत्वरूपं मिथ्यात्वमिति परे वदन्ति । अत एव रूपविरोधिनो रूपत्वस्य रूपाश्रितत्वादित्यपि शङ्का परास्ता, अत्र विनाश्यविनाशकभावलक्षणविरोधित्वस्य विवक्षि- तत्वात् । तन्मते च ज्ञानरूपब्रह्मणोऽज्ञाननाशकत्वादिति भावः । शङ्कते-पुण्यमपि हीति ।

प्रतिबन्दीत्वेनानुसंधेय इति । यदि "नासदासीन्नो सदासीत्' इति श्रुतिबलात् तमःशब्दितप्रकृतेरनिर्वचनीयत्वम्, तर्हि "अनादि मत्परं ब्रह्म न सत्तन्नास दुच्यते' इति प्रमाणबलात् ब्रह्मणोऽपि सदसद्विलक्षणत्वप्रसङ्ग इत्यर्थः । भाष्ये-अचित्समष्टि- भूते तमःशब्दाभिधेय इति । ननु कथं सदसच्छब्दितयोश्चिदचिद्वयष्टयोरचित्समष्टौ लय इति चेत्-न । योग्यतावशेन सूक्ष्मचिद-चिद्धरीरके लय सत्यर्थकत्वेनादोषात् । भाष्ये-सत्यं तमःशब्देनेति । ननु तमःशब्देनाभिहितस्याचित्समष्टित्वमिति सिद्धान्तिनोक्ते सत्यमित्यादिनाऽचित्समष्टिभूतायाः प्रकृतेः सूक्ष्यावस्तोच्यत इति कथमनूद्यते? पूवर्त्र तमस एवाचित्समि◌ेयत्वकथनेन प्रकृतेरचि-त्समष्टित्वस्य वा तमसस्तत्सूक्ष्मावस्थात्वस्य वाऽकथनादिति चेत्-न । उभयोरपि विरोधाभावेन तथानुवादोपपत्तेः । क्रमेणो-पादानविवक्षामिति ।

पूर्वपक्षोपन्यासदशायां "तम आसीत्' इति वाक्यानन्तरं "मायां तु प्रकृतिम्' इति वाक्यमुपाददानस्य पूर्व-पक्षिणो विवक्षामित्यर्थः । तमःशब्दात् सांख्याभिमतप्रकृतिरुच्यत इति शङ्काव्यावृत्त्यर्थं हि, मायां प्रकृतिं विद्यात् इति वाक्यं तदनन्तरमेवोपात्तमिति भावः । ननु "अस्मान्मायी सृजेत विश्वमेतत् तस्मिश्चान्यो मायया संनिरुद्धः' इति वाक्यप्राप्तमायानुवादेन "मायां तु प्रकृतिं विद्यात्' इति वाक्येन प्रकृतिशब्दितमुपादानत्वं विधीयते, "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इत्यादौ प्रकृतिशब्दस्योपादान एव प्रसिद्धेः । परैरपि तथा व्याख्यातत्वाच्च । तत एवोपादानमिथ्यात्वस्यापि सिद्धेर्मायानुवादेन प्रकृतित्वं विधीयत इत्येव परेण सुवचमिति चेत्-न । प्रकृतिशब्दस्योपादानपरत्वादपि प्रसिद्धिप्राचुर्येणाचित्समष्टिप्रकृतेरेवोपस्थित्या तस्या मायात्वरूपानिर्वचनीयत्वविधानस्यैव तन्मतेऽप्युचितत्वादिति भावः । न मायामात्रसूत्रेति । "मायामात्रं तु कार्त्स्न्◌ेन' इत्या- दिसूत्रे मायाशब्दस्याश्चर्यार्थकत्वप्रतिपादकभाष्येण विचित्रार्थसर्गकारित्वप्रतिपादकस्यास्य भाष्यस्य न विरोध इत्यर्थः । बहुव-चनादवगम्यत इति । त्वदभिमताविद्याया एकत्वादिति भावः । प्रतिभासस्तु द्वित्वादिविषयत्वादिति । अविद्यमानचन्द्र-द्वित्वादिविषयत्वादित्यर्थः ।

(अविद्यापरपुराणार्थः)

विशब्दस्य वैविध्यवैपरीत्यरूपार्थद्वयपरत्वसंभवमभिप्रयन्नाह-विविधं ज्ञायतेऽनेन, विपरीतं ज्ञायतेनेनेति वा करणे व्युत्पत्तिरिति । "करणाधिकरणयोश्च' इति ल्युट् । विज्ञानमविद्येत्यत्र प्रमाणमाह-यदा तु शुद्धमित्यादिना । तस्य हि व्यतिरेको वक्ष्यत इति । विज्ञानशब्दस्य "विज्ञानमेकं निजकमर्भेद' इत्यत्रेव ब्रह्मम्बरूपज्ञानपरत्वे तद्व्यतिरेके प्रपञ्चव्यतिरेकप्रतिपेदकस्य

"यदा तु शुद्धम्' इत्यस्य श्लोकस्यासामञ्जस्यप्रसङ्गादिति भावः । ननु विज्ञाने=ब्रह्मणि विजृम्भितानि=कल्पितानीत्यर्थस्य वक्तुं शक्यत्वात् श्रीधरेण तथा व्याख्यातत्वाच्च कथं विज्ञानाब्दस्याविद्यार्थकत्वनिर्णय इत्याशङ्कयाह-विज्ञाने विजृम्भितानी- तीति । अस्वारस्यादिति। "सप्तमी' इति योगविभागाश्रयणेन सप्तमीसमासस्य क्लिष्टत्वादिति भावः । नपुंसकपदस्येति पाठः । नपुंसकान्तपदस्येति पाठे नपुंसकत्वद्योतकविभक्त्यन्तपदस्येत्यर्थः । पुंलिङ्गभेदशब्दविशेषणत्वायोगेनेति । "जृभिगात्रविनामे' इत्यस्याकर्मकतया "गत्यर्थाकर्मक' इति कर्तरि क्तान्तस्य वा, ण्यन्तात् कर्मणि क्तान्तस्य वा विजृम्भिताब्दस्याश्रयणे विशेष्य-निघ्नताप्रसङ्गात्, "नपुंसके भावे क्तः' इति भावक्तान्तत्वपक्ष एव नपुंसकत्वस्य युक्तत्वाच्च भावप्रत्यायन्त

एव विजृम्भितशब्दः । न च भेदानां कथं विजृम्भणरूपधात्वर्थत्वमिति वाच्यम्-उपचारेण तथा प्रयोगोपपत्तेः । ततश्च भावप्रत्ययान्तत्वे सिद्धे विजृम्भण-रूपस्य भावस्य कर्त्राकाङ्क्षाया एवोत्कटत्वादधिकरणाकाङ्क्षाया अतथात्वात् षष्ठीसमास एव युक्त इति भावः । बहुवचने न तात्पर्यमिति । प्रत्यक्षादिसिद्धबहुत्वानुवादित्वादिति भावः । जडोपलक्षित इति । देहान्तःकरणादिभिः परस्परव्यावृत्ततया प्रतीते एकस्मिन् आत्मवस्तुनीत्यर्थः । जडगतभेदा न संभवन्तीत्यर्थ इति । अन्तःकरणाद्युपाधिप्रयुक्तभेदा न भवन्तीत्यर्थः । वस्तुभेद-शब्दयोः कर्मधारयमभिप्रयन्नाह-यद्वा एको वस्तुशब्द आकारपर इति । प्रथमो वस्तुशब्दो जडपर इत्यभिप्रायः । अस्मिन् पक्षे कमर्प्रतिबद्धात्मनिश्चयैः सत्यत्वेनाऽऽलक्ष्यत इत्यस्य वक्तव्यतया सत्यस्वेनेत्यंशस्याध्याहारप्रसङ्गादुत्तरार्धस्य पूर्वार्धैकवाक्यत्वा-भावाच्चापिशब्दमात्रमध्याहृत्य व्याचष्टे-यद्वा न केवलमिति । तदुत्तरोत्तरभावीति । अनेन भाष्ये भेददर्शनं निमित्तं यस्याज्ञान- स्येति बहुव्रीहिरभिप्रेत इति भावः । अस्मिन् पक्षे कार्याज्ञानं ममकाररागद्वेषादि । तस्यापि पूर्वकर्मैवेत्यर्थ इति । न च भेददर्श-ननिमित्तकाज्ञाने भेददर्शनस्यैव हेतुत्वात् कथं कर्मणो हेतुत्वमिति वाच्यम्, मूलकारणं कर्मैवेत्यर्थात् । अस्मिन् पक्षे निजकर्म-भेदविभिन्नचित्तैः बहुधाभ्युपेतमित्यस्यायमर्थः-निजकर्मभेदेन विभिन्नचित्तैः सजातीयभेददर्शनैः । चित्तशब्दो बुद्धिपरः । बहुदा- भ्युपेतं कार्याज्ञानयुक्तमिति । अस्मिन् पक्षे बहुधाभ्युपेतमित्यस्यातिक्लिष्टत्वात् पक्षान्तरमाह-यद्वा देवादिशरीरभेदेति । सजाती-यविजातीयभेदविरहानुवाद इति । "विज्ञानमेकम्' इत्यर्धेन सजातीयविजातीयभेदविरहानुवाद इति । "विज्ञानमेकम्' इत्यर्धेन सजातीयात्मभेदस्य, "तस्मान्न विज्ञानम्' इत्यर्धेनानात्मभूतविजातीयभेदस्य च निषिद्धतया तन्निपेधानुवाद इत्यर्थः । स्वगत-भेदराहित्यमुच्यत इति । तद्वदेव पूर्वार्धप्रतिपन्नमनूद्यत इत्यर्थः । द्वितीयपक्षे भाष्यानुगुण्यमाह-एतदुभिप्रायेण हीति ।

दशश्लोक्यामिति । विष्णुपुराणे द्वितीयेंशे द्वादशाध्याये-

"इत्येष संनिवेशोऽयं पृथिव्या ज्योतिषां तथा ।

द्वीपानामुदधीनां च पर्वतानां च कीर्तितः ।।

वर्षाणां च नदीनां च ये त तेषु वसन्ति वै ।।

तेषां स्वरूपमाख्यातं संक्षेपः श्रूयतां पुनः ।।'

इत्युपक्षिप्य-

"यदम्बु वैष्णवः कायस्ततो विप्र वसुंधरा ।

पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता ।।

ज्योतीषि विष्णुर्भुवनानि विष्णुवर्नानि विष्णुर्गिरयो दिशश्च ।

नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ।।

ज्ञानस्वरूपो भगवान् यतोऽसावशेषमूतिर्र्न तु वस्तुभूतः ।

ततो हि शैलाब्धिरादिभेदान् जानीहि विज्ञानविजअम्भितानि ।।

यदा तु शुद्धं निजरूपि सर्वकर्मक्षये ज्ञानमपास्तदोषम्।

तदा हि संकल्पतरोः फलानि भवन्ति ना वस्तुषु वस्तुभेदाः ।।

वस्त्वस्ति किं कुत्रचिदादिमध्यपयन्तहीनं सततैकरूपम् ।

यच्चान्यथात्वं द्विज याति भूयो न तत्तथा तत्र कुतो हि तत्त्वम् ।।

मही घटत्वं घटतः कपालिका कपालिका चूर्णरजस्ततोऽणुः ।

जनैः स्वकर्मस्तिमितात्मनिश्चयैरालक्ष्यते व्रूहि किमत्र वस्तु ।।

तस्मान्न विज्ञानमृतेऽस्ति किंचित् क्विचित् कदाचिद् द्विज वस्तुजातम् ।

विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतम् ।।

ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् ।

एकं सदैकं परमः परेशः स वासुदेवो न यतोऽन्यदस्ति ।।

सद्भाव एवं भावतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ।

एतत्तु यत् संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते ।।

यज्ञः पशुर्वह्निरशेष ऋत्विक् सोमः सुरा स्वर्गमयश्च कामः ।

इत्यादि कर्मश्रितमार्गदृष्टं भूरादिभोगा (भेदा) श्च फलानि तेषाम् ।।'

इति दशाश्लोकी पठिता । (यश्चैतद्भुवनगतमिति मूलोक्तपाठः ।) नात्र विगानमिति । यद्यपि "यदस्ति यन्नास्ति च विप्रवर्य' इत्य-त्रास्तिनास्तिशब्दयोर्भावाभावरूपेण प्रतिपन्नवस्तुपरतया योजयितुं शक्यत्वादस्तिशब्दस्यात्मपरत्वे विगानं संभवति-तथापि नास्त्यसत्यशब्दयोरचेतनपरत्वे न विवाद इत्यत्र तात्पर्यम् । अपितु कर्मपरत्वमेवेति । कर्ममूलवैविध्यानुसन्धानपरत्वमेवेत्यर्थः, उत्तरत्र तथाभिधास्यमानत्वात् । वियुक्तं सूक्ष्मरूपमिति । परस्परमुपकरणोपकरणिभावावियुक्तं प्रकृतिपुरुषयोः सूक्ष्मं रूपमुच्यत इत्यर्थः । आदिभरतचरि हृत्स्थमिति । "मैत्रेय तस्य चरितं कथयिष्यामि ते पुनः' इति प्रथमाध्याये उपक्षिप्तत्वादिनानीं हृत्स्थमिति भावः । ननु संक्षेपशब्दस्य सकलशास्त्रार्थसंक्षेपपरत्वसंभवे प्रथमाध्यायोक्तप्रतिज्ञावशेनादिभरतचरितस्य बुद्धिस्थत्वं परिकल्पय, एतस्य तत्संक्षेपत्वकल्पनं क्लिष्टम् । किंच तत्संक्षेपरूपत्वं प्रतिज्ञातं चेत्, विस्तरकथनस्य स्वतः प्राप्ततया "भगवन् सर्वमाख्यातम्' इति मैत्रेयस्यादिभरतचरितप्रश्नो न युक्त इति चेत्-न । सकलसंक्षेपरूपत्वे वक्ष्यमाणसंक्षेपरूपत्वमपि संभवतीत्यत्र तात्पर्यात् । सत्तामात्रमगोचरमिति । यद्यपि नैतानि वाक्यान्येतत्प्रकरणस्थानि, तथापि "ज्ञानस्वरूपो भगवान् यतोऽसौ' इत्यादीनामे-तत्प्रकरणस्थानं तत्समानार्थत्वं वक्तव्यमित्यभिप्रायेण तथोक्तमिति द्रष्टव्यम् । अधीतानधीतशाखार्थज्ञापनार्थमितीति । अत्रेतिः समाप्तौ ।

विष्णुरात्मेतीत्यस्य वाक्यस्य व्यवहितेनापि "शरीरात्मभावः' इत्यनेनान्वयसंभवे अभिप्रेत्येत्यध्याहारोऽनुचित इत्य-भिप्रेत्याह-शरीरात्मभाव इति वार्थ इति । सकलश्रुतिगततादात्म्योपदेशोपवृंहणरूपस्येत्यत्र सकलपदमनधीतशाखापरम् । तस्याश्चोपवृंहणं तदर्थविशदीकरणम् । अथवा सकलपदमधीतशाखापरम् । तस्याश्चेपवृंहणं तद्विरुद्धार्थवाक्यासत्त्वप्रतिपादन- मिति द्वेधार्थसंभवमभिप्रेत्य व्याचष्टे-अनधीतशाखास्वपीति । तादात्म्योपदेशोऽस्तीति । य इति शेषः, उत्तरत्र "तस्यायमेवार्थः' इति तच्छब्दश्रवणात् । अत्रेतिशब्दत्रयस्येति । एवमिहान्वयक्रमः-"यदम्बु वैष्णुवः कायः' इति श्लोकेन सकलश्रुतिगततादात्म्योप-वृंहणरूपस्य सामानाधिकरण्योपदेशास्य "ज्योतीषि विष्णुः' इत्यारभ्य वक्ष्यमाणस्य शरीरात्मभाव एव निबन्धनमित्यभिप्रेत्या-स्बुनो विष्णोः कार्यत्वेनाम्बुपरिणामभूतं ब्रह्माण्डमपि विष्णोः शरीरमित्याहेति । न च "विष्णुरात्मेत्यभिप्रेत्य' इति पूर्वग्रन्थविरोध इति वाच्यम्, तस्य व्याख्यानान्तरत्वेनादोषात् । केचित्तु-अनेन श्लोकेन तस्य विष्णुरात्मेत्यभिप्रेत्य शरीरात्मभाव एव सामानाधि-करण्ये निबन्धनमिति तात्पर्यत् आहेति योजयन्ति । विश्वरूपो यतोऽव्यय इति । "सर्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत् । स एव' इति सामानाधिकरण्येन निर्दिश्य कथमिदं भिन्नयोः सामानाधिकरण्यमित्यपेक्षायाम्, "सर्वभूतात्मा विश्वरूपो याते- ऽव्ययः' इति शरीरात्मभावस्य "यतः' इति पञ्चम्या कण्ठतो हेतुतयोक्तेरित्यर्थः । इदं च वेदार्थसंग्रहे भाष्यकृता सुख्यक्तमुक्तम् ।

पदात्रयस्यार्थ उच्यत इति । "यदस्ति यन्नास्ति च विप्रवर्य३ इति चतुर्थपादार्थस्य "अत्रास्त्यात्मकं नास्त्यात्मकं च' इत्यादिभाष्यग्रन्थेनानुवादमुखेन स्फुटीकरिष्यमाणत्वात् पादत्रयस्यार्थ उच्यत इत्युक्तम् । केचित्तु-असंकोचेन पादचतुष्टस्याप्यर्थ उच्यते, श्लोकामत्रस्य शरीरात्मभावायत्ततादात्म्योपदेशपरत्वे विप्रतिपत्त्यभावात् । इयांस्तु विशेषः-पादात्रायगतानां ज्योतिरादि-पदानां निर्णीतार्थतया न जिज्ञासा । चतुर्थपादगतास्तिनास्तिशब्दयोरनिर्णीतार्थतया तत्र जिज्ञासया तत्पादार्थमात्रस्यानुवादो-पपत्तेरिति वदन्ति । विशिष्टवाक्यार्थानुवादेनेति ।
पर्यवसन्नवाक्यार्थानुवादोपपत्तेरिति वदन्ति । विशिष्टवाक्यार्थानुवादेनेति । पर्यवसन्नवाक्यार्थानुवादेनेत्यर्थः । नास्त्यात्मकत्वे हेतुरयमित्याहेत्युक्तमिति । न त्वस्यास्त्यात्मकत्वे हेतुरयमित्याहेत्युक्त- मित्यर्थः ।

"ज्ञानस्वरूपो भगवान् यतोऽसौ' इत्यंशेन "इदमस्त्यात्मकम्, इदं नास्यात्मकम्, अस्य च नास्त्यात्मकत्वे हेतुरयम्' इत्यप्रतिपादनादाह-प्रतीकमुपादात्त इति । ननु भाष्ये-अशेपक्षत्रज्ञात्मनावस्थितस्येति कथं लभ्यते? क्षेत्रज्ञस्य प्रागनिर्दिष्टत्वात् । न च "यदस्ति यन्नास्ति च विप्रवर्य' इत्यनेनास्तिशब्देन क्षेत्रज्ञस्योपस्थापनमस्तीति वाच्यम्, "इदमस्त्यात्मकम्, इदं नास्त्या- त्मकम्' इति विभागानभिज्ञं मैत्रेयं प्रति अस्तिशब्दस्य क्षेत्रज्ञोपस्थापकत्वाभावेनाशेषभूर्तिशब्देन क्षेत्रज्ञात्मनावस्थितस्य भगवत उपस्थापने प्रमाणाभावादित्याशङ्कय, अस्तिनास्तिशब्दाभ्यामनुपस्थापनेऽपि ज्योतिरादिशब्दैः संसृष्टवचनैश्चेतनाचेतनयोरुप-स्थितिसंभवात् तत्र चाचिच्छरीरके ज्ञानस्वरूपशरीरकत्वोपदेशस्य वा "न वस्तुभूतः' इति देवादिशरीरकत्वनिषेधस्य वाऽसं- भवात् क्षेत्रज्ञशरीरक एव योग्यतावशेनाशेषमूर्तिशब्देन परामृश्यते । ततश्च क्षेत्रज्ञशरीरको भगवान् ज्ञानस्वरूपः ज्ञानशरीरको भवति, (स्वरूपशब्दः शरीरपरः ।) वस्तुस्वरूपदेवादिशरीरत्वं नास्तीति फलति । ततश्च देहात्मविवेकोऽपि फलितो भवति । यथा"अङ्गुलीयकवानसौ रजतवान्न सुवर्णवान्' इत्युक्ते "अङ्गुलीयकं रजतरूपं न सुवर्णरूपम्' इति तद्वत्-इत्यभिप्रयन्नाह-अशेषशब्देनाचितोऽपीति । वस्तुभावनिषेधोऽनुपपन्न इति । चिच्छरीरकस्य भगवतः,"न तु वस्तुभूतः' इति देवमनुष्यशै-लाब्धिधरादिवस्तुशरीरकत्वनिषेधस्य शरीरभूते अचिदंशे देवमनुष्यादिभावनिषेधपर्यवसितत्वादित्यभिप्रायः । ऋ॒ त्विक्प्रचार-कर्मविशेषणमिति । यथा परंपरया प्रचारविशेषणमुष्णीषलौहित्यम् । परम्परयेत्यस्य प्रचारे ऋ॒ग्विजां विशेषणत्वम्, तत्र चोष्णीषस्य, तत्र च लोहित्यस्येत्यभिप्रायः । "काठिन्यवात् यो विभर्ति तस्मै भूम्यात्मने नमः' इत्यत्रात्मस्वरूपे भूमिद्वारा काठिन्यमिति भावः । भाष्ये-यत एवं तत एवेति । ननु क्षेत्रज्ञस्य ज्ञानस्वरूपत्वेन देवादिरूपत्वाभावेऽपि देवादिभेदस्य तद्विज्ञानविजृम्भितत्वमनावश्यकम्, क्षेत्रज्ञाभिन्नत्वमात्रेण तद्विज्ञानविजृम्भितत्वस्यानावश्यकत्वात् । इतरथा परमात्मनित्य-विभूत्यादेरपि तथात्वप्रसङ्गात् । न च जीवभिन्नस्यानित्यत्वेन सिद्धस्य देवादेस्तद्विज्ञानविजृम्भितत्त्वमावश्यमित वाच्यम्, देवादिभेदस्याद्याष्यनित्यत्वानिश्चयात् । निश्चये वा तस्यासत्यशब्दितत्वोपयुक्तानित्यत्वस्य सिद्धतया कर्मपरिणामरूपतया-ऽनित्यत्वप्रतिपादनार्थं प्रवृत्तस्य, "ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि' इत्यस्य वैयर्थ्यप्रसङ्गात् । किंच क्षेत्रमात्मनावस्थितस्य देवादिभूतत्वाभावेन देवादिस्वरूपस्य विज्ञानविजृम्भितत्वे देवाद्यात्मनावस्थितस्य ज्ञानस्वरूपक्षेत्रज्ञभूत-त्वाभावेन क्षेत्रज्ञस्यापि विज्ञानविजृम्भितत्वप्रसङ्ग इति चेत्-न । " न तु वस्तुभूतः' इति देवादिस्वरूपस्य क्षेत्रज्ञस्वरूपावस्थि-तपरमात्मस्वाभाविकरूपत्वे प्रत्याख्याते, पुनः किंरूपमित्यपेक्षायाम्, "विज्ञानविजृम्भितानि' इत्यागन्तुकरूपत्वमुच्यत इत्य- दोषात् । अत एव भाष्ये ज्ञानमेव स्वाभाविकं रूपमिति स्वाभाविकपदं प्रयुक्तम् । देवादिभेदहेतुत्वं सद्वारकमिति । पूर्वपूर्व-वैविध्यानुसन्धानेन, कर्मणा च देवादिभेदा इत्यर्थः । कर्माविद्ययोर्बीजाङ्कुरवत् परस्परहेतुत्वसंभवात् हेतुहेतुमद्भावव्यत्यासशङ्का न कार्या । ज्ञानस्वरूपः विज्ञानविजम्भितानीत्यनेन फलितमिति । "ज्ञानस्वरूपः' इत्यनेन ज्ञानस्वरूपस्योक्ततयो परिणाम-शून्यत्वावगमात् सत्यत्वम्, "विज्ञानविजृम्भितानि' इत्यनेन परिणामित्वं च फलितम् । अत एव "निजसिद्धज्ञानैकरूपत्वेन' इति भाष्यमिति भावः । ननु "यदा तु शुद्धम्'

इत्यस्य पूर्वोक्तविवरणरूपत्वेन पूर्वपक्षिसंमतस्य कथं तदेव विवृणोतीति भाष्यकृताप्य-भ्युपगम इत्याशङ्कयाविरुद्धांशे तदुपजीवनं न दोषायेत्याह-पूर्वपक्षयोजनायामिति । निदोषमित्यादिपदानामर्थविभाग इति । अपास्तदोषमित्यादिपदानामिति वक्तव्ये लाघवार्थं निर्दोषपदनुपात्तमिति द्रष्टव्यम् । यद्वा निदोषमित्यादीति छेदः । पदाना- मिति श्लोकस्थपदानामित्यर्थः । आत्मकल्पनामूलकर्मफलभूता इति । आत्मकल्पना मूलं यस्येति बहुव्रीहिः । व्यक्तिभेदेन बीजाङ्कुरन्याये दोषाभावात् । विज्ञानशब्दे संकल्पशब्देऽपीति । वैविध्यानुसन्धानस्य विज्ञानशब्दार्थस्य एकीकृत्यानुसन्धानस्य संकल्पशब्दार्थस्य च हेतुहेतुमद्भावेन करणत्वसंभवात् "विज्ञानविजृम्भितानि, संकल्पतरोः फलानि' इत्युक्तयोर्न विरोधः, अन्यतरस्योक्तावन्यतरस्यार्थसिद्धत्वादिति भावः । भोग्यशब्दार्थः स्पष्टीकृतो भवतीति । भोगार्था इत्यपक्षिप्तानामेव वस्तुभेदा-नामुत्तरवाक्ये भाग्यभूता इति परामर्शादित्यर्थः । भोगसिद्धिप्रयोजनकत्वभेवेति । "तस्य निमित्तं संयोगोत्पातौ' इत्यस्मिन्नर्थे "गोद्व्यचः' इति भोगशब्दाद्यत्प्रत्ययः; न तु "ऋहलोर्ण्यत्' इति ण्यदन्तम्, तथात्वे भोगस्थानादीनां भोग्यशब्देन परिग्रहाता- पत्तेरिति भावः ।

व्याख्येयपदव्याख्यानार्थमिति । "वस्तुषुः' इत्यादिपदस्याव्याख्यातत्वात् तदर्थमित्यर्थः । व्याख्येयं पदमुदाहरतीति । "भोक्ता भोग्यम्' इति श्रुतिगतभोग्यपदमित्यर्थः । हेतुरनुक्त इति । यद्यपि "ज्ञानस्वरूपः' इत्यनेनैवास्तिशब्दवाच्यत्वे हेतुरुक्तः, तथापि भाष्ये नोक्तः । अत एव पूर्वश्लोकव्याख्याने, "इतरदस्तिाब्दाभिधेयम्' इत्युक्तम्, न तु तत्र हेतुरुपन्यस्त इति भावः । प्रयो-जकशिक्षेति । अस्तिनास्तिपदप्रवृत्तिनिमित्तशिक्षेत्यर्थः । अत्राभिधेयमिति । अस्मिन् श्लोके अस्तिशब्दस्यास्तिशब्दाभिधेय एवार्थः इत्यर्थः । स्वभोग्यभूतमचिद्वस्तु प्रतिक्षणमन्यथाभूतमालक्ष्यते इति भाष्ये प्रतिक्षणमन्यथाभूतं वस्तु भोग्यत्वेनालक्ष्यते, भोग्यमचिद्वस्तु प्रतिक्षणमन्यथात्वेनालक्ष्यत इत्युद्देश्यविधेयभावभेदेनाथर्द्वयसंभवमभिप्रेत्य द्वेधापि व्याचष्टे-अस्थिर इत्या- दिना । चाक्षुपज्ञाने प्रयोगप्राचुर्यादिति । यद्यपि चक्षुषा प्रत्यक्षेणोपलक्ष्यते इत्युक्तावपि न दोषः, तथापि चाक्षुषज्ञानातिरिक्त-प्रमाणान्नसंग्रहायानुभूयत इति व्याख्यातमिति द्रष्टव्यम् । श्लोकव्याख्यानपरिसमाप्तिमिति । अस्यां योजनायामिति शेषः । अयं भावः-आलक्ष्यते अनुभाव्यते भुज्यत इति वा, भोग्यत्वेनालक्ष्यत इति वा पूर्वयोजनायामेतादृशाप्रसिद्धार्थप्रदर्शनपरतया "इत्यर्थः' इत्यस्य साफल्यं संभवेत् । अस्यां तु योजनायामालक्ष्यत इत्यस्यानुभूयत इत्यर्थे प्रसिद्धिसत्त्वेन "इत्यर्थः' इत्यस्य वैयर्थ्यात् समा-प्तिद्योतकत्वमेव । अस्मिश्च पक्षे एवंसतीत्युत्तरभाष्यं श्लोकद्वयाभिप्रायकथनपरम् । एतदेवाभिप्रेत्य वक्ष्यति-अथवा श्लोकद्वया-भिप्रायमाहेति । पूर्वयोजनायां तु "इत्यर्थः' इत्यस्य समाप्तिद्योतकत्वाभावात् "एवंसति' इत्युत्तरभाष्यं ब्रूहीत्यादिपदार्थकथनपरम् । एतदेवाभिप्रेत्येण ब्रूहीत्यादेरर्थमाहेत्यादिग्रन्थ इति । अतः श्लोकव्याख्यानसमाप्तौ ब्रूहीत्याद्यर्थकथनं विरुद्धमिति न चोदनीयम् । अस्तिशब्दार्थमित्यादि विशेषणं सामर्थ्यसिद्धतयेति । न तु "वस्त्वस्ति किम्' इति शब्दाभिधेयतया, तत्रास्तिशब्दस्य भवत्य-र्थकत्वादिति भावः । वस्तुशब्दतुल्यत्वं न शङ्कनीयमिति । "वस्तत्वस्ति किम्' इत्यत्र वस्तुशब्दस्येत्यर्थः । यद्वास्तिाब्दा- भिधेय इत्यनेनेति । पूर्वयोजनायामस्तिशब्दार्हमित्यध्याहारः । अस्मिन् पक्षे तु भवत्यर्थकास्तिशब्दाध्याहार इति विशेषः । पूर्वपक्षयोजनायामिति । अतश्च पूर्वपक्षे विभज्य श्लोकद्वयार्थानुक्तिर्न दोषायेति भावः । अवच्छिन्नास्तिशब्दवाच्यत्वं चेति । "तदानीमस्ति' "इदानीमस्ति' इति पदान्तरसहितास्तिशब्दवाच्यत्वं चेत्यर्थः । आकारैक्यपरत्वं स्पष्यमिति ।"संखयाया विधार्थे धा' इति विधार्थभूतप्रकारे धाप्रत्ययविधानात् बहुधेत्यस्य बहुप्रकारमित्यर्थो वर्णनीयः । ततश्च तत्प्रतियोगिन एकशब्द- स्यापि प्रकारैक्यमेवार्थः । न च "एकं राशिं पञ्चधा कुरु' इत्यत्रेव "अधिकरणविचाले च' इति धाप्रत्ययोऽस्त्विति वाच्यम्, अधिकरणविचालनं हि एकस्य वस्तुनोऽनेकदाकरणम् । संख्यान्तरापादनमित्यर्थः । न हि विज्ञानस्य संख्यान्तरापादनं स्व- रसम् । तस्माद्विधार्थ एव धाप्रत्यय इति प्रकारैक्यमेवैकशब्दस्याभायुपेयमित्यर्थः ।

ननु "बहुधाभ्युपेतम्' इति विधार्थे धाप्रत्यय- श्रवणे पञ्चवाभुक्ते इत्यत्रेव क्रियागतं प्रकारबहुत्वं प्रतीयत इति वक्तव्यम्; न तु विज्ञानगतम्, क्रियाबहुत्वस्य धाप्रत्ययार्थत्वात् । ततश्च "बहुधाभ्युपेतम्' इत्यत्राभ्युपगमक्रियागतप्रकारबहुत्वं पर्यवस्येत्; न तु ज्ञानप्रकारबहुत्वम् । ततश्च "विज्ञानमेकम्' इत्यत्र विज्ञानप्रकारैक्यं कथं सिध्येत्? तद्बोधकाभावात् । एकत्वबहुत्वयोर्भिन्नविषयत्वादिति चेत्-न । अभ्युपगमक्रियाबहुत्वस्याभ्यु-पगम्यमानविज्ञानबहुत्वपर्यवसिततयैकत्वबहुत्वयोः समानविषयत्वात् इति भावः । औपाधिकमित्यर्थ इति । ननु देवाद्यनुसंधान-स्यौपाधिकत्वे किं प्रयोजनम्? "यदम्बु वैष्णवः कायः' इत्यादिश्लोकद्वयेनोक्तचिदचिदात्मकस्य जगतः संसृष्टत्वावस्थायां वियुक्त-त्वावस्थायां च भगवच्छरीरत्वमुपपादितम् । "ज्ञानस्वरूपो भगवान् यतोऽसौ' इत्यादिश्लोकद्धयेन चिदचिद्विवेकः, चितः सत्य-शब्दवाच्यत्वमचितोऽन्वयव्यतिरेकाभ्यां कर्मपरिणामतयाऽसत्यशब्दवाच्यत्वं चोपपादितम् । तदेवाचितोऽसच्छब्दवाच्यत्वं जग-दुपलब्धिप्रकारेणापि "वस्त्वस्ति किम्' इत्यादिश्लोकद्वयेनापि दृढाकृत्य, "तस्मान्न विज्ञानम्' इति श्लोकार्धे न चित एव सच्छ-ब्दवाच्यत्वं नाचित इत्युपसंहृतमेवेति समर्थनीयान्तराभावात् "विज्ञानमेकम्' इति श्लोकार्धोपन्यासहेतुभूतशिष्यजिज्ञासाविषयभूतं किमपि न दृश्यत इति चेत्, सत्यम्; अचिद्वस्तुनोऽसत्यशब्दप्रवृत्तिनिमित्तभूतपरिणामित्वोपपादककर्महेतुकत्वोपसंहाररूपतया सार्थक्यात् । कमक्षयवाचिपदानन्तरपदस्येति । कर्मक्षयवाचिपदं विशुद्धिमिति पदम् । तदनन्तरपदं विमलमिति पदम् । शरीरसं-बन्धरहितपरत्वेनेति । प्रकृतिस्पर्शरहितमित्यस्य शरीरसंबन्धरहितमित्यस्य च समानार्थत्वादिति भावः । चिदचित्साधारणा- विति । चिदचिद्विवेकपरत्वादिति भावः । अन्येष्वपि शब्देष्विति । सदसदादिशब्देष्वित्यर्थः । ननु "स्वर्गमयश्च कामः' इत्यस्य काम्यमानस्वर्गपरत्वमेव किं न स्यादित्याशङ्कय, "भूरादिभोगाच्च कामः' इत्यस्य काम्यमानस्वर्गपरत्वमेव किं न स्यादित्या- शङ्कय, "भूरादिभोगाश्च फलानि तेषाम्' इति फलस्य वक्ष्यमाणत्वात् स्वर्गेच्छापरत्वमेव युक्तमित्याह-फलस्य वक्ष्यमाणत्वा- दिति । ननु "यज्ञः पशुः' इत्यादिश्लोकस्य कथं कर्मस्वरूपप्रतिपादनपरत्वम्? पश्वदीनां यज्ञशेषतया तदनुप्रविष्टत्वेऽपि वह्नि-शब्दनिर्दिष्टदेवताया भूरादिभोगानां च फलभूतानामतच्छेषभूतानां कर्मत्वासंभवादित्याशङ्कयाह-देवतायाः फलस्य चेति । सर्वत्र व्रजति हीति । व्रजत्येवेत्यर्थः । कर्मवश्यो हीति । कर्मवश्य एवेत्यर्थः । ध्रुवमचलं सदैकरूपमिति ।

"यच्चैतद् भुवनगतं मया तवोक्तं सर्वत्र व्रजति हि तत्र कर्मवश्यः ।
ज्ञात्वैतद्ध्रुवमचलं सदैकरूपं तत् कुर्याद्विशति हि येन वासुदेवम् ।।'

इति श्लोकस्थैः "ध्रुवमचलं सदैकरूपम्' इति पदैः क्रमेण स्वरूपतो रूपतोगुणतश्चैकरूप्यमुच्यत इत्यर्थः । सदैकरूपमित्यत्र रूपत ऐकरूप्यस्योचितत्वमभिप्रयन्नाह-यद्वा स्वरूपतो गुणतो रूपतश्चेति । पूर्वेणान्वय इति सिद्धान्तोपक्रमगतप्रतिज्ञावाक्येन "नैत-देवम्' इत्यनेनान्वय इत्यर्थः ।

नासद्विलक्षणपरावित्यर्थ इति । यथा ब्रह्मणि प्रयुज्यमानावस्तिसत्यशब्दौ न सदसद्विलक्षणपरौ, एवं प्रपञ्चेऽपि प्रयुज्य-मानौ नास्त्यसत्याब्दौ न सदसद्वैलक्ष्ण्यपरावित्यर्थः । अर्थद्वारको विरोध इति । यद्यपि सदसद्विलक्षणत्वमपि सत्त्वविरुद्धं भवति-तथापि सत्त्वाभावमेवासच्छब्दो वदेत्, नातिरिक्तमिति भावः । विनाशित्वमेव हि मिथ्यात्वमिति शङ्कायामिति । तटस्थशङ्का-यामित्यर्थः; मृषावादिनस्तादृश्याः शङ्काया अनुत्थानात् । तथा सति विवादपर्यवसानात् । विनाशित्वस्वरूपे शेधयतीति । एकेनाकारेणैकस्मिन् कालेऽनुभूतस्य कालान्तरे परिणामविशेषेणान्यथोपलब्ध्या नास्तित्वोपपादनादिति भाष्यस्य परि-णामविशेषेणान्यथोपलब्धिर्हि विनाशित्वमित्यभिप्रायं मत्वा विनाशित्वस्वरूपं शोधयतीत्यवतारिका रचिता । केचित्तु एकेना-कारेणेत्यादिभाष्यमेवमवतारयन्ति-ननु "वस्त्वस्ति किं, मही घटत्व'मित्यत्र नाशित्वमेव ह्युपादितम्: न

निेप्रमाणकत्वं ज्ञान-बाध्यत्वं वा' इत्युक्तम् । नात्र विनिगमकं पश्याम इत्याशङ्कय, "वस्त्वस्ति किम्' इत्यादिश्लोकद्वयेन कालान्तरेऽन्यथोपलब्धस्य कालान्तरेऽन्यथोपलम्भेनोपपद्यमानस्य नास्तित्वस्य प्रमाणसंबन्धानर्हत्वलक्षणतुच्छत्वरूपे प्रतिपन्नदेशकालोपाधौ निषेधप्रति-योगित्वलक्षणमिथ्यात्वरूपे वा पर्यवसानासंभवेन विनाशित्व एव पर्यवसानस्योचितत्वमभिप्रयन्नाह-एकेनाकारेणैकस्मिन् काल इतीति । अस्मिन् पक्षे विनाशित्वमेव मिथ्यात्वमिति शङ्कायाः कथं विनाशित्वं तुच्छत्वमिथ्यात्वव्यावृत्तमिति शङ्कायाश्च तटस्थ-शङ्कात्वाश्रयणक्लेशो नास्तीति च वदन्ति । विनाशगभर्त्वं नास्तिाब्दप्रवृत्तिनिमित्तमित्यर्थ इति । नश्वरत्वं नास्तिशब्दप्रवृत्तिनि-मित्तमिति नास्त्यर्थत्वं नश्वरत्वस्य । अतश्च अचेतनं सर्वदा नास्त्यर्थगर्भमिति भाष्यस्य सर्वदा नाशभर्गमित्यर्थ इति भावः । स्वाभाविकास्तित्वयोगित्वबुद्धिविषयत्वमिति । स्वाभाविकास्तित्वमपरमार्थ इत्यर्थः । अपरमार्थभूतस्वाभाविकास्तित्वयो- गात् अचिद्वस्तुनोऽप्यपरमार्थत्वमिति भावः । न चापरमार्थस्वाभाविकसत्यत्वस्याचिद्रूपेऽभावात् कथं तद्योगेनाचेतनेऽपरमार्थ-त्वव्यवहार इति वाच्यम्, अचेतनमसत्सत्यत्वकमिति प्रतीत्या कस्यचित् संबन्धस्य बहुव्रीह्यर्थस्य वक्तव्यत्वात् । अपरमार्थ-न्वगर्भास्त्यर्थोपेतत्वादिति । अपरमार्थस्वभाविकसत्यत्वोपेतत्वादित्यर्थः ।

(निवर्तकानुपपत्तिः)

तेनात्मवयविषयत्वं चेति । तेन=निर्विशेषवस्तुनेत्यर्थः । यद्वा निर्विशेषवस्तुविषयत्वेनेत्यर्थः । तत्र हि "अद्भयः संभूतो हिरण्यगर्भ इत्यष्टौ' इति प्रतीकोपादानं कृतमिति । ततश्च "अद्भयः संभूतः' इत्युत्तरानुवाकपठितेन "वेदाहमेतं पुरुषं महान्तम्, आदित्यवर्णम्' इत्यनेन २सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि' इत्यस्य "अम्भस्यापारे' इत्यनुवाकगतस्यैकवाक्यत्वं वक्तव्यमिति भावः ।

(तत्त्वमस्यर्थः)

चतुर्धा हि परैः सामानाधिकरण्यमिति । "व्याप्तेश्च समञ्जसम्' इत्यत्र शांकरभाष्ये सामानाधिकरण्ये अध्यासापवादै-कत्वविशेषणानीति चत्वारः पक्षा उपन्यस्ताः । तत्र-"अध्यासो नाम-द्वयोर्वस्तुनोरनिर्वर्तितायामेवान्यतरबुद्धौ अन्यतरबुद्धिरध्य-स्यते । यथा नाम्नि ब्रह्मत्वबुद्धाबध्यरतायामप्यनुवर्तत एव नामबुद्धिः, न ब्रह्मबुद्धया निवर्तते । यथा वा प्रतिमादिषु विष्ण्वादिबुद्धि-रध्यासः । अपवादो नाम-यत्र कस्मिंश्चिद्वस्तुनि पूर्वनिविष्टायां निश्चितायां मिथ्यात्वबुद्धौ पश्चादुपजायामाना यथार्थबुद्धिः पूर्व-निविष्टाया मिथ्यात्वबुद्धेर्निवर्तिका भवति । यथा देहेन्द्रियसंघाते आत्मबुद्धिरात्मन्येवात्मबुद्धया पश्चाद्भाविन्या तत्त्वमसीत्यनया यथार्थबुद्धया निवर्तते । यथा दिग्भ्रान्तिर्दिग्याथात्म्यबुद्धया निवर्तते । एकत्वं च समानाधिकृतयोः शब्दयोर्द्वयोरनतिरिक्तार्थवृत्ति- त्वम् । तद्यथा "सिन्धुरः करी', "कोकिलः पिकः' इति । विशेषणविशेष्यभावे "नीलमुत्पलम्'-इत्युपन्यस्तम् । तस्यापीदमुप-लक्षणमिति द्रष्टव्यम् । सर्वं स्वल्विदं ब्रह्मेत्यादाविति । ननु शमविधिपरत्वेन, "नाम ब्रह्म' इत्यादाविव सर्वस्मिन् ब्रह्मदृष्टिविधि-परत्वाभावेन अध्यासे सामानाधिकरण्यमिति परैर्न व्यवहृतम्; कथमेवमुच्यत इति चेत्-न । यदि न व्यवहृतम्, तर्हि "नोदाहरण-मादर्तव्यम्' इति न्यायेन संप्रतिपन्नबुदाहरणान्तरं द्रष्टव्यम् । स्थित्यादिविशेषणविधुरेति । तिष्ठतिक्रियाय आनयनदशायाम-संभवादिति भावः । स्थित्यादिविशेषणेनेति । यत्प्रत्याय्यव्यावृत्तिमत्तया ज्ञाते तात्पर्यविषयेतरविशेषणान्वयधीः, तत्त्वस्यैव विशेषणत्वरूपत्वम्; न तु विधेयान्वयिरूपत्वमिति भावः । यथान्वयार्हमिति । विधेयसमकालतया वा विधेयभिन्नकालतया वा यथान्वयार्हमित्यर्थः । अत एव "सोऽयं देवदत्तः' इत्यादौ देशकालादीनामपि विशेषणत्वमिति भावः । एकस्यापि परित्याग इति । अत एव"संबन्धादेवमन्यत्रापि' इत्यधिकरणे

व्याहृतिविद्यायाम् "तस्योपनिषदहरित्यधिदैवतम्', "तस्योपनिषदहमि-त्यध्यात्मम' इत्यत्र तच्छब्दस्य पूर्वप्रपृतस्थानविशेषविशिष्यवचनत्वात् तत्तन्नाम्नो व्यवस्थितिः, न तु विशेष्यमात्रवचनतयाऽव्य-वस्थितत्वमिति समर्थितमिति भावः । प्रकृतत्वं दूरोत्सारितमिति । अत एव निर्विशेषप्रतीतिस्तपदेन लक्षणयैवेति परैरपीष्यत इति भावः । प्रतिसंधानानर्हत्वादिति । तत्पदजन्यप्रतिसंधानानर्हत्वादित्यर्थः । कनकं प्रतिसन्धीयत इति । न च तच्छब्दानुवि- द्धतया तदिति प्रात्यक्षिकप्रतिसंधाने सत्यपि तत्पदजन्यप्रतिसंधानविषयत्वस्यानुपपादितत्वात् कथमयमाक्षेप इति वाच्यम्, तच्छ-ब्दानुविद्धप्रतिसंधानानर्हस्य तत्पदजन्यप्रतिसंन्धानानर्हत्वमपि संभवतीति तदभिप्रायात् । शब्दस्त्विपि । वस्तुतस्तु प्रत्यक्षेण यत्रा-ङ्गुलीयकत्वप्रहाणेन तदिति कनकं प्रतिसंधीयते, तत्रापि संस्कारसाचिव्यादङ्गुलीयकत्वविशिष्यस्यैव परामर्श इत्युक्तावपि न दोषः । प्रयोजकोपलक्षणाभिप्रायेणेति । ततश्च किंचिज्ज्ञत्वादिरूपमाभिमुख्यप्रयोजकमप्यचिद्विशिष्टेत्यनेन संगृहीतमिति भावः । अन्यथाऽतीतानागतेति । प्रतीतियौगपद्यमादाय विषययौगपद्याभ्युपगमे प्रत्येतव्यस्य प्रतीतिसमकालत्वमिति नियमोऽभ्युपगतः स्यात् । ततश्चातीतानागतविषयेऽपि विषयविषयिणोः समकालत्वनिर्वाहाय विषयिणो वाऽऽतीतत्वं विषयस्य वा विद्यमानत्वं स्यादिति भावः ।

उक्तदृष्टान्तादिति । "शुक्तिरेव रजतम्' इति दृष्टान्तादित्यर्थः । उपलक्ष्यसामानाधिकरण्यादिति । "अन्वयमुखेनोप-लक्ष्यवस्त्वैक्यपरम्' इति प्रतिपादितात् उपलक्ष्यसामानाधिकरण्यादित्यर्थः । पाठो निरीक्षणीय इति । आश्रयशब्दस्य नित्यपुंल्लि-ङ्गत्वादिति भावः । आश्रयशब्दो विषयपर इति । विषयीकरणपर इत्यर्थः । स्वसिद्धान्तरमाह- आरेप्याकाराधिकरणभूतमधिष्ठा-नमिति वार्थ इति । भ्रम्यत इति भ्रमः. आरोप्याकारो रजतादिरेव । तस्याश्रयम् आश्रीयम् आश्रीयत इत्याश्रयम् "अकर्तरि च कारके' इत्यधिकारे कर्मणि "परच्' इत्यच्प्रत्ययः । न च "ऋजवन्ताः पुंसि' इति पुंलिङ्गत्वमजन्तत्वे स्यात्,

"क्तल्यू नपंसके भावे स्त्रियां क्तिन्नादयो यतः ।

अतो घञाद्याः पुंस्येव यथा पाकश्चयो लवः ।।'

इति वाच्यम्, तस्य भावार्थघञादिविषयत्वात् । यथोक्तम्-

"भावे घञाद्याः पुंस्येव कर्तृभिन्ने तु कारके ।

पुंनपंसकयोरेव न कथंचित् स्त्रियां क्विचित् ।।'

इति । तेन कर्मादिषु कारकेषु पुंनपंसकत्वमस्तीति विशेष्यस्य नपुंसपत्वान्नपुंसकत्वमुक्तमिति द्रष्टव्यम् । यथा पलाशपुष्पविष- येति । यद्यपि श्लोके भ्रमर्या वृन्तेभ्रमरभ्रमेण पलाशपुष्पविषयदावभ्रमे निवृत्ते पलाशपुष्पालश्लेषमात्रं प्रतीयते; "भ्रमरभ्रमेण' इत्य- स्य "अदावभ्रमम्' इत्यनेनैवान्वितत्वेन "आश्लिषत्' इत्यनेनान्वितत्वाभावात्, तावन्मात्रस्यैव प्रकृतोपयुक्तत्वाच्च-तथापि भ्रमर-ज्ञानस्य भ्रान्तित्वस्पष्टीकरणार्थं पलाशपुष्पाश्लेषस्य भ्रमरभ्रमनिवर्तकत्वमप्युपन्यस्तमिति द्रष्टव्यम् । भ्रमविषयनिवृत्तेरिति । निवृविरपहारः, असत्त्वमिति यावत् । पारमार्थिकधर्मतत्तिरोधानानभ्युपगमे भ्रान्तिबाधौ दुरुपपादौ इति हि भाष्यम् । तत्र बाधो हि विषयापहारः, विषयासत्त्वमिति यावत् । ततश्च भ्रान्त्यन्तरं निवर्तताम्; मा वा । दावत्वरूपविषयस्यासत्त्वरूपो बाधः

पारमार्थिर्कपलाशपुष्पत्वकृतः; विरोधिधर्मपारमार्थ्यायत्तत्वात् तद्विरोधिधर्मासत्त्वस्येति भावः । भ्रान्तिबाधो नाम भ्रान्तिविनाश एवेत्यभिप्रेत्याशङ्कते-भ्रमरभ्रमेण दावत्वभ्रमनिवृत्तिरिति चेदिति । असत्ये सत्यत्वविषयभ्रमान्तरमिति । ननु-तन्निवृत्तिरपि भ्रमान्तरेण, तन्निवृत्तिरपि भ्रमान्तरेणेत्याश्रयणे भ्रमपरंपरया निःशेषाविद्यानिवृत्त्यनुपपत्तिः इत्येतावतैव ग्रन्थेन विवक्षितार्थः सिध्यतीति, "ततः किम्? दावत्वबुद्धिनिवृत्तिः' इत्यादिग्रन्थस्य नातीव प्रयोजनं

पश्यामः । किं च अभ्रमरे भ्रमरत्वविषयत्वेनैव भ्रमत्वोपपादनसंभवे सत्यत्वविषयत्वपर्यन्तोपपादनस्यापि न प्रयोजनमिति चेत्-न; विरुद्धाकारसत्यत्वावगाहिज्ञानस्यैव बल- वत्त्वेन बाधकत्वमिति शिक्षणार्थत्वेनास्य ग्रन्थस्योपपत्तेः । निःशेषाविद्यानिवृत्त्यनुपपत्तिरिति । भ्रमेण भ्रमनिवृत्तिमात्रदर्शनेऽपि मोक्षे निःशेषाविद्यानिवृत्तिमभिलषता सुदूरमपि गत्वा पारमार्थिको धर्मः स्वीकरणीय इति भावः । किं च भ्रमरभ्रमनिवृव्यनन्त-रमिति । वृन्तत्वज्ञानेन भ्रमरत्वव्यतिरेकनिश्चये निवर्तकीभूतभ्रमरत्वबुद्धेरपारमार्थ्यनिश्चयेन दावत्वबुद्धेः पारमार्थ्यबुद्धेरवर्जनीय-त्वादिति भावः । परमार्थपलाशपुष्पत्वग्रहणेनैव प्रतिनिवृत्त इति । यद्यपि दावत्वभ्रमस्य वृन्ते भ्रमरत्व पारमार्थ्यभ्रममात्रेणापि तद्बाधकज्ञानानुत्पत्तिस्थले निवृत्तिः संभवति, तथापि भ्रमर्याः पलाशपुष्पत्वज्ञानादेव सा भ्रान्तिर्यत्र निवृत्ता तदभिप्रायेण तथो- क्तमिति द्रष्टव्यम् । न स्यादिति चेदिति । नश्येदिति चेदित्यर्थः । ननु-न तस्यैव मिथ्यात्वं सत्यत्वं च प्रसज्यते । विनाश्य-विनाशकभावलक्षणबाधकभावस्य मिथ्यात्वसत्यत्वनिरपेक्षत्वात्, तुल्यसत्ताकयोरेव पूर्वोक्तज्ञानयोर्विनाश्यविनाशकत्वलक्षण-बाध्यबाधकत्वदशर्नात् । न च बाधकज्ञानविषयस्य सत्यत्वं बाध्यज्ञानविषयस्य मिथ्यात्वं चापेक्षितमिति चरमज्ञानविषयस्य मिथ्यात्वसत्यत्वे स्यातामिति वाच्यम्, तस्याद्याप्यसिद्धेरित्यस्वरसादाह-किंच प्रपञ्चोऽपीति । स्वयं नाशेऽपि नाशस्यावस्था-न्तररूपत्वादिति । न च परतो नाशेऽपि नाशस्यावस्थान्तरूपत्वादिति सुवचमिति वाच्यम्, ज्ञानेन निवृत्तिस्थले मूलभूताविद्याया एव निवृत्तिरिति नावस्थान्तरापत्तिलक्षणो विनाश इत्यत्र तात्पर्यात् । अत एव यत्र मुद्गरप्रहारेण घटनाशस्तत्र स्वकारणे विलय-मात्रमेव; न तु घटस्यात्यन्तनिवृत्तिः । यत्र तु शुक्तिज्ञानेन रजतनिवृत्तिः, तत्र स्वोपादानेन सह निःशेषनिवृत्तिः, न तु स्वकारणे विलय इति पराभ्युपगम इति भावः । राजकुमारसमाधिरिति । समन्वयाधिकरणभाष्य,"कश्चिद्राजकुमारः' इत्यादिना स्पष्ट- यिष्यते । उक्तं च परैरपि-

"राजसूनोः स्मृतिप्राप्तौ व्याघभावो निवर्तते ।

यथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः ।।' इति ।

सार्वज्ञ्यादिगुणकत्वस्य प्रत्यक्षाद्यगोचरत्वादिति । यद्यपि पूवर्संदर्भप्रतिपन्नस्य सार्वज्ञ्यादिगुणकस्योद्देश्यत्वं संभवति, तथापि तत्पक्षे "असि' इति मध्यमपुरुषानुपपत्तिरिति दूषणं द्रष्टव्यम् । अन्तर्यामिणः प्रत्यक्षागोचरत्वादिति । यदि चान्तर्यामी पूर्वप्राप्तः, तदोपदेशवैयर्थ्यमिति द्रष्टव्यम् । ननु "ऐतदात्म्यम्' इत्यनेन शरीरशरीरिभावस्य प्राप्तत्वेऽपि त्वंशब्दतदर्थतद्बुद्धीनां परमात्मपर्यन्तत्वरूपस्य "तत्त्वमसि' इति वाक्यप्रतिपाद्यार्थस्याप्राप्तत्वादुद्देश्योपादेयसिद्धिरित्याशङ्कय तस्यापि प्राप्तिमुपादयति-अस्मिन्नेव प्रकरण इति । इदं च त्वमादिशब्दानां परमात्मपर्यन्तत्वमिति "तत्त्वमसि' इत्यस्यार्थ इत्यभ्युपगम्योक्तमिति द्रष्टव्यम् । उद्देश्योपादेयविभागवत्त्वभ्रान्तिरेवेति । ननु "अग्निर्हिमस्य भेषजम्' इत्यादौ प्राप्त्यप्राप्तिनिबन्धनानुवाद्यत्वविधेयत्वाभावेऽपि निर्देशगतस्वातन्त्र्यपारतन्त्र्यरूपोद्देश्योपादेयविभागवत्त्वे न दोषः । न चानुवाद्यत्वविधेयत्वे एवोद्देश्यत्वोपादेयत्वे इति वक्तुं शक्यम्-"पौर्णमास्यां पौर्णमास्यां यजेत' इम्यादावनुपादेयस्यापि कालस्य विधेयत्वदर्शनादिति भावः । केचित्तु-उद्देश्योपादेयशब्दावनु-वाद्यत्वविधेयत्वपराविवदन्ति । प्रापकवाक्यस्थोद्देश्यवाचीति । यद्यपि त्वंशब्दस्य "ऐतदात्म्यमिदम्' इति प्रापकवाक्यस्थ-विधेयवाचकैतदात्म्यशब्दवाच्यपरमात्मपर्यन्ततया विधेयत्ववाचित्वमपीति न विनिगमकमस्ति, तथाप्यसति विनिगमके द्वयोरपि प्रयोगार्हत्वात् मध्यमपुरुषः प्रयुक्त इति भावः । तदनुरोधेन मध्यमनिर्देश इतीति । यद्यपि-मानान्तरसिद्धत्वेऽपि त्वंशब्दार्थस्य तच्छब्दाथर्प्रकृतित्वविवक्षायां प्रकृतेरेवासिक्रियाकर्तृत्वान्मध्यमपुरुषो भवति । अत एव "यदग्ने स्यामहं त्वं त्वं वा स्या अहम्' इति मन्त्रे "अहं त्वं स्यां, त्वं वा अहं स्याः' इति प्रकृत्याश्रयःपुरुषो भवतीति "युष्मद्युपपदे' इति सूत्रे प्रतिपादितम् । ततश्च त्वदात्मक एव सर्वज्ञत्वादिगुणको जगत्कर्तेत्ययमर्थः पर्यवस्यति, विवक्षानुसारित्वाच्छब्दप्रवृत्तेः मानान्तरसदसद्भावयोरप्रयोजकत्वात् । अत एव

हि "आत्मेति तूपगच्छन्ति' इत्यधिकरणे आचार्याः स्वयमेव तथा वक्ष्यन्ति-तथाप्यत्रोपायान्तरमुपन्यस्तमिति द्रष्टव्यम् । सदायतना इत्यनेनाधाराधेयभाव उक्त इति । "सन्मूलाः सत्प्रतिष्ठाः' इत्यत्र सच्छब्दो विशिष्टपरः । प्रजाशब्दोऽपि कार्यावस्थ-ब्रह्मपरः, केवलस्योपादानत्वासंभवात् । "सदायतनाः' इत्यत्र तु सच्छब्दो विशेष्यस्वरूपमात्रपरः । प्रजाशब्दोऽपि न ब्रह्मपर्यन्तः,

अपित्वचिद्विशिष्टजीवमात्रपरः ।वैरूप्यमपि प्रामाणिकत्वादभ्युपेयम् । अथवा प्रजाशब्दः सर्वत्र विशेषणमात्रपरः । अस्मिन्नपि पक्षे उपपत्तिः प्रागेव दर्शिता । सन्मूला इत्यादिवाक्यैकार्थ्यादिति । "सर्वं खलु' इति वाक्ये इतिकरणेन हेतुत्वं स्पष्टम्; अन् इत्यस्य शरीरशरीरिभावार्थत्वमस्पष्टम् । "सदायतनाः' इत्यत्र शरीरशरीरिभावः स्पष्टः; हेतुत्वमस्पष्टम् । ततश्च नष्टाश्वदग्धरथ-न्यायेनोभयोरपि परस्पराकाङ्क्षतयार्तनिर्णायकत्वमिति भावः । शरीरात्मभावः फलित इति । आत्मत्वप्रतिपादनेन शरीरत्वमपि फलितमिति भावः । साधारण्यं स्यादिति । ततश्चा-न्यतरमात्रेऽपि पर्यवस्येदिति भावः । अयं निर्देश इति । "यस्यात्मा शरीरम्' इत्यादिनिर्देश इत्यर्थः । अधिकरणाधिकर्तव्येति । "य आत्मनि तिष्ठन्' इत्यधिकरणाधिकर्तव्यत्वमुक्तम्, "आत्मनोऽन्तरः' इति व्याप्यव्यापकभावः, "यमात्मा न वेद' इत्यज्ञप्राज्ञ-भावः, "य आत्मानमन्तरो यमयति' इति नियाम्यनियन्तृभावश्चोक्त इति भावः । पृथिव्यवादीनामिति । "ऋक्पूरब्धूः' इत्यप्रत्य-याभावः समासान्तविधेरनित्यत्वादिति द्रष्टव्यम् । अन्तर्यामिब्राह्मणेनैव चारितार्थ्यात् "यः पृथिवीमन्तरे संचरन्' इति सुबाल-वाक्योपादनस्य प्रयोजनमाह-कारणावस्थमपीत्यादिना । जीवेन मयेति श्रवणादित्यत्राह-तदनुप्रविश्येतीति । ननु श्रुत्यन्तरे तादृशवाक्यान्तरसद्भावेऽप्यश्रुतवेदान्तान्तरस्य श्वेतकेतोः"अनेन जीवेनात्मना' इत्यनेन वाक्येन जीवब्रह्माभेदसिद्धिः कस्मान्न स्यादिति चेत्-न; अत्रापि प्रकरणे "सन्मूलाः सोम्येमाः सर्वाः प्रजाः' इत्यनेन प्रजाशब्दार्थस्याचित्संसृष्टचेतनस्य सच्छरीरत्वा-दिकथनेन"सता सोम्य तदा संपन्नो भवति' इत्यादिभेदनिर्देशेन चाभेदभ्रमनिवृत्त्युपपत्तेः । नामरूपाभ्यामितीत्यर्थभावे तृती- येति । यद्यप्येकीकृतं वस्तु नामरूपाभ्यां करणाभ्यां विभिन्नतयाऽक्रियत=अज्ञाप्यत इत्येवं व्याकरणे नामरूपयोः करणत्वमपि संभवति । कारकविभक्तित्वसंभवे उपपदविभक्तित्वं चान्याय्यम्-तथाप्युपायान्तरप्रदर्शनपरत्वाददोष इति ध्येयम् । संज्ञासंज्ञि-संबन्धव्युत्पादक इति । संकेतयितरि पित्रादावित्यर्थः । गङ्गापदाग्निपदापेक्षया नामित्वाप्रसिद्धेरिति । न च-घटपदवाच्यस्यापि कलशस्य नामित्वं नास्त्येव, घटशब्दस्य संज्ञाशब्दत्वाभावादिति वाच्यम्-अत्र नामशब्दस्य घटादिशब्दसाधारणवाचकत्वमात्रार्थ-कत्वेन संज्ञाशब्दपर्यायत्वाभावादिति भावः । निष्पाद्यमानतत्तद्रूपवाचकशब्दव्युत्पादनमेवेति । तत्तद्रूपवाचकशब्दवाच्यत्वसंपा-दनमेवेत्यर्थः । ननु-अस्तु नामव्याकरणं शब्दवाच्यत्वसंपादनम्; तथापि चिदचितोरेव नामवाच्यत्वसिद्धिः; न ब्रह्मणः, ब्रह्मपर्य- न्तत्वे प्रमाणाभावात्;"तद्धेदं तर्ह्यव्याकृतमासीत्' इत्यत्रापीदंशब्दस्य जगद्वाचितया ब्रह्मवाचित्वाभावादित्याशङ्कय नामवाच्य- त्वस्य ब्रह्मपर्यन्तत्वमुपपादयति-तत्र बहु स्यामित्यनेनत्यादिना । तत्र=नामव्याकरणस्य नामवाच्यत्वसंपादनरूपत्वे सतीत्यर्थः । लोकतो व्युत्पत्त्यभावपरिहार इति । लौकिकानामपूर्वे व्युत्पत्तिः कुतो नास्तीति शङ्कायाम पूर्वस्य लौकिकप्रमाणागोचरत्वेनेति यथा परिहारः क्रियते, तथेत्यर्थः । वैयधिकरण्येन प्रतिज्ञातस्य उपसंहार इति । "एतदात्म्यम्' इति बहुव्रीहिणा वैयधिकरण्येन, "इदं सर्वम्' इति सामान्येन च निर्दिष्टस्य शरीरात्मभावस्य, "तत्त्वमसि' इति सामानाधिकरण्येन विशेषे चापेसंहारः कृत इत्यर्थः । न तु निगमनवाक्यानामिति । ननु यथा "धूमवान् सर्वोऽपि वह्निमान्' इति पर्वतसाधारण्येन धूमवत्त्वावच्छेदेन वह्निमत्त्वव्याप्त्यु-पदर्शनेन ज्ञातत्वेऽपि "पर्वतो वह्निमान्' इति वाक्यस्यैतत्पर्वतत्वावच्छेदेन वह्निप्रतिपादकस्य(?) यथोद्देश्योपादेयत्वम्, एवमिह किं न स्यादिति चेत्-न;

तत्रापि "इमे पर्वता वह्निमन्त' इति पुरोवर्तिपर्वतसाधारण्येन निश्चयस्थले उद्देश्योपादेयविभागाभावस्येष्ट-त्वादिति भावः ।

भेदश्रुतिघटकश्रुत्वविरोधार्थमिति । द्वाभ्यामपि सामानाधिकरण्यस्याविरोधार्थमित्यर्थः । तन्त्रेणोक्तिरिति । अचिद्ब्रह्मणोर्भेदाभेदौ स्वाभाविकौ; चिद्ब्रह्मणोस्त्वभेदः स्वाभाविक, भेदस्त्वौपाधिकः; मुक्तावभेदवचनादिति भास्करमतम् । चिद्ब्रह्म-णोरपि भेदाभेदौ स्वाभाविकौ, मुक्तौ भेदस्यापि निर्देशादिति यादवप्रकाशमतमिति विवेको द्रष्टव्यः । स्ववाक्येन सत्यं ज्ञान-मित्यादिनेति । आदिपदेन "सदेव सोम्येदम्' इत्यादेः प्राकरणिकवाक्यस्यापि परिग्रहः । परित्यागः फलित इत्यर्थ इति । स्वा-रसिकार्थपरित्यागा एवोपदोपरित्यागः । न हि वेदस्य तदर्थत्यागादन्यस्त्यागोऽस्तीति भावः । ब्रह्मज्ञानेन जीवस्य दोषनिवृत्तेः शास्त्रसिद्धत्वान्नित्यदोषोपहितत्वं ब्रह्मणो बाधितमित्यस्वरसादाह-यद्वा तत्तद्दोषसंबन्धार्हत्वमिति । यथा जीवस्य दोषसंबन्धा- र्हत्वं स्वाभाविकम्, एवं तदभिन्नब्रह्मणोऽपि स्यादित्यर्थः । ननु-निर्दोषब्रह्मतादात्म्योपदेशविरोधो न संभवति । तन्मते इश्वरस्यैव निर्दोषत्वम् । चिदचिदीश्वरसमुदायात्मकब्रह्मद्रव्यस्य न निदोॅषत्वम् । येन निर्दोषब्रह्मतादात्म्योपदेशविरोधः स्यादित्याशङ्कयाह-सद्ब्रह्मात्मादिशब्दानामिति । निर्दोषश्रुतिविरोधः फलित इति । जीवस्य ब्रह्मतादात्म्ये प्रतिपाद्ये ब्रह्मणो निर्दोषत्वश्रुतिर्विरुध्ये- तेति पर्यवसितोऽर्थः । हेयापहेति । "स्त्रगियं यदि जीवितापहा' इतिवत् "अन्येभ्योऽपि दृश्यते' इति डप्रत्यये, "क्विष् च' इति क्विपि

वा रूपम् । क्विषप्क्षे बह्वादिषु पाठसामर्थ्यात् ङीषभावे "ऋन्नेभ्यः इति न ङीबिति धातुवृत्तावुक्तमिति द्रष्टव्यम् । ततश्च "अपे क्लेश-तमसोः' इति क्लेशतमसोरेवोपपदयोर्डप्रत्ययविधानमिति कथमिदं रूपमिति न चोदनीयम् ।

दण्डादिव्यावृत्त्यर्थमाहेति । "शरीरभावेन३ इति पदसमभिव्याहारेण "विशेषणत्व' इति भाष्यस्यापृथक्सिद्धतया विश-षणत्वमिति लभ्यते, न विशेषणत्वमात्रमिति भावः । तत्र तत्र प्रयोगविषयेष्वनुवृत्ताकरदर्शनादिति । ननु जातिगुणद्रव्येष्वपृथ-कसिद्धविशेषणत्वस्यानुगतस्य मत्वर्थप्रत्ययनिरपेक्षसामानाधिकरण्यप्रयोजकस्य संभवेऽपि देवादिशब्दप्रवृत्तिनिमित्तस्य शरीर-जीवपरमात्मसाधारणस्य प्रवाहतीरानुगतगङ्गापदप्रवृत्तिनिमित्तस्येवैकस्याभावात् तच्छब्दप्रवृत्तिनिमित्तदेवत्वादिजात्याश्रयशरीर- स्यैव मुख्यत्वम्, अतदाश्रयात्मनि तत्संबन्धाल्लक्षणैवास्त्विति चोद्यस्य कः परिहार उक्त इति चेत्-उच्यते-देवत्वादिकमेव देवादि-शब्दस्य शरीरात्मसाधारणं प्रवृत्तिनिमित्तं "स्थूलो मनुष्यो देवः' इत्याद्यबाधितप्रयोगवशात् देहस्य देवत्वाद्याश्रयत्वाभ्युपगमवत् "देवोऽहं जानामि' इत्यबाधितप्रयोगवशात् देवत्वाश्रयत्वस्यात्मन्यप्यभ्युपगन्तव्यत्वात् । न च देहात्मविवेककृतोऽयं प्रयोग इति वाच्यम्, "नाहं देहः' इति देहेत्मविवेकवतोऽपि "नाहं देवो मनुष्य' इत्यप्रतीतेः । न च-देहद्वारा देवत्वरूपप्रवृत्तिनिमित्ताश्रयत्वे-ऽप्यात्मनः साक्षात् प्रवृत्तिनिमित्ताश्रयत्वाभावान्न तच्छब्दवाच्यत्वम् । अन्यथा घटद्वारा घटत्वाश्रयभूतलस्यापि घटशब्दवाच्यत्व-प्रसङ्ग इति वाच्यम्, तत्र "भूतले घटत्वम्' इति वा "भूतलं घटः' इति वा भूतलस्य घटत्वाश्रयत्वग्राहकस्याबाधितप्रमाणस्याभावेन तस्य घटाब्दवाच्यत्वाभावेऽपि "देवोऽहं जानामे' इत्यबाधितप्रतीतेर्देवत्वरूपप्रवृत्तिनिमित्ताश्रयत्वस्य, तत्त्वेन तच्छब्दवाच्यत्व-स्याप्यावश्यकत्वात् । अपूर्वान्तिरितस्यापि यागादेः स्वर्गसाधनत्ववत्, आस्तरणान्तरितस्यापि पर्यङ्कादेः शयानदेवदत्ताधारत्ववत् शरीरान्तरितस्याप्यात्मनो देवत्वाद्याश्रयत्वं न विरुध्यते । भूतलस्य तु घटाधारत्वमेव । न तु घटत्वाधारत्वम्, तथा अप्रतीतेरिति विशेषः । "उष्णं जलम्' इत्यादौ त्वबाधितप्रतीतिव्यवहाराभावात् नोष्णादिशब्दवाच्यत्वम् । अत एवापृथक्सिद्धविशेषणवाचि-शब्दानां विशेष्यवाचित्वे दीपाद्यपृथक्सिद्धप्राभावाचिशब्दानामपि दीपदिवाचित्वप्रसङ्ग इत्यादिश्रुद्रोपद्रवाणामपि नावकाशः, दीपादेः प्रभात्वरूपप्रवृत्तिनिमित्ताश्रयत्वाभावात् ।

ननु "मनुष्यादिशरीराणाम्' इति भाष्ये तत्प्रकारत्वमपृथक्सिद्धविशेषणत्वरूपतयोच्यमानं दण्डादिष्वतिप्रसक्तमित्या-शङ्कयाह-अन्यतरान्वितमिति । नन्वात्मैकाश्रयत्वतदेकार्थत्वयोरन्यतरान्वितं
प्रकारत्वमपृथक्सिद्धविशेषणत्वमित्ययुक्तम्, व्यर्थ-विशेष्यत्वात् । किंच तथा
सत्यात्मैकाश्रयत्यतदेकप्रयोजनत्वान्यतरप्रयुक्तमित्येवोच्यताम्; किमित्यात्मैकाश्रयत्वं तदेकप्रयोजन-त्वमिति निर्देश इत्यस्वरसादपृथक्सिद्धत्वप्रयोजकत्रयपरतया व्याचष्टे-यद्वा प्रकारत्वशब्देनेति । उत्तरत्र प्रकारत्वविवरण इति । न चात्मविशेषणतयैव प्रतीतेरिति भाष्यखण्डस्य प्रकारत्वप्रमाणोपन्यासपरत्वसंभवेन प्रकारत्वविवरणरूपत्वमसिद्धम्; अतः प्रकारत्वं प्रकारतैकस्वभावत्वमित्यर्थः किं न स्यादिति वाच्यम्-तथा हि सति
तदेकाश्रयत्वतदेकप्रयोजनत्वतद्विशेषणत्वैः शरीर- स्यापि तत्प्रकारतैकस्वभावत्वावगमादिति
विशेषणत्वततत्प्रकारतैकस्वभावत्वयोरुपपद्योपपादकभावेव भेदेन निर्देशकं भाष्यं विरु- ध्येत । अतो विशेषणत्वं विशेषणतयैव प्रतीतत्वं विवक्षितमिति भावः । भृत्यादिदेहेष्विति । न च भृत्यदेहस्य स्वामिप्रयोजनसाध-नत्वेऽपि स्वप्रयोजनादेरपि साधकतया नातिव्याप्तिः शक्यशङ्केति वाच्यम्, तथात्वे पत्रीपुत्रादिभोगसाधने
शरीरऽसंभवापत्तेरिति भावः । ननु प्रकारत्वं प्रकारतयैव प्रतीतिरिति व्याख्यातत्वात् विशेषणतया प्रतीतेः प्रकारतया प्रतीतत्वमित्युक्ते साध्याविशेष इत्या-शङ्कयाह-पञ्चमीनिर्देशस्त्वौपचारिक इति । एतत् त्रितयमिति ।
त्रित्वोक्तिः "मनुष्यादिशरीराणाम्' इत्यादिभाष्यद्वितीयव्या-ख्याभिप्रायेणेति द्रष्टव्यम् । स्वरूपमिति । अत्र स्वशब्द आत्मीयवाचीति भावः । प्रयोजकान्तराभावादेकसामग्रीवेद्यत्वं प्रयो-जकमुच्यत इति ।
एकसामग्रीवेद्यत्वमपृथकसिद्धविशेषणत्वे प्रयोजकमिति तदभावान्नापृथक्सिद्धविशेषणत्वमित्युच्यत इत्यर्थः । एवं सत्येव "पृथग्ग्राहणयोग्यस्य' इति भाष्यावतारिकाग्रन्थैकरूप्यमुपपद्य इति द्रष्टव्यम् ।
एकसामग्रीवेद्यतास्वभावत्वव्या- वृत्त्यर्थ इति ।

अत्र केचित्-"प्रकारतैकस्वरूपत्वं दुर्घटम्' इत्यत्रैकशब्दस्येवेहापि कदाचिदप्रकारत्वव्युदासकत्वस्यैव युक्तत्वात् तस्यै-वेह कथनाच्च तदेव युक्तम् । न त्वेकसामग्रीवेद्यत्वस्वभावत्वव्यावृत्त्यर्थत्वम्,
तदेकाश्रयत्वादीनामपृथक्सिद्धविशेषणत्वावगम-कत्ववदेकसामग्रीवेद्यत्वाभावावगमकत्वाभावात् । अत एव "यदि तदेकाश्रयत्वादिरेवापृथक्सिद्धविशेषणत्वे प्रयोजकः' इत्युत्त-रग्रन्थावतारिकापि न युक्ता,
एकसामग्रीवेद्यत्वाभावस्योक्तरीत्या प्रागसमर्थितत्वेनैकाश्रयत्वादिरेवेत्यनुवादासंभवात् । "कथं तर्हि सहोपलम्भनियमः' इत्युप्ययुक्तम् । तस्य ह्ययमभिप्रायः-एकसमाग्रीवेद्यत्वस्यापृथक्सिद्धविशेषणत्वाप्रयोजकत्वे अपृथक्सिद्ध-
विशेषणेषु जातिव्यक्तयादिष्वेकसामग्रीवेद्यत्वानवश्यम्भावेन तन्निबन्धनः सहोपलम्भनियमोऽपि न स्यादिति ।
एवमाक्षिपन्तं प्रति "सहोपलम्भनियमस्त्वेकसामग्रीवेद्यत्वनिबन्धनः' इति परिहारस्यायुक्तत्वात् ।
तदभ्युपगमेनैवाक्षेषस्य प्रवृत्तत्वात् । जात्यादौ सहोपलम्भनियम इत्यध्याहारस्यापि क्लिष्टत्वाच्च ।
किंच "पृथग्ग्रहणयांम्यस्य प्रकारतैकस्वरूपत्वं दुर्घटम्' इति भाष्यस्य सहोपल-म्भनियमशून्यस्य
तत्प्रकारतैकस्वरूपत्वं दुर्घटमित्यर्थस्यैव स्वरसतः प्रतीतेः स एवार्थ उचितः । किं प्रकारतैकस्वरूपत्वे प्रमाणा-भावात् तन्नास्तीत्यभिप्रायः? उत प्रकारत्वस्य स्वभावत्वे यद्वस्तु यत्स्वभावविशिष्टं तद्वस्तु गृह्यमाणं
तत्स्वभावयुक्तमेव गृह्यत इत्यपृथक्सिद्धत्वस्वभावत्वे तद्विशिष्टमेव गृह्येतेत्यभिप्राय इति विकल्प्य प्रथमं दूषयति-
भाष्ये जात्यादिवदिति । द्वितीयं दूषयति- भाष्ये सहोपलम्भनियमस्त्विति । सहोपलम्भनियमः=सहैव
प्रकारतयोपलम्भनियम इत्यर्थः, "सहैवप्रकारतया प्रतिपादयति' इत्युत्तरभाष्यानुगुण्यात् । वस्तुग्राहकं प्रमाणं तत्तत्स्वभावविशिष्टमेव गृह्णातीति नियमाभ्युपगमे बाधकं दर्शयति-यथा चक्षउपेति । पृथिव्याः

स्वाभाविकगन्धरसादिसंबन्धित्वस्याग्रहवत् शरीरगतात्मप्रकारत्वस्वभावत्वस्याप्यग्रहणोपपत्तौ प्रमाणान्तरसिद्धप्रकार-तैकस्वभावत्वत्यापह्नवानर्हत्वादिति भाव इति वदन्ति ।

प्रथमविकल्पे द्वितीयशिरसीति । अनुयायित्वादेकसामग्रीवेद्यत्वमपि प्रयोजकमिति द्वितीयकल्प इत्यर्थः । अनुगत-प्रयोजकसद्भावादिति । तदेकाश्रयत्वादिरूपानुगत प्रयोजकसद्भावादित्यर्थः । द्वितीयशिरसि गन्धादाविति । यद्यपि शरीरा- दिषु भिन्नसामग्रीवेद्येष्वपृथकसिद्धविशेषणत्वस्य समर्थितत्वेनापृथक्सिद्धसामान्ये प्रयोजकत्वशङ्काया अनुत्थानात् जात्यादि-गतापृथक्सिद्धसामान्ये प्रयोजकत्वशङ्काया अनुत्थानात् जात्यादिगतापृथक्सिद्धत्वविशेषे एकसामग्रीवेद्यत्वस्य प्रयोजकत्वेऽपि तस्याप्रत्याख्येयत्वाच्च तत्प्रत्याख्यानं प्रकृतानुपयुक्तम्, तथापि पराभिमानखण्डनार्थमुक्तमिति द्रष्टव्यम् । एकशब्द एक-सामग्रीवेद्यत्वव्युदासपरः । एवकारः सहोपलम्भनियमव्युदासार्थ इति । अत्र केचित्-एकशब्दोऽप्रकारत्वावस्थाव्युदासपरः, एवकारः सहोपलम्भनियमैकसामग्रीवेद्यत्वव्युदासपर इत्येव युक्तमिति वदन्ति ।

भाष्ये-पदार्थविवेकप्रदर्शनायेति । देवादिशब्दैर्हि शरीरात्मानौ न विविच्य ज्ञापयितुं शक्यौ । शरीरादिशब्दैस्तु विविच्य ज्ञापयितुं शक्याविति भावः । वैवक्षिकनिष्कर्षका इति । विवक्षिायां सत्यां निष्कर्षका इत्यर्थः । विवक्षायां भव इति अध्यात्मादि- त्वात् ठञ् । जातिवाचिशब्दवदपृथक्सिद्धविशेषणवाचित्वाविशेषादिति । ननु-नीलादिशब्दानां गवादिशब्दसाम्ये गवादि-शब्दानां जातिमात्रे प्रयोगाभाववत् नीलादिशब्दानां गुणमात्रे प्रयोगो न स्यात् । प्रयुज्यते च "पटस्य शुक्लः' इतीति चेत्, मैवम्-गोशब्दप्रवृत्तिनिमित्तस्य गोत्वानाश्रयत्वेन गोत्वस्य गोपदप्रयोगाविषयत्वेऽपि नीलपदप्रवृत्तिनिमित्तनीलत्वाश्रयत्वेन नीलरूपस्य तच्छब्दवाच्यत्वोपपत्तेः । त्रिलिङ्गतया शब्दसाधुत्वायेति । प्रत्ययान्तत्वे तु "दण्डवान्, दण्डवती, दण्डवत्' इतिवत् शुक्लादि- शब्दानां त्रिलिङ्गत्वं सिध्यति । उक्तं च भगवता कात्यायनेन-"गुणवाचनेभ्यो मतुपो लुग् वक्तव्यः, तथा च लिङ्गवचनसिद्धिः । स्वरविशेषाय च भवति' इति । नीलादिशब्देषु अशर्आद्यजन्तत्वाश्रयणे स्वरभेदोऽपि सिद्धो भवतीत्यर्थः । लिङ्गस्वरार्थं मुतब्ला-ेपस्मरणमिति । मतुब्लोपादिस्मरणमित्यर्थः । अतो मतुब्लोपस्य स्मरणा(स्वरा)र्थत्वोक्तिरयुक्तेति चोद्यं निरस्तम् । अत एव हि रागशाब्दस्येति । "गुणवचनेभ्यो मतुपो लुक्' इत्यत्र गुणद्वारा गुणिवचनेभ्य एव मतुब्लोपस्मरणात् रागशब्दस्य अतथात्वान्न मतुब्लोप इत्यर्थः । वस्तुतस्तु मतुब्लोपस्य वा अर्शआद्यजन्तत्वस्य वा अभेदोपचारस्य वा लक्षणाया वा आश्रयणे नीलादिशब्दानां गुणिवाचित्वभङ्गप्रसङ्गात् मतुब्लोपादिकं सिद्धान्तेऽनभिमतमेव । "लिङ्गमशिष्यं लोकाश्रयत्वात्' इति त्रिलिङ्गता चोपपद्यत इति द्रष्टव्यम् । पृथिव्याद्यपेक्षयैव गन्धादिशब्दानां नियतनिष्कर्षकत्वमिति । यद्यपि "गन्धः पृथिवी', "जलं रसः' इत्यादिप्रयोगेषु गन्थरसादिशब्दानां पृथिवीजलादिपर्यन्तत्वं दृष्टम्, तत्र च तेषामौपचारिकत्वाश्रयणे "रसोऽहमप्सु' इत्यादीनां परमात्मन्यौपचा-रिकत्वं सुवचम्, रसाभेदोपचारस्यैव युक्तत्वात् । "रसोहमप्सु इत्यादौ रसशब्दस्य रसवत्परत्वे "अप्सु रसवान् इत्यस्यायुक्तत्वाच्च-तथापि बहूनां रसगन्धादिशब्दानां परमात्मनि प्रयुक्तानां मुख्यत्वे संभवति औपचारिकत्वाश्रयणमयुक्तमिति भावः ।

"व्यक्तीनामानन्त्येनानन्तासुव्यक्तिषुशक्तिग्रहासंभवात् व्यभिचाराच्चव्यक्तीनामशब्दार्थत्वम्, नियमलक्षणत्वात् संब-न्धस्य; अनियमे सति तदयोगात् । व्यक्तौ शक्तयभ्युप मे शक्तीनामप्यानन्त्यप्रसङ्गाच्च जातिरेव शब्दार्थः । व्यक्तिलाभस्तु लक्ष- णया आक्षेपाद्वा भविष्यती'ति भाट्टोक्तरीत्या वा, "जातेः परतन्त्रत्वलक्षणस्वभावविशिष्टतयैव भाने तद्रूपस्य व्यक्तिघणितमूर्ति- त्वेन व्यक्तिमनादाय स्वभावविशिष्टजातिबोधनासंभवात् जातिभानसामग्रयेव व्यक्तिमादाय जातिं बोधयति । यद्धि येन विना न भासते, तद्व्रोधकस्य तद्व्रोधकत्वनियमात् । न च जातिव्यक्तयोर्द्वयोरपि प्रत्याय्यत्वे व्यक्तावपि शक्तिः किं न स्यादिति वाच्यम्,

जातिव्यक्तिविषयक्ज्ञानस्य शब्दजन्यत्वेऽविशिष्टेऽपि जात्यंश एव शक्तिः कल्प्यते, अनन्यलभ्यस्यैव शक्यत्वात् । व्यक्तयंशस्य नान्तरीयकतयापि लाभसंभवत् । अतो नाक्षेपाल्लक्षणया वा व्यक्तिप्रतीतिरभ्युपेये'ति प्राभाकरोक्तरीत्या वा व्यकत्युपस्थितिसं- भवेन न व्यक्तौ शक्तिः कल्पनीयेत्येतदाशङ्कय परिहरति-यद्यपि शरीरवाचिशब्दा इत्यादिना प्रघट्टकेन । अयुतसिद्धविशेषण-वाचिशब्दत्वस्य विशेष्यलक्षणाप्रतिबन्धकत्वादिति । नीलत्वादिप्रवृत्तिनिमित्ताश्रयस्य तच्छब्दलक्ष्यत्वासंभवादित्यर्थः । ननु-जातिवाचित्वमते गवादिशब्दानां गोत्वं न प्रवृत्तिनिमित्तम् । अपितु तदेव शब्दार्थः । तथा चाधेयवाचिना शब्देनाधारलक्षणायां काऽनुपपत्तिरिति चेत्-न । स्वार्थादन्येन रूपेण तीरत्वादिनोपस्थित एव तीरादौ गङ्गादिपदस्य लक्षणा दृष्टा । न चात्र व्यक्तिः स्वार्थभूतजातिं विना रूपान्तरेणोपस्थिता । किंच "गां पश्य, गौरितष्ठति' इत्यादौ सत्यपि जातेरन्वययोग्यत्वे तदनुपपत्त्यनुस- न्धानं विनैव जातिविशिष्टव्यक्तिप्रतीतेर्न तत्र लक्षणा । प्रत्युत "गौर्नित्या, गौर्जातिः' इत्यादावन्वयानुपपत्त्यैव जातिधीरिति जा- तावेव लक्षणा युक्ता । किं च शक्तिग्राहकानयनादिव्यवहारयोग्यव्यक्तिपरित्यागेन तदयोग्यजातिशब्दार्थस्वीकारोऽसंगतः । तथा "गौरनित्या, गौः शुक्ला, गौः सास्त्रादिमती, मां बधान, ;गौगच्छति, गामानय' इत्यादिप्रयोगप्रतीतिप्राचुर्यविषयव्यक्तिशक्ति-परित्यागश्चासंगतः । गवादिशब्दानां जातिमात्रविषयप्रयोगे त्वतलादिवैयर्थ्यं च स्यादित्यादिवक्ष्यमाणदूषणे तात्पर्यात् । जात्या-दिशब्दानामपि संबन्धातुपपत्त्यविशेषेणेति । न च जातिरित्यादिशब्दानामपि संबन्धानुपपत्तिप्रतिसंधानदशायां लक्षणैवेष्टेति वाच्यम्, जात्यादिाब्देषु लक्षणायाः क्वाष्यदृष्टचरत्वादिति भावः । नन्विदं सिद्धान्तेऽपि समानम् । जात्यादिशब्दानामप्यपृथ-क्सिद्धविशेषणवाचिशब्दत्वात् व्यक्तिवाचित्वं किं न स्यात्? निष्कर्षकशब्दत्वादिना वैलक्षण्यं तु तस्यापि सुवचम्, तथापि पूर्वोक्तदूषणे तात्पर्यात् ।

प्राभाकरमतं दूषयति-आकृतिरेव शब्दशक्तिविषय इति । पारतन्त्र्ाबोधनं विवक्षितमिति । ननु जातिशब्देन जाते-र्द्रव्यप्रकारतैकत्वभावत्वलक्षणपारतन्त्र्यबोधनस्य विवक्षितत्वे व्यकयभिधानस्य सिद्धत्वात् विशेषणान्तरान्वयानर्हत्वलक्षणस्य वा कारकभावानर्हत्वलक्षणस्य वा पारतन्त्र्यस्याभिधानं व्यर्थम्, व्यक्तिप्रतीत्यप्रतीत्योर्द्रव्यप्रकारतैकस्वभावत्वलक्षणपारतन्त्र्ा-भिधानानभिधानयोरेव प्रयोजकत्वादिति चेत्, सत्यम्- कस्यचिन्मन्दस्येदृशशङ्कासंभवादिति द्रष्टव्यम् । किंतु विशेषणान्तरान्व- येति । ननु "जातिं पश्य व्यापिकाम्' इत्यत्र जातिशब्दोपात्ताया जातेर्व्यापकत्वरूपविशेषणान्तरान्वयवत्, दृशिक्रियायां कमर्का-रकत्वेन चान्वयवत् "गौः शुक्लातिष्ठति' इत्यादौ गोशब्दप्रतिपन्नाया जातेर्विशेषणान्तरान्वयो वा क्रियायां कारकत्वेनान्वयो वा यद्यपि न दृष्टचरः, तथापि तादृशपारतन्त्र्यं न शब्देनाभिधीयते । विशेषणान्तरान्वयानर्हत्वस्य वा कारकभावानर्हत्वस्य वा गर्वा-दिशब्देनाप्रतीतेः । न हि गौरित्युक्ते गोत्वं कारकभावानर्हमित्यपि शब्देन प्रतीयत इति चेत्, सत्यम्- कारकभावाद्यनर्हत्वप्रयोजकः पारतन्त्र्यविशेषो गवादिशब्दात् प्रतीयत इत्यत्र तात्पर्यात् । मुख्यार्थगुणसंबन्धीति । मुख्यार्थतद्गुतगुणेति द्वन्द्वः । मुख्यार्थसंबन्धी लक्ष्यः तद्गतगुणसंबन्धी गौणः । प्रचुरप्रयोगाभावात् प्रचुरप्रयोगाभाव इति परिहारो न घटत इति । न च-"गवादिशब्दानां व्यक्तौ निरूढलक्षणायोगात् जातौ प्रचुरप्रयोगाभाव' इत्यस्य व्यक्तौ प्रचुरप्रयोगात् जातौ प्रचुरप्रयोगाभाव इति ह्यर्थः, न तु प्रचुरप्रयोगाभावा इति । ततश्चायमनुक्तोपालम्भ इति वाच्यम्-व्यक्तौ प्रचुरप्रयोगादित्यस्य जातौ प्रचुरप्रयोगाभादित्यर्थपर्यव-सितत्वेनानुक्तोपालम्भाभावात् । भावप्रत्ययानपेक्षत्वदर्शनादिति । क्वचित् भावप्रत्ययानपेक्षत्वस्यापि दर्शनादित्यर्थः । ततश्च "पटस्य शौक्लयम्' इत्यादौ क्वचित् भावप्रत्ययसापेक्षत्वदर्शनं न दोषायेति ज्ञेयम् । जातिस्थले तु न क्वचित् भावप्रत्ययानपेक्षत्वं दृश्यते; "खण्डस्य गौः, मुण्डस्य गौः' इत्यादिप्रयोगस्यजातिविषयस्य क्वाष्यदर्शनादिति भावः । निरूढलक्षणाभ्युपगममुपपा- दयति-शुक्लादिशब्दानां हीत्यादिना । निरूढिर्नाम सर्वप्रयोगानुगतिरिति चेदिति । सर्वप्रयोगानुगता लक्षणा निरूढलक्षणेत्यु- च्यते, न तु प्रचुरप्रयोगानुगतिरिति चेदित्यर्थः । अनुवृत्तो गोव्यवहार इति । इदं त्वापाततः, भावप्रत्ययानपेक्षप्रयोगस्यात्रैव दृष्टत्वं, "भावप्रत्ययानपेक्षत्वं च दुष्परिहर'मिति

पूर्वग्रन्थविरोधापत्तेरिति द्रष्टव्यम् । भवतां गौरवं स्यादिति । जातिव्यक्त्योः शब्दार्थत्ववादिनामित्यर्थः । प्रतिसंबन्धिभूतं द्रव्यमुपसर्जनतया प्रतीयेतीति । जातिः व्यक्त्याश्रया भवितुमर्हति जातित्वादिति आक्षिप्ता व्यक्तिरुप सजर्नतया भायात्, पर्वतो वह्निमानित्यत्र वह्निवत् । पुत्रः पितेतिवदिति । पुत्रशब्दाक्षिप्तपितृवाचिना पितृ- शब्देन पुत्रशब्दस्य सामानाधिकरण्याभाववत् जातिव्यक्तिवाचिनोः "गौः खण्डः' इत्याक्षेपकाक्षेष्यवाचिशब्दयोः सामानाधि-करण्यं न संभवतीत्यर्थः । विवक्षितेति । तात्पर्यविषयेत्यर्थः । विशेष्यत्वेनेत्येतद्वयाचष्टे-प्रधानतयेति । तदवच्छेदार्थत्वात्तस्येति । पुत्रव्यावृत्त्यर्थत्वात् पितुरित्यर्थः । यद्वा प्रधानतया तदवच्छेदार्थत्वादित्यन्वयः । प्रधानत्वेन तस्यावच्छेदः संबन्धः, तदर्थत्वात् ।

प्रधानीकरणाथत्वादिति यावत् । विवक्षितार्थप्रतिसंबन्धितयेत्यत्र विवक्षितपदव्यावृत्त्यर्थ(व्यावर्त्य)माह-गङ्गायां घोष इत्यत्रेति । वस्तुतो गङ्गा संबन्ध्येव तीरं तीरत्वेनैव भासते; न तु गङ्गासंबन्धित्वेन; तथाप्वे शकत्या प्रवाहस्य लक्षणया तीरस्य च प्रतीतौ वृत्तिद्वयविरोधप्रसङ्गात् । अतः प्रवाहस्याविवक्षितत्वम् । जातेस्तु शब्दप्रतीतौ विषयत्वमस्तीति भावः । इदमुपलक्षणम्-कूलस्य लक्षणया वृत्त्योपस्थापितत्वात् प्राधान्येन भानं भवति; अक्षिप्ताया व्यक्तेः शब्दवृत्त्याऽनुपस्थितायाः प्राधान्येन भानं न संभवती- त्यत्र तात्पर्यात् । अयमिह प्रयोगक्रमोऽभिप्रेतः- यदि गोव्यक्तिः पदतात्पर्यविषयसंबन्धितया भासमानत्वे सति गोपदवाच्या न भवेत्, तर्हि गोपदजन्यप्रतीतिविशेष्या न भवेदिति । शब्दविशेषणोपश्लिष्टेति; शब्दादुपस्थितस्य शब्दादुपस्थितं प्रत्येव विशेष- णत्वं, नाक्षिप्तं प्रतीत्यर्थः ।

प्रकार्यैक्यं कार्यकारणैक्यं चेति । उभयोरपि तत्त्वंपदाथर्योश्चिदचित्प्रकारणत्वं तयो रैक्यं चेत्यर्थः । वाक्यभेदः शङ्कनीय इति । यद्यपि तत्त्वमसीत्यस्यानुवादरूपत्वसमर्थनान्न वाक्यभेदप्रसङ्गः, तथाप्यभ्युपेत्योक्तमिति द्रष्टव्यम् ।

(परमते सामानाधिकरण्यानुपपत्तिसंकलनम्)

विशेषणत्वाभ्युपगमे मुख्य इति । पदान्तरवैयर्थ्यपरिहाराय सत्यादिपदलक्षितानां व्यावृत्तीनां विशेषणत्वाभ्युपगमे मुख्-यानां सत्यत्वादीनामेव विशेषणत्वमस्तु, अविशेषादित्यर्थः । यथाहमिच्छामीति ।

यद्यप्यहंशब्दस्यान्तःकरणोपहितेच्छादिवाचि-त्वाभावे "अहमिच्छामि' इत्यादिप्रत्ययानुपपत्तिर्न परैः प्रमाणत्वेनोपन्यस्ता, अहंशब्दस्यान्तःकरणोपहितघटादिपरत्वाभाववत् तदुपहितेच्छावाचित्वाभावस्यापि प्रमाणाभावेनैव सिद्धेः -

अथापि "अहमिच्छामि' इतीच्छाया विशेषणतानुपपत्तिरपि प्रमाणी- कर्तुं शक्येत्यभिप्रेत्यैवं व्यवहृतमिति द्रष्टव्यम् । न हि ज्ञप्तिरेव ज्ञस्या विशेष्यत इति । अहमर्थस्यैव ज्ञप्ति वे"अहं जानामि' इति प्रतिपन्नं ज्ञप्त्याश्रयत्वमहमर्थस्य न स्यादिति भावः । यदर्थविवणक्षयेति । भ्रान्तिदशायामधिष्ठानत्बुद्धेरेवाभावात् तदर्थविवक्षया न प्रयोगः; प्रबोधदशायामधिषांनत्वधीसंभवेऽपि तद्विवक्षया न प्रयोग इति भावः । यज्ञदत्तवाचित्वे मूलं भवतीति । न चैवं वद-तस्तदपीष्टमेवेति वाच्यम्, तथा सति वाच्यावाच्यव्यवस्थाभङ्गप्रसङ्गादिति भावः । सर्पशब्दस्य प्रामनारेपिनेति । प्रबोधदशाभा- विनो"रज्जुः सर्पः' इति प्रयोगस्यायमर्थः-एतावन्तं कालं सर्पपारमार्थ्यबुद्धया रज्जुः सर्पपदप्रयोगविषयोऽभूदिति । आरोपितविष- येति । अरोपितविषयोऽधिष्ठानमित्यर्थः । द्वितीये जीवब्रह्मणोरैक्यमिति । त्वंशब्देन जीवभावाधिष्ठानस्वरूपमात्रस्य विवक्षित- त्वेन जीवब्रह्मणोरविवक्षितत्वादिति भावः । तदविवक्षितविशेषणेति । अविवक्षितविशेषणं जीवभावः । त्वंशब्दमुख्यार्थीभूतजीव-संबन्धिचिन्मात्रैक्यबोधनमात्रेण मुख्यार्थीभूतजीवब्रह्मैक्यं मुख्यार्थीभूतजीवसंबन्धिकर्तृत्वादिबन्धमिथ्यात्वं च तद्धर्मधिष्ठानमात्र-पारमार्थ्यं च सिध्यति चेत्, जनपदलक्ष्यार्थीभूतजनप्रहृष्टैक्यबोधेऽपि जनपदशब्दमुख्यार्थैक्यं मुख्यार्थीभूतजनपदत्वादिधर्ममिथ्या- त्वं तद्धर्माधिषांनमात्रपारमार्थ्यं च सिध्येदित्याह-न हि प्रहृष्टो जनपद इति । तस्य तत्ताविधान इति । तच्छब्दार्थत्वविधान इत्यर्थः । ज्ञप्तिवैयधिकरण्वेनेति, "त्वं जानासि' इति त्वंशब्दज्ञाधात्वोर्वैयाधिकरण्येनेत्यर्थः । वाच्यैक्देशलक्षणासत्त्वेऽपि मुख्यार्तयोरभेदासिद्धौ तन्मूलतया मुख्यार्थधर्माणां

मिथ्यात्वासिद्धौ च दृष्टान्तमाह-न हि दूरस्थस्येति । "पर्वतो ज्वलितः' इत्यत्र पवेतशब्दो वाच्यान्तर्गतपर्वताप्रदेशलक्षकः, ज्वलितशब्दस्तदाधारलक्षकः । ततश्च लक्षितयोरेवैक्यं स्यात् । न तु मुख्या- र्थयोः पर्वताग्न्योः, न वा पर्वतधर्माणां सानुवृक्षादीनां ज्वलितशब्दमुख्यार्थवह्निधर्माणां वह्नित्वदग्धृत्वादीनामपारमार्थ्यं सिद्धयति । एवमिह तत्त्वंपदमुख्यार्थयोरैक्यं न सिध्येत्, न वा तद्धर्माणां किंचिज्ज्ञत्वसर्वज्ञत्वादीनांमिथ्यात्वं सिद्धयेदितित भावः । यद्यपि मुख्यार्तयोरैक्यं बोध्यत इति न परमतम्, तथापि जीवब्रह्मैक्यं बोध्यत इति तन्मतप्रसिद्धिमवलम्व्योक्तमिति द्रष्टव्यम् । ईश्वर एव हि ब्रह्मेति । यादवमते चिदचिदीश्वरातिरिक्तमंशि ब्रह्मास्तीति । भास्करमते तु चिदचिदीश्वरातिरिक्तमंशिभूतं ब्रह्मद्रव्यं नास्तीति विवेको द्रष्टव्यः । केनाष्याकारेणैक्य इति । घटपटयोर्द्रव्यत्वादनैक्येऽपि घटपटपदप्रवृत्तिनिमित्तसद्भावासद्भावलक्षणभेदे प्रतीय- माने ऐक्यस्य विभक्तिबोध्यत्वादर्शनादित्यर्थः । कार्यकारणरूपेणेति । घटशरावादिकार्यात्मना भेदः, कारणमृदात्मनात्वभेद इत्यर्थः । भिन्नत्ववदभिन्नत्व इति । भेदाभेदाभ्युपगमेऽपीत्यर्थः । पटस्यांशभेद इति । प्रयुक्तानामिति शेषः । पटाब्दाभिहित-विशेष्यस्यां-शतोऽप्यनतिरेपादिति । ननु "व्यक्तं विष्णुस्तथाऽव्यक्तं पुरुषः काल एव च' इति व्यक्ताव्यक्तपुरुषकालादिशब्दै-र्भोक्तृभोग्यनियन्त्रंशेषूपस्थितेषुपस्थितेषु ब्रह्मशब्दस्य तदनतिरिक्तार्थवृत्तित्वसंभवात् सामानाधिकरण्यमुपपद्यत इति नानुपपत्ति- रिति चेत्-न; ब्रह्मत्वस्य साधारण्यसंभवेऽपि "व्यक्तं विष्णुः' इत्यादौ विष्णुशब्दनिर्दिष्यस्येश्वरत्वस्य चिदचिदंशयोरभावेन "व्यक्तं विष्णुस्तथाव्यक्तम्' इति विष्णुसामामानाधिकरण्यासंभवात् । "घटो मृत्, शरावो भृत्' इति निर्दशसंभवेऽपि "घटः शरावः' इति निर्देशासंभवादिति दूषणे तात्पर्यात् । किं हस्तादीतिशब्देन हस्तापादादीन्द्रियं विवक्ष्यते, उत तदधिष्ठानगोलकमिति विकल्प्य, आद्यं दूषयति-छेदनादावपीति । इदमुपलक्षणम्-
शरीरनाशेऽप्याकल्पस्थायिनामिन्द्रियाणामविनाशान्नापृथक्सिद्धविशेषणत्व- मिति द्रष्टव्यम् । द्वितीयं दूषयति-तत्तद्गोलकस्येति । स्वाभाविकभेदाभेदपक्षेऽपीत्यादेः सामानाधिकरण्यं हीत्यन्तस्य सामा-
नाधिकरण्यस्यैक्यावगमकत्वेन तद्विशेषणान्वितवस्त्वैक्यावगमकत्वेऽपि वस्त्वन्तरैक्यावगमकत्वाभावात्; तथात्वे बाधितार्थत्व-
प्रसङ्गाच्चेति भावः । विवक्षितैकत्वासिद्धेरिति । सदन्तरैक्यस्य विवक्षितत्वे तस्यासिद्धेः; सद्द्रव्यमात्राभेदस्य च प्रत्यक्षसिद्धत्वे-नोपदेशवैयर्थ्यमित्यर्थः । यद्यंशविशेषासाधारणाकार इति । ईश्वरत्वमित्यर्थः । तदितरांशवाचिपदसामानाधिकरण्य इति । "घटः शरावः' इतिवदिति भावः । असाधारणाकारान्तरस्येति । ब्रह्मणत्वादेरित्यर्थः ।

(सिद्धान्त संग्रहोपन्यासः)

पा रक्षण इति धातोरिति । "पातेर्डतिः' इति डतिप्रत्ययान्तत्वेनेत्यर्थः । पतिशब्दप्रयोगाच्चेति । "गृहपतिः' इति प्रयो-गादित्यर्थः । शेषिणि पतिशब्दो रूढ इति । अत एव "अन्तर्वत्पतिवतोर्नुक्' इत्यत्र भर्त्रर्थ एव नुगित्युकत्वास्वाम्यर्थत्वे "त्वया पतिमती पृथीवी' इति शेष्यर्थत्वं सिद्धवत्कृत्यैव प्रत्युदाहृतं महाभाष्ये । "पत्पुर्नो यज्ञसंयोगे' इत्यत्रापि भगवता पतञ्जलिना "पतिशब्दोऽयमैश्वर्यवाची' इत्युक्तम् । पाणिनिनापि-"पत्यावैश्वर्ये' इत्यत्र ऐश्वर्यार्थत्वमाविष्कृतम् । जैमिनिनापि, "मेघपतित्वं स्वामिदेवतस्य समवायात्' (९-३-३२) इति स्वामिवचनत्वं सिद्धवत्कृत्यैव ऊहानूहचिन्ता नवमे कृता । अतो न स्वामिवच- नत्वे विप्रतिपतिः । अत एव "विश्वस्य पतिम' इति विश्वेरत्वे कथिते स्वस्यापीश्वरान्तराङ्काव्यावृत्त्यर्थम् "आत्मेश्वरम्' इति शष्यन्तरनिषेध उपपद्यते । "धवः प्रियः पतिर्भर्ता' इति भर्तृवाच्यपि पतिशब्दोऽन्यः । "मेघपतिभ्यां मेघम्' इत्यत्र देवतायामपि प्रयोगात्, "मेघपतित्वं स्वामिदेवतस्य समवायात्' इति जैमिनिना स्वामिवाचित्वदेवतावाचित्वयोः प्रदर्शितत्वाच्च तत्रापि कामं शक्तिरस्तु वा

मा वा; स्वामीश्वरापरपर्यायशेष्यर्थत्वे न विमतिः शक्या कर्तुमिति द्रष्टव्यम् । "इभ्य आढ्यो धनी स्वामी नायकः पतिरीशिता' इति च निघण्डुः । द्वितीयाश्रुत्या प्रोक्षणादेरिति । द्वितीयाश्रुतिप्रतिपादितसाध्यभावानां व्रीहिणां श्रुतिबलात् समीहितसाध्यापेक्षिण्या भावनयाऽन्वयबलात् समीहितसाध्यत्वलक्षणशेषित्वस्य सिद्धिवत् श्रुतिप्रतिपन्नशरीरभावस्य जगतः शरीरत्वाक्षिप्तः शेषशेषिभावः, पत्यादिाब्दाभावेऽपि सिध्यतीत्यर्थः । संघातपरार्थत्वादिति ।

"संघातपरार्थत्वात् त्रिगुणादिविषर्ययादधिष्ठानात् ।

पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थप्रवृत्तेश्च ।।'

इति सांख्यश्लोकः । संघातस्य सर्वस्यापि शयनासनादिवत् पारार्थ्यावश्यंभावात् देहस्यापि संघातरूपतया पारार्थ्यं सिद्धमित्यर्थः । "अजोऽन्यः' इति श्रुत्यंशेन प्रकृतिं जहति मुक्तेऽन्यत्वप्रतितपादनमभिप्रयन्नाह-मुक्तौ भेदमाह अजामितीति । प्रधानप्रसङ्गोपेत-त्पसंम्यादिति । यद्यपि "पृथगात्मानम्' इति पूर्ववाक्ये प्रधानप्रसङ्गोपेतत्वं नास्ति, तथाप्युपरितनवाक्यस्य प्रधानप्रसङ्गोपेतत्वात् तेन संगतिरस्तीति भावः । ममेत्यनेनेति । षष्ठया व्यतिरेकनिर्देशेनेति भावः । स्वभावासंकर इति । अध्यक्षत्वादिस्वभावासंकर इत्यर्थः ।

लयप्रकरणात् तमसोऽपि लय एवोच्यते; ततश्च ब्रह्मपरिणामवाद एवाभ्युपगतः स्यादिति शङ्कां वारयति-तमस एकी-भावमात्रमिति । कार्यानुपयुक्ततमः शरीरक इति । अक्षरव्यक्तमहदादिरूपेण परिणतस्तर्मोशोऽपरिणततमोंशश्चैक्यं प्राप्तावि- त्यर्थः । इदमपि शरीरलक्षणमिति । "यस्य चेतनस्य यत् द्रव्यम्' इत्याद्युक्तलक्षणत्रयवत् अन्तःप्रविश्य नियाम्यत्वमपि भाष्यका-राभिमतं शरीरलक्षणमित्यर्थः ।

अनुप्रवेशश्रवणाभावेऽपीति । "तन्नामरूपाभ्यां व्याक्रियत' इत्यत्रेति शेषः । सामान्यशब्दस्य विशेषपदोपस्थापिते पर्य-वसानं हि सामान्यविशेषन्यायः । अनुप्रवेशपूर्वकत्वस्य तु नामरूपव्याकरणस्वरूपानन्तर्गतत्वेन विशेषपदप्रतिपाद्यत्वाभावात् नायं सामान्यविशेषन्यायविषयो भवितुमर्हतीत्यपरितोषादाह-यद्वा सर्वशाखेति ।

यद्वा ग्राहकग्रहणेनेति । ग्राहकं साधिकारापूर्वम्; फलवत् परमापूर्वमित्यर्थः । "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्यप्रतिपन्नमपूर्वं परमापूर्वम् । तत्संनिधिसमाम्नातानां "समिधो यजति', "व्रीहिनवहन्ति' इत्यादि वाक्यानां कार्यान्विताभि-धायित्वस्वभावानां परमापूर्वलक्षणकार्यान्वितप्रयाजावधातादिलक्षणस्वार्थाभिधानमेव ग्राहकग्रहणम् । एवंरूपेण ग्राहकग्रहणेन सर्वेष्वपि द्रव्यगुणक्रियारूपेषु शेषशेषिभूतपदार्थेषु खलेकपोतवदवगतग्राहकैदमर्थ्येषु यागस्य करणतया अद्वारकशेषत्वमवसीत- यते, व्रीहिणां यागद्वारा शेषत्वं प्रोक्षणादीनां च व्रीहिद्वारा शेषत्वं करणैदमर्थ्यद्वारैदमर्थ्यग्राहक्श्रुत्यादिप्रमाणैरवसीयत इत्यर्थः । बहु स्यामिति ग्राहकग्रहणेनेति । ग्राहकस्थानीयः परमात्मा, तस्य ग्रहणं संकल्पः । अत्र किंचिद्विवृतमिति । पूर्वं विस्तरेण विवतमित्यर्थः ।

उभयथापि ज्ञानव्यपदेशयोग्यतामिति । यद्यपि "सत्यं ज्ञानम्' इत्यत्र ज्ञानमित्यस्य नैतावानर्थ, तथापि फलितार्थ-कथनमिति द्रष्टव्यम् । उभयमप्युपपन्नमित्यर्थ इति । अत्र "ज्ञानम्' इत्यस्य "तद्गुणासारत्वात्' इति न्यायेन ज्ञानगुणकत्वाथर्- त्वात् प्रत्युतानुगुणत्वमेवेति द्रष्टव्यम् । ब्रह्मैव स्वसंकल्पादित्यादिभाष्ये "ब्रह्मैव' इति ब्रह्मशब्दस्य निष्कृष्टपरमात्मपरत्वस्वार-स्यानुरोधेन स्थिरत्रसरूपतयेतत् व्याचष्टे-स्थिरत्रसशरीरतयेति । अब्रह्मात्मकेत्यत्रापि ब्रह्मशब्दं केवलपरमात्मपरतया व्याचष्टे-ब्रह्मान्तर्यामिकत्वरहितत्वमुक्तमिति । स्थिरत्रसरूपतयेत्येतत्स्वारस्यानुरोधेन ब्रह्मपदं चिदचिद्विशिष्टवस्तुपरमित्यभिप्रयन् व्या- चष्टे-यद्वा स्थिरत्रसरूपतयेति । ऐक्यश्रुतीनां प्रकारैक्यपरत्वादिति । इदं तु सिंहावलोकितकेन प्रथमपक्षशेषभूतमिति द्रष्टव्यम् । भाष्ये-सर्वं तं परादादिति । सर्वं कर्तृं तं परादात्-पराकुर्यात् । निःश्वासितम्; अनायासेनोत्पन्नम्, संकल्पमात्रविजृम्भितमिति यावत् ।

ऐन्द्राग्नश्चेति षड्यागा इति । ऐन्द्रौ द्वौ आग्नेयश्चेति षड्यागा इति पाठः समीचीनः । ऐन्द्राग्नश्चेति पाठे एवमभिप्रायं केचिदूषुः-आग्नेयः पौर्णमास्याममावास्यायां च कर्तव्यः सायंप्रातःकालकत्रव्याग्निहोत्रहोमवदेक एव, कर्मभेदापादाकशब्दा-न्तरादेरनुपलम्भात् । अत एवाष्टमे, "एककर्मणि विकल्पोऽविभागो हि चोदनै कत्वात्' (८-१-२६) इत्यत्र एकस्यैवाग्नेयस्य पौर्णमासीसंज्ञकत्वादमावास्यासंज्ञकत्वाच्च पौणर्मासीकाले क्रियमाणोऽमावास्यासंज्ञको भवतीति तस्मिन्नेवाग्नेये "पञ्चहोत्रामा-वास्यामभिमृशेत्' इति शास्त्रवशात् पञ्चहोतृमन्त्रप्रयोगोऽपि पौर्णमास्यां किं न स्यात्; अवैगुण्यात् इति चेत्-सत्यमाग्नेयस्यावैगु-ण्यम्; तस्योभयसंज्ञकत्वात्; तेन सह तत्कालकर्तव्यानामग्नीषोमीयादीनां हविषाममावास्यासंज्ञाभावेन वैगुण्यं पञ्चहोत्राऽभिमर्शे स्यात् । अतस्तेषामप्यनुग्रहाय क्रियमाणमभिमर्शनं चतुर्होतृकरणकमेव कर्तव्यमिति निर्णीतम् । न च पञ्चहोत्रा आग्नेयभिमृश्य चतुर्होत्रा अग्नीषोपीयादीनामभिमर्शः किं न स्यादिति शक्यशङ्कम्, "आसन्नानि हर्वीष्यभिमृशति' इत्येकस्यैव विहितत्वात् । अत्र "हविरन्तरानुग्रहवशेन परं व्यवस्था' इति दुष्टीका (आपदेवीया) दिग्रन्थपर्यालोचनया एकमेवाग्नेयाख्यं कर्म पौर्णमासी- त्रिके अमावास्यात्रिके चान्तःपतितम्; नाग्नेयकर्मभेदः । यदि भेदः स्यात्, प्रकृतौ पौर्णमासीकालकत्रव्यग्नेयाभिमर्शने पञ्चहोतृ-मन्त्रप्रसक्तरेवाभावादव्यवस्थाशङ्कातत्परिहारावसंगतौ स्याताम् । ततश्च एकमेव कर्म कालद्वययोगि, यथाग्निहोत्राख्यं कर्म सायं-प्रातःकालद्वययोगीत्येव युक्तम् । अतोऽसोमयाजिविहितैन्द्राग्नेनैव षट्त्वसंख्यापूरणं कर्तव्यमिति । अत्र "उत्पत्तिवाक्यैः="यदा-ग्नेयोऽष्टाकपालोऽमावास्यायां च पोर्णमास्यां चाच्युतो भवति' इत्येवमादिभिः । उत्पत्तिवाक्यमिति प्रथमप्रतिपविजनकं वाक्यम् । पृथगुत्पन्नान्=पृथक्प्रतिपादितान्' इति पाठक्रमस्तु मसीचीनः । स्वर्गसाधनत्वाकारेणैकीकृत्य तत्कर्तव्यतया विदधातीत्यर्थ इति । तत्समुदायद्वयमेकीकृत्य समुच्चित्य स्वर्गसाधनत्वाकारेण कामिकर्तव्यतया विदधाति । यथा-व्यापृते षडपि यागाः स्वर्गसा- धनं भवन्ति, तथा व्यापरितव्यमिति साधनत्वेन विदधातीत्यर्थ इत्यर्थः । यद्वा, एकीकृत्य स्थितं तदिति योजना । समुदायीभूतं तत् कर्मेत्यर्थः ।

कारणावस्थः कार्यायस्थश्च परमात्मैक एवेति । अयमत्रान्वयक्रमः-"सदेव सोम्येदमग्र आसीत्', "ऐतदात्म्यमिदं सर्वम्', "सर्वं खल्विदं ब्रह्म' इत्यादि वाक्यं कर्तृ पृथक् प्रतिपन्नं वस्तुत्रितयं सद्ब्रह्मादिशब्दयुक्तवचनभङ्गया कारणवस्थः कार्या-वस्थश्चैक एवेति प्रतिपादयतीति । परमात्ममात्रवाचिभिः शब्दैरिति; अक्षरसर्वज्ञादिशब्दैरित्यर्थः । अर्थसामार्थ्यं दर्शयति-चिद-चिता-ेरिति । शब्दसामर्थ्यं दर्शयति-सद्ब्रह्मशब्दावित्यादिना । दृष्टान्तदार्ष्टान्तिकवैषम्यहेतुप्रतिपादनं मन्दफलम्; आत्मशब्दस्य व्यापकवाचिनः शब्दसामर्थ्यात् व्याप्योपस्थापकत्वं च नास्तीत्यपरितोषात् स्वरूपपरिणामशङ्कानिवृत्त्यर्थतया"चिदचिद्वस्तुशरी-रिणः' इति भाष्यमवतारयति-यद्वा अक्षरात् संभवतीह विश्वमिति । पृषादज्यनयादिति । यथा पृषदाज्यसंस्काराय अचोदित- मपि पात्रान्तरमुपादीयते, तद्वदित्यर्थः । दर्शपूर्णमासयोः "अष्टावुपभृति गृह्णाति' इति प्रयाजानूयाजार्थं चतुर्गृहींतद्वयमेकस्यामुप- भृति युगपद्गृहीतम्; तथैव पशौ प्राप्तम् । तत्रानूयाजानां द्रव्यविकारः श्रूयते, "पृषदाज्येनानूयाजान् यजति' इति । पृषदाज्यं दधिमि-श्रितमाज्यमेव । तत्र द्वयोरसंकरेऽवश्यंभाविनि चिन्ता-किं कालभेदेन तस्यामेवोपभति द्वयं ग्रहीतव्यम्? उत एकस्मिन्नेव काले पात्रभेदेनेति । तत्र तु "अष्टावुपभृति गृह्णति' इति पात्रैकत्वं श्रुतम् । पदार्थक्रमस्तु पदार्थानां गुणः; पाठकल्प्यश्च । अत एकस्मि- न्नेव पात्र पृषदाज्यं गृहीत्वा प्रयाजेषु हुतेषु पश्चात् पृषादाज्यं ग्रहीतव्यमिति प्राप्ते उच्यते-

"उभयोर्ग्रहणाङ्गत्वात् पात्रैक्यस्य क्रमस्य च ।
विकृतौ चानुमानेन प्राप्तौ तुल्यं बलाबलम् ।।'

इति । एवं चाविशेष सति प्रयाजाज्यग्रहणेनोपस्थितस्यानूयाजाज्यग्रहणस्याकरणे न किंचित् कारणमस्तीति तदैव पात्रान्तरमुपा- दाय ग्राह्यमिति "विकारे त्वनूयाजानां पात्रभेदोऽथर्भेदात् स्यात् (४-२-१६) चिन्तितम् । केचित्तु- पृषाराज्यशब्दार्थस्य दधिमि-श्राज्यस्याज्यशब्देनैवभिधानसंभावात् "देवानाज्यपानावह' इत्यादिनिगदेष्वाज्यपानित्येवमविकृत एव प्रयोगः, न तु पृषदाज्यपानि-त्यूहेन प्रयोग इति दशमे (१०-४-२६) निर्णीतम् । तद्वदिहापि विशेष्यमात्रवाचिनोऽपि शब्दस्य चिदचिद्वशिष्टे प्रयोग उपपद्यत इति वदन्ति ।

(निवृत्त्यनुपपत्तिः)

अर्थक्रियाकारित्वात् इत्यनेन हेतुभावानुपपत्तिरुक्ता । उत्पत्तिमत्त्वात् इत्यनेन हेतुमद्भावानुपपत्तिरुक्तेति द्रष्टव्यम् । हेतु-सापेक्षत्वं च न दृष्टमिति । प्रपञ्चस्य तु तत्सापेक्षत्वात् न मिथ्यात्वं युक्तमिति भावः । न चाङ्कुरादिसामग्र्येव भ्रमसामग्रीति । तदभ्रमसामग्रीत्यर्थः । भिन्नविषयस्याभेदज्ञानस्येति । वस्तुतो भिन्ने विषये उत्पन्नस्याभेदज्ञानस्येत्यर्थः । "उत्तमः पुरुषस्त्वन्यः' इति स्मृत्युपबृंहणीयायाः "पृथगात्मानम्' इति श्रुतेः उपबृंहणात् पश्चादुपादानं कथमित्यत्राह-स्मृतीवचसोरिति । स्मृत्योरव्य-वसायार्थमित्यर्थः ।

दावानलेति । यथा दावानलः इन्धानानि विनाश्य इन्धननाशे स्वयमेव नश्यति, तथेत्यर्थः । निवर्तकज्ञानं तद्विनाशश्च किमिति । ननु विनाशस्यैव दूष्यत्वप्रतीतेर्ज्ञाने ब्रह्मव्यतिरिक्तत्वादिविकल्पोऽभिप्रेत इति कथमुच्यत इति चेत्-न । विनाशस्य न केवलं ब्रह्मव्यतिरिक्ततया मिथ्यात्वम; अपि तु निवर्तकज्ञानस्य मिथ्यात्वेन तत्प्रतियोगिकस्य विनाशस्यापि मिथ्यात्वमिति दूषणस्फोरणाय निर्वकज्ञानस्यापि ब्रह्मस्वरूपव्यतिरिक्तत्वादिविकल्पोऽभिप्रेतइत्युक्तम् । अत एव भाष्ये-तत्स्वरूपतदुत्पत्ति-निनाशानां काल्पनिकत्वेनेति ज्ञानस्वरूपस्य काल्पनिकत्वमुक्तम् । नन्वेवं ज्ञानस्वरूपविनाशयोरेव काल्पनिकत्वस्य वक्तव्य- तया ज्ञानोत्पत्तिकाल्पनिकत्वोक्तिः किमर्थेति चेत्-न । दृष्टान्ततया तदुपन्यासोपपत्तेः । केचित्तु-"तत्स्वरूपतदुत्पत्तिविनाशानां काल्पनिकत्वेने'त्यस्य विनाशकल्पनोपपादकत्वात्, "तद्विनाशो ब्रह्मस्वरूपमेवेति चे'दिति भाष्येऽपि विनाशस्यैव प्रतीतेश्च विना-शपरिग्रह एव युक्तः; अतो निवर्तकज्ञाने ब्रह्मव्यतिरिक्तवादिविकल्पो न हृदयङ्गम इति वदन्ति । एवंरूपाविद्याया इत्यर्थ इति । उपादानोपादेययोरभेदोपचारादेवमुक्तमिति द्रष्टव्यम् । कालभेदव्यतिकरितगृहप्राङ्गणादिप्रदेश इति । कालविशेषविशिष्टदेशवि- शेष इत्यर्थः । तवापि चोद्यं तुल्यमिति चेदिति । निःशेषकर्मस्वरूपानाशो न स्यादिति भावः ।

विकल्पाभिप्रायेणेति । चिन्मात्रेत्यनुकत्वा ब्रह्मव्यतिरिक्तकृत्स्ननिषेधविषयज्ञानस्येत्युक्तौ ब्रह्मशब्दार्थे चिन्मात्रव्यतिरि-क्तानामपि केषांचिदनुप्रवेशसंभवेन ब्रह्मशब्दार्थव्यतिरिक्तकृत्स्नपारमार्थ्यनिषेधे चिन्मात्रव्यतिरिक्तकृत्स्नपारमार्थ्यनिषेधाभावेन तस्यनिषेध्यतया, निवर्तकज्ञानकर्मत्वादिति दूषणस्यालग्नकापत्तेश्चिन्मात्रेति पदमावश्यकमिति भावः । प्रथमं धर्मिप्रश्न इति । उक्त- रत्र ज्ञातृत्वधर्मविकल्पस्य करिष्यमाणत्वादेवमुक्तमिति द्रष्टव्यम् । स्वरूपमित्यस्य यथाश्रुतार्थत्वे ब्रह्मस्वरूपस्यैव ज्ञातृत्वे इति दूषणभाष्यासामञ्जस्यं मन्वान आह-स्वरूपं स्वाभाविकमित्यर्थ इति । भाष्ये-अध्यस्तं चेदयं अध्यासस्तन्मूलाविद्यान्तरं चेत्यादि । अध्यस्तस्य ज्ञातुनिर्वर्तकज्ञानाश्रयत्वलक्षणज्ञातृत्वस्य तत्कल्पकाविद्यायाश्च निवर्तकज्ञानानुगुणतया निवर्तकज्ञानोपजीव्यस्य तद्व्रा-ध्यत्वाभावादित्यर्थः । अत्र तस्मादित्युपसंहारभाष्यावतारिकाग्रन्थपर्यनाते ग्रन्थो लेखकदोषात् पतित इति वदन्ति । भाष्ये तस्यापि त्रिरूपत्वादिति । निवर्तकज्ञानान्तरस्य कल्पकाविद्यामातृसापेक्षत्वेन त्रिरूपत्वादित्यर्थः । प्रथमं कल्पं दूषयति भाष्ये-ब्रह्मस्वरूप-स्यैव ज्ञातृत्व इति । ज्ञातृत्वस्य ब्रह्मस्वाभाविकत्व इत्यर्थः । तन्नाशस्य ब्रह्मस्वरूपत्वाभ्युपगमात् ;परमापुरुषार्थत्वमस्त्वित्याह भाष्ये-तन्नाशस्य ब्रह्मस्वरूपत्वाभ्युपगम इति ।

तस्मात् साधनचतुष्टस्यस्येति । तस्मादिति व्याख्येयं पदम् । आत्मयाथात्म्यबुद्धिसंस्कारशून्याकार इति । भगव-च्छेषत्वज्ञानपूर्वकत्वराहित्यं केवलाकारः । हानमुपादनं च न संभवतीत्यर्थ इति । नित्यनैमित्तिकाद्यङ्गकं

ब्रह्मोपासनमनन्त-स्थिरब्रह्मप्राप्तिसाधनमित्यापातप्रतीतिरनवगतकर्मविचारस्य न संभवतीत्यर्थः । न तु हानोपादानशब्दाभ्यामननुष्ठानानुष्ठाने विव- क्षिते, तादृशकर्माननुष्ठानानुष्ठानयोर्ब्रह्मोपासनोपयुक्तत्वेऽपि ब्रह्मविचारानुपयुक्ततया ब्रह्मविचारपूर्ववृत्तत्वकथनावसरेऽनुपयुक्त-त्वादिति द्रष्टव्यम् ।

(जिज्ञासाधिकरणशरीरम्)

ननु "वचनं व्याहतम्' इति वदतः कोऽभिकप्रायः? विचारः कर्तव्य इति सूत्राक्षरयोजनानन्तरम्, न कर्तव्यमिति पूवर्पक्ष-

प्रदर्शनमयुक्तमितति वा, उत सिद्धव्युत्पत्तेः सूत्रकारेणासूचनान्नैवं पूर्वोत्तरपक्षौ युक्ताविति वेति विकल्पमभिप्रेत्य प्रथमं दूषयति-अथातो धर्मजिज्ञासेत्यत्रेति । प्राभाकरैरध्ययनस्याचार्यकाधिकारकत्वादिति । अयं भावः-
मतद्वयेऽप्यध्ययनस्यार्थज्ञानार्थत्वा-भावाद्विचारो नारम्भणीय इति पूर्वपक्षः, अर्थज्ञानार्थत्वादारम्भणीय इति सिद्धान्तश्च समान एव । भाट्टमते विश्वचिन्न्यायेनाध्य- यनस्य स्वर्गार्थत्वेनार्थज्ञानार्थत्वाभावात् धर्मविचारो नारम्भणीय इति पूवर्पक्षं कृत्वा-दृष्टे संभवत्यदृष्टकल्पानाया अन्याय्यत्वादर्थ-ज्ञानमेव फलम् । न चाध्ययनस्यार्थज्ञानसाधनत्वस्य प्राप्तत्वात् विधिवैयर्थ्यं शङ्कनीयम्, नियमार्थतयाप्युपपत्तेरिति सिद्धान्तितम् । गुरुमते तु-

"आचार्यकनियोगार्थः स्वाध्यायस्तत्प्रयुक्तितः ।

प्रथमावगतत्वेन तद्धि युक्तं प्रयोजनम् ।।

न तु वाक्यार्थविज्ञानं तद्धि पश्चात् प्रतीयते ।

तेनाविवक्षितार्थत्वाद् वेदस्यार्थविचारणम् ।।

न कर्तव्यमतः शास्त्रं मीमांसाख्यमनर्थकम् ।।'

"स्वाध्यायोऽध्येतव्यः' इति स्वाध्यायाध्ययनस्य प्रयोजनापेक्षायां प्रथमावगतत्वेनाचार्यकनियोग एवास्य प्रयोजनम् । न त्वतर्ज्ञा- नम्, पश्चाद्भावित्वात् । यद्यपि पुरुषान्तरगामित्वेन बहिरङ्गमाचार्यकम्, तथापि प्रथमावगतत्वेन तत्सिद्धरेवास्य प्रयोजनं युक्तम् । न त्वर्थज्ञानम्, पश्चाद्भावित्वात् । तेनान्यार्थत्वाद्वेदाध्ययनस्याविवक्षितोऽर्थः । अविवक्षितश्च न निर्णेतव्यः । निर्णिनीषितार्थ-प्रयोजनाभावात् । अनिर्णेतव्यश्चार्थो न विचारमर्हतीति तदात्मकं मीमांसाशास्त्रमनर्थकत्वादनारम्भणीयमिति पूर्वपक्षः । कथ-माचार्यकरणविधिप्रयुक्तमध्ययनम्, न स्वविधिप्रयुक्तम्? उच्यते-न स्वाध्याय । विधावस्ति नियोज्यः । तत्र चासति न प्रयोजकता युक्ता, प्रयाजादिनियोगवत् । न ह्यनधिकारस्य स्वविषयानुष्ठापकत्वं संभवति, प्रयाजादिविधिवत् । न चाध्ययनविधेरधिकारी श्रूयते । तस्मान्नास्य प्रयोजकत्वं संभवति ।

"न च कल्पयितुं शक्यो नियोज्यः पितृयज्ञवत् ।

अकल्पितेऽपि तस्मिन् यदनुष्ठानं प्रसिद्धयति ।।'

स्यादेतत्-अश्रूयमाणोऽपि नियोज्यः पितृयज्ञवत् कल्प्यत इति । तन्न, अकल्पितेऽपि तस्मिन् यतोऽनुष्ठानं प्रसिध्यति । सिद्धे तस्मिन्नासौ कल्पयितुं शक्यः, अनुपपत्त्यभावात् । अनुष्ठानाधीनसिद्धिर्हि
नियोगस्तत्सिद्धयर्थमनुष्ठातारमाक्षिपन् अनधिकारिणो-ऽनुषांतृत्वायोगात् अनियोज्यस्याधिकारासंभवात् नियोज्यं कल्पयति, प्रयाजादिनियोगवत् । संभवति चेहाचार्यकरणविध्यनुष्ठा-पितेनैव विषयेणाध्ययननियोगसिद्धिरिति न नियोज्यकल्पनासंभवः । कथं पुनराचार्यकरणविधिरध्ययनं प्रयुङ्क्त;? उच्यते-उप-नीयाध्यापनादाचार्यकं भवति । न चाध्ययनमन्तरेणाध्यापनं संभवतीति तदाक्षिपति । उपनयमध्यापनसमानकर्तृकमेवावगम्यमानं तदङ्गमेव । तस्य च द्वारापेक्षायामुपनेयासतिरेव लिङ्गात् द्वारमवगम्यते । उपनेयो हि नाकिंचित्करोऽङ्गमिति तद्वयापरापेक्षाया-मुपनयनप्रकरणाधीतमध्ययनमध्यापनोपकारित्वात् तद्वयापारत्वेनाध्यवसीयते । एवं च वैधमेवाध्ययनं कुर्वन्

माणवकोऽध्यापन-स्योपकारीत्यवगमात् तद्विषयमेवाध्यापनमाचार्यकसाधनमिति तद्द्वारेण सर्वस्याध्ययनाङ्गस्य तदुपकारित्वादध्ययनार्थस्य व्रतादे- स्तत एवानुष्ठानसिद्धिः ।
तस्मादाचार्यकरणविधिप्रयोजनकत्वादध्ययनस्याविवक्षितार्थत्वात् वेदस्य, तदर्थनिर्णयार्थं नारब्धव्यमिति ।

सिद्धान्तस्तु-सत्यमाचार्यकरणविधिप्रयुक्तमध्ययनम् । न तु तत्सिद्धिरेवास्य प्रयोजनम्; बहिरङ्गत्वात् । अन्तरङ्गत्वाद-ध्येतृगतमेवार्थज्ञानं प्रयोजनत्वेनाध्यवसीयते । ननु प्रथमावगतत्वेन प्रयोजनापेक्षमध्ययनमध्यापनविध्यवगतमाचार्यकमेव तावत् स्वीकरोति । स्वीकृते च तस्मिन्नपेक्षाभावात् पश्चादवगतत्वेनान्तरङ्गमप्यर्थज्ञानं न प्रयोजनीकरोति-मैवम्. प्रथमामाचार्यकस्य प्रयोजनत्वानवकल्पनात् । यद्यकल्पिते तस्मिन्ननुष्ठानमध्ययनस्य न सिध्येत्, ततः कल्पयेत । न त्वेतदस्ति, अकल्पितेऽपि तस्मि-न्ननुष्ठानलाभात् । अनुष्ठिते त्वस्मिन्नव्ययने प्रयोजनापेक्षायामन्तरङ्गत्वार्थज्ञानमेव फलमङ्गीक्रियते । ननु नियोग एव शब्दादवगतः प्रयोजनं स्यात्, नार्थज्ञानम् । न, अर्थज्ञानस्यापि प्रतीयमानस्य त्यागायोगात् । तेनोभयोरपि प्रयोजनत्वं युक्तम्, अवगतत्वादर्थ-ज्ञानस्य नियोगस्य च । तत्रार्थज्ञानरूपं प्रयोजनं न विचारमन्तरेणाध्ययनेन संपादयितुं शक्यत इत्यध्ययनविधिरेव तत्सिद्धयर्थं विचारमाक्षिपतीति तदात्मकं शास्त्रमारब्धव्यमिति व्याख्यातम् ।

द्वितीयं दूषयति-अक्षरयोजनायां ब्रह्मविचाररम्भ इति । प्रामाण्यसंभावनानुपपन्नेति । उत्पन्नापीयमवगतिर्मूलाभावान्न समीचीना भवितुमर्हतीति प्रामाण्यसंभावना न भवतीति भावः । चोदनालक्षणोऽर्थ एव वेदप्रतिपाद्य इतीति । "अथाऽतो धर्म-जिज्ञासा' इति सूत्रे अथशब्दस्य वेदाध्ययनानन्तरमित्यर्थः । ततश्च वेदाध्ययनानन्तरं तदर्थजिज्ञासा इति सूत्रे कर्तव्ये, "धर्मजिज्ञा- सा' इति सूत्रयतो जैमिनेर्धर्म एव कृत्स्नवेदार्थ इति भावोऽवसीयते । ततश्च कृत्स्नवेदार्थस्य धर्मस्य चोदनैव प्रमाणमिति चोदनासूत्रे कथनात् कार्यप्रतिपादकमेव वाक्यं वेदार्थे धर्मे प्रमाणमित्युक्तं भवति । ततश्च कार्यमेव वेदार्थ इति फलति । ततश्चैवं वदतो जैमिनेः सिद्धार्थे व्युत्पतिरेव नास्ति । तत्प्रतिपादने प्रयोजनं च नास्तीत्याशयोऽवसीयते । तत्र निष्प्रयोजनत्वं समन्वयाधिकरणे निराकरि- ष्यते । अधुना सिद्धार्थे व्युत्पत्तिः समर्थ्यत इति भावः । इदं चोपलक्षणम्, "अम्नायस्य क्रियार्थत्वात्' इति कण्ठत एव सूत्रतत्वादि-त्यपि द्रष्टव्यम् । न च जैमिनेरेव पूर्वपक्षित्वे परस्परविरुद्धयोरैकशख्यं कथं निर्वहेदिति वाच्यम्, अन्वारुह्योक्तिप्रतिक्षेपमात्रेण शाख्यैक्यसंभवात् ।

(अधिकरणपूर्वपक्षः)

"ननु विषयो विशयश्चैव' इति न्यायेन "अयं विषयः । इत्थं संशयः' इति प्रदर्शनीये कथं तदप्रदर्शनं भाष्ये युक्तमित्या-शङ्कयाह-अक्षरयोजनायामित्यादिना । तत्र प्रपञ्चसत्यत्वे स्थिते सतीत्यर्थ इति । अत्र केचित् प्रपञ्चसत्यत्वस्थापनस्यच कार्ये व्युत्पत्तिसमर्थनस्य च हेतुहेतुमद्भावासंभवं मन्यमानाः तत्रेति भाष्यस्थपदस्य ब्रह्मविचारारम्भकर्तव्यत्वाकतर्व्यत्वसंशये सतीत्यर्थ इति मन्यन्ते । संबन्धं गृहीत्वेति । संबन्धो युज्यत इत्यभिप्रेत्येत्यर्थः । ततश्च गामानय, गां पश्य, गां बधान इति बहुप्रयोगानु-स्यूतगोशब्दस्य सर्वक्रियानुस्यूतगोपिण्डोर्थः । व्यावर्तमानानामानय(न)ादिशब्दानां व्यावर्तमानाः क्रिया अर्था इति संबन्धग्रह-स्यैवावापोद्धाराधीनशक्तिग्रहरूपतया कत्वाप्रत्ययार्थपौर्वापर्यानुपपत्तिरिति शङ्काया नावकाशः । ननु हर्षहेतूनामानन्त्यादित्यनेनैव विवक्षितार्थसिद्धेः कालत्रयवर्तिनामित्यनर्थकम् । प्रत्युतायुक्तं च, इदानींतनहर्षेऽतीतानागतयोर्हेतुत्वासंभवात्, हर्षहेतुज्ञानपर-त्वाश्रयणस्य क्लिष्टत्वाच्चेत्याशङ्कय पञ्चिकोक्तानुवादरूपत्वाददोष इत्यभिप्रयन्नाह-कालत्रयवर्तिनामिति पञ्चिकायामिति ।

ननु हर्षहेतुविशेषपरत्वानिश्चयेऽपि हर्षहेतुमात्रपरत्वं निश्चितमिति कथं व्युत्पत्त्यभाव इत्याशङ्कयाह-व्युत्पत्तिर्नामेति । व्युत्पन्नेतरपदभ्य पदान्तरार्थनिश्चयोदाहरणमिति । यद्यपि भाष्ये व्युत्पन्नेतरपदविभक्तयर्थस्येति इतरपदविभकत्यथर्व्युत्पवि-मानेवोदाहृतः । न प्रत्येकम् । प्रत्येकं व्युत्पव्यभिप्रायत्वे केवलविभक्तिमात्रव्युत्पत्तेरप्युदाहरणं प्रदशर्नीयं स्यात्-तथापि भाष्ये पदा-न्तरस्य विभक्तेश्च व्युत्पत्तिद्वयमपि

प्रयोजकतयोपात्तमिति केवलं पदान्तरव्युत्पत्तेरप्यर्थनिश्चायकत्वमभिप्रेत्य ग्रन्थकृता भाष्याभि-प्रेतत्वेनोदाहृतमिति द्रष्टव्यम् । व्युत्पन्नकः-कूजतिशब्देनेति क्वचित्पाठः । यद्यपि समभिव्याहृतपदान्तरस्यैव व्युत्पन्नत्वं वक्तव्यम् । "सांनिध्यतः सिद्धपदस्य वृद्धाः' इत्युक्तरीत्या प्रसिद्धपदसमभिव्याहारलक्षणसांनिध्यस्यैव शक्तिग्राहकत्वकथनात् । अत एव "इह सहकारतरौ मधुरं पिको रौति' इत्यादौ प्रसिद्धपदसामानाधिकरण्यादिभिर्व्युत्पत्तिग्रह इति तार्किकैरप्युदाहृतम्-तथापि "कः' इत्य- स्य "पिकः' इत्युत्तरं जानता तु निर्विचिकित्सं शब्दार्थाध्यवसानं संभवतीत्यभिप्रेत्यैवमुक्तमिति द्रष्टव्यम् । व्युत्पन्नकूजतिशब्देनेति पाठस्तु सुगम एव । व्युत्पन्नेतरपदविभकत्यर्थस्य प्रकअत्यर्थनिश्चयोदाहरणमिदमिति । यद्यपि भाष्ये व्युत्पन्नेतरपदस्य पदान्तरा-र्थनिश्चयः, व्युत्पन्नविभक्तकस्य प्रकृत्यर्थनिश्चय इति यथासंख्यान्वयः स्वरसतः प्रतीयते । न च विभक्तिमात्रव्युत्पन्नस्य प्रकृत्यर्थनि-श्चयोदाहरणं नास्तीति शङ्कयम्, यज्ञदत्तं ध्नन्तं देवदत्तं पश्यति व्युत्पित्सौ, "देवदत्तो यज्ञदत्तं हन्त' इति केनचिद्वाक्ये प्रयुक्ते, सुप्ति-ङ्विभकत्यर्थज्ञानवतस्तस्य कर्तृकर्मक्रियावाचिपदत्वनिश्चयद्वारा प्रकृत्यर्थनिश्चयसंभवात्-तथाप्ययमर्थः संभवतीत्यभिप्रेत्यैवमुक्त- मिति द्रष्टव्यम् । "पिकः कूजति' इत्यादौ कूजतिपदार्थनिश्चयेऽपि पिकपदगतप्रथमार्थापरिज्ञाने कारकान्तरशङ्कया पिक-कूजति- पदयोः सामानाधिकरण्याप्रतीतेरर्थानिश्चयात् पदान्तरव्युत्पत्तिविभक्तिव्युत्पत्त्योर्मिलितयोरेव पिकपदार्थन्ि◌चयकत्वात् । न च "कः कूजति' इति प्रष्टुर्वाक्ये व्युत्पन्नस्य विभकत्यर्तापरिज्ञानेऽपि कूजतिपदव्युत्पत्तिमतः पिकपदार्थनिश्चयः संभवतीति वाच्यम्, "कः' इत्यत्रैव प्रथमाविभकत्यर्थनिश्चयस्यावश्यकतया विभकत्यैक्येन पिकपदविभक्तेरपि निश्चितत्वात् मिलितयोर्हेतुत्वमिति भाष्याभिप्रायः । न चैवं सति "पदान्तरार्थनिश्चयेन प्रकृत्यर्थनिश्चयेन वा' इति भाष्ये पदान्तरार्थनिश्चयोक्तिरयुक्ता स्यादिति वा- च्यम्, लोकप्रसिद्धयनुसारेण पदान्तरार्थनिश्चयेनेत्युकत्वा इत्थमेवानुशयानेन प्रकृत्यर्थनिश्चयेन वेति द्वितीयकल्पोक्तिरिति वद- न्ति । भाष्ये-पदान्तरार्थनिश्चयेन प्रकृत्यर्थनिश्चयेन वेति । पदान्तरार्थनिश्चयदर्शनेन प्रकृत्यर्थनिश्चयदशर्नेन वेत्यर्थः । ततश्च तस्यैवाभिधाक्तिनिश्चयरूपतया हेतुहेतुमद्भावासंगतिरिति न चोदनीयम् । व्युत्पन्नवाक्यस्थकतिपयपददर्शनादिति । ननु कार्य-

वाचिपदसमभिव्याहारदर्शनेन तत्समुदायान्तर्गतपदान्तरस्यापि तदभिधायित्वनिश्चये घयवाचिपदान्तरसमभिव्याहारादितरपद- स्यापि तथात्वप्रसङ्गात् प्रत्युत तस्य पर्यायपदत्वशङ्कावहत्वेन तदर्थकत्वाभावनिश्चय एवहेतुत्वादिति चेत्-न । उपक्रम एव पदजा- तस्य कार्यसामान्यवाचित्वं निश्चितवतः पुंसः प्रसिद्धपदसामानाधिकरण्येनोपपाद्यमानाया वाच्यवाचकभावप्रतीतेः तद्विशेषरूप- त्वेन

प्रथमावगतकार्यसामान्यवाचित्वपरित्यागासंभवात् । "तदंशविशेषनिश्चयरूपत्वात्' इति भाष्ये तच्छब्दं कार्यपरतया व्या- ख्याय संनिहितपदसमुदायपरतया व्याचष्टे-यद्वा तदंशविशेष इति । तृतीये च कारकपदेषु व्यभिचार इति । न च कारकान्वित-स्वार्थाभिधायित्वसत्त्वेऽपि कार्यार्थत्वासिद्धेरेतत्पक्षनिरासोव्यर्थ इति वाच्यम्, क्रियाया एव कारकान्वितत्वेन सर्वपदानां कारका-न्वितस्वार्थाभिधायित्वे कार्यवाचित्वस्यावर्जनीयतया तस्यापि प्रतिक्षेप्यत्वात् । ननु कारकान्वितस्वार्थाभिधायित्वे कारकाणां क्रियाविनाभूततया क्रियामात्रवाचित्वसिद्धावपि कार्याभिधायित्वास्य नावश्यंभावः, इतिहासपुराणादौ तथैवोपलब्धेरिति चेत्-

सत्यम् । सिद्धान्तिना सर्वपदानां क्रियावाचित्वस्यापि प्रतिक्षेप्यतया अस्यापि पक्षस्योद्धाट्य निरसनोपपत्तेः । अत्र केचित्-वाचस्पतिना अनेन प्रकारेण सिद्धवस्तुप्रामाण्योपपादनप्रकारः कृतो न दृायते? तत्र हीत्थं वाचस्पतिवा- क्यम्-"अपि च "आम्नायस्य क्रियार्थत्वात्-'इति शास्त्रकृद्वचनम् । तत्रार्थग्रहणं यद्यभिधेयवाचि ततो भूतार्थानां द्रव्यगुणशब्दाना-मानर्थक्यमनभिधेयत्वं प्रसज्येत । न हि ते क्रियार्थाः । यद्युच्येत न क्रियार्थत्वं क्रियाभिधेयत्वम् । अपितु क्रियाप्रयोजनत्वम् । द्रव्य-गुणशब्दानां च क्रियार्थत्वेनैव भूतद्रव्यगुणाभिधानम्; न स्वनिष्ठतया । यथाहुः शास्त्रविदः-"चोदना हि भूतं भवन्तम्' इत्यादि । एतदुक्तं भवति-कार्यमर्थमवगमयन्ती चोदना

(तदर्थं) भूतादिकमण्यर्थमवगमयतीति । न तावत् कार्यशेषभूत एवार्थे पदानां संग- तिग्रह इत्येतदुपपादितं भूतेऽप्यर्थे व्युत्पत्तिं दर्शयद्भिः । नापि स्वार्थमात्रपरतैव पदानाम् । तथा सति न वाक्यार्थप्रत्ययः स्यात् । न हि प्रत्येकं स्वप्रधानतया गुणप्रधानभावरहितानामेकवाक्यता दृष्टा । तस्मात् पदानां स्वार्थमभिदधतामेकप्रयोजनवत्पदार्थ-परतयैकवाक्यता । तथा च तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति । तथा च अर्थान्तिरसंसर्गपरतामात्रेण वाक्यार्थ-प्रत्ययोपपत्तौ न कार्यसंसर्गपरत्वनियमः पदानाम्' इति । नास्मिन् वाचस्पतिवचनसंदर्भे एते विकल्पा दृश्यन्ते । नाप्यनेन प्रका- रेण दूषणम् । अस्य हि संदर्भस्यायमर्थः-"आम्नायस्य क्रियार्थत्वात्' इत्यत्र किमभिप्रेतम्? सर्वपदानां कार्यवाचित्वम्? उत कार्या-न्वितत्च्छेषवाचित्वम्? नाद्यः, "द्रव्यगुणवाचिशब्देषु तदाभावात् । न द्वितीयः, सिद्धार्थेऽपि व्युत्पत्तेरुपपादनात् । नन्वेवमितरा-न्वितार्थकत्वमपि न स्यादिति चेत्-न; स्वार्थाभिधायिशब्दैर्लक्षरयेतरान्वयविशिष्टप्रतीतेरिति । अत्र च श्रुतप्रकाशिकाग्रन्थोक्त-विकल्पत्रयं न दृश्यते । दूषणप्रकारोपि नेदृशो लक्ष्यते । भूतार्थे व्युत्पविदर्शनस्थलेऽपि नायं विकलपः प्रदशितः । एवं हि तत्र वा- क्यम्-*"इदमात्रकूतम्-

कार्यबोधे यथा चेष्टा लिङ्गं हर्षादयस्तथा ।

सिद्धबोधेर्थवत्तै (भवत्वे) वं शास्त्रत्वं हितशासनात् ।।

यदि हि पदानां कार्याभिधाने तदर्थस्वार्थाभिधाने वा नियमेन वृद्धव्यवहारे सामर्थ्यमवधृतं भवेत्, न भवेदहेयानुपादेयभूतब्रहमात्म-तापरत्वमुपनिषदाम्, तत्राविदितसामर्थ्यत्वात् पदानाम् । लोके तत्पूर्वकत्वाच्च वैदिकार्थप्रतीतेः । अथ तु भूतेऽप्यर्थे पदानां लोके शक्यः संगतिग्रहः, तत उपनिषदां तत्परत्वं पौर्वापर्यपर्यालोचनया अवगम्यमानमपह्नुत्य न कार्यपरत्वं शक्यं कल्पयितुम्, श्रुतकल्प-नाप्रसङ्गात् । तत्र तावदेवमकार्यार्थे न संगतिग्रहः, यदि तत्परः प्रयोगो लोके न दृश्यते, तत्प्रत्ययो वा व्युत्पन्नस्योन्नेतुं न शक्यते । न तावत् तत्परः प्रयोगो न दृश्यते लोके, कुतूहलभयादिनिवृत्त्यर्थानामकार्यपराणां पदसंदर्भाणां प्रयोगस्य लोके बहुलमुपलब्धेः । तद्यथा-"आखण्डलादिलोकपालचक्रवालाधिवसतिः सिद्धविद्याधरगन्धर्वाप्सरःपरिवारो ब्रह्मलोपावतीर्णमन्दाकिनीपयःप्रवाह-पातधौतकलधौतमयशिलातलो नन्दादिप्रमदवनविहारिमणिमयशकुन्तकमनीयनिनदमनोहरः पर्वतराजः सुमेरुः' इति, "नैष भुज- ङ्गो रज्जुः' इत्यादि । नापि भूतार्थबुद्धिर्व्युत्पन्नपुरुषवर्तिनी न शक्या सुमुन्नेतुम्, हर्षादेरुन्नयनहेतोः संभवात् , तथाहि-अविदितार्य-जनभाषार्थो द्रमिडो नगरगमनोद्यतो राजमार्गाभ्यर्णं देवदत्तमन्दिरमध्यासीनः प्रतिपन्नजनकानन्दनिबन्धनपुत्रजन्मावार्ताहारेण सह नगरस्थदेवदत्ताभ्याशमागतः, पटवासोपायनापर्णपुराःसरं"दिष्टया वर्धसे । देवदत्त पुत्रस्ते जातः' इति वार्ताहारव्यवहारश्रव-णसमनन्तरमुपजातरोमाञ्चकञ्चुकं विकासिनयनोत्पलमतिस्मेरमुखमहोत्पलं विलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमेते; प्रमोदस्य च प्रागभूतस्य तद्वयाहारश्रवणसमनन्तरं भवतस्तद्धेतुकताम् । न चायमप्रतिपादयन् हर्षहेतुमर्थं हर्षाय कल्पत इति अनेन हर्षहेतुरर्थ उक्त इति प्रतिपद्यते । हर्षहेत्वन्तरस्याप्रतीतेः पुत्रजन्मनश्च तद्धेतोरवगमात् तदेव वार्ताहारेणाभ्यधायीति निश्चिनोति । एवं भय-

शोकादयोप्यदुहार्याः । तथा च प्रयोजनवत्तया भूतार्थाभिधानस्य प्रेक्षावत्प्रयोगोऽप्युपपन्नः । एवं च ब्रह्मज्ञानस्य परमपुरुषार्थहेतुभा- वात् अनुपदिशतामपि पुरुषप्रवृत्तिनिवृत्ति वेदान्तानां पुरुषहितशासनात् शास्त्रत्वं सिद्धं भवति' इति । अतः कथमिदमुक्तमिति न जानीम इति चोदयन्ति । तत्रेदमुत्तरम्-सत्यं युष्माभिर्न ज्ञायते । नैतावता विषयस्यासत्त्वम्, "न ह्ययं स्थाणोरपराधः, यदेनमन्धो न पश्यति' इति न्यायात्, स्थलान्तरे ग्रन्थान्तरे च प्रतिपादनसंभवात्, एषामपि वाक्यानां तात्पर्यतस्तदर्थप्रतिपादनसंभवाच्चेत्यल-मतिक्षोदेन ।

शब्दस्य प्रवृत्त्यन्वयव्यतिरेकानुविधायित्वज्ञानोत्पाद्यस्य शब्दे प्रवर्तकार्थावबोधित्वावगमस्य कार्यबुद्धिप्रवृत्तिव्याप्तिबल-निष्पाद्यत्वाभावात् कार्यत्वबुद्धिप्रवृत्त्योः कार्यकरणभावाग्रहेऽपि शब्दस्य प्रवृत्त्यन्वयव्यतिरेकग्रहणमात्रेण

प्रवर्तकार्थाभिधायित्व- स्य ग्रहणसंभवात् इत्यभिप्रयन्नाह-उत्तरत्र सर्वपदानामिति । अन्यतरांशासिद्धयभिप्रायेणेति । केचित्तु-कृतकर्मविचारस्यावृत्ति-विधानादिना कर्मफलानित्यत्वावगमरूपविशेषणसंभवस्याप्येतदधिकरणप्रदर्शनीयतया अंशद्वयासिद्धेरपि वक्तुं शक्यत्वेन यथा- श्रुतमेव भाष्यं युक्तमिति मन्यन्ते ।

(अधिकरणसिद्धान्तः)

सूत्रकारैः परिहारोऽभिधीयत इति । इदमुपलक्षणम्-सूत्रकृदभिमतः परिहारोऽभिधीयत इत्यपि द्रष्टव्यम् ; "एवं प्राप्ते प्रचक्ष्महे' इत्यादौ तथैव वर्णनीयत्वात् । प्रमाणेनार्थं स्वीकुवर्न्त इति । "तेन दीव्यति खनति जयति जितम्' इति दीव्यत्याद्यर्थे ठक् प्रत्यय इति भावः । ननु "अम्बातातमातुलशशिपशुनरमृगपक्षि' इत्यैकपद्येनैव निर्देष्टव्ये विभज्योपादानं किमर्थमित्याशङ्क्य विभागेनोपादानस्य प्रयोजनमाह-अम्बातातप्रभृतिरिति । भाष्ये-एनमवेहीति । क्वचित् कोशे "अवैहि' इति पाठो दृश्यते । स तु लेखकस्खलनकृतः, "एत्येधत्यूठ्सु' इत्यत्र एचीत्यनुवृत्तेरिहीत्यस्यानिष्पत्तेरिति द्रष्टव्यम् । एनं बोधख शब्दमिति । नन्वादेशाभा- वात् कथमेना । (मन्वा) देशः (ननु अन्वादेशाभावात् कथमेनादेशः) इति चेत्-न । व्युत्पादनस्थले पूर्वमम्बादिशब्दान् प्रयुक्त-वतस्तद्विषयेऽन्वादेशसंभवात् । न च "एनमवेहि' इति कथं शब्दविषये अङ्गुलीनिर्देश इति वाच्यम्, तस्य "इमं चावधारय' इति निर्दिष्टार्थमात्रविषयत्वेनाप्युपपत्तेः । भाष्ये-अवधारयेत्यभिप्रायेणेति । अभिप्रायाकारकथने, बालोऽसावमुमर्थमवधारयतु, इत्य-भिप्रायेणाङ्गुल्या निर्दिश्य'इत्येवं प्रथमपुरुषस्य वक्तुमुचितत्वात् तत्रैव तात्पर्यम् । अमी शब्दाः संकेतिता इति मन्येरन्निति । संबन्धान्तरादर्शनात् सङ्केतयितृपुरुषान्तरदर्शनाच्च' इति भाष्यानुरोधात् शङ्काद्वयव्युत्क्रमो द्रष्टव्यः । ननु-बालस्य व्युत्पत्तिग्रहात् पूवर्मम्बातातमातुलादिशब्दैस्तदर्थबुद्धयुत्पत्तौ न शक्तिग्रहो मूलम्, तस्याः तदानीमनिश्चयात् । अपितु तदर्थाभिमुखाङ्गुलिनिर्देश-साहचर्यलक्षणसंबन्धवशादेव ाब्दस्यार्थप्रत्यायकत्वमिति वक्तव्यम् । एवं च स्वस्य तदर्थबुद्धयुत्पत्तेरीदृशसंबन्धनिमित्ततां जानन् कथं वाच्यवाचकभावलक्षणसंबन्धान्तरं कल्पयेत्? किं च बालस्य धूल्यक्षराभ्यासदाशायां धूलिरेखाविशेषमङ्गुल्या "अयं ककारः, अयं खकारः' इति बहुशः शिक्षयन्ति । स च पश्चाल्लिपिविशेषदर्शने अक्षरं प्रतिपद्यते । अक्षरविशेषश्रवणे लिपिविशेषं च स्मरति । न तत्र बोध्यबोधकत्वलक्षणसंबन्धान्तरं कल्पयति । एवमिहास्त्विति चेत्, उच्यते,-अर्थविशेषमेवाङ्गुल्या निर्दिश्याम्बादिशब्दं प्रयुञ्जते; नान्यमित्यत्र किंचिन्नियामकं मृगयमाणो बालः तयोरौत्पत्तिकं संबन्धविशेषं निश्चिनोतीत्युक्तौ दोषाभावात् । लिप्यादौ तु संकेतपूर्वकत्वापरिज्ञानदशायामौत्पत्तिकं संबन्धं निश्चिानोतु; का नः क्षतिः? संकेतपूर्वकत्वज्ञाने तु तद्व्राध्यत इत्यदोषात् । अन्विताभिधानप्रसङ्ग इति चेदिति । द्विविधं हि वाक्यार्थप्रक्रियाभेदमाहुस्तन्त्रनिष्ठाः=अन्विताभिधानम्, अभिहितान्वय इति ।

"पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् ।

न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधकम् ।।

इत्यन्विताभिधानम् । अयमत्र श्लोकार्थः-पदानि तावत् श्रूयन्ते । श्रुतानि च व्युत्पत्त्यनुसारेण पदाथर्स्वरूपाणि परस्परानन्वितानि स्मारययन्ति । स्मृतेषु पदार्थेष्वाकाङ्क्षादिपरामर्शः । ततो न्यायप्रवृत्तिः । न्यायप्रवृत्त्या वचनव्यक्तिविशेषाभिव्यक्तिः संपद्यते । ततः सम्यङ्न्यायानुगृहीतानि पदानि नानापदार्थविशिष्टैकप्रधानार्थात्मकं वाक्यार्थमभिदधतीति । अभिहितान्वयावादिनस्त्वेवमभ्यधुः- पदैः पदार्थाः पृथक् पृथगभिधीयन्ते । तच्चाभिधानं पदार्थस्मरणमात्रे पर्यवसितम्, "पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते' इति वचनात् । ते चाभिहिताः पदार्थाः योग्यत्वेन परामृश्यमानाः स्वयमेव विशेषसंसर्गात्मकं वाक्यार्थमवबोधयन्ति । न तत्र पदाव्यापारः, अर्थैरेवार्थविशेषसिद्धेः । यथा कविभिरालोच्यमानाः पदार्था एव वाक्यार्थमर्थविशेषसंसर्गात्मकवबोधयन्ति । पश्चा-देव प्रतिपन्नार्थानुरोधेन शब्दरचना । एवमर्था एवार्थविशेषं बोधयन्तीति । ततश्च "अस्यायमर्थः' इति व्युत्पत्तावेकैकस्य पदस्य

ततदर्थमात्रपरतया व्युत्पत्तेस्तावन्मात्रस्यैवाभिधेयतया पदान्तरार्थान्वितार्थाभिधानं न सिध्येदिति भावः । प्रातिस्विकव्युत्पत्ते- रिति । प्रतिपदव्युत्पत्तेरित्यर्थः । अत्र तु पूर्वभाविनीति विशेष इति । अयमर्थः- यादृच्छिकव्युत्पत्तिस्थले गवानयने प्रवृत्त्युपल- म्भेन "अस्य वाक्यस्य गवानयनकार्यत्वमर्थः' इति प्रथमतोऽवगत्य तत आवापोद्धारक्रमेण "अस्य पदस्यायमर्थः' इति पदार्थत्वं निश्चिनोति । बुद्धिपूर्वकव्युत्पत्तिस्थले तु "अस्य पदस्यायमर्थः' इति पदार्थत्वबुद्धिपूर्विका वाक्यार्थावगतिरिति । शब्दैरपि परस्प-रान्वययोग्यत्वेन स्वार्थाभिधानमिति । पदानामेव पदार्थेषु संसर्गबोधनशत्त्याधानशक्तिरित्यर्थः । अत्र केचिदाचार्याः-शक्तित्रय- गौरवं नास्त्येव, पदानामेव पदार्थाभिधानशक्तेः स्वीकारत् । अर्थानां संसर्गबोधकत्वस्य संभवात्; इतरथा कविकाव्यमूलज्ञानानु-पपत्तिप्रसङ्गात् । शब्दान्वयव्यतिरेकानुविधानेन शाब्दत्वस्याप्युपपत्तेः । अव्यवहितत्वस्या प्रयोजकत्वात् अभिहितान्वयपक्ष एव भाष्यकृदभिमत इति वदन्ति । बुध्यस्वेति ह्युक्तं भवतीति । अयं भावः-येन हि यत् सिषाधयिषितं तत् तस्यार्थः, दण्डेन सिषा-धयिषितस्य घटस्य दण्डार्थत्वदर्शनात् । प्रकृते चाम्बादिपदेन बालस्य सिद्धाथर्भूताम्बादिबुद्धिर्हि प्रतिपादयितुः सिषाधयिषिता । ततश्चाम्बादिपदप्रयोजनत्वेनार्थभूताया अम्बादिबुद्धेर्बालगतायाः साध्यत्वेन सिद्धत्वाभावात् कार्यार्थत्वमेव स्यादिति । इयं च शङ्का "कार्यार्थाभिधायित्वम्' इत्यत्रार्थशब्दाभिधेययोरभिधेयप्रयोजनयोर्विवेकाग्रहनिबन्धनेति द्रष्टव्यम् । गां क्रीणीहीति । "विक्रीणीहि' इति क्वचित् कोशे पाठो दृश्यते । तत्र विशब्दो लेककस्खलनकृतः, इतरथा "परिव्यवेभ्यः क्रियः' इत्यात्मनेपदप्रस-ङ्गात् । कीणातेरेव विक्रयार्थत्वमपि संभवति, तथैव "क्रथ्यस्तदर्थे' इति सूत्रे भाष्यप्रदीपे प्रतिपादनात् ।

उत्तरत्रेति । देवताधिकरण इत्यर्थः । ज्ञानेच्छाकृतीनामेव सविष्यत्वेनापूर्वस्य निर्विषयस्या कथम् "उपासनाविषयका-र्याधिकृत' इत्युक्तिरित्याशङ्क्य कअतिसाध्यरूपकार्यशरीरानुप्रविष्यकृतेः सविष्यत्वात् तद्द्वार तस्य सविषयत्वमित्यभिप्रयन्नाह-उपासनावच्छिन्नेति । विसिन्वन् हि विषय उच्यत इति पाठः स मीचीनः । विपूर्वात् निनोतेः निष्पन्नत्वात् विषयशबशब्दस्य ।

"विशब्दो हि विशेषार्थः सिनोति(ते)र्बन्ध उच्यते ।

विशेषेण सिनोतीति विषयोऽतो नियामकः ।।'

इत्यभियुक्तोक्तेः विशिंषन्निति पाठे तु वस्तुव्याख्यानमेतत्; न शब्दव्याख्यानमिति द्रष्टव्यम् । रात्रीरुपेयात् प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्तीति हि श्रुतिरिति । अत्र यद्वक्तव्यम्, तत् पूर्वमेवोक्तम् । विधेयोपकारक इति । विधेयाया अपगोरण- निवृत्तेः निवर्त्यापगोरणगतानिष्टसाधनत्वस्य उपकारकत्वात् । अपगोरणस्यानिष्टसाधनत्वाभावे निवृत्तेरेवासंभवादिति भावः । अपगोरणशतयातनेति । अपगोरणं वधोद्यमः । शतयातना नरकविशेषः । मोक्षविरोधिफलेऽपीति । "उदरमन्तरं कुरुते, अथ तस्य भयं भवति' इत्यादिवाक्येष्विति भावः । कार्योपयोगितयैव सिद्धेरित्युक्त इति । कार्योपयोगित्वमिति शेषः । कार्योपयो-गितया सिद्धेरित्यनेन अतुयायिहेतुः (कार्योपयोगित्वरूपः) कार्योपयोगित्वमित्युक्तमित्यन्वयः । अत एव "चतुमुपदधाति । बृहस्प-तेर्वा एतदन्नम्, यन्नीवाराः' इत्यत्रार्थवादसमर्पितो देवतासंबन्धः स्थण्डिलनिर्वृत्त्यौपयिकचरूपधानविध्यनाकाङ्क्षितत्वान्नादत्तव्य इत्युक्तं द्वितीये, "संयुक्तस्त्वर्थशब्देन' इत्यधिकरणे (२-३-७) ततश्च विध्यपेक्षितसमर्पकोऽर्थवाद आदर्तव्यः; नान्य इति भावः ।

(अपूर्वकार्यत्वखण्डनम्)

अत्रार्थशब्देन प्राधान्यमिति । न्वर्थशब्दस्य प्राधान्यपरत्वे किं प्रमाणम्? न च "कार्यमर्थं प्रधानतया प्रतिपादयति' इति पञ्चिकावाक्यं प्रमाणमिति वाच्यम्, अर्थशब्दस्य प्राधान्यार्थत्वस्यास्मरद्वाक्यादप्रतीतेः । तत्र "कार्यरूपोऽर्थः समभिव्याहृत-यागाद्यपेक्षया शेषितया प्रतिपाद्यत इत्यस्यैव प्रतातेः । नापि "कृतिसाध्यं प्रधानम्' इति

प्रकरणशालिकावाक्यं प्रमाणम्, तत्रापि कृतिसाध्यं प्रधानम्' इति समभिव्याहारात् कृतिप्रधानत्वलाभात्, तस्यैवार्थशब्दनिर्देशार्हत्वादिति भावः । कृतिकर्मत्वं नाम प्रवर्तकत्वमित्यत्राहेति । यत्प्रकारकं ज्ञानं प्रवर्तकम्, तत प्रवर्तकत्वमित्यर्थः । भाष्ये-कृत्युद्देश्यत्वं न किंचिदुपलभ्यते इत्यत्र कृत्युद्देश्यत्वमित्यस्य प्रवर्तकत्वमित्यर्थ इति तु ग्रन्थकृतो भावः । अयं भावः-कृतिभाव भावि कृत्युद्देश्यत्वं तन्मते कार्यत्वम् । कृतिकर्मत्वम् । तच्च प्रवर्तकज्ञानप्रकार इति स्थितम् । प्रवर्तकज्ञानप्रकारश्च कअतिसाध्यत्वे सतीष्टतमत्वमिति सिद्धम् । तत्र च कअतिभावभावीत्यनेनैव सत्यन्तस्य सिद्धत्वात् प्रवर्तकत्वमित्यनेन विवक्षणीयांशस्तु इष्टतमत्वमात्रमेव । ततश्च कृतिभावभावित्वे सति प्रवर्तकत्वं नाम कृतिसाध्यत्वे सतीष्टतमत्वमिति पर्यवसितमिति । तत्र प्रेरकत्वं कृत्युद्देश्यत्वमिति । कार्ये प्रेरकत्वज्ञानात् प्रवर्तते । ततश्च प्रवर्तकज्ञानप्रकारत्वात् कृतिकर्मत्वरूपप्रवर्तकत्वरूपत्वं प्रेरकत्वस्योपपद्यत इत्यर्थः । (इति भावः) । न हि दुःख-निवृत्तिः सुखं भवतीत्यर्थ इति । अत्र केचित्-यथाश्रुतमेव युक्तम्, सुखव्यतिरिक्ताया अपि दुःखनिवृत्तेरनुकूलत्वदर्शनादिति

शङ्काया यथाश्रुतेनैव निवर्त्यत्वादिति वदन्ति । अनिष्टनिवृत्तिरूपतया वेष्टत्वमिति । नन्वनिष्टनिवृत्तेरपि सुखवत् पुरुषार्थान्तर-साधनत्वज्ञानानधीनेच्छाविषयतया कुतो, न स्वत इष्टत्वम्? न च दुःखनिवृत्तित्वप्रकारकज्ञानाधीनत्वात् तदिच्छाया न स्वत इष्टत्वमिति वाच्यम्, तथा सति सुखेऽपीच्छायाः सुखत्वप्रकारकज्ञानाधीनत्वात् स्वत इष्टत्वं न स्यात् । न च इष्टान्तरहेतुत्वा-निष्टनिवृत्तित्वज्ञानमन्तरेणैवेष्टत्वं स्वत इष्टत्वं विवक्षितमिति वाच्यम्, तथा सति पारिभाषिकत्वापत्तेः । "साक्षादिषिविषयभूत-सुखदुःखनिवृविभ्यामन्यत्वात्' इत्युत्तरभाष्ये दुःखनिवृत्तेरपि साक्षादिषिविषयत्वकथनाच्चेति चेत्-अत्र केचित्-दुःखाभावे इच्छा दुःखद्वेषायत्ता । न तु स्वतः । अतो न स्वत इष्टत्वम् । न च, द्वेषो नाम सिद्धान्ते जिहासैव । सैव च निवृत्तीच्छा इति दुःखे द्वेषस्य स्वाभाविकत्वं वदता, द्वेषस्य हानेच्छारूपजिहासारूपत्वं च वदता हानलक्षणनिवृत्तेः स्वत एवेष्टत्वमभ्युपेयमिति वाच्यम्-लोके अभावेच्छायाः प्रतियोगिद्वेषाधीनतयैव दर्शनेन द्वेषस्य हेयत्वप्रकारकज्ञानविशेषरूपत्वस्यावश्यं वाच्यतया तदधीनेच्छाविषयस्य दुःखाभावस्य न स्वत इष्टत्वमिति वदन्ति । ननु-अनुकूलत्वज्ञानं हीच्छाहेतुः । अनुकूलत्वस्येष्टतमत्वरूपे इष्टतमत्वज्ञानमिच्छायां हेतुरिति पर्यवसन्नम् । इष्टतमत्वज्ञानं च उच्छाविषयत्वरूपेष्टतमत्वायत्तमित्यात्माश्रय इति चेत्-न; इच्छाविषयतानिबन्धनस्व-रूपविशेषस्यैवानुकूलाथर्त्वेनात्माश्रयाद्यभावात् । नन्वनुकूलप्रतिकूलान्वयविरहे स्वरूपेणावस्थितिः दुःखनिवृत्तिश्चेत्, प्रतिकूल-निवृत्तेरिवानुकूलनिवृत्तेरपि दुःखनिवृत्तित्वप्रसङ्ग इत्याशङ्कय प्रतिकूलनिवृत्त्यंशे दुःखनिवृत्तेः सामानाधिकरण्यमित्याह-स्वरूपे-णावस्थितिः सुखनिवृत्तिरूपेत्यादिना । दृष्टान्ताभिप्रायेण क्रियाद्युपादानमिति । अत्र केचित्-"गामानयेत्यादिष्वपि वाक्येषु न कार्यार्थे व्युत्पत्तिः' इत्युपक्रमभाष्यानुसारात्

क्रियातदतिरिक्तापूर्वसाधारणकार्यत्वस्यैव निर्वचनीयत्वप्रतीतेस्तदनुरोधेन "क्रिया-देरनुकूलत्वं न संभवति' इति भाष्यस्यापि क्रियाऽक्रियासाधारण्येनानुकूलत्वनिषेधपरतया योजयितुं शक्यतया, दृष्टान्ताभिप्राये-णेत्युक्तौ न स्वारस्यं पश्यामः । अत एव "फलभावार्थव्यावर्तकं कृतिप्रधानत्वं वर्ण्यते' इत्यत्रापि न मूलं पश्यामः । ततश्चेष्यत्वाति-रिक्तस्येष्टत्वाघटितस्य वा कृतिप्रधानत्वस्याभावात्, सुखदुःखनिवृत्तिभिन्नस्यापूर्वस्य स्वत इष्टत्वाभावात्, अनन्याथर्तया प्रतिप- न्नस्य त्वन्मते सुखदुःखनिवृत्तिसाधनतयापीष्टत्वाभावात् न त्वदभिमतापूर्वे कार्यत्वमित्येवं भाष्याभिप्रायापर्यवसानप्रतीतेः भावा-र्थस्वर्गव्यावृत्तं पराभिमतं कार्यत्वं निराक्रियत इत्यत्र विनिगमकं न पश्याम इत्यपि वदन्ति । "सुखार्थतयेति । न हि दण्डचक्रादि-र्घटोभवती'त्ययं ग्रन्थः "कतु इत्यत्राह-दुःखात्मकत्वात्' इति ग्रन्थात् पूर्वं पठितव्यः । न क्वापि पठितव्यो वा, अनतिप्रयोजन- त्वात् । अतो व्युत्क्रमेण प्रतीकग्रहणशङ्का न कार्या । अयोगव्यवच्छेदो विवक्षित इति । अत्यन्तायोगव्यच्छेदो विवक्षित इत्यर्थः ।

(शेषलक्षणम्)

यथावत् प्रदर्श्यत इति । भाष्यकृतेति शेषः । अस्यार्थ उच्यत इति । मयेति शेषः । सत्तालाभो ह्यतिशय इत्युक्तमिति । न तु सत्तैवातिशय इत्युक्तमिति भावः । ननु परगतातिशयेत्यत्र परशब्दार्थस्याधिकरणकारकत्वप्रतीतेः पूर्ववर्तिन एव कारकत्वात् उत्पाद्यस्थले चोत्पत्तिरूपातिशय प्रति अपूर्ववर्तिनः कथं कारकत्वमित्याशङ्कय- अनुत्पन्नस्यापि बुद्धौ सूक्ष्मरूपेण विपरिवर्तमान- त्वेन कारकत्वं संभवति । एवमेव हि जायमानस्य जनिकर्तृत्वमप्युपपादनीयम् । एवमेव हि नवमे भाविनोऽपूर्वस्य निमित्तत्वं सम-र्थितमित्यभिप्रयन्नाह- स्वरूपस्याविद्यमानत्वेऽपीति । परातिशयः परमप्रयोजनमिति । नन्वेवं स्वर्गस्य पुरुषशेषतेवं न स्यात् । तद्धि कामवशात् विधिवशाच्चावगन्तव्यम्, अन्यार्थस्य काम्यत्वासंभवात् । न ह्यस्वार्थं किंचित् कश्चित् कामयते, तदपि परंपरया स्वार्थमेवा तथा विधिववाच्च । विधिर्हि प्रवर्तनात्मा । स्वर्गस्यात्मार्थत्वाभावे तत्साधने पुरुषस्य प्रवर्तकत्वानुपपत्तेरिति युक्तिद्वय- बलात् स्वर्गस्यात्मार्थत्वं साधनीयम् । यदि च परार्थमेव कार्यत्वं तदर्थं प्रवृत्तिश्च, तर्हि युक्तिद्वयमप्यात्मार्थत्वसाधकं न भवेदिति चेत्-न । यजेतेत्यात्मनेपदबलेन स्वर्गस्य कर्तृगामित्वावगमेन पुरुषार्थत्वप्रतीत्युपपत्तेरिति द्रष्टव्यम् ।

परगतातिशयाधानेच्छयोपादेयत्वमेव यस्य स्वरूपमित्यत्र एव कारस्योपादेयत्वायोगव्यवच्छेदकतया, कादाचित्कोपादे- यत्वप्रयुक्तेषु प्रकृष्टकृपास्तेहान्वितेषु नातिव्याप्तिरिति व्याख्याय, कृपास्नेहान्वितत्वकर्तृत्वादिवेषोपहितेषु शेषत्वं दृष्टतिति मत्वा, एवकारस्य परगतातिशयाधानेच्छयेत्यनेनान्वयमभिप्रेत्यान्ययोगव्यवच्छेदकतया परातिशयैकप्रयोजनकत्वरूपार्थसंभवमभिप्रेत्य- यदा यस्य यदतिशयैकप्रयोजनकत्वम्, तदा स तच्छेष इत्यभिप्रेत्य व्याचष्टे-अथवा केनचिदाकारेणेति । ननु परागतातिशया-धानेच्छयापादेयत्वमेव यस्य (धर्मः), स तच्छेष इत्येवास्तु किं निरूपकधर्मवाचिस्वरूपपदेन; व्याकर्त्याप्रसिद्धरित्यत आह-न च निरूपकशब्दस्येति । स्वरूपशब्दस्य निरूपकधर्मे व्युत्पन्नत्वान्निरूपकेत्युक्तकम्; यदतिशयैकपरमप्रयोजनत्वं यस्य धर्मः, स तच्छेष इत्युक्तऽपि न दोष इति भावः । शेषभूतवस्तुगतातिशयान्तराधायकत्वेनेति । शेषस्य शेष्यनुष्ठाष्यत्वेन शेषवस्तूत्पत्तेरपि

शेषगतातिशयरूपतया शेषिणोऽपि तदाधायकत्वसंभवादिति भावः । परमप्रयोजनत्वं परमशब्दव्युदसनीयमिति । शेषगताति-शयस्येति शेषः । प्रकृष्टकृपान्वितेषु परातिशयस्य स्वरसतः परमप्रयोजनत्वावगतिमुपपाद्य स्नेहान्वितेष्वप्युपपादयति-तथा मित्रा-दिष्वित्यादिना । बन्धविशेषान्वितेष्विति । संबन्धविशेषान्वितेष्वित्यर्थः । पुरुषविशेषं प्रति न नियतं पुरुषभेदेनाप्यनियत चेति । अस्य स्त्रिग्धस्यासु स्त्रिग्धविशेषं प्रति परागतातिशयैकप्रयोजनत्वमस्तीति नियमोऽपि नास्ति । यथा भृत्यादेर्यावज्जीवं यत्किंचित् प्रति पारार्थ्यं नियतम्, एवं स्त्रिग्धव्यक्तिविशेषनियमाभावेऽप्यन्यस्मिन् स्त्रिग्धव्यक्तिविशेष उपकारकतयैवावतिष्ठत इत्यपि न नियमोऽस्तीत्यर्थः । येषां स्वातन्त्र्यबुद्धया परातिशयाधानेऽपि स्वार्थत्वबुद्धिः, तेषामलक्ष्यतया न तत्राव्याप्तिर्दोषायेत्येकं परिहारम्, यदीदृकत्वं न दृश्यते तेषां न भृत्यत्वमिति भाष्येणोकत्वा अलक्ष्यत्वाङ्गीकरणस्यायुक्तत्वं मत्वा परिहारान्तरमाह-यद्वा यद्यपि गर्भदासादय इति । वास्तवं पारार्थ्यमेव लक्षणम् । न प्रतीयमानमिति भावः । ज्ञायमानत्वं चास्य किंचित्कार इति । लीलारसनिष्पादनं पूर्वोक्तं चशब्देन समुच्छीयते ।

दूषणान्तरमेव दशर्यति-एकपदेन कार्यमित्यादिना । ननु त्रिष्वन्यतममेव कृतिसाध्यत्वेन प्रतीयत इत्ययुक्तम् । यागस्य सुखदुाःभावेतरत्वात् साधनत्वप्रतीतेश्च प्रथमतोऽभावात् यागे कृतिसाध्यत्वप्रतीतिर्न स्यादित्याशङ्कय, क्रियातिरिक्तस्यापूर्वस्य साक्षात् कअर्तिविषयतया साध्यत्वासंभवात् किंविषयकृतिसाध्यमपूर्वमित्याकाङ्क्षायां यागविषयककृतिसाध्यमिति यागस्या-वच्छेदकतया विषयत्वमात्रं प्रतीयते, न साध्यत्वमितयाह-कृतेः क्रियातिरिक्तगोचरत्वादर्शनेनेति । सुखेत्यादेरेवं वार्थ इति । पूर्वस्मिन् पक्षे कृतिसाध्यत्वे इष्टत्वं प्रयोजकतया नोपन्यस्तम्, अपितु सुखदुःखाभावतत्साधनान्यतमत्वमित्युक्तम् । अस्मिंस्तु पक्षे त्रिष्वप्यनुगतमिष्यत्वमेव कृतिसाध्यत्वप्रयोजकमुच्यत इति विशेषः । संभावितप्रकारान्तरेण प्रयोजनत्वनिराकरणपरतया पौनरुक्त्यपरिहारं दर्शयन् । अपिचेत्यादिभाष्यमवतारयति-पूर्वं तृतीयाकाररूपमित्यादिना । पर्यायशब्दबाहुल्यसंभवादिति ।

नियोगपर्यायमित्युक्ते नियोगशब्द एव पर्यायशब्द इति प्रतीयते । अपरशब्दप्रयोगे तु नियोगवाचिशब्देषु सोऽपि कश्चित् पर्याय इति प्रतीयत इति भावः । भाष्ये-पश्चात्तु भोक्ष्यत इति । परिपाकदशायां सुखत्वेनानुभूयत इत्यर्थः । नियतैहिकानिकारीर्यभिचा-रादीनि । नियतामुष्मिकाणि स्वर्गार्थानि कर्माणि । पशुपुत्राननाद्यर्थानित्वत्रैव जन्मनि कर्मणः परिपाके ऐहिकानि, इतरथा आमुष्मिकाणीत्यतोऽनियतैहिकानीति पूर्वतन्त्रे स्थितम् । ततश्च भाष्ये अनुभूयमानान्नाद्यारोगतादिव्यतिरेकेणेत्यनियतैहिक-फलानामप्युपादा(पपाद) नात्, भाष्ये नियतैहिकशब्दो नियतामुष्मिकस्वर्गादिसाधनकर्मविलक्षणमात्रपर इति नियतैहिक- शब्देन पश्वन्नाध्यर्थकमर्णामपि संग्रहं हृदि निधाय तेषु च कर्मसु सति प्रतिबन्धके तदानीमेवेह फलानुभवासंभवात् तदानीमनु-भूयमानान्नाद्यारोगतादिव्यतिरेकेणेति ग्रन्थासामञ्जस्यं मन्वानः सोपस्कारं व्याचष्टे-अप्रस्तुतप्रतिबन्धकस्य कर्मण इत्यथर् इति । इति शेष इत्यर्थः ।

अन्त्येष्यिसापेक्षेति । परिधीनीये कर्मणि "दक्षिणे हस्ते जुहूं सादयति' इत्यादिवाक्यविहितकर्मोपयुक्त-जुह्वादिपात्रप्रतिपत्तेरपि स्वर्गाद्यर्थकर्माङ्गतया सर्वाङ्गापूर्वसाध्यपरमापूर्वस्य जुह्वादिप्रतिपत्त्यनन्तरभावित्वेन ततः पूर्वमनिष्पत्तेरिति भावः ।

अथावादोक्तत्वात् त्यज्यत इति । अर्थवादप्रामाण्यस्य सिद्धान्तेऽप्यभ्युपगतत्वेनार्थवादोक्तत्वमात्रेण त्यागं न ब्रूम इत्यर्थः । व्युत्पत्तिर्नास्तीति विचार इति । व्युत्पत्तिर्नास्तीति पूर्वपक्ष इत्यर्थः । वैविध्येन बुद्धेः संचारणं हि विचारः ।

ननु ब्रह्म-विचारारम्भस्य न्यायसिद्धत्वे तद्विधायकं "परीक्ष्य लोकान्' इति वाक्य ंव्यर्थं स्यादित्याशङ्कयाह-परीक्ष्य लोकानित्यादि वाक्य-मिति । उद्देश्योपादेयविभागवदिति । यद्यपि"तत्त्वमसि' इति वाक्यवदुद्देश्योपादेयविभागशून्यस्यापि वाक्यत्वं संभवति, तथापि सूत्ररूपवाक्यस्य तद्रूपत्वं वक्तव्यामेति भावः । विधेयं ह्युपादेयमिति । यद्यपि देशकालादिविधौ विधेयस्यापि देशकालादेर्नोपादे-यत्वम्, तथापि प्रायिकत्वमभिप्रेत्यैतदुक्तमिति द्रष्टव्यम् । व्युत्पत्तिर्नास्तीति वाक्येनेति । पूर्वपक्षयुक्तिभिरित्यर्थः । अस्य सूत्र-स्याप्रवृत्तप्रवर्तकत्वमपि संभवति । यथा "कृष्णलं श्रपयेत्' इत्यस्य श्रपणे प्रयोजनाभावेन निवृत्तस्य प्रतिप्रसवरूपतया विधित्वमि-त्याह-अत्र हि रागतः प्रवृत्तिमत इति ।

१.१.५

प्रथमे सूत्रे उद्देशः कृत इति - अत्रायं विवेकः, प्रथमद्वितीयपक्षयोः तृतीयचतुर्थाधिकरणे लक्ष्यलक्षणस्वभावनिबन्धनपरीक्ष्य-त्वशङ्कानिवर्तकत्वेनैका पेटिका । तत्रापि "यतो वा इमानि' इत्यादिवाक्ये जगत्कारणानुवादेन ब्रह्मत्वं विधीयत इति पक्षानुसारेण प्रथमः पक्षः । यतो वा इमानीतिवाक्ये कारणत्वानुवादेन लक्षणत्वं विधेयमितिपक्षानुसारेण द्वितीयः पक्षः । न्यायशास्त्रस्योद्देश-लक्षणपरीक्षारूपत्वस्य आवश्यकत्वेपि अस्य शास्त्रस्य तदनावश्यकत्वात् प्रथमद्वितीयाधिकरणयोर्नोद्देशलक्षणार्थप्रवृत्तत्वम्, अपि तु व्युत्पत्त्यभावप्रतिपत्तिदौस्थ्यमानान्तरदिद्धत्वाफलत्वनिबन्धनानारम्भशङ्कानिवर्तत्वेन चतुर्णामप्यधिकरणानामेकपेटिकात्वमिति तृतीयः पक्षः । क्षेत्रज्ञमात्रमिति - जीवसामान्यमित्यर्थः ।

सविद्याद्वारेणेति - न्यायतौल्यात्तेषां पक्षसमत्त्वमिति भावः । उपनिषदन्तरगतगतिसामान्यादेर्ब्रह्मविषयत्वं सिद्धवत्कृत्य तस्य

१.१.५

हेतुतयोपन्यासाच्च सद्विद्यावाक्यस्यैव विषयत्वमित्याह - तदनुग्राहकत्वेनेति । सिद्धान्तानुग्राहकत्वेनेत्यर्थः । नचैवं वेदान्तन्तरा-णामपि पक्षतुल्य इति । पूर्वग्रन्थविरोध इति वाच्यम् तस्योत्तरत्र समाधास्यमानत्वादिति द्रष्टव्यम् । उपादानत्वोचितेति - विकारि-त्वादिति भावः । नन्वचेतनत्वशङ्कायाः प्रतिक्षेप्यत्वेपि ब्रह्मपदादियुक्तवाक्यस्य विषयत्वमस्वित्यत आह - सद्ब्रह्मात्मादीति । सत्त्वस्य ब्रह्मत्वापेक्षया साधारणतया तस्यैव विचारो युक्त इति भावः

। विशेषे तु प्रतिपन्ने हीति - प्रथमत एवाकाशेन्द्रियादि-पदावलम्बने पूर्वपक्षे निरस्ते सदादिसामान्यशब्दावलम्बनपूर्वपक्षो दण्डापूपन्यायपराहतस्स्यात्, अत एतस्यैव पूर्वप्रवृत्तत्वमुचित- मिति भावः । अतस्संशयसद्भावमाहेति - सच्छब्दयुक्तवाक्य एवेति शेषः । केचित्तु संदिग्धे हि न्यायप्रवृत्तिः, अतो न्यायावतारार्थं संशयसद्भावमाहेत्येकग्रन्थतया योजयन्ति - विप्रतिपत्तिरपीति । परोक्तमित्यनेन स्वोक्तस्याप्याक्षेपाद्विरुद्धार्थप्रतिपादकवचनद्वयरूप-विप्रतिपत्तिरुपन्यस्ता भवति, अत्र परोक्तमित्यनेन त्रिगुणात्मकत्वस्य सूचितत्वात् कार्यसालक्षण्यरूपहेतुरनुगृहीतो भवति । स्वो-क्तमित्यनेन चेतनत्वस्य सूचनान्मुख्येक्षितृत्वस्यानुग्रहो भवतीति भावः । पादशेषसाधारणो विचार इति - नन्वयं विचारोऽध्याय-मात्रसाधारण एवेति कथं पादशेषमात्रसाधारणत्वमुच्यत इति चेन्न; सर्वाण्यपि वेदान्तवाक्यानि प्रधानादिप्रतिपादनपराणि ? उत तद्विलक्षणत्वपराणीति तदर्थात् प्रथमपादे चिदचिद्विलक्षणास्तित्वस्य सिद्धत्वेन त्रिपाद्या अन्ययोगव्यवच्छेदार्थत्वेन कतिपयवाक्य-मात्रविषयत्वादिति द्रष्टव्यम् । ब्रह्मपरत्वविरोधीति - साधको नवेत्यर्थः । ततश्चात्मशब्दस्य तेजःप्रभृतिशब्दब्रह्मपरत्वविरोधि-

१.१.५

त्वस्य पूर्वपक्षिणाप्यनभ्युपेतत्वात्कथमियमुक्तिरितिशङ्का परास्ता । एवमुत्तरत्रापि द्रष्टव्यम् । अन्यतरशिरस इति - अनयोर्भध्ये किं वा शिरो युक्तिमत्तया निर्धारणार्हमित्याकाङ्क्षां दर्शयतीत्यर्थः । सुखदुःखमोहान्वयहेतुत्वदर्शनादिति - यथा एकास्त्री रूपयौवनकुल-शीलसम्पन्ना स्वामिन सुखाकरोति, तत्कस्य ह्येतोः ? स्वामिन् प्रति तस्यास्सुखरूपसमुद्भवान् सैव स्त्री सपत्नी प्रति दुःखाकरोति तत्कस्य ह्येतोः ? तां प्रति तस्याः दुःखरूपसमुद्भवात्, एवं तामविन्दत्पुरुषान्तरं सैव मोहयति, तत्कस्य ह्येतोः ? तत्प्रति तस्या

१.१.५

मोहरूपसमुद्भवात्, अतस्सर्वे पदार्थास्सुखदुःखमोहान्वयहेतुत्वात् सुखदुःखमोहरूपाः, अतस्तादृशसत्त्वरजस्तमोमूलका इत्यर्थः । तत एव च कार्यकारणयोरनन्यत्वमिति भाष्ये तत इत्यस्याभिधीयत इत्युक्ताभिधानपरतया व्याख्याय सदेवेति श्रुतिपरतया व्याचष्टे- यद्वा इदमग्रे आसीदिति । अत्रायं प्रयोगो वेदितव्य इत्यस्यानन्तरं प्रयोगस्वरूपप्रतिपादकग्रन्थो लेखकदोषात् पतितः । स तावदित्थम्; इदं जगदेकोपादानविज्ञानविज्ञातम्, कार्यत्वात् सम्पतिपन्नैकमृत्पिण्डारब्धकार्यवदिति । भाष्ये -यस्मिन् शब्द एव प्रमाणं न भवतीति ।

१.१.५

अत्र केचित्, अत्र एवकारो भिन्नक्रमः । शब्दः प्रमाणमेव न भवतीत्यर्थः । साङ्खयमते श्रुतेरनुमानसिद्धानुवादितया श्रुतेरप्रमाणत्वात् अशब्दत्वमस्त्येव । उक्तं च वाचस्पतिना, "प्रधानं जगदुपादानकारणमनुमानसिद्धमनुवदन्त्युपनिषद इति साङ्खयाः' इति । अत एव टीकायां प्रमाणान्तरप्राप्तं शास्त्रं न प्रतिपादयतीति चेदित्यादि चोद्यपरिहारयोरपि नावकाशः,

श्रुतेः प्रमाणत्वाभ्युपगमेपि अशब्द-शब्दात् शब्दभिन्नप्रमाणवचनात् अर्श आद्यचि आनुमानिकमित्यर्थलाभात् । टीकायामप्यानुमानिकादिशब्दवदिति परमतदूषणे वक्ष्यमाणत्वाच्च । शब्द एव प्रमाणं न भवतीत्यवधारणगर्भतया व्याख्यानमतिक्लिष्टम् । तथासति घटपटवति भूतले अघटमिति प्रयो-गोपपत्तेरिति वदन्ति । अन्ये तु एकमात्रकर्तृकत्वरहिते रथगोपुरादौ एककर्तृकं नेति प्रयोगदर्शनात् शब्दमात्रप्रमाणकत्वाभावमादाय अशब्दत्वोक्तयुपपत्तिः । नच तन्मते शब्दस्यानुमानसिद्धानुवादितया शब्दप्रामाणानभ्युपगमात् टीकाकृदाक्षेपपरिहारयोरस्थानविजृ-म्भितत्वमिति युक्तं वक्तुम् अनुवादितयैव पूर्वपक्षः प्रवर्तयितव्य इति निर्बन्धाभावात् । श्रुत्यनुमाने परस्परसहकारिणी प्रतिपादयत इति पूर्वपक्षसम्भवादिति वदन्ति ।

तस्यानुपपन्नताञ्च ज्ञापयितुमिति पूवर्पक्ष्यभिमतं शब्दातिरिक्तप्रमाणकत्वलक्षणशब्दत्वं प्रदर्शयता सूत्रकृता पूर्वपक्षिणो व्या-हतवादित्वमाविष्कृतं भवतीति भावः । वाक्यनिरूपणपरत्वादिति - समन्वयलक्षणस्य सवर्स्यापि वाक्यप्रतिपाद्यत्वविचाररूप-त्वादितिभावः । व्यधिकरणासिद्धीति - हेतोस्स्वरूपासिद्धिव्युदास इत्यर्थः । इक्स्तपाविति - धातुनिर्देशे धात्वनुकरण इत्यर्थः । शित्वाच्छप् । शित्वसामर्थ्याच्च कर्तृवाचिन्यपि सार्वधातुके शबित्याहुः । ईक्षतेरिति हि वक्तव्यमिति - ननु ईक्षतेर्गुरुत्वात् "गुरोश्च हल' इतिअङि ईक्षेत्येव भाव्यम्, ननु स्त्रियां क्तिन्नितिक्तिन्, स्त्र्यधिकारे च "वासरूप'विध्यभावात् सति च क्तिनि ईक्षतेरिति रूपा-

१.१.५

प्रसङ्गः । तितुत्रेतीटो निषेधात् स्कोरिति कलोपे ईष्टेरित्येव रूपं तदा स्यादिति चेन्न, इतिशब्दः प्रकारार्थः । गुरोश्च हल इति अङि ईक्षेति रूपं स्यात् । स्त्रियां क्तिन्नबादिभ्य इति क्तिन्नत्वेन प्रयोगोऽस्तीति चेत्, आप्तिदीप्त्यादिवत् अत्रापि अङपवादः क्तिं स्यात् ? "आङबादयः प्रयोगतोऽनुसर्तव्या' इति वृत्तिकारेणोक्तेः । क्तिनि च इेक्षतेरिति प्रयोगोऽस्तीति चेत् "तितु त्रेष्वगृहादीना'मित्युक्त-त्वान्निगृहीत्यादिवदत्रापीट् स्यात्, अन्यथा ईष्टिरिति स्यात् न कथञ्चिदपीक्षतेरिति स्यादिति । विवक्षितार्थे स्वारस्यं सूचितमिति ईक्षणादित्यर्थस्वरूपानुपादानेन ईक्षतेरिति शब्दरूपोपादानस्य धातुस्वारस्यसूचकत्वादिति भावः । सूत्रविवक्षितमिति - ततश्च सौत्रमीक्षतिपदं षष्ठयन्तम्, श्रवणादिति चाध्याहर्तव्यमिति भाष्यकाराभिप्राय इति न भ्रमितव्यमिति भावः । चेतनमात्रादपीति जीवसामान्यादपीत्यर्थः । तस्य सङ्कल्पप्रतिबन्धेति - अप्रतिबद्धसङ्कल्पत्वमेव सत्यसङ्कल्पत्वमिति भावः । चिदचितोश्शरीरत्वं

१.१.५

कथमिति - इदमुपलक्षणम् । विलक्षणयोः कार्यकारणभावः कथमित्यपि द्रष्टव्यम् । न विलक्षणत्वादित्यस्य तच्छङ्कानिराकरण-प्रवृत्तत्वात् तदभावान्न तद्विवक्षेति भाव इति - नच "तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ' इति कार्यलिङ्गोपन्यासादनुमानविवक्षा प्रतीयत एवेति आनुमानिकमेवेह प्रधानमिह प्रतिपाद्यम्, श्रुत्येकसमधिगम्ये ब्रह्मणि लिङ्गोपन्यासासम्भवादिति वाच्यम्, उपन्यस्त-प्रतिज्ञादृष्टान्तानुसारिहेत्वनुपन्यासात् ब्रह्मण्यपि श्रुत्यनुग्राहकानुमानप्रवृत्त्यविरोधाच्च । श्वेताश्वतरे "कालस्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यम् । संयोग एषां न त्वात्मभावादात्माप्यनीशस्सुखदुःखहेतोः' इति मन्त्रेण कालस्वभावकर्ममहाभूत-प्रकृतिपुरुषातिरिक्तब्रह्मण्येव कार्यलिङ्गानुमानोपन्यासदशर्नाच्च । नचैवं श्रुतेर्निरपेक्षत्वहानिः, श्रुतितात्पर्यनिर्णयाय मीमांसाशास्त्रग्रथि-तन्यायकलापापेक्षावच्छ्रुतिदर्शितस्वानुग्राहकानुमानापेक्षायामपि निर्णीते तात्पर्येऽर्थसम्वादाय प्रमाणान्तरानपेक्षणात्, उपक्रमोपसं-हाराद्यन्तर्गतोपपत्तिरूपतयानुमानस्य तात्पर्यनिर्णयार्थमपेक्षायास्सम्प्रतिपन्नत्वात्, न चासम्भवाशङ्काव्यावृत्त्यर्थो मृत्पिण्डादिदृष्टान्त एव उपन्यसनीयो नानुमानमिति वाच्यम्, नहि "द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' अविनाशित्वादात्मनः' इत्यादौ अनुमानरूपोपत्तेरपि

१.१.६

दर्शनेन तदसङ्ग्रहायोगात् । ननु तर्हि किमर्थं हेतुवन्निगदादिकरणे "शूर्पेण जुहोति तेन ह्यन्नं क्रियते' इत्यत्र हेतुत्वान्वयनिरास इति चेन्न, अन्नकरणस्य हेतुत्वेनान्वये यद्यदन्नकरणं तेन तेन होतव्यमिति व्याप्त्याक्षेपे दर्वीपिठरादीनामपि होमसाधनत्वानुमानादानु-मानिकैः दर्वीपीठरादिभिः प्रत्यक्षश्रुतस्य शूर्पस्य "अन्याय्यो विकल्पस्सयात्' इति तदर्थं हेत्वन्वयनिरासः । नतु हेत्वन्वये तस्य सा-पेक्षत्वेन प्रामाण्यं स्यादिति तद्व्यावृत्त्यर्थम्; अत एव तत्रैवाधिकरणे न्यायसुधायामातिथ्येष्टौ "चतुर्गृहीतान्याज्यानि भवन्ति नह्यन्यत्रानूयाजा इज्यन्ते' इत्यत्र

चतुर्गृहीतान्तरपरिसङ्खयायामनूयाजाभावस्य हेतूकरणात्, यत्र यत्रानूयाजाभावस्तत्र सर्वत्र चतुर्गृही-तान्तराभाव इति सिध्यतीत्युक्तम् । अप्रामाण्यनिरासार्थं हेत्वन्वयनिराकरणमिति - निबन्धनकारनिर्बन्धमात्रम्, अतः प्रधानानु-मापकत्वेन साङ्खयाभिमतहेतोरिहानुपन्यासान्न प्रधानपरत्वमित्यत्र तात्पर्यम् । सर्वविज्ञानं धर्मैक्यादिति - धर्मैक्याद्वा भवेत् अति-रिक्तवस्तुनोऽभावाद्वा भवेदिति वाक्यार्थः । घटपटादिष्विति - अन्यस्माद्व्यतिरेकेणान्वयेन घटपटादिषु धर्मैक्यस्य समानाकारयोगस्य चाभावादित्यन्वयः । अन्यस्माद्व्यतिरेकेणान्वयेनेत्यनेन वस्त्वन्तरासत्त्वलक्षणवस्त्वन्तरव्यतिरेकस्याभाव उपन्यस्तो भवति । व्यतिरेके-णान्वयेन व्यतिरिक्ततया सद्भावेनेति हि तदर्थः ।

अमुख्येक्षणस्यापि चेतनगतत्वात् चेतनत्वसाधनतया यदीक्षणमुक्तमित्यस्यैवोद्भावनार्हत्वाच्च चेतनगतमित्यस्य चेतनत्वसाधक-मित्यर्थ इति व्याचष्टे - चेतनत्वानुगुणमिति । ऐकरूप्याय प्रधानगतपदमपि तथाचष्टे - अचेतनत्वानुगुणमित्यर्थ इति । अग्रय-प्रायन्यायो बाधकाभावे हीति - श्रेष्ठप्रायलेख्ये लिखितस्य श्रेष्ठत्वम् अग्रयप्रायन्यायः । ननु बाधकाभावे ह्यग्रयप्रायन्यायः, अस्ति चात्र बाधकम् ईक्षणश्रुतेरेव बाधकत्वात् सन्निधिलक्षणाग्रयप्रायन्यायस्येक्षणश्रुतिविरोधे दुर्बलत्वात् "विशये प्रायदर्शना'दितिन्यायेन सन्देह एव प्रायपाठन्यायावतारात्, प्रकृते चेक्षणश्रुतिसत्त्वेन सन्देहाभावादिति चेन्न; सत्त्वादिमयस्य तादृाकारणारब्धत्वं वक्तव्यमित्यनुमा-नविरोधेनेक्षणश्रुतेर्निष्परिपन्थित्वाभावेन प्रकृते संशयस्यैवावतारे प्रायपाठेन निर्णयसम्भवादिति तात्पर्यात् । अनेनैव न्यायेनेति - अग्रयप्रायन्यायेनेत्यर्थः ।"हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' "इमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्' "यथा तु खलु सोम्येमास्तिस्रो देवताः' इति तेजोबन्नेषु गौणदेवताशब्दानां

१.१.६

बहूनां सत्त्वात् प्रायत्वमुपपद्यत इति द्रष्टव्यम्; अतो यदत्र तूलिकायां "यद्यप्यचेतनविषय एक एव देवताशब्दः श्रूयते तथापि बहु-वचनान्ततया कृतैकशेषत्वाच्छब्दत्रयमस्तीति प्रायत्वमिति भावः' इत्युक्तम्, तस्य न सम्यक्तवमिति ध्येयम् ।

(सू) गौणश्चेन्नात्मशब्दात् आत्मशब्दोपीति "ऐतदात्म्यमिदं सर्वम् स आत्मा' इत्यात्मशब्दाभिप्रायेण मृदात्मको घटः घटस्य मृदात्मेति द्वयमपि निर्दि-ष्टमिति द्रष्टव्यम् । स्वरूपैक्यं सम्भवतीत्यर्थ इति - सिद्धान्ते तु शरीरप्रतिबनधित्वलक्षणमात्मत्वं सम्भव-तीति भावः । अपिशब्दं समुच्चयपरतया व्याख्याय विरोधपरतयापि व्याचष्टे - अतदात्मकत्वेन त्वदभिमतानामपीति वेति । भाष्ये-मुख्य एवेक्षणव्यपदेश इति । ननु तेजोबन्नेषु सृष्टेषु "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति सङ्कल्पपूर्वकपर-

१.१.७

मात्मानुप्रवेशः कथं तत्पूर्वकालीनतेजोजलकर्तृकेक्षणमुख्यत्वं साधयेदिति चेन्न । नोदाहरणमादर्तव्यमिति न्यायेन परमात्मन आत्म-त्वप्रतिपादकानां प्रमाणानां सत्त्वाच्छरीरवाचिशब्दानां शरीरिपर्यन्तत्वस्य चाकृत्यधिकरणसिद्धत्वादित्यर्थः । इति सूत्राभिप्राय इतीति - सूत्रे अनेकाभिप्रायत्वस्यालङ्कारत्वादिति भावः । मुख्यामुख्यार्थानुग्राहकेष्विति - यद्यपि मुख्यार्थानुग्राहकप्रायपाठस्य सन्निधिरू-पस्य मुख्यानुग्राहकात्मश्रुत्यपेक्षया दुर्बलत्वान्न प्रायपाठानुसारेण ईक्षणस्य गौणत्वमित्येव भाष्ये प्रतीयते, नतु मुख्यार्थानुग्राहकत्वेनै-वानुरोद्धव्यत्वम्, तथापि तस्यापि न्यायस्य व्युत्पादनं सम्भवतीत्यत्र तात्पर्यम् ।।

अवान्तरसाध्यविषयत्वशङ्कामिति - गौणत्वाभावरूपावान्तरसाध्यविषयत्वशङ्कामित्यर्थः । कारणत्वौपयिकेक्षणधर्मनिरू-पणेनेति - ननु प्रधानस्यैव जगत्कारणत्वमितिवदन्तं प्रतीक्षणाभावात् मुमुक्षुध्येयत्वाभावान्न जगत्कारणत्वमित्युक्ते न समीचीन- मुत्तरं स्यात् परेण

ईक्षणमुमुक्षुध्येयत्वयोर्जगत्कारणत्वव्यापकत्वानभ्युपगमेन तद्व्यतिरेकेण कारणत्वव्यतिरेकसाधनासम्भवात्, ततश्च न प्रधानं सद्विद्याप्रत्तिपाद्यम् उपक्रमगतेक्षणस्य तत्रासम्भवादुपसंहारश्रुतानामपि तत्रासमवायान्न वाक्यसन्दर्भप्रतिपाद्यत्वमित्ये-वोपन्यसनीयमिति चेन्न; अस्यापि ग्रन्थस्य तत्रैव तात्पर्यात् । ततन्निष्ठस्य मोक्षोपदेशात् अनुसन्धानार्थत्वं कथमवगतमिति - ततश्च सदात्मकत्वानुसन्धानमुपदिश्येत्युक्तमितिभावः । ननु तत्त्वमसीति सदात्मकत्वानुसन्धानमुपदिश्येति भाष्यस्यायमर्थः,

१.१.७

तत्त्वमसीतिप्रतिपन्नस्य सदात्मकत्वस्यानुसन्धानमाचार्यवान् पुरुषो वेदेत्युपदिश्येत्यर्थ इति वक्तव्यम्, अन्यथा तत्त्वमसीत्यनेन सदात्मकत्वोपदेशेपि सदात्मकत्वानुसन्धानोपदेशासम्भवात्, ततश्चैवमर्थे कथिते अनयोश्श-ङ्कापरिहारयोरनुत्थितिरितिचेत्

सत्यम्; वेदशब्दप्रतिपन्नस्यानुसन्धानस्योपासनारूपत्वसमर्थनार्थतया साफल्यसम्भवात् । उपक्रमोपसंहाराभ्यां सफलार्थवादैरुपासनतात्पर्यं वाक्यसन्दभर्स्य प्रतिपादयति - उच्यत इत्यादिना विजज्ञाविंतिपदमावतिर्तमिति अनेनाभ्यासरूपमुपासनतात्पर्यलिङ्गमुपपादितं भवति । नच द्विरुक्तेरध्यायपरिसमाप्तिद्योतनार्थत्वान्न तस्य द्विरुक्तेरभ्यासतया तात्पर्यलिङ्गत्वमितिवाच्यम्; अध्यायपरिसमाप्तिद्योत-कत्वेपि अभ्यासरूपत्वानपायात् । ननु त्रिवृदेकैका भवति, तन्मे विजानीहि स्वप्नान्तमेव सोम्य विजानीह भूय एव मा भगवान् विज्ञापयत्विति तद्धास्य विजज्ञाविंतिप्रकरणगतानां विज्ञानशब्दानां शाब्दज्ञानपर त्वमेव, नोपासनपरत्वम् नहि तद्धास्य विजज्ञा-वित्यस्योपासाञ्चक्र इत्यर्थः । येनेदं युक्तं स्यादित्यस्वरसादाह - मध्येऽपि आचा- र्यवान् पुरुषो वेदेति । अनुसन्धेयत्वे लिङ्गमिति - आचार्यवत्ताफलत्वेनोपासनस्य स्तुतिरुपासनतात्पर्ये लिङ्गमित्यर्थः । ननु "यदा स वाङ्मनसि सम्पद्यते' इत्यस्य वस्तुतो देहोत्क्रमण-विषयत्वेपि तत्र देहस्यानुपात्तत्वादित्यस्वरसादाह - अन्यत्र च अस्माच्छरी-रात्समुत्थायेति । शरीरमित्यवगम्यत इति - शरीरा-रम्भकं प्रारब्धकर्मेत्यर्थः । "भोगेन त्वितरे क्षबयित्वा' इति सूत्रभाष्ये "तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इति भोगेन तयोः

१.१.८

कर्मणोर्विमोक्ष इति वक्ष्यमाणत्वात् । वसिष्ठावान्तरतपःप्रभृतीनां विद्यायोनिदेहपातानन्तरमपि ब्रह्मसम्पत्त्यभावाच्चेत्यपि द्रष्टव्यम् । विमोक्ष्ये सम्पत्स्ये इत्यत्र पुरुषव्यत्ययश्छान्दसः । विमोक्ष्यते सम्पत्स्यते इत्यर्थः । अचेतनसम्पत्तिरित्यत्र सम्पत्तिशब्दस्य तत्स्वरू-पतासम्पत्तिपरत्वशङ्कां व्यावर्तयितुं व्याचष्टे - अचित्प्राप्तिरिति । सम्पत्तिशब्दस्य प्राप्तिपरत्वनिश्चायकं किमित्यत आह - सम्पत्ति-शब्दस्येति । तापत्रयाभिहतिहेतुत्वप्रतिपादनात् अचित्प्राप्तेरेव तापत्रयाभिहतिहेतुत्वाच्च सम्पत्तिशब्दस्य प्राप्तिवाचित्वं निश्चीयत इत्यर्थः । प्रतिसूत्रं वा सर्वान्ते वा समुच्चयपरशब्दे कायर्मध्ये च शब्दप्रयोगः किं निबन्धन इति शङ्कां परिहरति - एवं तदैक्षतेत्यादिना । उपरिगतवाक्यगतहेतुसमुच्चयार्थो मध्ये मध्ये चशब्दप्रयोग इत्यर्थः । एवं विभज्य समुच्चयप्रतिपादने प्रयोजनमान्द्यात् अन्यथा चशब्द-प्रयोजनमाह - यद्वा उपादेयतोक्तयेत्यादिना ।

चिदंशस्याकार्यतया च ज्ञानसम्भवादित्यत्राहेति - प्रधाने ज्ञाते तदकार्यत्वेन चिदं-शस्य ज्ञानं सम्भवति, प्रधानापरिज्ञाने तदकार्यत्वेन चिदंशस्य ज्ञानासम्भवात्, प्रधानज्ञानस्य तदकार्यत्वप्रकारकचिद्विशेष्यकज्ञानहेतुतया तज्ज्ञाने तदकार्यत्वेन

१.१.१०

चिज्ज्ञानमप्युपपद्यत इति भावः । "स्वप्नान्तं मे सोम्य विजानीहि' इति । स्वप्नान्तस्सुषुप्तिः मे उपदिशतो मम वचनात् जानीहीत्यर्थः। अर्थान्तरत्वशङ्कामिति - सता सोम्येत्यत्र सच्छब्दस्य

ब्रह्मणोऽर्थान्तरभूतजीवपरत्वशङ्कामित्यर्थः । धातुस्वभावभेदादित्यभिप्राय इति - सता सम्पन्न इति कर्मणिनिष्ठान्तप्रयोगवत् सता अपीत इति न वक्तुं शक्यत इत्यादिधातुस्वभावायत्तमिति भावः ।

१.१.१०

ननु स्वसच्छब्दयोरेकार्थपर्यव- सायित्वे अन्यतरवैयर्थ्यमित्याशङ्कयाह - जीवेनात्मनेति । यथा अनेन जीवेनात्मनेत्यत्रात्मशब्देन स्वरूपेणोपस्थितस्य परमात्मनो जीवशरीरकत्वप्रतिपत्त्यर्थत्वाज्जीवशब्दस्य नान्यतरवैफल्यम्; एवं सच्छब्देन स्वेन रूपेणोपस्थितस्य परमात्मनो जीवशरीरत्वज्ञापकत्वात् स्वशब्दस्य पदद्वयसाफल्यमिति भावः । स्वेन रूपेणेति - परमात्मरूपेणेत्यर्थः । कार्यकारण-योरनन्यत्वादित्यादिना । नापि निष्कृष्टब्रह्मपर इति - स्वशब्द इतिशेषः । स्वरूपेण धारणस्य महाप्रलयेति तुल्यत्वादिति

१.१.१०

स्वरूपमात्रबलेनधारकत्वे उच्यमाने महाप्रलयेपि शरीरधारकत्वप्रसङ्ग इत्यर्थः । देहस्य जीवं प्रति अपृथक्सिद्धिः देहलक्षणञ्च न घटत इति । ननु जीवस्य देहे सत्त्वेनापृथक्सिद्धौ काऽनुपपत्तिरितिचेन्न; जीवस्वरूपापृथक्सिद्धिर्नापृथक्सिद्धिः, तथा सति सौभरिशरीरेषु सर्वेषु जीवस्वरूपापृथक्सिद्धयसम्भवात् शरीरत्वानापत्तेः, अपि तु धर्मभूतज्ञानव्याप्तत्वम्, अत एव "यदेकां शाखां जीवो जहाति अथ सा शुष्यति' इति यत्प्रदेशे धर्मभूतज्ञानव्याप्त्यभावः, तदम्शस्य शोषप्रतिपादनात् जीवधर्मभूतज्ञानापृथक्सिद्धिरित्यर्थः । जीवस्य देहा-परित्यागादिति - ज्ञानव्याप्तेस्सत्त्वादित्यर्थः । बहिर्निर्गमने इन्द्रियादिसापेक्षतया बहिर्निर्गमनाभावेपि देहधारणोपयुक्तज्ञानप्राप्ति-मात्रसत्त्वादितिभावः । धारणयोग्यत्वाच्चेति - धार्यमाणत्वादित्यर्थः । ननु कारणावस्थान्वयिन्यन्तर्भावो लयश्चेत् यावतो लयस्थानत्वं न तावत उपादानत्वम्, यदंशस्योपादानत्वं न तस्य लयाधारत्वम् तदंश एव तस्यान्तर्भावासम्भवादित्याशङ्कयाविरोधमाह - एकस्य परमात्मन इत्यादिना । व्याख्यानान्तरव्यावृत्त्यर्थमिति स्वभाष्यस्य महर्षिप्रणीतव्याख्यानानुरोधित्वलक्षणवैलक्षण्यसूचनार्थं

१.१.१०

मध्ये मध्ये वृत्तिकारं कीर्तयतीत्यर्थः । असम्पत्तिशब्दस्य निर्ग-मनपरत्वमस्वरसमित्यन्यथा व्याचष्टे - यद्वा परमात्मनीति । वृत्ति-कारस्य भाव इति - ततश्च स्वाप्ययादितिसूत्रस्य सोप्यर्थ इति वृत्तिग्रन्थसम्वादेन सूचनं तदुदाहरणस्यानन्यथासिद्धं फलमिति

१.१.१२

भावः ।। ननु भाष्ये-"आत्मा वा इदमेक एवाग्र आसीत्' इति श्रुत्य-न्तरैकार्थ्यात् चेतनकारणत्वं वक्तव्यमित्युपसंहारे कर्तव्ये सर्वेश्वर एव कारणमिति विशिष्योपसंहारः कथमचेतनव्यावृत्तिमात्रस्यैव प्रकृतेपेक्षितत्वादित्याशङ्कयाह - पूर्वसूत्रे प्राज्ञेनेत्यादि । भाष्ये-

१.१.१२

निश्वसितमेतद्यदृगवेद इति । ऋग्वेदादिनिखिलप्रपञ्चोनिश्वासवदनायासे उत्पन्न इत्यर्थः ।।

नन्वेतत्सूत्रविषयवाक्यत्वेनेति - अत्र केचित्, पूर्वसूत्रे चेतनत्वावगमकगतिसामान्यं विवक्षितम् । इह तु बहूनां परमात्मासा-धारणानां श्रवणमुच्यत इति विशेषः । अयमेव विशेषः पूर्वसूत्रोदाहृत श्रुतिभ्यः अत्रोदाहृत श्रुतीनाम्, इतरथा एतदुपनिषद्गतानां गतिसामान्यादित्यनेनापरिग्रहे हेत्वभावादिति वदन्ति ननु श्रुत्यन्तरोदाहरणे प्रथमोक्तनामरूपव्याकरणप्रतिपादकश्रुत्यन्तरे प्रथोदा-हर्तव्ये "न तस्य कश्चित्पतिः' इति गुणान्तरवाक्यस्य कथं पूर्वमुपादानमित्याशङ्कयाह - नात्र क्रमविवक्षेति ।। ब्रह्माज्ञानवादिनोऽन-नुगु-णत्वं पूर्वमुक्तमिति - जन्मादिसूत्रे एवमुत्तरेषामपि सूत्राणामित्येदिनोक्तमित्यर्थः । प्रामाणिकस्याप्रामाणिकत्वाभिमानादिति - प्रामाणिकस्याप्यपसिद्धान्तता

दृष्टा, अप्रामाणिकत्वा-भिमानादित्यन्वयः । अपसिद्धान्तता-असिद्धान्तत्वमित्यर्थः । यथा ब्रह्मोपादानत्वस्य शास्त्रान्तरसिद्धत्वाभाव इति भावः । सूत्रकार-श्रुत्योर्निर्देश इति - श्रुतिनिर्देशात्सविशेषत्वं

१.१.१२

प्रामाणिकं सूत्रकृतोक्तत्वादसिद्धान्तत्वशङ्कापि नास्तीत्यर्थः । अपिशब्दाभिप्राय इति - ज्ञातृत्वसमुच्चयार्थोपिशब्द इति भावः । अत एव "निर्विशेषचिन्मात्र' इत्यादिभाष्यस्यायमर्थः, जिज्ञास्यब्रह्मणः पारमार्थिकेक्षणगुणयोगित्वस्थापनात् निर्विशेषब्रह्मवादस्सूत्रकृता निरस्तः । न च जिज्ञास्यब्रह्मणो गुणयोगेपि परस्य ब्रह्मणो न तथात्वमिति वाच्यम्; वेदान्तवेद्यब्रह्मण एव जिज्ञास्यत्वं प्रतिज्ञाय तस्य चेतनत्वलक्षणेक्षितृत्वं प्रतिपाद्य तद्वारा प्रधानव्यावृत्तिप्रतिपादनात् । नच चिद्रूपलक्षणचेतनत्वलक्षणमीक्षितृत्वं प्रधानव्यावर्तकतयोच्यत इति वाच्यम्, चेतनशब्दस्यातदर्थत्वात् ततश्च चेतनत्वलक्षणेक्षितृत्वसिद्धौ प्रधानव्यावृत्तिरेव न सिध्येदिति व्यावर्तकसिद्धौ व्यावृत्त्यसिद्धेरिति । वेदान्तवेद्यमिति भाष्यस्य पूर्ववाक्योक्ताक्षेपपरिहारपरत्वं स्वरसमिति व्याचष्टे - यद्वा स्वरूपमेव साक्षित्वमिति । द्रव्यत्वाभ्युपगमात् द्रव्यभिन्नगुणवचनत्वं नेत्यत आह - गुणशब्दो धर्म पर इति । तत्क्षमत्वमभ्युपगम्येति - तदुपायरूपत्वाभावेपि

१.१.१२

तत्क्षमत्वसम्भावनामभ्युपगम्येत्यर्थः । ननु "यत्तु कालान्तरेणापि नान्यसञ्ज्ञामुपैति वै । परिणामादिसम्भूतं तद्वस्तु नृप तच्च किम् ' इति वस्तुत्वस्य परमात्ममात्रनिष्ठस्य न प्रमाणविषयत्वप्रयोज्यत्वं प्रमाणविषयेष्वप्यचिद्वस्तुषु तादृशवस्तुत्वाभावादित्याशङ्कयाह - वस्तुत्वं चिद-चित्साधारणमिति ।।

परैस्त्वित्यादि - जीवं निर्दिश्य सच्छब्दवाच्यस्येति । अनेन जीवेनात्मनानुप्रविश्येति वाक्य इति शेषः । अनेन जीवेनात्मना मम स्वरूपेणानेन जीवेनेति सच्छब्दितायाः देवताया वाक्यमिदमितिभावः । ननु गौणश्चेन्न जीवशब्दादित्युक्तेपि न स्वारस्यम् जीव-स्यात्मत्वव्यपदेशादित्यस्यार्थस्यासिद्धेरित्यस्वरसादाह - स्वरूपपर आत्मशब्दस्सापेक्ष इति । अत एव यद्योन्यां गायति तदुत्तरयो-र्गायतीत्यत्रोत्तरशब्दस्य ग्रन्थविशेषसञ्ज्ञारूपेण रूढत्वात्तस्यैव ग्रहणम्, नतु योन्युत्तरयोः । सम्बन्धिशब्दत्वेन सापेक्षत्वे

विलम्बितप्रतीतिकत्वादित्युक्तम् । "नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्रतीयते ' इत्यत्र नावमिकाधिकरणे । ममात्मा भद्रसेन इतिवत् "अनेन जीवेनात्मने'ति आत्मशब्दो गौण इत्याशङ्कय तन्निराकरणार्थं"तन्निष्ठस्य मोक्षोपदेशात्' इति सूत्रमिति परैर्व्याख्यातम्;

१.१.१२

तद्दूषयति - चिदचिदात्मकेति । परमसाध्यस्यहेतुवाचीति युक्तमिति - अत एवास्वारस्यात् शङ्करभाष्येपि "अथवा पूर्वसूत्र एवे'- त्यादिना परमसाध्य एव हेतुतया तृतीयसूत्रं योजितमिति द्रष्टव्यम् । यथा सोम्य मधु मधुकृत इत्यादि - मधुकृतो मक्षिकाः । मधु

निस्तिष्ठन्ति निष्पादयन्ति नानात्ययानाम्-नानादिक्कानां वृक्षाणां रसान् समवहारम्-समावृत्य । एकताम्-एकभावं, मधुत्वेन रसं गमयन्ति मधुत्वमापादयन्ति, ते रसाः मधुत्वेनैकीभूताः तत्र-मधुनि, विवेकं न लभन्ते-अयमस्य वकुलस्य रसः, न चूतस्य रसः,

१.१.१३

एवं सतैकीभूता अपि प्रजा विवेकं न लभन्त इत्यर्थः ।। इति ईक्षत्यधिकरणम् ।।

प्रत्यगात्मन्यवतरन्ती बुद्धिरिति - कारणत्वबुद्धिरित्यर्थः । ननु नास्मिन्नधिकरणे जगत्कारणं जीव इति पूर्वपक्षीकृत्य तदतिरिक्तं ब्रह्मेति सिद्धान्त्यते अपि त्वानन्दमयो जीवः परमात्मा वा ? इति विचार्यानन्दमयो जीव इति पूर्वपक्षं

कृत्वा ब्रह्मेति सिद्धान्त्यते, इतरथा जगत्कारणं जीव इति पूर्वपक्षे जीवासम्भावितधर्मप्रतिपादकसकलश्रुत्युपन्यासस्यैव युक्ततया आनन्दवल्लीमात्रार्थनिर्णाय-कन्यायग्रथनस्यायुक्तत्वप्रसङ्गात् "श्रुतत्वाच्च' इति पूर्वाधिकरणगुणसूत्रोदाहृतश्रुतिप्रतिपादितजीवासम्भावितधर्मैरेव जीवातिरिक्त-ब्रह्मसिद्धेश्च "अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्' "अधिकं तु भेदनिर्देशात्' इत्यादिभिः कृतकरत्वाच्च अतः आनन्दवल्ली-प्रतिपाद्यानन्दमयः किं जीवः, उत परं ब्रह्म ? इत्येव चिन्तनीयम् नच कारणविषयत्वाभावे समन्वयाध्यायासङ्गतिस्स्यादिति वाच्यम् त्रिपादीविचारवदुपपत्तेः । नच तत्रापि कारणत्वचिन्तात्मकत्वमेवेति वाच्यम् तत्तद्गुणाकरत्वं ब्रह्मणः प्रतिपाद्यत इति भाष्योक्तेः । "अधिकरणगुणैस्तद्गुणानुद्गृणाति' इत्यधिकरणसारावल्युक्तेश्च । नतु सामान्यतो जगत्कारणं जीवो वा ब्रह्म वेति चिन्तनीयमिति चेत् सत्यम्, तथैव चिन्त्यते; किन्त्वानन्दमयस्य जीवत्वे जीवातिरिक्तब्रह्मकारणत्ववादे किञ्चिच्छ्रद्धावैकल्यं जायेतापीत्येतदभिप्रेत्या-योगव्यवच्छेदोक्तयुपपत्तेः । अत एव ज्योतिरधिकरणे निरूपितमित्याशङ्कय संशयहेत्वभावादिति परिहृत्य पुनस्तर्हि चिदद्विलक्षण-कारणास्तित्वविषयस्य प्रथमपादस्यानारम्भस्यादिति परिचोद्य बहूनां वेदान्तवाक्यानां प्रकृतिपुरुषकारणमात्रपरत्वे पुरुषसूक्तेपि संशयप्रसङ्गान्न वैयर्थ्यमस्तीति परिहरिष्यति । अन्ये तु अन्ययोग्यवच्छेददार्थायां त्रिपाद्याम् आनुमानिकमप्येकेषामिति चेत्, इत्य-पिशब्देन प्रधानमपि जगत्कारणं भवत्विति प्रदर्शयता सूत्रकृता पूर्वत्रप्रधानाधिकमेव जगत्कारणं ब्रह्मेति प्रथमपादपूर्वपक्ष्याशय उन्नीयते अत एव कल्पतरुग्रन्थे आनुमानिकाधिकरणे पूर्वत्र हि प्रधानाद्येव सर्ववेदान्तार्थ इति प्रत्यवस्थितं निषेधेन इह तु तदभ्यु- पेत्य प्रधानाद्यपि कारणमिति प्रत्यवस्थीयते सूत्रकारोप्यपिशब्दं प्रयुञ्जानो ब्रह्माभ्युपगमेन क्वाचित्कोयं विचार इति सूत्रयामासेत्यु-क्तमिति वदन्ति ।

कारणवाक्यविचारपरे अस्मिन्नधिकरणे "तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः' इत्यारभ्य श्रूयत इति वक्तव्ये भाष्यकृता किमिति "स वा एष' इत्यादिकमुदाहृतमित्याशङ्कयाह - कारणविषयस्येति । आत्मशब्दव्याख्यानोपक्रमभूतमिति - ततश्चात्म-

१.१.१३

शब्दव्याख्यानानां मध्ये स वा एष इत्यस्योपक्रमभूतत्वात् विषयभूतकारणवाक्योपक्रमत्वाभावेपि प्रकृतेत्युक्तिरुपपन्नेति भावः । चेत-नत्वादावभ्युपगम इति - सर्वज्ञशब्दप्रतिपन्नश्चेतनत्वेऽभ्युपगमः सर्वेश्वरशब्दप्रतिपन्नजीवातिरेकेनाभ्युपगम इत्यर्थः । ततश्च जीवाति-रिक्तत्वादेः प्रागनुक्तत्वात्, अनुक्तांशे कथं सत्यशब्दप्रयोग इति न चोदनीयम्, इदमुपलक्षणम् उक्तांशेऽङ्गीकारः । उक्तस्य वास्तवत्वांशे त्वनङ्गीकारः, सत्यमुक्तमिति ग्रन्थस्वारस्यादित्यपि द्रष्टव्यम् । अस्वारस्यसूचक इति - क्रियासङ्गतैवकारस्यात्यन्तायोगव्यवच्छे-दार्थपरत्वादिति भावः । ननु साङ्खयमते जीवस्य प्रत्ययार्थीभूत कर्तृत्वाभावात् ईक्षितःत्वं अनुपपन्नं इत्याशङ्कय प्रत्ययार्थानुपपत्तावपि पृकृत्यर्थोपपत्तिरितिभिप्रयन्नाह - साक्षित्वमेवेति । नन्वस्मिन्नधिकरणे जीवब्रह्माभेदः पूर्वपक्ष्यभिमतः । तद्भेदस्तु सिद्धान्त्यभिमत इति भाष्यकृता

जीवब्रह्माभेदद्वेषानुबन्धवशात्परं व्याख्यायते न त्वेवं सूत्रकृदभिप्रायः, तादृशाभिप्रायज्ञापकाभावादित्यत आह - भेदव्यप-देशाच्चेतीति । जीवव्यतिरेकासिद्धेरिति जीवभिन्नत्वासिद्धेरित्यर्तः । नैकरूपज्ञानस्येति - ज्ञानसङ्कोचयोविकासरूपावस्थायोगि-

१.१.१३

त्वादिति भावः । प्राप्यत्वानुगुणेति - अचिद्वियुक्तस्वरूपस्य प्राप्यत्वे आनन्दमयतया पुरुषार्थत्वमित्यभिप्रायः । ज्ञायतेऽनेनेति व्युत्पत्त्येति - मनोबुद्धयहङ्कारभेदेन अन्तः करणत्रैविध्यस्य साङ्खयाभिमतत्वात्, साङ्खयमते बुद्धिशब्दस्यान्तः करणपरत्वेन तत्र विज्ञानशब्दस्य भावव्युत्पत्तिसम्भवादिति भावः । विकारपरत्वाभावाच्चेति - ननु

पूर्वपक्षिणा विकारपरत्वप्रत्याख्यानं "विकार-शब्दान्नेति चेन्न प्राचुर्यात्' इति सूत्रविरुद्धम् । तस्मिन् सूत्रे विकारार्थत्वस्यैव पूर्वपक्षहेतुतयोपन्यासात्, मयट्प्रत्ययस्वार्थिकत्व-विकारार्थत्वयोः पूर्वपक्षसाधकत्वस्य तदर्थचिन्ताग्रन्थं एव प्रदर्शितत्वेन स्वोक्तिविरोधाच्चेति चेत् अत्राहुः,-अस्मिन्नधिकरणे पूर्वपक्षो द्विविधः, साङ्खयपक्षावलम्बी पुच्छब्रह्मावलम्बी च तत्रानन्दमय इत्यत्र मयट्प्रत्ययस्स्वार्थिकः, सच प्राप्यमुक्तस्वरूपपरः, नतु

१.१.१३

विकारार्थो नवा प्राचुर्यार्थः,प्राप्यस्वरूपस्य निर्विकारत्वात्, अतो द्वितीयपूर्वपक्षवादिनः सिद्धान्तिनो वा नावकाश इति प्रथमः । मयट्प्रत्ययो विकारार्थः, नतु स्वार्थिकः प्राचुर्यार्थो वा ततश्च विकारवाचिमयट्प्रत्ययानुरोधेन सुखाकारवृत्तिप्रतिबिम्बिततया तदुपहिततया वा आनन्दविकारत्वेन वा आनन्दमयो जीव एवेत्यपरः । तत्र प्रथमे विकारशब्दान्नेतिचेदित्याक्षेपस्तटस्थकर्तृकः । द्वितीये तु पूर्वपक्षिकर्तृक इति विवेकः, एवञ्च विकारपरत्वाभावाच्चेतिग्रन्थः प्रथमपक्षाभिप्रायेणेति द्रष्टव्यम् । केचित्तु विकारपरत्वाभावाच्चेति विज्ञानमयशब्दस्येत्यर्थः । विकारपरत्वाभावादित्युपलक्षणम् प्राचुर्यार्थकत्वाभावादित्यपि द्रष्टव्यम् विकारप्राचुर्यान्यरार्थत्वे हि विज्ञानमयशब्दस्य जीवपरत्वाशङ्का स्यादिति वदन्ति ।

प्रतिष्ठातद्वद्भावेनेति - प्रतिष्ठारूपस्य ब्रह्मणस्तद्वदानन्दमयेन ऐक्यासम्भवादिति भावः । पुरुषविध इति - "तस्य पुरुषविधताम् अन्वयं पुरुषविधः' इति श्रुतिवाक्ये तस्य विज्ञानमयस्य पुरुषविधत्वमनुकृत्य अयमानन्दमयः पुरुषविधः, तदनुकारी पुरुष इत्यर्थः । व्यतिरेकनिर्देशस्वारस्यं सिध्यतीति - आत्मशब्दस्य मध्यभागपरत्वानादरेण स्वरूपपरत्वाङ्गीकारे घटस्य स्वरूपमि त्यादिव-दस्वारस्यं स्यादिति भावः । का नः क्षतिरित्यभिप्रायेण प्रतिवक्ति - ततः किमिति । पुच्छब्रह्मत्वस्योभयाभ्युपेतत्वे शान्तो विवाद इत्यभिप्रायेण पृच्छति - किन्तर्हीति । त्वया पुच्छस्यैव ब्रह्मत्वं नानन्दमयस्योच्यते, अस्माभिस्तु उभयोरप्यैक्याद्ब्रह्मत्व-

१.१.१३

मुच्यत इति विवेक इति भावः । अर्थात्परिहरन्निति - ब्रह्मशब्दस्यानन्दमयविषयत्वमसिद्धमिति परिहरन्निति भावः । सद्भावेप्या-शङ्कावाद इति - नहि घटं प्रमेयं वेद चेदित्याशङ्कावादो युज्यत इति भावः । किमत्र क्रियत इतीति - रूपणस्यापि इतरव्यावृत्त-स्वरूपप्रतिपत्त्यर्थत्वादित्याशयः । प्रधानप्रतिपाद्यत्वाभावादिति - ननु सर्वपर्यायसाधारण्यं न प्राधान्यविरोधि, अन्तर्यामिब्राह्मणे

१.१.१३

"यः पृथिव्यां तिष्ठन्' इत्यादौ सर्वपर्यायसाधारण्येपि सर्वत्र यच्छब्दनिर्दिष्टस्यैव प्राधान्यं प्रतीयते, तद्वदिहापि पञ्चस्वापि पर्यायेषु "तस्यैष एव शारीर आत्मे'ति आत्मशब्दनिर्दिष्टस्यैव प्राधान्यम्, ततश्च पुच्छब्रह्मण एवात्मशब्दनिर्दिष्टत्वात् तस्यैव "सोऽकाम-यते'तिपुल्लिङ्गतच्छब्देन परामर्शस्सम्भवतीति चेदुच्यते; "तस्यैष एव शारीर आत्मे'त्यत्र एष इति पुल्लिङ्गस्यानन्दमय एव स्वर-सत्वात्तद्वाक्येपि न ब्रह्मणः परामशर् इति भावः । प्रधानपरामर्शित्वस्वारस्यच्चेति - "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षे'त्यत्र आनीयमानेनापि दध्ना व्याप्यमानस्यापि पयसः प्राधान्यात् तस्यैव तच्छब्देन परामर्शो युक्तः, न त्वप्रधानस्य सन्निहितस्यापि दध्नः, अतः पय एव घनीभूतमामिक्षेति पूर्वतन्त्रे चतुर्थाष्टमयोव्यर्वस्थापितत्वादिति भावः । विज्ञानं ब्रह्मेति व्यजानादिति - भृगुवल्लयामिति भावः । स्थानप्रमाणेनानन्दमयमात्मानमितयत्रेति - ननु भृगुवल्लयाम्नातानन्दस्थानसाम्यादपि अन्नमयादिषु पञ्चस्वपि मयट्प्रत्य-यसारूप्येणानन्दमयस्थानसाम्यस्यैव प्रबलतया ततोपि भृगुवल्लयाम्नातानन्दमयस्य ब्रह्मत्वसिद्धिरि चेत् मैवम्;

आनन्दवल्लयाम्नाता-नन्दमयस्याद्याप्यब्रह्मत्वानिश्चयात् अनिश्चितस्थानसाम्यस्याप्रयोजकतया निश्चितब्रह्मभावानन्दस्थानसाम्यस्यैवार्थनिर्णायकत्वात् "एतमानन्दमयमात्मान'मिति प्रकृतानन्दपरामर्शकैतच्छब्दश्रुतिबलादपीति भावः । उक्तं हि या तु भार्गवीति - शाङ्करभाष्य इति शेषः।

१.१.१३

निर्हरणादिरूपमिति - आदिपदेन परमात्मपक्षेत्रसाद्यत्वं विवक्षितम् । ननु परमात्मपक्षे कथं शोध्यत्वम् ? प्रागशुद्धिमतो हि शुद्धि-राधेया । नच नित्यशुद्धस्य ब्रह्मणः प्रागशुद्धिरस्तीति चेत् नात्र शुध्द्यशुद्धिशब्दाभ्यां कोपप्रसादौ विवक्षितौ ब्रह्मणः कोपरूपाशुद्धि-सद्भावेपि अपहतपाप्मत्वलक्षणनित्यशुद्धत्वस्याविरोधात् इतरथा गङ्गाजलं कतकैश्शोध्यतामित्युक्तिरपि नोपपद्येत नित्यशुद्धस्य गङ्गाजलस्य प्रागशुध्यभावात् यदि च नित्यशुद्धस्यापि गङ्गाजलस्य कर्दमसम्बन्धादिकृतकालुष्यरूपाशुद्धिरभ्युपेयते तर्हि प्रकृतेपि दीयतां दृष्टिः । ब्रह्मविषयस्येति - अन्नमयादिपर्यायेषु प्रधानानां तत्तत्पर्यायगतश्लोकविषयत्वदर्शनेन स्वपर्यायगतश्लोकाविषयस्य तस्य प्राधान्यादिति भावः । प्रकरणस्य स्वस्मादनतिरिक्तैरिति - न च मनोमयशिरः पक्षपुच्छानामृक्सामयजुरथर्वाङ्गिरसां मनोमया-दतिरिक्तत्वदर्शनेन प्रकरणस्य स्वस्मादनतिरिक्तैः स्वावयवैरेव शिरःपक्षादिरूपणपरत्वमसिद्धमिति वाच्यम्; तत्र ऋक्सामादि-

१.१.१३

शब्दानां तत्तद्विषयकमनोव्यापारपरत्वेन तेषामपि मनोमयादनतिरिक्तत्वात् - आनन्दमये पर्यवसितत्वादिति । ननु "श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मवित्' इत्यात्मजिज्ञासयोपसेदुषे नारदाय नामादिषूत्तरोत्तरमर्थान्तरोपदेशे "अस्ति भगवो नाम्नो भूय इति वाग्वा नाम्नो भूयसी' इत्यादिप्रश्नप्रतिवचनपरम्परायाः प्राण एव समापनेपि विनैव तादृशप्रश्नप्रतिवचने प्रकृतस्य "एष तु वा अति वदति यस्सत्येनातिवदति' इत्यादेस्तु शब्दश्रुत्या आत्मनः प्राण इति प्राणोत्पत्तिलिङ्गेन च प्राणादर्थान्तरोपदेशपरत्वमिति तत्रैवा-त्मोपदेशपर्यवसानमभ्युपगम्यते, न तु प्राचीने प्राणे; एवमिहापि पूर्वोपन्यस्तप्रमाणैः प्रधानतयाऽवगते पुच्छब्रह्मण्येवोपक्रान्तोपदेश-पर्यवसानमभ्युपगन्तुं युक्तमिति चेन्न भूमविद्यायां प्राणोपदेशे नामादिष्वनुक्तस्यातिवादस्योक्तया तत्तत्पर्यन्त एवात्मोपदेशं मत्वा शिष्ये भूयः प्रश्नमकुर्वति स्वयमेवाचार्यः तथा अर्थान्तरसत्त्वमुपचिक्षेपेति युज्यते । इह तूत्तरोत्तरमात्मोपदेशे दृष्टायाः "तस्माद्वा एतस्मात्' इति शैल्याः ब्रह्मणि परित्यागे कारणाभावादिति भावः । पुच्छवद्विषयत्वादिति - न च "यतो वाचो निवर्न्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति' इति मनोमयपर्यायगतस्य श्लोकस्य ब्रह्मविषयस्य मनोमयविषयत्वाभावात् प्रकरण-स्थश्लोकानां पुच्छवद्विषयत्वमसिद्धमिति वाच्यम्; यतो ब्रह्मानन्दाद्वाचाप्राप्य निवर्तन्ते तं ब्रह्मानन्दं कल्याणगुणजातं ब्रह्मणा सह परिशुद्धेन मनसा विद्वान् न बिभेतीत्यर्थकतया तस्यापि श्लोकस्य पुच्छवन्मनोमयप्रशंसापरत्वसम्भवात् । नचैवम्; "अमसन्नेव स भवति' इति श्लोकस्यापि स आनन्दमयो जीवः असद्ब्रह्मेति वेद चेत् असन्नेव भवति । अस्ति ब्रह्मेति वेद चेत् सन् भवतीति पुच्छव-दानन्दमयविषयत्वमस्त्विति वाच्यम्; स इत्यस्यानन्दमयविषयत्वे तत्स्तावकत्वाभावेन तत्परत्वाभावप्रसङ्गात् ।। सिद्धान्तः ।

ननु "ईक्षतेर्नाशब्दम्' "नेतरोनुपपत्तेः' "भेदव्यपदेशाच्चान्यः' इति सौत्रपदानुकर्ष इहाभिप्रेतश्चेत् तदेव पदं प्रयुज्यताम्, किं पर-मात्मशब्दनिर्देशेनेत्याशङ्कयाह - अन्तरात्मपरम्परेति । परमशब्देन निरतिशयत्वप्रतिपादनादिति भावः । साध्यांशे हेत्वाका-ङ्क्षामिति - परमात्मपदानन्तरमेव कुतश्शब्दप्रयोगात्परमात्मत्वरूपसाध्यांश एव हेत्वाकाङ्क्षा प्रदर्शिता भवति, न तु व्यवहिते आन-न्दमयत्व इति भावः । यद्यप्यानन्दमयः परमात्मा अभ्यासिदित्येतावत्युक्तेपि अभ्यासादित्यस्योक्तरीत्या समनन्तरनिर्दिष्टपरमात्मत्व एव हेतुत्वेनान्वय इति सुवचम्,

तथाप्युपायान्तरस्योपायान्तरादूषकत्वात् स्थितस्य गतेवर्क्तव्यत्वाच्च तथोक्तमिति द्रष्टव्यम् । स्ववाक्यस्थत्वाच्चेति - अन्योऽन्तर आत्मानन्दमय इत्यस्य विषयवाक्यतया तत्स्थत्वादानन्दमयो भेदव्यपदेशादित्येव सूत्रव्यमिति भावः । अनुग्राहकयुक्तयपेक्ष इति - मुक्तेपि तादृशानन्दोऽस्त्वितिशङ्काया असम्भावितत्वरूपयुक्तयन्तरेण निवर्तनीयत्वात् "विकार-

१.१.१३

शब्दान्नेतिचेत्' इत्यादिसूत्रद्वयसापेक्षत्वाच्चेत्यर्थः । निरतिशयदशाशिरस्कत्वेनाभ्यस्यमान इत्यस्य हेतुगर्भत्वं स्फोरयति - शत-गुणितोत्तरक्रमेणेति । स एको ब्रह्मण इति वाक्यस्य प्राजापत्यानन्दपरत्वं वर्णयतां पक्षे सूत्रविरोधं दशर्यति - स एको ब्रह्मण आनन्द इति वाक्यस्येति । स यश्चायं पुरुष इतीति - "ब्रह्मविदाप्नोति पर'मित्यारभ्य "स एको ब्रह्मण आनन्द' इत्येवमन्तेनो-क्तानन्तस्वरूपरूपगुणविभवस्य ब्रह्मण एव सयश्चायमिति तच्छब्देन परामर्शादिति भावः । भगवदानन्दप्रसङ्गसापेक्षत्वादिति -

इतरथा अस्य श्लोकस्यापि प्राजापत्यानन्दपरत्वप्रसङ्गादिति भावः । श्रौतार्थं विहाय फलितार्थकथने बीजमाह - तच्च हेतोर्वैयधि-करण्यशङ्काव्युदासार्थमिति । सदृशवस्त्वेकदेशतयेति - यद्यपि "स एको ब्रह्मण आनन्दः' इतिशतगुणितचतुर्मुखानन्दसादृश्यं

१.१.१३

ब्रह्मानन्दस्यैव कथ्यते, नतु तदेकदेशस्य तथापि "यतो वाचो निवर्तन्ते' इति वाक्यस्यार्थमभिप्रेत्य तथोक्तमिति द्रष्टव्यम् । अ-भ्यासशब्दस्य ब्रह्मानन्दे औपचारिकत्वाश्रयणमयुक्तमित्यस्वरसादाह - यद्वा मुहुर्मुरुक्तिरिति । ननु निरतिशयानन्दांशेन मुहुर्मुहुरुक्तिः, आनन्दमात्रे मुहुर्मुहुरुक्तिस्तु आनन्दमात्रतात्पर्ये लिङ्गम्, नतु निरतिशयानन्दतात्पर्ये आनन्दमात्रञ्च जीवव्या-वर्तकमिति चेन्न, "स एको ब्रह्मण आनन्दः' "यतो वाचो निवर्तन्ते' इति मनोमयानन्दमयपर्यायोक्तिद्वयस्यापि निरतिशयान-न्दविषयतया निरतिशयानन्दस्य मुहुर्मुहुरुक्तयुपपत्तेः - निवर्तकत्वं विवक्षितमिति । अनन्याधीननिवृत्तिर्विवक्षितेत्यर्थः । उत्तर-ग्रन्थानुसारादिति द्रष्टव्यम् - निरतिशयत्वश्रवणविरोधेनेति । हेत्वधीनत्वे हेतोरेव तदपेक्षया अतिशयिततया हेत्वधीनस्य वस्तु-नस्सातिशयत्वमेव स्यात् यदपेक्षया अतिशयितं नास्ति तस्यैव निरतिशयत्वादित्यर्थः । ननु परमात्मानन्दस्यानन्याधीनत्वेन तस्यैवानन्दस्य "स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य' इति श्रवणात् मुक्तेष्वनन्याधीनत्वमेवेत्याशङ्कयानन्द-स्यैकरूपत्वेपि ब्रह्मणि स आनन्दो निर्हेतुकः । मुक्ते तु सहेतुकः, तत्राकामहतस्येति हेत्वन्तरस्य पृथङ्िनर्देशादित्याह - श्रोत्रि- यस्य चाकामहतस्येतीति । इति श्रुत्यन्तरमिति - तत्रत्याकामहतशब्दस्याप्येवमेवार्थ इति भावः ।

तस्य वाक्यस्य तादृशतर्क-सूचकत्वमुपपादयति - अत्र हीति । अवयवशक्तया दर्शितमिति - मयट्प्रत्ययस्य प्राचुर्यार्थत्वादिति भावः । भाष्ये-न बुद्धिमात्रमिति । ननु बुद्धिशब्दस्यान्तः करणपरतयैव टीकाकृता व्याख्यातत्वात्, न बुद्धिरित्यनेनैव तत्प्रतिक्षेपसम्भवात्

१.१.१३

मात्रपदवैयर्थ्यम् यदि च बुद्धिशब्दस्य ज्ञप्तिपरत्वं तदैव हि केवल ज्ञप्तिपर्यवसायज्ञापनाय मात्रपदं सफलं स्यात् यदि च मात्रपदमनु-जिघृक्षितं तदा तदनन्तरभूताञ्च बुद्धिमिति पूर्वपक्षभाष्यस्थो बुद्धिशब्दो ज्ञप्तिपरतयैव व्याख्येयः । नान्तःकरणपरतयेति चेदुच्यते न बुद्धिमात्रमित्येतत् तन्त्र वृत्त्यैकशेषाणामन्यतमाश्रयणे नान्तःकरणस्य ज्ञप्तेश्च व्युदासकं ततश्च ज्ञप्तिव्युदासपक्षे तद्वत्येव पर्यवसानम्, नतु तन्मात्र इति प्रतिपादनाय मात्रपदं सार्थकम् । केचित्तु सवर्त्र बुद्धिशब्दो ज्ञप्तिपर एव, नतु करणव्युत्पत्त्यान्तःकरणपर इत्याहुः । मयट्प्रत्ययेन व्यतिरेकप्रतीतेरितिभाष्यस्य स्वार्थिकत्वाश्रयणे मयट्प्रत्ययवैयर्थ्यप्रसङ्गादित्येतत्पर्यन्तोऽभिप्राय इति दर्शयति - प्रत्य-यवैयर्थ्यं विशदयतीति ।

नीलादिशब्दानामपि सङ्ग्रहार्थं व्याचष्टे - अयुतसिद्धधर्मवाचिशब्दा इति । सूत्रन्यायाभ्यामिति याव-दात्मभावित्वाच्चेति शारीरकसूत्रन्यायाभ्यामित्यर्थः । प्रथम पक्षे कर्तृपरत्वं कल्पनीयमिति - अत्यन्तागतिकबाहुलकर्त्रर्थत्वम-

इति वा कर्त्तरि ल्युडाश्रीयते । नन्द्यादित्वं वाऽऽश्रित्य "नन्दिग्रहि' इत्यादिना कर्त्तरि ल्युः । अत एव च "विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च' इति यज्ञादिकर्तृत्वं विज्ञानस्य श्रूयते । बुद्धिमात्रस्य हि न कर्तृत्वं सम्भवति । अचेतनेषु हि चेतनोपकरणभूतेषु विज्ञानमयात्प्राचीनेष्वन्नमयादिषु न चेतनधर्मभूतं कर्तृत्वं श्रूयते । अत एव चेतनमचेतनं च स्वासाधारणैर्निलयनत्वानिलयनत्वादिभिर्धर्मर्विशेषैर्विभज्य निर्दिशद्वाक्यम् "वि- ज्ञानं चाविज्ञानं च' इति विज्ञानशब्देन तद्गुणं चेतनं वदति । तथाऽन्तर्यामिब्राह्मणे "यो विज्ञाने तिष्ठन्' इत्यस्य

१.१.१३

वश्याश्रयणीयमिति भावः । गणान्तर्भाव इति - नन्द्यादिगणे अस्यापठितत्वादिति भावः । प्रत्यक्षानुगुण्यादित्यादि - आत्मनो विज्ञानमयत्वस्य जानामीति प्रत्यक्षसिद्धत्वात्, "योऽयं विज्ञानमय' इति श्रुतिसिद्धत्वात् विज्ञानं यज्ञं तनुत इत्येतदपेक्षया विज्ञा-नमयशब्दस्य प्रथमश्रुतत्वेनासञ्जातविरोधित्वात् ज्ञायतेऽनेनेति व्युत्पत्त्या विज्ञानशब्दस्यान्तःकरणपरत्वेपि प्रकृतिप्रत्ययास्वारस्यात्, जीवपरत्वे द्वयोरपि स्वारस्यापरित्यागात् विज्ञानमयशब्दानुरोधेनैव विज्ञानशब्दो नेय इति भावः । चेतनपरत्वादेवेत्यर्थ इति । व्यप-देशाच्च क्रियायामिति सूत्रे विज्ञानं यज्ञं तनुत इति वाक्यस्य जीवकर्तृत्वे प्रमाणतया परैः उपन्यासादिति भावः । बोद्धुरेव हि कर्तृ-त्वमिति - जानामि करोमीति प्रत्यक्षेण "एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' इत्यादिश्रुतिभिः "कर्ता शास्त्रा-र्थवत्त्वात्' इत्यादिसूत्रैश्चेत्यर्थः । ननु न कर्तृत्वं चेतनैकान्तम्, अचेतनानामपि कर्तृत्वसम्भवात् "शुक्रं यजमानोऽन्वारमत' इत्यादि-विहितशुक्रान्वारम्भणादौ अस्थियागपक्षे अचेतनानामस्थ्नां स्वातन्त्र्यलक्षणकर्तृत्वासम्भवात् शुक्रान्वारम्भणादिकमकर्तव्यमिति पूर्वपक्षं कृत्वा काष्ठानामपि ज्वलनादौ कर्तृत्वसम्भवेन कर्तृत्वस्य चैतन्यानपेक्षत्वेन अस्थ्नां कर्तृत्वं सम्भवतीति दशमे सिद्धान्तित-त्वादित्यभि-प्रेत्याशङ्कते - ननु सर्वेषामिति । विज्ञानशब्दास्वारस्यमुभयोरविशिष्टमिति - विज्ञानं यज्ञं तनुते इत्यत्र विज्ञानशब्द इत्यर्थः । नतु विज्ञानमयशब्दगतविज्ञानशब्दे । सिद्धान्ते तत्रत्यविज्ञानशब्दस्य ज्ञप्तिपरत्वेनास्वारस्याभावादिति द्रष्टव्यम् । स च प्रकरणानु-वृत्तश्चेदिति - विज्ञानमयात्प्राचीनेष्वन्नमयादिषु-इति भाष्ये सर्वेष्वितिपदमध्याहर्तव्यमिति भावः ।

१.१.१३

अनुप्रवेशश्रवणादिति - अनुप्रवेशकर्मत्वश्रवणादित्यर्थः । व्याप्यत्वश्रवणादिति यावत् । आत्मान्तरस्थितिश्रवणादिति - नच 'स्वे महिम्नि प्रतिष्ठितः, इतिवत् भेदस्यौपचारिकत्वमिति वाच्यम् "उभयेपि हि भेदेनैनमधीयते' इति सूत्रे विज्ञानशब्दस्य जीवपरत्वमेव, नतु परमात्मपरत्वम् अभेदेभेदोपचारक्लेशस्यानाश्रयणीयत्वादिति परैरेवोक्तत्वादिति द्रष्टव्यम् । सर्वत्र प्रयुक्तस्येति - "विज्ञानं चावि-ज्ञानञ्च' विज्ञानं यज्ञं तनुते' इत्येवम्भूते सर्वत्र वाक्ये प्रयुक्तस्य विज्ञानशब्दस्य कर्तृवाचिप्रत्ययान्तत्वे नपुंसके "भावे क्तः' 'ल्युट् च' इतिविहितभावार्थल्युडन्तस्यैव नपुंसकतया तदतिरिक्तार्थस्य ल्युडन्तस्य विशेष्यनिघ्नतया नपुंसकत्वनियमाभावेनात्मविषयस्य विज्ञा-नशब्दस्य पुल्लिङ्गत्वापत्तिरिति भावः । श्लोकस्य ज्ञातृपरत्वाभावेपीति - वस्तुशब्दस्येहानुपात्ततया तदभिप्रायेण नपुंसकलिङ्गनिर्देशो न युक्तः । अतएव सारस्वत्यां मेष्यां पशुशब्दाभिप्रायेण "प्रास्मा अग्निं भरत' इति निर्देशो युक्त इति पूर्वपक्षं कृत्वा पशुशब्दस्य प्रागनु-पात्ततया सारस्वत्याश्च मेष्या वस्तुतस्स्त्रीत्वात् प्रास्या इत्येवं स्त्रीलिङ्गनिर्देशः कर्तव्य इति पूवतन्त्रे नवमे स्थितत्वात् वस्तुशब्दाभिप्रायेण नपुंसकलिङ्गनिर्देशोऽनुपपन्नः,

किन्तु "अन्योऽन्तर आत्मा विज्ञानमयः' इत्यात्मशब्देन प्राङ्िनर्देशात् पुल्लिङ्गनिर्देश एवोचितः, अतो विज्ञानं यज्ञं तनुत इति नपुंसकविज्ञानशब्दे ज्ञप्तेः परामर्श इत्यभ्युपगमेपीत्यर्तः । तन्मयस्तद्विकार इति पदद्वयस्य प्रयोजनमाह - तन्मय इतीति । विरुद्धधर्माध्यासप्रतिपत्त्येति - विरुद्धधर्माश्रयत्वप्रतिपत्त्येत्यर्थः । सहेतुकमविरुद्धमिति - हेयप्रत्यनीकत्वदोषा-

१.१.१३

श्रयत्वयोरविरोधसमर्थनं प्रथमशिरःपरिग्रहं हेतूपन्यासपूर्वकं परमुखेन शङ्कत इत्यर्थः । हेयसम्बन्धप्रतिभासो मिथ्यारूप इति-भाष्यं व्याचष्टे- हेयं दुःखं मिथ्याप्रतिभास इति । ननु प्रतिभासो मिथ्यारूप इत्ययुक्तम्, साक्षिरूपस्याविद्यावृत्तिरूपस्य वा स्वरू-पतस्सत्यत्वेन मिथ्यात्वाभावादित्याशङ्कयाह - भ्रान्तिज्ञानमिति । तत्कार्यदुःखप्रतिभासाश्रयत्वं चैव हि हेयसम्बन्धः इति भाष्य-मयुक्तम् तथा हि सति दुःखाश्रयात्वस्य हेयसमबन्धरूपत्वं न स्यादित्याशङ्कयात्रत्यस्यैवकारस्य हेयसम्बन्धत्वरूपविशेषणान्विततया

१.१.१३

तदयोगव्यवच्छेदकत्वमेव नान्ययोगव्यवच्छेदकत्वमित्यभिप्रयन्नाह - न केवलं दुःखमेवेति । "क्षणिकस्य यागादेः श्रुतकालान्तर-भाविस्वर्गसाधनतोपपत्तये तावत्पर्यन्तस्थायी अपूर्वलक्षणो व्यापारः परिकल्प्यते, न तु विनष्टस्यासत एव यागस्य कार्यजनकत्वमिति वा तस्यैव फलपर्यन्तस्थायित्वमिति वा कल्प्यते तस्य सर्वप्रमाणविरुद्धत्वात्' इत्यपूर्वाधिकरणे निर्णीतत्वादिति भाष्याभिप्राय इत्यभिप्रयन्नाह - परिहरतीति । अप्राण्यं प्रसजेदित्यर्थ इति - काकदन्तमीमांसासदृश्यां कर्ममीमांसायां कस्याप्यप्रवृत्त्या मीमां-सारूपाङ्गसहकृतस्य च वेदस्याप्रत्यायकत्वात् प्रमितिजनकत्वरूपं प्रामाण्यं न स्यादित्यर्थः । तद्विषयान्तर्गतमिति । ज्ञानान्तर्गत-

१.१.१३

त्वोक्तया विषयान्तर्गतत्वं लक्ष्यत इति भावः । सर्वमितिशेष इति - सर्वज्ञानविषयभूतवस्तुजातं सर्वं यद्येकज्ञानविषयान्तर्गतमित्यर्थः । न हि ज्ञातत्वविशिष्टकारेणेति - एकत्वावस्थस्यैव सर्वत्वाभावादिति भावः । सर्वत्वविशिष्टकारेणेति - सर्वत्मुत्पलमित्यादिग्रन्थस्य

सच्छब्दवाच्यस्य ब्रह्मणः स्वव्यतिरिक्तनिमित्तान्तरानपेक्षत्वम्, सृष्टिकाले अहमेवानन्तस्थिरत्रसरूपेण "बहु स्याम्' इत्यनन्यसाधारण सङ्कल्पविशेषः, यथासंकल्पमनन्तविचित्रतत्त्वानां विलक्षणक्रमविशेषविशिष्टा सृष्टिः, समस्तेष्वचेतनेषु वस्तुषु स्वात्मकजीवानुप्रवेशेनैवानन्तनामरूपव्याकरणम्, स्वव्यतिरिक्तस्य समस्तस्य स्व-मूलत्वम्, स्वायतनत्वम्, स्वप्रवर्त्यत्वम्, स्वेनैव जीवनम्, स्वप्रतिष्ठत्वमित्याद्यनन्तविशेषाः शास्त्रैकसमधि-गम्याः प्रतिपादिताः । तत्सम्बन्धितया प्रकरणान्तरेष्वप्यहतपाप्मत्वादिनिरस्तनिखिलदोषतासर्वज्ञतासर्वेश्वर-त्वसत्यकामत्वसत्यसङ्कल्पत्वसर्वानन्दकरणनिरतिशयानन्दयोगादयः सकलेतरप्रमाणाविषयाः सहस्रशः प्रतिपादिताः । एवमनन्यगोचरानन्तविशेषविशिष्टप्रकृतब्रह्मपरामर्शितच्छब्दस्य निर्विशेषवस्तुमात्रोपदेशप-रत्वम् असङ्गतत्वेनोन्मत्तप्रलपितायेत ।

त्वंपदञ्च संसारित्वविशिष्टजीववाचि । तस्यापि निर्विशेषस्वरूपोपस्थापनपरत्वे स्वार्थः परित्यक्तः स्यात् । निर्विशेषप्रकाशस्वरूपस्य च वस्तुनो ह्यविद्यया तिरोधानं स्वरूपनाशप्रसङ्गादिभिर्न संभवतीति पूर्वमेवोक्तम् । एवञ्च सति समानाधिकरणवृत्तयोः तत् त्वमिति द्वयोरपि पदयोर्मुख्यार्थपरित्यागेन लक्षणा च समाश्रयणीया ।

अथोच्यत - समानाधिकरणवृत्तानामेकार्थप्रतिपादनपरतया विशेषणांशे तात्पर्यासंभवादेव विशेषणनि-वृत्तेर्वस्तुमात्रैकत्वप्रतिपादनान्न लक्षणाप्रसङ्गः । यथा "नीलमुत्पलम्' इति पदद्वयस्य विशेष्यैकत्वप्रतिपादनपरत्वेन नील-त्वोतपलत्वरूपविशेषणद्वयं न विवक्ष्यते । तद्विवक्षायां हि नीलत्वविशिष्टाकारेणोत्पलत्वविशिष्टाकारस्यै-कत्वप्रतिपादनं प्रसज्येत । तत्तु न सम्भवति । न हि नैल्यविशिष्टाकारेण तद्वस्तूत्पलपदेन विशेष्यते, जाति-

गुणयोरन्योन्यसमवायप्रसङ्गात् अतो नीलत्वोत्पलत्वोपलक्षितवस्त्वेकत्वमात्रं सामानाधिकरण्येन प्रतिपाद्यते । तथा "सोऽयं देवदत्तः' इत्यतीतकालविप्रकृष्टदेशविशिष्टस्य तेनैव रूपेण सन्निहितदेशवर्त्तमानकालविशिष्टतया प्रतिपादनानुपपत्तेरुभयदेशकालोपलक्षितस्वरूपमात्रैक्यं सामानाधिकरण्येन प्रतिपाद्यते । यद्यपि नीलमित्या-द्येकपदश्रवणे प्रतीयमानं विशेषणं सामानाधिकरण्यवेलायां विरोधान्न प्रतिपाद्यते । तथापि वाच्येऽर्थे प्रधानांशस्य प्रतिपादनान्न लक्षणा, अपि तु विशेषणांशस्याविवक्षामात्रम् । सर्वत्र सामानाधिकरण्यस्यैष

१.१.१३

पक्षविषयसङ्ग्रहविधिविस्ताररूपत्वात्पौनरुक्तयशङ्कापि परिहृता भवतीति भावः । भाष्ये-नहि नैल्यविशिष्टाकारेणेति । इदमुपलक्षणम्, नहि उत्पलत्वविशिष्टाकारेण तद्वस्तुनैल्येन विशेष्यते जातिगुणयोरन्योन्यसमवायप्रसङ्गादित्युत्तरभाष्यानुसारादिति द्रष्टव्यम् । विशेषणान्वये स्फुटेपीति - विशेषणान्वयेऽस्फुटतात्पर्यभावमुदाहरणमुक्तवा स्फुटतात्पर्यभावमुदाहरणान्तरमाहेति पर्यवसितोऽर्थः । तत्र विशेषणान्वयस्यास्फुटत्वादिति - एकस्मिन्नीलत्वदशायामेव उत्पलत्वान्वयादिति भावः । अशक्ये क्वचिद्व्यापाराभावादिति अशक्यविषयकव्यापारस्यैव लक्षणत्वात्, प्रकृते च तदभावान्न लक्षणेति भावः । अशक्यव्यापाराभावमेवोपपादयति - व्यापार-विषयांशेपीति । शक्ये व्यापाराभावादितिपाठे-शक्यैकदेशे क्वचिद्व्यापाराभावमात्रेण न शक्यांशेपि लक्षणेत्यर्थः । ननु नीलमुत्पल-

१.१.१३

मानयेत्यत्र उत्पले नीलत्ववैशिष्टयप्रतीतिः न समानाधिकरणवाक्यायत्ता अपितु प्रत्यक्षादेवेतिशङ्कां व्युदसितुं भाष्यकृता विन्ध्या-टव्यामिति परोक्षोदाहरणमुपन्यस्तमित्यभिप्रयन्नाह - प्रत्यक्षविषयं परो - व्यावृत्तिपरत्वकल्पनं परस्यानुपपन्नमिति भावः ।

१.१.१३

तदसंभवे व्युत्पत्त्यन्तरकल्पनमिति - शक्तयन्तरकल्पनमित्यर्थः । अनन्यलभ्यस्यैव शब्दार्थतया लक्षणादिलभ्ये शक्तेरकल्पनी-यत्वात्, अत एव गङ्गापदस्य न तीरे शक्तिः कल्प्यते, सैन्धवादौ तु शक्यसम्बन्धाभावान्नानाशक्तिमत्त्वमभ्युपेयत इति भावः । बाह्लीक इति - बाह्लीको नाम देशविशेषः । तत्स्थो जनो गोसदृश इत्यर्थः । विशेषणान्तरप्रतिसम्बन्धित्वाद्विलक्षणमित्यर्थ इति - विशेषणान्तरसमबन्धित्वाद्वयधिकरणमित्यर्तः । तेन धर्मवैलक्षण्येपि धर्मिभेदासिद्धेः नेदं परानिष्टमिति चोद्यं परास्तमिति वेदितव्यम् । केचित्तु विशेषणान्तरप्रतिसम्बन्धित्वादिति भाष्यस्य विशेषणान्तरेण प्रतिसम्बन्धित्वं यस्य स विशेषणान्तरप्रतिसम्बन्धित्वः,

Second Pada

१.२.१

पादानुयायिनोऽर्थस्येति - चिदचिद्विलक्षणकारणास्तित्वस्येत्यर्थः । नन्वर्थभेदादेव पादक्रमोपपत्तौ सङ्गतिः कुतस्सूत्रकाराभि-मतेत्याशङ्कयाह - पादभेदो ह्यर्थभेदादिति । नतु प्रमविशेष इति भावः । सङ्गतिविशेषादिति - पौर्वापर्यनियामकजिज्ञासाविषयस्यैव सङ्गतित्वादिति भावः । तत्र किं प्रमाणमिति - सङ्गतिविशेषस्य सूत्रकाराभिमतत्वे किं प्रमाणमित्यर्थः । ननु जन्मादिसूत्रत्रयस्यापि प्रथमाधिकरणाधीनारम्भत्वेपि शास्त्रारम्भसिध्यर्थत्वमव्याहतमेव, ईक्षत्यधिकरणोपक्रमत्वाच्छास्त्रस्य । ततश्च प्रथमाधिकरणस्य शा-स्त्रारम्भसिध्यर्थत्वकीर्तनमयुक्तमित्याशङ्कयाह - यद्वा जनमादिसूत्र्याः इति । प्रथमपादे सङ्गतिरप्यस्तीति -

शास्त्रान्तर्भूतत्वमप्य-स्तीत्यर्थः । नन्वीक्षत्यधिकरणादारभ्यैव शास्त्रं न ततः प्राचीनस्य शास्त्रत्वम्, शास्त्रारम्भार्थतया शास्त्रान्तर्भावस्तु प्रथमाधिकरणस्यापि

१.२.१

समानः । अतः प्रथमाधिकरणानुक्रमे शास्त्रारम्भसिद्धय इत्युक्तमयुक्तमित्याशङ्कयाह - यद्वा शास्त्रारम्भसिद्धय इतिपदमिति । आ-त्यन्तिकलयपर्यन्तत्वाभिप्रायेणेति - आत्यन्तिकलयो मोक्षः, मोक्षस्यानन्दरूपत्वादिति भावः । वस्तुतः परमात्मवृत्तेर्मुक्तगता-मृतत्वस्य कथं तदसाधारणत्वमित्याशङ्कयाह - प्रदेयत्वेनेति । चिह्नभूतमित्यर्थ इति - तथाचातद्धर्मस्यापि तच्चिह्नत्वमुपपद्यत इति भावः । भाष्ये-अतिपततेति । प्रमाणान्तरविषयत्वगन्धशून्य इत्यर्थः । औत्पत्तिकसूत्र इति - औत्पत्तिकस्तु शब्दस्यार्थेन

१.२.१

सम्बन्धः' इति सूत्र इत्यर्थः । प्रत्यक्षसूत्र इति - "सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्' इतिसूत्र इत्यर्थः - अन्ययोग-व्यवच्छेदस्त्रिपाद्या क्रियत इति - आक्षेपपरिहारमुखेन नान्ययोग्यव्यवच्छेदार्ढ्यमित्यर्थः । ब्रह्म लिङ्गगतमिति । परैरुक्तमिति - स्पष्टब्रह्मलिङ्गादिवाक्यानि प्रथमपादे चिन्तितानि, अस्पष्टब्रह्मलिङ्गादिवाक्यानि द्वितीयतृतीययोविचार्यन्ते । तत्र द्वितीयपादः सविशेषप्रधानः, तृतीयस्तु निर्विशेषप्रधानः । चतुर्थस्तु कारणवाक्यविगानपरिहारपर इति परैरुक्तमित्यर्थः । लिङ्गिप्रतिपादनमिति अव्यक्तादिशब्दैः प्रधानादेः प्रतिपादनादिति भावः । न तल्लिङ्गप्रतिपादनमिति - द्वितीयतृतीयपादयोरिव न लिङ्गमात्रप्रतिपादनमिति भावः ।। सर्वं खल्वित्यादेरिति "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिन् लोको

१.२.१

पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणश्शरीरो भारूपस्सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामस्सर्व-गन्धस्सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः' एष म आत्मान्तर्हृदयेऽणीयान् ब्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाक-तण्डुलाद्वा एष म आत्मान्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् द्विवो ज्यायानेभ्यो लोकेभ्यस्सर्वकार्मा सर्वकाम-स्सर्वगन्धस्सर्वरसस्सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदये एतद्ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मीति यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्यश्शाण्डिल्यः' इति श्रुतिः । व्याख्यात्रन्तराभिमतां विषयशुद्धिं दर्शयति, भाष्ये-स क्रतुं कुर्वीतेति । मनोमय उपास्यतया सम्बन्ध्यत इति - अयं भावः, मनोमयादिपदानां प्रथमान्ततया "स क्रतुं कुर्वीत' इतिप्रकृतो-पासनकर्तृविशेषणसमर्पकत्वमेव युज्यते, नतूपास्यविशेषणसमर्पकत्वमिति न वाच्यम्, मनोमयादिपदानामनपेक्षितोपासनकर्तृस-मर्पकत्वं परित्यज्य विभक्तिविपरिणामेनोपास्यविशेषणसमर्पकत्वस्यैव युक्तत्वादिति । फलवत्सन्निधाविति - "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इतिवाक्ये शान्त्यर्थतयोपासनविधानेन तस्य फलवत्त्वात् । स क्रतुं कुर्वीतेतिवाक्ये फलाश्रवणात् फलवदफलन्यायेन तदङ्गत्वं प्रसज्येतेति भावः । विहितोपासनाधिकृतस्यैवेति - न च तस्यैवोपासनान्तरं विधीयत इत्यत्र किं मानम् ? येनास्याश्शङ्काया उत्थितिस्स्यात् । उपकोसलदहरादिविद्यावत् विद्यान्तरानधिकृताधिकारविषयत्वसम्भवादिति वाच्यम्, शान्तेः ब्रह्मोपासनाङ्गतया शान्त्यर्थोपासनाधिकृतस्यैव स क्रतुं कुर्वीतेत्युपासनायाप्यधिकृतत्वादित्याशयात् । यद्यपि शान्त्यर्थोपासनवि-धानमिति न परेषां मतम् मृषावादिभिस्ततदनभ्युपगमात् । इत्थं हि तन्मतम् स क्रतुं कुर्वीतेतिवाक्ये उपासनं विधीयते, तदनुवादेन तदङ्गतया शान्त उपासीतेतिवाक्येन शमगुणो विधीयते तस्य विधेरयमथर्वादः, "सर्वं खल्विदं ब्रह्म तज्जलान्' इति तज्जत्वतल्लत्व-तदनत्वैस्सर्वस्य ब्रह्मात्मकत्वेनैकात्मकत्वाद्रगद्वेषादेः कर्तुमयुक्तत्वेन शम एव कर्तुमुचित इति "शूर्पेण जुहोति तेन ह्यन्नं क्रियते इतिवदिति तथापि व्याख्यात्रन्तराभिमतमिति तथोक्तम् अत एवोत्तरत्र

व्याख्यात्रन्तरशब्दोपि मृषावादिव्यतिरिक्तविषय एवेति द्रष्टव्यम् । उपासनप्रचुरत्वादिति - "क्रतुमयः पुरुषः' इत्यत्र क्रतुशब्द उपासनपयः । मयट्प्रत्ययश्च प्रातुर्यार्थ इति भावः ।।

क्रतुविधिपरत्वादस्येति - यागविधिपरत्वादित्यर्थः । प्रकृतोपास्यविषयत्व इति - ननु मनोमयत्वादीनां सर्वं खल्विदं ब्रह्मेति-वाक्ये प्रकृतब्रह्मविशेषणत्वादेव प्रकृतोपास्यविशेषणसमर्पकत्वं भविष्यतीत्याशभ्क्याह - ब्रह्मपरत्वानिश्चयादिति । मनोमयत्वा-

१.२.१

दिगुणके संशय इति - भाव इत्यन्तरं सूच्यत इति शेषः । ततश्चोपासनस्येतिपदेनेति - तृतीयान्तपदस्य नान्वय इति शङ्कापास्तेति-ध्येयम् । उपकरणोपकरणित्वलक्षणसम्बन्धविशेषस्यास्पष्टत्वादिति - इदमुपलक्षणम् । उदाहृताज्जीवलिङ्गादपि वाक्योपक्रम-गततज्जत्वतल्लत्वादिहेतुकसार्वात्म्यरूपब्रह्मलिङ्गस्य स्पष्टतया अस्पष्टब्रह्मलिङ्गानां द्वितीयपादे विचार्यत्वमिति मृषावाद्युक्तमयुक्तम् । न च विषयवाक्यस्य मनोमय इत्यादेः पूर्वपक्षे भिन्नवाक्यतया मनोमयवाक्ये ब्रह्मलिङ्गस्यास्पष्टतेतिवाच्यम्; तर्हि ज्योतिर्वाक्य- स्यापीह पादे विचार्यतापत्तेः । तत्पूर्ववाक्ये सर्वभूतचरणत्वरूपब्रह्मलिङ्गस्य स्पष्टत्वेपि ज्योतिर्वाक्ये अस्पष्टतया तस्यापीह चिन्त्य- त्वप्रसङ्गादित्यास्तां तावत् । उभयाकाङ्क्षेति व्याख्येयं पदम् । पञ्चम्यन्वय इति - न वक्तुं युक्तमित्यनेन उभयाकाङ्क्षानिवृत्तिसिद्धेरिति

१.२.१

पञ्चम्यन्वय इत्यर्थः । वाक्ये योजनां परिसमाप्त वाक्यान्तर्गतस्य मनोमयत्वादिगुणकेनेत्यस्य सिंहावलोकितेन प्रयोजनं दर्शयति - मनोमयत्वादि चेत्यादिना ।।

परैर्व्याख्यातमिति - यद्यपि परैर्नैवं व्याख्यातम्, अपितु परमेव ब्रह्मेहमनोमयत्वादिभिर्धर्मैरुपास्यम् । कुतः? सवर्त्र प्रसिद्धो-पदेशात् । यत् सर्वेषु वेदान्तेषु प्रसिद्धं ब्रह्मशब्दस्यालम्बनं जगत्कारणम्, इह च सर्वं खल्विदं ब्रह्मेति वाक्योपक्रमे श्रुतं तदेव मनो-मयत्वादिधर्मविशिष्टमुपदिश्यते' इति व्याख्यातम् । तथापि फलितार्थमादाय तथोक्तमिति द्रष्टव्यम् । कथं युक्तयन्नोक्तिरिति - परो-क्तयुक्तयनादरेण किमर्थं युक्तयन्तरमुपन्यस्यत इत्यर्थः । पूर्वार्धमेकरूपं पठित्वेति - तथा च पूर्वार्धयोरैकार्थ्यात् उत्तरार्धयोरप्यैकार्थ्यं युक्तमिति भावः । समाहितात्मा ज्ञानस्वरूपं परिपश्यतीति - अनेन च विशुद्धमनोग्राह्यत्वमुक्तं भवति । आत्मशब्दस्य मनः पर-त्वादिति भावः । धृत्या समाहितात्मा भक्तया पुरुषोत्तमं पश्यति साक्षात्करोति प्राप्नोतीत्यर्थः । "भक्तया त्वनन्यया शक्यः' इत्यनेनै-

१.२.१

कार्थ्यादिति वेदार्थसङ्ग्रहे प्रतिपादितमिहानुसन्धेयम् । ननु "सर्वाणि ह वा' इत्यादिवाक्यं प्राणशरीरकत्वे कथं प्रमाणं भवितुमर्हति? यौगिकवृत्त्या परमात्मपरत्वस्य पूर्वं साधितत्वादित्याशङ्कयाह - सर्वाणीत्यादिवाक्य इति । अपयर्वसानवृत्येति - आकृत्यधिक-रणन्यायादिति भावः । वैश्वानराधिकरणन्यायेनेति - "साक्षादप्यविरोधं जैमिनिः' इत्युक्तत्वादिति भावः । सुखदुःखेच्छाद्वेषादय इति - यद्यपि "सवर्गन्धस्सर्वरसः' इत्यादौ कल्याणगन्धरसपरत्ववन्मनोमयशब्दस्यापि कल्याणसुखादिमनोविकारपरत्वे वा सर्वं खल्विदं ब्रह्मेत्यादिवदसङ्कुचितपरत्वेपि वा न विरोधः । अथापि मनोग्राह्यत्वरूपार्थस्य सम्भवेऽन्तःकरणप्रतिबिम्बतया मनोविकार-भूतजीवाभेदोपचारेण मनोमयत्वोक्तिरयुक्तेति भावः ।।

प्रतिज्ञावाक्यस्याध्याहार्यत्वादिति - कृत्स्नस्येति शेषः । ततश्च पूर्वयोजनायामिव द्वितीययोजनायां न कृत्स्नाध्याहार इति भावः । ननूपासनविधेरिति - विधीयमानोपासनस्येत्यर्थः । उत्पत्तिशिष्टसर्वात्मकत्वेति - उत्पत्तिवाक्यविहितेत्यर्थः । उत्पत्तिवाक्यं प्राथ-

१.२.१

मिकावगतिजनकं वाक्यम् । उपासनविध्येकवाक्यत्वमिति - ननु ब्रह्मशब्दस्य द्वितीयान्तत्वे द्वितीयान्तस्य खल्वित्यनेनैकवा-क्यतया अन्वयो न सम्भवेत् । तज्जत्वतल्लत्वतदनत्वत्वैस्सर्वस्य ब्रह्मात्मकत्वं शासिादवगम्य रागद्वेषादिरहितस्सन् वक्ष्यमाणगुणकं ब्रह्मोपासीतेत्यर्थ इति वक्ष्यमाणरीत्या शमविध्यर्थवादतया परमतवदेकवाक्यत्वं सम्भवत्येव । "सर्वं खल्विदं ब्रह्म तज्जलान्' इत्यस्य "शूर्पेण जुहोति'"तेन ह्यन्नं क्रियत' इत्यस्यैव हेतुवन्निगदार्थवादत्वं मतद्वयेपि साधारणम् । इयांस्तु विशेषः, परमते "स क्रतुं कुर्वीत' इत्युपासनं विधीयते सर्वं खल्वितिवाक्ये तदनुवादेन शमो

विधीयते । अस्मन्मते तु सर्वं खल्वितिवाक्ये शमविशिष्यमुपासनं विधीयते । स क्रतुं कुर्वीतेति वाक्ये तु सर्वं खल्वितिवाक्यविहितोपासनानुवादेन मनोमयत्वादयो गुणा विधीयन्त इति । न च प्राप्तोपासनानुवादेन कथमेकस्मिन् वाक्ये मनोमयत्वाद्यनेकगुणविधानमिति वाच्यम्; मनोमयत्वादीनां नानात्वेपि "एतमितः प्रेत्याभिसम्भवितास्मि' इत्यत्रेतिशब्देन क्रमविशेषरूपप्रकारविशिष्टतया प्रतीतेर्विधेयनानात्वेपि विधेयतावच्छेदकैक्याद्वाक्यभेदा-प्रसक्तेः । ततश्चास्मिन्मेपि सर्वं खल्विदमितिवाक्येपि एकवाक्यत्वं सिद्धमेव । कथं भेद इति चेत् उच्यते; सत्यमेकवाक्यत्वम् तथाप्युपास्याकाङ्क्षायां रात्रिसूत्रन्यायेन शमविध्यर्थवादप्रतिपन्नं ब्रह्मैवोपास्यतया सम्बध्यते नतु सर्वात्मकत्वविशिष्टं ब्रह्म ब्रह्म-मात्रेणोपास्याकाङ्क्षाशान्तेः, येनोत्पत्तिशिष्टगुणावरोधशङ्कापि स्यादिति भावः । वस्तुतस्तु सार्वात्म्यस्योत्पत्तिशिष्टास्यापि वक्ष्य-माणमनोमयत्वाद्यविरोधान्न वक्ष्यमाणानां मनोमयत्वादीनामन्वय इत्यपि द्रष्टव्यम् । अत एव "तं मामायुरमृतमुपास्व' इत्युपासनविधौ

१.२.१

"आनन्दोऽजरोऽमृतः' इत्यौपसंहारिकगुणानामुपास्यतया विधानमिति "प्राणस्तथानुगमात्' इत्यधिकरणे वर्णितम् । तथा "ओमि-त्येतदक्षरमुद्गीथमुपासीत' इति विहिते उद्गीथावयवत्वगुणकप्रणवोपासने

रसतमत्वादीनामप्युपास्यत्वमिति "स्तुतिमात्रमुपादाना'-दित्यत्र समर्थितम् । अत एव शाण्डिल्यविद्यायां सार्वात्म्यस्योपास्यत्वमिति बहुषु स्थलेषु भाष्यटीकयोर्व्यवहारः । न च शान्त्यर्थ-तयोपदिष्टस्य सार्वात्म्यस्य कथमुपास्यविशेषणत्वमिति शङ्कनीयम् ब्रह्मण इव सर्वात्मकत्वस्यापि उपास्यत्वोपपत्तेः । इतरथा ब्रह्म-णोपि शमार्थनिर्दिष्टरयोपास्यत्वं न स्यात् न चेष्टापत्तिः । ब्रह्मशब्दवाच्यस्योपास्यत्वसिद्धवत्कारेणैव पूर्वोत्तरपक्षयोः प्रवर्तनादिति द्रष्टव्यम् । केचित्तु-गुणानां च परार्थत्वादित्यत्रादृष्टकार्येणापि निरपेक्षतया श्रुतेन पूर्वावगतेनाधठनेनावरुद्धेऽग्नौ भिन्नादृष्टकार्याणामपि पवमानेष्टीनां न निवेशो युक्तः । अत एवाग्नेयावरुद्धे प्रयाजादिर्न करणम् । अन्यथा समप्राधान्यं स्यादिति नयविवेकोक्तेरविरोधेपि न विवेशो युक्त इति वदन्ति । भाष्ये-क्वचित्क्वचिद्ब्रह्मशब्द इति । इदं ब्रह्मायाति तज्ज्ञानं ब्रह्म संज्ञितम्' इत्यादिष्विति भावः ।।

भाष्ये-ब्रह्मशब्देन तदात्मकतया विधीयमानमिति । तदात्मकतया-अन्तर्यामितयेत्यर्थः । सर्वस्य जगतः अन्तर्यामितया विधी-यमानमिति यावत् । तज्जलानिति हेतुत इति भाष्यस्य जन्मस्थितिलयानां तत्कृततादात्म्यस्य च प्रसिद्धत्वेनोपदेशादित्यर्थ इति यदुक्तम् तदयुक्तम्; तद्विवरणे भाष्ये-यस्माज्जगज्जन्मस्थितिलयाः प्रसिद्धा इति कारणत्वप्रसिद्धमात्रप्रतिपादनादित्याशङ्कयाह - कारणत्वनिबन्धनतादात्म्यस्येति । जगज्जन्मस्थितिलयानां हेतुत्वप्रसिद्धौ प्रसक्तायां तत्साध्यतादात्म्यप्रसिद्धिरप्यर्थादुक्तेति भावः ।

१.२.१

प्रसिद्धत्वमस्त्विति - जगज्जन्मस्थितिलयहेतुत्वेन वेदान्तप्रसिद्धमेव प्रतीयतामित्यर्थः । तस्यैव भाष्ये पूर्ववाक्ये प्रतिपादितत्वादिति द्रष्टव्यम् । तादात्म्यमप्यर्थसिद्धमित्याहेति - तादात्म्यमप्यर्थसिद्धमित्यभिप्रयन्नाहेत्यर्थः । भाष्ये-तदात्मकतया तादात्म्यमुपपन्न- मिति । अत्र साध्याविशेषमाशङ्कय श्रुत्यन्तरसिद्धतदात्मकत्वं हेतुः,

एतच्छ्रुतिप्रतिपन्नतादात्म्यमुपपाद्यमित्याह - तदात्मकतयेति श्रुत्यन्तरविषयमिति । इदमुपलक्षणम् । तदात्मकतया तादात्म्यमित्यस्य वाक्यस्य शरीरशरीरिभावेन तादात्म्यमिति वाक्यतु-ल्यत्वान्न साध्याविशेषशङ्कापीत्यपि द्रष्टव्यम् । उभयलिङ्गस्य ब्रह्मण इति - तथा च प्रलयदशायां ब्रह्ममात्रपरिशेषे ब्रह्मस्वरूपस्यैव परिणामप्रसक्तया सविकारत्वरूपदोषप्रसङ्गादिति भावः । श्रुत्यन्तरैः कण्ठोक्तं चेति - "तम आसीत्' "यस्य तमश्शरीरम्' इत्या-

१.२.२

दिभिरित्यर्थः । ततः किमुभयलिङ्गकस्येत्यत्राहेति - पूवर्पक्षिणा आपादितस्योभयलिङ्गत्वविरोधस्य कः परिहार उक्तस्यादिति शङ्कार्थः ।।

निषेधवाक्यविरोधेति - अप्राणो ह्यमनाः' इति वाक्यविरोधपरिहारायेत्यर्थः । विशेषवाक्यानुगुणमिति - मनसा तु विशुद्धेन इतिवाक्यानुगुणमित्यर्थः । धमर्भूतज्ञानव्यावृत्त्यर्थमाह - स्वस्मै प्रकाशयतीत्यर्थ इति । सत्यकामपदैकार्थ्यादिति - सत्यकामपदस्य

१.२.२

नित्यविभूतिमत्त्वार्थकत्वं दहराधिकरणे स्पष्टयिष्यते - अत्र स्वीकरणरूपगुणविधिरिति । नन्वेतदनुक्तिसिद्धं तद्गुणकत्वप्रतिपा-दनादेव तदुपादानस्य सिद्धत्वादितिचेन्न; सर्वकर्मेत्यादि पुनः पाठस्य सकृत्पठितमनोमयत्वादिगुणोपास्यत्वपरिसङ्खयार्थत्वशङ्का-निरसनाय प्रागुक्तसर्वगुणोपास्यत्वप्रतिपादनार्थतया सार्थक्यमित्याशयात् । पुनः पाठस्य तु प्रयोजनमुत्तरत्र वक्ष्यते - नायमादि-कर्मणीति । आरम्भ आदिकमर्, "गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहर्जीयतिभ्यश्च' इति कर्तरिक्तप्रत्ययविधानमाशङ्कय निराकरोति - न चाभ्याददातिरित्यादिना । तेनैव कर्त्रर्थकत्वं क्तप्रत्ययस्य कल्प्यतामिति - लक्ष्यप्राधान्यवादिनोयं परिहारः,

१.२.३

गत्यर्थत्वमङ्गीकृत्य कल्प्यतामित्यर्थः । महाभाष्ये कथं भुक्ता ब्राह्मणः पीता गावः इत्याशङ्कय अर्श आद्यजन्ततया निर्वाहः कृतः । तदनुरोधेन निर्वाहं दर्शयति - यद्वा कर्तरि प्रतीतिः प्रतिपत्तिरिति । क्त इत्यनेन क्तप्रत्ययान्तजन्यप्रतिपत्तिर्लक्ष्यत इति भावः । नतु वाक्सामर्थ्यविरह इत्यर्थ इति - अवाकीत्यनेन प्रतिपाद्यत इति शेषः ।। तुशब्दाभिप्राय इत्याशयवतोक्तमिति - बद्धे संशयहेतो-

१.२.५

स्सतोऽयथा सिद्धिः कार्या, मुक्तेतु संशायकहेतुरपि नास्तीत्येवंरूपवैषम्यं तुशब्देन द्योत्यत इत्यर्थः । जीवधर्मैरिति - मनोमयत्वादि-भिरित्यर्थः ।।

परमसाध्यहेतुमाहेति - विवक्षितगुणानुपपत्तिद्वारा भाष्ये जीवव्यतिरेके हेतुरुच्यते अनेन सूत्रेण, नतु विवक्षितगुणानुपपत्ताविति भावः । प्राप्यप्राप्तारावेव हीति - "एतमितः प्रेत्याभिसम्भवितास्मि' इत्यत्र एतच्छब्देन प्राक्प्रस्तुतोपास्यस्य परामर्शादितिभावः - स्व-रूपस्यैवेति - दशमस्त्वमसीत्यादाविव स्वरूपस्यैव प्राप्यत्वं प्राप्तृत्वं च सम्भवतीतिशङ्कार्थः । श्रुतिस्वारस्यभङ्ग इति - "एतमितः प्रेत्य' इति श्रुतिस्वारस्यभङ्ग इत्यर्थः । नन्वेवमितः प्रेत्याभिसम्भवितास्मि इति वाक्ये प्राप्यस्य पुल्लिङ्गतया निर्देशात् प्राप्तुरन्यदेवेदमिति

श्रुतौ शब्दविशेषः श्रूयते जीवपरयोः । यथा "व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वा एवमय-

१.२.६

विज्ञायत इति भाष्ये नपुंसकनिर्देशः कथमित्याशङ्कयाह - अत्रेदमिति निर्देश इति ।।

नान्योन्याश्रय इति - शब्दविशेषस्य जीवपरविषयत्वसिद्धौ जीवपरविषयकशब्दविशेषणोपास्योपासकभेदसिद्धिः, उपास्योपा-सकभेदसिद्धौ जीवपरविेयत्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः ।

सर्वशब्दो जीवविषय इति - न देहादिसङ्घातविषयः, येनोपायस्योपासकयोर्जीवपरयोर्भेदो न सिद्धयेदितिभावः । भ्रान्त्या-श्रयत्वादिति - "भ्रामयन् सर्वभूतानि' इतिप्रतिपाद्यभ्रान्त्याश्रयत्वादित्यर्थः । अवान्तरशङ्कापरिहारेति - अवस्थाभेदेन प्राप्यत्व-प्राप्तृत्वोपपत्तिरितिशङ्कानिराकरणार्थसूत्रद्वयोक्तहेतुसमुच्चयाथर् इत्यर्थः । श्रुतिस्मृत्योस्साम्यासम्भवादाह - अन्वाचयो वेति । अस्मिन् सूत्रे शाङ्करभाष्ये कः पुनरयं शारीरो नाम परमात्मनोऽन्यः यः प्रतिषिध्यते "अनुपपत्तेस्तु न शारीरः' इत्यादिना । श्रुतिर्हि "नान्य-दतोऽस्ति द्रष्टा नान्यतोस्ति श्रोता' इत्येवञ्जातीयकापरमात्मनोन्यमात्मानं वारयति । तथा स्मृतिरपि "क्षेत्रज्ञं चापि मां विद्धि सर्व-

१.२.६

क्षेत्रेषु भारत' इत्येवञ्जातीयकेति । अत्रोच्यते,-सत्यमेवमेतत्; पर एव त्वात्मा देहेन्द्रियमनोबुध्युपाधिभिः परिच्छिद्यमानो बालैश्-शारीर इत्युपचर्यते, यथा घटकरकाद्युपाधिवशादपरिच्छिन्नमपि नभः परिच्छिन्नवदभासते, तद्वत्तदपेक्षया च कर्मकर्तृत्वादिभेद-व्यवहारो न विरुध्यते । प्राक् तत्त्वमसीत्युपदेशग्रहणाद्गृहीते त्वात्मैकत्वे बन्धमोक्षादिसवर्व्यवहारपरिसमाप्तिरेव स्यादित्युक्तम्, तदनूद्य दूषयति - अत्र केचिदिति । अन्येषां जीवेश्वरभ्रमाभावाच्चेति - वेद एवभ्रान्तो व्यदिशतीति पक्ष इति भावः । अन्येषां जीवेश्वरभेदभ्रान्त्यभावेपीति - ईश्वरस्य मानान्तरागोचरत्वेन तद्भेदभ्रमासम्भवेपीत्यर्थः । त्वमित्येवोपदेष्टव्यमिति - श्वेतकेतुं प्रतीतिशेषः । मनुसूर्यादिजन्मस्मरणपरत्वसम्भवादिति - अनद्यतनलङ्िनर्देशस्वारस्यादिति भावः । मुक्तप्राप्यत्वादीनामनु-मातुमशक्यत्वाच्चेति - ततश्च श्रुत्येकसमधिगम्यानां तेषामनुवादो न सम्भवतीति भावः । उपास्यत्वादिनिबन्धन इति - उपासनार्थ

१.२.७

इत्यर्थः । तदेवोपपादयति- तत्तत्फलविशेषार्थिनामिति । श्रुतिः कल्पयतीति चेदिति - ननु श्रुतिकल्पितकर्मकर्तृभेदो न भेदकार्य-साधक इति कथमियं शङ्केति चेत्, अत्यन्तागतिकस्यैतादृशशङ्कोपपत्तेः । किञ्च उपासने प्रवर्तमानस्योपास्योपासकभेदबुद्धेरेवापेक्षि-तत्वेन वास्तवभेदानपेक्षत्वेन शङ्कोपपत्तेरिति द्रष्टव्यम् । जीवविलक्षणं वस्त्विति - जीवभेदं प्रतिज्ञायेत्यर्थः । न ह्यतात्विकभेदः प्रतिज्ञात इत्युत्तरग्रन्थानुसारात् । अपरमार्थभेदव्यपदेशं विजानन्निति - कर्मकर्तृभावलक्षणं भेदमित्यर्थः । तत्त्वार्थहेतुतयेति - जीवविलक्षणत्वरूपभेदहेतुतयेत्यर्थः । ब्रह्मजिज्ञासेत्युपक्रमविरोधादिति - इतरथा"अथातोतात्विकभेदजिज्ञासा' इत्येव सूत्रयेदिति भावः ।।

परव्याख्यां दूषयति - व्योमद्द्रष्टव्यमित्युक्त इति । प्रमाणाकाङ्क्षा भवतीति - अर्भकौकस्त्वादिकं व्योमवदौपाधिकं द्रष्टव्य-मित्युक्ते स्वाभाविकमेव किं न स्यात् ? औपाधिकत्वे प्रमाणाभावादिति प्रमाणाकाङ्क्षा भवतीति भावः । प्रमाणमेव दर्शितं भवतीति श्रुत्या व्यपदिश्यत इति हि तस्यार्थः । अतः प्रमाणमेव दर्शितं भवतीति भावः । ननु "प्रशस्यस्य श्रः' ज्यच' इति प्रशस्यशब्दस्य ज्यादेशविधानात् प्रशस्यशब्दादीयसुन्प्रत्यये ज्यायश्शब्दनिष्पत्तिः । न तु वृद्धशब्दादित्याशङ्कयाह - ज्य च वृद्धस्य चेति हि सूत्र-मिति । ज्यच वृद्धस्य चेति हि सूत्रक्रम इत्यर्थः । अयं भावः, वृद्धस्य चेत्यत्र ज्यचेत्यनुयर्तते, वृद्धशब्दादीयसुन्प्रत्यये वृद्धस्य चेति वृद्धशब्दस्य ज्यादेशे ज्यादादीयस इतीयसुन्नीकारस्य आकारादेशे ज्यायश्शब्दनिष्पत्तिरिति । नतु प्रशस्यस्य श्र इति तन्निष्पत्तिरिति

१.२.७

प्रशस्यस्यश्र इत्यधिकारे पठितेन ज्यचेतिसूत्रेण प्रकृतेन तन्निष्पत्तिरित्यर्थः । अत्रापि हेतुरणीयस्त्वप्रतिसम्बन्ध्याकारपरत्वाज्ज्याय-श्शब्दस्येति वक्ष्यमाण एव द्रष्टव्यः । ततोपि ज्यायस्त्वश्रवणादिति - ज्यायान् पृथिव्या इत्यादिना पृथिव्यादिभ्यो ज्यायस्त्व श्रवणादित्यर्थः । तस्य वाक्यान्तरस्थत्वादिति - यद्यपि

ब्रह्मात्मकत्वं सर्वस्य शास्त्रादवगम्य रागद्वेषादिरहितस्सन्नित्यादिना एक-वाक्यत्वमुत्तरत्र वक्ष्यते तथापि ब्रह्मणस्सर्वात्मकत्वस्य शमशेषत्वादित्यत्र तात्पर्यम् । वस्तुतस्तु यथा शान्त्यर्थस्योपदिष्टस्यापि ब्रह्मणः

१.२.८

"मूलतश्शाखां परिवास्योपवेषं करोति' इत्यत्र शाखापरिवासने अपादनतया अन्वितस्यापि मूलत इत्यस्योपवेषं करोतीत्यनेनापि आकाशावशेनान्वयवदन्वयोऽभ्युपेयते तथा सर्वात्मकत्वस्यापि अन्यार्थनिर्दिष्टस्योपास्यत्वेन विरोध इति द्रष्टव्यम् । पूर्वमप्येतत्प्र-तिपादितम् । लक्षणतो धर्मिनिर्देश इति - कारणत्वरूपलक्षणोक्तिमुखेन ब्रह्मस्वरूपधर्मिनिर्देश इत्यर्थः । भाष्ये-प्राप्तिनिश्चयानु-सन्धानञ्च प्रतिविधायेति । प्राप्तिनिश्चयरूपानुसन्धानमित्यर्थः । प्राप्तिनिश्चयोपेतस्येत्युत्तरभाष्यानुगुण्याच्छ्रुत्यानुगुण्याच्चेति द्रष्टव्यम् । उपास्यतया प्राप्यतयेति - यद्यप्युपास्यत्वे पाप्यत्वं सिद्धम् तथापि द्विःपाठस्तेन क्रमेणानुसन्धानार्थ इति द्रष्टव्यम् । हृदिस्थिति-र्द्विरुक्तिरिति - "एष म आत्मान्तर्हृदये' इति द्विरुक्तिरित्यर्थः ।।

भोगप्रसञ्जने सुखग्रहणमिति - अपुरुषार्थप्रसञ्जने इत्यर्थः । उक्तार्थे श्रुतेः सम्मुखतया प्रमाणत्वासम्भवात् । तथाच श्रुतिरि-त्येतद्वयाचष्टे - तथाच श्रुतिरिति । जीवस्यानभ्युपगम इति - जीवस्यानभ्युपगमादित्यर्थः । अवगतत्व इति - अवश्याभ्यु-पगन्तव्यत्वे सतीतिविशेषः । आनन्दगिरीयविकल्पमुपन्यस्यति - किं शास्त्रादवगमः, उतास्माद्वाक्यादिति । परस्य भोक्तृत्वा-भावोपीति - परस्य जीवस्येत्यर्थः । शारीरस्यैव तावदुपभोकतृत्वं वारयतीति शाङ्करभाष्यानुसारात् । भोक्तृजीवाभेदायत्तभो-क्तृत्वप्रसक्तेः, तथैव परिहर्तव्यत्वाच्च । द्वितीये तु भ्रान्तिसिद्धेति - अस्मदुक्त्या जीवब्रह्मैक्यप्रवगतं चेत्, तथा तत्पक्षदोषपरिहार-

१.२.९

प्रकारोपि मदुक्तरेवावगन्तव्यः । तत्रापि किमर्धजरतीयन्यायेनेति भावः । अनभ्युपगमनिरस्तमिति - द्वितीयपक्षस्य स्फटत्वादिति भावः ।। इति सर्वत्रप्रसिध्द्यधिकरणम् ।।

साक्षादग्निपस्तावाभावादिति - साक्षादग्निर्मुख्याग्निः ज्वलनरूपाग्निः तदाधारतया ह्यग्निशब्दः स्थण्डिलरूपाग्नावुपचर्यत इति भावः । ननु स्थण्डिलाग्निविषय एव संशयः । तस्यैवान्नादत्वप्रसिद्धिश्चास्तीत्यत्राह - अग्निप्रकरणस्येति । ओदनोपसेचनसाम-र्थ्यावगतस्येति - ओदनादेर्भोग्यत्वेन लोकप्रसिद्धेर्भोक्तृत्वस्यैव प्रथमं बुद्धाववतारादिति भावः । ननु मन्त्रे मुख्य ओदनो न श्रुतः, येन तत्प्रतिसम्बन्धी अत्ता भोक्ता स्यात्, किन्तु ब्रह्मक्षत्रिययोरोदनरूपणमात्रं क्रियते, न ह्युपचरितौदनस्यापि तत्प्रसम्बन्धिना भोक्त्रा भवितव्यम्, न चास्य "मृगयाविनोदिनोऽमृगाः परनृपतयः' इत्यत्रामृगेषु मृगत्वरूपेण वस्तुतोमृगहन्ता क्षत्रिय एव तत्प्रतिसम्बन्धी प्रतीयते, न तु श्रोत्रियः कश्चिद्ब्राह्मण इति वाच्यम्; तथा नियमाभावात् । "त्वत्कृपाणभुजङ्गस्य क्षीरं विद्विषतां यशः' इत्यत्रोपच-रितक्षीरप्रतिसम्बन्धिनि कृपाणे पातृत्वस्याप्रतीतेः, सत्यामपि प्रतीतौ वास्तवपातृत्वादर्शनादिति चेत् उच्यते, अवश्यं तावदिहानो-दनविषयेण ओदनशब्देन वाच्यगतं कञ्चिद्गुणमपेक्ष्य वर्तितव्यम् । तदिह भोग्यतया प्रसिद्धस्य वाच्यस्य गुणो भोग्यत्वरूपः पर्यवस्-यतीति तत्प्रतिसम्बन्धिनो यस्येति पदोपात्तस्य भोक्तृत्वप्रतीतिरनिवार्या । कृपाणभुजङ्गस्येत्युदाहरणेपि कृपाणे समारोपिततत्पातृ-त्वप्रतीतिरस्त्येव, न च तत्र भुजङ्गत्वरूपणात् पातृत्वप्रतीतिः, न तु यशः क्षीरत्वरूपणमात्रात् । ततश्च ब्रह्मक्षत्रस्यौदनत्वरूपण-मात्रेण कथं पातृत्वप्रतीतिरिति वाच्यम्; "करवालस्य ते वीर क्षीरं विद्विषतां यशः' इत्यत्रादौ भुजङ्गत्वरूपणभावेपि क्षीरत्वरूपण-

१.२.९

मात्रेण पातृत्वप्रतीतेः, तचैवं तद्वदेव भोक्तृत्वमप्यारोपितमस्तु, ततश्च वस्तुतः ततसम्बन्धिन अभोक्तृत्वमेव पर्यवस्यतीति कथं भोक्तृत्वं जीवत्वसाधकं स्यादिति वाच्यम्; असति बाधके भोक्तृत्वप्रतीतेः । प्रमात्मस्योचितत्वेन जीवत्वसाधनसम्भवादिति भावः । स्त्रीपुंसा-त्मकत्वादिति - स्त्रीणां भोग्यत्वं सिद्धमेव पुंनपुंसकयोरपि भृत्यादिरूपेण

भोग्यत्वमिति भावः । विधेय इत्यभिप्रायेणेति - अबाधक इत्यभिप्रायेणेत्यर्थः । ननूपसेचनशब्देन साधारणमबाधकत्वमात्रं न लक्षयितुमुचितम्, अपितु स्वयमद्यमानत्वे सति अन्यादनहेतुत्वम् तादृशञ्चादनं संहारयितृपरब्रह्मपक्ष एव घटते, नान्यिेति चेत् नैष दोषः, प्रथमश्रुतौदनशब्देन भोग्यत्वस्य प्रतीतत्वात् । तदनुरोधेनैव चरमश्रुतोपसेचनशब्दस्यापि अबाधकत्वार्थकत्वस्यैव युक्तत्वात् । न चोपसेचनपदानुसारेणौदनपदस्य विनाश्यत्वपरत्वमस्त्विति वा-च्यम्; चरमश्रुतस्वारस्यानुरोधेन प्रक्रमश्रुतस्वारस्यान्यथानयनायोगात् ।।

साधारणाकारं विहायेति - अत एव प्रैतुहोतुश्चमसः प्रब्रह्मणः प्रोद्गातॄणां प्रयजमानस्येति । अध्वर्युप्रैष उद्गातृशब्दस्य बहुवचना-नुसारेण रूढिपूर्विकलक्षणया बहुषु वृत्तौ वक्तव्यायां षोडशर्त्विक्साधारणाकारं विहाय विशेषाकारेणोद्गातृगणमात्रलक्षणा पूर्वतन्त्रे निर्णीता । भाष्ये-तदुपसिच्यमानस्येति । तन्मिश्रितस्येत्यर्थः । विष्णोः श्रूयमाणत्वादिति - यद्यपि "सोऽध्वनः' इत्यादिवाक्यं "प्रकरणाच्च' इत्युत्तरसूत्रस्य विषयः, न त्वस्य सूत्रस्य; अत्र निखिलचराचरसंहर्तृत्वस्यैव हेतुकरणात् तस्य च मृत्यूपसेचनसमभि-व्याहारलभ्यत्वान्नान्यापेक्षा, अथापि मृत्यूपसेचनसमभिव्याहारस्य प्रकरणमप्युत्तम्भकमिति सूचनार्थं तथोक्तमिति द्रष्टव्यम् । मृत्यूपसेचनसामर्थ्येति - ननु प्रक्रमश्रुतौदनपदस्वारस्यप्रतिपन्नभोग्यत्वानुसारेण चरमश्रुतं मृत्यूपसेचनत्वमबाधकत्वाभिप्रायेण नेयमित्युक्तमिति चेत् उच्यते; इह ब्रह्मक्षत्रयोर्मृत्योश्च तावदोदनोपसेचनभावरूपणात् दध्यन्नरीत्या सम्बन्धः प्रतीयते, तथा च

१.२.९

मृत्युमिश्रणप्रतीत्यनुसारेण ब्रह्मक्षत्रशब्दाभ्यां चराचरात्मकं विनाशिवस्तुमात्रं लक्षणीयम् ।
मृत्यूपसेचनत्वरूपणसन्निधानादेव ओदनशब्देनापि विनाश्यत्वं लक्षणीयम् ।
स्वबुद्धयपस्थानीयविशेषाकाररूपगुणग्रहणादपि एकवाक्यतापन्नपदान्तरोपस्थापित-गुणग्रहणस्य बुद्धिलाघवेन एकवाक्यतासामर्थ्येन च न्याय्यत्वात् । "अत एवाक्ताश्शर्करा उपदधाति' इत्यत्र विधेयाञ्जनस्य साध-नापेक्षायां "तेजो वै घृत'मिति वाक्यशेषे श्रुतं घृतमेव ग्राह्यम्, नतु पुरुषबुद्धिकल्पनीयमद्रवद्रव्यमात्रमिति पूर्वतन्त्रे निर्णीतम् । ननु तथापि कथं ब्रह्मक्षत्रशब्देन चराचरग्रहणसिद्धिः? ओदनशब्दस्य गौणत्वावश्यम्भावेन तस्य समभिव्याहृतपदार्थान्तरोपस्थापित-गुणलक्षकत्वेपि ब्रह्म च क्षत्रं चेत्यस्य मुख्यार्थवृत्तिसम्भवात्, न च मृत्यूपसेचनकीर्तनात् तदुपसिच्यमानं सर्वं तेन ग्राह्यमित्युक्तं युक्तम् । "शूर्पेण जुहोति तेन ह्यन्नं क्रियते' इत्यत्र शूर्पशब्दस्य वाक्यशेषे अन्नकरणत्वकीर्तनेपि यद्यन्नकरणं तत्र सर्वत्र लक्षणानुगमात् । ननु शूर्पमात्रस्याप्यन्नकरणत्वेन स्तुतिस्सम्भवति, अन्नकरणत्वस्य शूर्पे दर्वीपिठरादौ च व्यासज्यवृत्त्यभावात् इति चेदिहापि ब्रह्मक्षत्र-मात्रस्यापि मृत्युमिश्रणप्रतिपादनं सम्भसतीति तुल्यम् । किञ्च व्यर्थं ब्रह्मक्षत्रशब्दयोः कृत्स्नचराचरलक्षकत्वोपपादनम् ओदनशब्दस्य संहार्यत्वलक्षकत्वोपपादनमात्रेणापि तत्प्रतिसम्बन्ध्यत्ता संहर्तेति सिद्धौ शब्दवृत्त्यसङ्कोचप्राप्तसर्वकल्पानुयायिसकलब्रह्मक्षत्रजात्य-लिङ्गितव्यक्तिसंहर्तृत्वलिङ्गेनहवात्तुः परमात्मसिद्धेरिति चेत् उच्यते; कर्तृत्वं भोक्तृत्वमुपसंहर्तृत्वमिति पक्षद्वयेपि ओदनपदवत् ब्रह्मक्षत्रपदयोरपि लक्षकत्वमवश्यम्भावि । नहि मृत्यादिरूपभोग्यतया वा भक्ष्यतया वा ब्रह्मक्षत्रयोरेव भोक्ता कश्चिज्जीवोऽस्ति, न वा परमात्मा तदुभयमात्रसंहर्ता, न चाधिकभोक्तृत्वेपि विशिष्य तदुभयमात्रग्रहणे प्रयोजनमस्ति, न चान्तरादित्यविद्यायाम् "ये चामु-ष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां च' इति सर्वलोककामेशितरि परमात्मनि लोकविशेषकामविशेषेशितृत्ववत् सर्वसंहन्तर्यपि परमात्मनि ब्रह्मक्षत्रसंहतृत्वोपपत्तिरिति चेन्न तत्राक्ष्यादित्यस्थानभेदेन "स एष ये चामुष्मापराञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां च' इति निर्देशभेददर्शनात् तत्र व्यवस्थासिद्धावपि इह तन्मात्रग्रहणे नियामकाभावात् ब्रह्मक्षत्रग्रहणमुपलक्षणं न स्वार्थमात्रनिष्ठमिति उपलक्षणीयाकाङ्क्षायां पश्चात्तनमृत्यूपसेचनकीर्तनात् तदुपसिच्यमानं सर्वमुपलक्षणीयमिति निश्चीयते । किञ्च ओदनशब्दस्योक्तयुक्तवा संहार्यत्वलक्षणास्थितौ यच्छब्दयोगेनाऽनुवादकेऽस्मिन्मन्त्रे संहार्यसमर्पकस्य ब्रह्म क्षत्रं चेत्यस्य "सन्मूलास्सोम्येभास्सर्वाः प्रजास्स-दायतनास्सत्प्रतिष्ठाः' इत्यादि पुरोवादानुसारेण चराचरात्मकविनाशिमात्रोपलक्षकत्वमावश्यकमित्यास्तां तावत् ।।

१.२.१०

प्राकरणिकहेतुरत्रोच्यत इति - प्राकरणिकः प्रकरणसहित इत्यर्थः । प्रकरणाच्चेति सूत्रे चशब्देन लिङ्गं समुच्चीयते, एवञ्च पर-मात्मप्रकरणात् क इत्था वेदेति दुर्विज्ञानत्वरूपलिङ्गप्रत्यभिज्ञानाच्चेत्यर्थः । नतु विषयवाक्यात् पूर्ववाक्यस्थमहत्त्वविभुत्वादिहेतु-रित्यर्थः । ब्रह्मणः प्रकृतत्वे विवादाभावेन लिङ्गेन तस्यासमर्थनीयत्वात् सूत्रभाष्यगतप्रकरणशब्दस्वारस्याच्च । एकप्रकरणत्वं कथमितीति - यद्यपि"महान्तं विभुम्' इत्यादौ ब्रह्म प्रकृतम्, न प्रकृतं च हातुं योग्यम् । अथापि "न जायते म्रियते' इत्यादौ जीवस्यापि प्रकृतत्वात् ब्रह्मण एव ग्रहणेन प्रमाणं पश्याम इति भावः । परस्य स्थितिरिति जिज्ञास्यत इति - सामान्यतश्शरी-राधारत्वं जानता शिष्येण शरीरे प्रदेशविशेषः पृच्छ्यत इत्यर्थः ।

प्रकरणविच्छेदं दर्शयतीति - "ऋतं पिबन्तौ' इति वाक्यस्य परमात्मप्रकरणविच्छेदं दर्शयतीत्यर्थः । यस्य ब्रह्म चेत्यादि-वाक्यापेक्षयेति - ऋतपानलिङ्गबलात् ऋतं पिबन्ताविति‌वाक्ये यस्य ब्रह्म चेत्यस्य पश्चात्पठिते परमात्मप्रकरणविच्छेदेपि नात्तुः परमात्मत्वहानिः । यस्य ब्रह्मचेत्यादिवाक्यस्य महान्तं विभुमित्यादिना एकप्रकरणतया ऋतं पिबन्तावित्यनेन एकप्रकरणत्वा-भावादिति शङ्काभिप्रायः । व्यवहितत्वाद्विच्छेदो युक्त इति - ननु "महान्तं विभु'मित्यत्रापि अव्यवधानमस्ति । एवं हि पाठक्रमः,-

१.२.१०

"महान्तं विभुमात्मानं मत्वा धीरो न शोचति । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्त- स्यैष आत्मा विवृणुते तनूं स्वाम् । नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयात् । यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः । ऋतं पिबन्तौ सुकृतस्य लोके' इति । ततश्चाव्यवधानं द्वयो-रप्यविशिष्टम् । तत्र च प्रकरिष्यमाणपरामर्शलाभेन प्रकृतहानमयुक्तम् । प्रकृतप्रत्यभिज्ञापकं दुरधिगमत्वलिङ्गं च वर्तते । अतः कथमृतं पिबन्ताविति‌खण्डान्तरस्थोत्तरवाक्यैकप्रकरणत्वलोभेन प्रकृतैकवाक्यत्वपरित्याग इतिशङ्केति चेत् उच्यते; प्रकरणाच्चेतिसूत्रे प्रक-रणशब्देन परमात्मप्रतिपादकवाक्यसन्दर्भमध्यगतत्वं विवक्षितम् । तदिह गुहां प्रविष्टाविति‌सूत्रे आक्षिप्य समाधीयत इत्यनवद्यम् । यद्यपीमौ शङ्कापरिहारौ तदेकप्रकरणत्वात्पूर्वप्रस्तुतोक्तावपि स एव भवितुमर्हतीति भाष्याभिप्रेतौ तत्रैव वक्तव्यौ च । तथाप्यनन्त-रमितिपदस्यैकप्रकरणत्वोपपादकत्वादिहोक्ताविति द्रष्टव्यम् । समप्राधान्यशङ्कापरिहारार्थमिति - तथा हि सति परमात्मनः प्रतिपा-द्यत्व शङ्कापि स्यादिति भावः । बुद्धिप्राणयोरन्तरत्वमिति - बुद्धिशब्देनान्तःकरणमुच्यते । नहि संहर्तृत्वमुच्यत इतिवदिति - यस्य ब्रह्म चेति वाक्य इति शेषः । यथाकथञ्चिदिति व्याख्येयं पदम् । युक्तयन्तरमाह - तत्र प्रथमत इति । अनेकैरिति - समभिव्याहृतैरिति भावः । यथा न विरुध्यत इति - ननु द्वयोरप्यजहत्स्वार्थलक्षणाप्रतिपाद्यत्वाविशेषात् कथं कस्यचित्प्राधान्यं कस्यचिदप्राधान्यम् ? नहि "काकेभ्यो दधि रक्ष्यता'मित्यादौ काकानां प्राधान्यम् नवा "सृष्टिरुपदधाति प्राणभृत उपदधाति पृष्ठैस्तुवत' इत्यादौ शक्यार्थस्य प्राधान्यमन्यस्याप्राधान्यमुपलभ्यत इति चेदुच्यते; लोके श्रेष्ठवाची शब्द एव हि अश्रेष्ठे उपचरितो दृश्यतो अत एव हि महाभाष्ये "कारकान्तरे कर्तृवाचीशब्द उपचर्यते न कर्तरि कारकान्तरशब्दः' इत्युक्तम् । ततश्च यद्वाचिशब्दो यत्रोपचारेण प्रयुज्यते स तदपेक्षया श्रेयानिति उत्सर्गसिद्धमेतत् । ततश्च तेन न्यायेन मुख्यार्थस्यौपचारिकार्थापेक्षया प्राधान्यं सिद्धमिति भावः । उपकरणभूतान्तःकर-णस्य द्वितीयत्व इति - ऐतेन "त्रयाणामेव चैवमुपन्यासः प्रश्नश्च' इति सूत्रोक्तरीत्योपायोपेयोपेतृणामेवोपन्यसनीयतया बुद्धिप्राणयोश्च

१.२.११

त्रिष्वनन्तर्भावेन तत्परपूर्वपक्षस्य कथमुत्थितिरिति शङ्का परास्ता ।
बुद्धिप्राणयोरप्युपासननिर्वृत्त्युपकरणतयोपायकोटावेवान्तर्भा-वसम्भवेन पूर्वपक्षोदयसम्भवादिति ध्येयम् ।।

परमसाध्योपपादकत्वसूचक इति - अत्तुः परमात्मत्वोपपादकतां सूत्रार्थस्य दर्शयति हिशब्द इत्ययमथर् उत्तरत्र स्पष्टः । दृश्यत इत्यन्वय इति - अन्वयः अनुषङ्ग इत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् । जीवोपासनमङ्गत्वेन विधीयत इति - तथाचाध्यात्मयोगा-धिगमशब्दस्य जीवोपासनमर्थ इति भावः । भूमौ च वेदप्रसिद्धेरिति - "अदित्यास्त्वोपस्थे सादयामि' इत्यादौ भूमौ च प्रयोगा-भावादिति भावः । सजातीययोरेव द्विवचननिर्देशार्हत्वमिति - विजातीयपरिग्रहे जातिव्यक्तयोरप्युपस्थापनीयतया गौरवम् ।

१.२.१२

सजातीयपरिग्रहे तु व्यक्तिमात्रस्यैवोपस्थाप्यतया लाघवमिति भावः ।।

तत्तद्वाक्योदितविशेषणान्तराणीति - ब्रह्मजज्ञत्वसेतुत्वादीनीत्यर्थः । उपास्यत्वोपासकत्वेति - ततश्चोपास्यस्य परमात्मनः उपासकदवीयस्त्वशङ्कानिरासाय हृदयगुहायां द्वयोरप्यवस्थितिम् ऋतं पिबन्ताविवाक्यं प्रतिपादयतीति भावः । भाष्ये-यस्सेतु-रीजानानामिति । यज्वनां सेतुः प्रतिष्ठापक इत्यर्थः । ननु भाष्ये-इहापि चायातपावित्यज्ञत्वसर्वज्ञत्वाभ्यां तावेव विशिष्य व्यप- दिश्येते इत्युक्तिरयुक्ता, छायातपशब्दयोरज्ञत्वसर्वज्ञत्वपरत्वस्य पूर्वपक्षिणं प्रत्यसिद्धत्वेन विशेषणस्य हेतुकरणासम्भवादित्याशङ्कय छायातपशब्दयोर्ज्ञाज्ञाविति श्रुतिस्मारकतया हेतुकरणं सम्भवतीत्याह - अज्ञत्वसर्वज्ञत्वाभ्यामित्यनेनेत्यादिना ।।

भाष्ये-सर्ववेदसदक्षिणक्रतुसमाप्तिवेलायामिति । अत्रोपयुक्ता श्रुतिर्लिख्यते- "उशन् ह वै वाजश्रवसस्सर्ववेदसं ददौ' उशन्-काम-यमान इत्यर्थः । "तस्य ह नचिकेता नाम पुत्र आस । तं ह कुमारं सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश । पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः । आनन्दा नाम ते लोकस्तान् स गच्छति ता ददत्' । जरद्गवीः प्रयच्छन् आनन्दान् सुकरहितान् लोकान्

१.२.१२

पाप्नोतीत्येवममन्यत इत्यर्थः । "स होवाच पितरं तात कस्मै मां दास्यसीति । द्वितीयं तृतीयम् । तं होवाच । मृत्वेव त्वा ददामीति । एवं पित्रा कुपितेनोक्तो नचिकेताः परिदेवयाञ्चकार "बहूनामेमि प्रथमो बहूनामेमि मध्यमः । किं स्विद्यमस्य कर्तव्यं किं मयाद्य करिष्यति' इति । अहं बहुनां पुत्राणां शिष्याणां वा मुख्यो मध्यमो वा न सर्वथा अधमः ईदृशमपि मां कुतो यमाय प्रादात्, तस्य वा प्रेत्तेन मया किं प्रयोजनमित्यर्थः । अथापि पितृवचनं मृषा माभूदिति मत्वा किं मयोक्तमिति शोकाविष्टं पितरमाह- "अनुपश्य यथा पर्वे प्रतिपश्य यथापरे । सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः' । पूर्वेषां पितृपितामहादीनां वर्तमानानां च साधूनां चरितानि शरीरानित्यतां च ज्ञात्वा यमाय मां प्रेषयेत्यर्थः । एवमुक्तेन पित्रा प्रेषितं यमभवनद्वारि तिस्रो रात्रीर्वसन्तं दृष्ट्वा प्रोष्यागतं यमं प्रति आर्याणां वाक्यम्-"वैश्वानरः प्रविशत्यतिथिर्बाह्मणो गृहान् । तस्यैतां शान्तिं कुवर्न्ति हर वैवस्वतोदकम्' अर्ध्यादिपूजां कुर्वित्यर्थः । अकरणे प्रत्यवायं चोचुः- "आशाप्रतीक्षे सङ्गतं सूनृतं च इष्टापूर्ते पुत्रपशूंश्च सर्वान् । एतद्वङ्क्ते पुरुषस्याल्पमेधसो यस्या-नश्नन् वसति ब्राह्मणो गृहे' कामसङ्कल्पसत्संयोगसत्यवाक्यत्वेष्टापूर्तपुत्रपश्चादीनुपवसन्नतिथिर्नाशयतीत्यर्थः । एवममात्यैरुक्तस्य मृत्योर्वचनम्- "तिस्रो रात्रीर्यदवात्सीः गृहे मे अनश्धन् ब्रह्मन्नतिथिर्नमस्यः । नमस्तेऽस्तु ब्रह्मन् स्सस्तिमेऽस्तु तस्मात्प्रति त्रीन् वरान् वृणीष्व' । इत्येवमुक्तो नचिकेतास्त्वाह- "शान्तसङ्कल्पस्सुमना यथा स्याद्वीतमन्युर्गौतमो माभिमृत्यो । त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत् त्रयाणां प्रथमं वरं वृणे' । शान्तसङ्कल्पः निवृत्तविचार इत्यर्थः । मा अभि-मां प्रतीत्यर्थः । त्वत्प्रसृष्टं मामभि प्रतीतः सोयं पुत्र इति प्रत्यभिज्ञानन् वदेत्, सल्लपत्वित्यर्थः । एवमुक्तस्य

मृत्योरुत्तरम्- "यथा पुरस्ताद्भविता प्रतीतः औद्दालकिरारुणिः प्रहृष्टः । सुखं रात्रीश्शयीत वीतमन्युस्त्वा दर्शितवान्मृत्युमुखात्प्रमुक्तम् ' । यथापूर्वं प्रत्यभिज्ञानात्वित्यर्थः । दर्शितवान् दृष्टवानित्यर्थः । पुनर्नचिकेता आह- "स्वर्गे लोके न भयं किञ्च नास्ति न तत्र त्वं जरया बिभेति' । तत्र वर्तमानो जरया युक्तस्सन् त्वत्तो न बिभेतीत्यर्थः । एवं स्वर्गं

१.२.१२

पशस्याह-"सत्वमग्निं स्वर्गमध्येषि मृत्यो प्रब्रूहि तं अद्दधानाय मह्यम् । स्वर्गलोका अमृतत्वं भजन्ते एतद्वितीयेन वृणे वरेण' स्वर्ग्यं स्वर्गसाधनमित्यर्थः । एकमुक्तो मृत्युराह - "प्रते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन् । अनन्तलोकाप्तिमधो प्रत्तिष्ठां विद्धित्वमेतं निहितं गुहायाम्' । अनन्तलोकाप्तिप्रतिष्ठासाधनभूतं विद्वद्बुद्धौ निविष्टमग्निं जानीहीत्यर्थः । तत्र श्रुतिवाक्यम् "लोका-दिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा' । इष्टका यावतीर्वा यथा वा-इष्टकास्वरूपतत्सङ्खयादिकमुपदिदेशेत्यर्थः । "स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः पुनराह तुष्टः' । प्रत्यवदत् अन्ववददित्यर्थः । "तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः । तवैव नाम्ना भवितायामग्निः सृङ्काञ्चेमामनेकरूपां गृहाण' । सृङ्का-रत्नमयी माला । त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू । ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति । त्रिणाचिकेतस्त्रयमेतद्विदित्वा एवं विद्वांश्चिनुते नाचिकेतम् । स मृत्युपाशात्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलोके । यो वाप्येतां ब्रह्मजज्ञात्मभूतां चितिं विदित्वा चिनुते नाचिकेतम् । स एव भूत्वा ब्रह्मजज्ञात्मभूतः करोति तद्येन पुनर्न जायते । एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्ितीयेन वरेण । एतमग्निं तवैव प्रवक्ष्यन्ति जनासः तृतीयं वरं नचिकेतो वृणीष्व । येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके । एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः' । एषां वाक्यानामर्थो ग्रन्थकृतैवानुमानिकाधिकरणे वक्ष्यते । एवमुक्तो मृत्युराह- "देवैरत्रापि विचिकित्सितं पुरा नहि सुज्ञेयमनुरेष धर्मः । अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम्' । मामोपरौत्सीः-अतिमा सृजैनम्-मां मा बधस्व । एनं वरं मां प्रति अतिसृज मुञ्चेत्यर्थः । एवमुक्तो नचिकेता आह- "देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यन्न सुविज्ञेयमात्थ । वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित्' । एव- मुक्तो मृत्युराह-"शतायुषः पुत्रपोत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान् । भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि' । आयतनम्-निवासस्थानमित्यर्थः । "एतत्तुल्यं यदि मन्यसे वरं वृणीष्व वित्तं चिरजीविकां च । महाभूमौ नचिकेत-स्त्वमेधि कामानां त्वा कामभाजं करोमि' । त्वमेधि-त्वं महाभूमौ राजा भवेत्यर्थः । "ये ये कामा दुर्लभा मर्त्यलोके सर्वान् कामान् छन्दतः प्रार्थयस्व । इमा रामास्सरथास्सतूर्या न हीदृशा लम्भनीया मनुष्यैः । आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानु-प्राक्षीः' । मरणसम्बन्धं येयं प्रेतप्रश्नं न प्रष्टुमर्हसीत्यर्थः । एवं प्रलोभितोपि नचिकेता आह- "श्वोभावा मर्त्यस्य यदन्तकैतत्सर्वे-न्द्रियाणां जरयन्ति तेजः । अपि सर्वं जीवितमल्पमेव तवैव भावास्तव नृत्तगीते' इति । श्वः अभावः येषां ते श्वोभावाः, त्वदुपन्य-स्तभोगाः सर्वे अपि विनश्वरा इत्यर्थः । सर्वेन्द्रियाणामिति । किञ्च ते भोगाः सर्वेन्दियबलनाशका इत्यर्थः । तवैव भावास्तव नृत्तगीते इति । भावा रामादयो नृत्तगीतादिकं च तवैव सन्त्वित्यर्थः । "न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वाम् । जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयस्य एव' । वित्तं न तृप्तिहेतुः, किञ्च त्वद्दर्शने धनायुषोः को भारः ? अतस्स एव वरणीय इत्यर्थः ।"अजीर्यतामृतानामुपेत्य जीर्यन्मर्त्यः क्वधस्थः प्रजानन् । अभिध्यायन् वर्णरतिप्रमोदान् नातिदीर्घे जीविते को रमेत' । क्वधस्थः-भूरूपाधोलोके वर्तमानः । प्रजानन्-विवेकी मनुष्यः देवानामपि समीपं गत्वा वैषयिकभोगप्रवणः । अत्यल्पे जीविते को रमेतेत्यर्थः । "यस्मिन्निदं विचिकित्सन्ति मृत्यो साम्पराये महति ब्रूमि नस्तत्' । यस्मिन्

परलोके देवानामपि विचिकित्सा तमेव ब्रूहीत्यर्थः । अतः परं श्रुतिवचनम्- "योऽयं वरो गूढमनुप्रविष्टो नान्यं तस्मान्नचिकेतो वृणीते' । अतः परं मृत्युवचनम्-"अन्यच्छ्रे-योऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः । तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्यः प्रेयो वृणीते' । सिनीतः-बध्नीतः, भिन्नप्रयोजने श्रेयःप्रेयसी पुरुषसम्बन्धिनी भवतः । तयोर्मध्ये श्रेय आददानस्य साधुत्वम्, अन्यस्य तदभावश्चेत्यर्थः । "श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः । श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमान् वृणीते । एतः-प्राप्नुवत इत्यर्थः । सम्परीत्य सम्यगालोच्य प्रेयोपेक्षया अभ्यर्हितं श्रेयः धीरो वृणीते । मनदस्तु प्रेयोरूपशरीराप्यायकान्नपानादि वृणीते इत्यर्थः । "न त्वं प्रियान् प्रियरूपांश्च कामान् अभिध्यायन्नचिकेतोऽत्यस्राक्षीः । नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः' सृङ्का-कुत्सिता गतिः । दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता । विषूची- विरुद्धगती इत्यर्थः । "विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्त' । विद्यानीप्सिनम् विद्याभिलाषिणमित्यर्थः । "अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः । दन्द्रभ्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः' । दन्द्रभ्यमाणाः-कचत्सितां गतिं गच्छन्त इत्यर्थः ।

१.२.१२

"न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् । अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे' । बालम्-अज्ञं प्रति, साम्परायः परलोको न भातीत्यर्थः । अयं लोक इत्यस्यार्थः संयमने त्वनुभूयेत्यत्र वक्ष्यते । "श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोपि बहवो यं न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः' । यस्य श्रवणं वेदनं वक्ता लब्धा ज्ञाता वा दुर्लभ इत्यर्थः । कुशलानुशिष्टः-कुशलेनाचार्येणानुशिष्ट इत्यर्थः । "न नरेणावरेण प्रोक्त एष सुविज्ञोयो बहुधा विचिन्त्यमानः । अनन्यप्रोक्ते गतिरत्र नास्ति अणीयान् ह्यतर्क्यमणुप्रमाणात्' । अवरेण-अल्पज्ञेनाचार्येण प्रोक्तोऽयमात्मा ज्ञातुं शक्यः वादिभिर्बहुधा उत्प्रेक्ष्यमाणः, अन्येन प्राकृतेन मनुष्येण प्रोक्ते उपदिष्टे सत्यवगतिर्नास्ति, यतोऽयमणोरप्यणीयानित्यर्थः । तदेवाह- "नैषा तर्केण मतिरापनेया प्रोक्तोऽन्येन सुज्ञानाय प्रेष्ठ । यं त्वमापस्सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतः पृष्टा । आत्मविषया पतिस्तत्प्राप्या न भवति, हे प्रेष्ठ हे प्रियतम ! अन्यप्रोक्तोपि आगमानभिज्ञप्रोक्तोपि सुज्ञानाय न भवति । यद्विषयिणीं मतिं त्वं प्राप्तवानसि, स आत्मा दुरधिगमः । त्वं यतः प्रलोभ्यमानोपि अविचालितः, अतस्त्वं धीरः, तस्मात् त्वादृश एव न शिष्यस्स्यादित्यर्थः । "जानाम्यहं शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत् । ततो मया नाचिकेतश्चितोग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् । कामस्याप्तिं जगतः प्रतिष्ठां क्रतोरनन्तमभयस्य पारम् । स्तोमं महदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिकेतोऽत्यस्राक्षीः । तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति । एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म-मणुमेयमाप्य । संमोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसं मन्ये । अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्र भूताद्भव्याच्च यत्तत्पश्यसि तद्वद । सर्वे वेदा यत्पदमामनन्ति सर्वाणि भूतानि च यद्वन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत् । एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् । एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते । न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् । अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे । हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते । अणोरणी-यान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम् । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् । आसीनो दूरं व्रजति शयानो याति सर्वदा । अस्तं वदाम तं देवं मदन्यो ज्ञातुमर्हति । अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महान्तं विभुमात्मानं मत्वा धीरो न शोचति । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् । नाविरतो

दुश्चारितान्नाशान्तो नासमाहितः । नाशान्तमनसो नापि प्रज्ञानेनैनमाप्नुयात् । यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः । ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः । यस्सेतुरीजानानामक्षरं ब्रह्म यत्परम् । अभयं तितीर्षतां पारं नाचिकेतं शकेमहि । आत्मानं रथिनं विद्धि शरीरं रथमेव च' इत्यादि ।

निर्विशेषतापत्तिर्मोक्षश्चेदिति - ततश्चोपायविशेषनिर्धारणं नासत्तावधारणात्मकमोक्षस्वरूपनिर्धारणं न सम्भवतीति मोक्ष-ज्ञानार्थत्वं तदनुबन्धिज्ञानस्य युज्यत इति भावः । ज्ञातेतरविषयत्वादिति - देहातिरिक्तस्य नित्यस्यात्मनो ज्ञातत्वेन प्रत्नस्य

१.२.१२

तद्व्यतिरिक्तविषयत्वादित्यर्थः । श्रुत्यन्तरसंवादमिति - "न प्रेत्य संज्ञास्ति' इति वाक्यस्य मोक्षदशायां स्वाभाविकापरिच्छिन्नज्ञा-नसङ्कोचाभावेन भूतसङ्घातेनैकीकृत्यात्मनि देवादिरूपज्ञानं नास्तीत्यर्तकत्वादिति भावः । परावरात्मतत्त्वविज्ञानमिति व्याख्येयं पदम् । प्राकरणिकपूर्ववाक्यस्थहेतुपरं द्वितीयमिति - अत्र यद्वक्तव्यम् तत्पूर्वमेवोक्तम् ।

हिशब्दपञ्चम्यन्तपदयोरुभयोः श्रवणादिति - इतरथा हिशब्दस्यात् हेतुत्वार्थकत्वेन पौनरुक्तयप्रसङ्गादित्यर्थः । स्वपक्षे पौनरु-क्तयाभावमुपपादयति - गुहां प्रविष्टयोरिति । सूत्रार्थस्य दर्शयतीति - गुहाप्रविष्टयोरात्मत्वरूपसूत्रार्थस्येत्यर्थः । गुहाप्रविष्टयो-

१.२.१२

रात्मत्वादत्ता परमात्मेत्यर्थः । नन्वेवं हि परेषां योजना; गुहां प्रविष्टौ जीवपरावेव । कुतः? आत्मानौ हि तौ, चेतनौ हि तावित्यर्थः । द्वयोरपि चेतनत्वेन सजातीयत्वात् ऋतपानलिङ्गेन निश्चितस्य द्वितीयापेक्षायां सजातीयस्य चेतनान्तरस्यैव ग्रहणमुचितम् । अस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते द्वितीयो गौरेवान्विष्यते, नाश्वादि । यदुक्तं परमात्मनो गुहाहितत्वं नोपपद्यत इति तन्न; श्रुतिस्मृतिषु परमात्मनोपि गुहादितत्वदर्शनात् परमात्मनोपि गुहाहितत्वं नोपपद्यत इति । अतो भवत्पक्ष इवास्मत्पक्षेपि गुहां प्रविष्टाविति सैत्रं पदं सिद्धान्तयुक्तिसूचकम् । अस्मन्मते पूर्वपक्षयुक्तिसूचकम् । अतः पूर्वपक्षद्योतकनिर्देशोऽनावश्यक इत्यस्वरसादाह - अर्भकौकस्त्वादिति परस्योपपन्न इतीतिच्छेदः । कृतकरत्वादिति - अर्भकौकस्त्वादितिसूत्रेणेत्यर्थः ।अस्मिन्नधिकरणे एष एव न्यायो "द्वासुपर्णो सयुजौ सखायौ' इत्यत्रापि शाङ्करभाष्ये यदुक्तं तद्दूषयति-द्वासुपर्णाविवितिवाक्य इत्यादिना । ननु षैङ्गिरहस्यब्राह्मणानुसारेण द्वासुपर्णेति मन्त्रस्य बुद्धिजीवपरत्वेन एतन्न्यायातिदेशस्य तद्भाष्य एव दूषितस्य दूषणं किमर्थं क्रियत इत्याशङ्कय तदभिमतबुद्धिजीवपरत्वमपि न सम्भवतीत्याह - तस्य च वाक्यस्येति । ।। इति अत्रधिकरणम् ।।

१.२.१३

स्वरूपसत्सन्निधानस्य प्रसिद्धावनुपयोगात् सर्वेन्द्रियकन्दभूते हृदये वर्तमानस्य चक्षुषि सन्निधानाभावाच्च व्याचष्टे - सन्निधा-नावगमादिति । चक्षुष्यवगमादित्यर्थ इति - चक्षुषावगमादित्यर्थः, उत्तरग्रन्थानुसारात् । ननु-उन्मीलितं हीत्यादिभाष्येण चक्षुषो देहे जीवस्थितिगतिनिश्चायकत्वमुपपादितम् । नैतावता "अक्षिणि पुरुषो दृश्यते' इति सप्तम्यर्थ उपपादित इत्याशङ्कयाह - अस्मिन् कर्मणीति । अनेन कर्मणा अस्य सामर्थ्यं दृष्टमिति वक्तव्ये अस्मिन् कर्मण्यस्य सामर्थ्यं दृष्टमितिवत् अक्ष्णा दृश्यत इति वक्तव्ये अक्षिणि दृश्यत इत्युक्तिरिति भावः । दृष्टमिति - सूचितमित्यर्थः । उत्तरत्र सूचक इति ग्रन्थानुसारात् । अथवा सूचकमित्यस्य दर्श-कमिति वार्थस्समाश्रयणीयः । ननु "य एषोऽन्ताक्षिणि पुरुषो दृश्यते' इत्यस्य परतमात्मपरत्वस्य "अन्तस्तद्धर्मोपदेशात्' इत्यधिक-रणेन समर्थितत्वात् कथं तत्तुल्यनिर्देशेऽस्मिन् वाक्ये अस्य पूर्वपक्षस्योत्थितिरिति चेत् सत्यम्, तत्र जीव इति पूर्वपक्षस्तत्रत्यानन्यथा-

१.२.१४

सिद्धलिङ्गेन प्रत्याख्यातः, इह तु बाधकलिङ्गाभावात् प्रसिद्धिदृश्यत्वाभ्यां प्रतिबिम्बादिपूर्वपक्षस्योत्थितिः । नन्वेवमपि "एतं संयद्वाम इत्याचक्षते । एतं हि सर्वाणि वामानि संयन्ति सर्वाण्येव वामान्यभिसंयन्ति य एवं वेद । एष उ एव वामनिः । एष हि सर्वाणि वामनि नयति, सर्वाणि वामनि नयति य एवं वेत । एष उ एव भामनिः । एष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति । य एवं वेद, इत्या-दिना प्रदर्शितानां सर्वकामोपेतत्वसकलशुभप्रापकत्वसर्वलोकभासमानत्वरूपाणां संयद्वामत्ववामनित्वभामनित्वानां तत्तदनुरूपफल-रूपतात्पर्यलिङ्गानुगृहीतानां "एष आत्मेति होवाच एतदमृतमेतदभयमेतद्ब्रह्म' इति श्रुतिप्रतिपादितानामौपसंहारिकाणां बहूनामात्म-त्वामृतत्वाभयत्वब्रह्मत्वानामनन्यथासिद्धब्रह्मलिङ्गानां सत्त्वे प्रसिद्धिदृश्यत्वलिङ्गाभ्यां प्रथमश्रुताभ्यामपि कथं पूर्वपक्षोत्थितिरित्या-शङ्कयाह - इतिकरणञ्चार्थतात्पर्यद्योतकमिति । मनो ब्रह्मेत्युपासीतेत्यादौ इतिशब्दप्रयोगे अर्थे तात्पयदर्शनादिति भावः ।।

१.२.१५

शिष्यबुद्धिसौकर्यार्थमाह - राद्धान्ते इति । व्याख्यायत इति शेषः । बहुवचनाभिप्रायं वक्तुं पुनरपि तमेव प्रतीकं गृह्णाति - एषा-मितीति । अर्थपरत्वमेव दृष्टमिति चानुसन्धेयमिति - इतिशब्दस्तत्रैवार्थविवक्षां वारयति, यत्र ज्ञानसम्बन्धो विवक्ष्यते यथा मनो ब्रह्मेत्युपासीतेत्यादौ । यत्र तूक्तार्थवच्छेदेन वचनसम्बन्धस्तत्रेतिशब्दो नार्थविवक्षां वारयति । यथा इति ह स्मोपाध्यायः कथयती-त्यादाविति भावः । परोक्तसिद्धान्तयुक्तिं दूषयति - तद्यद्यप्यस्मिन्नित्यादिना ।।

व्यतिरेकस्य वक्ष्यमाणत्वाच्चेति - स्थितिव्यतिरेकस्य हेतूकरिष्यमाणत्वात् तदन्वयो हेतूकर्तुमुचितमिति भावः । नतु प्रदेशपर-तयेति - न परमतवदधिकरणपरतयेत्यर्थः । जीवात्मनि सम्भवतस्तस्येति - नन्वाकाशवत्सर्वगतस्य ब्रह्मणः कथकत्यल्पाक्षिस्थान-त्वमित्याशङ्कय यः पृथिव्यां तिष्ठन्नित्यादिस्थानव्यपदेशवत् नामरूपरहितस्यापि ब्रह्मणः तस्योदिति नाम हिरण्यश्मश्रुर्हिरण्यकेशः इति नामरूपोपदेशवच्च सर्वगतस्यापि ब्रह्मण उपलब्ध्यर्थं स्थानविशेषो न विरुध्यत इत्येव परैरुक्तम् नतु नामरूपवत्ताया अपरमात्मसाध-कत्वमुपन्यस्तम् । येनायं दोषस्यादिति चेत् उच्यते; सर्वगतस्य ब्रह्मणः कथमत्यल्पाक्षिस्थानकत्वमितिशङ्कायां "यश्चक्षुषि तिष्ठन्' इति श्रुत्यन्तरे चक्षुषः स्थानत्वेन व्यपदेशादित्येवमस्मदुक्तरीत्या वक्तुं शक्यत्वेन नामरूपरहितस्य ब्रह्मणोऽनुचितस्थाननामरूपाणां व्यप-देशदर्शनादिति शिरोवेष्टनेन नासिकाग्रहणस्यायुक्तत्वादित्यत्र तात्पर्यात् । अस्मत्पक्षेपि सम्भवतीति - अन्यथासिद्धिः फलितेति शेषः। अर्थतश्शब्दतश्चेति - "यश्चक्षुषि तिष्ठन्' इत्यादावर्थतः प्रसिद्धिः । "दृश्यते त्वग्रयया' इत्यादौ शब्दतः, इदमुपलक्षणम् । "य एषोऽक्षिणि पुरुषो दृश्यते' इत्यक्षिविद्यायां शब्दतोऽर्थतश्च प्रसिद्धिर्द्रव्या । साधकान्तरप्रदर्शनपरमिदं सूत्रमिति - ननु चक्षुषि स्थितिनियमनादिकं मिलितं परमात्मत्वसाधकम्; उत स्थितिमात्रम् । नाद्यः, स्थितिनियमनादेर्मिलितस्य परमात्मत्वसाधकत्वेपि य एषोक्षिणीतिवाक्ये मिलितस्याश्रवणात् । न द्वितीयः, स्थितिमात्रस्य परमात्मव्यतिरिक्तेष्वपि सत्त्वेन तदसाधारणत्वाभावात् । अतः पूर्वपक्षोक्तयुक्तयन्यथासिद्धिपरत्वमेव वक्तव्यमिति चेत् उच्यते; उत्तरत्र सूत्रार्थनिष्कर्षावसरे श्रुत्यन्तरप्रदर्शनमुखेन स्ववाक्यस्थशङ्का-परिहारपरं द्वितीयसूत्रमित्याचार्यैरेव वक्ष्यमाणत्वान्न तत्राग्रहः ।।

"उपकोसलो ह वै कामलायनस्सत्यकामे जाबाले ब्रह्मचर्यमुवास । तस्य ह द्वात्रिंशद्वर्षाण्यग्नीन् परिचचार । स ह स्मान्यानन्ते-वासिनस्समावर्तयंस्तं ह स्मै व न समावर्तयति । तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन् पर्यचारीत् । मा त्वाऽग्नयः परिप्रावोचन् प्रब्रूह्यस्मा इति । तस्मै हा प्रोच्यैव प्रवासांचक्रे । स ह व्याधिनाऽनशितुं दध्रे । तमाचार्यजायोवाच । ब्रह्मचारिन्तशान किंनु नाश्नासीति । स होवाच बहव इमेऽस्मिन् पुरुषे कामा नानात्यया व्याधिभिः परिपूर्णोस्मि नाशिष्यामीति । अथ हाग्नयस्समुदिरे । तप्तो ब्रह्मचारी कुशलं न पर्यचारीत् । हन्तास्मै

प्रब्रुवामेति । तस्मै होचुः । प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति । ते होचुः । यदेव कं तदेव खं यदेव खं तदेव कमिति । प्राणं च हास्मै तदाकाशं चोचुः । अथ हैनं गार्हपत्यो-ऽनुशशास । पृथिव्यग्निरन्नमादित्य इति । य एष आदित्ये पुरुषो दृश्यते सोहमस्मि स एवाहमस्मीति स य एतमेवं विद्वानुपास्ते । अपहते पापकृत्यां लोकीभवति । सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयन्ते उपवयन्तं भुञ्जामोऽस्मिंश्च लोके अमुष्मिंश्च य एतमेवंविद्वानुपास्ते अथ हैनमन्वाहार्यपचनोऽनुशशास आपो दिशो नक्षत्राणि चन्द्रमा इति । य एष चन्द्रमसि पुरुषो दृश्यते सोऽह-मस्मि स एवाहमस्तीति स य एतमेवं विद्धानुपास्ते' इत्यादि पूर्ववत् । अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्युदिति य एष विद्युति पुरुषो दृश्यते सोहमस्मि स एवाहमस्तीति स य एतमेवंविद्धानुपास्ते' इत्यादि । ते होचुरुपकोसलैष सोम्य तेऽस्मद्विद्या

१.२.१५

चात्मविद्या च आचार्यस्तु ते गतिं वक्तेति आजगामाहास्याचार्यस्तमाचार्योभ्युवाद उपकोसल इति भगव इति ह प्रतिशाश्रुव । ब्रह्मविद इव सोम्य ते सुखं भाति को नु त्वानुशशासेति कोनु मानुशिष्याद्भो इति उहापेव निहनुते इमे नूनमीदृशा अन्यादृशा इति हाग्नीनम्पूदे । किं नु सोम्य किल तेऽवोचन् इदमिति ह प्रतिजज्ञे लोकान् वा व किल सोम्य ते अवोचन् अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाशे आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यत इति ब्रवीतु मे भगवानिति । तस्मै होवाच य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमेतदभयमेतद्ब्रह्मेति । तद्यद्यप्यस्मिन् सर्पिर्वा उदकं वा सिञ्चति वर्त्मनीव गच्छति एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयन्ति सर्वाण्येनं वामान्यभिसंयन्ति य एवं वेद एष उ एव वामनिः । एष हि सर्वाणि वामानि नयति सर्वाणि वामानि नयति य एवं वेद । एष उ एव भामनिरेष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद । अथ यदु चैवास्मिन् शव्यं कुर्वन्ति यदु च नार्चिषमेवाभिसम्भवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षम् आपूर्यमानपक्षाद्यान् षडुदङ्ङेति मासास्तान् मासेभ्यस्सं-वत्सरं संवत्सरादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति एष देवपथो ब्रह्मपथ एतेन प्रति-पद्यमाना इमं मानवमावर्तं नावर्तन्ते नावर्तन्ते' इति श्रुतिक्रमः । श्रुत्यनुरोधेन सूत्रं योजयित्वा सूत्रानुरोधेन श्रुतिं योजयति - तद्गुण-सारत्वादितिन्यायेनेति । अयन्तु हेतुर्व्यतिरेकोक्तिनिरपेक्ष इतीति - इदमुपलक्षणम्, स्वसद्भावसाधने हेत्वन्तरनिरपेक्ष इति द्रष्टव्यम् । अत एव भाष्ये सामान्यत एवकारो नैरपेक्ष्यं द्योतयतीत्युक्तम् । ततश्च ब्रह्मणः प्रस्तुतत्वेप्यग्निविद्याव्यवहितत्वान्नास्य परामर्शः, अत-स्सुखविशिष्टाभिधानादिति हेतोरसिद्धिरिति या शङ्का सापि नैरपेक्ष्यद्योतकेनैवकारेण सूत्रकृता व्यावर्त्यत इति भाष्याभिप्राय इति भावः । अङ्गानामप्यङ्गिफलाविरुद्धेति - पात्रधारणोपयुक्तप्रस्तरप्रतिपविरूपतया क्रत्वर्थस्यैव सतः प्रस्तरप्रहरणस्य श्रुतिविनियुक्ता-युरादिफलप्रदिपादकसूक्तवाककरणकत्वान्यथानुपपत्त्या फलसाधनत्ववत् ब्रह्मविद्याङ्गभूतायाः अग्निविद्याया अपि फलार्थत्वमुपपद्यत इति भावः । उपक्रमोपसंहारयोरुभयत्रेति योजना, नतु व्याख्येयं पदम् । तद्वाक्यस्योत्तरत्रावतरिष्यमाणत्वादिति मन्तव्यम् । हेतु-चतुष्टयेनेति -

यद्यप्युपक्रमोपसंहारयोर्ब्रह्मसंशब्दनमपि "आचार्यस्तु ते गतिं वक्ता' इत्यग्निवचनवदग्निविद्यायाः प्राक् ब्रह्मविद्याया असमाप्तावेव हेतुः । ततश्च प्रस्तुतब्रह्मविद्योपक्रमतदुपसंहारमध्यपतितत्वात् "अथ हैनम्' इत्यन्वादेशात् । समुच्चित्योपदेशाच्चेति हेतुत्रयमेवोपन्यस्यत इति शक्यं वक्तुम् । भाष्येपि तथैव प्रतीयते, न प्रकारान्तरेण; तथापि साक्षात्परम्परोपपादकसाधारण्येन

१.२.१५

चतुष्टयमुपन्यस्तं द्रष्टव्यम् । पुनः परामर्शो ह्यन्वादेश इति - क्रियान्तरसम्बन्धितया शब्दतः प्रकृतस्य पुनः क्रियान्तरसम्बन्धितया शब्दतः प्रतिपादनमन्वादेशः इत्यर्थः । उपदेष्टव्यत्वविशेषविवक्षयेति - मोक्षफले समप्रधानत्वाभावेन समुच्चयाभावेप्युपदेशक्रियायां समुच्चयस्सम्भवतीति भावः । यद्वा सम्बन्धमात्रपर इति - नतु

समप्राधान्येन सम्बन्धपर इत्यर्थः । "द्रव्यसंस्कारकर्मसु परार्थत्वात्फ-लश्रुतिरर्थवादः स्यात्' इति जैमिनीयसूत्रपाठः । द्रव्यगुणसंस्कारकर्मस्विति क्वचित् कोशो पाठो लेखकस्खलनकृतः । एतत्सूत्रार्थश्च शेषत्वात् पुरुषार्थवाद इत्यत्रास्माभिस्स्पष्टयिष्यते । ब्रह्मविद्यानुगुणफलत्वं दर्शयतीति - सत्पुत्रपौत्रादिसन्तत्यभिवृद्धेः पितृपिता-महाद्यार्जितविद्यार्थपुण्यकर्मफलाभिवृद्धौ हेतुत्वादित्यर्थः । "शिष्टेषु कर्मसु वर्तमानाः पूर्वेषां साम्पराये कीर्तिं स्वर्गं च वर्धयन्ति' इत्या-पस्तम्बोक्तेरिति द्रष्टव्यम् । भाष्ये-श्रुत्यन्तरे ब्रह्मविद्याफलत्वेन श्रूयत इति । नचाग्निविद्यायां ब्रह्मविद्योपयुक्तसत्सन्ततिरूपफलजनक-त्वकीर्तनावसरे सत्सन्ततेः ब्रह्मविद्याफलत्वप्रापकश्रुत्यन्तरोदाहरणमयुक्तमिति वाच्यम्; निर्दिष्टफलानां पूर्वपक्ष्यभिमतब्रह्मविद्या-

१.२.१६

विरोधित्वप्रतिक्षेपमात्रे तात्पर्यात् । अङ्गयनुकूलफलजनकत्वाभावेपि अङ्गविरुद्धफलजनकत्वाभावेप्यङ्गत्वं सम्भवतीत्येव भाष्य-कृत्संरम्भात् अत एव वक्ष्यति- "अन्यथा त्वंशब्दात्' इति सूत्रे आर्थवादिकमपि फलं तदविरुद्धं ग्राह्युमेवेति । उपशब्दार्थ इति - पर्यन्तवाचिना परीत्युपसर्गेण उपशब्दार्थभूतं सामीप्यं सूच्यते, अतो विघ्ननिवारणपर्यन्तत्वलाभ इति भावः । एकप्रकरणत्वे स्थितेपीति - पूर्वं ब्रह्मणः प्रकृतत्वे अग्निविद्याव्यवधानाभावे च सत्यपीव्यर्थः । सह व्याधिनाऽनशितुं दद्ब्र इति वाक्यार्थमभिप्रयन्नाह, भाष्ये-अनाश्वासमिति । "उपेयिवाननाश्वा'निति नञ्पूर्वादश्नातेरनाश्वानितिरूपम्, अभुक्तवन्तमित्यर्थः । यावतेत्येतद्वयाचष्टे - प्रत्युतेति । नतु ब्रह्मशब्देनेति - ब्रह्मोपदिष्टं चेत् ब्रह्मोचुरित्येव निगमनं स्यादिति भावः ।

निगमनवाक्यस्थ पुंल्लिङ्गेति - "प्राणं च हास्मै तदाकाशं चोचुः' इति निगमनवाक्यस्येत्यर्थः । न चाकाशशब्दस्योभयलिङ्गतया

१.२.१६

पुल्लिङ्गत्वसम्भवेपि नपुंसकलिङ्गतत्पदसमभिव्यवाहारान्निगमनवाक्यस्थाकाशशब्दस्यापि नपुंसकतया कथं तत्कटाक्षेण स इति पुल्लिङ्गप्रयोग इति वाच्यम्, स चासावाकाशश्च तदाकाश इति तदाकाशपदस्य समस्ततया तस्य नपुंसकलिङ्गत्वे प्रमाणाभावेन "आत्मन आकाशस्सम्भूतः' "आकाश इति होवाच' "आकाशो ह वै नामरूपयोर्निर्वहिता' "यदेष आकाश आनन्दो न स्यात्' इत्यादिप्रयोगानुसारेण आकाशशब्दस्य पुल्लिङ्गतया प्रसिद्धिप्राचुर्येण पुल्लिङ्गत्वोपपत्तेः, इदञ्चोपलक्षणम् । कं ब्रह्म खं ब्रह्मेतिवा- क्यानां ब्रह्मेत्यादिवाक्यसारूप्यात् दृष्टिविधित्वमस्त्विति वदतः प्राणो ब्रह्मेतिवाक्येपि दृष्टिविधित्वमभिमतम् । अतः प्राणो ब्रह्मे-त्यत्रापि दृष्टिविधित्वपरिहारेण प्राणस्यापि ब्रह्मत्वमिह सूत्रे सिसाधयिषितम् । अतः प्रक्रमश्रुतपुल्लिङ्गप्राणशब्दानुरोधात् स इति प्राणः परामृष्ट इत्युक्तौ दोषाभावात् न चैवं कंखंशब्दनिर्दिष्टयोर्ब्रह्मत्वं नोक्तं स्यादिति वाच्यम्; खशब्दाभिधेयो यस्स आकाश इत्युक्ता-वपीतरयोस्समत्वात् । यदि चैकस्य निर्देशे इतरयोरपि निर्दिष्टत्वं सिद्धमिति मतम्, तदस्मत्पक्षेपि समानमित्यास्तां तावत् । वाक्यद्वयस्थाविति - "य एषोऽक्षिणि पुरुषः' इत्यत्र स्थानगुणविध्यर्थं कं ब्रह्मेतिवाक्योक्तसुखविशिष्टाभिधानव्यक्तिविशेष एकः पूर्वसूत्रे साधकतयोक्तः । इह तु "यद्वा व कं तदेव ख'मितिवाक्यगताभिधानव्यक्तिविशेष एक इति द्वौ व्यक्तिविशेषावित्यर्थः । अर्थसामर्थ्याच्छ्रुतिव्यक्तिविशेषसिद्धिरिति - नात्माश्रुतेरित्यत्रात्मानुत्पत्तिप्रतिपादिका "न जायते मि्रयते' इत्यादिका विवक्षिता या श्रुतिः न सा श्रुतिव्यक्तिः "ज्ञोऽत एव' इत्यनन्तरसूत्रे अतश्शब्देन परामृश्यते, अपितु ज्ञत्वपतिपादिका "विज्ञातारमरे केने'-त्यादिकाऽन्यैव श्रुतिः तद्वदित्यर्थः । नन्वश्रुतवेदान्तस्योपकोसलस्य मुमुक्षवे प्रतीकोपासनं नोपदेश्यमिति ज्ञानं तथा प्राणो ब्रह्मेत्यत्र प्राणस्य शरीरत्वं शरीरत्वे च शरीरवाचिशब्दानां शरीरिपर्यन्तत्वमित्येतावज्ज्ञानं कथं स्यात् । शरीरं नियाम्यमिति ज्ञानञ्च कथम् ?

१.२.१६

तथा कं ब्रह्म खं ब्रह्मेत्यत्र प्राणो ब्रह्मेत्यत्रेव वैषयिकसुखभुताकाशशरीरकत्वनिश्चयस्यैव सम्भवेनान्योन्यविशेषणभावस्य क्वाप्यदृष्ट-चरस्य कथं प्रतिपाद्यत्वशङ्कोत्थानम्, अतश्चैतादृशविचारसम्भवः कथमितीमामाशङ्कां परिहरति - मुमुक्षोः प्रतीकोपासनमित्यादिना सम्भवति तद्वदितिच्छेदः, पतीकोपासनशङ्काया मुमुक्षूपदेश्यत्वाज्ञाताज्ञातविभागकथनानुपपत्तिनिरास्यत्वे सौत्रहोतोर्निरासकत्वं न

१.२.१७

स्यादित्याशङ्कय सौत्रहोतोरपि निरासकत्वं समर्थयते - यद्वा व कं तदेव खमित्यादिना । न ह्यर्थान्तरदृष्टिविध्यज्ञानस्येति - अन्यतरप्रकारं न जानामीति वदन्तं प्रतीत्यर्थः । अज्ञानवचनादिति - दृष्टिविधित्वेन सर्वस्यापि ज्ञातत्वादिति पूर्वमुक्तत्वादित्यर्थः । अन्योन्यविशेषणविशेष्यभावस्याप्रामाणिकत्वादिति - न चापरिच्छिन्नसुखरूपत्वयोः कंखंशब्दाथर्योरन्योन्यव्यवच्छेदकत्व-वन्नीलोत्पलयोरपि परस्परव्यवच्छेदकत्वे को दोषः? यदेव नीलं तदेवोत्पलं यदुत्पलं तन्नीलमिति सम्भवादिति वाच्यम्; तथात्वे विशेषणं विशेष्येणेति समासे पूर्वनिपातानियमप्रसङ्गेनोत्पलनीलमित्यपि वाक्यस्यापि च स्वारस्यपरित्यागेनान्योन्यविशेषणतया ब्रह्मस्वरूपपरत्वमेव नोपास्यपरत्वमित्याहुः ।।

उपनिषत्सु प्रतीकोपासनानामिति - ये श्रुतोपनिषदोपि प्रतीकमुपासते तेषामर्चिरादिगतेरनुसन्धेयत्वाभावात्तद्व्यावृत्त्यर्थमधिगत-परमपुरुषयाथात्म्यस्येति व्याचष्ट इत्यर्थः । नन्वेवमपि ये पुनरधिगतपरमपुरुषयाथात्म्या अदृष्टवैगुण्यवशान्न ब्रह्मोपासते तेषामर्चिरा-दिगतेरनुसन्धेयत्वाभावात् पुनरपि स दोषस्तदवस्थ इति चेन्न; अधिगतपरमपुरुषयाथात्म्यस्येत्यस्य ब्रह्मोपासकस्येत्यर्थात् । ब्रह्म-विद्याङ्गत्वज्ञापकश्रुत्यन्तरज्ञापनार्थमिति - श्रुताः पठिताः उपनिषदः अङ्गभावप्रतिपादकत्वेन यस्या गतेः सा श्रुतोपनिषत्का, अङ्गभावप्रतिपादकपठ्यमानोपनिषत्प्रतिपाद्यगत्यभिधानादित्यर्थ इत्येवमावृत्त्या श्रुतोपनिषत्कस्य पुरुषस्य श्रुतोपनिषत्कगत्यभि-धानादिति प्रदशर्नार्थम् । श्रुतोपनिषत्केत्यधिकाक्षरोपादानमिति श्रुत्यन्तरप्रतिपाद्यमानार्चिरादिकेति भाष्याभिप्राय इति भावः । ततश्च श्रुतोपनिषत्केत्यनेनायमर्थः कथं लभ्यते ? श्रुतब्रह्मण इत्युक्ते कुतो न लभ्यत इति शङ्का पराकृता । सूत्रस्य सवर्तो मुखत्वात् आवृ-त्तिरलङ्कार इति द्रष्टव्यम् - तत्प्रतुनयविरोध इत्यभिप्रायेणेति - प्राप्यस्य परमपुरुषस्योपासनविषयत्वावश्यम्भावादिति भावः । ननु "अथ यदुचैवास्मिन् शव्यं कुर्वन्ति यदु च न' इति पूर्ववाक्ये अस्मिन्नित्येकवचननिर्देशात्कथं "तेऽर्चिषमेवाभिसम्भवन्ति' इत्युक्ति-रित्याशङ्कय पूर्ववाक्यस्थस्यास्मिन्नित्यंशस्य जात्यभिप्रायत्वान्न दोष इत्यभिप्रयन्नाह - अर्चिषमेवेत्यतः पूर्वमिति । नन्वस्यामुप-

१.२.१८

कोसलविद्यायामर्चिरादिगतिप्रतिपादनं व्यर्थम् । "तद्य इत्थं विदुर्ये चेमे अरण्ये श्रद्धा तप इत्युपासते' इतिपञ्चाग्निविद्यावाक्यसि- द्धत्वात् । न च "आचार्यस्तु ते गतिं वक्ता' इति गतेराचार्यवक्तव्यत्वेनाग्निभिरुपदिष्टत्वात् आचार्येण गतिरुक्तेति वाच्यम्; अग्नयो वा किमर्थं तथोचुरिति पर्यनुयोगस्य तत्रापि समत्वादित्यत्राह - पञ्चाग्निविद्येति । ननु श्रुतोपनिषत्कगत्यभिधानं कथमक्षिपुरुषस्य परमात्मत्वसाधकम्, अग्निभिस्सुखविशिष्टब्रह्मोपासनमुदिश्य तच्छेषत्वेन "आचार्यस्तु ते गतिं वक्ता' इति आचर्यवक्तव्यत्वेनोक्ता गतिराचार्येणोपदिष्टेत्येतावताक्षिपुरुषस्य ब्रह्मत्वे किमायातम् ? अग्न्युपादिष्टसुखविशिष्टविद्याया ब्रह्मविद्यात्वमात्रेणापि अर्चिरा-दिगत्यभिधानस्य सङ्गतत्वात् । नचाग्न्युपदिष्टसुखविशिष्टस्य ब्रह्मत्वे सिद्धे सुखविशिष्टाभिधानादेव चेतिसूत्रोक्तन्यायादेवाक्षिपुरु-षस्यापि ब्रह्मत्वं सिद्धमिति वाच्यम्; तथात्वे श्रुतोपनिषत्कसूत्रवैयर्थ्यापत्तेः । नचेदमपि सूत्रमग्न्युपदिष्टसुखविशिष्टस्यैव ब्रह्मपरत्व-साधकमिति वाच्यम्, एतस्य

सूत्रस्य साक्षादक्षिपुरुषब्रह्मत्वोपपादकत्वस्यैव ग्रन्थकृदभिमतत्वादितिचेत् उच्यते; "अथ यदु चैवास्मिन् शव्यं कुर्वन्ती'त्यत्र इदंशब्दस्याक्षिपुरुषविद्यानिष्ठविषयत्वस्य परित्यागायोगेनाक्षिपुरुषस्य साक्षाद्ब्रह्मत्वसाधकत्वात् ।।

ननु हृदयस्य कथं गोलकादिप्रदेशवर्तीन्द्रियकन्दत्वमित्याशङ्कय "शतं चैको च' इत्यादिप्रतिपन्ननाडीद्वारा कन्दत्वमभिप्रयन्नाह -शतं चैका चेत्यादि । इयं च श्रुतिरिति - "आसु तदा नाडीषु' इति श्रुतिरित्यर्थः । अत्र वक्तव्यं सर्वं जगद्वाचित्वादित्यत्र स्पष्टम् ।

१.२.१८

हृदयशब्दो हृद्गतपरमात्मपर इति - इदमुपलक्षणम् । प्रासादगतखट्वास्थे पुंसि प्रासादस्थ इतिवत् हृदयस्थपरमात्मस्थे पुंसि हृदय-त्वमिति व्यवहारोमुख्य एव । यादवप्रकाशीये तु इत्यादि - परमात्मत्वसाधनमनुपपन्नमिति - जीवव्युदसनमनुपपन्नमित्यर्थः । तदनुवादेन परमात्मत्वसाधनायेति - प्रतिबिम्बव्यावृत्तिं सिद्धवत्कृत्य जीवव्यावृत्तिसाधनायेत्यर्थः । यद्वा पूर्वोपन्यस्तहेतूननूद्य तैर्हेतुभिः जीवव्यावृत्तिसाधनायेत्यर्थः । ननु "अत एव न देवता भूतं चे'तिसूत्रतुल्ययोगक्षेमं भविष्यतीत्यस्वरसादाह - प्राणो ब्रह्मेत्यादिवाक्यस्येति । अतो ब्रह्मणः प्रतिपाद्यत्वं न पुनः प्रतिज्ञातव्यमिति - यद्यप्यत एव च स ब्रह्मेत्यत्र प्रतिबिम्बव्यावृत्ति-हेतुभिरेव जीवव्यावृत्तिस्सिद्धयतीत्येवं जीवव्यावृत्तिरेव प्रतिज्ञायते, न ब्रह्मेत्युक्तम्; तथापि वक्ष्यमाणरीत्या परमसाध्योपपाद-कोपपादकत्वमेव युज्यत इति भावः । नहि न्यायनिबन्धनेति - ततश्च सुकविशिष्टाभिधानोपपत्तीनामपि तस्मिन्नेव सूत्रे विव-क्षितत्वमभ्युपेयम्, नतु निर्युक्तिकसुखविशिष्टाभिधानस्वरूपमात्रपरमिति भावः । श्रुत्यन्तरे दक्षिणवामयोरक्ष्णोरिति - "हन्धो ह वै नामैष योऽयं दक्षिणेऽक्षिन् पुरुषस्तं वा एतमिन्धं सन्तमिन्द्रमित्याचक्षते । अथ तद्वामेऽक्षिणि पुरुषस्य रूपमेषास्य पत्नी

१.२.१८

विराट् प्रदेशान्तरे तौ मिथुनं समेताम् । ततः प्राणोऽजायत । इन्द्रस्य' इत्यादिः ज्योतिरधिकरणोदाहृता श्रुतिर्द्रष्टव्या । यत्सर्वेष्वधि-करणेष्विति - तथा च "अत एव च स ब्रह्म' इत्यस्य परमसाध्योपपादकत्वमयुक्तमिति भावः । उपपाद्यत्वाद्दुर्बलमिति - अन्तर्यामि-ब्राह्मणस्यापि उत्तराधिकरणन्यायोपपाद्यत्वादिति भावः । अक्षिपुरुषविद्याया गतिचिन्तनानुवादेन तदङ्गत्वमुच्यत इत्यस्य अक्षिपुरुष-विद्या गतिचिन्तनाङ्गत्वेन विधीयत इत्यर्थो विवक्षितः, उत गतिचिन्तनमक्षिपुरुषविद्याङ्गत्वेन विधीयते ? इति विकल्प्याद्यं दूषयति - अक्षिपुरुषस्य परमात्मत्वनिर्णयादिति । द्वितीयं दूषयति - गतिचिन्तनस्य सवर्परविद्याङ्गतादिति ।।

१.२.१९

विषयं शोधयतीति - इत्थं हि विषयशुद्धिः,-जनकेन ब्रह्मिष्ठशुल्कत्वेनानीते गोसहस्रे याज्ञवल्क्येन वादकथायां प्रवृत्तेषु केषु-चिद्ब्रह्मवादिषु विजितेषु उद्दालकेन सूत्रान्तर्यामिणोः प्रश्नः कृतः । "अथ हैनमारुणिरुद्दालकः प्रपञ्च । याज्ञवल्क्येति होवाच, मद्रे-ष्ववसाम पतञ्जलस्य काप्यस्य गृहेषु यज्ञमधीयमानाः' मद्रेषु देशोष्वित्यर्थः । "तस्यासीद्भार्या गन्धर्वगृहीता । तमपृच्छाम कोसीति । सोऽब्रवीत् कबन्ध आधर्वण इति' । कबन्धः-कबन्धनामा । "सोब्रवीत्पतञ्जलं काप्यं याज्ञिकांश्च वेत्थ न त्वं काप्य तत्सूत्रं येनायं च लोकः परश्च लोकः । सर्वाणि च भूतानि सन्द्रब्धानि भवन्ति' इति । सूत्रे पुष्पाणीव प्रोतानीत्यर्थः । "सोऽब्रवीत् पतञ्जलः काप्यो नाहं तद्भगवन् वेदेति । सोब्रवीत्पतञ्जलं काप्यं याज्ञिकांश्च वेत्थ नु त्वं काप्य तमन्तर्यामिणं य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयतीति । सोब्रवीत्पतञ्जलं काप्यो नाहं तद्भगवन् वेदेति । सोऽब्रवीत्पतञ्जलं काप्यं याज्ञिकांश्च यो वैतत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्सभूतवित् स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत् तदहं वेद स ब्रह्मवित् इत्यादिना प्रशस्य काप्याय याज्ञिकेभ्यश्च सूत्रन्तर्यामिणं

च गन्धर्वं उपदिदेश, तद्द्वयमप्यहं जान इत्यर्थः । तच्चेत्वं याज्ञवल्क्य सूत्रमविद्वान् तं चान्तर्यामिणं ब्रह्मगवीर्यद्युदजसे मूर्द्धा ते विपतिष्यति' इति । ब्रह्मवीः-ब्रह्मिष्ठशुल्कत्वेन जनकेन दत्ता गावः । यद्युदजसे-यदि नयसीत्यर्थः । वेद वा अहं तत्सूत्रं तं चान्तर्यामिणमिति । यो वा इदं कश्च ब्रूयात् वेद वेदेति यथा वेत्थ तथा ब्रूहीति । यः कञ्चिदपि अहं जानामीति ब्रूयात् त्वं यदि जानासि तर्हि वदेत्यर्थः । "स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकस्सर्वाणि भूतानि संद्रब्धानि भवन्ति तस्माद्वै गौतम पुरुषं प्रेतमाहुः' व्यसृंसिषितास्याङ्गानीति-विस्रस्तानीत्यर्थः । वायुना हि गौतम सूत्रेण सन्द्रब्धाणि भवन्ति' इति । एवं सूत्रप्रश्नस्योत्तरे दत्ते-"एवमेवैतद्याज्ञवल्क्यान्तर्यामिणं ब्रूहि' इति उक्तां-शमभ्युपगम्यान्तर्यामिणं पप्रच्छ "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः' इत्युपक्रम्य "योऽप्सु तिष्ठन् योऽग्नौ तिष्ठन्' इत्येवं क्रमेण अम्ब्वग्न्यन्तरिक्षवाय्वादित्यदिक्चन्द्तारका-काशतमस्तेजः पर्यन्तान् पर्यायानुपदिश्य "इत्यधिदैवतम्' इत्युपसंहृत्य "अथाधिभूतम्' इत्युपक्रम्य"यस्सर्वेषु भूतेषु' इति पर्याय-मुपन्यस्य "इत्यधिभूतम्' इत्युपसंहृत्य "अथाध्यात्मम्' इत्युपक्रम्य प्राणवाक्चक्षुःश्रोत्रमनस्त्वग्विज्ञानरेतः पर्यायानुपन्यस्य "एष त आत्मा अन्तर्याम्यमृतः "अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता नान्योतोस्ति श्रोता नान्योतोस्ति मन्ता नान्योतोस्ति विज्ञाता एष त आत्मा अन्तर्याम्यमृतः अतोन्यदार्तम्' सत्युपसंहृतम् । माध्यन्दिनपाठे तु लोकवेदयज्ञपर्यायास्त्रयो-ऽधिका इति । प्रत्यगात्ममात्रे अन्तर्यामित्वपूर्वपक्षासम्भवात् उपचितसुकृतजीवविशेषपरः प्रत्यगात्मशब्द इत्याह - प्रत्यगात्मशब्द

१.२.१९

इति । यदा निषेधोऽनुपपन्न इति - द्रष्टृत्वस्य रूपादिसाक्षात्कारकर्तृत्वरूपत्व इति शेषः । नियमनस्यार्थसिद्धत्वमुपपादयति - पर-प्रेरणरूपस्येति । ननु जीवः कोऽत्रान्तर्यामी स्यात्, न तावदुपासकजीवः, तस्य "यः पृथिव्यां तिष्ठन्' इत्यादिवाक्यप्रतिपाद्यपृथि-व्यादिस्थितितन्नियमनयोरसम्भवात् । नापि पृथिव्याद्यभिमानी देवताविशेषः, तस्य पृथिव्यादिस्थितिनियमनादिसम्भवेपि उपदेश्यो-पासकजीवभिन्नतया "स त आत्मे'ति निर्देशासम्भवात् । नापि जीवसमुदायः, तस्यापि पृथिव्याद्यतिष्ठत्वेन समुदाये स त आत्मेति निर्देशानुपपत्तेरित्याशङ्कयोपासकस्य वा पृथिव्याद्यभिमानिनो वा जीवसमुदायस्य वा नैकस्यान्तर्यामित्वं पूर्वपक्षे विवक्षितम्, किन्तु

१.२.१९

जीवजातीयानां वस्तूनामन्तर्यामित्वं विवक्षितम् न च तथात्वे स त आत्मेति निर्देशानुपपत्तिः, उपदेश्यस्योपासजीवस्यान्तर्यामिब-हुजीवात्मकत्वाभावादिति वाच्यम्, तज्जातीयस्त्वमसीत्यर्थस्य वक्ष्यमाणत्वेनादोषादित्यभिप्रयन्नाह - प्रतिपर्यायं यच्छब्दावृत्त्येति । यथा यस्तिष्ठति स ते पुत्रः यः पचति स ते पुत्र इत्युक्ते पुत्रभेदः प्रतीयते तद्वदित्यर्थः । व्यापकनियामकवस्त्वन्तराभावाभिप्रायेणेति नहि जीवजातीयावच्छिन्नत्वस्य व्यापकं नियामकं वा किञ्चिदस्तीत्यर्थः । यत्तु जीवविशेषान् प्रत्यन्तर्यामित्वमिति - "य आदित्यो तिष्ठन् यश्चन्द्रमसि तिष्ठन्' इत्यादिभिः प्रतिपाद्यमानं जीवविशेषान्तर्यामित्वमिति भावः । अष्टमूर्त्यादेरिवेति - रुद्रस्याग्न्याद्यष्ठमूर्त्ति-नियन्तृत्वमिवेत्यर्थः । तत्तद्गणाध्यक्षाणामिति - आदित्यगणाध्यक्षाणामित्यर्थः । एवं प्राप्त इत्यस्यानन्तरं सूत्र इति क्वचित् कोशे पठ्यते, न तस्य प्रयोजनं पश्यामः । भाष्ये-अधिदैवाधिलोकादिपचिह्नितेष्विति । ननु "यः पृथिव्यां तिष्ठन्' इत्युपक्रम्य पृथिवयम्ब्व-ग्न्यन्तरिक्षवाय्वादित्यदिक्चन्द्रतमस्तेजांसि निर्दिश्य चरमे तेजः पर्याय एव "इत्यधिदैवम्' इतिपदं श्रूयते, नतु पूर्वेषु पर्यायेषु; अतस्तेषां कथमधिदैवपदचिह्नितत्वमितिचेन्न; इत्यधिदैवमितीतिकरणेन पूर्वेषामपि पर्यायाणां परामर्शात् तत्पदचिह्नितत्वोपपत्तेरिति भावः ।।

अनेन सवर्सूत्रेष्वति - अधिदैवाधिलोकादिष्वित्यत्र दैवलोकभूतादिषु विषयेष्वन्तर्यामी परमात्मेत्यपि व्याख्यायास्सम्भवात् तत्परित्यागेनाधिदैवादिशब्दस्य वाक्यपरत्वमभ्युपगम्य वाक्यप्रतिपाद्योऽन्तर्यामीति व्याख्यानात्सर्वसूत्रेष्वपि तत्तद्वाक्यप्रतिपाद्य-

१.२.१९

परत्वमेव साध्यं विवक्षितम् । अध्यायस्य वाक्यसमन्वयप्रतिपादनपरत्वादिति भाष्यकाराभिप्राय इति भावः । पदद्वयेति - एतेना-धिलोकपदशून्यः परेषां सूत्रपाठस्तावदप्रामाणिक इति दर्शितम् । बहुपर्यायप्रदर्शनार्थेनाधिदैवशब्देनेति - पृथिव्यम्ब्वग्न्यन्तरिक्ष-वाय्वादित्यदिक्चन्द्रतारकाकाशपर्यायाणामधिदैवानुप्रविष्टानां बहुत्वादित्यर्थः । अवधारणं फलितमिति भाव इति - यद्यप्यौ-पनिषदानि वाक्यानि सवर्प्रशासितृत्वादिकं परमात्मन एव सर्वप्रशासितृत्वं सर्वात्मत्वमिव्येवमाकारेण वदन्तीति भाष्यार्थमालो-च्यैवमुक्तमिति द्रष्टव्यम् । स्वाभाविकं चामृतत्वमितिभाष्यस्यायं भावः,- स्वाभाविकौपाधिकयोर्मध्ये औपाधिकस्योपाधिप्रतिप-त्त्यधीनप्रतिपत्तिकत्वेन विलम्बितप्रतीतिकतया ततोपि स्वाभाविकस्यैव ग्राह्यत्वादिति । किमार्थमिति - व्याप्तिबलात् परमात्मनोपि दर्शनश्रवणादयः करणैर्विना नोपपद्यन्त इत्यर्थस्वभावायत्तमित्यर्थः । द्रष्टृत्वादिकं न करणायत्तमितीति - यद्यपि न च परमात्मनः करणायत्तं द्रष्टृत्वादिकमिति भाष्यपाठः, तथाप्यर्थतः प्रतीकग्रहणामिति द्रष्टव्यम् । ननु न च परस्यात्मनः करणायत्तं द्रष्टृत्वादि-कमिति भाष्यं युक्तम् । दर्शनकर्तृत्वरूपस्य द्रष्टृत्वस्य करणायत्तनियमात् परमात्मनि तादृशद्रष्टृत्वानभ्युपगमाच्चेत्यतो व्याचष्टे - रूपादिमिरिति । ननु स्वभावशब्दो न धर्मपरः, अपितु स्वरूपशब्दपर्यायइत्याशङ्कय समभिव्याहारदर्शनात्पर्यायत्वं नेत्याह-

१.२.१९

स्वरूपस्वभावशब्दयोरिति । अदृष्टापेक्षां च व्यावर्तयतीति - चशब्देन स्वव्यतिरिक्तचेतनान्तरसङ्कल्पमपि समुच्चिनोति, स्व-मावशब्द धर्मभूतज्ञानपरतया व्याख्याय सत्तापरतया व्याचष्टे - यद्वा न करणायत्तमिति । साध्याविशेषमाशङ्कयाह - सामान्ये-नेश्वरज्ञानेति । सामान्याकारयोगस्येति - ईश्वरत्वज्ञानत्वावच्छेदेन करणादृष्टादिनैरपेक्ष्यस्येत्यर्थः । तथा च श्रुतिरितिभाष्यस्य तथा श्रुतिश्चेत्यन्वयः । उदाहरिष्यमाणाया हि "पश्यत्यचक्षुः' इति श्रुतेः ज्ञानविशेषोपादानवत्त्वं कारणविशेषनिषेधकण्ठोक्तिमत्त्वमि-त्याकारद्वयमस्ति, "स्वाभाविकी ज्ञानबलक्रिया च' इत्यत्र कारणनिषेधकण्ठोक्तिमत्त्वेपि ज्ञानविशेषोपादानं नास्ति, द्रष्टा श्रोते-त्यादिविशेषोपादानेपि कारणविशेषकण्ठोक्तिर्नास्ति । पश्यत्यचक्षुरित्यत्र तु द्वयमप्यस्तीति सिद्धम् । तत्र च तथाचेत्यत्र तथाशब्दस्य

१.२.२०

कारणनिषेधकण्ठोक्तिमत्तापरामर्शितया विशेषोपादानपरामर्शितया वा तदुभयपरामर्शितया वा व्याख्यानं सम्भवतीत्यभिप्रेत्य त्रेधा व्याचष्टे - द्रष्टा श्रोतेत्यादिना । रूपशब्दयोस्साक्षात्कर्तेत्यर्थ इति - न चैवं रूपद्रष्टेत्यादौ पौनरुक्तयप्रसङ्ग इति वाच्यम्; पाकं पचतीतिवत् तत्र द्रष्टृशब्दस्य साक्षात्कर्तृत्वमात्रपरत्वात् घटद्रष्टेत्यादावपि मन्तेत्यादौ का गतिरित्याशङ्कय तादृशस्थले लक्षणया मननसमानविषयसाक्षात्कारवत्त्वमित्यर्थ इत्याह - ये मानसेति । ननु परमात्मनो नित्यमननादिकमस्त्विवत्यत आह - चक्षुरादि-बाह्यकरणेति । साधारणाकारग्रहणेति - चक्षुरादिबाह्यकरणैस्साधारणाकारं गृहीत्वा मनोरूपान्तःकरणेन विचार्यबुद्धिरूपेणा-न्तःकरणेन हि जीवोध्यवस्यतीति भावः । तदाश्रयो जीव इति चेति - ततश्च परमात्मनि मन्त्रबोद्धादिशब्दस्य लक्षणा दुर्निरासेति भावः । अतश्शब्दस्वारस्यवशादिति - सर्वनाम्नः पूर्वप्रस्तुतविशेषणविशिष्टपरामर्शित्वनियमादित्यर्थः । अत एव "तस्योपनिषद-हमित्यधिदैवतं तस्योपनिषदहमित्यध्यात्मम्' इत्यत्र तच्छब्दस्य न प्राक्प्रस्तुतब्रह्मपरामर्शित्वमात्रम्,

अपितु स्थानादिविशेषवि-शिष्टपरामर्शित्वमिति "सम्बन्धादेवमन्यत्रापि' इत्यत्र वक्ष्यत इति भावः । अतश्शब्दस्वारस्यात् इत्येतच्चोपलक्षणम्, अन्यशब्द-स्वारस्यादित्यपि द्रष्टव्यम् । अन्यशब्दस्य पूर्वनिर्दिष्टसदृशपरत्वात्; अत एव इषुनामके कृतौ "इषुविष्टुतिस्सप्तहं भवति' इति वैशेषिकाङ्गविधानानन्तरमाम्नाते "समानमितरच्छ्येनेन' इतिवाक्ये इतरश्शब्दपूर्वनिर्दिष्टवैशेषिकाङ्गसदृशानां वैशेषिकाङ्गानामे-वेतरशब्देन ग्रहणम्, पूर्वनिर्दिष्टसादृश्यात्, नतु प्राकृतानामपीति पूर्वतन्त्रे निर्णीततया तन्न्यायेनान्यशब्देनापि सर्वनाम्ना पूर्वनि-र्दिष्टसदृशस्य नियन्तुरेव ग्रहणमिति भावः । ननु "एष त आत्मा' "स त आत्मा' इति व्यतिरेकनिर्देशस्य तद्धर्मव्यपदेशादिति सूत्रखण्डाविवक्षितस्य भाष्ये युक्तितया उपन्यासो न युक्त इत्याशङ्कय तस्य सूत्रकृदभिमतत्वं दर्शयति - एतत्पादाद्यधिकरण इति । ननु "शब्दविशेषात्' इतिसूत्रे "सर्वं खल्विदं ब्रह्म' इति श्रुतिवाक्यार्थनिर्धारणार्थतया "एष त आत्मा' इति व्यतिरेकनिर्देशस्यान-

१.२.२१

भिमतत्वात्तस्य युक्तितयोपन्यासो न युक्त इत्यत आह - तस्य प्रदर्शनार्थत्वादिति ।।

ननु "पुमान्न देवो न नरः' इत्यत्रेव देवादिशब्दानां शरीरमात्रपरत्वे बाधकाभाव इत्याशङ्कयाह - तच्चापवादाभाव इति । तद-स्वारस्यापवादश्चेति - न केवलं व्यतिरेकनिर्देशस्वारस्यबाधकाभावः । स्वारस्यसाधकश्चास्तीत्यर्थः ।।

असम्भवनिरस्त इति - परमात्मादित्रिकबहिर्भूतस्यान्तर्यामित्वसम्भावनापदस्य कस्यचिदभावादित्यर्थः । योगसिद्ध इत्यस्या-णिमाद्यैश्वर्ययोगशाली सिद्ध इति वा अष्टाङ्गयोगशाली सिद्ध इति वासम्भावितोऽर्थस्यात् । अर्थद्वयमपि प्रकृष्टपुण्येषु विग्रहादियुक्त-देवेष्वेव सम्भवतीति तत्रैवान्तर्भावाच्छिरोभेदकल्पनं विफलमित्यर्थः । कार्यकरणवत्त्वं जीवत्वे हेतुतयोक्तमिति - देहेन्द्रियवत एव नियन्तृत्वसम्भवादन्तर्यामित्वे देहेन्द्रियवत्त्वमपेक्षितम्, तादृशञ्च देहेन्द्रियवत्त्वं जीवस्यैव सम्भवतीति नेश्वरस्यान्तर्यामित्वं सम्भ-वतीत्युक्तमिति भावः । पुरोवादिशङ्करभाष्यानुसारात् । पृथिव्यादिष्वेकैकस्य शरीरत्वावगमादिति - अयं भावः, देहातिरिक्तनि-यमने हि शरीरेन्द्रियाद्यपेक्षा, नतु स्वदेहनियमनेपि शरीरान्तरापेक्षा दृष्टजरी, तथा च पृथिव्यादीनां परमात्मशरीरत्वादेव परस्य तैरेव

१.२.२१

स्वशरीरत्वेन न तन्नियमने शरीरान्तरापेक्षेति, नतु पृथिव्यादिषु हि सशरीरत्वे परस्य जीवत्वप्रसङ्ग इत्याशङ्कयाह - तत्कृतजीवत्व-शङ्काया इति । उपकरणोपकरणित्वलक्षणसम्बन्धो हि जीवत्व साधक इति - शरीरभोक्तृत्वलक्षणसम्बन्धो हि जीवत्वसाधकः । न तादृशसम्बन्धो नियमने अपेक्षित इति भावः । एवमन्तमेकं सूत्रमिति - न तु शारीरश्च "उभयेपि हि भेदेनैनमधीयते' इत्येकं सूत्रमिति भावः । नियन्तृनियाम्ययोरभेदेन तत्परिहार इत्यपीति - ननु तस्याप्यन्यो नियन्तेत्यनवस्थादोषश्च न सम्भवति, भेदा-भावात् । भेदे हि सत्यनवस्थादोषापत्तिरिति शाङ्करभाष्यं व्याकुर्वताऽऽनन्दगिरिणा भेदाभावादित्यस्य परमात्मनो हि निरङ्कुशं सर्वनियन्तृत्वं श्रोतम्, तादृशि च सर्वनियन्तरि नियन्त्रन्तरस्य कल्पयितुमशक्यतया नियन्तृभेदाभावात् सिद्धान्तेप्यन्तर्यामिणोप्यन्यो नियन्तेत्यनवस्था न प्रसज्यत इत्यर्थो वर्णितः, न तु नियन्तृनियाम्ययोः परजीवयोर्भेदाभावमादायेति चेन्न; तद्भाष्याभिप्रायमावि-ष्कुर्वता मृषावादिगोष्ठीगरिष्ठेन वाचस्पतिमिश्रेणैव नचानवस्था न च नियन्त्रन्तरं तेन नियम्यते, किन्तु यो जीवो नियन्ता स परमात्मैव उपाध्यवच्छेदकल्पितभेदस्तथा ख्यायत इति असकृदावेदितम्, तत्कुतो नियन्त्रन्तरं कुतश्चानवस्था । तथा च "नान्योतोस्ति द्रष्टा' इत्याद्या अपि श्रुतयः उपपन्नार्थाः परमात्मनोऽन्तर्यामिणोऽन्यस्याप्यात्मनो द्रष्टुरभावात् अविद्याकल्पितजीवपरमात्मभेदाश्रयास्तु ज्ञातृज्ञेयभेदश्रुतयः प्रत्यक्षादीनि प्रमाणानि संसारानुभवः विधिनिषेधशास्त्राणि चेति

नियन्तृनियाम्यभेदस्यैवाविष्करणादित्यास्तां तावत् । प्रतीयमानोपि भेदो मिथ्येति -सर्वोपीत्यर्थः । अत एव नानवस्थेति - जीवपरभेदमिथ्यात्वादेवेत्यर्थः । पृथिव्यादिकं

१.२.२१

प्रति जीवस्येवेति - यथा पृथिव्यादिकं प्रति नियन्तुर्नियाम्यभेदरहितस्य जीवस्य नियन्त्रन्तराकाङ्क्षा; एवं नियाम्यभेदरहितस्या-पीश्वरस्य तदाकाङ्कावश्यम्भाविनीत्यर्थः ।। इत्यन्तर्याम्यधिकरणम् ।।

अदृश्यत्वेन परमात्मत्वपरत्वमिति - पृथिव्यादिनियाम्यैरनुपलभ्यमान एव नियमयतीति भाष्ये उक्तत्वात् अदृश्यत्वमपि परमात्मत्वसाधकतयोपन्यास्तमिति ग्रन्थकृदाशयः, वस्तुतस्तु भाष्ये नायमाशय उपलभ्यते । प्रत्युतास्याक्षरस्य "अदृष्टो द्रष्टा' इत्यादाविव न द्रष्टृत्वादिश्चेतनधर्मविशेष इह श्रूयत इत्यादिभाष्यपर्यालोचनायामद्रष्टृत्वादेरचेतनत्वसाधकम् । द्रष्टृत्वादेस्तु तदपवादकत्वमेव प्रतीयते, न त्वद्रष्टृत्वादेरचेतनत्वसाधकत्वमिति द्रष्टव्यम् ।।

१.२.२२

न तूभयोरुभयात्मकत्वमिति - अदृश्यत्वादिगुणकस्यापि प्रकृतिपुरुषोभयात्मकत्वमक्षरात्परतः परस्यापि प्रकृतिपुरुषोभया-त्मकत्वमिति न भ्रमितव्यमित्यर्थः । उभयत्रेति व्याख्येयं पदम् ।
अचिदानयोपस्थापकतोपब्रह्मकतयेति - निषिध्यमानदृश्यत्वा-दिगता या अचिदाश्रयोपस्थापकता तदुपबृंहणतयेत्यर्थः ।

इत्थमत्र विषयशुद्धिः, अव्याख्यातांशे क्वचिदर्थोपि लिख्यते; आथर्वणे- "ब्रह्मा देवानां प्रथमस्सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता । स ब्रह्मविद्यां र्विविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह । अथर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां परोवाचेङ्गिरसे तत्त्वतो ब्रह्मविद्याम् । स भरद्वाजाय सत्यवाहाय प्राह । भरद्वाजोऽङ्गिरसे परावराम् । शौनको ह वै महाशालेऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ । कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति । तस्मै स होवाच । द्वे विद्ये वेदि- तव्ये । इति ह स्म यद्ब्रह्मविदो वदन्ति । परा चैवापरा च । तत्रापरा ऋग्वेदे यजुर्वेदस्सामवेदोऽथर्ववेदश्शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यातिषमितिहासपुराणं न्यायो मीमांसा धर्मशास्त्राणीति । अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगरात्रमवर्ण-मचक्षुःश्रोत्रं तदपाणिपादम् । नित्यं विभु सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः । यस्मात्परं नापरमस्ति किञ्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् । यर्थोर्णनाभिस्सृजते गृह्णते च यथा पृथिव्यामोषधयस्सम्भवन्ति । यथा सतः पुरुषात्केशलोमानि तथाक्षरात् सम्भवतीह विश्वम् । तपसा चीयते ब्रह्म ततोऽन्नमभिजायते । अन्नात्प्राणो मनस्सत्यं लोकाः कर्मसु चामृतम् । यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्मनामरूपमन्नं च जायते ।। प्रथमः खण्डः ।।

तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यन् तानि त्रेतायां बहुधा सन्ततानि । तान्याचरत नियतं सत्यकामा एष वः पन्थाः सुकृतो ब्रह्मलोकः । यथा लोलायते ह्यर्चिस्समिद्धे हव्यवाहने । तदाज्यभागावन्तरेणाहुतीः प्रतिपादयेत् । यस्याग्निहोत्रमदर्शपूर्णमा-समचातुर्मास्यमनाग्रयणमतिथिवर्जनं च । अहुतमवैश्वदेवमश्रद्धयाऽविधिना हुतमासप्तमात्तस्य लोकान् हिनस्ति । सप्त ते अग्ने स-मिधस्सप्तजिह्वास्सप्त ऋषयस्सप्त धाम प्रियाणि । सप्तहोत्रास्सप्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन । अग्नेस्सप्तापि जिह्वा-भेदान्नामत आह । काली कराली च मनोजवाच सुलोहिता या च सुधूम्रवर्णा । स्फुलिङ्गिनी विश्वरूपी च देवी लेलायमाना इति सप्तजिह्वाः । एतासु यश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन् । तान्नयन्त्येतास्सूर्यरश्मयो यत्र देवानां पतिरेकोधिवासः । एतासु भ्राजमानासु सप्तसु जिह्वासु यथाकालं यः कर्माचरति तमाददाना आहुतयस्सूर्यरश्मयो भूत्वा इन्द्रादिलोकं नयन्तीत्यर्थः । "एह्येहीति तमाहुतयस्सुवर्चसस्सूर्यस्य रश्मिभिर्यजमानं वहन्ति । प्रियां वाचमभिवदन्त्योऽर्चयन्त्य एष वः पुण्यस्सुकृतो ब्रह्मलोकः । प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । ये तच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति । अविद्या-यामन्तरे वर्तमानाः स्वयं धीराः पण्डितं मन्यमानाः । जङ्घन्यमानाः

परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः । अविद्यायां बहुधा वर्तमाना वयं कृतार्था सत्यभिमन्यन्ति बालाः । यत्ममिर्णो न प्रवेदयन्ति रागोत्तेनातुराः क्षीणलोकाश्च्यवन्ते' । यस्मात्कारणात्

१.२.२२

कर्मिणो रागोपहतास्तत्त्वं न जानन्ति, तस्माच्च्यवन्त इत्यर्थः । "इष्टापूर्त्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रभूढाः । नाकस्य पृष्ठे सुकृतेऽनुभूत्वा इमं लोकं हीनतरं चाविशन्ति' । अनुभूत्वा-अनुभूयेत्यर्थः । हीनतरं वा अतिहीनं नरकं वा इत्यर्थः । "तपश्श्रद्धे येह्युपवसन्त्यरण्ये शान्ता विद्वांसो ब्रह्मचर्यं चरन्ति । सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतस्स पुरुषो ह्यव्ययात्मा । परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ।। द्ितीयः खण्डः ।।

तदेतत्सत्यम् । यथा सुदीप्तात्पावकाद्विष्फुल्लिङ्गाः सहस्रशः प्रभबन्ते सरूपाः । तथाक्षराद्विविधास्सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति । दिव्यो ह्यमूर्तः पुरुषस्स बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाश्शुभ्रो ह्यक्षरात्परतः परः । एतस्माज्जायते प्राणो मन-स्सर्वेन्द्रियाणि च । स्वं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी । अग्निर्मूद्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा । तस्मादग्निस्समिधो यस्य सूर्यस्सोमः पर्जन्य ओषधयः पृथिव्या । पुमान् रेतस्सिञ्चति योषितायां वह्नीः प्रजा बहुधा सम्प्रसूताः । तस्मादृचस्सामयजूंषि दीक्षा ब्रह्माश्च सर्वे क्रतवो दक्षिणाश्च । संवत्सरश्च यजमानश्च लोकस्सोमो यत्र पवते यत्र सूर्यः । तस्माच्च देवा बहुधा सम्प्रसूतास्साध्या मनुष्याः पशवो वयांसि । प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च । सप्तप्राणाः प्रभवन्ति तस्मात् सप्तार्चिषस्समिधस्सप्तहोमाः । सप्तेमे लोका येषु चरन्ति प्राणा गुहाशया निहितास्सप्त सप्त । अतस्समुद्रा गिरयश्च सर्वे अस्मात्स्यन्दन्ते सिन्धवस्सप्तरूपाः । अतश्च विश्वा ओषधयो रसाश्च येनैष भूतैस्तिष्ठते ह्यन्तरात्मा । पुरुष एवेदं सर्वं ततो ब्रह्म परामृतम् । एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकीरतीह सोम्यः । तृतीयः खण्डः ।।

आविस्सन्निहितं गुहाचरं नाम महत्पदम् । तत्रेदं सर्वमर्पितम् । एजत्प्राणं निमिएञ्च यत् । एतज्जानथ सदसद्वरेण्यम् । परं विज्ञा-नाद्यद्वरिष्ठं प्रजानाम्' । जानथेति-हे शिष्या इति शेषः । "यदर्चिमद्यदणुभ्योऽणु यच्च यस्मिंल्लोका निहिता लोकिनश्च । तदेतदक्षरं ब्रह्म तत्प्राणस्तदवाङ्मनः' । वाङ्मनसागोचरमित्यर्थः । "तदेतत्सत्यं तदमृतं वेद्धव्यं सोम्य विद्धि । ऋग्धनुर्यजुर्बाणस्सामज्याघोषणादिना । आथर्वणमयं शुभ्रं प्रतिगृह्णीत सुव्रतः । धनुर्गृहीत्वोपनिषदं महास्त्रं शरं ह्युपासना निशितं सन्दधीत । आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेकाक्षरं सोम्य विद्धि । प्रणवो धनुश्शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् । लक्षं सर्वगतं चैव शरो मे सर्वतो मुखम् । वेद्धा सर्वगतश्चैव विद्धं लक्षं न संशयः । आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् । यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनस्सह प्राणैश्च सर्वैस्तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः । अरा इव रथनाभौ संहता यत्र नाड्यस्स एषोऽन्तश्चरते बहुधा जायमानः । ओमित्येवं ध्यायथात्मानं स्वीयः पाराय तमसः परस्तात्' । पाराय-तीरभूतायेत्यर्थः । "यस्सर्वज्ञस्सर्ववित् । यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्नि आत्मा प्रतिष्ठितः । मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्तर्हृदये सन्निधाय । तद्विज्ञानेन परिपश्यन्ति धीराः । आनन्दरूपममृतं यद्विभाति । भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे । हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् । तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः । न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति

१.२.२२

सर्वं तस्य भासा सर्वमिदं विभाति । न तत्र चन्द्रार्कवपुः प्रकाशते न वान्ति वाताः कुतोऽन्या देवताः । स एष देवः कृतभूतभावनः स्वयं विरुद्धो विरजः प्रकाशते । ब्रह्मैवेदममृतं यत्पुरस्तात् ब्रह्म पश्चाद्दक्षिणतश्चोत्तरतश्च । अतश्चोर्ध्वञ्च प्रसृतं ब्रह्म ब्रह्मैवेदं सर्वमिदं वरिष्ठं ब्रह्म । पद्मकोशप्रतीकाशं सुषिरञ्चाप्यर्धोमुखम । हृदयं तद्विजानीयाद्विश्वस्यायतनं महत् ।। चतुर्थः खण्डः ।।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति । समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुद्भमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः । यदा पश्यः पश्यते रुक्मवर्णं कर्ता-रमीशं पुरुषं ब्रह्मयोनिम् । तथा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति । प्राणो ह्येष सर्वभूतैर्विभाति विजानन् विद्वान् भवति नातिवादी' । अतिवादी न भवति-बहुगर्ह्यवाङ्म भवतीत्यर्थः । "आत्मक्रीड आत्मरतिः क्रियावानेष हि ब्रह्मविदां वरिष्ठः । सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यज्ज्ञानेन ब्रह्मचर्येण नित्यम् । अन्तश्शरीरे ज्योतिर्मयो हि शुभ्रः । यं पश्यन्ति यतयः क्षीण- दोषाः । सत्यमेव जयति नानृतम् । सत्यस्य पन्था विततो सेवयानः । येनाप्नुवन्ति ऋषयो ज्ञानतृप्ताः । यत्र तत्सत्यस्य परमं निधानम् । ब्रह्म च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति । दूरात्सुदूरे तदिहान्तिके च पश्यस्येतन्निहितं गुहायाम् । न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा । ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः । एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश । प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन् विशुद्धे विभवत्येष आत्मा' । विभवति वैभवयुक्ता भवति । परमात्मनि प्रसन्ने असङ्कुचितज्ञानो भवतीत्यर्थः । "यं यं लोकं मनसा संविभाति विशुद्धसव्वः कामयते यांश्च कामान् । अनन्तं लोकं जयति तांश्च कामान् तस्मादात्मस्थं ह्यर्चयेद्भूतिकामः ।। पञ्चमः खण्डः ।।

स यो ह वै तत्परं धर्मधाम यस्मिन् विश्वं निहितं भाति शुभ्रम् । उपासते पुरुषं ये ह्यकामास्ते शुक्लमेतदतिवर्तन्ति धीराः' । शुक्रम्-पुरुषमित्यन्वयः । शुक्लं शरीरोपादानभूतं यच्छुग्लमित्यर्थः । "कामान् यः कामयते मन्यमानः स कामभृज्जायते यत्र तत्र । पर्यात्म-कामश्च कृतात्मनश्च इहैव सर्वे प्रविलीयन्ति कामाः । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्-यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् । नायमात्मा बलहीनेन लभ्यो न च प्रमादान्न तपसोप्यऽलिङ्गात्' । तपश्शब्दो ज्ञानपरः । चक्राङ्कनादिलिङ्गशून्यज्ञानेन च न लभ्य इत्यर्थः । "एतैरुपायैर्यतते यस्तु विद्वान् तस्यैष आत्मा विशति ब्रह्मधाम' । एतैरुपायैः-

बलाप्रसादसलिङ्गज्ञानैरित्यर्थः । "सम्प्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मनो वीतरागाः प्रशान्ताः । ते सर्वगं सर्वतः प्राप्य धीरा युक्ता-त्मानस्सर्वमेवाविशन्ति । वेदान्तविज्ञानसुनिश्चितार्थास्सन्न्यासयोगाद्यतयश्शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात्परि-मुच्यन्ति सर्वे । गताः कलाः पञ्चदश प्रतिष्ठाः देवाश्च सर्वे प्रतिदेवतासु । कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्वमेकं भवन्ति । यथा नद्यस्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् । स यो ह वैतद्ब्रह्म वेद ब्रह्मैव भवति । नास्याब्रह्मवित्कुले भवति । तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति । तदेषः श्लोकः । क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षि श्रद्धयन्तः । तेषामेवैतां ब्रह्मविद्यां वदेत शिरो वृतं विधिवद्यैस्तु चीर्णम् । तदेत-त्सत्यमृषिरङ्गिराः प्रोवाच नैतदचीर्णव्रतोऽधीते नाकृतपावनो नासन्न्यासी च नमः परमर्षिभ्यो नमः परमर्षिभ्यः ।। षष्ठः खण्डः ।।

अर्हार्थीयतृजन्तपदेति - ननु किमत्र प्रमाणम् ? "ल तृचा' विति तृच एव सम्भवात् नित्यसाक्षात्काराश्रये तस्मिन् "अर्हे कृत्यतृचश्च' इत्यर्हार्थत्ववस्यान्याय्यत्वाच्च, सत्यपि तस्य अर्हार्थत्वे अदृष्ट इत्यस्य भूतार्थत्वे विरोधाभावेन "धातुसम्बन्धे प्रत्यया' इति विहितस्य णिनिप्रत्ययस्य भूतार्थतया अग्निष्टोमयाजीत्यस्याग्निष्टोमेनेष्टवानित्यर्थकतया तस्मिन् भवितेति ल्युडर्थिभूतानद्यतन-भविष्यत्त्वस्यासम्भवेन तत्र धातुसम्बन्धे प्रत्यया इति सूत्रवशेनाग्निष्टोमयाजीत्यस्य भविष्यदर्थाश्रयणोपि अविरोधेन इह तथात्वे प्रमाणाभावादिति

चेत् उच्यते; "वेदाहं समतीतानि मां तु वेद न कश्चन' इत्यादिस्मृत्यनुसारेण स्वयमितरैरदृश्य एव सन् इतरान् पश्यतीत्यस्य तदर्थतया अदृष्ट इत्यस्यादृश्यत्वार्थकत्वाददृश्यत्वस्य च ब्रह्मणि पूर्वाधिकरणे प्रतिपन्नत्वात्कथमदृश्यत्वपदावलम्बनेन

१.२.२२

पूर्वपक्ष इति भावः । नाचिद्व्यावर्तकत्वमित्यर्थ इति - प्रत्युताचित्साधकमेवेत्यर्थः । दृष्टान्तश्च चेतनेति - ऊर्णनाभेश्चेतनत्वादिति भावः । नजुपश्लिष्टेति - नञिव युक्तमन्यसदृशाधिकरणे तथाह्यर्थगतिरिति न्यायात् नञिवशब्दयोरेकार्थवृत्तित्वादिति भावः । इदञ्चोपादानोपादेयभेदाभ्यपगमपक्ष इति ध्येयम् । सादृश्यस्य भेदगर्भत्वादुपादानोपादेयभेदमङ्गीकृत्याह - अबालाकृशेति । ननु चेतनदृष्टान्तानुगुण्यकायर्सारूप्यनिषेधस्वारस्यहेतुभिः यत्तदद्रेश्यमित्यादौ परमात्मपरत्व्वयुदासेन प्रधानपरत्वाश्रयणेपि अक्षरा- त्परतः परः इति वाक्येन परमात्मत्वपरित्यागे प्रमाणं पश्यामः, प्रत्युत "यस्सर्वज्ञस्सर्ववित्' इत्यादिश्रुत्यनुरोधेन ब्रह्मविद्यासमाख्या-नुरोधेन च परेषां प्रथमपूर्वपक्ष इव परमात्मपरत्वमेवास्त्वित्याशङ्कय यथा निषेधस्वारस्यवशेन तस्यैव द्रव्यस्यावस्थान्तरयुक्तस्य ग्रहणमित्युच्यते तथा"दिव्यो ह्यमूर्तः पुरुषः' इतिमन्त्रे जीवे प्रसिद्धस्य मूर्तिमत्त्वस्य मनःप्राणवत्त्वस्य च निषेधदर्शनात् तस्यैवा-वस्थान्तरयुक्तस्य ग्रहणमुचितम्; अतस्सर्वज्ञत्वादिकमपि जीव एव मुक्त्यवस्थापेक्षया नेतुं शक्यमित्यभिप्रयन्नाह - प्रधानत्वस-मर्थनमुपजीव्येति । ननु निषेधस्वारस्यमवलंब्य "यत्तदद्रेश्य'मितिवाक्ये प्रधानत्वपूर्वपक्षो न युक्तः । "अगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्' इति जीवे प्रसिद्धगोत्रादिनिषेधबाहुल्यात्तत्रापि वाक्ये पराभिमतद्वितीयपक्ष इव जीवपरत्वमेव किं न स्यात्, अन्यथा "अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुमूक्ष्मं तदव्ययं यद्भू-तयोनिं परिपश्यन्ति धीराः' इत्यन्तं प्रधानपरम् । "यस्मात्परं नापरमस्ति किञ्चित्' "यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्' "वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्' इति तदुत्तरवाक्यं जीवपरम् । "यर्थोर्णनाभिस्सृजते गृह्णते च' "यथा पृथिव्या-मोषधयस्सम्भवन्ति' "यथा सतः पुरुषोत्केशलोमानि तथाक्षरात्सम्भवतीह विश्वम्' इति तदुत्तरवाक्यं प्रधानपरम् । "तपंसा चीयते ब्रह्म

१.२.२२

ततोऽन्नमभिजायते । अन्नात्प्राणो मनस्सत्यं लोकाः कमर्सु चामृतम्' इत्यारभ्य "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेद-मायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिेठम् । तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' सत्युपरितनसन्दर्भो जीवपरः । तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विष्फुलिङ्गास्सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद्विविधास्सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' इति प्रधानपरम् । "दिव्यो ह्यमूर्तः पुरुषस्य बाह्याभ्यन्तरो ह्यजः । अप्राणो ह्यमनाश्शुभ्रो ह्यक्षरात्परतः परः' इति जीवपरमिति कथमि-वैतत्पण्डितानां हृदयं प्रथममधिरोहेदिति चेन्न; "यस्य येनार्थसम्बन्धो दूरस्थेनापि तेन सः' सत्यानन्तर्यमचोदनेत्यधिकरणन्या-येनानन्तर्यमात्रस्याप्रयोजकतया दूरस्थेनापि योग्यतावशात् सम्बन्धोपपत्तेः प्रधानजीवयोर्व्यतिकरेण प्रतिपाद्यत्वस्यागत्या स्वी-कार्यत्वादिति भावः । चेतनदृष्टान्तः कथमित्यत्राहेति - प्रधानस्य प्रतिपाद्यत्व इति शेषः । भाष्ये-प्रसूत इति तत्र दृष्टान्ता इति । अत्र इतिर्हेतो, यतः पुरुषाधिष्ठितप्रधानं प्रसूते, अतश्चेतनाचेतनदृष्टान्ता उपन्यस्यन्त इत्यर्थः । ननु प्रधानजीवावत्र प्रतिपाद्येते इति पूर्वः पक्षः साङ्खयमतावलम्बी, साङ्कयमते च पुरुषस्य सन्निधानमात्रेणैवोपकर्तृत्वं नाधिष्ठातृत्वेनेत्याशङ्कय तदनुरूपदृष्टान्तस्यापि सत्त्वात् पुरुषाधिष्ठितं प्रधानं परिणमत इति वा पुरुषसन्निधानमात्रेण परिणमत इति वा किञ्चित्तन्मतमवलम्ब्य पूवपक्षः प्रवर्तितुमर्हतीत्यभि-प्रयन्नाह - अनधिष्ठितत्वेपीति । पूर्वपक्षमुपसंहरति - अत इति ।।

इतीत्यस्यानन्तरं राद्धान्ते अदृश्यत्वेतीति कोशेषु पाठो दृश्यते, तस्य मन्दप्रयोजनस्यापि शिष्यावदानार्थमिति ध्येयम् । ननु प्रकृष्ट-पुण्यस्य जीवस्य बद्धदशायां कथं सार्वज्ञ्यमित्यत आह - तदवस्थोपलक्षित इति । पुण्योपलक्षित इत्यर्थः । नित्यमुक्तस्य गोत्रवर्णनि-

१.२.२२

षेधस्वारस्याभावात् पुण्योपलक्षितमुक्त इत्युक्तमिति द्रष्टव्यम् । प्रकृताक्षरपर इति भाव इति - पूर्वपक्षिणोपि विवादाभावादिति भावः । कारणत्वप्रत्यभिज्ञानाच्चेति - "तथाक्षरात्सम्भवतीह विश्व'मिति पूर्वप्रस्तुतपञ्चम्यन्तप्रत्यभिज्ञानं चशब्देन समुच्चीयते । कारणत्व-मनूद्येति - तस्यापि विधाने गौरवादिति भावः । ननु भूतयोनित्यलिङ्गप्रत्यभिज्ञानादपीति "अथ परा यया तदक्षरमधिगम्यत' इति वाक्यप्रतिपाद्यस्य "यस्सर्वज्ञस्सर्वविद्यस्य ज्ञानमयं तपः तस्मात्' इतिनिर्दिष्टस्य च कारणत्वप्रत्यभिज्ञानादैक्यमभ्युपगम्याक्षरात्परतः पर इत्यवधि पञ्चम्यन्ताक्षरपदनिर्दिष्टस्य भूतयोन्यक्षरभेदकल्पनापेक्षया अथ परा यया तदक्षरमितिवाक्यप्रतिपन्नाक्षरस्याक्षरात्परतः पर इति पञ्चम्यन्ताक्षरपदनिर्दिष्टप्रधानैक्यमेव ज्यायः । उभयत्राप्यक्षरश्रुतिप्रत्यभिज्ञानात् । ततश्च तस्मिन् प्रधाने सार्वज्ञ्यादिविधान-मनुपपन्नमित्यर्थः । भूतयोनित्वलिङ्गानुगृहीतस्येति - यद्यपि येनाक्षरं पुरुषमितिवाक्ये भूतयोनित्वं न श्रुतम्, तथापि "यस्सर्वज्ञस्सर्व-विद्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नञ्च जायते' इतिवाक्यस्य "येनाक्षरं पुरुष'मितिवाक्यस्य चैकार्थ्यस्य चोभयसम्प्रतिप-न्नतया भूतयोनित्वलिङ्गानुगृहीताक्षरशब्दतया प्रत्यभिज्ञा बलवतीति तात्पर्यम् । प्रथमभाविनः प्रबलतयेति - एतेन "तथाक्षरात्सम्भ-वतीह विश्वम्' "तथाऽक्षराद्विविधास्सोम्य भावाः अक्षरात्परतः परः' इत्येतेषां पञ्चम्यन्तसारूप्यादेकविषयत्वमित्येतदपि निरस्तं वेदितव्यम् । पुरुषत्वादिति - चेतनत्वात् सार्वज्ञ्ययोग्यत्वं सम्भवतीति भावः । व्यपदिश्यत इत्यर्थ इत्यस्यानन्तरं तत्र हेतुमाह प्रकृतमदृश्यत्वादिगुणकमितीति ग्रन्थ उपेक्षितः । अतश्च वकयुत्क्रमेण प्रतीकग्रहणशङ्काया नावकाशः । अदृश्यत्वादिगुणकत्वेन प्रकृतत्वादित्यर्थ इति - उत्तरग्रन्थानुसारात्तस्यैव हेतूकर्तुमुचितत्वादिति द्रष्टव्यम् । पुरुषशब्दवाच्यत्वेन चेति - नच पूर्वपक्षिणः

१.२.२३

"तेनेदं पूर्णं पुरुषेण सर्व'मित्यादीनां भूतयोन्यक्षरपरत्वमसम्मतम् । पुरुषशब्दितजीवपरमित्येव तदभिप्रायादिति वाच्यम्; "यस्मात्परं नापरमस्ती'त्यत्र यच्छब्दादिबलेन प्रकृतभूतयोन्यक्षरप्रतिपादकत्वस्य पुरुषशब्दे वक्तव्यत्वात् "येनाक्षरं पुरुषं वेद सत्य' मित्यत्रापि प्रक्रमश्रुताक्षरशब्दानुरोधेन पुरुषपदस्य वर्णनीयतया एकविषयत्वस्य वक्तव्यत्वाच्चेति द्रष्टव्यम् । प्रकृतमदृश्यत्वादिगुणकमिति भाष्ये प्रकृतमित्यस्य प्रधानप्रतिपाद्यत्वेन प्रकृतत्वमर्थ इत्यभिप्रयन्व्याचष्टे - अदृश्यत्वादिगुणकमक्षरमेवेति । परतः परत्वेनोच्यत इत्य-भ्युपेत्यमिति - अप्रधानप्रतिपाद्यस्य प्रधानप्रतिपाद्यात्परत्वेनोक्तयसम्भवादिति भावः । ब्रह्मशब्दयोभिर्न्नविषयत्वदर्शनादिति - तच्चोत्तरत्र भाष्य एव स्फष्टम् । समानविभक्तिनिर्देशस्वारस्यादिति - अक्षरात्परतः पर इति पदद्वयस्यापीत्यर्थः । पञ्चम्यन्तपद-सापेक्षत्वादिति - अत एव देवदत्तपुत्र इत्यादौ न सामानाधिकरण्यं पुत्रपदस्य षष्ठयन्तपदसापेक्षत्वादिति द्रष्टव्यम् ।।

परब्रह्मविषया विद्या परविद्येति - न तु "अथ परा' इति श्रुताविवापरोक्षत्वमर्थ इति भावः । भाष्ये-गुरुपरम्परया अङ्गिरसा प्राप्तामिति । "ब्रह्मा देवानां प्रथमस्सम्बभूव' इत्यादिश्रुतिरत्रानुसन्धेया । व्याख्यानप्रकारमाह - तत्र कैश्चिदिति । मृषावादिमतमाह-

१.२.२३

कैश्चित्कर्मज्ञानमिति - अपरा च धर्मसाधनफलविषयेति मुण्डकभाष्ये शङ्करेण व्याख्यातत्वादिति भावः । अपरमात्मज्ञानमपरवि-द्येति - जीवमानमित्यर्थः । अत्रत्यवाक्येनेति - "न मेधया न बहुना श्रुतेन' इति वाक्येन मेधाशब्दितस्योपासनस्यापि नैष्फल्याव-गमादित्यर्थः । विवेकादिसाधनसप्तकानुगृहीतमित्यत्र साधनसप्तकस्यागमजन्यज्ञानाङ्गत्वाभावात् अनुगृहीतमित्यत्र सहकृतमित्यर्थ इत्यभिप्रयन्नाह - साधनसप्तकं शास्त्रजन्यज्ञानं चेति । उत्थितमित्यर्थ इति - "आगमोत्थं विवेकाच्च' इति श्लोके उत्थितमिति शेष

१.२.२३

इत्यर्थः । तत्रेत्यादिवाक्येनेति - भाष्यगतं तत्रेतिपदं न भाष्यकारीयम्, अपितु श्रुतिगतमित्यर्थः । "परा चैवापरा च तत्रापरा ऋग्वेदो यजुर्वेदः' इति हि श्रुतिः । स्पष्टीकृतमिति भाष्येपि वेदस्य ज्ञानोत्पत्तिहेतुत्वादित्यत्र वेदशब्देन सूचितम्, तेन चात्रागमोत्थत्वं शाब्दं प्रतीयत इति शङ्का भाष्य एव परिहृतेति द्रष्टव्यम् । कर्मस्वायत्तममृतमिति - लोकाश्चेति शेषः । अमृतत्वसाधनभूतं कर्मे- त्यर्थ इत्यत्रापि स्वर्गामृतत्वसाधनत्यर्थः । स्वर्गापवर्गेति भाष्यानुरोधात्, ततश्च लोका अमृतं च कर्मस्वायत्तमिति श्रुत्यन्वय इति भावः । यद्वा भोग्यपदेनान्नशब्दो व्याख्यात इत्यर्थः । कमनीयत्वाय-कामनाविषयत्वायेत्यर्थः । अनाग्रयणमिति - आग्रयणः-

१.२.२३

शरदि कर्तव्येष्टिविशेषः । अहुतमिति स्वकाले अहुतमित्यर्थः । त्रिवर्गसाधनकर्मविषयमिति - दर्शपूर्णमासाग्रयणवैश्वदेवातिथि-पूजानां नित्यतया यथाशक्ति तदवश्यकर्तव्यत्वस्यापवर्गकर्मस्वपि सत्त्वात् तत्परत्वेपि न दोष इति द्रष्टव्यम् । कर्मफलाभिन्धि- मदिति - कर्मण अवरत्वं फलाभिमसन्धिमत्त्वमेवेत्यर्थः । इदञ्चोपलक्षणम्, ज्ञानापूर्वकत्वमपि द्रष्टव्यम् । येभिनन्दन्तीति - ये चाभिनन्दन्तीत्यर्थः । ततश्च फलाभिसन्धिमत्कर्मकारिणां तदभिनन्दितॄणां च जरामृत्युवश्यत्वमित्यर्थः । अतस्सर्वा ओषधय इत्येवमन्तेष्विति - "एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च । पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा तस्मादग्निस्समिथश्च सूर्यः । तस्मादृचस्मामयजूंषि दीक्षा । तस्माच्च देवा बहुधा सम्प्रसूताः । सप्त प्राणाः प्रभवन्ति तस्मात् । अतस्समुद्रा गिरयश्च सर्वे ।

१.२.२३

अतश्च सर्वा ओषधयो रसाश्च' इति तत्प्रकरणगततदेतच्छब्दैरित्यर्थः । तदेतच्छब्दैः परामृश्येत्यस्यानन्तरभूतं भूतयोनित्वं सप्रपञ्चमु-पपाद्येत्यध्याहारोऽपेक्षितः । ननु भाष्ये षष्ठखण्डप्रतिपाद्योपासनपरभक्तिरूपत्वस्य पञ्चमखण्डप्रतिपाद्यब्रह्मसाम्यलक्षणब्रह्मानुभव-फलात्प्रागेव प्रतिपादनमसङ्गतमित्याशङ्कयाह - पाठक्रमादिति । तस्य क्रमभावित्वमुक्तमिति - वेदान्तविज्ञानसुनिश्चितार्था इति । वेदान्तार्तनिश्चयबम्तः कमर्सन्न्यासयोगाद्यनवन्तश्शुद्धान्तः करणाः, ते परान्तकाले-देहावसानकाले, परामृताः-परममृतं ब्रह्म

१.२.२३

आत्मतया येषां ते परामृताः, जीवन्मुक्ता एव सन्त इत्यर्थः । ब्रह्मलोकेषु ब्रह्मणि मुच्यन्ते । भिन्नघटाकाशवत् निर्वृतिमुपयान्तीत्यर्थ इत्येवं जीवन्मुक्तिपरममुक्तिक्रमभावित्वमुक्तं शाङ्करमुण्डकभाष्य इति भावः । सर्वगस्य ब्रह्मण इति - न तु सर्वशून्यस्येत्यर्थः । ब्रह्म-प्राप्तिप्रतिपादकमिति वक्ष्यत इति - "कार्यं बादरिरस्य गत्युपपत्तेः' इत्यधिकरण इति शेषः । इतरचेतनाचेतनवदिति - न चेदं न वक्तव्यम् चेतनान्तरवत्सिद्धेरिति वाच्यम् । मुक्तिदशायामेस न लयः, अपितु आप्रलयं तदिन्द्रियाणामप्यवस्थानमिति प्रदर्शनार्थमिति द्रष्टव्यम् । परमात्मनैक्यापत्त्यभावादिति - ननु "गताः कलाः पञ्चदश प्रतिष्ठाः' इतिमन्त्रस्य मोक्षकाले दशेन्द्रियपञ्चभूतरूपाः या देहारम्भिकाः कलाः तास्स्वस्वप्रतिष्ठाङ्गताः स्वं स्वं कारणं प्राप्ता भवन्तीत्यर्थः । ये च देहाश्रयाश्चक्षुरादिकरणनिष्ठा देवास्ते आदि-त्यादिषु गता भवन्तीत्यर्थः । कर्माणि विज्ञानमयश्च आत्मा कर्माणि

अभुक्तफलानि कर्माणि विज्ञानोपाधिको जीवश्च परस्मिन् ब्रह्मण्यविशेषतां गच्छन्तीत्यर्थ इति मुण्डकभाष्ये शङ्करेणार्थो वर्णितः, नतु मुक्तपरित्यक्तः देहादीनां परमात्मन्यैक्यमिति चेत् सत्यम्; तानि परे तथाह्याहेतिसूत्रे "एवमेवास्य परि द्रष्टुरिमाष्षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ती'तिवाक्यमुदाहृत्य परब्रह्मविदः कृत्स्नं कलाजातं ब्रह्मैव सम्पद्यत इत्युपसंहारादेवमाशङ्कय पयिहृतमिति द्रष्टव्यम् । पूर्वोक्तसाम्यापत्तिनिगमनपरमिति - "वैष्णवं

१.२.२३

वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमान् लोकान् अभिजयति' इत्यत्रेव एवकारसादृश्यवाची, "साम्यैवमेववद्वे'ति निघण्टु-पाठादिति भावः । ब्रह्मपर्यन्तेति - न च ब्रह्मशब्दस्य ब्रह्मात्मकपरत्वे लक्षणा स्यात्, शरीरवाचिशब्दानां शरीरिपर्यन्तत्वेपि शरीरिवाचिशब्दानां शरीरवाचित्वाभावादिति वाच्यम्, तुल्यन्यायतया शरीरिशब्दानामप्यपृथक्सिद्धशरीरवाचित्वसम्भवात् गत्यभावे लक्षणाया अप्यदोषत्वात् । प्रोक्षणीष्वर्थसंयोगादितिन्यायमिति - प्रोक्ष्यते सिच्यते आभिरिति योगादेव प्रोक्षणीशब्दस्य अप्सु वृत्तिसम्भवान्न तत्र रूढिः कल्पनीयेत्युक्तम्, तन्न्यायादिति भावः । अत्र केचित्; ननु कथमदृश्यत्वादिगुणकस्याक्षरशब्दाभिहि- तत्वम् ? अव्याकृतेऽक्षरशब्दस्य रूढत्वात् रूढेर्योगापहारित्वादित्याशङ्कय प्रोक्षणीन्यायेन रूढेरभावाद्योगस्य च ब्रह्मसाधारणत्वान्न दोष इत्याह-अश्नुत इति वा न क्षरतीति वेति । इत्येव भाष्यस्यावतारिकामाहुः । इदमप्यसदर्थद्वयमिति - वक्ष्यमाणमिति शेषः । देवताविशेषरूढ इति - "कृशानुरेतास्सर्वज्ञो धूर्जटिर्नीललोहितः' इति निघण्टुपाठादिति भावः । अक्षरशब्दयोरिति - अत्र द्वित्व-मविवक्षितम् । "अक्षरात्सम्भवतीह विश्वम्' तथाक्षराद्विविधास्सोम्य भावाः' अक्षरात्परतः परः' इति त्रयाणामैकार्थ्यं सिध्यतीति द्रष्टव्यम् । तथात्वं श्रूयत इति - अन्नादिप्रपञ्चहेतुत्वं श्रूयत इत्यर्थः । उत्तरत्र तथात्वमित्यस्याप्ययमेवार्थः । ब्रह्म वनमिति - वन-

१.२.२४

मित्यधिकरणमुच्यते, ब्रह्म स वृक्ष इत्युपादानत्वम् । ब्रह्माध्यतिष्ठद्भवनानि धारयन्निति निमित्तत्वं चेति भावः । ननु शैवमते पञ्च-म्यन्ताक्षरशब्दयोरेकार्थत्वात् । "तपसा चीयते ब्रह्म' तस्मादेतद्ब्रह्म' इति वाक्यद्वयस्य ब्रह्मशब्दयोरप्येकार्थत्वाच्चाक्षरब्रह्मशब्दयोः कारणकार्यविषयत्वं नास्त्येव । किञ्च तन्मते अक्षरशब्दितस्य पुरुषस्य सर्वोपादानत्वाभ्युपगमेन कार्यत्वानभ्युपगमात्कारणपरामर्शि वा कार्यमशिर् वा इति विचारो न युक्तः । तद्मादेतद्ब्रह्मनामरूपमन्नञ्च जायत इत्यत्रापि न ब्रह्मशब्दितस्योत्पत्तिः श्रूयते, किन्तु भूत-योन्यक्षरमेतद्ब्रह्मान्नादिरूपेण परिणमत इति ह्युच्यते, नहि कुलालान्मृत्पिण्डो घटो भवतीत्युक्ते मृत्पिण्डस्योत्पत्तिः कुलालकायर्त्वं वा प्रतीयत इत्यस्वरसादाह - किञ्च येनाक्षरमिति । भूतयोन्यक्षरधर्माणामिति - अपाणिपादत्वादीनाममूर्तत्वादिना प्रत्यभिज्ञा-नादिति भावः । तच्छब्दसामानाधिकरण्याच्चेति - नच स बाह्याभ्यन्तर इत्येतद्बाह्याभ्यन्तरसाहित्यवाचकमेकं पदं किं न स्यादिति वाच्यम्; तथात्वे बाह्याभ्यन्तर इत्यनेनैव तदर्थस्य लाभात्स इत्यस्य वैयर्थ्यप्रसङ्गात् । तयोरनन्यत्वसिद्धिरिति - पुरुषद्वित्वे प्रमाणा-भावादितिभावः । न पुरुषशब्दो नेय इति - "दिव्यो ह्यमूर्तः पुरुषः' इति पुरुषशब्द इत्यर्थः । पुरुषनारायणोत्तरनारायणेति - पुरुष-देवताकत्वान्नारारणर्षिकत्वाच्च पुरुषसूक्तस्य पुरुषनारायणत्वम्; एवमुत्तरनारायणेत्यत्रापि द्रष्टव्यम् । अक्षहृदयाभिज्ञस्येति - अक्ष-हृदयाख्यविद्याभिज्ञस्येत्यर्थः ।। ननु भाष्ये सर्वभूतान्तरात्मनः परमात्मन एव सम्भवतीत्ययुक्तम् । सर्वभूतान्तरामत्वस्यापि एतद्वा-

१.२.२४

क्यप्रतिपाद्यत्वेन एतद्वाक्यप्रतिपाद्यद्युमूर्द्धत्त्वादिसर्वभूतान्तरात्मत्वान्तधर्मवत्त्वं परमात्मन एव सम्भवतीत्येव वक्तुं युक्तत्वादित्त्या-शङ्कय "पृथिवी ह्येष सर्वभूतान्तरात्मा' इत्यत्र हिशब्देन

पूर्वोक्तद्युमूर्द्धत्वादेस्सर्वभूतान्तरात्मत्वहेतुकरणात् द्युमूर्द्धत्वाद्युपपाद्यं सर्व-भूतान्तरात्मत्वं परमात्मन एव सम्भवतीत्यर्थ इत्त्यभिप्रयन्नाह - सर्वभूतान्तरात्मसम्बन्धितयोच्यमानमिति ।।

शारीराद्विशिनष्टीति - शारीरादित्यनन्तरं विलक्षणत्वेनेत्यध्याहार्यम् । विशिनष्टि हि प्रकृते भूतयोनिं शारीराद्विलक्षणत्वेनेति परैरुक्तत्वाच्छारीरस्य विलक्षणत्वावधित्वेनैव निर्दिष्टतया विशेषणक्रियावधित्वेन निर्दिष्टत्वात् । विशिनष्टीत्युक्तेन केन विशेषणे-नेत्याकाङ्क्षाया इव कस्माद्विशिनष्टीत्याकाङ्क्षाया अदर्शनाच्च । न च कथं तर्हि भाष्यकृता विशिनष्टि हि प्रकरणं प्रधानात्पुरुषाच्चेति निर्दिष्टमिति वाच्यम्; प्रधानात्पुरुषाच्चेत्यस्य व्यावर्तयतीत्यर्थ इति तत्यिोक्तरवाक्यान्वितत्वात् । नच कथं तर्हि किं कस्मादिति टीकोक्तिरिति वाच्यम्; तस्या अपि किं कस्माद्व्यावर्तयतीत्यर्थकत्वादितिध्येयम् । अक्षरात्परो हि जीव इति - परतोक्षरादिति सामानाधिकरण्यापेक्षया वैयधिकरण्यस्य ज्यायस्त्वस्य प्रामुपपादितत्वादिति भावः । ननु धर्मशब्देनेति - अदृश्यत्वादिगुणको धर्मोक्तेरिति धर्मशब्देनेत्यर्थः । "एतस्माज्जायते प्राणः' इति मन्त्रात्क्रियानुषङ्गेण अग्निर्मूर्द्धेतिमन्त्रस्य त्रैलोक्यशरीरो हिरण्यगर्भो भूतयोन्यक्षराज्जायतेत्यर्थपरत्वमङ्गीकृत्य रूपोपन्यासादिति सूत्रस्य च "पुरुष एवेदं सर्वम्' इति सार्वज्ञ्यरूपब्रह्मलिङ्गोपन्यासाद्भूत-योनिः परमात्मेयपि योजनान्तरं परैर्दर्शितम् । तदनूद्य दूषयति - रूपोपन्यासाच्चेतीति । प्रकरणवशादिति - सन्निधिवशादित्यर्थः । अवान्तरप्रकरणस्येति - सन्निधेः प्रकरणविरोधे दुर्बलत्वादित्यर्थः । ततश्च प्रकरणं खल्वेतद्विश्वयोनेस्सन्निधिश्च जायमानानां सन्नि-धेश्च प्रकरणं बलीय इति । ननु अजायतेत्यध्याहारमन्तरेण विन्वयोनेरेव प्रकरणिनो रूपाभिधानमिति चेन्न; प्रकरणिनः शरीरेन्द्रिय-रहितस्य विग्रहवत्त्वविरोधादिति वाचस्पत्यानुगुण्यं च सिध्यति । मीमांसकप्रवादविरोधश्च पीरहृतो भवति । अत्रेदमवधेयम्;

अस्मन्मते भट्टमत इवान्तरप्रकरणभेदेन प्रकरणद्वैविध्यमेव नास्ति, अवान्तरप्रकरणशब्दाभिलप्यवस्तुसन्निधिरेव, नचैवमभिक्रमस्य प्रयाजाङ्गत्वं न सिध्द्येदिति वाच्यम् । गुरुमतरीत्या समर्थनसम्भवादिति ।। इत्यदृश्यत्वादिगुणकाधिकरणम् ।।

समानप्रकरणे वाजसनेय इति - अग्निरहस्ये "वैश्वानरं ह वै भगवान् सम्प्रति वेद तन्नो ब्रूहि' इति श्रवणादित्यर्थः । अग्निश-ब्दोपक्रमः कोशेषु द्रष्टव्यः । त्रिष्वपि क्रमेण प्रयोगं दर्शयति - अक्षरात्परतः परः इत्यादिना । हरो जीव इत्यर्थः । विधिशब्दस्य मन्त्रत्वे भावस्यादितिन्यायेनेति - दर्शपूर्णमासयोः श्रूयते "आग्नेयोऽष्टाकपालः' इति बहूनि चाग्नेरभिधानानि "अग्निश्शुचिः पावकः' इत्यादीनि । तत्राग्निवाचिषु स्वाहाकारोज्खित्यादिनिगदेषु येन केनचिच्छब्देनाभिधानं कर्तव्यम्, उत विधिगतेनैवाग्नि-शब्देनेति विशये अग्न्यर्थो देवताकर्तव्य इत्येतावांश्चोदनार्थः । तस्य तच्छब्दोहिश्यमानस्य देवतात्वमिति प्रयोगावस्थायां शब्दो-च्चारणमापतति, तन्नियमे च नास्ति प्रमाणम्, पावकशब्देनाप्युद्दिश्यमानस्य चोदनाविहितमग्नेर्देवतात्वं सम्पादितमेव भवति, तस्माच्छब्दप्रयोगानियम इति पूर्वपक्षं कृत्वाऽवश्यं ह्यत्रशब्दोच्चारण एव पुरुषो नियोक्तव्यः, शब्दोच्चारणस्यैव पुरुषव्यापारत्वात् । ततश्च शब्दस्यरूपमेव उच्चारणान्वयित्वेन विधीयते, तद्विधाने चार्थस्य देवतात्वं प्राप्तमेवानूद्यते, येन हिशब्देन हविस्त्यज्यते तस्या-

र्थस्तस्य देवता भवति तस्माच्छब्दोच्चारणस्यैव विधानान्न पर्यायप्रसक्तिरिति पर्यायशब्दानां बाध इति बाधलक्षणे "विधिशब्दस्य मन्त्रत्वे बाधस्यात्तेन चोदना' इत्यधिकरणे सिद्धान्तितम्, यथा शब्दानियमपूर्वपक्षेपि प्रथमाध्यायप्रतिष्ठापितप्रामाण्यस्य न हानि-स्तद्वदत्र वैश्वानरशब्दस्यार्थानियमपूवर्पक्षेपि न प्रतिष्ठापितप्रामाण्यहानिरिति भावः । इदमुपलक्षणम् । "छागो वा मन्त्रवर्णात्' इत्यादिपूर्वपक्षोत्थानस्यापीति द्रष्टव्यम् । अत्र केचित्; तदधिकरणपूर्वपक्षे न पदार्थानध्यवसायो न वाक्यार्थानध्यवसायः, इह तु वैश्वानरपदार्थानध्यवसाये तद्घटितवाक्यस्य संशायकत्वेन प्रमापकत्वात् प्रतिष्ठापितप्रामाण्यस्य हानिर्भवत्येव । अत एव पिकयव-वराहवेतसशब्दार्थानध्यवसाये

तद्घटितचोदनाया अप्रामाण्यमित्युक्तम् । अत एव भावार्थनये किन्नामपदेन विषयतया कर्माप्यते, उताख्यातपेदेनेत्यध्यवसाय इति संशये अनध्यवसायात्मक एव पूर्वपक्षः प्रवर्तितः । तत्र चाप्रामाण्ये प्रमाणाध्याय एव इयं चिन्ता स्यादित्याशङ्कयोपोद्घातत्वेनात्रैव युक्ता साक्षात्सङ्गतेरुपोद्घातसङ्गतिबलीयस्त्वादित्युक्तं विवरणे । ततश्च स्वर्गकामाद्यधिकरणेषु प्रसिद्धप्रामाण्याक्षेपवदिहापि पूर्वपक्षिणः प्रामाण्याक्षेपो न दोषमावहतीति वदन्ति । अग्निशब्दसामानाधिकरण्येति - "स एषो-ऽग्निर्वैश्वानरो यत्पुरुषस्स यो हैतमग्निं वैश्वानरं पुरुषं पुरुषविधम्' इत्यादिवाक्यप्रतिपन्नसामानाधिकरण्येत्यर्थः । परैर्वैश्वानरशब्दस्य जाठरतृतीयभूततदधिष्ठातृदेवतारूपार्थतृतीयसाधारणत्वात् आत्मशब्दस्य जीवपरमात्मस्वरूपार्थद्वयसाधारणत्वाच्च पञ्चधा संशयो

१.२.२५

वर्णितः, तद्दूषयति - जीवपरसाधारणात्मशब्दसद्भावेपीत्यादिना । अग्निमित्यस्य विवरणं महाभूततृतीयमिति । यद्यपि नाग्नि-शब्दस्य भूतृतीयं सर्वमर्थः । तथापि ज्वलनसामान्यमर्थः । न देवता न जाठराग्निविशेष इति भावः । केतुमादित्यमिति - आदि- त्योदये दिनव्यवहारात्तस्य केतुशब्दितं चिहत्वमिति भावः । तद्विषयभूतास्स्यामेति - अस्मासु शोभना मतिस्तस्य भूयादित्यर्थः । मतिसम्बन्धस्य भूततृतीये अचेतने वा जाठरे वा असम्भवाद्देवतापरत्वमाश्रयणीयमिति भावः । हिकमित्यव्ययमिति - प्रसिद्धौ वर्तत इति शेषः । विशेष्यत इति विशेष इतिभाष्यस्य कर्मत्वरूपप्रत्ययार्थव्याख्यानरूपत्वे स्वरसतः प्रतीयमानेपि साधारणशब्द-विशेषादितिसूत्रस्थविशेषपदस्य कर्मणि घञन्तत्वे साधारणशब्द एव विशेष इति कर्मधारयस्याश्रयणीयत्वात् कर्मधारये च विशेष-शब्दस्य पूर्वनिपातप्राप्त्या पश्चान्निर्देशानौचित्यात्सूत्रस्वारस्यानुरोधार्थं विशेषशब्दस्य भावार्थत्वमभिप्रेत्य साधारणशब्दस्येति षष्ठयर्थीभूतकर्मत्वव्याख्यानपरं विशेष्यत इतिभाष्यमिति व्याचष्टे - नेदं विशेषशब्दस्येत्यादिना । ननु विशेष्यत इत्यस्य विशेष-शब्दव्याख्यानरूपत्वाभावे विशेष इति पृथक्पदमनन्वितं स्यादित्याशङ्कय विशेष इति कृदन्तं पदम्, कर्मार्थषष्ठीनिमित्तमित्यध्याहृत्य व्याख्येयमित्याह - विशेष इति कृदन्तं पदमिति । अध्याहारदेशं विशेषणविशेष्यभावस्य कामचारित्वं चाभिप्रयन् भाष्यस्वार-स्यानुरोधेनान्यथा व्याचष्टे - यद्वा विशेष्यत इत्यादिना । फलविशेषनिर्देशादीनां परमात्मधर्मत्वाभावादाह - लिङ्गपर इति । अतन्निष्ठस्यापि लिङ्गत्वमुपपद्यत इति भावः । ननु विशेषपदस्य कर्मसाधारणत्वपक्षे भावप्रधानत्वानाश्रयणेन कथं विशेष्यमाणत्वा-दित्यर्थलाभ इत्यत आह - फलितार्थ इति । भाष्ये औपमन्यवादय इति । प्रचीनशाल औपमन्यवत्सत्ययज्ञः पौलुपिरिन्दद्युमनो आश्वनेयो जनकश्शार्कराक्ष्यो बुटिल आश्वतराश्विः । प्राचीनशालादिशब्दा आद्याः पञ्चमि नामानि । ते हैते महाशाला महाश्रोत्रि-यास्समेत्य मीमांसा चक्रुः । महाशालाः-विस्तीर्णशालाः, सम्पन्ना इत्यर्थः । "को न आत्मा किं ब्रह्म' इति ते ह सम्पादयाञ्चक्रुः,

१.२.२६

निश्चितवन्त इत्यर्थः । उद्दालको ह वै भगवन्तोऽयमारुणिस्समप्रतीयमात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छामेति तं हाभ्याजग्मुस्स ह सम्पादयाञ्चकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्वमिव प्रतिपत्स्ये । सर्वं वक्तुं नोत्सह इत्यर्थः । हन्ताहम-न्यमभ्यनुशासानीति । तान् होवाच । अश्वपतिर्वै भगवन्तोऽयं केकयस्समप्रतीममात्मानं वैश्वानरमध्येति तं हन्ताभ्यागच्छामेति तं हाभ्याजग्मुः । तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयाञ्चकार स ह प्रातस्सञ्जिहान उवाच । न मे स्तेनो जनपदे न कदर्यो न मद्यपः । नानाहिताग्निर्नाविद्वान्न खैरी खैरिणी कुतः । यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भ- गवद्भ्यो दास्यामि वसन्तु भगवन्त इति । ते होचुः येन हैवार्थेन पुरुषश्चरेत् तं हैव वदेत् । यत्प्रयोजनमुद्दिश्य पुरुषः प्रवर्तते तदेव वदे-दित्यर्थः । आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहीति । तान् होवाच प्रातर्वः प्रतिवक्तास्मीति ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे । तान् हानुपनीयैवैतदुवाच, यत एवं महाशाला महाश्रोत्रियाः ब्राह्मणास्सन्तो

महाशालत्वाद्यभिमानं हित्वा समि-द्भारहस्ता जातितो हीनं राजानं विद्यार्थितया विनयेनोपाजग्मुः, तथान्यैरपि विद्योपादित्सुभिर्भवितव्यम्, योग्येभ्य एव विद्या दातव्येत्ययमर्थ आख्यायिकया सूच्यते । फलविशेषनिर्देशश्चेति - सर्वलोकाद्याश्रयान्नानुभवसर्वपापप्रदाहरूपफलद्वयनिर्देश इत्यर्थः । परैः द्युमूर्द्धत्वादिकल्पना सर्वविकारानुगते ब्रह्मण्येव सम्भवतीत्युक्तम्, तद्दूषयति - द्युभूर्द्धत्वादीति ।।

श्रुतिलिङ्गवाक्येत्यादिसूत्रपठितेति - न तु "आकाशस्तल्लिङ्गात्' इत्यत्रेव तदसाधारणधर्मरूपलिङ्गपरः । स्मर्यमाणस्वरूपस्य परमपुरुषासाधारणधर्मत्वाभावेन परमपुरुषत्वे लिङ्गत्वोक्तययोगात्, अतो लिङ्गशब्दो ज्ञापकपर इति भावः । यद्यपि श्रुतिलिङ्गादिसूत्रे सामर्थ्यं लिङ्गम्, तच्च शब्दगतम्, अर्थगतमित्येव व्यवहृतम् । तथापि तदपि ज्ञापकान्नातिरिच्यत इति भावः । यद्वा श्रुतिलिङ्गवाक्ये

१.२.२६

तत्स्वरूपकथनार्थमिति द्रष्टव्यम् । इत्थं भूमित्यादिभाष्यस्य द्युप्रभृतीत्यादिना सूत्रार्थप्रतिपादकेन भाष्येण पौनरुक्तयमाशङ्कय इतिशब्दान्वयानन्वयाभ्यां परिहरति - इतिशब्दार्थेनान्वितमिति । भाष्ये-तथाहीति । "औपमन्यव कं त्वमात्मानमुपास्व इति दिवमेव भगवो राजन्निति होवाच एष वै सुतेजाः आत्मा वैश्वानरोयं त्वमात्मानमुपास्से तसमात्तव सुतं प्रसुतमासुतं कुले दृश्यते । सुतप्रसुतासुतशब्दैरेकाहाहीनसत्रयोगा लक्ष्यन्ते । "अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एत-मेवात्मानं वैश्वानरमुपास्ते मूर्द्धा त्वेष आत्मन इति होवाच मूर्द्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति । अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति होवाच एष वै विश्वरूप आत्मा वैश्वानरोऽयं त्वमात्मानमुपास्से तस्मात्तव बहु विश्वरूपं कुले दृश्यते । प्रवृत्तोऽश्वतरी रथोदासीनिष्कोत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवात्मानं वैश्वानरमुपास्ते चक्षुस्त्वेतदात्मन इति होवाचान्धोऽभविष्यो यन्मां नागमिष्य इति । अथ होवाचेन्द्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इत् वायुमेव भगवो राजन्निति होवाच एष वै पृथग्वर्त्मा वैश्वानरोयं त्वमात्मानमुपास्से तस्मात्त्वां पृथग्बलय आयन्ति । पृथग्रथश्रेणयोऽनुयन्ति । अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति पि्रयं भवत्यस्य ब्रह्मचर्यसङ्कुले य एतमेव- मात्मानं वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यद्यन्मां नागमिष्य इति । अथ होवाच जनं शार्कराक्ष्य कं त्वमात्मानमुपास्स इति आकाशमेव भगवो राजन्निति होवाच एष वै बहुल आत्मा वैश्वानरोयं त्वमात्मानमुपास्से तस्मात्त्वं बहुलोसि प्रजया च धनेन च । अत्स्यन्नं पश्यसि प्रियमत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवं वैश्वानरमुपास्ते सन्देहस्त्वेष आत्मन इति होवाच सन्देहस्ते व्यशीर्यद्यन्मां नागमिष्य इति । अथ होवाच बुटिलामाश्वतराश्वि वैय्याघ्रपद्य कं त्वमात्मानमुपास्स इति ।

१.२.२६

अप एव भगवो राजन्निति होवाच एष वै रयिरात्मा वैश्वानरोयं त्वमात्मानमुपास्ते तस्मात्त्वं रयिमान् पुष्टिमानत्स्यन्नं पश्यसि प्रिय-मत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मचर्यसङ्कुले य एतमेवमात्मानं वैश्वानरमुपास्ते वस्तिस्त्वेष आत्मन इति होवाच वस्तिस्ते व्यभे-त्स्यद्यन्मां नागमिष्य इति । अथ होवाचोद्दालकमारुणिं गौतम कं त्वमात्मानमुपास्स इति पृथिवीमेव भगवो राजन्निति होवाच एष वै प्रतिष्ठात्मा वैश्वानरोऽयं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोसि प्रजया च पशुभिश्च अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्त्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेतावात्मन इति होवाच पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति । तान् होवाच एते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वान् सोऽन्नमात्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मखन्नमत्ति, तस्य हवा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मा सन्देहो बहुलो वस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्त्यो मनोऽन्वाहार्यपचनमास्य-माहवनीयः, तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय

स्वाहेति प्राणस्तृप्यसि' इत्यादिना प्राणाद्याहुतिपञ्चकं प्रदर्श्य स यदिदमविद्वानग्निहोत्रं जुहोति' इति पठ्यते । इत्थं श्रुतिक्रमः । भाष्ये-तानेकैकं पप्रच्छेति । एकैकमिति क्रियाविशेषणम् एवमुत्तरत्रापि; एकैकमुपास्यमानतया कथितानामित्यादावपि द्रष्टव्यम् । नतु नाभिरितीति -"खं वै नाभि'रित्यु-पबृंहणानुगुण्ये सत्यपीति शेषः । स्वभूलत्वेन वैश्वानरविद्याया इति - स्मृतेर्वेदमूलकत्वावश्यम्भावात्तस्यास्मृतेर्मूर्द्धैव सुतेजा इति वाक्यमेव मूलं भविष्यतीति भावः । अस्ति ह्यग्निमूर्द्धेति - ननु "अग्निमूर्द्धा' इत्याथर्वणवाक्यं "द्यां मूर्द्धान'मिति स्मृतिवचनस्य मूलाकाङ्क्षां शमयितुं प्रभवति । तत्राग्निमूर्द्धत्वश्रवणेपि द्युमूर्द्धत्वस्याश्रवणात् । न च "असौ वाव लोकः' इति श्रुत्यनुसारादग्निशब्दस्य

१.२.२७

द्युलोकपरत्वमस्तीति वाच्यम्; उपचरिताग्निशब्दप्रयोगविषयत्वस्य पर्जन्यपृथिव्यादिष्वपि सत्त्वेन तदनुसारेणार्थनिर्णयासम्भवात्; अतो वैश्वानरविद्यावाक्यमेव मूलमिति चेन्न; "शीर्ष्णो द्यौस्समवर्तत पद्भ्यां भूमिर्दिशः श्रोत्रात्' इत्यादीनां बहूनां परमात्मपरतया निर्णीतानां वाक्यानां भूलत्वसम्भवेन स्मृतिवचनस्य विप्रतिपन्नवैश्वानरविद्यैकशरणत्वमिति भावः ।।

दूरस्थत्वादिति - यदस्याधिकरणस्य छान्दोग्यवाक्यवद्वाजसनेयवाक्यमपि विषय एव, अतो न दूरस्थत्वादिवैषम्यम्; तथापि "पुरुषमपि चैनमधीयते' इति वाजसनेयकस्य तटस्थवदुदाहृतत्वादेवमुक्तमिति द्रष्टव्यम् । भाष्ये-समानाधिकरणतयाग्निरिति श्रूयत इति । वाजसनेयकेऽग्निरहस्ये सप्रपञ्चां वैश्वानरविद्यामुक्त्वा "स एषो वैश्वानरो यत्पुरुषः सहैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तः-

१.२.२७

प्रतिष्ठितं वेद' इति श्रूयत इत्यर्थः । अन्तःप्रतिष्ठितत्वस्याग्निशब्दनिर्देशसाहित्यविवक्षासिद्धिः कथमितिशङ्कायामेकवाक्योपादानादिति दर्शयति - स यो हैतमेवमग्निमिति । परैः "शब्दादिभ्योन्तःप्रतिष्ठामा'दिति सूत्रखण्डो जाठरादित्रयशङ्कापरतया व्याख्यातः भाष्य-कारैस्तदनादरेण जाठरमात्रशङ्कापरतया तत्खण्डस्य व्याख्याने कारणमाह - शब्दादिभ्य इत्यादिसूत्रखण्डमित्यादिना । तथा दृष्टयुपदेशादित्यत्र दृष्टिशब्दः परैर्जाठरे परमात्मदृष्टिपरतया व्याख्यातः, तदुपेक्षणे किं कारणमिति शङ्कते - दृष्टिशब्दोऽतस्मिन् तथात्वानुसन्धानेति । सूत्रतात्पर्यविरुद्धमिति - यद्यप्युद्गीथप्रस्तावादौ अध्यस्योपास्यमानाकाशप्राणादेः "आकाशस्तल्लिङ्गात्' "अत एव प्राणः' इति परमात्मपरत्वसमर्थनपरसूत्रतात्पर्याविरोधवदविरोधस्सम्भवति, नच तत्रापि दृष्टिविरोधिपरत्वे विमतिः । "संज्ञात-श्चेत्तदुक्तमस्ति तु तदपि' इत्यत्र भाष्ये कण्ठत एवाविष्कृतत्वात्, तथापि तत्र गत्यभावाद्दृष्टिविधित्वेपि इह तदाश्रयणस्यायुक्तत्वात्; अत एव परैरपि दृष्टिविधित्वपक्षं परित्यज्य अथवा जाठरवैश्वानरोपाधिः परमेश्वर एवेह द्रष्टव्यत्वेनोपदिश्यत इत्युक्तमिति द्रष्टव्यम् । अग्निशब्दादिभिर्हीतिभाष्ये-अग्निशब्देन त्रेताकल्पनादिलिङ्गैश्च जाठरप्रतिपाद्यमानत्वं निषिध्यमानमयुक्तम्, लिङ्गानां प्रतिपादकत्वा-भावादित्याशङ्कय प्रतिपाद्यत इतिपदं शब्दलिङ्गसाधारणज्ञापनपरतया व्याचष्टे - ज्ञाप्यत इत्यर्थ इति । ननु वैश्वानरादिशब्दस्य परमात्मपरत्वे त्रेताकल्पनादिलिङ्गं कथं साक्षात्परमात्मन्यन्वेत्वित्याशङ्कयाह - तदिति । भाष्ये किञ्चेति । हेतुद्वयसमुच्चयप्रतिपाद-नस्य सूत्रारूढतां दर्शयति - अपि चेत्यत्रेति । पुरुषशब्दवाच्यतयाप्यधीयत इत्यभिप्रायेणेति - अधीयत इत्यस्य शब्दकर्मत्वस्यै-

१.२.२९

वोचितत्वात् । पुरुषमपि चैनमधीयत इति सूत्रखण्डस्य एतस्मिन् पुरुषशब्दमध्ये तारं प्रयुञ्जत इति पर्यवसन्नमर्थं हृदि निधायाह - किन्तु पुरुषशब्दवाच्यतयापीति । क्षरत्वाद्युपाधिनेति - "द्वाविभौ पुरुषौ लोके क्षरश्चाक्षर एव च'

इति क्षरपदसमभिव्याहाररूपो-पाधिबलेनेति भावः । "पुरुषं पुरुषविधं पुरुषेन्तःप्रतिष्ठितं वेद' इति पुरुषान्तःप्रतिष्ठितत्ववत् पुरुषत्वस्यापि श्रवणेन पुरुषान्तःप्रतिष्ठि-तत्वमात्रस्याश्रवणान्न जाठरत्वमिति परैर्व्याख्यातम्, तन्निराचष्टे - अत एव पुरुषमिति । हेत्वन्तराणामपीति - "तथाचासम्भवा'-

१.२.२९

दित्यस्य हेत्वन्तरनिरासकत्वं पुरुषमपि चेत्यस्यान्तःप्रतिष्ठाननिरासकत्वमिति व्यवस्था निर्मूलेति भावः ।। समुदितस्येति - त्रिवृ-त्कृतस्य भूततृतीययस्येत्यर्थः ।।

अग्निशब्दसामानाधिकरण्येन विनेति - यद्यप्यग्निशब्दो वैश्वानरशब्दवत् बह्वर्थसाधारण एव "विश्वस्मा अग्निं भुवनाय' इति-भूततृतीये "एषोऽग्निर्वैश्वानरो येनेदमन्नं पच्यते' इति जाठरे । "त्वमग्ने यज्ञानां होता' इति देवतायाम् "हृदयेऽग्नौ वैश्वानरे प्रास्यत्' इति परमात्मनि; इत्येवमादिप्रयोकदशर्नात्, तथापि वैश्वानरशब्दे यौमिकार्थाभिव्यक्तिवदग्निशब्दे यौगिकार्थाभिव्यक्तिर्नास्तीतिभावः । पुनरुक्तिप्रसङ्गादिति - नच वैश्वानरशब्देनैवापर्यवसानवृत्त्याग्निविशिष्टस्याभिहिततयाग्निशब्दस्यैव यौगिकार्थपरत्वं किं न स्यादिति वाच्यम्, अग्नौ वैश्वानरे प्रास्यादित्यग्निशब्दस्य प्रक्रमस्थत्वेन पुनरुक्तत्वशङ्कानुदयेनाग्निशब्दस्यापर्यवसानवृत्त्या परमात्मपरत्वस्य सिद्धतया पश्चाछ्रुतवैश्वानरशब्द एव पौनरुक्तयशङ्कोदयादिति भावः ।

परमात्मविषयवाक्यान्तरेष्वपीति - अग्निशब्दरहितेषु "आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि' इत्यादिवाक्येष्वित्यर्थः । एकप्रयोजकत्वायेति - एकस्यैव प्रयोजकत्वसिध्यर्थमित्यर्थः । वैश्वानरशब्दो दृष्टान्ततयोक्त इति - ननु पौनरुक्तयप्रसङ्गपरिहाराय वैश्वानरशब्दस्य यौगिकत्वमाश्रितम् । अग्निशब्दे तादृशबाधका-भावात् कुतो योग इति चेन्न; रूढ्यर्थासम्भवे अपशूद्राधिकरणइव योगस्यैव ज्यायस्त्वमिति जैमिन्यभिप्राय इति भावः । विशद-तरत्वेपि प्रयोगादिति - ज्ञानस्य साक्षात्त्वमित्यादिप्रयोगदर्शनादिति भावः । भिदाद्यजन्त ऋष्यणन्तो वेति - गोत्रापत्त्ये भिदाद्यञन्तः अनन्तरापत्ये ऋष्यणित्यर्थः । ततश्च भिदाद्यञन्तादृष्यणो बाधितत्वात् कथमत्र ऋष्यणितिशङ्का निरस्ता । पुरुषसमष्टि-वाचित्वेपीति -"नरे च संज्ञाया'मिति संज्ञायां ङीप्विधानात् समष्टिपुरुषसंज्ञात्वेपीत्यर्थः । विश्वानर एव वैश्वानर इति - प्रज्ञादे-

१.२.२९

राकृतिगणत्वादणप्रत्ययः । विद्याभेदस्यादिति - यद्यपि नोपास्याकारभेदमात्रं विद्याभेदकम्, एकस्यामेव शाण्डिल्यविद्यायां मनो-मयत्वप्राणशरीरत्वादीनामविरुद्धानां बहूनामुपास्याकाराणां दर्शनात् किं बहुना, सर्वास्वपि परविद्यासु "आनन्दादयः प्रधानस्य' अक्षरधियान्त्ववरोधः' इति न्यायेन सत्यत्वज्ञानत्वानन्दत्वादीनां बहूनामाकाराणामनुयायित्वदशर्नाच्च न विद्याभेदप्रसक्तिः, तथा-प्यग्निशरीरत्वाग्रनेतृत्वयोर्विरोधमभ्युपगम्यैवमुक्तमिति द्रष्टव्यम् । विलम्बाविलम्बसाम्यात्तुल्यबलत्वमितीति - रूढ्यर्थानुपपत्ति-प्रतिसन्धानमूलत्वेन दौर्बल्यं यौगिकार्थरूढ्यर्थापर्यवसानवृत्तिलब्धाथर्योस्समानम् । तत्रापर्यवसानवृत्तिलब्धार्थस्य प्रथमप्रतिपन्न-रूढ्यर्थानुगुणत्वं प्राबल्यहेतुः, तत्पक्षे रूढ्यर्थस्यापरित्यागात्, यौगिकार्थस्य तु मुख्यत्वमेव प्राबल्यहेतुः । रूढ्यथर्वद्यौकिकार्थस्यापि मुख्यत्वादिति तुल्यबलत्वमिति भावः । ननु रूढ्यर्थापर्यवसानलब्धार्थस्य रूढिपूर्वकलक्षणापेक्षया अधन्येन यौगिकार्थेन तुल्यत्वं वदता अपर्यवसानलब्धार्थे लक्षणैवोक्ता स्यात् नचेष्ठापत्तिः, चराचरव्यपाश्रयाधिकरणे परमात्मनि मुख्यत्वस्यैवाकृत्यधिकरणन्यायेन समर्थितत्वादिति चेत् उच्यते मुख्यार्थान्तरानुपपत्तिप्रतिसन्धानमूलकतया यौगिकार्थवद्विलम्बितप्रतीतिकस्यापि ब्रह्मणः "वचसां वाच्यमुत्तमम्' । नतास्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती' इत्यादिप्रमाणानुसारात् समुदायशक्तिगोचरत्वमस्ति; नहि विलम्बमात्रेण मुख्यार्थत्वहानिः "आदित्यस्य गावः प्रकाशयन्ति' इत्यादौ किरणादीनां विलम्बितोपस्थितिकानामपि मुख्यार्थत्वदर्शनादिति द्रष्टव्यम् एकेनैव वाक्येन वैकल्पिकार्थेति - नन्वग्निशरीरत्वाग्रनेतृत्वरूपार्थयोरेकवाक्यविहितत्वे अरुणैकहायन्योरिव समुच्चयस्यैवावश्य-

म्भावेन विकल्पस्याप्रसक्तया वैकल्पिकार्थद्वयविधानवादिनो वाक्यभेदपुरस्कारेणैव विकल्पस्याभ्युपगन्तव्यतया कथं वाक्यभेदो-पादानम् ? तदनिष्टं स्यात् । किञ्च वाक्यभेदभीत्या विकल्पं परित्यज्य विद्याभेदस्वीकर्तव्य इत्याक्षिपतो मते एकेनाग्निशब्देन वृत्ति-द्वयाश्रयणोनार्थद्वयविधाने वृत्तिद्वयविरोधप्रसङ्गेनावृत्तिलक्षणवाक्यभेदस्याभ्युपेतव्यतया वाक्यभेददोषस्यानुद्धाट्यत्वमिति चेत्,

१.२.३०

उच्यते; अग्निशरीरकत्वाग्रनेतृत्वरूपगुणद्वयत्तया विधाने विद्याभेदो वा स्यात् तस्यामेव विद्यायां वाक्यभेदमाश्रित्य विकल्पाभ्युप-गमेऽष्टदोषदुष्टो विकल्पस्यात् वाक्यभेददोषश्च स्यादित्यत्र तात्पर्यात् । यौगिक इति हि सूत्रतात्पर्यमिति - रूढ्यभावे योग एव ज्यायान्, मुख्यत्वात्, न त्वपर्यवसानवृत्तिः, तस्याः योगिकार्थवन्मुख्यत्वाभावादिति जैमिनेर्मतं नतु द्वयोरपि तुल्यबलत्वम् । येन विद्याभेदो विकल्पो वा स्यादिति भावः । न द्वितीयेति कृत्वेति - "तानि द्वैधं गुणप्रधानभूतानि' इत्यधिकरणे व्रीहिनवहन्तीत्यत्र किमवधातार्था व्रीहयः, उत व्रीह्यर्थो वा अवघातः ? इतिविचार्य भावार्थाधिकरणन्यायेन भूतस्य द्रव्यस्य क्रियानिवृत्तिर्दृष्टं प्रयोजनं लभ्यत इत्यवघातार्था व्रीहयः अवघातस्त्वदृष्टार्थः इति पूर्वपक्षं कृत्वा अवघातस्य कर्मोपयिकतुषविमोकादिलक्षणदृष्टप्रयोजनेन सप्रयोजनत्वे सम्भवति यागादिवददृष्टाथर्कल्पनाया अन्याय्यत्वात् अवघातस्य व्रीह्यर्थत्वमेव । व्रीहीणां च तण्डुलपिष्टप्रणाडिकया यागार्थत्वमिति न कुत्राप्यदृष्टं कल्पनीयमिति सिद्धान्तितम् । तत्र ननु व्रीहीनवहन्तीति द्वितीयाश्रुत्या अवघातस्य व्रीह्यर्थत्वा- वगमात् कथं पूर्वपक्षोत्थितिरित्याशङ्कय द्वितीया नास्तीति सिद्धवत्कारेण पूर्वपक्षः प्रवर्तत इति पूर्वमीमांसकैर्वर्णितमित्यर्थः ।। बुध्यारोहार्थत्वं किं न स्यादिति - प्रियशिरस्त्वादिवदिति भावः ।।

१.२.३२

ननु सम्पत्तिं दर्शयतीत्येतावति वक्तव्ये परमात्मोपासनोचितमेव फलं दर्शयतीतिभाष्ये निर्देशो निष्प्रमाणक इत्याशङ्कय प्रागुप-क्षिप्तस्य प्राणाहुतेः परमात्मसमाराधनरूपत्वस्योपपादकं तदित्यत्राह - अग्निहोत्रसम्पत्तेः परमात्मसमाराधनार्थत्वमिति । पर-

१.२.३३

मात्मसमाराधनं प्राणाहुतिः, तस्या अग्निहोत्रहोमत्वार्था गार्हपत्याग्न्यादिसम्पत्तिरिति भावः । तस्य सर्वेषु लोकेष्वित्याद्युक्तः फल-विशेष एव प्राणाहुतेः परमात्मसमाराधनत्वं ज्ञापयतीति भावः । सर्वं सामराधितं भवतीति - यागस्य देवपूजार्थत्वात्पूजायाश्चारा-

धनरूपत्वाद्यागहोमयोश्चानतिभेदात् हुधातोराराधनमर्थ इति भावः । तदङ्गपरोपासनफलं दर्शयतीति - उपासनफलस्य सर्वपाप-प्रदाहस्य प्राणाग्निहोत्रे प्रदर्शनं प्राणाग्निहोत्रस्य तदङ्गत्वज्ञापनार्थमित्यर्थः । इदञ्च प्राणाहुतिमात्रस्येत्याद्युत्तरवाक्ये स्पष्टमिष्यते । उपासकस्य पूर्धाद्यवयवानामेवेति - "यस्त्वेवमेवं' इति पूर्ववाक्ये उपासकस्य प्रकृततया "तस्य ह वा एतस्य' इत्यत्र तच्छब्देन तस्यैव परामृष्टव्यत्वात्"उर एव वेदिर्लोमानि बर्हिः' इत्युत्तरवाक्ये उपासकोरःप्रभृतीनामेव परामृष्टव्यत्वेन "तस्य हवा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाः' इत्यादौ मूर्धादिशब्दैरप्युपासकमूर्धादिपरामर्शस्योचितत्वाच्च । नचैवमात्मनो वैश्वानरस्येति व्यपदेशः कथं घटतामिति वाच्यम्; उपास्योपासकाभेदविवक्षया वैश्वानरादिशब्दप्रयोगोपपत्तेरिति भावः । मुकितरेव फलमितीति । ज्ञाप-

यितुमुक्तयेत्यन्वयः । यद्यपि "सर्वेष्वात्मस्वन्नमत्ति' इत्यत्रानिष्टनिवृत्त्यंशो न कण्ठोक्तः ब्रह्मानुभवमात्रस्योक्तत्वात् तथापि तदन्त-र्गतत्वमस्तीत्यभिप्रयन्नाह - फलान्तर्गतेति । वाक्यप्रतिपन्नस्याङ्गभावस्येति - यद्यपि नानेन वाक्येनाङ्गाङ्गिभावः प्रतिपाद्यते, तथापि "उर एव वेदिर्लोमानि बर्हिः' इत्यग्निहोत्रसम्पत्तिवाक्ये "तस्य हवा

एतस्य' इत्यस्यानुकर्षात्तादथ्यर्सिद्धमिति भावः । शङ्क-रादिभिस्तु "अभिव्यक्तेः' इत्यादिसूत्रचतुष्टयं मतभेदेन प्रादेशमात्रश्रुतिनिर्वाहभेदप्रदर्शनपरं व्याख्यातम् अतिमात्रस्यापि परमात्मन योगवसात् प्रादेशमात्रत्वोपपत्तिरिति आश्मरथ्यो मन्यत इति अभिव्यक्तेरिति सूत्रार्थमाहुः । प्रादेशमात्रहृदयादयावच्छिन्नमनोनु-स्

१.२.३३

"उपासकानुग्रहार्थं प्रादेशमात्रतया अभिव्यक्तिसम्भवात् द्युपृथिव्यादिप्रादेशसम्बन्धिनी प्रादेशी मात्रा परिमाणं यस्य स तथोक्तमिति मरणीयतया रूढिपूर्वकलक्षणाया प्रादेशमात्रत्वमिति बादरिरिति द्वितीयसूत्रार्थमाहुः । वाजसनेयके प्रादेशमात्रे उपासकमूर्द्धचुबु-कान्तराले त्रैलोक्यात्मनो वैश्वानरस्य द्युप्रभृतीनां मूर्द्धाद्यवयवानां सम्पादनात्प्रादेशमात्रत्वोपपत्तिः । एवं हि साजसनेयके श्रूयते;-

प्रादेशमात्रमिव ह वै देवास्सुविदिता अभिसम्पन्नास्तथा तु एतान् वक्ष्यामि । यथा प्रादेशमात्रमिवाभिसम्पादयिष्यामीति । स होवाच मूर्द्धानमुपदिशन्नुवाच एष वा अतिष्ठा वैश्वानर इति चक्षुषी उपदिशन्नुवाच एष वै सुतेजा वैश्वानर इति नासिके उपदिशन्नुवाच एष वै पृथग्वर्त्मा वैश्वानर इति मुख्याकाशमुपदिशन्नुवाच एष वै बहुलो वैश्वानर इति मुख्या आप उपदिशन्नुवाच एष वै रयिर्वैश्वानर इति चिबुकमुपदिशन्नुवाच एष वै प्रतिष्ठा वैश्वानर इति । अयमर्थः, प्रादेशमात्रमिव देवास्सूर्यादयः अभिसम्पन्नाः प्राप्ताः उपासनतया यदा तदा ते विदिता भवन्ति । अहं केकयराजः, युष्मभ्यम् औपमन्यवादिभ्यः, एतान् देवान्, तथा वक्ष्यामि यथा प्रादेशमात्रमेवाभि-सम्पादयिष्यामीति औपमन्यवप्रभृतीन् प्रति वक्तव्यत्वेन प्रतिज्ञाय अश्वपतीं रोजोवाच, किं कुर्वन्नित्युक्ते अस्य मूर्द्धानमुपदिशन् कराग्रेण दर्शयन् एष वै भूरादिलोकानतीत्य तिष्ठतीत्यतिष्ठा द्यौर्वैश्वानरस्यावयव इति प्रसिद्धे मूर्द्धनि वैश्वानरस्याधिदैवं यो मूर्द्धा द्युलोकः तत् दृष्टिः कर्तव्येत्यर्थः । स्वकीये चक्षुषी दर्शयन्नाह एष वै सुतेजास्स हि सूर्योधिदैवतं वैश्वानरस्य चक्षुरितिप्रसिद्धयोश्चक्षु-षोर्वैश्वानरस्याधिदैवं यदादित्याख्यं चक्षुः तद्दृष्टिरित्यर्थः । इत्यादि सर्वत्र ज्ञेयमिति, इत्थं सम्पत्तेरिति सूत्रार्थमाहुः । अस्मिन् प्रादेश-मात्रे मूर्द्धचिबुकान्तराले एनं परमात्मानं जाबाला अप्यधीयते । "एषोऽनन्तोऽव्यक्त आत्मा सोविमुक्ते प्रतिष्ठितः' इति । सोविमुक्तः अस्मिन् प्रतिष्ठ इति वरणायान्नस्य मध्ये प्रतिष्ठित इति । का वै वरणा काच नासीति तत्र चेयामेव नासिकां वरणा नासीति निरूच्य पुनरप्यामनन्ति । कतमच्चास्य स्थानं भवति भ्रुवोः प्राणस्य च यस्सन्धिस्स एष द्युलोकस्य परस्य सन्धिर्भवतीति । ततश्च नासिकाभ्रू-मध्यप्रदेशमात्रवर्त्तिनि परमात्मनि प्रादेशमात्रोपपत्तिरिति चतुर्थसूत्रार्थमाहुः । तेषां मते चतुस्सूत्र्या अपि प्रादेशमात्रत्वनिर्वाहमात्र-

१.२.३३

प्रदर्शनपरत्वेन अस्मन्मत इव प्रत्येकं भिन्नभिन्ननिवृत्त्या शङ्काया अभावात् नातीव सप्रयोजनमित्याह - अीभव्यक्तिरनुस्मरणी-यत्वमित्यादिना । द्युप्रभृतिमूर्द्धत्वादिसम्पादनमिति पाठः । मस्तकचिबुकान्तराल इत्येतत् काकाक्षिन्यायेनोभयत्र सम्बध्यते, मस्तकचिबुकान्तराले द्युमूर्द्धत्वादिसम्पादनं मस्तकचिबुकान्तराले परस्य स्थितेरिति चोभयत्र सम्बध्यते, श्रुत्या प्रतिपादनमित्य-स्यानन्तरं प्रादेशमात्रत्वश्रुतिनिर्वाहौपयिकमिति शेषः पूरणीयः ।।

Third Pada

१.३.१

ननु पूर्वस्मिन्नधिकरणे द्युमूर्द्धत्वादिकमेव परमात्मलिङ्गत्वनोपन्यस्तम्, नतु द्युप्रभृतिसम्बन्धित्वमात्रमित्यस्वरसादाह - यद्वा अदृश्यत्वादिगुणक इतीति । असमाप्तिबुध्येति - अदृश्यत्वबुध्येत्यर्थः । यद्यपि नैतदधिकरणपूर्वपक्षिणा अदृश्यत्वादिगुणकस्य परमात्मत्वमाक्षिप्यते, अपि तु तदभ्युपेत्यैव तत्प्रकरणविच्छेदेन "यस्मिन् द्यौ'रितिमन्त्रस्य लिङ्गवशाज्जीवपरत्वमित्येव पूर्वपक्षः प्रवर्त्यते, तथापि यस्मिन् द्यौरितिमन्त्रस्य जीवपरत्वे अदृश्यत्वादिवाक्येपि

परमात्मत्वशङ्का अङ्कुरेदिति भावः । विषयवाक्यश्रुति-क्रमस्सर्वोपि अदृश्यत्वाधिकरणे लिखितः, तत्रैव द्रष्टव्यः । श्लोकस्य द्युभ्वाद्यायतनविषयत्वमिति - द्युभ्वाद्यायतनपरत्वमित्यर्थः । ननु "अन्तस्तद्धर्मोपदेशात्' इति भाष्ये "अजायमानो बहुधा विजायते' इति श्रुतिवशात् परमकारुणिको भगवान् स्वेच्छयैवोपा-सकप्रतिपत्त्यनुगुणाकारदेवमनुष्यादिसंस्थानभाग्भवतीत्यभिधानात्कथं बहुधा जायमानत्वं जीवलिङ्गमित्यत आह - अन्तरादित्य-

१.३.१

विद्यायामिति । बहुधाशब्दार्थस्तत्र सूत्रकृता न विचारित इति भावः । प्रथमनिर्वाह इति - योगपक्षे यौगिकार्थस्य मुख्यत्वेपि प्रथम-प्रतिपन्नरूढ्यर्थस्य सर्वात्मना त्यागो दोषः । द्वितीये तु रूढ्यर्थसदृशार्थपरिग्रहेण सर्वथा रूढ्यर्थापरित्यागेपि अशक्यार्थस्वीकारो दोष इति भावः । हेतुविशेष इति - इच्छारूपहेतुविशेषः उपासकानुग्रहरूपफलविशेषश्च सूच्यत इत्यर्थः ।।

१.३.२

पदार्थकथनपूर्वकत्वात् वाक्यार्थकथनस्य व्युत्क्रमेण कथने हेतुमाह - सूत्रसङ्गतेरिति । सङ्गच्छमानम् सङ्गतिमन्तमित्यर्थः । सङ्गतिमति कथिते सङ्गतेर्बुद्धिस्थत्वादिति भावः । सूत्रस्य द्राधीयस्त्वादिति - "अव्ययं विभक्ती'त्यादिसूत्रस्यातिदीर्घत्वादित्यर्थः । प्रकृतात्परमात्मनोऽन्यदिति - अस्मिन् सूत्रे प्रधानजीवयोः प्रकृतत्वात्तच्छब्दे तयोः परामर्शसम्भवादिति भावः । परमात्मा चेदिति

१.३.४

यद्यपि प्रधानजीवव्यतिरिक्तः परमात्मनोऽन्योपि सम्भवति, तथापि प्रधानजीवपरमात्मनामेव प्रस्तुतत्वेन तच्छब्दस्तत्रैव पर्यवस्यति । अतएवोत्तरत्र तद्वाचिशब्दव्यतिरिक्तशब्दादित्यस्य परमात्मशब्दादित्यर्थसिद्धिमभिप्रेत्य तत्स्वशब्दादित्यनधिकार्थमिति वक्ष्यति । अतः पारिशेष्यादर्थाभाव इति - अम्भावस्तु नाव्ययीभावादतोत्वपञ्चम्या इति' इति पर्युदासान्न भवतीति रूपसिद्धिः ।।

१.३.६

ईशभिन्नत्वस्य जीवसाधारण्यात्कथं प्रकृतिपरत्वमित्याशङ्कयाह - स्त्रीलिङ्गसामर्थ्यादिति । ननु भूतार्थे विहितस्य प्रीयमाणमिति वर्तमानार्थनिर्देशः कथमित्यत्राह - आदिकर्मणि क्त इति भाव इति । तदाशब्दस्य मन्त्रे अश्रवणादाह - यत्तदोरिति । पक्षान्तरमाह - इतिशब्द इति । तदर्थस्तदाशब्दविवक्षित इति - तदर्थ इतिशब्दार्थ इत्यर्थः । भाष्यस्थस्तथाशब्द इतिशब्दव्याख्यानमित्यर्थः । ननु भेदव्यपदेशमात्रेण कथं द्युभ्वाद्याधारस्य परमात्मत्वं जीवत्वं वा कुतो न स्यादित्यत्राह - द्रष्टृत्वसमानाधिकरणेति । पूर्वत्रोत्तरत्र चेति

१.३.६

प्राणभृत्प्रतिक्षेपे परमात्मसाधने चेत्यर्थः । प्राकरणिकतयोक्तानीति - न त्वेतन्मन्त्रप्रतिपाद्यानीत्यर्थः । सार्वज्ञ्यादिसमानाश्रय-त्वादिति - यस्सर्वज्ञस्स्सर्वविदित्यत्र प्रकरणे श्रवणात्सार्वज्ञ्यमपि प्रकृतद्युभ्वाद्यायतनविषयमिति भावः । स्वयं योग्यत्वादिति । जीवस्य तु सार्वज्ञ्यामृतसेतुत्वादेरदृष्टादिद्वारा अमुख्यतया कथञ्चिन्निर्वाह्यत्वादिति भावः । नन्वस्मिन् सूत्रे श्रुत्या परमात्मपर- त्वमेव साध्यते, नहि तत्र "भेदव्यपदेशात्' इतिसूत्रोक्तहेतोरन्वयोऽस्ति, तस्य प्रत्यगात्मपरत्वप्रतिक्षेपकत्वादित्यत आह - तदपि प्रत्यगात्मेति । नन्वस्मिन् सूत्रे जीवपरयोः प्रस्तुतत्वोपन्यासः कथं द्युभ्वाद्यायतनस्य परमात्मत्वे जीवत्वप्रतिक्षेपे वा उपयुज्यते, प्रत्युत विरुद्ध एव । यदि च प्राकरिणिकहेत्वन्तरैः पूर्वसूत्राभिप्रेतैः परमात्मासाधारणैः परमात्मपरत्वं साध्यते, किमनेनेत्याशङ्कय सूत्राभिप्रेतमर्थमाह - अभिचाकशीतीति परस्येति । तदुपयोगितयेति - परमात्मनो भोक्तृत्वराहित्यप्रतिपादने प्रयुक्तोऽयं मन्त्रः, तत्र भोक्तृत्वराहित्यं द्रढयितुं

लोकवेदसिद्धं भोक्तृत्वं जीवस्यैव, न तु परमात्मनश्शरीरावस्थितस्यापीति प्रतिपादयति; अतो जीवस्य भोक्तृत्वप्रतिपादनं परमात्मनस्तदभावप्रतिपादनाय । न च परमात्मनः अभोक्तृत्वर्पतिपादनं जीवस्य भोक्तृत्वप्रतिपत्त्यर्थमिति वैपरीत्यं वक्तुं शक्यम्, प्रसिद्धं ह्यप्रसिद्धप्रतिपत्त्यर्थं भवेत्, न च परमात्मस्वरूपं जीवादपि प्रसिद्धम्, येन तथा स्यात् नापि परमात्मप्रति-

१.३.६

पत्त्यपेक्षयापि जीवप्रतिपत्तिः प्रयोजनवती, येन परमात्मप्रतिपादनं जीवप्रतिपत्त्यर्थं स्यात्, तस्माज्जीवभोक्तृत्वप्रतिपादनमभोक्तृपर-मात्मप्रतिपत्त्यर्थम् तस्मात्तस्मिन्मन्त्रे परमात्मा प्रतिपाद्यत इति सिद्धम् स च मन्त्रः प्राक् प्रस्तुतद्युपृथिव्याद्याधारविषय एव अप्र-स्तुताभिधाने असङ्गतेः, तस्मात् द्युभ्वाद्यधिकरणं परमात्मेति सिद्धमिति भावः । पदानामस्वारस्यप्रसङ्गाच्चेति । अचेतने अन्तःकरणे शोकमोहासीनामसम्भवादिति भावः । पश्य इति - पश्यः परमात्मा, पश्यन्तं चेतनम्, अपश्यन्तमचेतनं, पश्यन्तं परमात्मानं,

१.३.६

पश्यापश्ये चेतन्नोचेतनश्च, पश्यपश्यत्वात् परमात्मदृश्यतैकस्वरूपत्वान्न पश्यत इत्यर्थः । इह कैश्चिदित्यादि - धारकत्वयोगादिति । इदमुपलक्षणम् परावरत्वयोगादित्यपि द्रष्टव्यम् । सद्विद्यावाक्यविषयत्वं चेति - परैर्हि स्वशब्दादित्यस्यात्मशब्दादित्यप्यर्थः, प्रक-रणान्तरे आयतने सदायतना इति स्वासाधारणसच्छब्दप्रयोगात् द्युभ्वाद्यायतनय परमात्मेत्यर्थोऽपि वर्णित इति भावः । द्वितीयसूत्रस्य चेति - यद्यप्यस्मिन्नपि सूत्रे अविद्याविमुक्तप्राप्यत्वव्यपदेशादिति योजनान्तरमप्युक्तम्, तथापि तस्याभिमतत्वात् विमुक्तैः ज्ञेयत्व-व्यपदेशादितियोजनान्तरमेव स्वानभिमततया दूष्यत इति द्रष्टव्यम् । वाक्कर्तृकमुक्तप्रत्यभिज्ञानमिति पाठस्समीचीनः । वाग्विमुक्तेरिति परैरुक्तेरिति द्रष्टव्यम् । तत्र च प्रत्ययविपरिणामेनेत्यस्य वाच इति द्वितीयाया विपरिणामेनेत्यर्थः । वाक्कर्तृकेतिपाठे मुक्तेत्यत्रादिकर्मणि क्तः कर्तरीति कर्तरि क्तप्रत्ययः । वाग्रूपं कर्म वाक्कर्मकप्रत्ययः स्वार्थिकः द्वितीयेति योगविभागात्समासः । प्रत्ययविपरिणामेनेत्यस्य

१.३.६

आदिकर्मणि क्त इति क्तप्रत्ययविपरिणामेनेत्यर्थः । जीवव्यावृत्तिं प्रतिज्ञायेति - स्थित्यदनाभ्यां चेतिसूत्रेण प्राणभृदित्यस्यैव साध्यत्वादिति भावः । बुद्धिव्यावृव्युपपादनस्येति - अत्तृत्वानत्तृत्वाभ्यां जीवव्यावृत्तेरेवोपन्यसनीयत्वादिति भावः । परमात्मा भवतीति - ततश्च प्राणभृन्न भवतीत्यस्यान्तःकरणाद्युपाधिसम्पिण्डितचैतन्यं न भवतीत्येवार्थः, न तु उपाधिविनिर्मुक्तजीवचे- तन्यमपि न भवतीत्यर्थः, येनासङ्गतिस्यादिति भावः । हेतुतयोपन्यासायोगादिति - उपाधिसंयोगदशायां कल्पितस्य भोक्तृत्वस्य निष्कृष्टचैतन्येपि सत्त्वात्, इतरथा च कर्तृत्वादिबन्धस्य मोक्षस्य च वैयधिकरण्यप्रसङ्गादिति भावः । द्वासुपर्णावित्यस्य विशिष्ट-निष्कृष्टचैतन्यविषयत्वे गृहान्तःप्रविष्टे एकस्मिन् पुरुषे द्वौ पुरुषावित्यपि व्यपदेशप्रसङ्गात् विशिष्टनिष्कृष्टभेदेन द्वित्वसम्भवादिति भावः । व्यतिरेकेण जीवव्यावृत्तीति - अतच्छब्दादिति व्यतिरेकेणेत्यर्थः ।

१.३.७

छान्दोग्ये सप्तमप्रपाठके- "अधीहि भगव इति होपससाद सनत्कुमारं नारदः । तं होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्द्ध्वं वक्ष्यामीति' इति एतावज्जान इत्युक्तवा मदुपासनं कुर्वित्यर्थः । "स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सोहं भगवो मन्त्रविदेवास्मि नात्मवित् । श्रुतं ह्येवमेव भगवद्दृशेभ्यस्तरति शोकमातविदिति । सोहं भगवश्शोचामि । तन्मा भगवान् शोकस्य पारं तारयत्विति । तं होवाच नामोपास्वेति स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति । यो नाम ब्रह्मेत्युपास्ते अस्ति भगवो नाम्नो भूय इति नाम्नो वा व भूयोस्तीति तन्मे भगवान् ब्रवीत्विति, वाग्वा व नाम्नो भूयसी वाचमुपास्वेति । अस्ति भगवो वाचो भूय इति ।

वाचो वा व भूयोस्तीति तन्मे भगवान् ब्रवीत्विति । मनो वाव वाचो भूयः । अस्ति भगवो मनसो भूय इति मनसो वा व भूयोस्तीति तन्मे भगवान् ब्रवीत्विति सङ्कल्पो वा व मनसो भूयान् अस्ति भगवस्सङ्कल्पाद्भूय इति सङ्कल्पाद्वा व भूयोस्तीति तन्मे भगवान् ब्रवीत्विति चित्तं वा व सङ्कल्पाद्भूयः अस्ति भगवश्चित्ताद्भूय इति चित्तांद्वाव भूयोस्तीति तन्मे भगवान् ब्रवीत्विति ध्यानं वाव चित्ताद्भूयः । विज्ञानं वाव ध्यानाद्भूयः अन्नं वाव बलाद्भूयः आपो वा वान्नाद्भूयस्तेजो वावाद्‌भ्यो भूयः आकाशो वाव तेजसो भूयान् स्मरो वावाकाशाद्भूयान्, आशा वा व स्मराद्भूयसी' इत्यादिप्रश्नप्रतिवचनानन्तरं प्राणो वाशाया भूयान्, यथा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वं समर्पितम् प्राणः प्राणेन याति प्राणः प्राणं ददाति, प्राणाय ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः, प्राणो ब्राह्मणः, स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वा आचार्यं वा ब्राह्मणं वा किञ्चि-द्भृशमिह

प्रत्याह, धिक् त्वाऽस्त्वित्येवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमसि आचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति । अथ यद्यप्येनानुत्प्रान्तप्राणान् शूलेन समासंव्यतिषं दहेत्, नैवैनं ब्रूयुः पितृहासीति न मातृहासीति न भ्रातृहासीति न स्वसृहासीति नाचार्यहासीति न ब्राह्मणहासीति । प्राणो ह्येवैतानि सर्वाणि भवति स वा एष एवं पश्यन् एवंविदे-वंमन्वान एवं विजानततिवादी भवति तं चेद्ब्रूयुरतिवाद्यसीति अतिवाद्यस्मीति ब्रूयान्नापहनुवीत । एष तु वा अतिवदति यस्सत्येनाति-वदति सोऽहं भगवस्सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति । यदा वै विजानात्यथ सत्यं वदति नाविजानन् सत्यं वदति विजानन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति यदा वै

१.३.७

मनुते अथविजानात्यथ मनुते मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति । यदा वह श्रद्दधाति अथ मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवो विजिज्ञास इति । यदा निस्तिष्ठत्यथ श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञास इति । यदा वै करोत्यथ निस्तिष्ठति । यदा वै सुखं लभते अथ करोति सुखं भगवो विजिज्ञास इति यो वै भूमा तत्सुखं भूमानं भगवो विजिज्ञास इति यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा । अथ यत्रान्यत्पश्यत्यच्छृणोति अन्यद्विजानाति तदल्पम् यो वै भूमा तदमृतम् अथ यदल्पं तन्मर्त्यं स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नीति । यदि वा न महिम्नीति, गो अश्वमिह महि-मेत्याचक्षते, हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति, नाहमेवं ब्रवीमीति होवाच । अन्यो ेह्यन्यस्मिन् प्रतिष्ठित इति । स एवाध-स्तात्स उपरिष्टात्सपश्चात्स पुरस्तात्स दक्षिणतस्य उत्तरतस्स एवेदं सर्वमित्यथातोऽहङ्कारादेश एव अहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणत अहमुत्तरत अहमेवेदं सर्वमिति । अथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति, स एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्मभिधुन आत्मानन्दस्स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति, अथ येऽन्यथातो विदुरन्यराजानस्तेऽक्षय्यलोका भवन्ति तेषां सर्वेषु लोकेषु कामचारो भवति । तस्य हवा एतस्यैवं पश्यत एवंमन्वानस्यैवं विजानत आत्मतः पाण आत्मत आशा आत्मतः कर्माणि आत्मत एवेदं सर्वमिति । तदेष श्लोको न पश्यो मृत्युं पश्यति न रोगं नोतदुःखतां सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः' इति । हिंसायोग्यत्वश्रवणाज्जीवत्वमित्यस्यानन्तरं सिद्धवत्कृत्य पर्वोत्तरपक्षौ प्रवर्त्येति इत्यथद्वारा सङ्गतिरिति ग्रन्थोपेक्षितः, इतरथा प्राण-सम्बन्धिनो जीवत्वस्य पक्षद्वयाभ्युपेतत्वेन प्राणसम्बन्धिनो जीवत्वं पूर्वपक्षीक्रियत इति वा सिद्धान्तीक्रियत इति वा वक्तुं शक्यत्वात् ततश्च पूर्वं प्राणसम्बन्धिनः परमात्मत्वं समर्थितम्, इह प्राणसम्बन्धिनो भूमत्वं पूर्वपक्षीकृत्य निरस्यत इति पर्यवसितोऽर्थः । ननु

१.३.७

धर्मिवाचिषष्ठयन्तशब्दान्तरनिर्देशाभावेपि धर्मवाचिभूमशब्दप्रतियोगितया निर्देशादेव धर्मपरत्वमस्त्वित्यस्वरसादाह - यत्र नान्य-त्पश्यतीति श्रुतेश्चेति । सप्राणनिष्प्राणविषयोपमर्दतदभावयोरिति पाठः क्वचिद्दृश्यते, सप्राणनिष्प्राणविषयोपमर्दयोरितिपाठस्स-मीचीनः । सप्राणविषयोपमर्दे सजीवशरीरोपमर्दनिमित्तहिंसाया निष्प्राणशरीरोपमर्दे निर्जीवशरीरोपमर्दनिमित्तहिंसाभावस्य च श्रवणादिति तस्यार्थः । अप्राणेष्वितीति - ननु मूलनिषिक्तसलिलदोहलपार्थिवधातूनामभ्यादानादचेतनेष्वपि प्राणोऽस्त्येव, उक्तं च न्यायसिद्धाञ्जने "स्थावरेष्वपि तत्सत्त्वम्' अतः कथमेतदिति चेत् सत्यं, प्राणोऽस्त्येव अथापि "भेदश्रुतेर्वैलक्षण्यात्' इतिसूत्रप्रति-पादितं पञ्चधा विभज्य शरीरधारणरूपं यत्प्राणासाधारणकार्यं तदभावादप्राणत्वोक्तिः । अत एव "नतु दृष्टान्तभावा'दिति सूत्रभाष्ये स्थावरेषु प्राणसद्भावेपि तस्य पञ्चधावस्थाय शरीरधारकत्वेनावस्थानं नास्तीति वक्ष्यते । आविस्तरां वेद-सम्यग्वेदेत्यर्थः । ननु

१.३.७

प्रक्रान्तस्यात्मोपदेशस्य प्राणपर्यन्तत्वात्प्राणः प्रत्यगात्मेति सिद्धान्तिना अनभ्युपेतत्वात्सिद्धान्ते प्राणः प्रत्यगात्मा न स्यादित्यत आह प्रक्रान्तस्यातोपदेशस्येत्यादिना । धारकत्वमिति - विवक्षितमिति शेषः ।

१.३.७

हेतुवाचिपदेष्विति - "सम्प्रसादादध्युपदेशात्' इति त्रिषु पदेषु मध्य इत्यर्थः । पूर्वनिर्दिष्टादूर्ध्वमभिधानं हीति - यद्यपि पूर्वत्र आदो वा वास्माद्भूयः इति कण्ठतोऽभिधानमस्ति, न प्रकृते; तथापि आधिक्यस्य प्रतियोग्यपेक्षायाम्

उपरिवेषामितानधिकरण-न्यायेनाव्यवहितप्राणस्यैवावधित्वेन ग्रहणमिति भाष्याभिप्राय इति भावः । अभिप्रायो विवृतो भवतीति - स्वरूपस्वभावविकार-शून्यतया परमात्मन एव सत्यशब्दाभिधेयत्वमित्यभिप्रायो विवृतो भवतीत्यर्थः । ननु तुशब्दस्य विशेषार्थकस्य व्यावर्तकत्वमेव लभ्यते,

१.३.७

न त्वधिकतया व्यावर्तकत्वमित्याशङ्कय सत्यं तुशब्दस्य विशेषमात्रप्रदर्शकत्वम्, तथापि प्रकरणवशादाधिक्यसिद्धिरित्याह - पूर्व-निर्दिष्टादुत्तरनिर्दिष्टस्येति । ननु तुशब्देनोपासकाधिक्योक्तावपि उपास्याधिक्यस्यानुक्तेः कथमुपास्याधिक्यं सिध्येदित्यत आह - तुशब्दो हीति । नहि जुहोतादिपदान्तरं श्रूयत इति - यद्यप्यग्निहोत्रजुहोतिपदयोर्न विशेषः, तथाप्याख्यातश्रवणे विधिसम्भवात्

१.३.७

विहितस्य विधानासम्भवात् कर्मान्तरत्वशङ्कासम्भव इति भावः । भाष्ये-इत्थम्भूतलक्षणे तृतीयेति । ब्रह्मोपासनोपलक्षित इत्यर्थः । इदमुपलक्षणम्, ब्रह्मणोऽतिवदननिमित्तत्वरूपकरणत्वसम्भवेन कारकविभक्तित्वमप्युपपद्यत इति द्रष्टव्यम् । सत्यवदनपक्ष एवेति - पूर्वपक्ष्यभिमत इति शेषः । वाक्यस्वरससिद्धमन्यत्वं न बाधितव्यमित्यस्य विप्रकृष्टतया अतश्शब्दस्यासन्निहितोपाध्यन्तरपरामर्शित्वं क्लिष्टमित्यस्वरसादाह - यद्वा अतिवादिशब्दस्येति । यौगिकत्वायौगिकत्वविवादस्य कण्ठतः प्रस्तुतत्वाभावादाह - यद्वा अति-क्रान्तेति । ननु अतिवादित्वं हि वस्त्वन्तरात्पुरुषार्थतया अतिक्रन्तस्वोपास्यवस्तुवादित्वमित्युक्तत्वेऽपि अतिक्रान्तस्वोपास्यवस्तु-

१.३.७

वादित्वमतिवादिशब्दप्रवृत्तिनिमित्तमित्येवं प्रागनिर्दिष्टतया कथमतश्शब्देन प्रवृत्तिनिमित्तत्वस्य परामर्श इत्याशङ्कयातिवादित्व-मतिप्रान्तस्वोपास्यवस्तुवादित्वमित्युक्तत्वेऽतिवादिशब्दस्य तदेव प्रवृत्तिनिमित्तमित्यस्यार्थस्य फलिततया फलितस्यार्थस्यातश्-शब्दपरामर्श उपपन्न इत्याह - अयमर्थः पूर्वोक्ताथर्फलमिति । फल इति

पुल्लिङ्गपाठस्साधुः । तस्यायमर्थः, अतिक्रान्तस्वोपास्य-वस्तुवादित्वस्यातिवादिशब्दप्रवृत्तिनिमित्तत्वरूपोऽर्थः पूर्वोक्तयौगिकार्थफल इति; एवञ्चातिक्रान्तस्वोपास्यवादित्वोपपादनं यौगि-कत्वोपपादकतया पर्यवस्यतीति अत एवेत्यादिवाक्यस्य यौगिकत्वोपपादनपरत्वं युक्तमिति भाव इति वदन्ति । अतिक्रान्तस्वोपा-स्यवस्तुवादित्वस्यैव प्रवृत्तिनिमित्तत्वादेव हीति - सत्यशब्दार्थस्य ब्रह्मण एव निरतिशयपुरुषार्थतया तद्वेदिन एवातिक्रान्तस्वो-पास्यवस्तुवादित्वमस्तीति "सत्यं त्वेव विजिज्ञासितव्यम्' इति सत्यशब्दाभिधेयं ब्रह्मैवोपास्यतयोक्तम् न तु वेदितव्यतयेत्यर्थः । विजिज्ञासितव्यशब्दास्वारस्यं भवेदिति - ननु विज्ञानमिति श्रद्धाकृतिषु "विज्ञानं त्वेव विजिज्ञासितव्यं विज्ञानं भगवो विजिज्ञास' इत्यादिष्विवात्रापि सम्पादनीयमित्येवार्थोऽस्तु, नच विज्ञानादिषु विजिज्ञासितव्यमित्यस्य सम्पादितव्यमित्येवार्थोऽवश्यं वाच्यः, अग्रे "यदा वै मनुते अथ विचानाति यदा श्रद्दधाति अथ मनुते' इति तदुपायकीर्तनदर्शनादत एव सत्यव्यतिरिक्तविषयाणि जिज्ञासितव्य-पदानि सम्पाद्यवाचीनीत्युत्तरत्र वक्ष्यतीति वाच्यम् तर्हि सत्येपि तथैवार्थोऽस्तु । अग्रे यदा वै विजानाति अथ सत्यं वदतीति तदुपाय-कीर्तनदर्शनादिति चेत् परमात्मनि प्रसिद्धस्य सत्यशब्दस्य परमार्थप्रतिपादके वचसि लक्षणया प्रयोगस्यायुक्तत्वात् सत्येनातिवदानीति तृतीयाया अयुक्तत्वात् अतीत्युपसर्गवैयर्थ्यात् तुशब्दस्वारस्याच्च सत्यं भगवो विजिज्ञास इत्यत्रापि सत्यवदनं सम्पादनीयमित्यर्थाश्रय-

१.३.७

णस्य क्लिष्टत्वाच्चेत्यादिदूषणे तात्पर्यात् । प्रमाणान्तरमुक्तमिति - प्रमाणशब्देन श्रुतिलिङ्गे विवक्षिते । ब्रह्मसाक्षात्कारनिमित्ते-त्यनेनेति - यदा वै विजानातीत्यस्य वाक्यस्य साक्षात्कारित्वनिमित्तातिवादित्वप्रतिपादनपरतया ग्रन्थकृतैव व्याख्यायमानत्वादिति द्रष्टव्यम् । तदुपायभूतं सत्योपासनं कुर्यादित्यर्थ इति - सत्यं त्वेव विजिज्ञासितव्यमितिवाक्यस्येतिशेषः । ननु यदा वै विजानात्यथ सत्यं वदति नाविजानन् सत्यं वदतीत्यादिवाक्यं सत्यं त्वेव विजिज्ञासितव्यमित्यस्यानन्तरखण्डे पठ्यते प्रकरणं चोत्तरोत्तरस्य पूर्वपक्षं प्रति हेतुत्वप्रतिपादनपरम्, नतूत्तरोत्तरस्य पूवर्पूर्वसाध्यत्वप्रतिपादनपरम्; ततश्च पूर्वखण्डे सत्यं त्वेव विजिज्ञासितव्यमित्यु-पासनं विधाय तत्साध्यसाक्षात्कारं तदुत्तरखण्डे कथं प्रतिपादयतीति चेत् ? उच्यते; पूर्वखण्डे सत्यं त्वेव विजिज्ञासितव्यमिति अतिवादित्वसिद्धये ब्रह्मोपासनं विहितम् तत्र चातिवादित्वे सत्योपासनस्य साक्षात्कारद्वारा हेतुत्वमिति प्रतिपाद्यते द्वितीयखण्डे ततश्च खण्डद्वयेनापि

अतिवादित्वनिमित्तेन साक्षात्कारहेतूपासनं विधीयते, तदुत्तरखण्डैरुपासनोपयोगिमननादयो विधीयन्त इति भाष्यकाराभिप्राय इति भावः । यादृच्छिकेति - जानश्रुतेर्हससंवादादिना ब्रह्मणि निरतिशयपुरुषार्थत्वावगमस्य दृष्टत्वात् महा-भगवतसंवादादिना च ब्रह्मणि निरतिशयपुरुषार्थत्वावगमस्य दर्शनादित्यर्थः । लभतेः प्राप्त्यर्थत्वादिति - ज्ञानस्यापि प्राप्तिरूपत्वा-दिति भावः । मुख्यप्राप्तिपरत्वेऽनिष्टमाह - नहि श्रवणादेरिति ।

सत्यव्यतिरिक्तविषयाणीति - "विज्ञानं विजिज्ञासितव्यं मतिस्त्वेव

१.३.७

विजिज्ञासितव्या' इत्यादावुपासनार्थत्वासम्भवादिति भावः । दृश्यमिथ्यात्वशङ्का स्यादितीति - ब्रह्मव्यतिरिक्तदर्शनाभावो हि दृश्यव्यतिरेकाद्वा स्यात् दृशिव्यतिरेकाद्वा, तस्य दृशि स्वरूपस्य नित्यतया दृश्यव्यतिरेक एव पर्यवस्यतीति दृश्यमिथ्यात्वं सिध्-यतीति परेषामाशय इति भावः । भाष्ये-अनवधिकातिशयस्वरूप इति ।

यद्यपि "यत्र नान्य'दिति भूमलक्षणवाक्ये यत्र नान्यत्प-श्यतीत्यल्पलक्षणवाक्य इवानिर्धारितवस्तुपामशर् एवोचितः । न त्वनवधिकत्वादिविशिष्टपरामर्शः, अत एवान्यदर्शनाभावादेस्तद्ब-ललभ्यत्वकथनमप्यनुचितम् । नहि यः सास्नावान् स हि गौरित्यत्र यच्छब्देन गोत्वविशिष्टपरामर्शात् सास्त्रावत्त्वलाभ इति सङ्गतम् तथापि जन्मादिसूत्रे यतस्सर्वज्ञादिति सकलभाष्यकृतां व्यवहारात् समाधानसम्भवादिति द्रष्टव्यम् । ततोऽन्यदिति व्याख्येयं पदम्

दुःस्वरूपं तद्व्यतिरिक्तं च किञ्चिन्न पश्यतीत्यर्थ इति - दुःखरूपम् दुःखत्वमित्यर्थः । "न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् । सर्वं ह पश्यः पश्यति' इति साक्षितयोदाहरिष्यमाणश्लोकानुसारेण नान्यत्पश्यतीत्यत्र यत्र यत इति द्वयमपि योज्यम्, ततश्च यस्मि-न्ननुभूयमाने तद्विरुद्धं दुःखत्वं यस्मिन्न पश्यति यतोऽन्यच्च न पश्यति स भूमेत्यर्थः । तत्र दुःखदर्शनाभावहेतुरिति - विभूतिगुण-विशिष्टे ब्रह्मणि दुःखरूपत्वदर्शनाभावहेतुरित्यर्थः । दुःखं न पश्यतीत्यर्थ इति - विभूतिगुणविशिष्टो ब्रह्मणि दुःखरूपतां न पश्य-तीत्यर्थः । स्वरूपान्तर्गताः ज्ञानादिगुणा इति - ज्ञानानन्दादीनां स्वरूपनिरूपकत्वादिति भावः । अभिप्रेतहेतुसमुच्चयार्थ इति - दुःखदर्शनाभावहेतोरनवधिकातिशयसुखरूपत्वस्यानवधिकातिशयसुखरूप इति विशेषणेनाभिप्रेतस्य समुच्चयार्थ इति भावः । विभूतिर्हि ब्रह्मणोऽन्येति शङ्कायामिति - यत्र यद्विभूतो चानुभूयमाने यतोऽन्यन्न पश्यतीत्युक्ते यच्छब्दद्वयेनापि ब्रह्मण एव परा-मृष्टतया विभूतेरपि तदनन्यत्वादित्यर्थः । ऐश्वर्यापरपर्यायविभूतिगुणविशिष्टम्- इतिभाष्यस्य विभूतिविषयो गुणो विभूतिगुणः,

१.३.७

ऐश्वर्यापरपर्यायविभूतिगुण इति वा, विभूतिश्चासौ गुणश्च विभूतिगुणः, ऐश्वर्यापरपर्यायश्चासौ विभूतिगुणश्च ऐश्वर्यापरपर्यायविभू-तिगुण इति वा ऐश्वर्यापरपर्यायविभूत्या गुणैश्च विशिष्ट इति वेत्यर्थत्रयमभिप्रेत्य व्याचष्टे - विभूतिविषयो गुण इत्यादिना । यच्छब्द एव विशिष्ट ब्रह्मपर इति भाव इति - यदि विशेष्यस्वरूपमात्रस्यैव भूमत्वमाचक्ष्महे तदा यत्र नान्यत्पश्यतीतिलक्षणस्याव्याप्ति-स्यात्, विभूतिवाचकशब्दश्च मृग्येत, अपि तु विभूतिगुणविशिष्टमेव भूमशब्दार्थः, न विशेष्यमात्रम् ततश्च यच्छब्दोपि लक्ष्यत्वे-नाभिमतं विशिष्टमेव परामृशेत्, अतो न काप्यनुपपत्तिरिति भावः । न च विशिष्टस्यैव भूमशब्दार्थत्वे विशिष्टस्याहमथर्शरीरकत्वा-त्मत्वयोरभावेन "अथातोऽहङ्कारादेशः' इत्यादिना भूम्न अहङ्ग्रहोपासनात्मत्वोपदेशो न स्यादिति वाच्यम्; विशेष्यांशाभिप्रायेणा-हङ्ग्रहात्मत्वोपदेशसम्भवादिति द्रष्टव्यम् । न त्वत्यदर्शनमित्यर्थ इति - न तु विशेष्यान्यदर्शनमपीत्यर्थः । दुःखादर्शनमनुपपन्नमिति - दुःखरूपत्वदर्शनमनुपपन्नमित्यर्थः । सर्वस्येति व्याख्येयं पदम् । दार्ष्टान्तिकेपि तादृक्त्वमाहेति - यद्यपि भाष्ये द्वितीयदृष्टान्तसा-

१.३.८

धर्म्यमेव कण्ठत उक्तम्, तथापि प्रथमदृष्टान्तसाधर्म्यमप्यभिप्रेतं द्रष्टव्यम् । एतदिति व्याख्येयं पदम् । औपाधिकेत्यादि व्याख्यानम् । सुकृतम्, "रसो वै सः' इति कार्यावस्थोच्यते । "आनन्दाद्धयेन खलु' इति कारणावस्थोच्यते । भाष्ये-अथातोऽहङ्कारादेश इत्यह-

१.३.८

ङ्ग्रहोपक्रमादिति । जीवस्वरूपोपदेशपरत्वे अथातोहमुपदेश इति स्यात् अतोऽहङ्कारशब्दो बुद्धिपर इति भावः । अस्मिन् प्रकर- णेऽपि सर्वात्मत्वमुक्तमिति दर्शयिष्यन्निति - यद्यपि "स एवाधस्तात्' इत्यादिना भूम्नसर्वात्मकत्वं प्रागप्युक्तम्, तथापि सर्वा-त्मकत्वदृढीकरणायोत्तरत्रापि दर्शयिष्यन्नित्यर्थः । एतञ्चोपलक्षणम् । अथात आत्मादेश इत्यस्याभावे "तरति शोकमात्मवित्' इत्युपक्रान्तस्यात्मोपदेशस्यापर्यवसानात् अन्यदुपक्रान्तमन्यदापतितमितिशङ्का स्यात्, अतो

भूमैवात्मेतिदर्शयितुमात्मोपदेश इत्यादिसन्दर्भ इति द्रष्टव्यम् । आत्मत्वं फलितमित्युक्तमिति - सर्वात्मत्वे कथिते उपासकात्मत्वमपि फलितमित्यभिप्रेत्य अथात आत्मदेश इति वाक्यमुदाहृतमित्यर्थः । कण्ठोक्तिमद्वाक्यस्येति । तस्य ह वा एतस्येतिवाक्यस्येत्यर्थः । भाष्ये-उपासकस्यान्त-र्यामितयावस्थितत्वादिति । विजानत आत्मत इति श्रुतेरुपासकस्यान्तर्यामिण इत्यर्थ इति भावः । यदत्र विवरणकारणोक्तम् अह-ङ्कारस्यात्मैकत्वेन प्रत्यक्षसिद्धस्याथातोहङ्कारादेशः । अथात आत्मादेश इति पृथगुपदेशो भेदार्थः, भूमात्मनोर्भिन्नत्वेन प्रसिद्धयोः

पृथगुपदेश ऐक्यार्थः । द्वयोस्सार्वात्म्यायोगादिति तदसारम् । अहमर्थादन्यस्यात्मनो भूमाख्यब्रह्मभिन्नत्वेन प्रत्यक्षासिद्धत्वात् तयोरुपदेशो भेदार्थः, अहमर्थस्य तु ब्रह्मभिन्नत्वेन प्रत्यक्षासिद्धत्वात्तयोरुपदेश ऐक्यार्थ इति वैपरीत्यस्यापि सुवचत्वात् । न चाह-मर्थस्य जडरूपस्यान्तः करणस्य भूमाभेदबोधनं बाधितम् नात्मनस्तथेतिवाच्यम्; तस्य तन्मतश्रद्धालुमात्रहृदयङ्गमत्वात्, अतस्स एवाधस्तादित्यादिना सर्वात्मत्वेनोपदिष्टे भूम्नि अथातोहङ्कारादेश इति अहङ्ग्रहोपासने विहिते तस्य दृष्टिविधित्वशङ्कावारणाय प्रागुपक्षिप्तसर्वात्मकत्वं द्रढीकुर्वन्नुपक्रान्तात्मोपदेशस्य तत्रैव पर्यवसानं च दर्शयति अथात आत्मादेश इत्यादिना इत्येव युक्तमिति द्रष्टव्यम् ।। इति भूमाधिकरणम् ।।

१.३.९

गार्गिब्राह्मणम्- "अथ हैनं गार्गी वाचकवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदं सर्वमप्स्वोतं च प्रोतञ्च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेति गन्धर्वलोकेषु गार्गीति कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्चेति चन्द्रलोकेषु गार्गीति कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्चेति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देवलोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतीन्द्रलोकेषु गार्गीति कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच गार्गि मातिप्राक्षीर्मा ते मूर्द्धा व्यपप्तत् अनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि मातिप्रा-क्षीरिति ततोह गार्गी वाचकव्युपरराम । वाचक्नवी-वाचक्नया दुहितेत्यर्थः । अनतिप्रश्न्याम्-विजिगीषु कथायां प्रश्नायोग्यामित्यर्थः । तदनन्तरमुद्दालकप्रश्नः । "अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमौ द्वौ प्रश्नौ पक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेनेति पृच्छ गार्गीति । सा होवाच अहं वै याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वा उपतिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति । सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदर्वाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते । आकाश एव तदोतं च प्रोतं चेति । कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति । स होवाचैतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्न-स्वमदीर्घमलोहितमस्नेहमच्छायमतमो अवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनो अतेजस्कमप्राणममुखममात्रमनन्तर-मबाह्यं न तदश्नाति किञ्चन न तदश्नाति किञ्चन । एतस्य वा अक्षरस्य प्रशासने गागिर् सूर्याचन्द्रमसौ विधृतौ तिष्ठतः । एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः । एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्रा अर्धमासा मासा ऋतवस्संवत्सरा इति विधृतास्तिष्ठन्ति । एतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्यो नद्यस्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां दिशमन्वेतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वी पितरोऽन्वायत्ताः । यो वा एतदक्षरं गार्ग्य-विदित्वा अस्मिंल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणोथ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्मणः । तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्ट्रश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञात्रेतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोत-श्चेति । सा होवाच ब्राह्मणा भगवन्तस्तदेव बहुमन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वं न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ततो ह वाचक्नव्युपरराम । न वै जात्वित्यादि । युष्माकं मध्ये कश्चिदपीमं याज्ञवल्क्यं ब्रह्मोद्यं ब्रह्मवादं प्रति जेता नेत्यर्थः । काश्यो वैदेहः - काशीराजो विदेहराजः । उज्ज्यम्-अवरोपितज्यमित्यर्थः । अपरस्मै धारयस्वेति- द्वितीयप्रश्नाय सन्नद्धो भवेत्यर्थः । श्वेतेभ्यः पर्वतेभ्यः हिमवदादिभ्यः । बहुमन्येध्वं-किं तत् ? यदस्माद्यावल्क्यान्नमस्कारं कृत्वा निर्गमनम्, जयस्त्वस्य मनसापि नाशङ्कनीय इति भावः । तत्तु

परमात्मव्यतिरिक्तस्येति - इह हि द्वेधा पूर्वपक्षिणो गतिः । "यदूर्ध्वं गार्गि दिबो यदर्वाक्' इतिवाक्ये आकाशशब्देन भूताकाश एवोच्यते, तदाधारतया अक्षरमव्याकृतमाकाशमुच्यत इति, अथवा आकाशशब्देनाव्याकृताकाश एवोच्यते तदाधारतया निर्दिश्य-

१.३.९

मानमपि तदेव, स्वे महिम्नि प्रतिष्ठित इतिवदिति भावः । नान्तरिक्ष इति - "न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवि तस्माद्धिरण्यं निधाय चेतव्यम्' इति विधिशेषः । परस्मिन्नक्षरशब्दो दृश्यत इतिवाक्यस्वारस्यपर्यालोचनायां प्रधानपूर्वपक्षोपमर्दमात्रकृतसंरम्भस्य वाक्यमिवाभातीत्यस्वरसादाह - अथवा पार्श्वस्थचोद्यमिति । अन्तशब्दोऽवधिवचन इत्यादि - इदमुपलक्षणम् अन्तो हि लयः,

१.३.९

स च कारणावस्थाप्राप्तिवचनेनान्तशब्देन कारणं लक्ष्यत इत्यपि द्रष्टव्यम् । कृत्स्नविकारजातस्याधारो भवितुमर्हतीति । ननु वायु-मदाकाशस्यावकाशप्रदानद्वारा सङ्कुचितसकलविकाराश्रयत्वमाकाशस्य सम्भवति । असङ्कुचितसकलविकाराश्रयत्वं तु प्रधानस्यापि न सम्भवति, तस्य जीवगतविकारानाश्रयत्वात्; अतो व्यर्थ आकाशब्दस्य रूढित्याग इति चेन्न; "यदन्तरा द्यावापृथिव्योरिमे' इति द्यावापृथिव्योरन्तरालवर्तिनः कायर्जातस्य निर्देशात्, तत्र च वायुमदाकाशस्य सङ्गूहावश्यम्भावात्, तदाधारत्वं भूताकाशस्य न सम्भवतीति भावः । ननु "यदूर्ध्वं याज्ञ्यवल्क्य दिवो यदर्वाक् पृथिव्याः' इति प्रश्नस्य तत्प्रतवचनस्य कथं प्रधानविषयत्वम् ? पूर्व-सन्दर्भविरोधात् एवं ह्युपाख्यायते बृहदारण्यके,-जनकयज्ञे कुरुपाञ्चालणीयत्वात् अक्षरशब्दस्याधुना यौगिकत्वप्रतिपादनं मिथ्ये-

यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं च' इत्युक्ते त्रैकाल्यवर्त्तिनो विकारजातस्या-धारतया निर्दिष्ट आकाशो न वायुमदाकाशो भवितुमर्हति, तस्यापि विकारान्तर्गतत्वात्, अतोऽत्राकाश-शब्दनिर्दिष्टं भतसूक्ष्मतिमि प्रतीयते । ततस्तस्यापि भूतसूक्ष्मस्याधारभूतं किमिति पृच्छ्यते "कस्मिन्नु खल्वा-काश ओतश्च प्रोतश्च' इति । अतस्तदाधारतया निर्दिश्यमानमक्षरं न प्रधानं भवितुमर्हति । यत्तु श्रुतिप्रसिद्धात् प्रमाणान्तरप्रसिद्धं प्रथमं प्रतीयत इति तन्न, अक्षरशब्दस्यावयवशक्तया स्वार्थप्रतिपादने प्रमाणान्तरानपेक्षणात् सम्बन्धग्रहणदशायामर्थस्वरूपं येन प्रमाणेनावगम्यते, न तत्प्रतिपादनदशायामपेक्षणीयम् ।

१.३.९

त्याशङ्कय वस्तुस्थितिमनुसरता भगवता भाष्यकृता अक्षरशब्दस्योभयत्र यौगिकत्वमुपन्यस्तम्, न तु प्रकृतोपयोगित्वेनेत्याह - रूढि-शक्तया वा अवयवशक्तया वेत्यादिना । विशेषपर्यवसाने सति हीति - यदि व्युत्पत्तिग्राहकप्रमाणमनपेक्ष्यैव शब्दस्य विशेषपर्य-वसानं स्यात् तदैव न तत्प्रतिपादनदशायामपेक्षितमिति भाष्योक्तं वाक्यार्थप्रतिपादनस्य निराकाङ्क्षत्वं युज्यते, अतस्तस्य भाष्यस्य विशेषपर्यवसानेपि निराकाङ्क्षत्वमभिप्रेतमिति भावः । ननु किमत्र ब्रह्मणि विशेषपर्यवसाने प्राकरणिकं लिङ्गमित्यत आह - अत्र परमात्मलिङ्गं दर्शितमिति । धर्माधर्मेति - धर्मशब्देन लौकिकशौक्लयलौहित्यादिलक्षणघटादिधर्मापेक्षया अलौकिकस्यादृष्टरूपस्य

१.३.१०

धर्मस्य प्रतिपन्नैश्शैघ्र्यदर्शनात्, एवमधर्मशब्देनापि घटत्वादिधर्मभिन्नघटादिस्वरूपलौकिकार्थापेक्षया अलौकिकस्यादृष्टरूपस्या-धर्मस्य प्रतिपन्नैश्शैघ्र्यदर्शनात् । ईश्वरशब्देनापि लौकिकपार्थिवापेक्षया अलौकिकेऽर्थे प्रतीतिशैघ्र्यदर्शनादित्यर्थः । स्वाभ्यस्ता- यामेव गवीति - चिरमरिचितगोव्यक्तेरेव प्रथमप्रतीतिरिति भावः । प्रामाण्यं सम्भवतीति वक्ष्यत इति - रचनानुपपत्तेतरित्यधि-करण इति शेषः । अक्षरशब्दो जीवपर इति । अत्र

न्यायसिद्धाञ्जने वेदान्ताचार्यैः "सा च समत्रैगुण्या मूलप्रकृतिः तस्यामपि मात्रया भेदमालम्ब्य अव्यक्तसहपठितस्याक्षरशब्दस्य चेतनविषयतया बहुश उपादानम् तत्परव्याख्यानप्रकारमनुरुध्य वा स्वरूपतो निर्विकारोऽपि जीवे सृज्यत्ववचनात् । चिद्रूपविकारवत्त्वेपि यथाक्षरशब्दप्रवृत्तिः तथा परब्रह्मेतरविषयस्याक्षरशब्दस्याचिदवस्थाविशेषेपि शक्तिकल्पनोपपद्यत इति प्रतिपादयितुं ब्रा क्वचित्क्वचित् क्षरे प्रकृतिविशेषे अक्षरशब्दस्य मुख्यत्वायोगात् परब्रह्मरूपाक्षरसम्बन्धेन लक्षणायां प्रयोजनाभावात्, जीवसम्बन्धेन त्वजहल्लक्षणया लयविशेषादिप्रतिपादनौचित्यात् "उभावेतौ लीयेते परमात्मनी'ति

१.३.११

द्वयोरपि लयाद्यभिधानाच्च । अत्राजहल्लक्षणैव युक्तेत्यभिप्रायाद्वेति न कश्चिद्विरोध इत्युक्तम् तदत्रानुसन्धेयम् । ननु नात्र "अम्बरा-न्तधृतेः परमात्मप्रशासनाधीनत्व'मिति परमात्मशब्दोऽक्षरपरः । "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इत्यादिश्रवणेपि अम्बरान्तशब्दस्यात्राश्रवणादिति भावः । विषयप्रकर्षात् विषयासङ्कोचादित्यर्थः । श्रुत्यन्तरेष्विति - ननु श्रुत्यन्तरे शासनाधीनसर्वाधारकत्वस्य परमात्मधर्मत्वेन श्रुतत्वेपि अक्षरब्राह्मणे तादृशपरमात्मासाधारणधर्मश्रवणं नेति चेदुच्यते, "एतस्य वा अक्षरस्य प्रशासने गार्गि' इत्यत्र वैशब्दस्य प्रमाणान्तरप्रसिद्धिद्योतकतया प्रापकमानान्तरप्रदर्शनस्यापेक्षितत्वात् अनुवादवाक्यस्य प्रापकवाक्यानुसारेणार्थस्य वर्णनीयत्वात्पुरोवादवाक्ये असङ्कोचेन सर्वप्रशासनश्रवणादनुवादकमपि वाक्यं तदर्थकमित्यभिप्रायेण तदुदाहृतमिति द्रष्टव्यम् । ननु द्यावापृथिव्यादीनां तन्नियोज्यत्वाभावप्रसङ्गे इष्टापत्तावापादितायां प्रमाणान्तरस्यैव शरणीकरणीयतया तदेवोपन्यस्यतां किं तदपेक्षेणानेनेत्यस्वरसादाह - किञ्च यस्येत्यादिना । अव्याकृतस्य धारणं श्रूयत इति - ततश्चाव्याकृतस्य धारणं प्रतिपाद्य कथं तस्याव्याकृतस्य धारणमित्याकाङ्क्षायां शासनाधीनं धारणमिति प्रतिपादनाय "एतस्य वा अक्षरस्य प्रशासने'त्यादि

१.३.११

सन्दर्भः प्रवृत्तः, तस्य ह्ययमभिप्रायः, सूर्याचन्द्रमःप्रभृति सर्वपदार्थजातं शासनेन धारयतोऽक्षरस्य परब्रह्मणः प्रशासनेन धारणे को भार इति । "ततश्च एतस्य वा अक्षरस्य प्रशासने' इति सन्दर्भस्याम्बरान्तधृतिप्रकारोपपादनार्थत्वात् अम्बरान्तधारणमपि शासनाधीनां सिध्यतीति भावः ।

ननु द्रष्टृत्वं चक्षुर्जन्यज्ञानवत्त्वम्, श्रोतृत्वं श्रोत्रजन्यज्ञानवत्त्वम् नचैतत् परमात्मनि करणशून्ये सम्भवतीत्यत आह - द्रष्ट्रादिशब्दा इति । रूपसाक्षात्कर्ता द्रष्टा, शब्दसाक्षात्कर्ता श्रोता, मन्तव्यसाक्षात्कर्ता मन्ता, अध्यवसेयसाक्षात्कर्ता विज्ञातेत्यर्थः । द्रष्ट्रादिपदैः रूपादिसाक्षात्कर्तृत्वार्थकथनस्य प्रकृतशासनोपयोगं दर्शयति - शासनस्येति । तेषामयोग्यत्वादिति - चक्षुश्श्रोत्रमनआदिजन्य-ज्ञानरूपाणां दशर्नश्रवणमननादीनामयोग्यत्वादित्यर्थः । ननु परमात्मनोऽपि योगिभिर्नित्यमुक्तैस्स्वेनापि दृष्टत्वादाह - सर्वैः योगि-भिरिति । सर्वशब्दस्यैकैकवर्गकार्त्स्न्यपरत्वे हेतुमाह - अस्यासङ्कुचितवृत्तितयेति । अदृष्टत्वादिविशेषितं द्रष्टृत्वादिकं प्रत्यगात्म-व्यावर्तकमित्यर्थ इति । अयोगिभिरदृष्टत्वादिविशेषितमित्यर्थः । प्रत्यगात्मन इति । ननु परमात्मापि स्वाहंप्रत्ययवेद्य एव दृष्ट इति न विशेष इति चेन्न अयोगिभिरदृष्ट इत्यत्र तात्पर्यात् । स्वस्वरूपवदिति - प्रत्यगात्मस्वरूपवदित्यर्थः । नन्वदृष्ट इत्यादौ अदृष्टत्व-द्रष्टृत्वादीनामेव प्रत्येकं धर्मतया श्रवणात् कथमदृष्टत्वविशेषितद्रष्टृत्वेन प्रत्यगात्मव्यावृत्तिलाभ इत्याशङ्कयादृष्टं सत् द्रष्टृ इति श्रुत्य-र्थलाभाद्विवक्षितसिद्धिरित्यभिप्रयन्नाह - निष्ठान्तैः पदैरिति । ननु विशेषितस्यैव धर्मत्वे द्रष्टृत्वं प्रधानव्यावर्तकमदृष्टत्वविशेषितं प्रत्य-गात्मव्यावर्तकमिति विभज्योक्तिरयुक्ता, विशेषितस्यैव धर्मत्वात् किञ्चायोगिभिरिति सङ्कोचोऽपि व्यर्थः । इतरादृश्यत्वविशेषित-द्रष्टृत्वस्यैव तथात्वादित्यस्वरसादाह - यद्वा रूपशब्दाद्यर्थवेदिभिरिति । अस्यां योजनायामिति - द्वितीययोजनायां तु "नान्यदतः'

इत्यादिवाक्यस्यैव विषयत्वमिति भावः । कण्ठोक्ता स्यादिति - द्वितीययोजनायामर्थसिद्धत्वमुत्तरत्र स्पष्टम् चशब्द उक्तहेतुसमुच्चय

१.३.११

इति योजनान्तर त्वनुक्तहेतुसमुच्चयपरत्वमुत्तरत्र स्पष्टम् । प्रस्तुततुल्यपुरुषान्तरेति - "इषुर्विष्टुतिस्सप्ताहं भवति समानमितरच्छयेनेन' इत्यत्रेतरशब्दस्य पूर्वानिर्दिष्टसदृशश्येनवैशेषिकाङ्गपरत्वमिति सप्तमे स्थापितत्वादिति भावः । एतस्याधारभूतमितिभाष्ये एतच्छब्द-स्याक्षरपरामर्शित्वमपि सम्भवेत् जगत्परामर्शित्वमपि सम्भवेत्, उभयोरपि प्राक् प्रस्तुतत्वात् "तथा चाक्षरपरामर्शित्वे अक्षरस्य धारकं किमपि नास्तीत्युक्तवा अधिकनिषेधः कृतः स्यात् पक्षान्तरे तु समनिषेध इत्यभिप्रेत्य व्याचष्टे - एतस्याक्षरस्येत्यादिना । "यदेवेह तदमुत्र यदमुत्र तदन्विह । मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति । एकधैवानु द्रष्टव्यम्, "नेह नानास्ति किञ्चन । मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति' इति कठवल्लीबृहदारण्यकादाविव भेदनिषेधसम्भवे ब्रह्मणस्समाभ्यधिकनिषेधपरत्वाश्रयणे को हेतुरिति शङ्कते - ननु नान्यदित्यादिना । यदि क्वचिदिति - "यत्र हि द्वैतमिव भवति' इत्यादाविति भावः । यत्र यदि सम्भवतीत्यनेन तत्रापि सुदूरं गत्वा ऐक्यविधिशेषत्वमेवेति भावः । अत इदं वाक्यं प्रकृततुल्यद्रष्ट्रन्तरनिषेधपरमिति - नास्मिन्नपि पक्षे पूर्वोक्तदोष-तादवस्थ्य द्रष्टुरेव श्रोतृताया नान्यदतोऽस्ति द्रष्ट्रित्यनेनैव सिद्धतया प्रत्येकनिषेधवैयर्थ्यादिति वाच्यम्; द्रष्टृत्वश्रोतृत्वादीनामनति-रिक्तवृत्तित्वेऽपि तुल्यो द्रष्टा नास्तीत्युक्ते द्रष्टृत्वांशे साम्यं नास्तीति प्रतीतावपि श्रोतृत्वांशे अस्तीति शङ्कायाः सम्भवात् साफल्यमिति भावः । प्रशासने ददतः, प्रशासन इति निमित्तसप्तमी तदाज्ञया ददतो जनान् मनुष्याः प्रशंसन्ति, तदाज्ञया यागं कुर्वन्तं देवाः प्रशं-

१.३.११

सन्ति, तदाज्ञया प्रवृत्तं दर्वीहोमं पितरः प्रशंसन्तीत्यर्थः । अनुवशा इत्यर्थ इति - अनुवशाः-उपजीविन इत्यर्थः । देवपित्रादय ईश्व-रास्सन्तोऽन्यथापि जीवितुमुत्सहन्तः कृपणां वृत्तिं यत्प्रशासनादास्थिता इत्यर्थः । तस्मिन् परिजिहीर्षत इति - यदि ब्रह्मणो मिथ्-यात्वं परिजिहीर्षितम् तदा ब्रह्मणो द्रष्टृभेदस्यैवाभ्युपगन्तव्यतया अदृष्टं द्रष्ट्रितिवाक्यप्रतिपाद्यत्वं ब्रह्मणो न स्यादित्यर्थः । प्रधान-स्येश्वरत्वेति - प्रशासितृत्वस्येश्वरत्वपर्यवसन्नत्वात् द्रष्टृत्वस्य क्षेत्रज्ञत्वे पयर्वसन्नत्वादिति भावः ।। इत्यक्षराधिकरणम् ।।

१.३.१२

प्रश्नोपनिषदि - "अथ हैनं शैव्यस्सत्यकामः पप्रच्छ । स यो हवै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत । कतमं वाव स तेन लोकं जयतेति ।। १ ।। तस्मै स होवाच । एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वे- तीति ।। २ ।। स यद्येकमात्रमभिध्यायीत स तेनैव सवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते । तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवति ।। ३ ।। अथ यदि द्विमात्रेण मनसि सम्पद्यते सोऽन्तरिक्षं युजुर्भिरुन्नीयते स सामेलोकं स सोमलोके विभूतिमनुभूय पुनरावर्तते ।। ४ ।। यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स प्राप्मना विनिर्मुक्तस्ससामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते । तदेतौ श्लोकौ भवतः ।। ५ ।। तिस्रो यात्रा मृत्युमत्यर्प्रयुक्ताः अन्योन्यसक्ता अनभिप्रयुक्ताः । क्रियासु बाह्यान्तरमध्यमासु सम्यक्प्रयुक्तासु न कम्पते ज्ञः ।। ६ ।। ऋग्भिरेतं यजुर्भिरन्तरिक्षं ससामभिर्यत्तत्कवयो वेदयन्ते । तमोङ्कारेणैवायतनेनान्वेति विद्वान्य-त्तच्छान्तमजरममृतमभयं परं चेति ।। ७ ।। असंवेदितः-अनुगृहीतः, मनसि सम्पद्यते-मनसा ध्यायतीत्यर्थः । मृत्युमत्यर्प्रयुक्ताः-मृत्युभीतमत्यर्प्रयुक्ताः । अन्योन्यसक्ताश्चेदनभिप्रयुक्तास्युः । सम्यक्प्रयुक्तासु मात्रासु सतीषु न कम्पते ज्ञ इत्यर्थः । अदृष्टो द्रष्टेति

परमात्मनो दृष्टत्वमुक्तमितिपाठो लेखकस्खलनदोषायत्तः । अक्षरब्रह्मणो अदृष्टं द्रष्ट्रिति नपुंसकपाठस्यैव सत्त्वादिति द्रष्टव्यम् । विषयवाक्यस्थब्रह्मलोकशब्दस्यैवान्यथा निर्वाहो दुर्वच इति वक्तुं शक्ये अन्तरिक्षशब्दस्य दुर्निर्वहत्वोक्तिरयुक्तेत्यस्वरसादाह - यद्वा आकाशशब्दस्येति । ससामभिरुन्नीयते - इदमेकं पदम् तच्छब्दान्तरश्रवणादित्यभिप्रेत्य व्याचष्टे - सामगानसहितैरित्यर्थ इति । आतिवाहिकानां मुक्तानाम् "एतत्समाकायन्' इत्यस्यासम्भवादाह - सान्त्ववादयुक्तैरिति । नच तमृचो मनुष्यलोकमुपनयन्ते यजुर्भिरुन्नीयते सोमलोकमिति ऋग्यजुःप्रायपाठात् सामपदस्य वेदपरत्वमेवाश्रयितुं युक्तमिति वाच्यम्; ऋगादिस्थलेपि वेदस्य नेतृत्वासम्भवात्, तत्रापि लक्षणादिक्लेशस्याश्रयणीयत्वेन प्रायपाठो नास्तीति भावः । परमात्मत्वं व्यवस्थाप्येति - यद्यपि नच

१.३.१२

तत्त्वविषयमेव सर्वं दर्शनम्; अतत्त्वविषयस्यापि दर्शनादिति वाचस्पत्ये ईक्षणमपि परमात्मविषयमिति पूर्वपक्षस्य दशर्नादीक्षति-कर्मणः परमात्मत्वनियमः पूर्वपक्षिणा नाभ्युपगतः । तथापीक्षतिकर्मणः परमात्मत्वमङ्गीकृत्य ध्यायतेस्ततो भिन्नविषयत्वमिति पूर्वपक्षस्यापि प्रवर्तनात् तदभिप्रेत्यैतदुक्तमिति द्रष्टव्यम् । तत्प्राप्नोतीति - पञ्चम्यन्तपदं प्राप्नोतीत्यर्थः । देवतिर्यग्भावापेक्षयेति - द्रष्टव्यमितिशेषः । ननूपक्रम एव परं चापरं च ब्रह्मेति द्वेधा विभज्य परं पुरुषमभिध्यायीत, परात्परं पुरिशयं पुरुषमीक्षते' इति परत्वेन विशेषणाच्च परमेव ब्रह्मेत्यस्य सिद्धत्वात्परत्वविशेषितपुरुषशब्दस्यासाधारणत्वाच्छान्तत्वाजरत्वादीनां श्रवणाच्च, अनेकब्रह्म-लिङ्गविरोधे मनुष्यादिलोकप्रायपाठमात्रेण लिङ्गबाधायोगात्कथं पूर्वपक्षं इति चेदुच्यते; प्रायपाठावगतचतुर्मुखलोकगतपुरुषनिरीक्षमाणत्वस्य लिङ्गस्यानन्यथासिद्धत्वादिति पूर्वपक्ष्यभिमानात् । नपुंसकान्तशब्दनिर्दिष्टमिति - एतच्छब्देन नपुंसक पदनिर्दिष्टत्वं

१.३.१२

परामृश्यत इति भावः । भाष्ये-कर्मनिमित्तं देहित्वमिति । "मूर्तौ घनः' इति मूर्तौ घनशब्दो निपातितः । मूर्तिः काठिन्यमिति व्या-ख्यातम् । जीवस्य काठिन्यं देहद्वारकं देहित्वादेव कर्मकृतत्वमपि सिध्यतीति भावः । सशरीरत्वादेव हीति - आत्मनश्चतुर्णां मुखानां सम्भवादित्यर्थः । भाष्ये-न क्षयिष्णुश्चतुर्मुखलोक इति । ननु ब्रह्मलोकशब्देन परब्रह्मलोकपरामर्शे चतुर्मुखस्य प्रागनिर्दिष्टत्वादेत-स्माज्जीवघनादित्येतच्छब्दस्य प्रकृतपरामर्शित्वं न स्यात् । अतश्शाङ्करादिरीत्या ब्रह्मलोकशब्दस्य चतुर्मुखलोकपरत्वमेवाभ्युपगम्य एतस्मादित्येतच्छब्देन च ब्रह्मलोकशब्दान्तर्गतब्रह्मशब्दनिर्दिष्टचतुर्मुखपरामर्शो वक्तव्य इत्येवाभ्युपेत्यमिति चेन्न; ब्रह्मलोकशब्दस्य चतुर्मुखलोकपरत्वेपि चतुर्मुखस्य समासे न्यग्भूतस्य परामर्शासम्भवात् नच प्राधान्येन निर्दिष्टस्य चतुर्मुखलोकस्यैव परामर्शस्यादिति वाच्यम्; तत्र जीवघनशब्दस्याप्रवृत्तेः । कथञ्चिद्वृत्तावाश्रितायामपि चेतनस्याचेतनात् चतुर्मुखलोकादुत्कर्षप्रतिपादनस्यायुक्तत्वाच्च तस्मादेतच्छब्दस्य अथैव ज्योतिरित्यादिवत्प्रस्तोष्यमाणः जीवघनपरामर्शित्वं युक्तमिति द्रष्टव्यम् । आदिशब्देनेत्यादि - यद्यप्यादि-

१.३.१२

शब्दार्थतया प्रदर्शितेषु वाक्येषु सूरिदृश्यत्वं न प्रतीयते, अपितु सूर्याधारत्वमेव । "तद्विप्रासो विपन्यवः' इत्यत्रापि, विपन्यवः-स्तु-तिशीलाः, जागृवांसः-अस्खलितज्ञानाः । "तद्विष्णोः परमं पदं सदा स्तुबन्तस्समिन्धत' इति वेदाथर्सङ्ग्रहे व्याख्यातत्वात्, तथापि सूरिस्थानभूतस्य सूरिदृश्यत्वमप्यर्थसिद्धमित्यभिप्रेत्योक्तमिति द्रष्टव्यम् । यदपरं कार्यब्रह्मेति भाष्ये कार्यब्रह्मशब्देन चतुर्मुखलोक-

१.३.१३

स्यापरब्रह्मपदवाच्यत्वमेव युक्तम्, नतु परब्रह्मलोकत्वमितिदर्शितमिति योजना । उपलक्षणतयेति - अन्तरिक्षशब्दमुख्यार्थस्वीकारे पक्षद्वयेपि व्यवधानविशिष्टम् यदि च व्यवधानपरिहारायान्तरिक्षशब्दस्य

चतुर्मुखलोकाधस्तनलोकमात्रोपलक्षकत्वमाश्रित्य व्यव-धानपरिहारः तर्हि
अन्तरिक्षशब्दस्यामुष्मिकमात्रोपलक्षकत्वमाश्रित्य व्यवधानपरिहारस्समान इति भावः । सङ्ग्राहकलाभ इति - भूलोकब्रह्मलोकमध्यवर्तित्वरूपं सङ्ग्राहकं सुवचम् तथापि तस्य सङ्ग्राहकस्य गुरुत्वेन न सुलभप्रतिपत्तिकत्वमिति भावः । फलव-चनविरोधः- फलवाक्यपुरुषशब्दविरोध इत्यर्थः ।। ईक्षतिकर्माधिकरणं समाप्तम् ।।

अथ यदिदमस्मिन् ब्रह्मपुत्रे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वा व विजिज्ञासि-तव्यमिति । तं चेद्ब्रूयुर्यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः किं तदत्र विद्यते, यदन्वेष्टव्यम् यद्वा व विजिज्ञासितव्यमिति स ब्रूयाद्यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ । विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमिति तं चेद्ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामाः यदेनज्जरावाप्नोति प्रध्वंसते वा किं ततोऽस्तिशिष्यत इति स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते । एत्सत्यं ब्रह्मपुरमस्मिन् कामास्समाहिताः । एष आत्मा अपहतपाप्मा विरजो विमृत्युर्विशोको-ऽविजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्ककल्पो यथा ह्येव प्रजा अन्वाविशन्ति । यथानुशासनं यं यमन्तमभिकामा भवन्ति यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति एवमेवामुत्र पुण्यचितो लोकः क्षीयते । तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् तेषां सर्वेषु लोकेष्वकामचारो भवति । अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् तेषां सर्वेषु लोकेषु कामचारो भवति' । उदाहृतनुतिवाक्येषु तत्र तत्रास्पष्टार्थः पररीत्या विविच्यते । सिद्धान्ताभिमतार्थस्तु उत्तरत्र स्पष्टः । तं चेद्ब्रूयुः-तं चेदेवमुक्तवन्तमा-चार्यम् । यदि ब्रूयुः-अन्तेवासिनश्चोदयेयुः, कथं यदिदमस्मिन् ब्रह्मपुरे परिच्छिन्ने अन्तः दहरमल्पं पुण्डरीकं वेश्म ततोप्याकाशस्तत्र किं विद्यते, न किंचिदपीत्यर्थः । यदि नाम बदरमात्रं किञ्चिद्विद्येत किं तस्यान्वेषणेन ? विजिज्ञासनेन वा प्रयोजनमिति, इत्थमुक्त आचार्यो ब्रूयात्, यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इति वैपुल्यप्रतिपादनेनाक्षेपबीजभूतमल्पत्वं व्यावर्त्यते । किं तत्र विद्यते इत्याक्षेपस्योत्तरमुच्यते-उभे अस्मिन्नित्यादिना । तदन्तर्वर्तिमध्येऽन्वेष्टव्यमुपदिश्यते-यच्चास्येहास्तीत्यादिना । अस्यायमर्थः, यदस्य देहिन इह लोके विद्यते, यच्चेह लोके इदानीं न विद्यते, नष्टं भविष्यच्च तत्सवमस्मिन् दहराकाशे समाहितमिति । तच्चात्र दह-रोपासनया ब्रह्मलोकं प्राप्तस्य अग्रे स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्तीत्यादिना वर्णयिष्यमाणं स्व-सङ्कल्पसमुत्थितप्राचीनानन्तजन्मसम्बन्धिदिदृक्षितपितृमातृभ्रातृ पुत्रकलत्रगीतवादित्रादिभोग्यवस्तुजातमेव । तं चेद्ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानीत्यादेरयमर्थः, कुसूलादौ जीर्णे भारधारणाक्षमे सति तदन्तर्निहितं व्रीह्यादिकं किमपि यथा

१.३.१३

नावतिष्ठते, एवमाधारभूते ब्रह्मपुरशब्दिते शरीरे जरादिस्पृष्टे तदन्तर्वर्तिद्यावापृथिव्यादिकं नावशिष्यत इत्याक्षेपाभिप्रायः, शरीरे नष्टे दहाराकाशान्तर्वर्तिद्यावापृथिव्यादिकं नश्येदित्यस्य कोवाऽभिप्रायः । शरीरे नष्टे तदाधारकदहराकाशस्यापि नाशावश्यम्भावात् तदाधारकद्यावापृथिव्यादिनाशस्यादिति वा, आहोस्वित् विद्यमानस्यापि दहराकाशस्य कुसूलाकाशवत् भारधारणाप्रयोजकतया कुसूलस्थानीयस्य शरीरस्यैव धारकत्वेन तस्मिन्नष्टे द्यावापृथिव्यादिनाशस्यादिति वेति विकल्पं हृदि निधाय प्रथमं प्रत्याचष्टे-नास्य जरयेति । द्वितीयं दूषयति-एतत्सत्यं ब्रह्मपुरमस्मिन् कामास्समाहिता इति । ततश्च कुसूलाकाशविलक्षणस्य ब्रह्मरूपस्य दहराकाश-स्यैव सर्वकामसमाधानाधारत्वात् शरीरस्याप्रयोजकत्वेन तन्नाशेपि द्यावापृथिव्यादि नाशप्रसङ्ग इति हि तस्याभिप्रायः । सत्यकाम-स्सत्यसङ्कल्पः-अवितथकामोऽवितथसङ्कल्प इत्यर्थः । कामसङ्कल्पयोश्च हेतुहेतुमद्भावान्न पौनरुक्तयम् । यथा ह्येवेह प्रजा अन्वावि-शन्तीत्यादेरयमर्थः,-यथा इह लोके प्रजा अन्यं स्वामिनं मन्यमानास्तस्य स्वामिनो यथा यथानुशासनं तथा तथान्वाविशन्ति अनु-वर्तन्ते स्वाभिमतार्थांश्च लभन्ते । एवं पुण्यकृतोपि परशासनानुवर्तनेन तत्फलभाजो भवन्तीत्यभिप्रेतार्थः । राजसेवार्जितफलस्यैव पुण्यार्जितफलस्यापि क्षयित्वमाह

तद्यथेहेत्यादिना । शिष्टं स्पष्टम् । पुरिशयस्येति - यद्यपि छान्दोग्ये "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुणडरीकं वेश्म' इति ब्रह्मपुरे विद्यमानत्वमात्रं श्रूयते, न शयनम्, तथापि समानप्रकरणे वाजसनेयके "य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' इति शयनश्रवणादत्रापि पुरिशयत्वं फलितमिति द्रष्टव्यम् । आकाशशब्दवाच्यस्यापरमात्मत्वं निरस्यत इति । पुरिशयस्याकाशशब्दवाच्यत्वपरमात्मत्वं निरस्यत इत्यर्थः । ब्रह्मलोकब्रह्मपुरशब्दयोरिति - "एतं ब्रह्मलोकं न विन्दन्ति' एतत्सत्यं ब्रह्मपुरम्' इति शब्दयोरित्यर्थः । प्रसिद्धान्तरिक्षेति - परमात्मस्थानायस्तनलोकपरत्वसमर्थनादिति भावः । तर्ह्यक्षरमिति - अप्र-सिद्धार्थकल्पकत्व रूपप्रत्यासक्तेस्त्रयाणां तुल्यत्वेपि अन्तरिक्षशब्दाप्रसिद्धार्थकल्पेक्षतिकर्भाधिकरणापेक्षया आकाशब्दाप्रसिद्धार्थ-प्रकल्पकत्वेनाक्षरदहराधिकरणयोः प्रत्यासत्त्यतिशयादित्यर्थः । सङ्गत्यतिशयादिति । ननु आकाशवाचिशब्दस्य प्रसिद्धार्थातिरि-क्तार्थकत्वसमर्थनपरत्वं त्रयाणां साधारणधर्मः । अक्षरेक्षतिकर्माधिकरणयोराकाशशब्दवाच्यस्य प्रसिद्धार्थातिरिक्तार्थकत्वसमर्थनमुखेन

१.३.१३

विप्रतिपन्नस्य परमात्मत्वसमर्थकत्वं साधारणो धर्मः । अन्तरिक्षशब्दस्यापि आकाशवाचिशब्दत्वात् तथा च किमत्र विनिगमकमिति चेत् यदि न वैषम्यमित्यभिमानः तदा अक्षराधिकरणे "अदृष्टं द्रष्टृ' इत्यदृष्टत्वश्रवणात् ईक्षतिकर्मत्वं न सम्भवतीत्याक्षेपसङ्गतेरप्यधि-कायास्सत्त्वादीक्षतिकर्माधिकरणस्याक्षरादिकरणानन्तर्यं युज्यत इति सन्तोष्टव्यमायुष्मता । क्वचित्परमात्मपरत्वमिति - "आका-शादेव समुत्पद्यन्ते' इत्यादावित्यर्थः । वाक्यद्वारकमिति - उत्तरेभ्य इत्यस्य उत्तरवाक्यगतेभ्य इत्यर्थ इति भावः । पचमीस्फुटीक-रणायेति । ततश्च हेतुभ्य इत्येतत्पदं उत्तरेभ्य इत्यत्र विभक्तयर्थस्फोरकमिति भावः । षष्ठी हेतुप्रयोगनियम इति - "षष्ठी हेतुप्रयोगे' "सर्वनाम्नस्तृतीया च' इत्युत्तरशब्दस्य सर्वनामत्वात् षष्ठी वा तृतीया वा स्यात्, नतु पञ्चमीत्याक्षेपाभिप्रायः । इदं च "निमित्तकारण-हेत्वर्थेषु सर्वासां प्रायदर्शनम्' इति वार्तिकानादरेणोक्तमिति द्रष्टव्यम् । प्रयोजनतयेति - ननु वृत्त्यादिग्रन्थेष्वेवमव्याख्यातत्वात् । विद्यायाहेतोर्यश इत्यादौ विद्यायशःप्रयोजकत्वाभावेन षष्ठयनुपपत्तिप्रसङ्गाच्च नेदं समञ्जसमिति चेन्न; शाब्दिकग्रन्थेषु अन्नस्य हेतो-र्वसतीत्यादेरेवोदाहृतत्वात् विद्याया हेतोर्यश इत्यादिप्रयोगस्यासम्प्रतिपन्नत्वात् षष्ठीहेतुप्रयोक इत्यस्य प्रयोजनतया हेतुत्वविषयत्वा-भावे हेताविति सूत्रस्य निर्विषयत्वप्रसङ्गाच्च । नच हेतुशब्दप्रयोगविषयं षष्ठीहेतुप्रयोग इति सूत्रमिति वाच्यम्; हेतुशब्दप्रयोगे "हेतौ द्योत्ये वा' सति कौपुद्यामुक्तत्वात् । तस्याश्च सम्प्रतिपन्नत्वान्न काचिदनुपपत्तिरिति केचिद्वदन्ति । ननु जीवव्यावृत्तेः प्रस्तोष्यमाणत्वेन भूताकाशव्यावृत्तेरेव प्रस्तुतत्वादात्मत्वमात्रेण च भूताकाशव्यावृत्तिसिद्धेर्निरुपाधिकत्वकीर्तनं मुधेत्यस्वरसादाह - यद्वा आकाशस्या-पीति । स्वतश्शरीरप्रतिसम्बन्धीति - स्वत इत्यस्य प्रयोग इत्यनेनान्वयः । स्वतःप्रयोगो मुख्यप्रयोग इत्यर्थः । भाष्ये-अथ य इहात्मा-नमित्यादि । अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति स यदि पितृलोककामो भवति

१.३.१३

सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ति तेन पितृलोकेन सम्पन्नो महीयते, एवमेव मातृलोकभ्रातृलोकस्वसृलोकसखिलोकगन्धमालनय-लोकान्नपाललोकगीतवादित्रादिलोकस्त्रीलोकपर्याया द्रष्टव्याः । अनन्तरं"यं यमन्तमभिकामो भवति' यं यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन सम्पन्नो महीयते' इति श्रूयते, इत्येवं श्रुतिक्रमो द्रष्टव्यः । एकस्यैवेति - अत एव "श्येनेनाभिचरन् यजेत' इत्यत्र गुणविधिपक्षे "यथा वै श्येनो निपत्त्यादत्त' इति वाक्यशेषे निबध्यमानं श्येनस्य श्येनसादृश्यं नान्वेतीति नामत्वमाश्रितमिति भावः । हृदयावच्छेदेति - उपमानोपमेययोरभेदेपि उपमानतावच्छेदकोपमेयतावच्छेदकभेदसत्त्वे उपमा सम्भवत्येव, अत एव "उपादद तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम् । स तद्गूलादविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे'

इत्यत्रैकस्यैव हरस्योत्तमाङ्गपत-
द्गङ्गाप्रवाहत्वच्छत्रदुकूलसन्निकृष्टमौलित्वरूपोपमानोपमेयतावच्छेदकभेदसत्त्वेनालङ्कारिकैरुपमाप्रभेदत्वमङ्गीकृत मिति भावः । उप-मानशून्यतेति - "रामरावणयोर्युद्धम्' इत्यादौ उपमानोपमेयभेदसापेक्षसादृश्यस्य वास्तवौपाधिकभेदद्वयाभाववत्यसम्भवादनन्व-यालङ्कारः । तत्र चानन्वितं स्वस्मिंन्निबध्यमानं स्वसादृश्यमनुपमत्त्वद्योतनफलकमेव । यथा स्वमहिमप्रतिष्ठितत्वमनन्याधारत्वद्योत-नफलकं तद्वदिति भावः । यावच्छब्देति - यत्रोपमानतावच्छेदकोपमेयतावच्छेदकयोरुपमानोपमेययोश्चैक्यम् तत्रैवानन्वयः । प्रकृते च यावत्त्वान्तर्हृदयावस्थितत्वरूपावच्छेदकद्वयभेदसत्त्वात् अवान्तरवाद्याकाशांशानां
परस्परभिन्नत्वेनोपमानोपमेयभेदसत्त्वाच्च नानन्वय इति भावः । मध्यगतवाक्येति - "तस्मिन् यदन्तस्तदन्वेष्टव्यम्' एष आत्मा' इति वाक्यद्वयमध्यगतेत्यर्थः । ननु प्रथमानिर्दिष्टत्वेन एष आत्मेत्यनेन विभक्तयैकरूप्यं तदन्वेष्टव्यमित्यत्रापि अस्तीत्यत्राह - आसन्नत्वाच्चेति । यद्यपि ब्रह्मपुरमित्यत्र ब्रह्मशब्देन तदा-धेयब्रह्मणोप्यासन्नत्वमस्तीति दहराकाशातिरिक्तब्रह्मवादिनोऽप्यासन्नत्वं सुवचम्, तथापि ब्रह्मशब्दस्य षष्ठयन्ततया विभक्तयैकरू-प्यस्याभावात् ब्रह्मपुरशब्दनिर्दिष्टस्याकाशस्य ततोऽपि सन्निहितत्वाच्चाकाशस्यैव एष इति परामर्श उचित इति यद्यपीत्याक्षेपाभिप्रायः । अन्वेष्टव्यस्यात्मनः परामर्श इति - ततश्च"एष आत्मापहतपाप्मा' इतिवाक्ये एष आत्मेत्येतावानंशोऽनुवाद इति भावः ।

१.३.१३

अत आत्माधिकरणतयेति - अपहतपाप्मत्वादिलिङ्गानां तदन्तर्वतिर्गतत्वेनोपक्रमावगतदहराकाशाब्रह्मत्वस्य साधकाभावादिति भावः । ननु प्रक्रम एव दहराकाशात्तर्वर्तिनः आत्मत्वनिश्चये तदत्र विद्यत इति प्रश्नस्य वा तदुत्तरसन्दर्भस्य वा कथमुपपत्तिरिति चेदुच्यते, दहराकाशान्तर्वर्तिब्रह्मवादिनो ह्ययमभिप्रायः,-तस्मिन् यदन्तस्तदन्वेष्टव्यमित्यत्रैव दहराकाशातिरिक्तमन्वेष्टव्यम् तच्च श्रुत्यन्तरपर्यालोचनया आत्मरूपमित्यवगमात् । तथापि किं तदत्र विद्यते इति तदात्मवत्सु किंप्रकारकमिति प्रश्नः यावान्वा अय-माकाशस्तावानेषोऽन्तर्हृदय आकाश इति । अस्य चायमर्थः, यावानयमाकाशोऽतिविपुलो वर्तते एष आकाशस्सर्वोप्यन्तर्हृदये, हृदयशब्दः परमात्मपरः । "स वा एष आत्मा हृदि तद्यैतदेवनिरुक्तं हृद्यमिति तस्माद्धृदय'मित्यत्रैव श्रवणात् । ततश्च हृदये ब्रह्मणि अन्तस्सर्वोप्याकाशो वर्तते, द्यावापृथिव्यादिकं चेत्यर्थः । एतत्सत्यं ब्रह्मपुरमिति पूर्ववाक्ये अन्तर्वर्तिब्रह्मैव प्राधान्येन प्रथमानि-र्दिष्टत्वात्सन्निहितत्वाच्च । एष आत्मेत्यत्रैतच्छब्देन तस्यैव परामर्शसम्भवात्, यद्यपि "यावान्वा अयमाकाशः' इतिवाक्येत्यादि-चोद्यस्यापि नावकाश इति द्रष्टव्यम् । भाष्ये-स्यादेतदेवं यदि श्रुतिरेव दहराकाशं तदन्तर्वर्तिनं च न व्यभाङ्क्षीत् व्यभाङ्क्षी त्तु सा- इति पाठः । विभजनस्यैव प्रकृते विवक्षितत्वात् । ननु स्यादेतदेवमित्यत्रापि लिङ्ि◌नमित्ते लृङ्क्रियातिपत्ताविति अभविष्यदेतदेवम् यदि श्रुतिरेव दहराकाशं तदन्तर्वर्तिनं च न व्यभाङ्क्षीत् इत्येव स्यादिति चेन्न; विभाषा या तौ सम्भावनवचने यदीत्यादिलिङ्ि◌नमित्ता-न्तरस्य सम्भवान्नोभयत्रापि लृङ्प्रसङ्ग इति द्रष्टव्यम् । असाधारणेन व्यपदेशस्येति - क्षितिसलिलपवनादिसमवधानजन्मनोप्य- ङ्कुरस्य शाल्यङ्कुर इति असाधारणशालिबीजनैव व्यवहारदर्शनादित्यर्थः । तद्विधेयपुराधिपतिरिति - तत्स्वामिकपुरवासी जीव इत्यर्थः । उपक्रम एव "अथ यदिदमस्मिन् ब्रह्मपुरे' इति जीवस्वामिकपुरप्रतीतेः, तत्स्वामिके पुरे तदवस्थानस्यैवोचितत्वादिति भावः । तद्विधेयपुरवासी जीव इति पाठस्तु सुगम एव, उक्तं च शाङ्करभाष्ये 'तत्र पुरस्वामिनः पुरैकदेशेऽवस्थानं दृष्टं यथा राज्ञः' इति । भामत्यां च स्यादेतत् जीवस्य पुरं भवतु शरीरम्, पुण्डरीकदहरगोचरता तु अन्यस्य भविष्यति, वत्सराजस्य पुर इव उज्जयिन्यां मैत्रेयस्य सद्मेति मैवं वेश्मस्वल्वधिकरणमनिर्दिष्टाधेयमाधेयविशेषापेक्षायां पुरस्वामिनः प्रकृतत्वात् तेनैवाधेयेन सम्बन्धं सन्ना-धेयान्तरसम्बन्धं कल्पयतीत्युक्तम् । मुख्यार्थस्येति - ब्रह्मपुर इत्यत्र षष्ठयपेक्षया प्रतिपदिकस्य मुख्यतया षष्ठयर्थीभूतस्वस्वामि-

भावलक्षणसम्बन्धस्वारस्यापेक्षया ब्रह्मशब्दप्रातिपदिकार्थस्वारस्यमेवादर्तव्यम् ततश्च ब्रह्मशब्देन परमात्मन एव ग्रहणमुचितम् षष्ठयर्थसम्बन्धस्तु साधारणोऽसाधारणो वा यः कश्चिद्भविष्यतीति भावः । ननु सत्यकामस्सत्यसङ्कल्प इति गुणद्वयस्यैवाभिधाना-द्गुणजातमिति गुणबहुत्वाभिधानमसङ्गतमित्यत आह - सत्यकामत्वसत्यसङ्कल्पत्वेति । तेन विनागुणध्यानायोगादिति । ननु यदि गुणध्यानमन्तरेण गुणिध्यानायोगाद्गुणध्यानस्यावश्यकत्वम्, तर्ह्याक्षेभादेव तदुपासनस्यापि सिद्धतया नात्रानुपपत्तिरिति चेन्न; आक्षेपतः प्राप्तादाभिधानिकस्य ग्राह्यत्वमितिन्यायेन गुणिनोपि ध्येयत्वस्याभिधानिकत्वसम्भवे तत्परित्यागायोगात् "य इहात्मा-नमनुविद्य व्रजन्त्येतांश्च सत्यान् कामा'निति फलनिर्देशवाक्ये गुणांशे आभिधानतः प्राप्तानुवादो गुण्यंशे आक्षेपतः प्राप्तानुवाद इति वैरूप्याश्रयणस्यापन्याय्यत्वाच्च । अर्थसिद्धं स्यादिति - गुणानां गुण्यन्तर्भूतत्वेन गुणिध्याने विहिते गुणध्यानं विहितं स्यादित्यर्थः । न त्वाक्षेपलभ्यं स्यादित्यर्थ इति न भ्रमितव्यम् । तथात्वे गुणानां ध्येयत्वे कथितेपि गुणिध्यानस्याक्षेपलभ्यत्वसम्भवेन, नतु गुणानां ध्येयत्वे कथित इत्युत्तरवाक्यासामञ्जस्यप्रसङ्गात् । गुणध्याने विहिते गुणिध्यानाक्षेपस्य तेन विना गुणध्यानायोगादिति पूवर्ग्रन्थे अङ्गीकृतत्वाच्चेति द्रष्टव्यम् । अन्वेष्टव्यमितिपदं गुणिपरमिति - दहराकाशान्तर्वर्तिगुणिपरमित्यर्थः । तच्च दहराकाशो भूताकाश एव, नतु परमात्मेति भावः । अनूद्यत्यन्तेनेति - ननु दहरं पुण्डरीकं वेश्मेति एतावता पुण्डरीकवेश्मनो ब्रह्मपुराख्यशरीराधारकत्वे प्रतिपादितेपि आकाशस्य हृदयपुण्डरीकाधारकत्वस्याप्रतिपादनात् कथं वेश्मेत्यनूद्येत्यन्तेन परमतनिरासः । नच दहरोस्मिन्नन्तर आकाशः' इत्येतावत्पर्यन्तो ग्रन्थसन्दर्भोपि तत्र विवक्षितः । ततश्चाकाशे पुण्डरीकाधारकत्वस्यापि प्रतिपादितत्वादनूदितस्य तस्मिन् यदन्तरित्यनुवादो व्यर्थ इति परमतदूषणसूचकत्वमुपपद्यत सति वाच्यम्; तथासति "यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म' इत्यनूद्येतिभाष्यस्य दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाश इत्येतावत्पर्यन्तग्रन्थसन्दर्भकथनपरत्वाश्रयणे तस्मिन् दहरपुण्ड-रीकवेश्मनीत्युत्तरभाष्यस्य दहरोऽस्मिन्नन्तर आकाश इति वाक्यार्थकथनपरत्वं न स्यात् पूर्वमेव तद्वाक्यार्थस्याप्युपन्यस्तत्वात् ततश्च तस्मिन् यदन्तरिति तच्छब्दस्य परमतवद्व्यवहितपुण्डरीकपरत्वाभावात् । दहरोस्मिन्नितिवाक्यं व्याचष्ट इत्युत्तरत्र ग्रन्थकृतैव वक्ष्य-माणत्वाच्चेति चेत् सत्यम्; अथापि अनूद्येत्येतदनूदितस्यार्थस्य पुनरनुवादे प्रयोजनं नास्तीत्यर्थसूचकमित्यत्र तात्पर्यम् । अनूद्येत्या-दिनेतिपाठस्तु सुगम एव । वैयर्थ्यं स्यादिति - न च तस्मिन् यदन्तरित्यनुवादस्य तन्तर्वर्तिकामविशिष्टतद्यान्वेष्ठव्यत्वसिद्धिः प्रयो-जनमिति वाच्यम्; पुनरनुवादेन तादृशप्रयोजनसिद्धौ प्रमाणाभावात् । व्यवहितेति - सर्वनाम्नामव्यवहितपरत्वसम्भवे व्यवहितपर-

१.३.१३

त्वकल्पनाया अन्याय्यत्वात्, अत एव साकमेथे "एतद्ब्राह्मण एककपालः' इत्यत्रैतत्पदमव्यवहितवारुणप्रधादिकैककपालपरामर्शी, नतु व्यवहितवैश्वदेविकैककपालपरामर्शीति सप्तमे स्थितम् गौश्चाश्वरतश्च गर्दभाश्चाजाश्चावयश्च तिलाश्च माषाश्च तस्य द्वादश शतं दक्षिणेत्यत्र तु माषद्वादशशतमात्रस्यानतिकरत्वासम्भवात् बहुवचनान्तानां माषाणां तस्येत्येकवचनेन परामर्शस्यायुक्तत्वाच्चाव्यव-हितमाषाणां परामर्शेऽनुपपत्तिसत्त्वात् व्यवहितगोपरामर्शित्वम्, न चेह तथा बाधकमस्तीति भावः । परमात्मन इति - परमात्म-नोऽन्तर्वर्ति तत्कारणं सूक्ष्मं किमपि न सम्भवतीति किं तत्र विद्यत इति वाक्येनाक्षिप्य द्यावापृथिव्यादिकार्यस्य तदन्तर्वर्तितया समाधानमिति हि परैवर्ण्यत इति पाठो बहुषु कोशेषूपलभ्यते, अस्य ग्रन्थस्य च सर्वकाणणान्तर्वर्ति कारणं न सम्भवतीत्याक्षेपा-भिप्रायः । सकलकारणभूते परमात्मनि कारणान्तरस्यासम्भवेपि द्यावापृथिव्यादिकार्यसम्भवान्न दोष इति समाधानाभिप्राय इति परैर्वर्ण्यत इत्यर्थो खटिति प्रतीयते, परैश्च नैवमाक्षेपसमाधानप्रकरणौ वर्णितौ, अपि तु दहरपुण्डरीकमेव तावत्सूक्ष्मतरम्, तदव-रुद्धमाकाशं ततोपि सूक्ष्मतमम् तस्मिंश्च सूक्षमतमे आकाशे किमपि मातुं न शक्तोतीति किमन्वेष्टव्यं स्यादित्याक्षेपाभिप्रायः, दह-राकाशस्य

ब्रह्मयाकाशवद्विपुलत्वेन सूक्ष्मतमत्वनिबन्धनानुपपत्त्याभावात् तत्र द्यावापृथिव्यादिसर्वविधभोग्यजातसमवधानं तदन्वेष्टव्यत्वं च सम्भवतीति समाधानाभिप्राय इत्येवोक्तम्, नतूक्तप्रकारेण;
तस्मात्पुरोवादिवाक्यानुसारेणानुवादिवाक्यार्थस्य वर्णनीयत्वात् अस्यापि ग्रन्थस्य स एवार्थः । परमात्मनोऽन्तर्वर्तिनः कस्याप्यभावादित्युपरितनानुवादस्याप्ययमेवार्थः । पुंल्लिङ्गयच्छब्दाध्याहारेणेति तस्मिन् यदन्तरिति वाक्य इति शेषः, नतु दहरोऽस्मिन्नितिवाक्ये तस्मिन् वाक्ये यच्छब्दाध्यारे दहरोऽस्मिन्नित्यादेरेकवाक्यत्वप्रसङ्गात् यत्पदघटितवाक्यस्य तत्पदघटितवाक्येनैकवाक्यतावश्यम्भावात् न चेष्टापत्तिः, उत्तरपक्ष एव एकवाक्यत्वाश्रयणस्य वक्ष्यमाणत्वादिति द्रष्टव्यम् । केचित्तु "दहरोऽस्मिन्नन्तर आकाशः' इत्यत्रैव यच्छब्दाध्याहारः, दहरोऽस्मिन्नित्यादेरेकवाक्यता च पक्षद्वयेप्यवशिष्टैव पुल्लिङ्गयच्छब्दाध्याहारानध्याहाराभ्यामेव वैषम्यमित्यप्याहुः । अत्र पक्षद्वयेऽपि चशब्दाध्याहारस्समानो द्रष्टव्यः । भाष्ये-यच्च तदन्तर्व-र्तिगुणजातम्-
इत्यत्रान्तर्वर्तीत्येतच्छ्रुतिगतान्तश्शब्दव्याख्यानमिति दर्शयति - श्रुतिवाक्य इति । नन्वाकाशतदन्तर्वर्तिनोर्द्वयोः कथमेकेन शब्देन परामर्शसम्भव इत्यत आह - त्यदादीनि सर्वैरिति । ननु त्यदादीनीत्येकशेषे सति कथमेकवचनम् ? नच "एकवच्चान्यत-रस्याम्' इत्येकवचनमिति वाच्यम् । "नपुंसकमनपुंसकेन' इतिसूत्रखण्डकृतैकशेषस्यैवास्येति सौत्रपदेन परामृष्टतया सूत्रान्तरकृतैक-

१.३.१३

शेषस्यातथात्वादिति चेत् "व्यत्ययो बहुलम्' इति वा "सुपां सुलुक्' इति वा यदिति रूपसम्भवात् । यद्वा "कर्मणो रोमन्थतपोभ्याम्' इतिवत्प्रत्येकमेकत्वाभिप्रायेणैकवद्भावस्य द्विगुरेकवचनमितिसल्लिङ्गसामान्यविवक्षया नपुंसकत्वस्याप्युपपत्तेः । अत्रैव "गतिशब्दा- भ्यां तथा हि दृष्टम्' इति सूत्रे पुल्लिङ्गद्विवचनान्तगतिशब्दविशेषणस्य नपुंसकलिङ्गैकवचनान्तस्य दृष्टमित्यस्योक्तेनैव प्रकारेण निर्वा-ह्यत्वाच्च । एवमाद्यनेकस्वारस्यं यच्छब्दविषयेत्यादिनिवर्तकसूत्रस्याप्रवृत्तिं च हृदि निधाय पक्षान्तरमाह - नपुंसकमनपुंसकेनेति । अत्र च वाशब्दोऽपेक्षितोऽध्याहर्तव्यः । सर्वान्तरस्य परमात्मन इति - सूक्ष्मपुण्डरीकवर्तिनि सूक्ष्मे आकाशे किं विद्येतेत्यनुपपत्ति-रित्यर्थः । अत्र परमात्मन इत्येतद्वस्तुतस्सिद्धान्तन्यायेन तस्य परमात्मत्वमस्तीत्यभिप्रायेणोक्तम्, नतु परमात्मत्वमाक्षेपबीजम् । "यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः' इत्येतावन्मात्रं श्रुतवतां शिष्याणां परमात्मत्वविरोधिन्या-काशशब्दे जागरूके दहरत्वान्वेष्टव्यत्वान्तराधारत्वादिविरोधिलिङ्गे च जाग्रति ब्रह्मलिङ्गेषु चानुपन्यस्तेषु परमात्मत्वविश्चयस्य वा तदुपजीव्याक्षेपप्रवृत्तेर्वा असम्भवादिति द्रष्टव्यम् । आकाशतदन्तर्वर्तिनोरिति - निर्द्धारणे षष्ठी, आकाशस्य ज्ञातत्वादित्यर्थः । प्राधान्यज्ञापनार्थं चेति - भाष्यकृतेतिशेषः, नतु श्रुत्येति । ततश्च प्राकरणिकानामिदमेतच्छब्दानामाकाशपरामर्शित्वप्रभृतेस्सर्व- स्यापि "उभे अस्मिन्नाकाशे द्यावापृथिवी अन्तरेव समाहिते' इत्येकाकाशपदप्रक्षेपेणैव सिद्धिसम्भवात्"यावान्वा अयमाकाशस्-तावानेषोऽन्तर्हृदय आकाशः' इत्येतावतस्सन्दर्भस्य वैयर्थ्यमिति दूषणं नावकाशं लभत इति द्रष्टव्यम् । आकाशशब्दव्यवहित-त्वादिति - यावान्वा अयमाकाश इत्याकाशशब्दस्य व्यवहितत्यादित्यर्थः । अस्तित्वनास्तित्वयोस्सप्रतियोगित्वावगमादिति ।

१.३.१३

कस्यास्तित्वं कस्य नास्तित्वमित्यपेक्षायामित्यर्थः । किमस्ति किं नास्तीत्यपेक्षायां चोदयितुरनुभाषणवाक्ये सर्वेपि कामा इत्यनु-भाषणात् यच्छब्दो भोग्यजातपर इति निर्णीयत इति भावः । चोदयितुरिति - यद्यपि तं चेद्ब्रूयुरिति चोदयितॄणां बहुत्वमवगम्यते तथापि तदविवक्षयैवैकवचनं प्रयुक्तमिति द्रष्टव्यम् । अनुभाषणवाक्यं इति - "अस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे कामाः' इत्यनुभाषणवाक्य इत्यर्थः । निरतिशयभोग्यतापरत्वं युक्तमिति - ननु "ये चास्येह जीवा ये च प्रेताः यच्चान्यदिच्छन् न लभते सर्वं तदत्र गत्वा

विन्दते, अत्र ह्यस्यैते सत्याः कामास्स यदि पितृलोककामो भवति' इत्याद्युत्तरसन्दर्भप्रतिपाद्यस्वसङ्कल्प-मात्रसमुत्थितप्राचीनानन्तजन्मसम्बन्धिदिदृक्षितपितृमातृभ्रातृस्वसृसस्विगन्धमाल्यान्नापाननृत्तगीतादिसम्पत्तेस्तात्त्विकत्वाभ्युपगमात् "सभ्काल्पादेव तच्छ्रुतेः' इत्यत्र तस्य तात्त्विकत्वमभ्युपगम्य सङ्कल्पमात्रसमुत्थितत्वप्रतिपादनाच्च यथाश्रुतार्थं विहाय निरतिशयभो-ग्यतामात्रे तात्पर्यमिति कुतोऽङ्गीकार्यमिति चेत् सत्यम्; भोग्याधारत्वमेव प्रतिपाद्यते, अथापि उपपिपादयिषिते ब्रह्मणोऽन्वेष्टव्यत्वे तदाश्रितपित्रादीनां भोग्यत्वप्रतिपादनस्यात्यन्तानुपयुक्तत्वात् । यच्चास्येहास्तीत्यादिवाक्यमपि पित्रादिसर्वभोग्याधारत्वप्रतिपादन-मुखेन ब्रह्मणो निरतिशयभोग्यत्वप्रतिपादनपरमिति पित्रादिभोग्याधारत्वे तात्पर्यसत्त्वेपि ब्रह्मणो निरतिशयभोग्यत्वे परमतात्पर्यमिति भाष्याभिप्राय इत्यत्रैवाचार्याणां संरम्भ इति न काचिदनुपपत्तिः । निरतिशयभोग्यत्वं न पृथग्वाच्यमिति । न चानन्दत्वमात्रस्य स्वरूपनिरूपकत्वेपि निरतिशयानन्दत्वं न स्वरूपनिरूपकमिति वाच्यम्; निरुपाधिकत्वादेव निरतिशयभोग्यत्वस्यापि सिद्धेरित्यत्र तात्पर्यात् । अथ तं चेद्ब्रूयुरित्यादि चोद्यपरिहारवाक्यानामिति - अत्राथेत्येतन्न श्रुतिवाक्यम्, अपि तु ग्रन्थकारवाक्यमिति द्रष्टव्यम् ।

१.३.१३

ननु किं तदत्र विद्यत इति प्रश्नप्रतिवचनसमाप्तेः प्रागेव कथमस्य चोद्यस्यावकाश इत्यत आह - किं तदत्र विद्यत इति प्रश्नस्य प्रतिवचनमित्यादिना । द्यावापृथिव्याद्यवस्थानादिति पूर्वेणान्वयः । ततश्च दहराकाशनाशेपि अवतिष्ठमानानां द्यावापृथिव्यादीनां दहराकाशाश्रयत्वं न सम्भवतीति भावः । व्यवहितमपि ब्रह्मपुराख्यमिति - नन्वस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामाः यदेनज्जरावाप्नोति प्रध्वंसते वा किं ततोऽतिशिष्यते' इति हि श्रुतिवाक्यम् नात्र वाक्ये दहराकाशनिर्देशोऽस्ति, अतः कथं दहराकाशापेक्षया ब्रह्मपुरशब्दितशरीरस्य व्यवहितत्वमभ्युपगम्याक्षेपसमाधानयोः प्रवृत्तिरितिचेत् अस्मिंश्चेदिदं समाहितमिति सर्वशब्देन दहराकाशस्यापि क्रोडीकारसम्भवात् । नच दहराकाशस्यापि सर्वशब्देन परामर्शे सर्वशब्देन भोग्यभोगोपकरणादि प्रति-पाद्यत इत्युत्तरग्रन्थविरोधः । तस्य दहराकाशोपलक्षणत्वेनादोषात्; अत आकाशशब्दस्य ब्रह्मपुरापेक्षया अव्यवहितत्वमस्तीति ग्रन्थकृदाशयः । यद्वा "अस्मिंश्चेदिदं ब्रह्मपुरे' इति सन्निहितब्रह्मपुरशब्दस्य तत्स्थदहराकाशलक्षकत्वमभिप्रत्यैतदुक्तमिति द्रष्टव्यम् । नचास्मिन् पक्षे अव्यवहितब्रह्मपुरशब्देन शरीरस्याप्रकृततया न प्रकृतं शरीरमित्यभिप्रायः इत्युत्तरग्रन्थविरोध इति वाच्यम्; लक्ष्यो-पस्थितिद्वारतया मुख्यार्थस्यापि प्रकृतत्वादिति भावः । सत्यत्वस्य वक्ष्यमाणत्वादिति । यद्यपि सत्यत्वस्य वक्ष्यमाणत्वं न प्राक्तन-माक्षेपं प्रतिबध्नाति, तथाप्यभ्युच्चयोक्तितयोपन्यस्तमिति द्रष्टव्यम् । ननु सर्वशब्दसङ्कोचेनेति - "यथा सर्वेभ्यः कामेभ्यो ज्योतिष्टोमस्सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इत्यत्र सर्वत्वमाधिकारिकमिति र्थवादाधिकरणसूत्रोक्तन्यायेन सर्वेभ्यः कामेभ्य इत्यस्य वेदप्रति-पाद्यप्रकृतपशुपुत्रवृष्टयन्नपानादिपरत्वमेव, न त्वप्रकृताकाशगाम्यमरकन्यालाभादिपरत्वमपि सर्वनाम्ना प्रकृतिपरामर्शित्वस्वारस्यात्; तथात्रापि सर्वकामशब्दस्य "स यदि पितृलोककामो भवती'त्यादिना वर्णयिष्यमाणपितृमातृगन्धमाल्यनृत्तगीतवनितादिपरामर्शित्व-मेवोचितम्, नतु सर्वविधभोग्यतापरत्वम्, कामशब्दस्य भोग्यतापरत्वे अस्वारस्यादिति शङ्काभिप्रायः । प्रथमश्रुतेति । नच प्रथम-श्रुतस्य सङ्कोचप्रसङ्गेन चरमश्रुतकामशब्दस्यामुख्यार्थपरिग्रहे सर्वे ब्राह्मणास्समागता इत्यत्र प्रथमश्रुतसर्वशब्दासङ्कोचाय ब्राह्मणश-ब्दस्य शूद्रपरत्वमपि स्यादिति वाच्यम्; ब्राह्मणशब्दवत्कामशब्दस्य जीवभोग्यगन्धमाल्यादिमात्रे रूढत्वाभावात् इयांस्तु विशेषः, यज्जीवभोग्यगन्धमाल्यादिषु कामशब्दस्यात्यन्तप्रसिद्धिः भोग्यतां तु प्रसिद्धिमात्रं नात्यन्तप्रसिद्धिरिति; अतो न कश्चिद्दोषः । वक्ष्य-माणत्वानुगुणत्वाच्चेति । सर्वेषु लोकेषु कामचारोभवतीत्युपासनफलस्य यन्निरतिशयत्वं वक्ष्यति तस्यानुगुणत्वाच्चेत्यर्थः ।

१.३.१३

अर्थसिद्धमाकारमाहेति । ननु "एतत्सत्यं ब्रह्मपुर'मितिवाक्यश्रवणात्प्रागेव नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते' इत्येतावन्मा-त्रश्रवणात्परमकारणतयातिसूक्ष्मत्वं कथमर्थसिद्धं स्यादिति चेत् अत्र केचित्-भाष्ये एतत्सत्यं ब्रह्मेत्यन्तस्य श्रुतिवाक्यस्य निर्विका-रत्वमुक्तवेत्यन्तेन भाष्येण व्याख्यानम्, तत एवेत्युत्तरसन्दर्भेण तु श्रुतिवाक्यस्थपुरशब्दस्यैव व्याख्यानम्, एवञ्च ब्रह्मशब्देन तल्ल-क्षणीभूतजगज्जन्मादिहेतुत्वस्य सूचनसम्भवात्, सत्यशब्देन निर्विकारत्वस्य कण्ठोक्तत्वाच्च नानुपपत्तिः । इतरथा "नास्य जरयै-तज्जीर्यति न वदेनास्य हन्यते' इत्यनेनैव निर्विकारत्वसिद्धौ पुनरप्येतत्सत्यमिति सत्यशब्देन निर्विकारत्वप्रतिपादनं विफलमेव स्यात् । किच अत एवेतिभाष्ये निर्विकारत्वस्यैव सत्यशब्दार्थीभूतान्निर्विकारहेतुत्वेन परामर्शात्साध्याविशेषश्च दुर्वारः । न च सत्यशब्दस्य निर्विकारत्वबलप्राप्तसततैकरूपत्वमर्थः, अतो न सत्यशब्दवैफल्यम् नवा साध्याविशेष इति शङ्कयम् श्रुतिवाक्यस्थसत्यशब्दस्य निर्विकारत्वमर्थ इति भाव इत्युत्तरग्रन्थविरोधात्; तस्मादुक्तैव सरणिरनुसरणीयेति वदन्ति । सत्यशब्दसामानाधिकरण्यादिति । ततश्च यदिदं ब्रह्मपुरमित्याद्यभ्यतब्रह्मपुरशब्दार्थवैरूप्यमपि सोढव्यमिति भावः । अस्मिन् कामा इति तु प्रथमचोद्यप्रतिवचनमिति । अत्र केचित्-"यच्चास्येहास्ति यच्च नास्ति' इत्येव किं तदत्र विद्यत इति प्रश्नस्य प्रतिवचनम् तदेवास्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि भूतानि सर्वे च कामा इत्यनुभाषणवाक्ये कामशब्देनानूद्यते, तदेव च"एतत्सत्यं ब्रह्मपुरम् अस्मिन् कामास्समाहिताः य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्, त इमे सत्याः कामाः' इति कामशब्देनापि परामृश्यते, कामशब्दानां प्रत्यभिज्ञाय-मानत्वाच्च अपहतपाप्मत्वादीनामन्यविशेषणतया प्रतीयमानानामेतांश्च सत्यान् कामानित्येतच्छब्देन परामर्शस्य क्लिष्टत्वाच्चेति तद-युक्तम्; कामशब्दप्रत्यभिज्ञामात्रेणैक्याभ्युपगमे ब्रह्मपूरशब्दप्रत्यभिज्ञाबलेन अथ यदिदमस्मिन् ब्रह्मपुरे एतत्सत्यं ब्रह्मपुरमित्यनयो-रप्यैक्यापत्त्या सारूप्यमात्रस्याप्रयोजकत्वात् अन्यविशेषणतया प्रतीतानामपहतपाप्मत्वादीनामेतांश्च सत्यान् कामानिति एतच्छब्देन परामर्शो न सम्भवतीत्यप्ययुक्तम् अस्मिन् कामास्समाहिता इति प्राधान्येन निर्दिष्टानामेव एतांश्च सत्यान् कामानिति परामर्शसम्भवात् नच अस्मिन् कामास्समाहिता इत्यत्रापि सर्वे च कामा इत्यनुभाषणवाक्यप्रत्यभिज्ञानात् द्यावापृथिव्यादय एवोच्यन्ते, न त्वपहत-पाप्मत्वादय इति शङ्कयम् तथात्वे अपहतपाप्मेत्यादिसन्दर्भस्य वैयर्थ्यप्रसङ्गात्, तत्र हि अपहतपाप्मत्वादिमत्त्वात् कामसमाधाना-धारत्वं सम्भवतीत्युक्तिभङ्गया अपहतपाप्मत्वादिषु कामशब्दार्थसमर्पणपरत्व एव सार्थक्यम् इतरथा स्वरूपनिर्देशमात्रस्यानति-प्रयोजनत्वादिति न कश्चिद्दोषः । अव्यवयहितैतत्सत्यमिति । अत्र एतत्सत्यं ब्रह्मपुरमित्येतावतोऽप्यनुकरणशब्दतया सुब्लोपाभावः । अवयवशक्तयेत्यर्थ इतिभाष्ये अवयवशक्तया निर्दिश्येत्येवं शेषः पूरणीय इति भावः । सत्यसभ्कल्पशब्देन्यपि सिद्धत्वादिति । न च कामस्सङ्कल्पो विचिकित्सा इत्यादाविव कामसङ्कल्पयोर्भेद निर्देशस्य सार्थक्यमिति वाच्यम्; तथापि फलत एकत्वेनानतिप्रयोज-नत्वात् । कतिपयगुणान्तराणां पृथगुक्तत्वादिति । यद्यपि पृथगुक्तेष्वेव गणेषु निर्विशेष ब्रह्मवादनिराकरणाय सत्यत्वं प्रतिपाद्यत

१.३.१३

इति वैयर्थ्यम् अथापि मार्गान्तरस्य मार्गानतरादूषकत्वादित्यत्र तात्पर्यम् । नित्यविभूतिविशिष्टत्वं सत्यकामशब्दार्थ इति - सत्य-शब्दस्य नित्यत्वमित्यर्थः, कामशब्दस्य कामनाविषयीभूतभोग्यभोगोपकरणादिकमर्थ इति भावः । ननु प्रजापतिवाक्यगतसत्य-कामशब्दस्यापि नित्यविभूतिमत्त्वमथर्स्यादिति चेत् इष्टापत्तेः, मुक्तस्याप्यप्राकृतविग्रहादिमत्त्वेन तत्स्वामित्वसम्भवात् प्रथमस्य यथाशब्दस्येति - अयमिहान्वयक्रमः, - इह प्रजा यं यमन्तं जनपदं क्षेत्रभागमभिकामा भवन्ति तं तं यथा राजशासनं राजशा-सनानुसारेण, यथान्वाविशन्ति लभन्ते, तथा तं तमेवोपजीवन्ति भुञ्जत इति, यथा राजसेवाफलस्य राजशासनानुर्वर्त्तित्वम् एवं तत्फलभोमस्यापीत्युक्तं भवति । राजशासनं यथेति - यद्यपि यथानुशासनमित्यत्र यथाशब्दस्य पदार्थानतिवृत्त्यर्थकतया तस्य च नित्यसमासत्वेन स्वपदविग्रहो न भवति । तथाशब्दप्रतिनिर्देशापेक्षापि नास्ति, नहि यथाविधि करोतीत्यादौ तथाशब्दाकाङ्क्षास्ति, अथापि सादृश्यार्थकयथाशब्दमादाय फलतस्समासार्थकथनम् अत एव तथाशब्दप्रयोगोपपत्तिश्चेति द्रष्टव्यम् ।

श्रुतिगतत्वभ्रान्तिं व्युदस्यति - भाष्य इति । नतु सत्यकामपदोक्तकामपर इति । नित्यविभूतिपरो न भवतीत्यर्थः । प्रकृतगुणविषयतयेति - अस्मिन् कामास्समाहिता इति प्रकृतसर्वगुणविषयतयेत्यर्थः । शङ्कते - सत्यशब्दविशेषितत्वमिति । ततः पूर्वमिति - सत्यशब्दात्पूर्वमित्यर्थः ।

१.३.१४

सत्यशब्दविशेषितत्वाच्चेति - नचैवमक्षिपतस्तदपि विप्रतिपन्नमिति वाच्यम्; अपहतपाप्मत्वादीनामपि अनृतापिधानत्वप्रतिपा-दनस्यावश्यकतया तन्मात्रसङ्कोचे प्रमाणाभावादिति भावः । एकरूपतया अवश्याभ्युपगन्तव्यत्वादिति । ततश्च क्लिष्टनिर्वाह आनयणीय इति भावः । तस्मिन् यदन्तरितिवाक्ये क्लिष्टनिर्वाहमनभ्युपगच्छतः कोऽभिप्रायः ? किं य इहात्मानमित्युपसंहारवाक्ये गुणगुण्युपासनयोर्द्वयोरप्यनुवादः, उत विशिष्टविधानमाश्रित्य द्वयोरपि विधानम्, उत गुण्यंशे फलसम्बन्धविशिष्टोपासनविधिः, गुणांशे तु फलसम्बन्धमात्र विधिः ? इति त्रेधा विकल्पं हृदि निधाय क्रमेण दूषयति - न ह्यप्राप्तं गुण्युपासनमित्यादिना । भाष्ये स त आगम्येति श्रुत्युपन्यासात्सौत्रगतिशब्देन निर्गमनमपि विवक्षितमिति भाष्यकृतोऽभिसन्धिरिति मत्वा निर्गमनशब्दार्थमाह - निर्गमनं पृथक्स्थित्यर्हतापत्तिरिति । शब्दस्यान्यत्र प्रसिद्धिमिति - गतिशब्दाभ्यामित्यत्र गतेरन्यत्र प्रसिद्धिमुपपाद्य शब्दस्य

१.३.१४

प्रसिद्धिमुपपादयतीत्यर्थः । निधिदृष्टान्तसचिवमिति भाव इति । ततश्च हृदयपुण्डरीकावच्छिन्नभूताकाशे सुषुप्तौ अहरहगर्मन-सम्भवात्, हाहरहर्गमनं परमात्मत्वसाधकमिति न शङ्कयम्
निध्युपमालब्धपरमपुरुषार्थत्वविशिष्टगन्तव्यत्वस्य हृदयपुण्डरीका-वच्छिन्नभूताकाशे अभावादिति भावः । स्थपतिर्निषादस्यात् शब्दसामर्थ्यादिति सूत्रपाठः । सम्बन्धविशिेष्टोऽभिधेय इति । प्रति-पिपादयिषित इत्यर्थः । तत्र षष्ठया अश्रवणादिति । तत्र षष्ठीसमासपक्ष इत्यर्थः । तदनादृत्यैवं व्याख्यातमिति । न च चतुर्मुख-लोकपरतया प्रसिद्धे ब्रह्मलोकशब्दे नरपतिराजकुमारादिशब्देष्विव निषादस्थपतिन्यायानवतारात् तद्व्यावृत्तिसिध्द्यर्थं पररीतिरेवा-श्रयणीयेतिवाच्यम्; "एष ब्रह्मलोकस्सम्राट्' इतिब्रह्मलोकशब्दस्य ब्रह्मण्यपि प्रसिद्धतया तन्न्यायानवतारशङ्कानुदयात् । दृष्टान्त

१.३.१५

एवोपरिशब्दान्वय इति । सुषुप्तिविषयमनं हि पृथक्प्रतिपत्तिव्यवहाराननुगुणतयाऽवस्थितिर्भेदप्रहाणरूपा, अतस्तत्र दार्ष्टान्तिके अहरहरुपरि गच्छन्त्य इत्युपरिशब्दानन्वय इति भावः । नन्वन्तर्यामिरूपब्रह्मण्येवास्थितिः, न दहराकाशरूपब्रह्मणि ततश्च कथं दहराकाशस्य उपरीति भाष्यमित्यत आह - धर्म्यैक्याभिप्रायेणैवमुक्तमिति । सत्यशब्दनिर्वचनावगतमिति । तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति । तानि हवा एतानि त्रीण्यक्षराणि सत्यमिति । अथ यत् सत् तदमृतम् अथ यत्ति तन्मर्त्यम् अथ यद्यं तेनोभे यच्छति' इति निर्वचनावगतमित्यर्थः ।। भूताकाशान्यत्वे तात्पर्यमिति - जीवपूवर्पक्षस्याप्यद्याप्यनिरस्तत्वादिति भावः ।।

१.३.१७

पूर्वोक्तहेतूनामिति - बाह्याकाशोपमानोपमेयभावादीनां च चतुस्सूत्रीप्रतिपादितानामित्यर्थः । उपक्रमत इत्यनेनेति - दहराकाशस्य प्रत्यगात्मतत्त्वमाशङ्कय निराकर्तुमुपक्रमत इति दहराविच्छेदप्रतीतेर्नाधिकरणान्तरमिति सूचितमिति भावः, नतूपक्रमत इत्येतावतैव तत्सूचनं तावन्मात्रेण तथा अप्रतीतेरिति द्रष्टव्यम् । यद्यपि विरोचनोपीति - इत्थं हि समाम्नायते- "य आत्मा अपहतपाप्मा विरजो विमृत्युविर्शोको
विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पस्सोऽन्वेष्टव्यस्स विजिज्ञासितव्यः सर्वान् लोकानाप्नोति स सर्वांश्च कामान्

१.३.१८

यस्तमात्मानमनुविद्या विजानातीति ह प्रजापतिरुवाच । तद्धोभये देवा अनुबुबुधिरे कर्णाकर्णिकया श्रुतवन्त इत्यर्थः । "ते होचुः । हन्त तमात्मानमन्विच्छामो यमात्मानमन्विप्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति । इन्द्रो ह वै देवानामभि प्रववाज विरो-चनोऽसुराणाम् । तौ हासंविदामावेव' असंविदानौ-परस्परेर्ष्यया स्वाभिप्रायमप्रकाशयन्तावित्यर्थः । समित्पाणी प्रजापतिसकाश-माजग्मतुः । तौ ह द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमूषतुः । तौ ह प्रजापतिरुवाच किमिच्छन्तावावास्तमिति' अवास्तम्-उषितवन्तावित्यर्थः । "तौ हो चतुर्य आत्माऽपहतपाप्मा विरजो विमृत्युर्विोको विजिघत्सोऽपिपासम्सत्यकामस्सत्यसङ्कल्पस्सोऽन्वेष्टव्यस्स विजिज्ञा-सितव्यस्सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति भगवतो वाचो वेदयन्ते तमिच्छन्तावावास्तमिति । तौ ह प्रजापतिरुवाच । य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमेतदभयमेतद्ब्रह्मेति' एवं प्रत्यगात्मनि प्रजापतिना उपदिष्टे छायापुरुष आत्मेत्युपदिष्ट इति भ्रान्त्वा स्वगृहीतच्छायापुरुषात्मत्वद्रढीकरणाय जलादर्शादिप्रतिबिम्बोपि अक्षिप्रतिबिम्बाभिन्न आत्मैव, उत तद्भिन्नोऽनात्मेत्यभिप्रायेण "अथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्थे कतव एष इति पप्रच्छतुः । एवं ताभ्यां पृष्टस्तयोर्भ्रान्तिमनिराकुर्वन्नेव "एष उ एव सर्वेष्वन्तेषु परिख्यायत इति होवाच । यश्चक्षुषि दृश्यत्वेन मयोक्तस्स सर्वान्तरो जलादिष्वपि न भिद्यत इत्युत्तरं ददावित्यर्थः । शिष्यभ्रान्तिमनिराकृत्य तद्भ्रान्तिद्रढीकरणायेत्थमुत्तरं ददत आचार्यस्यायमभिप्रायः, सुरासुरेन्द्रा-विरोचनौ स्वात्मन्यध्यारोपितपाण्डित्यमहत्त्वातिशयौ तथैव जगति प्रसिद्धौ च, तद्यदि युवां भ्रान्ताविति ब्रूयात् तदा चित्तावसादात्पुनः प्रश्नग्रहणधारणेषु भग्नोत्साहौ स्याताम् अतो यथाश्रुतप्रश्नमात्रस्योत्तरमिदानीं वक्तव्यम् । अनेन चोत्तरेण पूर्वोत्पन्नः प्रतिबिम्बात्मभ्रमो द्रढीभवति चेत् भवतु, द्रढीभूतोपि केनचिदुपायेनापनेष्यत इति । प्रथमः खण्डः । अत एव तद्भ्रमापनयनार्थमाह-"उदशरावे आत्मान-मवेक्षाञ्जक्राते, तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुस्सर्वमेवेदभावां भगव आत्मानं पश्यावः, आलोगभ्य आनखेभ्यः प्रतिरूपमिति । एवं द्वात्रिंशद्वर्षब्रह्मचर्यदीर्घीभूतनखलामादियुक्तच्छायापुरुषदर्शनानन्तरं तौ ह प्रजापतिरुवाच । साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षाञ्चक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुर्यथैवेदमानां भगवस्साद्वलङ्कृतौ सुवसनौ

१.३.१८

परिष्कृतौ स्थ एवमेवेमौ भगवस्साध्वलङ्कृतौ सुवसनौ परिष्कृताविति । अत्रैवं नियुञ्जानस्य प्रजापतेरयमभिसन्धिः, आगमापायि-केशनस्वालङ्करादिदोषगुणयुक्ताव्यवस्थितदेहानुकारिदोषगुणवत्त्वात् देहवत्तत्प्रतिबिम्बोऽप्यनात्मेति जानीतामिति । एवं सत्यपि तावनिसृत्तभ्रमौ किं पश्यथ इति प्रजापतिना पृष्टावपि यथादृष्टं कथयित्वा तूष्णीं बभूवतुः, ततः प्रजापतिर्भ्रान्तिनिवारणार्थं मया कृतस्य द्विविधप्रतिबिम्बदर्शनस्याभिप्रायमिमावप्रक्षीणकल्मषत्वान्नावगच्छतः, प्रत्यक्षञ्च युवां भ्रान्ताविति वक्तुमर्हौ न भवतः, तदिदानी-मेतदीयहृदयानुरोधेन प्रतिबिम्बमेव निर्दिश्य सर्वान्तरं परमात्मानं मनसि निधाय एष आत्मेत्युपदेशेनैतयोराकाङ्क्षां निवर्तयिष्यामि, कालेन कल्मषे प्रक्षीणे मद्वचनसन्दर्भस्य सर्वस्याप्यभिप्रायं स्वयमेवावगमिष्यतः । विचिकित्समानौ वा मत्समीपमागमिष्यत इति मत्वा एष आत्मेति होवाच एतदमृतमेतदभयमेतद्ब्रमेति । तौ ह शान्तहृदयौ-निवृत्ताकाङ्क्षावित्यर्थः । तौ हान्वीक्ष्य प्रजापतिरुवाच एवं प्रतिनिवृत्तयोः प्रजापतिर्भ्रान्तिगृहीतार्थश्रद्धया इमौ विनष्टौ माभूताम् इदमपि मम वचनं य आत्मेतिवचनवत्कर्णाकर्णिकया ृणुतामित्यभिप्रेत्योवाचेत्यर्थः । अनुपक्षभ्यात्मानमननुविद्य व्रजतः यतर एतदुपनिषदो भविष्यन्ति । यतरे-य इत्यर्थः । देवा वा असुरा वा ते पराभविष्यन्तीति, स ह शान्तहृदय एव विरोचनोऽसुरान् जगाम तेभ्यो हैतामुपनिषदं प्रोवाच । विरोचनः प्राजापत्यस्य द्विवि-धदेहच्छायादर्शननियोगस्य देहानुकारित्वाच्छायाया देह आत्मेति सूचने तात्पर्यम् अलङ्कृतदेहच्छायां निर्दिश्य एष आत्मेत्युपदेशस्य

नीलानीलयोरादर्शे दृश्यमानयोर्वाससोर्यन्नीलं तन्महार्हमितिवचनस्य छायानिमित्ते बिम्बे वाससीव अलङ्कृते देहे तात्पर्यमिति मन्वानो दहे एवात्मालङ्कारादिभिः परिचरणीय इति निश्चित्य राज्यं प्राप्यासुरेभ्यस्तथैवोपदेष्टुमुपचक्रम इत्यर्थः । आत्मैवेह महीयः, पूज्य इत्यर्थः । आत्मा परिचर्यः, आत्मानमेवेह महयन्नात्मानं परिचरन्नुभौ लोकाववाप्नोतीमं चामुं च तस्मादप्यद्येहाददानमश्रद्दधानमयज-मानमाहुरसुरोबतेति । यागदानादिकर्मशून्यमद्यापि शिष्ठा असुर इति प्राहुरित्यर्थः । असुराणां ह्येषोपनिषत् प्रेतस्य शरीरं भिक्षया वसनेनालङ्कारेण संस्कुर्वन्ति । भिक्षया-भिक्षित्वापीत्यर्थः । एतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते । एतेन-शरीरालङ्कारेणेत्यर्थः । अथ हेन्द्रोऽप्राप्यैव देवानेतद्भयं ददर्श । यथैव खल्वयमस्मिन् शरीरे साध्वलङ्कृते साध्वलङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृतः एवमेवायमन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णः, यस्य चक्षुर्नासिका वा सदा स्रवति स स्रामः । छिन्नाङ्गः परिवृक्णः । अस्यैव शरीरस्य नाशमन्येष नश्यति नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन् शान्तहृदयः प्राव्राजीस्सार्धं विरोचनेन किमिच्छन् पुनरागम इति । आगतवानसीत्यर्थः । यथैव खल्वयं भगवो अस्मिंच्छरीरे साध्वलङ्कृते साध्व-लङ्कृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृतः एवमेवायमस्मिन्नन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽस्यैव नाश-मन्यैष नश्यति नाहमत्र भोग्यं पश्यामीति एवमेवैष भगवन्निति होवाच । एतत्त्वेव ते भूयाऽनु व्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणि स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच य एष स्वप्ने महीयानन्तश्चरति एष आत्मेति होवाचैतदमृतमेतदभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हा प्राप्यैव देवानेतद्भयं ददर्श, तद्यद्यपीदं शरीरमन्धं भवति अनन्धस्य भवति यदि स्राममस्रामो नैवै-षोऽस्य दोषेण दूष्यति न वधेनास्य हन्यते नास्य स्रामेण स्रामो नन्ति त्वेवैनं विच्छादयन्ति वा अप्रियवेत्तेव भवित्यपि रोदितीव नाहमत्र भोग्यं पश्यामिति स समित्पाणिः पुनरेयाय, तं ह प्रजापतिरुवाच भगवन् शान्तहृदयः प्राव्राजीः किमिच्छन् पुनरागम इति स होवाच तद्यद्यपीदं भगवन् शरीरमन्धं भवतीत्यनन्धस्स भवति अपि रोदितीव नाहमत्र भोग्यं पश्यामीति एवमैवैष मधवन्निति होवाच एतं त्वेव ते भूयोऽनु व्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच । तद्यत्रैतत्सुप्तस्समस्तसम्प्रसन्नस्स्वप्नं विजानाति

१.३.१८

एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज सहाप्राप्यैव देवानेतद्भयं ददर्श, नाहं खल्वयं भगवस्सम्प्रत्या-त्मानं जानात्ययमहमस्मीति नो एवेमानिभूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन् यच्छान्तहृदयः प्राव्राजीः किमिच्छन् पुनरागम इति स होवाच नाहं खल्वयं भगवस्सम्प्रत्यात्मानं जानामि नाहमत्र भोग्यं पश्यामीति एवमेवैष मघवन्निति होवाच एतं त्वेव ते भूयो नु व्याख्यास्यामि नो एवान्यत्रेतस्माद्वसात्रापराणि पञ्च-वर्षाणीति स हापराणि पञ्चवर्षाण्युवास तान्येकशतं सम्पेतुरेतत्तद्यदाहुरेकशतं वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच पुनरपि द्वात्रिंशतं वर्षाण्युषितवते मघवते स्थूलशरीरदोषाननुविधायिनं स्वपनावस्थं जीवात्मानमुपदिदेश । इन्द्रस्तत्रापि हन्यमान-त्वद्राव्यमाणत्वबन्धुजननमरणाद्यप्रियद्रष्टृत्वरोदितृत्वादिप्रतिभासेन दोषं पश्यन्नुक्तार्थानुपपत्तिमनुसन्दधानः प्रजापतिं पुनरुपससाद । प्रजापत्तिः पूर्ववदुक्तवा तथैव द्वात्रिंशतं वर्षाणि उषितवते तस्मै स्वाप्नवधादिप्रतिभासप्रयुक्तभयशोकादिरहितं सुषुप्तावस्थं जीवात्मान-मुपदिदेश । इन्द्रस्तस्मिन् विशेषविज्ञानरहिते विनष्टप्रायत्वेनापुरुषार्थतां मन्यमानः प्रागुक्तानुपपत्त्यनुसन्धानेन पुनरपि प्रजापतिमु-पससाद । प्रजापतिरेतं त्वेव ते भूयो नु व्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पञ्चवर्षाणीत्युक्तवा तावत्कालमुषितब्रते एक-शतवर्षप्रह्मचर्यवासेन सम्यक्प्रक्षीणकल्मषायेन्द्रायोपदेष्टुमुपचक्रम इत्यर्थः । "मघवन्मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्या-शरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वा ब सन्तं न प्रियाप्रियो स्पृशतः अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुश्शरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति स उत्तमः पुरुषस्स तत्र पर्येति जक्षन् क्रीडन् रममाणः, स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्त

एवमेवमेवायमस्मिञ्छरीरे प्राणो युक्तः । अथ यत्रैतदाकाशमनुविषण्णं चक्षुस्स चाक्षुषः पुरुषो दर्शनाय चक्षुः । अथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम् । अथ यो वेदेदमभिव्याहराणीति स आत्मा अभिव्याहाराय वाक् अथ यो वेदेदं ृणवानीति स आत्मा श्रवणाय श्रोत्रम् । अथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दिव्यं चक्षुस्स वा एष एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके । तं वा एतं देवा आत्मानमुपासते तस्मात्तेषां सर्वे च लोका आत्तास्सर्वे च कामास्स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच' । छायापुरुष उपदिष्ट इति मत्वा पुनःपप्रच्छतुः । योयं भगव इत्यादिनेतिपाठः । यो यं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इत्येतावतः प्रश्नत्वादिति द्रष्टव्यम् । सर्वेष्वन्तेषु नेत्रादिस्थानेषु परिख्यायते इति होवाचेत्यस्य प्रतिवचनरूपत्वात् । केचित्तु योयं भगवोऽप्सु परिख्यायते एष उ- एष एवेत्यर्थ इति पाठः । एष उ एव सर्वेन्वन्तेषु परिख्यायते यश्चायमादर्शे कतम एष इति एष उ एव सर्वेष्वन्तेषु परिख्यायत इत्येतावान् प्रश्नः इति होवाचेत्येतदुत्तरस्योदशरावब्राह्मणस्य शेषभूतः । तत्र च योयं भगवोष्षु परिख्यायते यश्चायमादर्शे य एष उ एव सर्वेष्वन्तेषु नेत्रादिस्थानेषु परिख्यायते कतम एष इति प्रश्नः । प्रश्नमध्यगत इतिशब्दः प्रन्नान्ते निवेशनीय इत्यादि वदन्ति । चाक्षुषदेहस्येति - चक्षुषि दृश्यमानस्य छायापुरुषस्येत्यर्थः । तत्क्रमस्यैव दृढावस्थितत्वेन तस्यैवापनेयत्वादिति द्रष्टव्यम् । अनात्मत्वमिति - इदमुप-लक्षणम् । अमृताभयशब्दाद्युक्तभोग्यत्वाद्यभावोपि द्रष्टव्यः, अत एव ह्युत्तरत्र नाहमत्र भोग्यं पश्यामीत्युक्तिरिति द्रष्टव्यम् । अन्वयव्यतिरेकाभ्याञ्चेति - देहगुणदोषान्वयव्यतिरेकानुविधानादित्यर्थः । यथा वसनाभरणादिरिति - वसनाभरणादिर्हि उपा-दानद्रव्यगुणदोषानुविधायी नात्मा, तथा देहगुणदोषान्वयव्यतिरेकानुविधायिगुणदोषतया छायापुरुषो नात्मेत्यर्थः । देहो नात्मेत्यत्र देहशब्दः छायापुरुषपरः, एवमुत्तरत्रापि देहस्यामृतत्वाभयेत्यत्रापि देहशब्दश्छायापुरुषपरो द्रष्टव्यः । व्यतिरेको दुर्दश इति - एतच्छ-

१.३.१८

रीरगुणदोषान्वयव्यतिरेकानुविधायित्वव्यतिरेको दुर्दर्शन इत्यर्थः । स्वप्नावस्थे तु तद्व्यतिरेकस्सुदर्शनः, अत एव यद्यपीदं शरीरमन्धं भवति अनन्धस्य भवतीति स्वप्नावस्थमधिकृत्येन्द्रवाक्यमिति ध्येयम् । तदभिप्रायानभिज्ञ इति - परिशुद्धात्मस्वरूपविषयपरम-तात्पर्यानभिज्ञ इत्यर्थः । एवमित्यादिकमुपाददानस्येति - "एष सम्प्रसादः' इत्येतावन्मात्रमनुपादाय एवमेवैष सम्प्रसाद इति सादृ-श्यवाच्येवंशब्दोपक्रमं वाक्यमुपाददानस्येत्यर्थः । दार्ष्टिकान्तिकेति - "अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथे-तान्यमुष्मादाकाशत्समुत्थाय परञ्ज्योति रुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति दृष्टान्तवाक्यम् ।"एवमेवैष सम्प्रसाद' इति दार्ष्टान्तिकवाक्यम् । मुखं व्यादाय स्वपितीति । यथा व्यादानस्य स्वापानन्तरभावित्वेपि मुखं व्यादाय स्वपितीति निर्देशः तथा पञ्ज्योतिर्भावरूपोपसम्पत्तेः प्रपञ्चप्रविलापकवृत्तिरूपसाक्षात्काररूपाभिनिष्पत्त्यनन्तरभावित्येपि परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणा-भिनिष्पद्यत इति निर्देश उपपन्न इति भावः । विवेकः किं शरीरकर्मकः, उत आत्मकर्मकः ? इति विकल्प्य दूषयति - शरीरविषय इत्यादिना । सिद्धान्तिनं भ्रान्तस्तटस्थश्चोदयति - शरीरादात्मन उत्थानं विवक्षितं चेदित्यादिना । न तु परेषां चोद्यमिति भ्रमि-तव्यम् । यदा च विवेकसाक्षात्कारश्शरीरात्समुत्थानम्; नतु शरीरापादानकं गमनं तदा तत्सशरीरस्यापि सम्भवतीति वाचस्पतिना शरीरापादानकगमनं सशरीरस्य न सम्भवति, शरीरविवेकरूपं समुत्थानं तु शरीरे वसतोपि सम्भवतीति प्रतिपादनादिति द्रष्टव्यम् । सशरीरस्य तत्सम्भवादिति - सूक्ष्मशरीरयुक्तस्यैव तत्सम्भवादित्यर्थः । मोक्षविषयत्वं न स्यादिति । शरीरात्समुत्थायेत्यंशोपि मुक्तिकालविषय इति भ्रान्तस्येयं शङ्केति द्रष्टव्यम् । ल्यबन्तपदस्येति - मुखं व्यादाय स्वपितीत्यादौ व्यादानानन्तरभाविस्वापमभिप्रेत्य

१.३.१८

व्यादाय स्वपितीत्युक्तिरुपपद्यते, प्रकृते तु ब्रह्मभावानन्तरं वृत्तिरूपसाक्षात्कारानवकाशात् त्वाप्रत्ययस्सर्वथानुपपन्न इति भावः । परञ्ज्योतिर्भावेति - करं कार्यत्वादिति निर्देशवत्साधुत्वं द्रष्टव्यम् । परञ्ज्योतिर्भावे तु न दोष इति

बोध्यम् । निर्देशवैयर्थ्यं चेति -अभिनिष्पद्यत इत्यनेनैव भेदप्रविलापस्याप्यनुक्तिसिद्दत्वादिति भावः । इदञ्च भेदप्रविलापकत्वमप्यसभनिष्पद्यत इति शब्दार्थान्त-र्गकमिति पक्षे दूषणम् । सद्वितीयत्वव्युदास इति - अभिनिष्पद्यत इत्येतावन्मात्रे कथिते निवर्तकज्ञानं द्वितीयमस्तीति शङ्का स्यात् सा मा विज्ञायीति निवर्तकज्ञानकृतसद्वितीयत्वमपि परञ्ज्योतिरुपसम्पद्येत्यनेन निरस्यत इत्यर्थः । सकर्मकत्वप्रतीतिस्वारस्येति । परं ज्योतिरुपसम्पद्येति उपसम्पत्तिशब्दस्याकर्मकभवत्यर्थपरत्वमयुक्तमित्यर्थः । कर्मकृतेति - अचेतनानां वाय्वादीनां कर्माभावादिति भावः । स्वकार्यकरणायेति - प्रावृट्काले वर्षायोच्छूनानि भूत्वेत्यर्थः । "अन्यार्थश्च परामर्श' इति सूत्रे एष सम्प्रसाद इत्यादिकं सुषुप्त्यवस्थात्मविषयतया परैर्व्याख्यातम् । तदपि निराकरोति - अस्य वाक्यस्येति । जीवस्वरूपवैलक्षण्याभिप्राय इति - सूत्र-कारेण भेदनिर्देश इति योजना । संसारिणो जीवद्भेदोक्तया यावदीश्वरस्यासंसारित्वं नोच्यते तावदभेदव्यपदेशेपि जीवस्यासंसारित्वं न सिध्येदित्यापतितं भेदं सूत्रकारो न वदतीत्यानन्दगिरिणोक्तमाह - यावद्भेदव्यपदेशेनेत्यादिना । अविद्यानिवृत्ताविति - जीव

१.३.१८

वैलक्षण्यप्रतिपत्तिमूलपुरुषार्थत्वप्रतिपत्त्या अपुरुषार्थत्वकल्पकाविद्यानिवृत्तावपुरुषार्थत्वमपि निवर्तते, अतो भेदनिर्देशस्य सार्थ-कत्वमिति भावः । प्राप्यतया पुरुषोत्तमप्रसङ्ग इति - जीवप्रकरणे पुरुषोत्तमप्रतिपादनं प्रासङ्गिकमिति भावः । प्रथमानिर्दिष्टेति । प्रथमानिर्दिष्टपरामर्शे विभक्तयैकरूप्यसद्भावात्, अत एव "प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्च्छत्' इत्यत्र प्रथमान्ततच्छ-ब्दस्य विभक्तयैकरूप्येण प्रजापतिपरामर्शित्वमिति भावः । ब्रह्मात्मकत्वपरं स्यादिति । स इत्यस्य तच्छरीरकपरमात्मपरत्वम-स्त्वित्यर्थः । प्रकृताप्रहाणादिति - प्रथमानिर्दिष्टसम्प्रसादप्रहाणादित्यर्थः । वैयधिकरण्येनेति - उत्तमपुरुषपर्यन्तत्वमन्तरेण जीव-मात्रपरामर्श इत्यर्थः । समानाधिकरणमस्त्विति चेदिति । स तत्र पर्येतीत्यत्रापि प्रथमान्ततच्छब्दस्योत्तमपुरुषपर्यन्तत्वमेव, एवञ्च न रीतिभेद इति भावः । नोपजनं स्मरन्नित्यस्येति - स्त्रीपुंसयोरन्योन्योपगमेन जायत इत्यपुरुषार्थत्वस्यैवोपजनशब्दार्थत्वादिति भावः । ननु स्मरणे को दोष इत्यत आह - अनुभूतस्य हीति । आकाशशब्दं प्रकाशकालोकादिपरतया व्याख्याय प्रकाशमान-

१.३.१८

रूपपरतया व्याचष्टे - प्रकाशमानं रूपं वेति । पक्षद्वयेपि प्रकाशयतीतिपदमध्याहरन् योजयति - प्रकाशयतीति । ततश्च यत्रोप-करणत्वेनानुविषण्णं चक्षुराकाशस्यालोकं रूपं वा प्रकाशयति, स चाक्षुषः चक्षुरुपकरणकः पुरुष आत्मा, चक्षुरुपकरणकमुद्दि-श्यात्मत्वं विधेयम्, स आत्मा गन्धाय घ्राणमित्याद्युत्तरवाक्यसारूप्यात्, इयं च भङ्गी सम्प्रतिपन्नसर्वप्रकाशकभावालोकप्रकाश-कचक्षुरुपकरणत्वमेवात्मातिशयद्योतनार्था । भाष्ये-ज्ञानिनो जानन्तीत्यभिधायेति । अत्र "तं वा एतं देवा आत्मानमुपासत इति देवशब्दार्थमभिप्रेत्य इत्युक्तम् ।

१.३.२०

अनुपास्यजीवविज्ञानेति - परमात्मन एव मोक्षधर्मोपासनकर्मतया जीवोपासनस्य क्वोपयोग इति भावः । एवमुत्तरत्रापि ज्ञान-पदमुपासनपरं द्रष्टव्यम् । ननु तर्हीति - विशेषणतया जीवोपासनविधानादेव जीवस्योपास्यत्वे वक्तव्ये प्राप्यान्तर्भावरूपयुक्तिबला-दुपास्यत्वकथनं किमर्थमित्यर्थः । उच्यत इति - सूत्रकृता तथा प्रतिपादितत्वात् सैव रीतिर्भाष्यकृतानुसृतेति भावः । "आत्मेति तूपगच्छन्तिग्राहयन्ति च' इतिसूत्रस्यायमर्थः, परमात्मनमुपास्यमात्मत्वेनोपगच्छन्ति पूर्वे उपासितारः शास्त्राणि च तथैव ग्राह- यन्तीति । व्यतिरेकस्तद्भावभावित्वादिति - तत्र ह्यात्मेति तूपगच्छन्तीत्यधिकरणसिद्धं जीवोपास्यत्वमङ्गीकृत्य किं कर्तृत्वादि-विशिष्टं सांसारिकं स्वरूपमुपास्यम्, उत तद्व्यतिरेको वा ? इति विशये कर्तृत्वादिविशिष्टमेव रूपमनुसन्धेयम्, शरीरे वर्तमानस्यो-पासितुरात्मनस्तथाभावादित्येके मन्यन्ते इति । "एक आत्मनश्शरीरे भावात्' इति सूत्रेण पूवर्पक्षं

कृत्वा सांसारिकरूपव्यतिरेक एवानुसन्धेयः, तथासत्येव तत्क्रतुन्यायेन
तादृशात्मस्वरूपरूपफलप्राप्तेर्भावित्वादि "व्यतिरेकस्तद्भावभावित्वात्' इतिसूत्रेण सिद्धा-न्तितमित्यर्थः । अङ्गिनः फलमेवेति - ननु प्रजापतिविद्यास्तदङ्गत्वे दहरब्रह्मविद्याधिकृतायैवोपदेष्टव्या स्यात् उपकोसलविद्याङ्ग-

इति चेत्, तत्र यदुत्तरं वक्तव्यं तत्पूर्वमेवोक्तम् "निचाय्यत्वादेवम्' इत्यनेन । अतो दहराकाशोऽनाघ्राताविद्याद्यशेषदोषगन्धस्स्वाभाविकनिरतिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रकृत्यपरिमितोदारगुणसागरः पुरुषोत्तम एव । प्रजापतिवाक्यनिर्दिष्टस्तु "घ्नन्ति त्वेवैनं विच्छादयन्ति' इत्येवमादिभिरवगतकर्मनिमित्तदेहपरिग्रहः पश्चात्परञ्ज्योतिरुपसम्पद्याविर्भूतापहतपाप्मत्वादिगुणस्वस्वरूप इति न दहराकाशः ।। इतश्चैतदेवम् -

1.3.21B

भूताग्निविद्यावत् प्रकृते च दहरब्रह्मविद्याविधुरायेन्द्रायोपदिश्यमानेयं विद्या न ब्रह्मविद्याङ्गं भवितुमर्हतीति चेन्न, प्रजापतिवाक्यस्य "एष सम्प्रसादः' इति दहरविद्यावाक्यान्तगर्तसम्प्रसदशब्दार्थशोधनार्थं प्रवृत्ततया तदेकवाक्यत्वेन तादर्थ्ये सिद्धे इन्द्रस्यापि दहरविद्या पश्चादुपदिष्टेत्येवावगम्यत इति न कश्चिद्दोषः । दहर उत्तरेभ्य इति सूत्रार्थमभिप्रयन्नाह - आकाशोपमानत्वेत्यादिना-गुणाष्टकेत्य-न्तेन । गतिशब्दाभ्यामितिसूत्रार्थमभिप्रयन्नाह - गतिशब्देति । धृतेश्चेतिसूत्रार्थमभिप्रयन्नाह - विधरणत्वेति । अन्यार्थश्च परामर्श इतिसूत्रार्थमभिप्रयन्नाह - फलविशेषेति । आकाशोपमानादिः फलविशेषान्तो द्वन्द्वः, एतावदर्थपरं यन्महावाक्यं तत्स्वारस्यदर्शना-दित्यर्थः । ननु माभूदर्भकौकस्त्वादित्यतो गतार्थत्वम्, अथाप्युपक्रममात्रस्य महावाक्यस्वारस्यबाध्यत्वं प्राणस्तथानुगमादित्यत्रैव सिद्धमिति तेन गतार्थता स्यादेवेत्याशङ्कयाह - उपसंहारे जीवपरामर्शादिति । ननु यद्युपसंहारे जीवपरामर्शे सत्यपि प्रक्रमस्थस्य महावाक्यस्वारस्येन बाधः, तर्हि प्राणस्तथानुगमादित्यधिकरणपूर्वपक्षो दण्डापूपन्यायहतः स्यादिति चेन्न; प्रक्रमश्रुतजीवमुख्यप्रा-णलिङ्गानां दहरत्वादिवदनन्यथासिद्धतया अनेनापि तस्य गतार्थत्वाभावादिति भावः । अर्भकौकस्त्वादित्यपेक्षया प्रकारान्तरेणा-धिकाशङ्कापरिहारौ सिंहावलोकितकेन दर्शयति - यद्वा इह वाक्यशेषेति । अधिक्यमेव दर्शयति - नहि शाण्डिल्यविद्यायामिति ।

१.३.२२

अतथाभूतस्येति - नटस्य राकाद्यनुकारित्ववन्न भवतीत्यर्थः । ननु दहराकाशो जीव इति वदन्तं प्रति दहराकाशो न जीवः, जीवस्य दहराकाशानुकर्तृत्वादित्युक्तिर्न सम्भवति, जीवस्य दहराकर्तृत्वे प्रमाणाभावात् । नच यदा पश्य इति वाक्यात्तदनुकारसिद्धिः, तावता जीवस्य परमात्मानुकर्तृत्वेपि दहराकर्तृत्वसिद्धेः । नहि दहरस्य परमात्मत्वमद्यापि सम्प्रतिपन्नम्; तथात्वे विवादपर्यवसानादिति चेद्भ्रान्तोसि, नह्यन्यस्मिन् सूत्रे जीवस्य दहरानुकर्तृत्वं हेतूक्रियते, येन तदसिद्धिमाशङ्कयेत; अपितु "यदा पश्यः पश्यते रुक्मवर्णम्' इति श्रुतौ जीवस्य परमात्मोपासनायत्ततदनुकारश्रवणान्न नित्याविर्भूतगुणकत्वम्, परस्य तु नित्याविर्भूतगुणकत्वमिति, स एव दहरवाक्ये परामर्शार्ह इति । "उत्तराच्चेदाविर्भूतस्वरूपस्तु' इतिसूत्रार्थ एव स्थिरीक्रियते, अत एव श्रुतप्रकाशिकायाम् "एवमुपक्रमो-पसंहारनिर्वाहः प्रमाणान्तरेण परमात्मत्मनोरपहतपाप्मत्वादीनां स्वाभाविकत्वास्वाभाविकत्वे सिद्धे ह्युपपद्यते । अन्यथा "अनु-क्तमन्यतो' ग्राह्यम् इति न्यायाद्दहरवाक्येपि मुक्तावस्थस्य गुणाष्टकान्वयो विवक्षितस्यादितिशङ्कायामाहेति' इदं सूत्रमवतारितम् ।।

परैः कृतमधिकरणभेदमिति - "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इति मुण्डकवाक्यप्रतिपाद्यो न परमात्मा, सूर्याद्यभिभावकत्वदर्शनात्, सूर्यादितेजसां तदनुभानश्रवणाच्च तेजोविशेष एव, तेज एव हि तेजोन्तरमभिभवतीति दृष्टम् । तथानुभानं च सजातीयस्यैवोपपद्यते; अत एव हि "वराहं गावोऽनुधा-वन्ति' इत्यत्र गवां

स्वसदृशसूकरानुधावनं युज्यते, न तु वायसानुधावनमित्युक्तमिति पूर्वपक्षं कृत्वा तमेव भान्तमित्यत्र किमलौकिकं तेजः कल्पयित्वा तदनुभानं सूर्यादीनां परिकल्प्यम्, उत भारूपसत्यसङ्कल्प इति प्रसिद्धब्रह्मणो भानेन सूर्यादीनामनुभानं कल्प्यम् ? इति विशये श्रुतिप्रसिद्धग्रहणसम्भवे अप्रसिद्धतेजोन्तरकल्पनाया अयुक्तत्वात् ब्रह्मैव प्रतिपाद्यते, अनुकृतिरनुभानम् श्रुतिप्रतीकोपा-दनरूपस्सौत्रषष्ठयन्ततच्छब्दश्च "तस्य भासा सर्वमिदं विभाति' इति श्लोकचतुर्थपादं सूचयति । ततश्च सौत्रतच्छब्दसूचितश्लोकचतुर्थ-

१.३.२२

पादप्रतिपाद्य सर्वप्रपञ्चभासकत्वं चैतन्यप्रभया स्वाध्यस्तसमस्तप्रपञ्चभासके परमात्मन्येवोपपद्यत इति स एव प्रतिपाद्यः । "न तत्र सूर्यो भाती'त्यस्य च "न तद्भासयते सूयश्शशाङ्को नापि पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं मम' । इति स्मृत्यनुसारात् न तद्भासयतीत्यर्थ इति परैर्व्याख्यातमिति भावः । अनुशब्दस्य करणमिति - तमेव भान्तमनुभातीति श्रुतावनुशब्दस्योच्चारणादित्यर्थः । अन्यत्सर्वं परमतवदेव बोध्यम् "स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रस्यायमर्थः,-इह शास्त्रे शब्दस्य स्वमेव रूपं ग्राह्यम्, शब्दसंज्ञां विना । ततश्च "अग्नेर्ढगि'ति विधीयमानो ढक्प्रत्ययोऽग्निशब्दादेव भवति, न पावकशब्दात् शब्दसंज्ञायान्तु संज्ञिनोऽथर्स्य ग्रहणम् न स्वरूपस्य यथासिद्धिवृद्धिरित्यादौ न वृद्धिशब्दस्य ग्रहणम् किन्तु संज्ञिन एवेति । दूषणद्वयं सर्वसाधारणमिति - अधिकरणभेद-वादिकुदृष्टित्रयसाधारणमित्यर्थः । यद्यपि मृषावादिमते चशब्दस्य षष्ठयन्ततच्छब्दसूचितहेत्वन्तरसमुच्चयपरत्वं शक्यते वक्तुम्, तथापि तन्मते सौत्रतच्छब्दस्यान्वयो दुर्घटः । तथा न तत्र सूर्यो भातीत्यत्र नतद्भासयत इत्यर्थपरत्वं च क्लिष्टम् । किञ्च तन्मते देवदत्तं गच्छन्तं यज्ञदत्तोऽनुगच्छतीत्यत्र तु गमनद्वयवदिह चैतन्यभानव्यतिरेकेण प्रपञ्चस्य भानाभावेनानुभातीति श्रुत्यर्थोप्ययुक्तः । तथा तस्य भासेति षष्ठयर्थव्यतिरेकोपि दुर्घटः, तद्व्यतिरेकेण भासोऽभावात् । किञ्च तद्भानसाध्यभानान्तराभावेन तस्य भासा भातीति निर्देशश्चानुपपन्न इत्यादिदूषणं स्पष्टम् । सिद्धान्तितमिति - यादवप्रकाशीयैरिति शेषः शङ्कते । परमाकाश एवेति - दूषयति - एवञ्च सतीति । किन्तु बुद्धिस्थविषयमिति - तेन रक्तं रागात् तस्यापत्यं तद्वति तत्प्रकारत्वमित्यादिवदिति भावः । ।। इति दहराधिकरणम् ।।

१.३.२३

भगवत इत्युक्तमिति - भगवतोपि सम्भवतीत्यर्थः । भगवत्यल्पत्वसम्भवमात्रपरत्वात्तस्येति द्रष्टव्यम् । परमात्मव्यतिरिक्तस्य दृश्यत इतीति - जीवस्यैव दृश्यत इत्यर्थः । ततश्चाङ्गुष्ठमात्रत्वरूपपरिमाणविशेषस्य दहरत्ववत्परमात्मन्यसम्भवादङ्गुष्ठप्रमितो जीवो भवत्विति शङ्कया सङ्गतिरिति भावः । भाष्ये-न ततो विजुगुप्सत इति । भूतभव्येशानत्वादेव ईशितव्यविषये हेयेपि जुगुप्सा नास्तीत्यर्थः । स एवाद्य स उ श्वः- सार्वकालिक इत्यर्थः । प्रवृहेदिति पृथक्कुर्यादित्यर्थः । शरीरभूतात्स्वस्माद्विवित्तं जानीयादित्यर्थः । शुक्रम्- भारूपमित्यर्थः । न तु स्थानविशेष इति - स्थानविशेषरूपोपाधिश्रवणे हि महत्यपि परमात्मन्यल्पपरिमाणोक्तिर्युज्यते, स्थानविशेषरूपोपाधिश्रवणाभावेनौपाधिकपरिच्छेदोक्तिरिति वक्तुमशक्यत्वाज्जीव एवेत्युक्तमित्यर्थः । युक्तं परमात्मनः पूर्वाधि-करणोक्तं हृत्पुण्डरीकस्थानत्वम्, परमात्मस्थानभेदनिर्देशात्; तद्धि तस्योपलब्धिस्थानम्, सालग्राम इव कमलनाभस्य भगवतः । न चेह तथाङ्गुष्ठमात्राश्रुतौ स्थानभेदो निर्दिष्टः, परिमाणमात्रनिर्देशात् । न च मध्य आत्मनीत्यत्रापि स्थानभेदोऽवगम्यते, आत्मशब्दो ह्ययं स्वभाववचनो वा जीववचनो वा ब्रह्मवचनो वा स्यात् तत्र स्वभावस्य स्वभवित्रधीननिरूपणतया स्वस्य प्रभवितुरनिर्देशात् । न ज्ञायते कस्य मध्यमिति न जीवपरयोरस्ति मध्यमञ्जसेति नैष स्थाननिर्देशो विस्पष्टः, स्पष्टस्तु परिमाणनिर्देशः, परिमाणभेदश्च परस्मिन्न सम्भवतीति जीवात्मैवाङ्गुष्ठमात्र इति वाचस्पत्युक्तेरिति भावः । न चोपासनमिति । ननु परसिद्धान्ते अस्य वाक्यस्य जीवस्य

परमात्मत्वोपदेशपरत्वेनोपासनविध्यनभ्युपगमेपि पूवर्पक्षे उपासनविधिर्न प्रत्याख्यातः, अत एव पूर्वपक्षोपसंहारे जीवात्मैवोपास्य इति वाचस्पतिनोक्तम्, ईशानोऽस्मीति ध्यानं फलतीत्यानन्दगिरिणाप्युक्तमिति चेत् अत्र केचित्-न चोपासनमितिग्रन्थः पूर्वपक्ष-मित्यनन्तरं केचिदाहुरित्यस्मात्पूर्वं निवेशनीयः, ततश्च जीवत्वं शङ्कयत इति पूर्वपक्षं सिद्धान्ते उपासनं नास्तीति चाहुरित्यर्थ इति वदन्ति । भूतभव्यस्येशान इतिवाक्यमिति - वाक्यार्थीभूतं लिङ्गमित्यर्थः । ततश्चोपसंहारस्थमीशानत्वमुपक्रमस्थमितत्वलिङ्गा-दुर्बलमित्यर्थः । "त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छं यावध्यस्मिंश्छरीरे प्राणो वसतीत्यादौ वाक्यप्रति-पाद्यजीवमुख्यप्राणलिङ्गवद्भूतभव्येशितृत्वस्यापि लिङ्गत्वादिति द्रष्टव्यम् । नन्वीशानश्रुतिर्न ब्रह्मणोऽभिधानश्रुतिः, भूतभव्यस्ये-त्यैश्वर्यप्रतिसम्बन्ध्युपादानेन तस्य भूतभव्येशितृत्वरूपकेवलयौगिकार्थपरत्वात् योगरूढिमतां शब्दानां यौगिकार्थप्रतिसम्बन्ध्यु- पादाने रूढ्यनुन्मेषात्, अत एव "पद्मानि यस्याग्र सरोरुहाणि प्रबोधयत्यूध्वर्मुखैर्मयूखैः' इतिश्लोके सरःप्रतिसम्बन्ध्यग्रोपादानवति सरोरुहशब्दे स्थितेपि पद्मशब्दप्रयोगः, इतरथा पौनरुक्तयप्रसङ्गात्, यौगिकार्थप्रतिसम्बन्ध्युपादानेपि रूढ्यन्मेषाङ्गीकारे "अमृतत्व-स्येशानः' इत्यादावपि रूढ्या देवतान्तरप्रसङ्गाच्चेत्याद्यस्वरसादाह - यद्वा पूर्वपक्षीति । ततश्च सम्भवदन्यथासिद्धिकाङ्गुष्ठमात्र-लिङ्गादनन्यथासिद्धं चरमश्रुतमसङ्कुचितसर्वेशानत्वलिङ्गमेव बलीय इति सिद्धान्तो युक्त इत्यर्थः । ननु वर्तमानत्वादिति पञ्चम्यन्त-

१.३.२४

पदाध्याहारीेन तस्या पेक्षयेत्यन्वयसिध्यर्थं षष्ठयन्ततच्छब्दोप्यध्याहार्यः, नचैतद्युक्तमनध्याहारेणोपपत्तेरित्यस्वरसादाह - यद्वेति । को भेदः परमात्मपरिग्रह इति - अत्र केचित्, शब्दादेवेति परमात्मत्वसाधकयुक्तेः ग्रन्थकृतैवोपन्यस्तत्वात्को भेद इति वक्तुम- युक्तम् । किञ्चाङ्गुष्ठमात्रत्वस्वारस्यस्य परमात्मत्वसाधकतया प्रागुपन्यस्तत्वात्, वस्तुतस्तस्य परमात्मत्वासाधकतया साधकत्व-सम्भावनाया अप्यसम्भवाच्च अङ्गुष्ठमात्रत्वस्वारस्याभावे को भेद इति निदेशोऽप्ययुक्तः, अतः पर्वपक्षयुक्तेरन्यथासिद्धिमाहेत्ये-वावतारिका जीवस्यापीतिभाष्यस्य देयेति वदन्ति । भाष्ये-हृदयान्तर्वर्तित्वात्तदपेक्षमेवेति । ननु महतः परमात्मना अल्पपरिमा-णोपाधिम्बन्धेन घटाकाशस्येवाल्पपरिमाणत्वनिर्देशोपपत्तावपि अतिसूक्ष्मस्य जीवस्याधिकपरिमाणहृदयसम्बन्धेन कथमङ्गुष्ठ-मात्रत्वव्यवहारः ? नहि घटान्तस्थस्य वदरफलस्य घटपरिमाणत्वव्यवहारोस्ति, नवा घटान्तरस्थस्य परमाणोराकाशस्येव घट-परिमाणत्वव्यवहारोस्ति, अत एव न पूर्वपक्षहेतुमपि पश्याम इति चेन्न; अत्र मात्रशब्देन "प्रमाणे द्वयस'दित्यादिना मात्रच्प्रत्ययः । अपि तु क्षीरमात्रं पिबेत्यादाविवोत्तरपदत्वनियतं प्रातिपदिकमितरव्यवच्छेदकार्थम्, ततश्चाङ्गुष्ठपरिमाणाधिकपरिमाणव्यवच्छेदे आराग्रमात्रे जीवे सम्भवति, न परमात्मनीति पूर्वपक्षः हृदयगुहावच्छिन्ने परमात्मन्यपि सम्भवतीति सिद्धान्त इति भाष्याभिप्रायः । वस्तुमात्रैक्यपरत्व इति - असङ्कुचितसकलभूतभविष्यद्वर्तमानवस्तुनियन्तृत्वप्राप्तसकलान्तरवस्थानलम्धव्यापकभावब्रह्मस्वरूप-मात्रपरत्व इत्यर्थः ।।

१.३.२५

प्रसङ्गात्सङ्गतिमाहेति - प्रसङ्गादागतां सङ्गतिमाहेत्यर्थः । अर्थित्वाभावस्याप्युपलक्षणमिति - यद्यप्यत एव तासामर्थित्वमपि न सम्भवतीति भाष्य एवोत्तरत्र स्पष्टत्वान्नेह वक्तव्यम्, तथापि बुद्धिसौकर्यायात्र प्रदर्शितमिति ध्येयम् । प्रकाशनस्तुत्योरन्यपर-त्वादिति - प्रकाशनस्तुतिपरत्वादित्यर्थः । देवतैश्वर्यस्यापेक्षित्वादिति - विग्रहहविस्स्वीकरणभुक्तितृप्तिफलप्रदत्वलक्षणैश्वर्यस्या-पेक्षितत्वादित्यर्थः । तत्रैव कल्प इति - यस्मिन् कल्पे यानि कर्माण्यनुष्ठितानि तेषां तत्रैव कल्पे फलभोग इति नियमाभावादित्यर्थः ।

१.३.२५

ननु सृष्टिप्रकरणस्य सर्वस्यापि कारणं तु ध्येयः'
इतिवाक्यप्रतिपन्नध्येयोपलक्षणकारणत्वप्रपञ्चनात्मकत्वनोपासनविधिशेषतया न स्वार्थे तात्पर्यमित्याशङ्कमानं प्रत्युपासनविधिशेषत्वमङ्युपेत्याप्याह - उपासनदशायामिति । देवादिचतुर्विधभूतग्रामलक्षण-जगत्कारणत्वविशिष्टस्योपास्यतया प्राप्यतया चोपास्यविशेषणतया प्राप्यविशेषणतया च देवताविग्रहादिकं सिध्द्यतीत्यर्थः ।

१.३.२५

ननु विध्यपेक्षिततया सिद्धवस्तुनि तात्पर्यसम्भवस्य त्रिष्वधिकरणेषु प्रतिपादनात्पौनरुक्तयमाशङ्कय विध्यपेक्षिततया सिद्धिप्र- कारभेदं दर्शयति - तत्र प्रथमसूत्र इत्यादिना । स्तावकत्वप्रकाशकत्वहेतुतयेति - स्तुत्यनुष्ठेयार्थस्मृतिहेतुतया विग्रहादिसि-द्धिप्रकारश्चोत्तरत्र स्पष्टः । भाष्ये-स्तुत्याद्युपयोगित्वादित्यनेनान्वयमुक्त्वा व्यतिरेकमाह- तेन विना स्तुत्याद्यनुपपत्तेरिति । व्यतिरेकेणोपपादयतीति - इदञ्च गुणानामभावे स्तुतित्वमेव हीयेतेति भाष्यस्य गुणकथनाभावे स्तुतित्वमेव हीयेतेत्यर्थ इति मत्वोक्तमिति द्रष्टव्यम् । शेषभूतस्येति - अर्थवादस्य विधिशेषभूतस्य विध्यपेक्षितप्ररोचनाजनकत्वाभावे शेषत्वमेव हीयेतेत्यर्थः । द्रव्यदेवते हि कर्मनिरूपिकेति । अतश्च "यजामह इन्द्रं वज्रदक्षिणम्' इत्यादिमन्त्रसाध्यदेवताविग्रहप्रकाशनस्य अनेन मन्त्रेण यागं कुर्यादित्येवंरूपेण यागशेषत्वबोधकविधिनापेक्षितत्वाद्धयानविधिनापेक्षितत्वात्तत्र तात्पर्यमस्तीति भाष्याभिप्राय इति भावः । शङ्कते - प्रतीतेरिति । स्वरूपातिरिक्तेति - शब्दस्वरूपातिरिक्तेत्यर्थः । "दध्नष्ठत्' उदश्चिनोऽन्यतरस्याम्' "अग्नेर्ढक्' इत्यादौ

१.३.२५

शब्दस्वरूपस्यैव ग्रहणेन व्यभिचारस्यात्, तद्वारणायाह - अपारिभाषिकत्वे सतीति । "स्वं रूपं शब्दस्याशब्दसंज्ञा' इति स्व-रूपग्रहणस्य व्याकरणे परिभाषितत्वादिति भावः । एवमनुमानत्रयेण शब्दस्वरूपातिरिक्तं देवतास्वरूपं साधितम् अथ देवता-विग्रहादेः प्रामाणिकत्वं साधयति - विमता मन्त्रार्तवादा इत्यादिना । आपो वै शान्ता इति - तेजोगतक्रौर्याभावरूपं शान्त- त्वमपां प्रमाणान्तरसिद्धमिति साधकमानगोचरत्वान्न स्वार्थे तात्पर्यमिति भावः । अर्थवादानामविरुद्धस्थलेपि लाक्षणिकत्वं परोक्तं दूषयितुमाह - विमतानीत्यादिना । वाक्यत्वसिद्धमिति - तथाचासिद्धो हेतुरिति भावः । न च प्रवर्तकत्वस्योपाधित्वेन विव-क्षितत्वादिति भावः । साधिकारेति - फलसम्बन्धबोधकेत्यर्थः । तस्यापीति - प्रवर्तकवाक्यस्यापीत्यर्थः । वाशब्दनिबन्धनां

१.३.२५

प्ररोचनप्रकाशनयोरेककर्तृकत्वप्रतिभां व्युदस्यति - प्ररोचयन्तीत्यादिना । गुणान् लक्षयित्वा कुर्वन्तीत्येतद्व्याचष्टे - प्ररोचन- प्रकाशने कुर्वन्तीत्यर्थ इति । ननु प्ररोचनायाः विध्यपेक्षितत्वात्तस्याश्च गुणसत्तामन्तरेणासम्भवात्, तत्रापि तात्पर्यं सिद्धमेवेति प्रागेवोक्तम् । अतश्च ननु विध्यपेक्षितार्थे हीत्यादिशङ्काया एवानवकाशग्रस्ततया कर्मविधेश्चेत्यादिभाष्यग्रन्थो मुधेत्याशङ्कय-प्रकारान्तरेण प्रयोजनमाह- फलमत उपपत्तेरित्यधिकरणार्थ इति । रक्तः पटोभवतीतिवदिति - यद्यपि देवतैश्चर्यस्यापेक्षित-त्वादुत्थिताकाङ्क्षत्वमेव गामनयेत्यादिवद्वक्तुं शक्यम् तथापि उत्थिताकाङ्क्षाया वा उत्थापिताकाङ्क्षाया वा एकवाक्यतयान्वयो-ऽर्थवादानामिति तात्पर्यम् । अस्य स्मरणस्य तन्मूलत्वोपपत्तेरिति - ननु मन्त्रार्थवादविधुरे कर्मणि मन्त्रार्थवादानां देवताप्रीति-द्वारत्वावगमकत्वाभावात् यागमात्रस्य देवताप्रीतिद्वारत्वावगमिकायां शाब्दिकस्मृतौ कथं यागविशेषे देवताप्रीतिद्वारत्वावगमक-मन्त्रार्थवादमूलकत्वम् ननु क्वचित्कर्मणि मन्त्रार्तवादबलाद्देवताप्रीतिद्वारकत्वेऽवगते न्यायतौल्यादन्यत्रापीति तथेति शाब्दिक-स्मृतेर्मन्त्रार्थवादमूलकत्वमिति चेत् हन्तैवं सति भाष्ये स एव न्याय उपन्यस्ताम् किमनेन तन्न्यायोपजीविशाब्दिकस्मृत्युपन्यासेनेति चेत् इतिहासपुराणमन्वादिस्मृतिवत्पाणिनिस्मृतेरपि तत्समानार्थश्रुतिमूलत्वसम्भवादिति भावः । कल्प्यापूर्वपक्षं वाच्यापूर्वपक्षञ्च प्रतिक्षिपति - विमतो विधिप्रत्यय इति ।

कृतिसाध्येति - कृतिसाध्यां चेतनप्रीतिमवगमयद्यद्वाक्यं तत्स्थविधिप्रत्ययत्वादित्यर्थः। यजिधातोश्चेतनप्रीतिसाधनत्वान्न हेत्वसिद्धिः । ननु "यजि देवपूजायाम्' इतिवद्धोमे तादृशस्मृत्यभावात् जुहुयादित्यादौ भागासि-द्धिरित्याशङ्कय तस्य पक्षत्वमेव नेत्याह - विमतशब्देनेति । यद्यपि साध्यविमतिस्तत्रापि समाना, यागहोमयोरविशेषात्; तथापि यागगतविमतिविशेषः पक्षतावच्छेदकः, तथापि न हेत्वसिद्धिरिति भावः । ननु तर्हि होमादिष्वपूर्वनैरपेक्ष्यं केन सिध्द्येदित्यत्राह - जुहुयादित्यादिष्विति । विध्युद्देशग्रहणमिति - विधिवाक्यग्रहणमित्यर्थः । प्रसङ्गादनुप्रविष्टानामिति - तस्यापि "वध्यं प्रपन्नं प्रति

१.३.२५

प्रयच्छन्ति धन्वन्निव प्रपा असि' इत्यादीनामित्यर्थः । सङ्कीणर्शब्देनेति - भाष्यस्थसङ्कीर्णशब्दस्य विप्रकीर्णत्वमर्थ इति भावः । उच्चारणेन विनेति - घट इत्यत्र घटस्योच्चारणानन्तरोच्चारणविषयत्वमेवानुपूर्वीति भावः । उच्चारणयोग्यतास्तीति चेदित्येतद्ग्रन्थात्पूर्वं कदाप्यनुच्चार्यमाणानां मूलत्वासम्भवादिति ग्रन्थोऽपेक्षितः, इतरथा किं वर्णमात्रगता उतानुपूर्वी विशेष विशिष्टवर्णगतेत्याद्युत्तर-विकल्पग्रन्थस्यास्य च न सामञ्जस्य पश्यामः । उच्चारणयोग्यताऽस्तीति चेदिति - ततश्च आनुपूर्वी विनापि उच्चारणयोगतासत्त्वा-न्मूलत्वं सम्भवेदिति भावः । वर्णानामनादीतीति - ततश्चानाद्यानुपूर्वीविशेषोच्चारणयोग्यताकत्वमेव वेदत्वमिति भावः । तच्चै-त्यवन्दनेति - योग्यताया अनादित्वादिति भावः । कर्तृसामान्याभावादिति - वैदिकत्वेन प्रसिद्धैरग्निहोत्रादिभिस्समानकर्तृक-व्यताबोधकस्मृतिसमानकर्तृकत्वाभावादिति यावत् । स्वावगतार्थेति - स्वशब्देन स्मृतिरुच्यते । अर्थविशेषेणाविच्छिन्नेति ।

१.३.२५

अग्निहोत्रादिसमानकर्तृकमन्वादिस्मृत्यवगतार्थप्रतिपादनानुगुणानुपूर्वीविशेषविशिष्टानामेव वेदत्वमिति चेदित्यर्थः । मन्वादि-वाक्यस्यापीति - स्मृतिः स्मृत्यर्थानुभवजनकवेदमूलेतिसाधने मन्वादिवाक्यस्य वृद्धमनुवाक्यमूलकत्वेनापि साध्यसिद्धेरर्थान्तरम्, त्वदुक्तरीत्या वृद्धमनुवाक्यस्यापि वेदत्वसम्भवात् अन्ततो गत्वा स्मृतिमात्रस्य वेदत्वेन मूलभूतवेदानुमानासम्भवाच्चेति भावः । प्राचीन एव पक्ष इति - कतिपयदेशेष्वध्येतृत्वविरह इति पक्ष इत्यर्थः । सङ्कीणर्वेदमूलकत्वं युक्तमिति - विप्रकीर्णवेदमूलकत्वं युकक्तमित्यर्थः । इदमर्थसिद्धमिति - "तदस्मै देवा राधन्ताम्' इत्यादिष्वित्यत्र वाक्यादेव विध्यपेक्षितं सर्वमित्यत्र च सिद्धवन्नि-र्देशानुपपत्तिकल्पितविग्रहादिप्रतिपादकश्रुतिवाक्यस्य विप्रकीणर्त्वं प्रक्षान्तरे दोषजातं च विवक्षितमिति भावः । यद्वा इदमिति

१.३.२५

वक्ष्यमाणं यदपीत्यादिकं गृह्यत इति द्रष्टव्यम् । न ह्यत्रैवर्णिकानामिति - वैदिककर्ममात्रे "वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यम्' इति त्रैवर्णिकमात्राधिकारितया विहितोपनयनाङ्गकाध्ययनगृहीतस्वाध्यायजन्यज्ञानस्यैवाङ्गत्वात् ब्रह्मविद्यायाश्च वैदिकत्वात्तदभावे ब्रह्मविद्या न सम्भवतीति भावः । अग्निनिष्पत्त्यनुपपत्तेरिति - इदमुपलक्षणम्, अध्ययनगृहीतस्वाध्यायजन्य-ज्ञानाभावादित्यपि द्रष्टव्यम् । अग्निनिष्पत्तिमेवोपपादयति - वसन्ते ब्राह्मण इत्यादिना । अनधिकारोऽधिकरणसिद्ध इति - पूर्व-तन्त्रे षष्ठे-"अञ्यार्षेयस्य हानं स्यात्' इत्यधिकरणे दर्शपूर्णमासयोः श्रूयते - "आर्षेयं वृणीते एकं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरो वृणीते न पञ्चातिवृणीते' इति । तत्रार्षेयो नाम स्वकीय ऋषिः, ततश्च यजमानस्य यो गोत्रस्थ ऋषिः तद्विशिष्टतया यो निर्देशः अत्रिवत् अर्चनानसवत् श्यावाश्ववत् भरद्वाजवत् बृहस्पतिवत् अङ्गिरोवदयं यजमानो यजते इत्येवंरूपनिर्देशः स आर्षेयवरणश- ब्दार्थः । तत्र एकमृषिं वृणीते द्वावृषी वृणीते त्रीनृषीन्वृणीत इति वाक्यत्रयेण त्रीणि वरणानि विहितानि, ततश्च वरणत्रयस्याप्यङ्गतया एकार्षेयद्व्यार्षेययोस्त्र्यार्षेयवरणाभावेपि

एकद्व्यार्षेयवरणसम्भवादधिकार इति पूर्वपक्षं कृत्वा अस्मिन् वाक्ये विधित्रयाभ्युपगमे वाक्यभेदप्रसङ्गात् त्रीन्वृणीत इत्येव विधिः,त्रिषु च एकस्य द्वयोरप्यन्तर्भावात् एकं वृणीते द्वौ वृणीते इत्यनुवादः, ततश्च त्र्यार्षेय-वरणमेवाङ्गम् तद्रहितानामार्षेयवरणवत्सु कर्मसु नाधिकार इति स्थितमित्यर्थः । ननु उपनयनाङ्गकाध्ययनजन्यज्ञानाभावेपि देवादी-नामधिकारे शूद्रस्याप्यधिकारस्यादित्याशयमुद्भाट्य निराकरोति - न चोपानयनविरहादिति । सामर्थ्याभावानुगृहीतेति - अयं भावः,
त्रैवर्णिकाधिकारिकोपनयनाङ्गकाध्ययनलब्धविद्यालक्षणसामर्थ्याभावादनधिकार इति पूर्वमीमांसकैरपशूद्राधिकरणे यदुपन्यस्तं तदभ्युच्चयमात्रम्; प्रधानयुक्तिस्तु तस्माच्छूद्रो यज्ञेऽनवकप्त इत्याहत्य यज्ञादिप्रतिषेध एव । तथा हि; वर्णविशेषादिग्रहणमन्तरेणा-विशेषप्रवृत्ता वैदिककर्मविधयः,
कर्मानुष्ठानाथर्मनुष्ठेयार्थज्ञानसम्पन्नानधिकारिणोपेक्षमाणास्स्वत एवाध्ययनविधिलब्धानुष्ठेयार्थज्ञानान् द्विजातानासाद्य निवृण्वन्ति, नतु फलकामत्वाविशेषेपि शूद्रस्याधिकारित्वेन सङ्ग्रहार्थमनुष्ठेयार्थज्ञानमाक्षिपतीति हि शूद्रस्यान-धिकारे युक्तिर्वक्तव्या । न सा युज्यते; अध्ययनविधेरर्थज्ञानपर्यन्तत्वे हि विध्यन्तरलब्धार्थज्ञानं त्रैवर्णिकेषु सिद्धमिति युज्यते वक्तुम्, न चैतदस्ति; अध्ययनविधेरक्षरग्रहणमात्रविश्रान्ततया त्रैवर्णिकेष्वर्थज्ञानस्य
विध्यन्तरसिद्धत्वाभावेनाक्षेप्यत्वाविशेषाच्छूद्रेष्वपि तदाक्षेपस्सम्भवत्येव अस्तु वायमध्ययनविधिरथर्ज्ञानभाव्यः, तथापि शूद्रस्यानिवार्योऽधिकारः । क्रतुविद्याविधिर्हि त्रैवर्णिकानां स्वशाखेतरशाखाविहिताङ्गगुणोपसंहाराय तत्तच्छाखाध्यायिभ्यस्तत्तदङ्गगुणज्ञानस्येव शूद्रस्यापि विद्याविधिभिस्तज्ज्ञानसेव शूद्र-स्यापि
विद्याविधिभिस्तज्ज्ञानस्याक्षेप्तुं शक्यत्वात् । अध्ययनविधिना ह्येकस्या एव शाखाया अध्ययनं विधीयते प्रतिव्यक्ति घट- त्वस्येव प्रतिशाखं स्वाध्यायत्वस्यापि परिसमाप्तत्वात् । ननु शूद्रस्य कर्मोपासनानुष्ठानापेक्षितं ज्ञानं कार्त्स्न्ेनापेक्षणीयतम् । त्रैवर्णिकानां स्वशास्वेतरशास्वाविहितगुणविषयस्तदेकदेश इति आक्षेपलाघवात् । क्रतुविद्याविधयस्त्रैवर्णिकानेवाधिकुर्युः, न शूद्रमिति चेत् एवं तर्हि यस्य कर्मणो यस्यां शाखायां भूयसामङ्गानां विधानं भूयस्त्वेनोभयश्रुतीतिन्यायेन प्रधानस्यापि विधानम्, शाखान्तरे

१.३.२५

तु किञ्चिदङ्गविधानम्, तत्र कर्मणि तच्छास्वाध्यायिनामेवाधिकारस्यात्, ज्ञानाक्षेपकलाघवात्, न तु शाखान्तराध्यायिनाम् । किञ्च यस्य कर्मणस्तदङ्गस्य वा कस्यचिदस्यां शाखायां विधानं नास्ति, किन्तु शाखान्तर एव साङ्गस्य तस्य विधानम्; तत्र कर्मणि तच्छाखाध्यायिनामधिकारो न स्यात् शूद्रवत्तेषां तदनुष्ठानोपयोगिज्ञानस्य कार्त्स्न्ेनापेक्षणीयत्वात् । सम्भवन्ति हि गुणफलविधिरूपाणि क्षुद्रकर्माणि शाकाविशेषेषु सर्वथैवानिरूपितानि । तस्मात्त्ैवर्णिकानामपि ज्ञानाक्षेपस्य सम्प्रतिपन्नत्वा-च्छूद्रस्याप्यनुष्ठानोपयोगिज्ञानाक्षेपसम्भवाद्वेदविद्भ्यो विज्ञाय विद्यानुष्ठानमुपपद्यते, अन्यथाऽध्ययनाभावेन शूद्रस्य विद्याप्रत्याध्याने मैत्रेयीप्रभृतीनां स्त्रीणां ब्रह्मविद्यावाप्तौ का गतिः ? नहि संवर्गविद्यागतशूद्रशब्दस्य क्षत्रिय इव मैत्रेयीशब्दानां पुरुषेषु वृत्तिस्सि-द्धान्तिनोपि कल्पयितुं शक्या । "अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः, मैत्रेयी कात्यायनी च' इत्यादिवाक्यान्तरविरोधात्; तस्मा-त्प्रतिषेधमलादेव शूद्रस्यानधिकार इति । वस्तुतस्तु देवादीनामपि जन्मान्तरीयोपनयनाङ्गकाध्ययनमूलज्ञानलक्षणं सामर्थ्यमप्य-स्त्येवेत्याह - प्राक्तनज्ञानाप्रमोषादिति । मनुष्यकर्तृकाधानस्यैवेति - यद्यपि आधाने त्र्यार्षेयवरणं नास्त्येव नचाधानेन साक्षात् त्र्यार्षेयवरणाभावेपि तदङ्गभूतेषु पवमानहविष्षु आतिदेशिकत्र्यार्षेयवरणमस्तीति वाच्यम्; गुणानां च परार्थवादित्यत्र पवमानह-विषामाधानार्थत्वाभावस्य साधितत्वात्, तथाप्यत्राधानशब्दोऽग्निसिध्द्यर्थकर्मपरः, ततश्च पवमानहविषामपि सङ्ग्रहात्तेषु च त्रया-र्षेयवरणसत्त्वान्न दोष इति द्रष्टव्यम् । देवानां दत्तमिति - स्पष्टतरमिति । नन्वेतादृशानितिहासपुराणदृष्टानर्थवादानालम्ब्य पूर्वमन्यथा प्रवृत्तो धर्मः इदानीमन्यथा प्रवर्तत इति धर्ममर्यादाविप्लवाङ्गीकारो न युक्तः । अन्यथा ह्येवमधर्ममर्यादापि विप्लुताङ्गीक्रियेत दृश्यते हि भारत एव पूर्वमनावृतानां स्त्रीणां श्वेतकेतुशापप्रभृति एकपत्नीत्वाचरणं प्रवृत्तमित्यादिरधर्मविप्लवार्थवादः-"अनावृता हि वर्णानां

सर्वेषामङ्गना भुवि । यथा गावस्थितास्तात स्वे स्वे वर्णे तथा प्रजाः । व्युच्चरन्त्याः पतिर्नार्या अद्यप्रभृति पातकम् । भ्रूणहत्या कृतं

१.३.२५

पापं भविष्यत्यसुखावहम्' इति । ननु श्वेतकेतूपाख्याने स्त्रीणां पूर्वमनावृतत्वे निर्धनेनोत्सवार्थं क्रियामाणायामाभरणप्रार्थनाया-मिवापत्नीकेन ब्राह्मणेनापत्यार्थं क्रियमाणायामुद्दालकपत्नीप्रार्थनायां तत्पुत्रस्य श्वेतकेतोः कोपो न स्यात् कोपश्च तत्रैव वर्णितः । "मातरं तां तदा दृष्ट्वा नीयमानां बलादिव । तपसा दीप्तवार्यो हि श्वेतकेतुर्न चक्षमे । सङ्गृह्य मातरं हस्ते श्वेतकेतुरभाषत । दुर्ब्राह्मण विमुञ्च त्वं मातरं मे पतिव्रताम्' इति । ततः स्त्रीणामेकपत्नीत्वव्रतनियमस्यातादित्वावगमान्नारीणां प्रागनावृतत्ववचनं तदाप्रभृ-त्येकपत्नीत्वव्यवस्थापकवचनं च कुन्तीमपत्यार्थं पुरुषान्तरे प्रवर्तयितुकामस्य पाण्डोस्खकल्पितार्थविषयं प्ररोचनामात्रपरमित्यव-सीयत इति चेत्, यज्ञाग्रहारोपाख्यानवचनजातमप्येवमित्यवधार्यताम्, अन्यथा हि तत्र बह्वसमञ्चसमापद्येत तथा हि तस्मिन् सत्रे दीक्षणीयायाम् अेग्नावैष्णवः पुराडाशो अग्निनानुष्ठितश्चेदग्नेर्भागो न स्यात्, अनुष्ठितश्चेत् विष्णोरिदानीं भागानुवृत्तिर्न स्यात्, उपसत्सु वैष्णवो यागः केनापि देवेनानुष्ठितश्चेत्तदीय एवेदानीं स्यात्, न तु वैष्णवः । नानुष्ठितश्चेत् क्रतुर्विकलस्स्यात्, उदवस्सा-नीयावसानाः सर्वेपि पदार्थास्सर्वैरपि देवर्षिभिरनुष्ठिताश्चेत् सर्वेषु हविष्षु सर्वेपि भागिनस्स्युः । कैश्चित्केचित्कृताश्चेत्सर्वेषामपि स क्रतुविर्कल इति ततो विष्णोः प्रीतिः ततो देवानां वरलाभश्च न स्यात् । किञ्च पूर्वं वैष्णवः क्रतुः कलाविशेषे नानादैवत्यो जात इत्य-भ्युपगमे तस्मिन्नुपदेशातिदेशाभ्यां प्रवृत्तेषु विधिषु श्रुतानां देवतासमर्पकपदानां पूर्वं विष्णुवाचित्वमिदानीं नानादेवतावाचित्वमिति क्वाप्यदृष्टचरं द्विविधार्थवत्त्वं प्रसज्येत एतेनेन्द्रादयो देवा विष्णुं यजन्तीति न यष्ट्टयष्टव्यभावाविरोधः । मनुजास्तु इन्द्रादीन् यजन्तीति, नेन्द्रादीनां यष्टव्यत्वप्रसिद्धिविरोधश्चेत्यपास्तम् । तथा हि; विधिषु देवतावाचकपदानां नित्यमेव वैयर्थ्यं प्रसज्येत, एवं यज्ञाग्रहारो-पाख्यानवदेव देवानां क्रत्वनुष्ठानवादा अप्यविवक्षितार्था एव, अन्यथा हि तत्राप्यसाङ्गत्यमापद्येत तथाहि; "देवा वै यशस्कामा-स्सत्रमासत अग्निरिन्द्रो वायुर्मुखः' इति चतुर्णां देवानां सत्रानुष्ठानमुक्तम् अत्र कथं चत्वार एव ब्राह्मण्यरहितास्सत्रमातिष्ठेयुः ? सप्तदशावराणां ब्राह्मणानामेव हि सत्रानुष्ठानम् "ब्रह्म वै देवानां बृहस्पतिः,"क्षत्रमिन्द्रः' इत्यादिश्रवणाद्देवादिष्वपि ब्राह्मणादि-विभागोऽस्तीति चेत् अस्तु नाम, तथापि बृहस्पतेरेव देवेषु ब्राह्मणत्वेन निर्धारितस्य सत्राधिकारस्यात् न त्वग्न्यादीनामिन्द्रादीनां च सर्वथैव सत्राधिकारः । तथा सर्पाणामयने "चर्कपिशङ्गाद्युन्नेतारा'विति चर्कपिशङ्गयोर्द्वयोरुन्नेतृकर्म श्रूयते । कथमेककर्तृकमुन्ने- तृकर्म द्वौ कुर्याताम् ? तस्मादविवक्षितार्थ एव देवादीनां क्रत्वनुष्ठानार्थवादा इति चेत् उच्यते; वैष्णवे हि सत्रे अङ्गप्रधानयागेषु सर्वत्र विष्णुरेव देवता, तादृशं च सत्रं ये देवाः पुरोडाशदध्याज्यप्रभृतिषु यादृशहविर्विभागित्वं कामयमाना आरेभिरे तेषां तेन वैष्णव-सत्रानुष्ठानेन तत्सिद्धम् । इदानीं च तत्सत्रमनुष्ठात्रभावात् खिलीभूतमित्युक्तौ विरोधाभावान्महाभारतप्रतिपन्नोपाख्यायिकायां किञ्चिद्विरोधामासमालम्ब्य प्रत्यवस्थाने सर्वत्राप्यनान्वासप्रसङ्गेनेतिहासपुराणादिकं सर्वं निरर्थकमेव स्यादित्यलमतिक्षोदेन ।।

भाष्ये-सन्निधानानुपपत्तेरिति । ननु विग्रहराहित्यपक्षेपि देवतायास्सर्वत्र सन्निधानाभावेनाङ्गत्वविरोधस्तदवस्थ एवेति असारो-ऽयमाक्षेप इति चेत् सत्यम्; देवताविग्रहद्वेषिपूर्वमीमांसोक्तानुवादरूपत्वेन सूत्रस्यादोषात्, योग्यानुपलब्धिस्त्विति पाठो दृश्यते

१.३.२६

तत्र योग्यपदं सम्पातायातमिव भाति, प्रत्युतोपलम्भायोग्यत्वस्यैव प्रदर्शनीयत्वात् । अवाढ्ढव्याणि-हव्यानि वोढवानसीत्यर्थः । अक्षन्निति - भक्षितवन्त इत्यर्थः । प्रामीयन्त-मृता इत्यर्थः । परिणाम्यमानस्येति - "णिचि मितां ह्वस्वः' इति ह्वस्वः । इन्द्रेति - इन्द्र आगच्छ हरिव आगच्छ मेघातिथे मेषेत्यन्तमिन्द्रस्य सम्बोधनम् हरिव इति

पूर्वपक्षापरपक्षौ इन्द्रस्य हरितत्वात् हरिवान् ततस्सम्बुद्धौ "मतुवसोरुस्सम्बुद्धौ छन्दसि' इति रुत्वे "भो भगो अघो अपूर्वस्य' इतियत्वे "लोपश्शाकल्यस्य' इति यलोपे च हरिव आगच्छेतिरूपसिद्धिः । मेधातिथिं किल काण्वायनिं मेषो भूत्वेन्द्रो जहारेति सुब्रह्मण्यार्थवादे श्रूयते । सम्मर्शनमात्रतृप्तिश्रवणादिति

१.३.२७

अग्निहोत्रहवण्या हस्तेन सम्मर्शनमात्रतृप्तिश्रवणादित्यर्थः । इतरैस्त्विति - कति देवा इति । याज्ञवल्क्यं प्रति शाकल्यप्रश्ने "त्रयश्च त्रीच शताः त्रयश्च त्रीच सहस्रा इति' निरुच्य "महिमान एवैषामेते त्रयस्त्रिंशत्वेव देवता' इति तेषां त्रयस्त्रिंशत्येवान्तर्भावं प्रदर्श्य "कतमे ते' इति सङ्खयेयप्रश्ने "अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिरिन्द्रश्चेति त्रयस्त्रिंशत्' इत्युक्त्वा अत्रैवेतेषाम- न्तार्भावं प्रदर्श्य पुनश्च "त्रयस्त्रिंशदपि देवाः अग्निपृथिवीवाय्वन्तरिक्षादित्यदिवां षण्णां देवानां महिमान' इति षट्स्वन्तर्भावं प्रदर्श्य "षडपि ते त्रयाणां लोकानां महिमान' इति त्रिष्वन्तर्भावं प्रदर्श्य "तेपि द्वयोरन्नप्राणयोर्महिमान' इत्युक्त्वा "तौ चैकस्य प्राणस्य महिमा' इतिपरिशेषितत्वादेकस्यानेकविग्रहयोगः परैरुपपादित इत्यर्थः । नन्वनेकप्रतिपत्तेरितिसूत्रखण्डस्य शङ्करादिभिः कृता द्वितीया व्याख्या किमिति भाष्यकृतोपेक्षितेत्यत्राह - व्याख्यात्रन्तरैरित्यादिना - अनेकार्थोपलम्भेति । यद्यपि शाङ्करभाष्यवाचस्पत्या-नन्दगिरीयेषु एकस्यवस्तुनोऽनेकत्र कर्मणि अङ्गभावप्रतिपत्तेर्दर्शनादित्येव व्याख्यातम्; तथापि वाचस्पत्वे अनेकत्र कर्मण्यङ्गत्व-

१.३.२७

प्रतिपत्तिर्युगपदङ्गभावावगमनम् तस्य दर्शनात् यथा एकं ब्राह्मणमुद्दिश्य नमस्कारः क्रियते बहुभिस्तथा स्वस्थानस्थितामेकां देव-तामुद्दिश्य बहुभिर्यजमानैर्नानादेशस्थितैर्युगपद्धविस्त्यज्यते, तस्याश्च सन्निहिताया अप्यङ्गभावो भवति, अस्ति हि तस्या विप्रकृ-ष्टानेकार्थोपलम्भसामर्थ्यमित्युक्तत्वात्, तत्र विप्रकृष्टानेकार्थोपलम्भसामर्थ्यमित्येतदनेकप्रतिपत्तेर्दर्शनादित्यस्य व्याख्यान्तरमपि भवितुमर्हतीत्यभिप्रेत्यैवं वर्णितमिति द्रष्टव्यम् । अथवा व्याख्यात्रन्तरशब्देन यादवादेर्ग्रहणमिति न काप्यनुपपत्तिः । विग्रहादिम- दिति - विग्रहयुक्तेत्यर्थः । सरूपसृष्टिनियमानुपपत्तेरिति - अत्र सरूपसृष्टिनियमानुपपत्तेर्वैरूप्यसम्भवात् । द्वितीये तु या व्यक्ति- रिति पाठस्समीचीनः । मध्ये ततश्चेत्यादिग्रन्थस्य द्वितीयपक्षान्वितत्वादधिक इव प्रतिभाति, कोशाश्च निरीक्षणीयाः । या व्यक्ति- रिति - यावती व्यक्तिरित्यर्थः । शब्दसङ्केतगोचरस्येति - गोचरत्वेनाभिमतस्य सर्वस्येत्यर्थः । दूषणान्तरमाह - देवदत्तादिशब्दा-नामिवेति । दूषणदानाय परिशिनष्टि - यदि प्रधानेति । ननु प्रत्यक्षग्राह्यत्वं घटादिष्वतिप्रसक्तमित्यत आह - प्रत्यक्षग्राह्यो वेद इति ।

१.३.२७

ततश्च प्रत्यक्षग्राह्यवेदत्वमत्र प्रत्यक्षशब्दार्थ इति नातिप्रसङ्ग इति भावः । तद्गतजात्या सम्बन्धग्रहणादिकमिति - गत्वाद्यात्मनैव गकारादीनामर्थसम्बन्धो न व्यक्तिरूपेण, यथा घटादीनां न व्यक्तिरूपेण वाच्यत्वम्, अपितु जात्यात्मना, तद्वितिभावः । ननु वाचस्पत्ये वाचकशब्दप्रभवत्वं हि देवानामभ्युपेत्यम् वाचकत्वं च न तावद्वर्णानां सम्भवति, प्रत्येकं वाचकत्वे वर्णान्तरवैयर्थ्यात्, क्षणिकेषु च क्रमिकेषु समुदायाभावात् नच स्फोटस्य वाचकत्वं सम्भवतीत्येवं प्रकारान्तरेण स्फोटविचारसङ्गतेस्सम्पादित्वान्ना-सङ्गताभिधानम्, भूतभाविसर्वकारणस्य नित्यत्वावश्यम्भावेन तत्समर्थनमपि सङ्गतमित्यस्वरसादाह - किञ्च नित्यानामपीति । क्षणभङ्गुरत्वादिति । ततश्च नित्यत्वं तद्विशिष्टस्य कथमपि साधयितुं न शक्यमित्यर्थः । ननु न विशिष्टस्य नित्यत्वं प्रसाध्यते, किन्तु केवलवर्णानामेवेत्याशङ्कयाह - अर्थावबोधं प्रयोजनमिति । आनुपूर्वीविशिष्टरूपेण वाचकत्वदानुपूर्व्याश्च नित्यत्वादित्यस्य

१.३.२८

दृष्टान्तमाह - पृथिव्या घटरूपेणेति । विरोधाच्च - ब्रह्मणः सर्वविधकारणत्ववादविरोधादित्यर्थः । सौत्रं पदमन्यथा व्याख्यातमिति एवमपि व्याख्यातमित्यर्थः । शाङ्करभाष्ये प्रत्यक्षं हि श्रुतिः प्रामाण्यं प्रत्यनपेक्षत्वात् अनुमानं स्मृतिः, प्रामाण्यं प्रति सापेक्षत्वा- दित्यपि प्रतिपादितत्वादित्यपि द्रष्टव्यम् । यदि तु क्वचिदेवमपीति - अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामित्यादाविति भावः । ननु शब्दविरोधपरिहारार्थमिन्द्रादिशब्दानामिन्द्रत्वादिजातिवाचित्वे हेतुकर्तव्ये किमर्थं सूत्रकृता देवानां शब्दप्रभवत्वं वर्णितमिति चेत् उच्यते जातिवाचित्वं तावत् पूर्वोत्तरेन्द्रादिगतजातिसिद्धिसापेक्षमिति तासामेव जातीनां सिद्धये देवादीनां वेदोपवर्णिततत्तन्नाम-रूपानुसन्धानपूर्वकं प्रजापतिना स्रष्टृत्वं सूत्रे वर्णितम् तेन हि पूर्वोत्तरेन्द्रादिषु घटादिष्विव नाम्नामाकृतीनां च समानत्वं सिध्यतीति तेषां नाम्नां साक्षादिन्द्रादिषु प्रवृत्तिनिमित्तभूतास्समानजात्यभिव्यङ्गयाः इन्द्रादिगता जातयस्सिध्यन्ति साक्षाज्जातिवाचित्वस्य हेतूकरणे तु इन्द्रत्वादिजातीनां पूर्वपक्ष्यसम्मतत्वेनासिद्धिशङ्का स्यात् यद्यपि तासां जातीनां साक्षात्साधकं समाननामरूपत्वं सूत्र-

१.३.२८

यितुं शक्यम्, तस्योदाहरिष्यमाणश्रुतिसिद्धत्वात्; तथापि तद्धेतुदाढ्यार्थं तस्याप्युपपादकं देवानां शब्दप्रभवत्वं सूत्रितम् । सोपि हेतुस्समाननामरूपत्वादित्यत्र दर्शयिष्यते किञ्च "अत एव च नित्यत्वम्' इत्युत्तरसूत्रे अतश्शब्देन शब्दप्रभवत्वस्य परामर्शार्थं च एष निर्देशः । भाष्ये-यत एव चेन्द्रवसिष्ठादिशब्दानां देवर्षिवाचिनां तत्तदाकारवाचित्वमिति । यद्यपीन्द्रवसिष्ठादिशब्दानामाकृति-वाचित्वमर्थानित्यत्वशङ्काव्युदास एवोपयुज्यते, नतु शब्दानित्यत्वशङ्काव्युदास इति नास्मिन् सूत्रे इन्द्रवसिष्ठादिशब्दानामाकृति-वाचित्वमुपन्यसनीयम्, तथापीन्द्रादिशब्दानामाकृतिवाचित्वात् यथार्थानित्यत्वशङ्काया नावकाशः, तथा मन्त्रकृत्वे न त्वदभि-मतानामपि वसिष्ठेन्द्रादीनां वेदशब्दप्रभवत्वस्य प्रमाणसम्प्रतिपन्नतया मन्त्रकृत्त्वं मन्त्रद्रष्टृत्वमेव, अतो नानित्यत्वशङ्केत्येवमिन्द्र-वसिष्ठादीनामाकृतिवाचिकथनस्य दृष्टान्तार्थत्वमेवेत्यत्र तात्पर्यम् । श्रुतिरपि ऋषिज्ञानपूर्वकमेवेति - ऋषिर्द्रष्टा यदि हि कर्ता स्यात्तर्हि कर्तृज्ञानपूर्वकमेवानुष्ठेयं दर्शयेदिति भावः । "यो ह वा अविदितार्षेयच्छन्दोदैवब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयतीति पाठः । दाशत्रय्य इति - ऋग्वेदगता ऋच इत्यर्थः । पुरावृत्तानीति - आख्यायिका इत्यर्थः । शर्वर्यन्त इति - प्रलयान्त इत्यर्थः । तान्येवैभ्य इति - एभ्यो वेदेभ्य एव हेतुभ्य इत्यर्थः । ईश्वरप्रणीतत्वाविरोधादिति - यद्यपीश्वरप्रणीतेष्वप्यादौ प्रवक्तृत्वं कठादे-

१.३.२९

स्सम्भवति । तथापि प्रोक्तमित्यस्योक्तमित्यर्थ इत्यभिप्रेत्यैतदुक्तं द्रष्टव्यः । दृष्टवेदभागत्वे प्रमाणमिति - यद्यपि काठकशब्दस्य कठेन प्रोक्तं छन्द इत्यर्थे "कलापि वैशम्पायनान्तेवासिभ्यश्च' इति वैशम्पायनान्तेवासित्वाण्णिनिप्रत्ययेतदन्तस्य "छन्दो ब्राह्मणानि च तद्विषयाणि' इति सूत्रेणाध्येतृवेदितृविषयत्वनियमेन तदधीते "तद्वेदे'त्यर्थविहितस्य प्राग्व्यतीय्यप्रत्ययस्य "प्रोक्ताल्लुक्' इति लुकि णिनिप्रत्ययस्य च "कठचरकाल्लुक्' इति लुकि कठाः ततस्तेषामाम्नाय इत्यर्थे विवक्षिते "गोत्रचरणाद्वयुञ्' इति सूत्रेण तस्येदमित्य-विशेषेण शैषिकेष्वर्थेषु प्राप्तस्य "चरणाद्धर्माम्नाययो'रिति वार्तिकेनानयोरर्थयोरेव भवतीति नियमात्तयोरथर्योर्व्युत्रि काठकमिति भव-तीत्येव शाब्दिकैर्व्युत्पत्तिर्दर्शिता, तथापि "लुब्योगाप्रख्यानात्' इतिसूत्रोक्तन्यायेनैतादृशयौगिकार्थाप्रतीतेरुपपत्तिसहत्वाभावाच्च शाब्दिकोक्तमनादरणीयमिति भावः । तत्तदर्थस्मृतिपूर्वकमिति - अनेन "शब्द इति चेन्नातः प्रभवात्' इति सूत्रोक्तमर्थनित्यत्वमा-क्षिप्यते, शब्दस्य चाभावादित्येन "अत एव च नित्यत्वम्' इति सूत्रोक्तं शब्दनित्यत्वमाक्षिप्यते, ततश्च शब्दार्थानित्यत्वाक्षेपपरिहार-परमिदं सूत्रमिति भावः । प्रपञ्चप्रवाहानादित्वमाश्रयणीयमिति - न तु मध्ये प्राकृतप्रलयोभ्युपगन्तव्य इति भावः । ननु समाननाम-

१.३.२९

रूपत्वस्य पूर्वसूत्रे कण्ठोक्तयभावात्कथं पूर्वोक्तादितिभाष्यमित्याशङ्कयाह - पूर्वसूत्रद्वयोक्तयेति । श्वेताश्वतरवाक्यं स्मारितमिति । ततश्च "यो ब्रह्माणं विदधाति पूर्वम्' इत्युदाहरिष्यमाणं श्वेताश्वतरं न देवतान्तरपरमिति भ्रमितव्यमिति भावः । तत्कृतवेदनित्य- त्वेति - वेदस्यापि कल्पान्तरीयऋग्वेदादिवेदसमाननामरूपत्वात्कल्पान्तरीयानुपूर्वीलक्षणरूपसमानरूपत्वाञ्च नियतानुपूर्वीकत्व-लक्षणं शब्दनित्यत्वमुपपद्यते इन्द्राद्यर्थानामपि सामाननामरूपतया समाननामरूपाभिव्यङ्गयजातिवाचितया नित्यत्वमिति द्वय-मप्युपपन्नमित्यर्थः । युगपत्सर्गप्रलयमिति - न कदाचिदनीदृशं जगदिति प्राकृतप्रलयानभ्युपगन्तृमीमांसकैरित्यर्थः । अपूर्वक्रमेति

१.३.२९

पूर्वानुपूर्वीविसदृशक्रमेत्यर्थः । इयांस्त्वितीति । ततश्च तदस्मास्वितिभाष्ये तच्छब्देन तेनैव क्रमेणोच्चार्यमाणत्वस्यैवांशस्य परामर्श इति भावः । संस्कारानपेक्षमित्यत्र स्वोच्चारणजन्यसंस्कारमात्रपरत्वेन सङ्कोचो निष्प्रमाणक इत्यस्वरसादाह - यद्वा संस्कारान-पेक्षमिति । ननु सर्वपदार्थानामपि सर्वदा परमात्मबुद्धिस्थतया नित्यानित्यपदार्थविवेक एव न स्यादित्यपि वक्तुं शक्यतया केय-माशङ्का, नहि बुद्धिस्थमात्रेण सत्त्वमप्यस्तीत्याशयवानाह - सर्वदा पूर्वपूर्वेति । पौरुषापौरुषेयत्ववैषम्यमिति । अत एव वेदा-वेदवैषम्यं चेति भावः । सम्प्रदायप्रवर्तकसद्भावमात्र इति - परमात्मनः प्रवर्तकस्य सद्भाव इत्यर्थः । उदाहृतवचनजातस्य समान-नामरूपत्वे प्रमाणत्वाभावादाह - उदाहृतवचनजातं प्रदर्शनार्थमिति । हिंस्राहिंस्रे इति - पूर्वं हिंस्रस्तद्वासनावासितस्सन् हिंस्र-

१.३.२९

तामापद्यते, एवमहिंस्रादयोपीत्यर्थः । सिषाधयिषितरूपेणेति - कल्पान्तरे लिप्सितेन्द्रादिभावः । पुरुषस्तत्कल्पवर्तिनमिन्द्रमा- राध्य कल्पान्तरे इन्द्रत्वं प्राप्नोतीत्यर्थः । पूवर्पूर्वाग्नीन्द्रादिस्वरूपतयेति - तत्प्रतुन्यायादिति भावः । यौगपद्येन प्रवाहतश्चेति ।

१.३.२९

एकसमयोत्पन्नान्यपि बहून्यण्डानि सम्भवन्ति, केषुचिदण्डेष्विदानीमुत्पद्यमानेषु पूर्वकालोत्पन्नान्यप्यण्डानि सम्भवन्ति ततश्च कल्पादौ एकस्य चतुर्मुखस्य भानसमये तादात्विकाण्डान्तरगतचतुर्मुखस्यापि भानादेकक्षेत्रज्ञप्रतिपन्नत्वं नास्ति पूर्वोत्पन्नाण्ड-गतचतुर्मुखसृष्टमहर्षीणां भानाच्च नैकक्षेत्रज्ञमात्रप्रतिपन्नत्वमस्तीति भावः । सैव श्रुतिरिति - तत्सजातीया "वाचा विरूपनित्यये' त्यादिश्रुतिरेवेत्यर्थः । प्रथमविकल्पे द्वितीयं शिरश्शङ्कते - एकस्य प्रतिभातवाक्यत्वमिति । ईश्वराप्त्यवगमानुगुणेति - चतुर्मु- खानां सर्वेषामीश्वराप्तत्वनिश्चयशालितया ईश्वरोपदिष्टवेदनित्यत्वेन शङ्कोन्मिषतीतिभावः । इदमुपलक्षणम् । इतरेषामपि वैदिकानां शङ्कोन्मिषतीति द्रष्टव्यम् । बाह्यहेतूत्थेति - अर्थवादानां हेतुसमर्पकतयैवान्वयस्य वक्तव्यत्वेन तत्सापेक्षतया प्रामाण्यमित्यादि-रूपेत्यर्थः । सन्देहलक्षणाप्रामाण्य इति - प्रक्रमस्थविध्युद्देशगतसामान्यवाच्यक्तपदानुरोधादौपसंहारिकाथर्वादगतधृतपदं द्रवद्रव्य-मात्रलक्षकं वा स्यात्, उत विध्यविरोध्यर्थवादगतविध्यपेक्षितविशेषोपपादनायकघृतमुख्यत्वानुरोधादक्तपदं घृतमात्रपदं वा स्यादित्यनध्यवसायादप्रमाण्यमिति पूर्वपक्षे उपक्रमगतविध्युद्देशगतस्यापि अक्तपदस्यौपसंहारिकार्थवादादेरपि बाधाभावाद्वाक्य-शेषवशेन घृतेनाक्ता इत्यध्यवसायात्प्रामाण्यमिति गुरुमते निर्णीतमिति भावः । अभिधानशक्तिरिति - शब्दशक्तिरित्यर्थः । तदस्मत्पक्षे समानमिति । सिद्धेपि वेदप्रामाण्ये नित्यत्वे च सिद्धे प्राकृतप्रलये सम्प्रदायप्रवर्तकाभावेन शब्दार्थयोरनित्यत्वशङ्कायां महामत्ते' इति । अतो देवादीनामप्यर्थित्वसामर्थ्ययोगाद्ब्रह्मविद्यायामधिकारोऽस्तीति सिद्धम् ।।

1.3.30B

प्राप्तायां महाप्रलयेपि सम्प्रदायप्रवर्तकपरमात्मसद्भावो वाक्यान्तरादवसीयत इति समानमितिभावः । इयमेव प्रतिबन्दीति - वक्ष्य-माणेत्यर्थः । सन्देहलक्षणाप्रामाण्यनिवृत्तिरिति - चक्रकमिति शेषः । परिहारस्तुल्य इत्यर्थः । ।। इति देवताधिकरणम् ।।

"असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवंशोऽन्तरिक्षमयूपो मरीचयः पुत्राः । तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः ऋच एव मधुकृतः ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋचः । एतमृग्वेदमभ्यतपन् तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोजायत तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वा एतद्यदेतदादित्यस्य रोहितं रूपम् । अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यः यजूँष्येव मधुकृतो यजुर्वेद एव पुष्पं ता एता अमृता आपः । तानि वा एतानि यजूँषि एतं यजुर्वेदमभ्य- तपन् तस्याभितप्तस्य यशस्तेज इद्रियं वीर्यमन्नाद्यं रसोजायत । तद्व्यक्षरत्तदादित्यमभितोश्रयत्तद्वा एतद्यदेवतादित्यस्य शुक्लं रूपम् । अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यस्सामान्येन मधुकृतस्सामवेद एव पुष्पं ता अमृता आपः । तानि वा एतानि सामानि एतं सामवेदमभ्यतपन् तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यं रसोजायत । तद्व्यक्षरत्तदादित्यमभितोऽश्रयत् तद्वा एतद्यदेतदादित्यस्य कृष्णं रूपम् । अथ येऽस्योदञ्चो रश्मयस्ता एवास्योदीच्यो मधुनाड्यः अथर्वाङ्गिरस एव मधुकृत इति-हासपुराणं पुष्पं ता अमृता आपः । ते वा एते अथर्वाङ्गिरस एतदितिहासपुराणमभ्यतपन् तसाभितप्तस्य यशस्तेज+तद्वा एतदा- दित्यस्य परः कृष्णं रूपम् । अथ येऽस्यार्ध्वा रश्मतस्या एवास्योर्ध्वा मधुनाड्यः गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता आपस्ता एव एते गुह्या आदेशा एतद्ब्रह्माभ्यतपन् तस्याभितप्तस्य यशस्तेज+तद्वा एतद्यदेवतादित्यस्य मध्ये क्षोभत इव ते वा एते रसानां रसा वेदा हि रसास्तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृतानि । तद्यत् प्रथममृतं तद्वसव उपजीवन्ति अग्निना मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति । त एतदेव रूपमभिसंविशन्ति एतस्माद्रूपादु- द्यन्ति । स य एतदेवममृतंवेद वसूनामेवैको भूत्वा अग्निनैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यति स य एतदेव रूपमभिसंविशत्येतस्मा-द्रूपादुदेति । स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यं स्वाराज्यं पर्येता । अथ यद्द्वितीयममृतं तद्रुद्रा उपजीवन्ति इन्द्रेण मुखेन न वै देवा +रुद्राणमेवैको भूत्वा इन्द्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति + एतस्माद्रूपादुदेति+स याव-दादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उदेता उत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेता आदित्यानामेव

1.3.30B

तावदाधिपत्यं स्वाराज्यं पर्येता । अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन वै देवा+मरुतामेवैको भूत्वा सोमेनैव मुखेन+ स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यं स्वाराज्यं पयेता । अथ यत्पञ्चममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा+साध्यानामेवैको भूत्वा ब्रह्मणा मुखेन एतदेवामृतं दृष्ट्वा स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्व उदेता अर्वाङस्तमेता साध्यानामेव तावदाधिपत्यं स्वाराज्यं पर्येता । अथ तत ऊर्ध्व उदेत्यने नैवोदेता नास्तमेता एकल एव मध्ये स्थाता तदेषः श्लोको न वै तत्र न निम्रोचनोदियाय कदाचन । देवा- स्तेनाहँ सत्येन मा विराधिषि ब्रह्मणेति । न ह वा अस्मा उदेति न निम्रोचति सकृद्दिवा हैवास्मै भवति । य एतामेवं ब्रह्मोपनिषदं वेद तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः । तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच इदं वा व तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्प्रणाय्याय वाऽन्तेवासिने नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतं धनस्य पूर्णां दद्यात् । एतदेव ततो भूय इत्येतदेव ततो भूय इति । अस्यार्थः-देवमधु देवानां मोदनात् मध्विव मधु । नन्वादित्यस्य कथं मधुत्व-मित्यत आह - द्यौरेवेति । तस्य मधुनो द्यौरेव द्युलोक एव

तिरश्चीनवंशः अन्तरिक्षं मध्यपूपम्, मध्वाश्रयापूपो हि तिरश्चीनवंश-लग्नस्सन् लम्बते, एवमन्तरिक्षमपि द्युलोकलग्नं लम्बत इव भातीत्यतो मध्यपूपत्वम् । मरीचयः पुत्राः मरीचिशब्देन मरीचिस्था-स्सवित्राकृष्टा मौम्य आप उच्यन्ते, ताः पुत्रा इव पुत्राः भ्रमरबीजभूताः मध्वपूपच्छिद्रस्थास्सूक्ष्मकीटा इत्यर्थः । तस्य ये प्राञ्च इति । तस्यादित्यस्य ये प्राञ्चो रश्मयस्ता एव मधुनाड्यः मधुच्छिद्राणि । ऋच एव मधुकृतः-ऋङ्मन्त्रा एव भ्रमराः । ऋग्वेद एव पुष्पम्-ऋग्विहितं कर्म पुष्पस्थानीयम् । ता अमृता आपः-ताः कर्मणि प्रयुक्ताः सोमज्यपयोरूपाः अग्नौ प्रक्षिप्ताः पाकाभिनिर्वृत्ता अमृता अत्यन्तरसवत्य आपो भवन्ति । ता वा एता ऋचः-पुष्पेभ्यो रसमाददाना भ्रमरा इव एतादृग्वेदविहितं कर्म पुष्पस्थानीयमभ्यतपन्-अभितापं कृतवत्य इव एता ऋचः कर्मणि प्रयुक्ता ऋग्भिर्मन्त्रैश्शस्त्राद्यङ्गभावमुपगतैः क्रियमाणं कर्म मधुनिर्वर्तकरसं मुञ्चति । पुष्पमिव भ्रमरैराचूष्यमाणं यशस्तेज इन्द्रियं वीर्यमित्यादीनि फलान्युत्पन्नानि । तद्व्यक्षरत्-विशेषेणागात् गत्वा चादित्यमभितस्सवितुः पूर्वभागमाश्रितवदित्यर्थः । अयमिह निर्गलितार्थः । रोहितं शुक्लं परं कृष्णं मध्ये क्षोभत इवेत्युक्तानि पञ्च रोहितादीनि अमृतानि
प्रामाद्यूर्ध्वान्तदेशस्थितरश्मिनाडीतस्तत्तद्वेदोक्तकर्मकुसुमेभ्यस्तत्तद्वैदिकमन्त्रमधुकरैरादित्यमण्डलानीतानि सोमाज्यतपः प्रभृति-द्रव्यनिष्पन्नानि यशस्तेजोवीर्यमिन्द्रियमित्येवमात्मकानि आदित्यमधुसम्बन्धानि वस्वाद्युपजीव्यानि चिन्तयतां फलं वस्वादि-प्राप्तिरित्युच्यते । अथ येऽस्य दक्षिणा रश्मयः इत्यादि स्पष्टम् । परः कृष्णम्-अतिशयेन कृष्णमित्यर्थः । गुह्या एवादेशा-रहस्यादेशा कर्माङ्गविषयोपासनानि च । ब्रह्मैव पुष्पम्-प्रणव एव पुष्पम् । मध्ये क्षोभत इव-चलतीव समाहितदृष्टेर्दृश्यते । वसव उपजीवन्ति अग्निनैव मुखेन-अग्निप्रधानास्सन्त उपजीवन्तीत्यर्थः । स्वाराज्यं पर्येता- वसूनामेव तावदाधिपत्यं स्वाराज्यं च पर्येता अनुभवति । द्विस्तावत्-द्विगुणं कालम् । दक्षिणत उदेता, एवमुत्तरत्रापि । एकलः-एकस्वभाव इत्यर्थः । न निम्रोचति-नास्तमेतीत्यर्थः । ननु प्रतिपाद्यविशेषे निरूपिते इन्द्रस्याधिकारोऽपि सिद्ध इत्यधिकारनिरूपणार्थं नेदमधिकरणमारम्भणीयमित्यस्वरसादाह - किञ्च-

1.3.30B

तत्रोपक्रममात्र इति । उपक्रमोपसंहारयोस्सर्वात्मना विरोधं मन्वानश्चोदयति - कथं तर्हीति । अर्थित्वाद्यसम्भवब्रह्मोपनिषत्त्वेति यद्युपक्रमोपसंहारयोर्निपुणनिरूपणेन विरोधः,
तथाप्युपसंहारपर्यालोचनदशोत्पन्नप्रक्रमगतादित्यवस्वादिशब्दजन्यापातप्रि ीति-तिमवलम्ब्य पूर्वमक्षप्रतिभोद्गम इति भावः । भाष्ये-आदित्यस्यांशानां वस्वादिभिर्भुज्यमानानामिति । नन्वादित्यांशानां वस्वादि-पञ्चदेवगणोपजीव्यानां मधुविद्यायामुपास्यत्वं चेत् वस्वादीनां तदधिकारो काऽनुपपत्तिः ? नहि स्वोपजीव्यत्वेनान्यस्योपासनं विरुद्धम्, तथासत्युपासनमात्रोच्छेदप्रसङ्गात् सवेष्वप्युपासनेषु स्वापेक्षयोत्कृष्टत्वस्वोपजीव्यत्वादीनामवश्यानुसन्धेयत्वाच्च किञ्च उपजीवकपञ्चदेवगणान्तःपातीनां वस्वादीनां पञ्चगणोपजीव्यपञ्चामृतोपासनास्वनधिकारे सर्वेश्वरत्वप्रकारकोपासनायां कस्यापि जन्तोरधिकारो न स्यात् सर्वमध्ये स्वस्याप्यनुप्रविष्टत्वात् तत्कथमयं पूर्वपक्षः, कथं वा एतत्पूर्वपक्षाभ्युपगमेनैव वस्वादित्याद्याव-स्थब्रह्मोपास्यमिति सिद्धान्त इति चेदुच्यते; "तं देवा ज्योतिषां ज्योतिरायुर्होपासते अमृतम्' इतिश्रुतिबलाद्रोहितादिपञ्चामृतो-

१.३.३१

पासकत्वमपि न सम्भतीत्यत्र तात्पर्यमिति । उभयविषयपरविद्यास्विति - जीवविशिष्टपरविषयविद्यास्वित्यर्थः । ननु प्राणवि-द्यायामप्यवस्थाभेदेन विरोधसमाधानस्य प्रागनुपपादितत्वात्, तस्या अप्येतदधिकरणविषयत्वं युक्तमित्यभिप्रयन् शक्तत्वाश-क्तत्वप्रीणनीयत्वप्रीणयितृत्वफलप्रदत्वार्थित्वादिमुखेन कर्मकर्तृविरोधान्तरं दर्शयन् पक्षान्तरमाह - यद्वा स्वयमेवाभीष्टसम्पा-दनाशक्तेरित्यादिना । ननु कथं प्राणविद्यायामपि वक्ष्यमाणन्यायोपजीवनेन परिहारः ? मधुविद्यायां ब्रह्मविद्यात्मकत्वेनोपासनं विवक्षितमिति हि वक्ष्यमाणन्यायः प्राणविद्यायामनपेक्षितः, तत्र हि शरीरभूते जीवे उपासिते परमात्मा प्रक्षणाति फलञ्च प्रयच्छ- तीति सम्भवान्न प्रीणनीयत्वप्रीणयितृत्वविरोधः,

प्रीणनीयत्वस्य परात्मगतत्वादिति समाधानस्य तत्र संभवादित्याशङ्कय-विरो-धान्तरसमाधानस्य तथा संभवेऽपि प्रकर्षाप्रकर्षगर्मविरोधस्यावस्थाभेदेनैव परिहरणीयत्वादित्यभिप्रेत्याह - प्राणविद्यायां ब्रह्मात्म-कत्वेनेति । प्रकर्षाप्रकर्षेति । प्रकृष्टस्योपासनकर्मत्वमप्रकृष्टस्योपासनकर्तृत्वमिति विरोध इत्यर्थः । ब्रह्मात्मकतया परिहारस्त्विति । अवस्थाभेदेन परिहार इत्यर्थः । प्राणविद्यायां ब्रह्मात्मकत्वस्योपास्यकोटिनिवेशासंभवेन बद्धमुक्तावस्थाभेदेन परिहारः, मध्वादि-विद्यायां तु ब्रह्मात्मकत्वावस्थातद्राहित्याभ्यामुपास्योपासकभेद इति भावः ।।

भाष्ये स्वावस्थब्रह्मोपासनेति । स्वोपजीव्यरोहितादिपदञ्चामृतावच्छिन्नब्रह्मोपासनसंभव इत्यर्थः; न तु "वसव उपजीवन्ती'त्यत्र वसुशब्दस्यैव वस्ववस्थब्रह्मपरत्वमिति मन्तव्यम्; तथार्थकल्पने प्रमाणाभावात् । अप्राप्तार्थप्राप्त्यर्थं किञ्चिदाश्रयणरूपस्योपजीवनस्य वस्ववस्थब्रह्मण्यसंभवाच्च । "वसूनामेवैको भूत्वे'त्यत्र एकस्मिन् ब्रह्मणि बहुत्वसापेक्षनिर्धारणस्य वा, उपासितुः ब्रह्मभावापत्तेर्वा असं-

भवाच्च । अत एव चोत्तरत्र, "वस्वादिभोग्यभूतादित्यांशस्य विधीयमानमुपासन'मिति भाष्यमिति द्रष्टव्यम् । अब्रह्मोपासनपरत्वेन

१.३.३२

यैर्व्याख्यातमिति । "न ह वा अस्मा उदेति, न निम्रोवती'ति ब्रह्मप्राप्तिकथनं वस्वादिभावद्वारा क्रममुक्तिपरम्; ब्रह्मोपनिषच्छब्दोऽपि वेदोपनिषत्पर इति व्याख्यानं क्लिष्टार्थकत्वादनादरणीयमित्यर्थः । उपास्यत्वं च वस्वादिभोग्यादित्यांशमात्रस्येति । न च वसुसमु-दायस्योपास्यत्वमिति पूर्वग्रन्थविरोध इति वाच्यम्; भोक्तृत्वेन वस्वादिसमुदायस्योपास्यत्वम्; भोग्यत्वेनादित्यांशस्योपास्यत्वमिति विरोधाभावात् । तथानुसंधानमेव प्रयोजनमितीति । ननु यद्विद्याप्रकरणे देवोपास्यत्वदेवफलप्रदत्वादिकं न श्रुतम्, न तत्र तस्यानु-सन्धेयत्वम् । यत्र तु श्रुतम्, तत्र देवताविग्रहादिप्रसाधनाभावेऽपि देवतोपास्यत्वं संभवत्येवेति देवोपास्यत्वानुसन्धाने इदमधिकरणद्वयं कथमुपयुज्यतामिति चेत्-सत्यम् । अनारोपितदेवोपास्यत्वानुसन्धानार्थमिदं निरूपणमिति द्रष्टव्यम् । इदमप्युपलक्षणम्-देवतानाम-

सिद्धौ मधुविद्यादीनां तत्तद्देवतापदप्राप्तिः फलं न भवेत् । वरुणग्रहनिर्मोकादिवत् बाधितस्य श्रुतत्वेऽपि विधेयक्रियाफलत्वायोगात् । किं

१.३.३२

त्वन्यदेव फलं कल्प्यं स्यात् । अन्तरादित्यविद्यादिषु आदित्यादिदेवताद्यन्तर्वर्तित्वेन ब्रह्मोपासनं न सिध्येत् । ज्योतिर्मण्डलाद्यन्तर्वर्ति-त्वेनैव तदुपासनं सिध्येत् । उपकोसलविद्यायां पञ्चाग्निविद्यायां च अर्चिराद्यभिमानिदेवताविशेषाः मार्गार्वत्वेन न चिन्तनीयाः स्युः । अर्चिरादीन्यचेतनान्येव तथा चिन्तनीयानि स्युः । तथा, "तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेति भक्षयन्ति, एवमेनां-स्तत्र भक्षयन्ति', "यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युः, एवमेकैकः पुरुषो देवान् भुनक्ति । एकस्मिन्नेव पशावादीयमाने अपि्रयं भवति, किमु बहुषु । तस्मादेषां तन्न प्रियम्, यदेतन्मनुष्या विद्युः' इत्यादिश्रुतिषु कर्मदेवभावं प्राप्तानां तमप्राप्तानां च मनुष्याणां याव-ज्जीवमाजानदेवभृत्यभावोक्त्या वैराग्यं न सिद्धयेत् । एतादृशस्याभिमतस्य सिद्धिः प्रयोजनं देवतासद्भावप्रसाधनस्य । "तद्यथेह कर्म-चितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते', "जायस्व म्रियस्वेत्येतत् तृतीयं स्थानम्, तेनासौ लोको न संपूर्यते-तस्मात् जुगुप्सेत' इत्यादिमन्त्रार्थवादैः वैराग्यसिद्धिश्च फलमित्यपि द्रष्टव्यम् ।। ।। इति मध्वधिकरणम् ।।

१.३.३३

शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि । सङ्गतिरित्याहेति । सङ्गतिरित्यभिप्रयन्नाहेत्यर्थः । तदुपसंहारेति । उपसं-हारः-अनुष्ठानम् । नैरपेक्ष्योत्तम्भकतयेति । ननु शूद्रस्यामन्त्रणपूर्वकमितिहासपुराणश्रवणादर्शनेन कथं तस्य नैरपेक्ष्योत्तम्भकत्वम् । अतः शूद्रेत्यामन्त्र्य ब्रह्मविद्योपदेशात्, शूद्रेत्यामन्त्रणं शूद्रस्य ब्रह्मविद्याधिकारे साक्षादेव लिङ्गमित्येव सुवचमिति चेत्-सत्यम् । मार्गान्तरस्य मार्गान्तरादूषकत्वात् तथोक्तमिति द्रष्टव्यम् । वेदादेव ब्रह्मावगतिरिति । ब्रह्मविद्यानुष्ठानोपयुक्तब्रह्मावगतिरित्यर्थः; एव-मुत्तरत्रापि; इतिहासपुराणादिना ब्रह्मावगतिमात्रस्य सिद्धान्तिनाऽपि प्रत्याख्यातुमशक्यत्वादिति द्रष्टव्यम् । विद्याशब्दं व्याचष्टे विद्या-वेदविद्येति । अत्राध्ययनमिति क्वचित्पाठो दृश्यते । स तु लेखकस्खलनकृतः । अध्ययनजन्यस्य कर्मानुष्ठानौपयिकाङ्गकलापादि-ज्ञानस्य वा वेदस्य वा विद्याशब्देनग्रहणर्हतया अध्ययनस्य विद्याशब्देन ग्रहणानर्हत्वादिति द्रष्टव्यम् । यद्वा विद्याभावादित्यस्य

अध्ययनसंस्कृतविद्याराहित्य(परत्व?)द्योतनाय अध्ययनपदमुपात्तम् । अग्निशब्दं व्याचष्टे अग्निः आहित इति । आधानसंस्कृता-हवनीयादिरित्यर्थः । अत्र क्रमस्याविवक्षितत्वात् अग्निविद्याशब्दयोः व्युत्क्रमेण व्याख्यानं न दोष इति द्रष्टव्यम् । ननु तस्मात् शूद्र इति । ननु कथमस्याः शङ्कायाः उत्थानम्; प्रागेव साक्षात् परंपरया वा ब्रह्मोपासने अग्निविद्यासाध्यत्वस्य निरस्तत्वादिति चेत्-अत्र केचित्,"तस्मात् शूद्रो यज्ञेऽनवकप्त इति वाक्यस्य शूद्रे अग्निविद्यासाध्ययज्ञमात्रानधिकारप्रदशर्कत्वे तस्यापशूद्राधिकरणन्यायसि-द्धत्वेन वाक्यवैघल्यप्रसङ्गात्, "यज्ञेऽनकप्त' इति वाक्यं कर्मविद्यासाधारण्येन वैदिककमर्मात्रे शूद्रस्याधिकारनिषेधपरं किं न स्यात् इत्याशङ्कय प्राप्तार्थप्रतिपादकस्य वाक्यस्य वैफल्यप्रसङ्गेन (तस्य) लक्षणया अप्राप्तार्थप्रतिपादकत्वे अभ्युपगम्यमाने अनुवादमात्रो-च्छेदप्रसङ्गात्,"ये पुरोदञ्चो दर्भा' इति वाक्यस्य, "अग्रवन्त्युदगग्राणी'ति स्मृतिप्राप्तानुवादित्ववत् "शूद्रोयज्ञेऽनकप्त' इति वाक्य-स्यापि अपशूद्राधिकरणन्यायप्राप्तार्थानुवादित्वमेव वक्तव्यमित्यभिप्रयन्नाह तस्मात् शूद्रो यज्ञेऽनवकप्त इत्यपीत्येवं भाष्यग्रन्थाव-तारिकामाहुः । यावद्वचनता स्यादिति । श्रुत्यैकसमधिगम्यो ह्यर्थो यथाश्रुतिप्रतिपत्तव्यः । अयं तु न्यायसिद्धोर्थः । ततश्च मूलभूत-न्यायस्य यावद्विषयकत्वम्, तावद्विषयकत्वं मूलिनोपि वाक्यस्य वक्तव्यमिति भावः । परिसङ्खया वेति । यज्ञ एवानकप्त इत्येवं परि-

सङ्खया वा नेत्यर्थः । उपासनाधिकारोनुमतो भवतीति । अप्रतिषिद्धमनुमतमिति न्यायादिति भावः । ननु "श्रावये'दिति ब्राह्मणस्य श्रावणानुज्ञायां सत्यामपि शूद्रस्य श्रवणानुज्ञाया अदर्शनात् कथमेतदित्यत आह प्रयोज्या भाव इति । प्रयोज्योपादानमर्थसिद्धमिति । श्रावणविधिना, सर्वेऽपि वर्णाःृणुयुरिति श्रवणविधिराक्षिप्यत इति भावः । प्रयोज्यव्यापारविधिरिति । यथा अन्नाद्यकामं याजये-दित्यत्र याजनं न विधीयते; रागप्राप्तत्वात्; किन्तु यजनमेव-एवं श्रावयेदित्यत्राऽपि श्रावणस्य रागप्राप्तत्वात् श्रवण एव विधिः । अतो न श्रवणस्यार्थसिद्धत्वमिति शङ्कार्थः । अधिकारिविशेषणाश्रवणादिति । यद्यपि चतुरो वर्णानितिवर्णरूपाधिकारिविशेषणश्रवणमस्ति-तथाऽपि अन्नाद्यकामं याजये-दित्यत्र याजनस्य रागप्राप्ततया विधानासंभवेन यजनविधिपरत्वेन(त्वेऽपि?) श्रावणस्य, "न चास्योपदिशेद्धर्म'मित्यादिना प्रति-षिद्धस्य, "श्रावयेच्चतुरो वर्णा'नित्यस्य प्रतिप्रसवरूपत्वसंभवे तत्परित्यागेन श्रवणविधिमात्रपरत्वस्यान्याय्यत्वादिति भावः । एत-दभिप्रायेणेति ।
श्रावणविध्याक्षिप्तश्रवणविधिविषयत्वाभिप्रायेणेत्यर्थः । नन्वस्तु श्रवणम्; अथाप्युपासनोपयुक्तनिश्चयरूपज्ञानस्य विचारमन्तरेणेतिहासपुराणश्रवणमात्रेणासिद्धेः शूद्रस्य विचारप्रयोजकाभावात् कथं सामर्थ्यमित्याशङ्कय इतिहासपुराणश्रवणस्य दृष्टार्थत्वेनानुष्ठानौपयिकज्ञानार्थतया तस्य तद्विचारमन्तरेणासिद्धेः त्रैवर्णिकानां वेदान्तविचारवत् शूद्रस्येतिहासविचारः सिद्धयती-त्यभिप्रयन्नाह यदाचैवमिति । शङ्कते यदिब्रूयादिति । (यदि ब्रूयात्) तदा किमुत्तरमिति चेदित्यध्याहृत्य योजना द्रष्टव्या । श्रवण-फलनिर्देशादिति । अविहितस्य श्रवणस्य

फलश्रवणासंभवात्, श्रवणे विधिरभ्युपगम्य इति भावः । तर्हि शूद्रस्य कीर्तनमपि स्यादिति शङ्कां वारयतिं श्रवणकीर्तने हीति । ननु फलनिर्देशान्यथानुपपत्त्या अस्तु श्रवणस्य विधेयत्वम्; नैतावताऽर्थज्ञानफलकत्वसिद्धिः;

१.३.३३

नामसहस्रमात्रश्रवणफलनिर्देशतयाप्युपपत्तेरिति चेन्न-श्रवणस्य फलनिर्देशान्यथानुपपत्त्या विधेयत्वसिद्धौ श्रवणस्य ज्ञानरूपदृष्टा-र्थत्वे संभवति पापक्षयरूपादृष्टार्थत्वकल्पनाया अन्याय्यत्वात् अर्थज्ञानपर्यन्तत्वमिति भावः । अनधिकारो निर्णीतश्चेदिति । अध्य-यनगृहीतवेदजन्यज्ञानस्यैव वैदिककर्मानुष्ठानोपयुक्तत्वम्; नेतरस्येति पूर्वतन्त्रापशूद्राधिकरण एव निर्णीतत्वादित्यर्थः । अपशूद्रा-धिकरणन्यायाप्रवृत्ताविति । युक्तिमाहेत्यन्वयः । तत्रापरिहृतामिति । पूर्वतन्त्रापशूद्राधिकरणे अपरिहृतामित्यर्थः ।

निर्वाह एव सौत्र इत्यस्यानन्तरं तस्मादिति शेषः पूरणीयः । अलौकिकसामर्थ्याभावादिति । अध्ययनगृहीतस्वाध्यायजन्य-ज्ञानरूपशास्त्रीयहेत्वभावादित्यर्थः । भाष्ये, यथैव हि वर्णिकविषयाध्ययनविधिसिद्धस्वाध्यायसंपाद्यज्ञानलाभेनेति । ननु स्वा-ध्यायाध्ययनविधौ त्रैवर्णिकोऽधिकारी न श्रूयत इति चेत्-सत्यमध्ययनविधौ त्रैवर्णिकोऽधिकारी न निर्दिष्टः-तथाप्युपनयनविधौ, "वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्' इति त्रैवर्णिकाधिकारित्वश्रवणात् त्रयाणामेव वर्णानामुपनयनमिति सिद्धम् । ततश्च स्वाध्यायविधिरनिर्दिष्टकर्तृकः कर्तारमपेक्षमाणः प्रकृतोपनयनसंसकृतान्, "किमर्थं वयमाचार्यसमीपं नीताः' इति प्रयोजनमपेक्षमाणान् ब्राह्मणादीनेव कर्तृत्वेन स्वीकुर्वन् तेषामेवाध्ययनं विधत्ते, न शूद्रस्येति अध्ययनविधेरपि त्रैवर्णिकविषयत्वं युज्यत इति द्रष्टव्यम् । अत्र विधिसिद्धत्वं स्वाध्यायस्य विशेषणम्; न तु तत्सम्पाद्यज्ञानस्य; सिद्धान्ते अध्ययनविधेरक्षराशिग्रहणमात्र-विश्रान्तत्वेन अर्थज्ञानफलकत्वाभावात् । नन्वध्ययनविधेरर्थज्ञानपर्यन्तत्वे हि वर्णविशेषादिग्रहणमन्तरेणाविशेषप्रवृत्ता अपि वैदिक-कर्मविधयः कर्मानुष्ठानार्थमनुष्ठेयार्थज्ञानं नाक्षिपन्ति । यथा क्रतुविधयो याजकान् अपेक्षमाणाः स्ववर्णोचिदद्रव्यार्जनोपाय इति याजने स्वत एव प्रवृत्तान् ब्राह्मणा न आसाद्य निर्वृण्वन्ति, न त्वध्ययनवत्त्वेपि क्षत्रियवैश्ययोर्याजकत्वमाक्षिपन्ति; ततश्च "याजनाध्यापन-प्रतिग्रहैर्ब्राह्मणो धनमार्जये'दिति द्रव्यार्जनोपायनियमविधिबलात् ब्राह्मणानामेवार्त्विज्यमिति नियमः-तथा अध्ययनविधिबलादध्य-यनलब्धानुष्ठेयार्थज्ञानवतामेव वैदिककर्मानुष्ठानमिति नियमलाभ इति शक्यते वक्तुम् । अध्ययनविधेरक्षरराशिग्रहणमात्रविश्रान्तत्वे कस्यापि विधिलब्धज्ञानस्याभावात् ज्ञानाक्षेपस्य च सर्वत्र संभवात् कथमपशूद्रमधिकारः स्यादिति चेत्-सत्यमस्मन्मते ज्ञानं न विधि-सिद्धमिति । अथापि हेतुसाकाङ्क्षं कर्मानुष्ठानौपयिकं ज्ञानं प्रयोजनान्तरासंयुक्तं, प्रयोजनसाकाङ्क्षम्, अध्ययनसंस्कृतं स्वाध्यायमेव हेतुतया स्वीकरोति; न तद्व्यतिरिक्तं ज्ञानोपायान्तरम् । ततश्चाध्ययनजन्यज्ञानमेव क्रत्वङ्गमिति पर्यवस्यति । यथा विहाराधिकरणे (१२-२-१)असंयुक्तोत्पन्नानामाधाननिष्पाद्याहवनीयादीनां प्रयोजनसाकाङ्क्षाणां लौकिकेष्वपि पचनप्रकाशनेषु विनियोगोऽभ्युप-गन्तव्य इति पूर्वपक्षः प्रवर्तितः, तेन न्यायेनाध्ययनसंस्कृतस्वाध्यायस्य प्रयोजनसाकाङ्क्षस्य हेतुसाकाङ्क्षे कर्मोपयिकज्ञाने विनियोग इति सिध्यति । ततश्चाधीतवेदानामेव त्रैवर्णिकानां कमर्स्वधिकार इति सिद्धौ न सिद्धान्तेऽनुपपत्तिः ।

अध्ययनव्रतोपनयनादय उच्यन्त इति । अध्ययनाङ्गं व्रतं अध्ययनव्रतम्; अध्ययनस्य उपायशब्देनोपात्तत्वादिति द्रष्टव्यम् । यद्वा उपायशब्दो वेदपरः, आदिशब्देन अध्ययनं गृह्यत इत्यभिप्रेत्यैतदुक्तमिति द्रष्टव्यम् । अत्र चोपनयनपदं लेखकप्रमादादागतम् ।

१.३.३३

ब्राह्मणादिवर्णमात्रविषयतयोत्पन्नस्योपनयनस्य शूद्रो आक्षोपाप्रसक्तेः । अपशूद्राधिकरणे हि द्वेधा पूर्वपक्षो वर्णितः-अनारभ्याधी-तमप्यध्ययनं क्रत्वनुष्ठानौपयिकज्ञानोपयोगित्वात् क्रत्वङ्गम्, क्रतवश्चाविशेषेण चातुर्वर्ण्यमधिकुर्वाणाः चतुर्णामध्ययनं प्रयुञ्जते । तत्र च त्रयाणामुपनयनसंस्कारोऽध्यनाङ्गतया विधीयते । चतुर्थस्तु संस्कारविध्यभावात्

अनुपनीत एव स्वयमेवोपगम्याधीत्य विद्यां लभ-ताम् । अतवा, अनारभ्याधीतमध्ययनं पुरुषार्थमेव; न क्रत्वङ्गम् । अतः तदभावेऽपि क्रतोर्वैगुण्याभावादनधीतवेद एव शूद्रः पुस्तक-निरीक्षणादिनाविद्यां लब्ध्वाऽधिक्रियतामिति । ततश्च पक्षद्वयेऽपि शूद्रे ब्राह्मणादिसंयुक्तोपनयनाक्षेपाप्रसक्तेरिति ध्येयम् । नापेक्षन्त इत्यर्थ इति । शूद्रे ज्ञाने तदुपायादीश्च नाक्षिपन्तीत्यर्थ इत्यर्थः । अध्ययनस्यापि प्रयोजकतयेति । कर्मविधीनामेव शूद्रगताध्ययनप्र-योजकत्वकल्पनायां गौरवमित्यर्थः । सौधन्वत्वमनुकूललिङ्गमिति । "ऋभवो नेमिं नमन्ती'त्यादिमन्त्रलिङ्गात् नेमिनिर्माणचतुरस्य ऋभुशब्दवाच्यत्वावगमात् "सौधन्वना ऋभव' इति मन्त्रे तत्समानाधिकरणतया सौधन्वशब्दस्य श्रवणात् पल्यां तु जातो वैश्या-नां(यां?) सुधन्वाचार्य एव चेत्याचायऋभुशब्दापरपर्यायसौधन्वब्दितजातिविशेषस्य ग्रहणमिति भावः । नन्वस्यार्थस्य, "शुगस्ये'ति सूत्राभिप्रेतत्वे तद्व्याख्यानसमय एव वाच्य इत्याशङ्कयाह इह प्रतिपत्तीति । न हि व्याख्येयानधिकारिण इति । नन्वितिहासपुरा-णादिकं वेदवाक्यप्रतीकग्रहणपूर्वकम्, अस्य पदस्यायमर्थ इत्येवंरूपं व्याख्यानं न भवति, येन वेदसापेक्षता स्यात् । अतोऽनधीत-वेदस्यापीतिहासपुराणादिना स्पष्टार्थावगतौ नानुपपत्तिः । अत एवाङ्गतय विहितस्य स्वतन्त्रतयेत्याद्युत्तरयुक्तिरप्यनुपपन्ना; शूद्र-श्रावणविध्यनुरोधेन स्वतन्त्रतयोपादानस्याप्यङ्गीकर्तव्यत्वात् । शूद्रश्रावणस्य दृष्टार्थत्वसंभवे सति अदृष्टार्थत्वकल्पनाया अन्याय्य-तया अनुष्ठेयोपासनानुष्ठानाद्यर्थत्वस्यैव युक्तत्वादिति चेत्-सत्यम्; "नाशुभं प्राप्नयात्किश्चित् सोऽमुत्रेह च मानवः' इत्यादिषु पाप-

क्षयफलकत्वस्यैव स्पष्टमाम्नानेन तस्यैव फलत्वात् । अत एवोक्तम्, पुण्यकथावगतिद्वारेण पापक्षयफलार्थमितीति द्रष्टव्यम् ।

तदविरोधस्येति । वेदार्थविशदीकरणहेतुतयैव तदधिगमविधायकशास्त्राविरोधस्येत्यर्थः । श्रवणविध्यवैयर्थ्याच्चेति । शूद्रा-णामितिहासपुराणश्रवणस्य निष्फलत्वे श्रवणबिधेर्वैयर्थ्यप्रसङ्गादित्यर्थः । शौनकवचनविरोधादिति । ननु वचनविरोधाद्विदुरादीनां तथास्तु नाम, तथा पूर्वजन्मानुष्ठितकर्मभिर्विशुद्धचित्तानामुत्पन्नब्रह्मविविदिषाणां प्रारब्धवशात् शूद्रजन्म प्राप्तामितिहासपुराणाव-गतब्रह्मस्वरूपतदुपासनप्रकाराणां कुतो न ब्रह्मविद्यायामनधिकारः ? न चोक्तरीत्या यज्ञादिकर्मण्यप्यधिकारः स्यादिति शङ्कयम्-"तस्माच्छूद्रो यज्ञेऽनवकप्त' इति यज्ञादौ विशेषनिषेधदर्शनात् उपासने तादृशनिषेधादर्शनात्, नारदस्य प्राचीनजन्मनि यतिभिरुप-दिष्टाच्युदोपासनायाम्, शूद्रोचितसंस्कारपूर्वकं शैवपाशुपतपाञ्चरात्राद्युपदिष्टासु प्रणवरहिताष्टाक्षरपञ्चाक्षरमन्त्रकरणकविष्णुशिवो-पासनासु अधिकारो न निवार्यः । न चैतदधिकरणविरोधः; शूद्रस्येतिहासादिमूलाधिकारसत्त्वेऽपि वेदमूलसंवर्गविद्याद्यधिकारनिवा-रणार्थत्वादस्याधिकरणस्य । अत एव वेदश्रवणादिप्रतिषेधः सूत्रकृताप्युपन्यस्त इति चेत्-उच्यते-विशिष्य विहितेषु शैवाद्यागम-निर्दिष्टेषूपासनेषुन शूद्राद्यधिकारं प्रतिक्षिपामः; अपि तु सामान्यतः श्रुतेषु ब्रह्मोपासनेषु यज्ञादिष्विव नाधिकार इत्येव(हि)साधयामः । न च, "तस्मात् शूद्रो यज्ञेनवकप्त' इति वचनात् यज्ञानधिकारेऽपि उपासने कुतो नाधिकार इति शङ्कयम्-तस्य वचनम्यापशुद्राधि-करणन्यायसिद्धार्थानुवादित्वात्; न्यायस्य च कर्मब्रह्मोपासनसाधारण्यात् । किञ्च, "नास्याधिकारो धर्मेऽस्ति नाधर्मात् प्रतिषेधनम्' इति विशिष्य विहितेतरेषु धर्मेषु शूद्रस्यानधिकार इति मनुस्मरणादिति द्रष्टव्यम् । अतः शूद्रस्य न ब्रह्मविद्याधिकारः ।

शोककारणं शोककार्यं च हेतुत्वेनाहेति । कार्यकारणयोर्द्वयोरपि लिङ्गविधया ज्ञापकत्वसंभवेन हेतुत्वसंभवात् सूत्रे ज्ञापकहेतौ पञ्चमी । ततश्चानादरश्रवणाद्रवणरूपलिङ्गाभ्यां कारणकार्यरूपाभ्यां ज्ञाप्यमानेत्यर्थः । अनादरश्रवणजन्या आद्रवणहेतुभूता शुक् शूद्रेत्यामन्त्रणेन सूच्यत इति सूत्रार्थ इति भावः । भाष्ये शुचेर्दश्चेतीति । अस्य सूत्रस्य धातुवृत्तौ शूद्रशब्दव्युत्पादनावसरे उदाहृतत्वात् प्रक्षिप्तत्वं वदन्तो निराकृता इति वेदितव्यम् । अेद्रवणमप्यन्तर्भाव्येति । शुचा द्रवतीति शूद्रशब्दव्युत्पत्तिः परैरादृतेति भावः । ननु हंसोक्तानादरश्रवणं जानश्रुतेः

कथं शोकहेतुः, महात्मनां हि येन केनापि कृता निन्दा शोकाय नावकल्पते; प्रत्युत तेषायैव । स्मरन्ति च मन्वादयः, "अवमानात् तपोवृद्धिः संमानाञ्च तपःक्षयः । अमृतस्येव काङ्क्षेत अवमानस्य सर्वतः' इत्यादि । प्रत्युत हंसे हितप्रवर्तकत्वं जानतः तोष एव युक्त इति चेत्-सत्यम्-अथाप्येतावन्तं कालमीदृशीं विद्यां नाध्यगमम् । अत एव पितृस्थानीयेन हंसेन निन्दितोऽ-स्मीति शोको भवत्येव । अतस्तेनाद्रवणमप्युपपद्यत एव । इतरथा पित्रादिकृतनिन्दायाः शोकाहेतुत्वे तन्निन्दाया अकार्यकरत्वं स्यादित्यपि द्रष्टव्यम् ।

वैशद्यार्थमुपन्यस्यतीति । एवं हि श्रुतिः, "जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस । स ह सर्वत आवसथान् मापयाञ्चक्रे सर्वत एव मेऽन्नमत्स्यन्तीति । अथ ह हंसा निशायामतिपेतुः । तद्धैवं हंसो हंसमभ्युवाद-भोभो अयि भल्लाक्ष ! भल्लाक्ष ! जानुश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततम् । तन्मा प्रसाङ्क्षीः । तत् त्वा मा प्रधाक्षीदिति । तमु ह परः प्रत्युवाच, कम्वर एवमेतत् सन्तं सयुग्वानमिव रैक्वमात्थेति यो नु कथं सयुग्वा रैक्व इति । यथा कृतायविजितायाधरेऽयाः संयन्ति; एवमेनं सर्वं तदभिसमेति, यत्किञ्च प्रजाः साधु कुर्वन्ति । यस्तद्वेद यत्सवेद स मयैतदुक्त इति । तदु ह जानश्रुतिः पौत्रायण उपाशुश्राव । स ह सञ्जिहान एव क्षत्तारमुवाच-अङ्गारे सयुग्वानमिव रैक्वमात्थेति । यो नु कथं संयुग्वा रैक्व इति-स ह क्षत्तान्विष्य नाविदमिति प्रत्येयाय । तं होवाच यत्रारे ब्राह्मणस्यान्वेषणा तदेनमृच्छे(मर्च्छे)ति । सोधस्तात् शकटस्य पामानं कषमाणमुपोपविवेश । तं हाभ्युवाद-त्वं नु भगवः सयुग्वा रैक्व इति । अहं ह्यारा इति ह प्रतिजज्ञे । स ह क्षत्ता अविदमिति प्रत्येयाय । तदु ह जानश्रुतिः पौत्रायणः षट्शतानि गवां निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे । तं हाभ्युवाद-रैक्वे ! इमानि षट्शतानि गवामयं निष्कोऽयमश्वतीरथः । अनु म एतां भगवो

१.३.३३

देवतां शाधि यां देवतामुपास्स इति । तमु ह परः प्रत्युवाच अह हारेत्वा शूद्र ! तवैव सह गोभिरस्त्विति । तदु ह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवामयं निष्कोऽयमश्वतरीरथः, इयं जाया, अयं ग्रामः, यस्मिन्नास्से । अन्वेव मा भगवः शाधीति । तस्याह मुख-मुपोद्गृह्णन्नुवाच आजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा इति । ते हैंते रैक्वपर्णा नाम महावृषेषु, यत्रास्मा उवास । तस्मै होवाच-'

जनश्रुतस्यापत्यं जानश्रुतिः । पुत्रस्य पुत्रः पौत्रः । तस्यापत्यं पौत्रायणः । श्रद्धादेयःश्रद्धापुरस्सरं देयमस्य श्रद्धादेयः । बह्वस्य गेहेऽन्नं पक्तव्यमस्ती बहुपाक्यः । सर्वतः-सर्वासु दिक्षु अन्नपानादिपूर्णानि अतिथ्यभ्यागतानां वासस्थानानि निर्मितवान्, सर्वत एत्यातिथयः मेऽन्नं भोक्ष्यन्त इत्यभिप्रायेणेत्यर्थः । भल्लाक्ष भल्लाक्षेत्यनेन विपरीतलक्षणया मन्दलोचनेति संभ्रमेण द्विवारं संबोधनम् । यथा कृताय-विजितायेति । कृतनामधेयोऽयः द्यूतशास्त्र(समय)प्रसिद्धः चतुरङ्कः । तत्र विजिताय जितवते अधरे अयाः त्रिद्वयेकाङ्काः, त्रेता-द्वापर-कलिनामानः यथा संयन्ति अन्तर्भवन्ति-चतुरङ्के कृतनामके अये त्रिद्येकाङ्कानां तत्र सत्त्वेनान्तर्भावादित्यर्थः । यस्तद्वेद यत्स वेदेति । सः रैक्वः यद्वेद्यं वेद, तदन्योऽपि यो वेद, तमप्यभिसमेतीत्यनुषङ्गेण योजना । स ह सञ्जिहान एव तल्पं-त्यजन्नेवेत्यर्थः । यत्रारे ब्राह्मण-स्यान्वेषणेति । अरे ! ब्राह्मणस्य-ब्रह्मविदः यत्रारण्ये नदीपुलिनादौ विविक्ते अन्वेषणा-मार्गणं भवति । तत्रैनं रैक्वमृच्छ-मृगयस्वे-त्यर्थः । पामानं कषमाणमिति । पामानं कण्डूयमानमित्यर्थः । निष्क-हारम् । अश्वतरीरथम्-अन्वतरीाभ्यां युक्तं रथम् । तदा-तस्मिन्

तदनन्तरमेव ब्रह्मजिज्ञासया उद्योगं च विदित्वा अस्य ब्रह्मविद्यायोग्यतामभिज्ञाय, चिरकालसेवां विना द्रव्य-प्रदानेन शुश्रूषमाणस्यास्य यावच्छक्तिप्रदानेन ब्रह्मविद्या प्रतिष्ठिता भवतीति मत्वा तमनुगृह्णन्, तस्य शोका-विष्टतामुपदेशयोग्यताख्यापिकां शूद्रशब्देनाऽऽमन्त्रणेन ज्ञापयन्निदमाह, "अह हारेत्वा शूद्र तवैव सह गोभि-रस्तु' इति । सह गोभिरयं रथस्तवैवास्तु; नैतावता मह्यं दत्तेन ब्रह्मजिज्ञासया शोकाविष्टस्य तव ब्रह्मविद्या प्रतिष्ठिता भवतीत्यर्थः । स च जानश्रुतिर्भूयोऽपि स्वशक्तयनुगुणमेव गवादिकं धनं कन्यां च प्रदायोपससाद । रैक्वः पुनरपि तस्य योग्यतामेव ख्यापयन् शूद्रशब्देनामन्त्र्ाह"आजहारेमाः शूद्र अनेनैव मुखेनाऽऽलापयि-ष्यथाः' इति । इमानि

धनानि शक्तयनुगुणानि आजहर्थं; अनेनैव द्वारेण, चिरसेवया विनाऽपि, मां त्वदभि-लषितं ब्रह्मोपदेशरूपवाक्यमालपयिष्यसीत्युक्तवा तस्मा उपदिदेश । अतः शूद्रशब्देन विद्योपदेशयोग्यताख्या-पनार्थं शोक एवास्य सूचितः; न चतुर्थवर्णत्वम् ।। ३३ ।।

1.3.34B

काले गृहीत्वा रैक्वसमीपं गतवानित्यर्थः । अह हारेत्वा शूद्रेति । अहेति निपातः, हारसहित इत्वा रथः हारेत्वा । गोभिः सह तवैवास्तु, किमनेन मम सन्तोषः? कलत्रहीनस्य मम एतद्धनरक्षणे वा का शक्तिः? किं तव वाऽल्पधनदानेन विद्या प्रतिष्ठिता भवेदिति भावः । तस्या ह मुखमुपोद्गृह्णन् उवाचेति । तस्याः जायार्थमानीतायाः राज्ञो दहितुः मुखं द्वारतां विद्याया दाने तीर्थं जानन्नुक्तवानित्यर्थः ।"ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियः । विद्यायै वाऽपि यः प्राह तीर्थानि षण्मम' इति विद्याया वचनात् । आजहारेमाश्शूद्रानेनैव मुखेनालापयिष्यथा इति । इमाः दक्षिणाः आजहर्थ । अनेनैव मुखेन विद्याग्रहणोपायेन वाचयिष्यसीत्यर्थः । ते हैते रैक्वपर्णा नाम महा-वृषे(क्षे)षु देशेषु यत्र येषु ग्रामेषु उवास उषितवान् रैक्वः, तान् ग्रामान् तस्मै रैक्वाय ददौ । तदनन्तरं तस्मै विद्यामुपदिदेशेत्यर्थः ।

क्षत्रियत्वगतेश्च - ननु महाभारते सूतात्मजमात्मानं मन्यमानस्य कर्णस्य दानपतित्वराज्याधिपतित्वादीनां श्रवणात्, अवेष्टिनये वात्तिर्के, "राज्यमविशेषेण चत्वारो वर्णाः कुर्वाणा दृश्यन्त' इत्युक्तेः दानपतित्वं शूद्रस्यापि संभवति । न च, "शक्तेनापि च शूद्रेण न

कार्यो धनसञ्चयः । शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते' इति निर्धनत्वश्रवणात् कथमस्य दानपतित्वमिति वाच्यम्-व्यासस्मृतौ शूद्रप्रकरणे, "राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिकः । पापीयान् हि धनं लब्ध्वा वशे कुर्यात् गरीयसः' इति धार्मिकशूद्रस्य धर्मार्थं धमार्जनस्य अनुज्ञातत्वादिति चेन्न, बहुदायित्वादीनां कदाचित् शूद्रे संभवेऽपि क्षत्तृप्रेषणस्य, रैक्वाध्युषितग्रामाणां तस्मै दानस्य च क्षत्रियधर्मराज्याधिपत्यसाध्यस्य तत्रासंभवात् । राज्यपालनं हि क्षत्रियस्य वृत्तिः, आपद्वृत्तित्वेनापि ब्राह्मणस्यैव संभवात् । "अजी-वंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा । जीवेत् क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः । यो मोहादधमो भूत्वा जीवेदुत्कृष्टकर्मणा । तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत्' इत्यादिस्मरणात् राज्याधिपत्यस्याशास्त्रीयत्वात् । इतिहासपुराणादिषु दर्शितस्याक्षत्रियाणामपि राज्यपरिपालनस्याशास्त्रीयतयाप्युपपत्तेः प्रकृते शास्त्रानिषिद्धराज्याधिपत्यग्रहणसंभवे निषिद्धग्रहणस्यान्याय्यत्वात् । जानश्रुत्यधि-ष्ठितराज्ये रैक्वस्य वासप्रतिपादनाच्च तस्यक्षत्रियत्वमभ्युपगन्तव्यम् । "न शूद्रराज्ये निवसेत् न पाषण्डचनैर्वृते' इति शूद्रराज्यस्य निषिद्धत्वादित्यपि द्रष्टव्यम् ।

उत्तरत्र चैत्ररथेन लिङ्गात् । त्रैवर्णिकत्वलिङ्गमित्यर्थसिद्धमिति । "सार्ववर्णिकमैक्षचरणमभिशस्तपतितवर्जम्' इति गौतमस्म-रणस्य त्रैवर्णिकालाभविषयतया व्याख्यातत्वात् नानुपपत्तिरिति द्रष्टव्यम् ।
जातिद्वयसंबन्धितयावगतायामिति । विद्यायामिति शेषः कापेयसहपाठादित्यर्थ इति ।

सहपाठावगतपरस्परसाहचर्यादित्यर्थः । तत्पुरोहितकस्य चैत्ररथत्वं सिद्धमिति । ननु, "एतेन वै चित्र-रथं कापेया अयाजयन्, तमेकाकिनमन्नाद्यस्याध्यक्षमकुर्वन् । तस्मात् चैत्ररथिर्नामैकः क्षत्रपतिर्जायत' इति द्विरात्रप्रकरणगतार्थवादे कापेययाज्यस्य चित्ररत्वावगमात् अभिप्रतारिणोऽपि चित्ररथत्वमेव स्यात्, न चैत्ररथत्वमिति चेन्न-अभिप्रतारिलक्षणसंज्ञान्तरावरु-द्धस्य चित्ररथलक्षरसंज्ञान्तरावरोधासंभवात् समानान्वयानां समानान्वययाज्यत्वस्याचिततया कापेययाज्यस्य चित्ररथवंश्यत्वे नानु-पपत्तिः । नन्वभिप्रतारिणः कापेययज्यत्वे सिद्धे तस्य चित्ररथवंश्यत्वसिद्धिः; चित्ररथवंश्यत्वे च क्षत्रियत्वनिर्धारणम्; क्षत्रियत्वे च निर्धारिते साहचर्यात् जानश्रुतेरपि

क्षत्रियत्वनिश्चय इति प्रणाडी न संभवति, अभिप्रतारिणः कापेयसाहचर्यमात्रेण कापेययाज्यत्व-स्यैवासिद्धेः । न हि कापेयाभिप्रतारिणोरेक िभोजनं याज्ययाजकभावाधीनम्; नानादेशागतानां परस्परसंबन्धशून्यानामेकत्र भोजन-

१.३.३६

दर्शनात् । यौनमौखसंबन्धान्तरसद्भावाच्च । अस्तु वा अभिप्रतारिणः कापेययाज्यत्वम् । नैतावता तस्य चैत्ररथत्वसिद्धिः, कापेयानां चैत्ररथयाजकत्ववत् पुरुषान्तरयाजकत्वस्यापि संभवात् । अस्तु वाऽभिप्रतारिणः क्षत्रियत्वम्; तथापि तत्समभिव्याहारमात्रेण शूद्रे-त्यामन्त्र्यमाणस्य जानश्रुतेः क्षत्रियत्वे प्रमाणाभावादिति चेत्- अविदितपूर्वस्य हस्तिनो निकटे पुरुषे दृश्यमाने, तस्मिंश्च राज्ञो हस्ति-पकोयमिति प्रत्यभिज्ञायमाने सति अयमस्य अस्तिपकस्य शिक्षणीयो हस्ती, राजकीयश्चेति बुद्धिरौत्सर्गिकी जायते । एवमिहापि अभिप्रतारिसन्निधौ कापेये श्रूयमाणे, तस्मिंश्च श्रुत्यन्तरबलात् चित्ररथयाजकत्वेन प्रत्यभिज्ञायमाने, कापेययाज्योऽयमभिप्रतारी चित्ररथवंश्यश्चेति बुद्धिर्जायमाना न निवारयितुं शक्यते । सा च बाधकाभावात् प्रमाणमवतिष्ठते इत्यौत्सर्गिकन्यायमवलम्ब्योच्यते । एवं च ब्राह्मणद्वितीयस्याभिप्रतारिणः चैत्ररथत्वेन क्षत्रियत्वनिश्चये तत्समभिव्याहारात् ब्राह्मणस्य रैक्वस्य द्वितीयो जानश्रुतिरपि क्षत्रिय इति निर्धारणं युक्तमेव; अन्यथासिद्धक्षत्तृप्रेरणादिलिङ्गसाहचर्यादिति द्रष्टव्यम् ।।

संस्कारपरामर्शात्तदभावाभिलापाच्च । भाष्ये न च संस्कारमर्हतीति । ननु तत्रैव मानवे धर्मशास्त्रे,

"धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तिमनुव्रताः । मन्त्रवर्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च' ।। इति

तदनन्तरश्लोके धामिर्कशूद्राणां मन्त्रवर्जसंस्काराणामभ्यनुज्ञानं कृतम् । न चामन्त्रकसंस्कारो न विद्योपयोगीति वाच्यम्-स्त्रीणामपि मैत्रेयीप्रभृतीनां तदभावप्रसङ्गादिति चेन्न-संस्कारान्तरसत्त्वेऽपि,"शूद्रश्चतुर्थो वर्ण एकजातिः' इत्युपनयनसंस्कारस्य निषेधात् उप-नयनसत्त्वे जन्मद्वयप्रसङ्गेन द्विजत्वप्रसङ्गात् । नन्वध्यनाङ्गमुपनयनं प्रस्तुत्यैव, "तद्वितीयं जन्मे'त्युच्यते; न तु ब्रह्मविद्याङ्गं प्रस्तुत्येति

१.३.३८

चेन्न- "त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसी'ति वैदिकलिङ्गेन ब्रह्मविद्याङ्गोपनयनस्यापि जन्मान्तरत्वात् । नन्वेवं द्विजातीनां ब्रह्मविद्याङ्गोपनयनेन जन्मान्तरोपपत्तौ त्रिजन्मत्वप्रसङ्ग इति चेन्न-इष्टापत्तेः ।

"मातर्यग्रेऽथ जननं द्वितीयं मौञ्जिबन्धने । तृतीयं यज्ञदीक्षायां द्विजस्य विधिचोदितम्' ।। इति

मनुना यज्ञदीक्षाया अपि जन्मान्तरत्वाभिधानात् । "अनृतात् सत्यमुपैमि', "मानुषाद्दैवमुपैमि', "दक्षिणं पूर्वमाङ्क्ते । सव्यं हि पूर्वं मनुष्या आञ्जत' इति मन्त्रार्थवादलिङ्गैराधानपूर्वकयज्ञदीक्षायां मनुष्यतोत्तीर्णदेवजन्मत्वसूचनाच्च । ननु केकयराजाजातशत्रुप्रभृते-रुपनयनाभावेपि विद्योपदेष्टृत्वं दृश्यते । यथा "ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान् हानुपनीयैवैतदुवाच । बालाकिस्समि-त्पाणिः प्रतिचक्राम, "उप त्वा यानी'ति; तं होवाचाजातशत्रुः, प्रतिलोमरूपमेव स्यात्, यत् क्षत्रियो ब्राह्मणमुपनयेत् । व्येवत्वा ज्ञापयिष्यामीति । ततश्च उपनयनाभावेऽप्युपदेशदर्शनात् शुर्द्रेऽपि तथात्वमस्त्विति चेन्न-तत्राब्रह्मणानां ब्राह्मणोपनयनस्यायुक्ततया बाधकबलात् तथाभावेऽपि अन्यत्रउपनयनस्याऽऽवश्यकत्वादिति भावः ।

तदभावनिर्धारणे च प्रवृत्तेः । भाष्ये शूद्रत्वाभावनिर्धारण इति । ननु, "नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहर । उप त्वा नेष्य' इति अब्राह्मणत्वभावनिर्धारणस्यैव दर्शनेन शूद्रत्वाभावानिर्धारणात् अयुक्तमिदम् । किञ्च एतल्लिङ्गवशात् अब्राह्मणानां क्षत्रि-यादीनामप्यधिकारो न स्यात् । किञ्चेदमुपनयनं न ब्रह्माविद्याङ्गम्; अपि त्वध्ययनाङ्गम् । सत्यकामस्य पूर्वमकृताध्ययनत्वात् । एव-मुपाख्यायते-सत्यकामो ह जाबालो जबालां

मारमामन्त्रयाञ्चक्रे, "ब्रह्मचर्यं भवति ! विवत्सामि किंगीत्रोन्वहमस्मीति । सा हेनमुवाच, नाहमेतद्वेद तात ! यद्गोत्रस्त्वमसीति । बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे । साऽहमेतन्न वेद, यद्गोत्रस्त्वमसि । जबाला तु

१.३.३९

नामाहमस्मि । सत्यकामो नाम त्वमसि । सत्यकाम एव जाबालो ब्रवीथाः' इति । स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्यं भवति विवत्सामि, उपेयां भवन्तमिति । तं होवाच किंगोत्रो नु सोग्यासीति । स होवाच नाहमेतत् वेद भो यद्गोत्रोहमस्मीति । अपृच्छं मात-रम् । सा मा प्रत्यब्रवीत्, "बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे, साहमेतन्न वेद यद्गोत्रस्त्वमसि; जबाला तु नामाहमस्मि । सत्यकामो नाम त्वमसीति । सोऽहं सत्यकामो जाबालोऽस्मि भो इति । तं होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहर । उप त्वा नेष्ये । न सत्यादगाः इति । तमुपनीये'त्यादि । ततश्चास्यामाख्यायिकायामुक्तं गोत्रापरिज्ञानमकृताध्ययनाङ्गोपनयनस्य बालस्य संभवति; न तु उपनीतस्याधीतसाङ्गस्वाध्यायस्य ब्रह्मविद्याधिजिगिमिषया गुरुमुपसीदतः । ततश्च कथमेतदुच्यत इति चेत्- उच्यते । नैतद्ब्राह्मणो विवक्तुमर्हतीत्यत्राब्राह्मणपदस्य शूद्रपरत्वमेव वक्तव्यम् । सत्यवचनं हि शूद्रे असंभावितम् । "अनृतञ्चातिवादश्च पैशुन्य-मतिलोभता । विकृतिश्चाभिमानश्च जन्मतः शूद्रमाविशत्' इति स्मृतिवशात् शूद्रे ईदृशसत्यवचनमसंभावितमितिहि गौतमस्याभिस-न्धिर्युज्यते । नान्यथा । किञ्च त्रैवर्णिकानामुपनयनस्य श्रुतिसिद्धतया क्षत्रियत्वाद्यभावनिर्धारणस्योपनयनाप्रयोजकत्वात् साधारणोप्य-ब्राह्मणशब्दः शूद्रमात्रपर एव प्रकृते उचितः । यच्चोक्तमध्ययनाङ्गमेवेदमुपनयनमिति-तन्न । उत्तरत्र षोडशकलब्रह्मविद्योपदेशस्यापि दर्शनादुभयार्थमेवेदमुपनयनम् । तादृशे चोपनयने प्रवर्तमानो गौतमः शूद्रत्वाभावं निश्चित्यैव प्रववृत इति दर्शनात् उभयविधेप्युपनयने शूद्रत्वाभावोपेक्षित इत्येवावसीयते । यदि ब्रह्मविद्याङ्गोपनयने शूद्रत्वाभावो नापेक्षितः; अपित्वध्ययनाङ्गोपनयन एवेत्युच्येत-तर्हि ब्रह्मविद्याङ्गमुपनयनं सत्यकामस्य जातिमपरीक्ष्यैव कुर्यात्, अतोऽवसीयते, द्विविधेत्युपनयने शूद्रत्वाभावोऽपेक्षित इति ।

१.३.३९

स्मृतेश्च । स्मृतिशब्दविवक्षितमिति । श्रवणाध्ययनार्थप्रतिषेधस्मृतित्वेन विवक्षितमित्यर्थः । ततश्च श्रवणाध्ययनप्रायश्चित्तस्मृ-तिवचनस्य कथं निषेधस्मृतिवचनत्वमिति न शङ्कनीयमिति भावः । भाष्ये विपरीतवासनायां निवृत्तायां ज्ञानमुत्पत्स्यत इति । ननु मनुष्याणां बहूनि ब्रह्मविद्योत्पत्तिप्रतिबन्धकानि दुरितानि । तत्र यानि विविदिषोत्पत्तिप्रतिबन्धकानि, तानि च वेदानुवचनयज्ञदा-नाद्यपूर्वनिवर्तनीयानि; यानि चोत्पन्नविविदिषस्यापि श्रवणादिसाधनसंपत्तिविघटकानि, तानि च सन्यासापूर्वनिवर्तनीयानि; यानि च संपन्नश्रवणस्यापि असंभावनाविपरीतभावनाबाहुल्यापादनमुखेन अविद्यानिवर्तकब्रह्मसाक्षात्कारोत्पत्तिप्रतिबन्धकानि, तानि च वेदान्तश्रवणादिनियमसंपाद्यादृष्टनिवर्त्यानि । ततश्च कथं शूद्रादीनां श्रवणनियमसंपाद्यादृष्टविधुराणामधिकार इति चेन्न-नियमा-दृष्टवैगुण्यमात्रेण दृष्टफलानिष्पत्तेः क्वाप्यदर्शनात् । उपनयनाङ्गकाध्ययननियमादृष्टवैगुण्येऽपि दृष्टफलस्याक्षरराशिग्रहणस्य अर्थज्ञानस्य वा अनुत्पत्तेरदर्शनात् । इयांस्तु विशेषः-नियमस्य क्रत्वर्थत्वे नियमादृष्टवैगुण्ये क्रतोर्वैगुण्यं पुरुषः प्रत्यवैति । यथा द्रव्यार्जनोपायनि-यमवैगुण्ये । ततश्च श्रवणनियमस्य च क्रत्वर्थत्वाप्रसक्तेः तद्वैगुण्ये पुरुषः प्रत्यवैतीत्येतावद्वक्तव्यम् । ततश्च यस्तूत्पन्नब्रह्मविविदिषः शूद्रो वाऽन्यो वा प्रत्यवायमप्युभ्युपेत्य उत्पन्नमपि प्रत्यवायं ब्रह्मज्ञानेन निर्धक्ष्यामीति बुद्धया लौकिकभाषाप्रबन्धादिषु प्रवृत्तः तस्य नियमा-दृष्टमन्तरेणापि ज्ञानोत्पत्तेः दुर्निवारत्वात्, उत्पन्ने च ज्ञाने अविद्यानिवृत्तेः दुनिर्वारत्वाच्च परेषां मतमसमञ्जसमिति पश्यामः । भाष्ये-

१.३.३९

प्रत्यक्षानुमानवृत्तेति । वृत्तं बोधनमित्यर्थः । साङ्कयहैरण्यगर्भेति ।
साङ्ख्यादिभिर्नैसर्गिकव्यवहारविरुद्धकर्तृत्वादिविरुद्धात्म-स्वरूपप्रत्यायने सति साधकबाधकप्रमाणस्वरूपशोधनेच्छया

प्रत्यक्षानुमानप्रकारबुभुत्सा भवत्येवेति न प्रसञ्जनार्थं वेदान्तापेक्षेति भावः । परमकारणत्वोपयोगीति । "समाननामरूपत्वाच्चावृत्तावप्यविरोधः' इतिसूत्रे चतुर्मुखाद्युपादकत्वेन परमात्मनः परमकारणत्वस्याऽऽविष्करणादिति भावः । मधुविद्यायामुक्तमिति । "अथ तत ऊर्ध्व उदेत्य, नैवोदेता नास्तमेते'त्यादिभागस्य कारणा-

१.३.३९

वस्थजीवान्नर्यामिपरत्वस्य तत्र प्रतिपादनादिति भावः । परमात्मविषयत्वं ज्ञापितमिति । यद्यपि "वायुर्वाव संवर्गः । यदा वा अग्नि-रुद्वायति वायुमेवाप्येती'त्यादिना अग्न्याद्यप्ययाधारत्वस्य परमात्मलिङ्गत्वात् संवर्गविद्यायाः परमात्मपरत्वं सिद्धवत्कृत्यैव पूर्वोत्तर-पक्षयोः प्रवृत्तिर्दृष्टा; न तु तदधिकरणे तद्विद्यायाः परमात्मपरत्वसमर्थनं दृष्टम्-तथाऽपि यथाकथंचित् तस्मिन्नप्यधिकरणे कारणत्वा-नुबन्धिविचाररूपत्वमस्तीति सङ्गत्यतिशयोऽस्तीति भावः । अत्रापीति । समन्वयाध्यायेऽपीत्यर्थः ।।

१.३.४०

कम्पनात् । परमात्मपरत्वेनोपपादितेति । ननु, "यदिदं किञ्चे'ति वाक्ये परमात्मपरत्वस्य निश्चितपरमात्मप्रतिपादकभावा-ङ्गुष्ठवाक्यद्वयमध्यगतत्वोपपाद्यत्वे, सिद्धान्ते कम्पनस्याङ्गुष्ठवाक्यपरमात्मपरत्वोत्तम्भकत्वं न स्यात्; तन्निर्वाह्यस्य तन्निर्वाहकत्वा-योगादिति चेन्न-पृथगधिकरणवादिपररीत्या दूषणदाने दोषायोगात् (भावात्) । यद्वा एतदस्वरसादाह अस्मिन्नेव मन्त्र इति । पूर्वपक्षानुदय इति भाव इति । इदमप्यत्रानुसन्धेयम्-कम्पनादित्यस्य, शब्दादेव प्रमित इत्यधिकरणशेषतया तदुत्तम्भकहेतूपन्या-सरूपत्वे, "नित्यो नित्यानां चेतनश्चेतनानाम्', "तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते' इत्यादिसंप्रतिपन्नपरमात्मपरभाववाक्यार्थ-स्यैवोत्तम्भकतया सूत्रणसंभवे किमनेन विप्रतिपत्तिशङ्कास्पदप्राणवज्रश्रुतिघटितवाक्यार्थभूतकम्पनोपन्यासेनेति न वाच्यम्-सर्वथा पूर्वपक्षानुत्थित्या पृथगधिकरणत्वशङ्काया असंभवेन, शब्दादेव प्रमित इत्यधिकरणशेषत्वस्यैव वक्तव्यतया कम्पनशब्दस्य विनिगमनाविरहेण (नाभावेन) ज्योतिर्दर्शनव्यतिरिक्तप्राकरणिकधर्मोपलक्षकत्वसंभवेन कम्पनादिति सूत्रे अनुपपत्त्यभावादिति । "प्राणः कम्पनादित्यश्रवणादिति । एतेन कम्पनादित्यस्य व्यवहितप्रमिताधिकरणशेषत्वे, "आकाशोऽर्थान्तरत्वादिव्यपदेशा'दित्यस्यापि उक्तरीत्या दहराधिकरणशेषत्वं किं न स्यादिति वाचाटवचसोऽपि नावकाश इति द्रष्टव्यम् । वायुनिमित्तमेवेति । वायोरेवाशनि-रूपेण परिणामेन तस्यैव महाभयहेतूद्यतवज्ररूपत्वसंभवादित्यर्थः । वज्रशब्देन न पञ्चवृत्तिप्राणशङ्का भवतीति । यद्यपि प्राणश्रुति-बलादाध्यात्मिकः पञ्चवृत्तिर्वायुरभिधीयते; वज्रश्रुतिबलाच्चाशन्याकारेण परिणतो बाह्यवायुरभिधीयते । प्राणमात्रस्य वज्रोद्यमन-

१.३.४०

हेतुत्वासंभवात् । अत उभयोश्चिन्तनं संवर्गविद्यावत् क्रियत इत्येव तेषां पूर्वपक्षः । तथैव स्पष्टं कल्पतरावभिधानात् । वाचस्पतिनाऽपि प्राणवज्रश्रुतिबलात् वाक्यं प्रकरणं च भङ्क्तवा आध्यात्मिकप्राणो बाह्यवायुश्चात्र प्रतिपाद्यते इत्यभिधानाच्च-तथाऽपि तद्भाष्ये पुर्वपक्षे वायुरेव प्रतिपत्तव्य इत्युपसंहारदर्शनात् एवविषयत्वप्रतीतेः तथाभिप्रायसंभवमभिप्रेत्य तथोक्तमिति द्रष्टव्यम् । लक्षणाप्रसङ्गादिति भाव इति । न च बिभेत्यस्मादितिव्युत्पत्तिसंभवात् न लक्षणेति वाच्यम्-भयशब्देन भयहेतुप्रतीतेः असति बाधकेऽनुदयेन तत्प्रतीतेर्लक्षणैक-शरणत्वादिति भावः । अध्याहारादपीति । इवशब्दस्याध्याहारादपीत्यर्थः । अत एव पूर्वतन्त्रे प्रयुक्तिलक्षणे (४-२-२.) प्राचीमाह-रतीत्यत्र प्राचीशब्दस्य दिग्वचनत्वा मुख्यत्वसत्त्वेऽपि आहर्तव्यत्वासंभवेन प्रतिशब्दाध्याहारबलात् प्राचीशब्दः प्रागग्रशाखरलक्षक इत्याश्रितमिति भावः । कथं हेतुत्वावगम इति ।

भयमितिश्रूयमाणे भयादित्यर्थः कथं लभ्यत इत्यर्थः । पूर्वमवतारितस्य भाष्यस्य भया-
दस्यादिभाष्यद्वयस्याभिप्रेतामाशङ्कान्तरनिवृत्तिमप्याह एवंतर्हीति । अथवाऽत्र यद्वेत्यध्याहारः ।
प्रथमान्तपदसामानाधिकरण्य-स्वारस्यभङ्ग इति । प्रथमान्तपदत्वभङ्गः भयशब्दस्य
वज्रपदसामानाधिकरण्यस्वारस्यभङ्गश्चेत्यर्थः । इवशब्दाध्याहारश्च स्यादिति । लक्षणा च स्यादित्यर्थः ।
अध्याहारस्य पूर्वमेव निरस्तत्वात् । यद्यपि वज्रशब्दस्य लक्षणा सर्वपक्षसाधारणी, तथापि पूर्वदूषणे तात्प-र्यम् ।
प्रथमाया विहितत्वादिति । यद्यपि सुपांसुलुगिति सूत्रे स्वादेश एव विहितः, तथापि प्रथमैकदेशवचनस्य
प्रत्यभिज्ञायमानतया तस्यैव विधानमभिप्रेत्य प्रथमाया विहितत्वोक्तिः । यद्वा सुपां सुपो भवन्तीति तत्सूत्रवार्तिकेन
सर्वासामपि विभक्तीनां स्थाने सर्वासा-

१.३.४१

मपि विभक्तीनां विधानात् प्रथमाया अपि सर्वविभक्तिस्थाने विहितत्वमभिप्रेत्यैतदुक्तमिति द्रष्टव्यम् । सुपां सुपो
भवन्तीत्यादीनाम्, "व्यत्ययो बहुल'मिति सूत्रविहितविभक्तिव्यत्ययो वेत्यर्थः । सक्तून् जुहोतीत्यादौ
विभक्तिव्यत्ययदर्शनात् दर्शनं न दोष इति भावः ।

ज्योतिर्दर्शनात् । एतत्प्रकरणहेतुत्वमेवेति । अङ्गुष्ठप्रमितवाक्यद्वयमध्यगतस्यास्य मन्त्रस्य तत्प्रकरणभङ्गेन
प्राकृततेजोधातुपर-त्वशङ्का न युक्तेति दशर्यतीत्यर्थः । ज्योतिष्मद्भ्राजमानं महस्वदिति । न चात्रापि
ज्योतिश्शब्दस्य तेजःपरत्वसम्भवात् दीप्तिपरत्वं (न?) संप्रतिपन्नमिति वाच्यम्-महस्वदित्यनेन पुनरुक्तिप्रसङ्गादिति
भावः । आप्यायनं च दृष्टमिति । अनुग्रहश्च दृष्ट इत्यर्थः । ननु प्राकृततेजसोऽनुग्राहकत्वातिरेकेण
निमित्तत्वस्याभावात् निमित्तत्वानुग्राहकत्वे तृतीयतुरीयपादप्रतिपाद्ये इत्युक्तिः कथमित्याशङ्कय-
सत्यमनुग्राहकत्वपर्यवसितं निमित्तत्वम्, तथापि तेजउत्पत्तौ तत्कारणानुग्राहकत्वलक्षणनिमित्तत्वं तृतीयपरदरर्थः,
उत्पन्नस्य तेचसः स्वकार्यारम्भसामर्थ्यापादकत्वलक्षणमनुग्राहकत्वं तुरीयपादार्थ इत्यभिप्रयन्नाह
निमित्तकारणत्वञ्चेत्यादि । तस्मिन् भासमान इति । अनन्तगुणविशिष्टपरमपुरुषे भासमान एव प्रपञ्चाध्यास
इत्यस्याभावेन तत्स्फुरणानुरोधि अध्यस्तप्रपञ्चस्फुरणमित्यस्यानुपपत्तेरित्यर्थः ।

१.३.४१

न हि तन्मतेपि विशिष्टभानानुविधानभानं प्रपञ्चस्याभ्युपगतम्; अपितु शुद्धस्यैवाधिष्ठानतया
तद्भानानुविधानमेवाभ्युपेतमिति भावः । व्यवच्छेद्यतेजोन्तरासंभवादिति । अन्यं भान्तं नानुभातीत्येवं
व्यवच्छेद्यानुभानयोग्य तेजोन्तरापसक्तेरित्यर्थः । प्रकरणस्य रुक्मवर्ण-श्रुतीति । मुण्डके, "न तत्र सूर्यो भाती'ति
प्रकरणगतया, "यदा पश्यः पश्यते रुक्मवर्णम्' इति रुक्मवर्णश्रुत्या, कठवल्याम्, "न तत्र सूर्यो भाती'ति
प्रकरणगतेन, अङ्गुष्ठमात्रः पुरुष इत्यादिपुरुषशब्देन प्रत्यभिज्ञाप्यमानया, "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं
तमसः परस्तात्' इत्यादित्यवर्णश्रुत्या च सिद्धा या दिव्यविग्रहद्वारकनिरतिशयदीप्तिः, तद्विशिष्ट इत्यर्थः ।
उत्थानश्रुतिरिति । ब्रह्मणः सर्व-गतत्वेन तत्प्राप्तौ शरीरादुत्क्रमणस्यानपेक्षितत्वात् ब्रह्मसाक्षात्कारानन्तरभाविन्यां
ब्रह्मप्राप्तौ उपसंपद्येति क्तवाप्रत्ययेन तत्पूर्वभावित्व-

१.३.४१

निर्देशस्यानुपपन्नत्वाच्च, "शतञ्चैका च हृदयस्य -नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति
विष्वङ्ङन्या उत्क्रमेण भवन्ती'त्युपासकानां मूर्धन्यनाड्या शरीरात् समुत्थानस्य, "यावत् क्षिपेन्मनः,तावदादित्यं
गच्छे'दिति तदनन्तरमेव आदित्यप्रा- प्तेश्च वर्णितत्वात् इहापि "शरीरात् समुत्थाय,' "परं ज्योतिरुपसंपद्ये'ति
शब्दाभ्यां तदर्थप्रत्यभिज्ञानात्, आदित्यज्योतिषश्च मार्गे प्रथमपवर्भूतार्चिर्ज्योतिरपेक्षया परत्वेन कथञ्चित्
परत्वोपपत्तेः, आदित्यं प्राप्तस्य च ब्रह्मलोकप्राप्त्यनन्तरभाविक्रममुक्तयभिप्रायेण, "स्वेन रूपेणाभिनिष्पद्यत'

इत्यस्याप्युपपत्तेश्च अर्चिरादिभार्गपर्वभूतादित्यप्राप्तिरेव,"परंज्योतिरुपसंपद्ये'ति वाक्यार्थ इति पूर्वपक्ष-हेतुरुपन्यस्त इति चेदित्यर्थः । वक्ष्यमाणत्वादिति । चतुर्थाध्याय इति शेषः । हेतुप्रयोगानन्तरमेवेति । "उवराच्चेदाविर्भूतस्वरूपस्तु' इति सूत्रे आविर्भूतस्वरूप आत्मा प्रजापतिवाक्ये अपहतपाप्मत्वादिगुणकतया प्रतिपाद्यते; न तु कर्तृत्वाद्यनर्थाश्रयो जीव इत्युक्ते-

१.३.४२

न प्रजापतिवाक्ये आविर्भूतस्वरूपस्य प्रतिपाद्यता; किन्तु परंज्योतिरुपसंपद्येत्यादित्यं प्राप्तस्य बद्धस्यैवेति हेत्वसिद्धौ शङ्कितायां तत्परिहारपरस्य ज्योतिर्दर्शनादिति सूत्रस्य तत्रैव निवेशो युक्त इत्यर्थः । अपरे त्वाहुरिति । तुशब्दोऽप्यर्थः । अपरेप्येवमेवाहुरित्यर्थः । ततश्च पूर्वोक्तपक्षादस्य पक्षस्य किं वैषम्यमिति शङ्का निरस्ता ।। ।। इति प्रमिताधिकरणशेषः ।।

आकाशोऽर्थान्तरत्वादि व्यपदेशात् । आकाशो हवै नामेत्यादीति । आकाशो ह वै नामरूपयोरित्यपि केचित् पठन्ति; आकाशो वै नामरूपयोरित्यपि पाठो दृश्यते । अतः पाठद्वयमपि प्रामाणिकमेवेति द्रष्टव्यम् । स्ववाक्ये परमात्मलिङ्गेति । ननु शाङ्करभाष्ये, द्रष्टृत्वादेः ब्रह्मलिङ्गस्याश्रवणादित्येवोच्यते; न स्ववाक्य इति, ततः कथमिदमुच्यते स्थवाक्य इतीति चेन्न-"ते यदन्तरा तद्ब्रह्म; तदमृतम्; स आत्मे'ति वाक्ये परमेव ब्रह्म प्रतिपाद्यते । आकाशो ह वै नामरूपयोर्निर्वहितेत्यंशे तु आकाशशब्दप्रसिद्धया अवकाशद्वारेण नामरूपयोः निर्वोढा भूताकाशो ब्रह्मप्रतिपत्त्युपायतया प्रतिपाद्यत इति वाचस्पत्यभिमतपूर्वपक्षं हृदि निधाय, तत्र च, आकाशो वै नामरूपयोः निर्वाहितेत्येतावदेव स्ववाक्यम्, तत्र च परमात्मलिङ्गं नास्तीति वक्तुं स्ववाक्य इत्युक्तमिति द्रष्टव्यम् ।

१.३.४२

अन्योन्यनिर्वाह्यनामरूपस्येति । ननु मुक्तस्याप्यन्यनिर्वाह्यनामरूपत्वं समानम् । तदपि न साम्प्रतिकीमवस्थामादायोपपादयितुं शक्यते; अपि तु भूतपूर्वगत्या । ब्रह्मात्मशब्दयोश्च न स्वारस्यम् । ततश्चाकाशश्रुतिमूलस्य पराभिमतपूर्वपक्षस्य नामरूपनिवोढृत्व-रूपलिङ्गबलात् अनुत्थितौ कथं प्रकरणमात्रशरणस्य मुक्तपूर्वपक्षस्योत्थिरिति चेत्-उच्यते । न प्रकृतत्वमात्रमवलम्ब्य मुक्तपूर्वपक्ष-मुत्थापयामः । "अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्यत स्वेन रूपेणाभिनिष्पद्यत' इति वाक्यप्रतिपाद्ययोः कालभेदेन नाम-रूपभाक्तवतद्राहित्ययोः, "निर्वहिता ते यदन्तरे' त्यत्र प्रत्यभिज्ञानात्, "नामरूपयोः निर्वहिता ते यदन्तरे'त्यत्र पूर्वं निरूढनामरूपस्य

१.३.४२

पश्चात्ततद्विमुक्तस्यैव मुक्तस्य प्रतीतेः, "य एषोक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतभयमेतद्ब्रह्मे'ति अव्यवहितप्रजा-पतिवाक्ये आत्मत्वब्रह्मत्वामृतत्वादीनामपि मुक्ते श्रवणेन तेषामेव शब्दानामिह प्रत्यभिज्ञायमानत्वात्, आकाशाधिकरणदहराधि-करणयोः आकाशशब्दस्य यौगिकत्वसमर्थनेनाकाशत्वस्याप्युपपत्तेः मुक्तपूर्वपक्षोत्थाने न दोष इति द्रष्टव्यम् ।

मुक्तात्मपरत्वं वदद्भिरेवेति । "ते यदन्तरा तद्ब्रह्मे'त्ययमंशो मुक्तात्मपरः । "आकाशो ह वै नामरूपयोर्निर्वहिते'त्यंशस्तु भूता-काशपर इति पूर्वपक्षितमित्यर्थः । अनेन वाचस्पतिपक्षापेक्षया वैषम्यमुक्तं भवति । श्रुत्यनुवाद इति । इतरथा निर्वोढेति रूपप्रसङ्गा-दितिभावः । एवमुत्तरत्र सर्वत्रापि द्रष्टव्यम् । बुद्धसौकर्यार्थमाह । राद्धान्त इति । प्रदर्श्यत इति । प्रतिज्ञामन्तरेणापि प्रदर्शनसंभवात् वक्ष्यमाणरीत्या एकवाक्यतायाञ्च संभवन्त्यां तत्परित्यागस्यानुचितत्वञ्च पक्षान्तरमाह यद्वा नामरूपयोः निर्वहितेति । व्यपदेश

१.३.४२

इत्यन्वय इति । यद्यप्यस्मिन् पक्षेपि अस्तिभवतिविद्यतीनामन्यतमाध्याहारोऽपेक्षितः-तथापि स न दोषायेति भावः । ननु नामरूपयोः निर्वोढृत्वव्यपदेशस्य कथमर्थान्तरत्वशब्दित व्यपदेशत्वमित्यत आह तदुपपादकधर्मं लक्षयतीति । अर्थान्तरत्वव्यपदेशादित्यस्य भेदकव्यपदेशादित्यर्थ इति भावः । कथं मुक्तस्यानन्तरमभिधानमिति । मुक्तस्यैवाभिधानमिति पूर्वपक्षिणोऽभिमानात् तथोक्तिरिति द्रष्टव्यम् । भाष्ये-सत्यसङ्कल्पत्वाच्च निर्वहितेत्यर्थ इति । ननु, ते यदन्तरेति नामरूपास्पृष्टत्वकथनेन तद्धेतुभूतपाप्नराहित्यस्याक्षेप-संभवेन अपहतपाप्मत्वस्योक्तिसंभवेऽपि सत्यसङ्कल्पत्वस्य प्रदर्शनाभावेन कथम्, ते यदन्तरेत्यनेन तदुपपादनमिति चेन्न-अपहत-

पाप्मत्वस्योक्तिसंभवेऽपि सत्यसङ्गल्पत्वस्य प्रदर्शनाभावेन कथम्, ते यदन्तरेत्यनेन तदुपपादनमिति चेन्न-अपहतपाप्मत्वे सत्यस-ङ्कल्पत्वस्याप्यवश्यम्भावेन तत्प्रदर्शनस्यापि संभवे, "ते यदन्तरे'त्यस्य नामरूपयोर्निर्वहितेत्येतदर्थोपपादकत्वमिति द्रष्टव्यम् । ज्ञानतो बृहत्त्वमिति । जीवबृहत्त्वे ज्ञानपरमात्मप्रसादानुपाधी इति भावः । ननु ब्रह्मणोऽभिसंभाव्यतया निर्देशः कथमप्रधानप्रकृतत्वसूचक इत्याशङ्कय यद्यपीत्याक्षेपभाष्यखण्डस्याभिप्रायमाह प्रथमानिर्दिष्टस्याभिसंभवितुरित्यादिना स्वारस्येपीत्यन्तेन । अवान्तरप्रकरणेनेत्यादि । धूत्वा शरीरमिति वाक्ये जीवपरौ प्रतिपाद्येते इति निर्विवादम् । तत्र प्रजापतिवाक्यरूपावान्तरप्रकरणबलात् तस्य जीव-परत्वे, अन्यार्थश्च परामर्श इतिन्यायेन तत्र ब्रह्मपरामर्शः, प्रजापतिवाक्यान्तर्गते, "एष संप्रसादोऽस्माच्छरीरा'दिति वाक्ये इव जीव-प्राप्यप्रतिपादनतया जीवार्थः स्यात् । महाप्रकरणबलात् परब्रह्ममहिमप्रतिपादकत्वे दहरविद्यान्तर्गते, "एषसंप्रसाद' इति वाक्ये जीव-परामर्शस्य ब्रह्ममाहात्म्यप्रतिपादनशेषत्ववत्, "धूत्वाशरीर'मिति वाक्येऽपि जीवपरामर्शः परब्रह्ममहिमप्रतिपादनार्थः स्यादिति भावः । भाष्ये प्राप्यतयोपसंह्रियत इति । ननु, "इति ह प्रजापतिरुवाचे'ति पूर्वमेव द्विरुक्तया प्रकरणसमाप्तेर्दर्शितत्वात् कथं "ब्रह्मलोकमभि-संभवामी'त्युपसंहार इति चेत्-जीवावान्तरप्रकरणस्य समापितत्वेऽपि दहराकाशमहाप्रकरणस्यासमापितत्वेनास्य मन्त्रस्य तच्छेषत्वा-दिति भावः । सूत्रकारैरितःपूर्वमकृतत्वादिति । "अनुकृतेस्तस्य च', "अपि स्मर्यत' इति सूत्रयोरपि मुक्तभेदे सावकसद्भावमात्रप्रद-

र्शनपन्त्वेन ऐक्योपदेशादिपरिहारस्य तत्राकृतत्वादिति भावः । यद्यपीहापि साधकप्रमाणमेवोपन्यस्यते-तत्राप्यस्य सूत्रद्वयस्य साधक-प्रमाणादाढ्यार्पादन्मुखेन ऐक्योपदेश-भेदनिषेधश्रुत्यन्यथाकरणपर्यन्तत्वमस्तीति भावः । वस्तुतस्तु पूवर्तन्त्रे प्रथमपादे सिद्धस्यैव चोद-न्यप्रामाण्यस्य, "श्रुतिलक्षणमानुपूर्व्यम्' इति पुनः कथनवत् पूर्वसिद्धमुक्तभेददाढ्यार्य पुनः प्रतिपादनोपपत्तिः । मुक्तप्राप्ततयोक्तस्येति । "अश्व इव रोमाणी'ति पूर्ववाक्य इति शेषः । परस्परसापेक्षयोरेव ऐक्योपदेशभेदनिषेधयोः साध्यसाधकत्वं मन्वान आह इतरेतरयोगे वेति । स्वग्रन्थे निर्दिष्टमिति । ततश्च यत्र यत्र निर्वहितेति श्रूयते, तस्य सर्वस्यापि श्रुत्यानुवादरूपत्वेन स्वग्रन्थत्वाभावात् नासाधुत्व-

मिति भावः ।

पत्यादिशब्देभ्यः । ननु, "सर्वस्य वशी सर्वभ्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कर्मणा कनीयान्, एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाये'ति हि श्रुतिक्रमः । ततश्च कुतः तत्परित्यागेन भाष्ये व्युत्क्रमेण श्रुत्युपन्यास इ या(त्यत्रा?) ह सूत्र पत्यादिशब्देभ्य इतीति । वाक्यस्य पूर्वमितीति । "तस्य परमाम्राडितम्' इति निर्देशेन अवयववाचिपूर्वादिशब्दयोगे षष्ठी भवतीति ज्ञापितत्वात् षष्ठयाः

साधुत्वं द्रष्टव्यम् । न च, "स न साधुना भूयान्' इत्यादिवाक्यस्य सर्वस्याधिपतिरिति वाक्यं नावयवः; येन पूर्वशब्दस्यावयववाचित्वं स्यादिति शङ्कयम्-स न साधुना कर्मणा भूयानित्यादिवाक्यस्येति

१.३.४४

टीकागतस्य शब्दस्य प्रकरणगतवाक्यमात्रपरत्वादिति द्रष्टव्यम् । पश्चात् एष भूताधिपतिरिति वाक्यमिति । श्रुतौ पठितमिति शेषः । तन्त्रेण क्रोडीकारार्थमिति । बहुव्रीहितत्पुरुषाभ्यां पतिशब्दद्वयमध्यवर्तिनाम्, "स न साधुते'त्यादि वाक्यानामेत्यादरेण क्रोडाकरणा-र्थमित्यर्थः । ननु वश्यादिशब्देभ्य इत्युक्तावपि पूर्वोत्तरवाक्यानां क्रोडीकारमात्रं सिध्यतीत्यस्वरसादाह अभ्यासरूपेति । प्रथमश्रुतव-श्यादिशब्दं परित्यज्य

मध्यश्रुतपतिशब्दमुपादाय, "पत्यादिशब्देभ्य' इति सूत्रणात् पातशब्दगतोऽभ्यासः सूच्यत इति भावः । पत्या-दिशब्दैः सहेति । वशी ईशानः भूतपाल इत्यादीनां प्रथमान्तानामेव पत्यादात्यादिशब्देन ग्रहणमुचितमित्यभिप्रेत्येदमुक्तमिति द्रष्टव्यम् । एत चेत्यादिभाष्यस्वारस्यानुरोधेन, "सुषुप्त्युत्क्रान्त्योर्भेदेने'ति सूत्रे बद्धजीवातिरेकम्बरस्यानुरोधेन च सूत्रद्वयस्य क्रमेण बद्धमुक्ताति-रेकप्रतिपादनपरत्वं भाष्यकारस्य निमतमित्यभिप्रायेणाह किं जीवमात्रादर्थान्तरत्वे विप्रतिपत्तिरित्यादिना । पूर्वसूत्रोक्तपरिष्वङ्गा-न्वारोहयोरपि मुक्तव्यावर्तनक्षमत्वात् सूत्रद्वयेनापि मुक्तव्यावृत्तिः प्रतिपाद्यत इत्यभिप्रायेणाह यद्वा सूत्रद्वयेक्तैरिति । वर्णनीयाविति

१.३.४४

शङ्काबीजामति । वर्णनीयाविति समर्थनेन ऐक्यभेदानषेधश्रुतिलक्षणशङ्काबीजं परिहृतं भवतीत्यर्थः । एतावदेवेति । अतो नारम्भ-णाद्यधिकरणैः पुनरुक्तेति भावः । जगत्कारणत्वनिर्वाहकन्यादिति । विशेष्यमात्रस्य ब्रह्मणः प्रपञ्चोपादनत्वाभावेन सूक्ष्मचिदचि-द्विशिष्टस्य स्थूलचिदद्विशिष्टं प्रति हेतुत्वस्य वक्तव्यत्वादिति भावः । मुख्यत्वनिर्वाहस्य वक्ष्यमाणत्वं दर्शयति तत्रारम्भणाधिकरण-इत्यादिना । बुद्धान्तादीति । जाग्रदादीत्यर्थः ।

धर्मिवाचिपदाश्रवणं न दोष इति । "जगद्वाचित्वात्', "वाक्यान्वया'दित्यादिष्विति भावः । तस्येति । चतुथर्पादस्येत्यर्थः । ननु जगद्वाचित्यादित्यादौ व्युदसनप्रतिज्ञाऽपि न श्रूयत इत्याशङ्कयाह नेति पदस्येति । अनु-षङ्गेपि न दोष इति । अध्याहारापेक्षया अनुषङ्गस्य ज्यायस्त्वात्; तव त्विहानुषङ्गस्याप्यसंभवादिति भावः । किंच शेषभूतप्रतिज्ञा-यामनुषङ्गो न दोषायेति युक्तयन्तरमाह प्रधानादिपरत्वव्युदासस्येति ।

ननु "कारणत्वेनाकाशादिषु' इत्यस्य नेतिपदानुषङ्गो न युज्यते । "परब्रह्मणो जगदुत्वद्यत इति निर्णेतुं शक्य'मिति तत्र प्रतिज्ञा भाष्योक्तेत्याशङ्कयाह क्वचिदध्याहारदर्शनेपीति । परमात्मपरत्वेऽपि न सन्देह इति । यद्यपि, सर्वस्य वशीत्यादयः शब्दा अपि जीव एव यथाकथञ्चिद्योजनीयाः । नास्मिन् सन्दर्भे कस्यचिदपि वाक्यस्य परमात्मपतिपादकत्वमस्तीत्येव पूर्वपक्षो वाचस्पतिना दर्शितः-तथापि सर्वस्य वशी सर्वस्येशान इत्यादीनां जीवप्रतिपादकत्ववाद-स्यातिसाहसत्वादसंशय इति द्रष्टव्यम् । किञ्चेश्वरस्येति । ईश्वराध्यस्तजीवभ्रमनिवृत्त्यर्थं खलु जीवस्याधिष्ठानभूतेश्वरतादात्म्यमुपदि-श्यते । तत्रेश्वरे जीवभ्रमः किमीश्वरस्य, उत जीवस्य ? न प्रथमः, सर्वस्य भ्रमासंभवात् । न द्वितीयः, अधिष्ठानभूतेश्वरज्ञानशून्यस्य तत्र

जीवस्य भ्रमानुदयादित्यर्थः । तात्पर्यलिङ्गदशर्नाच्चेति । अभ्यासापूर्वत्वरूपतात्पर्यलिङ्गदर्शनाच्चेत्यर्थः ।

शाखान्तरे चेति । कौपीत-कीश्वेताश्वतगदावित्यर्थः । "सता सोम्य तदा सम्पन्नो भवती'ति सद्विद्यायां श्रवणाच्चेत्यर्थः । शाब्दस्य हेतोर्विरुद्धत्वादिति । सुषु-प्त्युत्क्रान्त्योर्भेदस्य जीवत्वपूर्वपक्षासाधकत्वादिति भावः । यस्तु पूर्वपक्षहेतुः पूर्वमुक्तः; स न शाब्द इत्याह भोक्तुः प्रकृततयेति । ननु उत्सूत्र एव पूर्वपक्षः; आद्यसूत्रमपि सिद्धान्तसाधकमेवास्त्वित्याशङ्कयाह तच्छाङ्काव्युदसनेति । निरुपाधिकैश्वर्यवत्त्वं चेति । ततश्च चिदचिद्वैलक्षण्यसाधने संवादनिरपेक्षप्राज्ञत्वादेरेव हेतूकरणसंभवेन तत्र शाखान्तरसंवादस्य हेतूकरणासंभवादिति भावः ।।

इति अर्थान्तरत्वव्यपदेशाधिकरणम् ।।

इति चतुष्षष्टिप्रबन्धनिर्माणालङ्कर्मीण दशोपनिषद्भाष्यकार

श्रीमद्रङ्गरामानुजमुनिविरचितायां

श्रुतप्रकाशिकाव्याख्यायां भावप्रकाशिकायां

प्रथमस्याध्यायस्य तृतीयः पादः ।।

Fourth Pada

१.४.१

द्वितीयपादारम्भे कथितायाः पादसङ्गतेस्त्रिपाद्या अन्ययोगव्यच्छादपरत्वस्य वा अत्र पुनः कीर्तनं किमर्थमित्याशङ्कायामाह -प्रथमपाद इति । धर्मिस्वरूपपामिति सर्वज्ञत्वादिगुणानां कल्याणत्वपरमित्यर्थः । सर्वभूतान्तरात्मत्वस्य अन्तर्यामि-

१.४.१

वैश्चानराधिकरणसिद्धत्वं कथम्? अन्तर्यामिब्राह्मणे वैश्वानरविद्यायां च सर्वभूतान्तरात्मेत्येवं आकारवाक्याश्रवणादित्या-शङ्कयाह - एष सर्वभूतान्तररात्मेस्यादि । मुण्डकोपनिषद्वायस्य सपक्षत्वेनोपन्यासादिति - द्युभ्वाद्यधिकरण विषयवाक्यैकप्रकरणस्य "पद्भयां पृथिवी ह्येष सर्वभूतान्तरत्मा' इति

मुण्डकोपनिषद्वाक्यस्य "स्मर्यमाणमनुमानं स्यात्' इति वैश्वानराधिकरणगुणसूत्रे सपक्षत्वेनोपन्या-दित्यर्थः । इदानीमितीति ग्रन्थस्यानन्तरं प्रधानपुरुषादिप्रतिपादनमुखेनेति न केवलं लिङ्गप्रतिपादकानि, किन्तु लिङ्गिनामेव प्रधाना-दीनां प्रतिपादनमुखेन प्रधानादिकारणत्वप्रतिपादनच्छायानुसारीणीतिपाठस्तु समीचीनः, कोशस्तु निरीक्ष्यः।

प्रत्यगात्मनः परस्य निषेधादिति - "पुरुषान्नपरं किञ्चित् ' इति प्रत्यगात्मव्यतिरिक्तस्य सांख्यमत इव निषेधादिति भावः । बद्धमुक्तोभयावस्थाद्विलक्षणमिति । ह्युक्तमिति - यद्यपीदं प्रथमपादार्थसूचकमिति व्याख्यातम् , अथायप्यव्यवहिता-धिकरणार्थस्मारकत्वमपि सम्भवतीत्यभिप्रेत्य एवमुक्तमिति द्रष्टव्यम् । रूप्यतेऽनेनेति - रूपवत्तया क्रियते अनेनेत्यर्थः ।

१.४.१

रूपवच्छब्दात्तत्करोतीति णिचि णाविष्ठवद्भावात् "विमतो- र्लुगि'ति मतुपो लुकिटिलोपे च ण्यन्तात् रूपीत्येतस्मात्कर्मणि , रूप्यत इति प्रयोगः । ण्यन्तात् रूपीत्येतस्मात्कर्तरि ण्वलि णिलोपे च रूपवत्करोतीति रूपकमिति हि रूपकशब्दनिष्पत्तिः , एवमेव ह्यालङ्कारिकाणिमुक्तिः , ततश्चात्मा शारीरादीनुपमेयान् स्वेन रूपेण रूपवतः कुर्वन्तो रथिरथादयो रूपकाः , ततश्च रूपकरथात्मना विन्यस्तशरीरस्य गृहीतेरित्यर्थः । प्राधान्येन विवक्षितमिति - विशेषेणविशेष्यभावे कामचारादिति भावः । पूर्वनिपात इत्यभिप्राय इति - नन्वेवं निर्देशे किं प्रयोजनमिति चेदुच्यते ; शरीरे अधिकरणे-रूपकात्मना विन्यस्ताश्शरीर-रूपकविन्यस्ता इन्द्रियादयः तेषां स्वस्ववाचकशब्देन गृहीतत्वात् पारिशेष्यादव्यक्तशब्देन गृह्यत इत्यत्र नियामकतया पारि-शेष्यस्योपन्यसनीयतया तत्प्रदर्शकसमासान्तराश्रयणस्यापि सार्थक्यात् । भाष्ये - तद्विष्णोः परमं पदमित्यन्तेनेति । "इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुमर्नीषिणः । यस्त्वविज्ञानवान् भवत्ययुक्तेव मनसा सह । तस्येन्द्रियाण्यवश्यानि दुष्टाश्च इव सेरथेः । यस्तु विज्ञानवान् भवति युक्तेन मनसा सह । तस्येन्द्रियाणि वश्यानि सदश्चा इव सारथेः । यस्त्वविज्ञानवान् भवत्यमनस्कस्सदाऽशुचिः । न स तत्पदमाप्नोति संस्सारञ्चधिगच्छति । यस्तु विज्ञानवान् भवति समनस्कस्सदा शुचिः । स तु तत्पदमाप्नोति यस्माद्भूयो न जायते । विज्ञानसारथिर्यस्तु

मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् । इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः । महतः परमव्यक्तं अव्यक्तात्परुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः । एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते । दृश्यते

१.४.१

त्वग्रयया बुध्द्या सूक्ष्मया सूक्ष्मदर्शिभिः । यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति यच्छेत्तद्यच्छेच्छान्त आत्मनि । उत्तिष्ठ त जाग्रत प्राप्य वरान्निबो- धत । क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति । अशब्दमस्पर्श-मरूपमव्ययम् इति हि श्रुतिक्रमः । साध्यत्वलक्षणप्रकषर् इति - शेषित्वलक्षणप्रकर्ष इत्यर्थः । अध्यवसायाभिमानचिन्तावृत्ति-

१.४.१

भेदात् मन एव बुद्धयहङ्कारचित्तशब्देन व्यपदिश्यत - इति । पञ्च-वृत्तिर्मनोवद्व्यपदिश्यत इति सूत्रभाष्यं हृदि निषाध बद्धिशब्दस्यान्तःकरणपरत्वेपि नानुपपत्तिरित्यभिप्रयननाह । यद्वा बुद्धिशब्दः अन्तःकरणपर इति कैश्चिदुक्तमिति - मृषावादिभिर्हि महच्छब्देन " मनो महान् मतिर्ब्रह्मा भूर्बुद्धिः ख्यातिरीश्वरः । प्रज्ञा सं-विच्चितिश्चैव स्मृतिश्च परिगृह्यते ' इति स्मृतिवशात् प्रथमोत्पन्नहिरण्यगर्भबुद्धिरुच्यते , तस्याश्चाव्यक्तप्रभवत्वात् "महतः परमव्यक्तम् ' इत्युक्तिरुपपद्यते । यद्वा जीव एव महच्छब्देनाभिधीयते , आत्मशब्देन विशेषणात् तत्रापि पक्षे जीवभावस्याव्यक्ताधीनत्वेन महतः परत्वमुपपद्यते , पक्षद्वयेपि अन्यक्तशब्दिताविद्यानिष्टत्वं महत्परत्वं तत्कार्ये शरीरे उपचर्यत इत्युक्तमिति भावः । ननु कथं जीवपर्यन्तेत्युच्यते

महतः परमव्यक्तमिति पूर्ववाक्ये अव्यक्तशब्दितशरीरस्यैव जीवादपि परत्वोपन्यासेनाव्यक्तपर्यन्तस्येपि हि निर्देशो युक्त इत्याशङ्कयाह

१.४.१

- नास्मिन् वाक्य इति । यथोक्तस्यात्मपर्यन्तस्येति भाष्यवाक्य इत्यर्थः । पदस्यात्र च अकथनादिति -सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् इति पारत्वेन रूपितस्य विष्णोः परमपदस्य "इन्द्रियेभ्यः परा ह्यर्थाः ' इत्यत्राकथनादित्यर्थः । क्वचिदस्तीति - "अजामाकाम् ' इत्यादौ तादृशविचारस्य दर्शयिष्यमाणत्वादिति भावः । अहङ्काराद्वारा बुद्धेरिति -बुद्धिर्महत्तत्त्वम् । तन्त्र-

प्रक्रिया विरोधप्रतीतेरिति - तन्त्रे अहङ्कारस्य महत्तत्त्वजन्यत्वेन मनोजन्यत्वाभावादिति भावः । सूत्रखण्डोपादानामिति

१.४.१

दर्शयति चेत्यादिग्रन्थस्सूत्रखण्डव्याख्यानरूप इत्यर्थः । ततश्च दर्शयति चत्यस्य सूत्रखण्डोपादनत्वे तदेवेतिमाप्यखणडस्य कुत्राप्यनन्वयप्रसङ्गादिति दूषणमलग्नकं वेदितव्यम् । ननु सुपां सुलुगितिसूत्रे सोः प्रथमनिर्दिष्टतया तदतिक्रमे कारणाभावेन द्वितीयायाः स्वादेशे हल्ङ्यादिलोपे च द्वितीयान्तत्वं कुतो न सिध्येदित्याशङ्कय प्रक्रियागौरवान्नायं पन्था इत्याह - ननु वाक्छब्दादित्यादिना - ननु भाष्ये मनसी इति कथं निर्देशः ? सर्वणदीर्घेण हि भाव्यमित्यत्राह - ईदूतौ च समप्तयर्थ इतीति

१.४.१

प्रकृतिभावस्मरणनिबन्धनो मनसी इतीति निर्देश इति -ईदूतौ च सप्तम्यर्थे ' इति सूत्रविहितप्रगृह्य संज्ञानिमित्तकप्रकृतिभाव-निबन्धन इत्यर्थः । प्रकृतिवद्भावस्मरणेति क्वचित्पाठो दृश्यते , स तु लेस्वकस्खलनकृतः । उपसङ्खयानेन निर्वाहासम्भवादिति

ब्रूम इति - "इयाडियाजीकाराणामुपसङ्ख्यान 'मित्यस्यापि छन्दोविषयतया छान्दसत्वानाश्रयणेन निर्वाहस्यासम्भवादित्यर्थः । वाङ्मनसी इत्यस्य द्वितीयाद्विचनान्तत्वशङ्कां प्रतिक्षिपति - नहि वाङ्मनसी इत्यत्रेति - प्रकराणानुगुण्यमेकवचनोपपत्तिञ्च स्पष्टयति

१.४.२

यच्छेदित्युक्तस्येति केचिद्व्याचक्षत इति - यादवप्रकाशीया इत्यर्थः । स्वग्रन्थमेव प्रदर्शयति - अथ बुद्धिशब्देन अहङ्कारं ब्रूयुरिति अन्तिमसूत्र व्याख्याने तैरेवोक्तमिति - "महद्वच्च ' इति सूत्रव्याख्याने यादवप्रकाशीयैरेवोक्तमित्यर्थः । युक्तयन्तरमप्याह - तन्निमित्त-मिदं विषयसन्निधिपरिवर्जनमित्यादिना योगव्युत्थानकाल इति - योगराहित्यदशायामित्यर्थः । अत्यन्तनिषेधस्त्विति -ततश्च योग-व्युत्थानकालकर्तव्यविषयसन्निधिपरिवर्जनादेरस्मिन्मन्त्रेऽनुक्तिर्न दोषायेति भावः । प्रकृतमुयसंहरति - अतो-योगकाल एवेति - कार्यवाचिशरीरशब्दोपचारःकिं न स्यादिति - यद्यपीयं शङ्का उपक्रमाधिकरणन्यायादित्यादिना पूर्वं परिहृता ,

तथाप्यर्हत्वादितिसूत्रखण्डाभिप्रेतयुक्तयन्तरोपन्यासायायं पुनरुपक्षेप इति द्रष्टव्यम् । ननु तदर्हत्वादित्यत्र तच्छब्देन विकारापन्ना व्याकृताचिद्वस्तुनः कथं परामर्शः ? सूक्ष्ममितिसौत्रपदेन सूक्ष्ममात्रस्य प्रकृततया विकारापन्नव्याकृतस्य प्रस्तुतत्वादित्याशङ्कय

१.४.३

शरीररूपकेदि पूर्वसूत्रे शरीरस्य श्रुतत्वादस्मिंश्च सूत्रे सूक्ष्ममिति निर्दिष्टत्वाच्च शरीरभावापन्नं सूक्ष्मं बुद्धिस्थम् , विशिष्टस्य प्राक्

प्रस्तुततया तस्य तच्छब्देन परामर्शस्सम्भवतीत्याह - सूक्ष्मत्वं स्वशब्देनोपस्थापितमिति -सूक्ष्ममिति सौत्रपदेनोपस्थापितमित्यर्थः बुद्धिस्थमिति - पूर्वसूत्रे शरीररूपकेति बुद्धिस्थमित्यर्थः । अवस्थाद्वयानुगतवस्तुलक्षणानिमित्तमाकारमाहेति - अवस्थान्तर-विशिष्टवस्तुलक्षणाबीजभूतमुख्यार्थानूपपत्तिमाहेत्यर्थः । चिद्वस्तुपोप्यस्तीति -ज्ञानसङ्कोचविकासरूपविकारवतो रथवत्पुरुषार्थ- प्रवृत्त्यर्हत्वाभावादचिद्वस्तुन एव विकारापन्नस्य प्रवृत्त्यर्हत्वादिति वक्तव्यमिति भावः । पुरुषार्थसाधनप्रवृत्तिविशेषप्रतिपादनेनेति

१.४.३

पुरुषार्थसाधनं वागादिः, प्रवृत्तिविशेषः नियमनम् , ततश्च पुरुषार्थसाधनानामेव रूपकवाक्ये परत्वावधिवाक्येपि ग्राह्य-त्वात्सूक्ष्मस्य चातथात्वाच्छरीरस्यैव ग्रहणं युक्तमिति भावः ।। कालान्तराविच्छिन्नाकारविरह इति - कालान्तरव्यावृत्ताकार-विरहः, कालान्तरव्यावृत्तिविरह इत्यर्थः , कालान्तरानुवृत्तिरितियावत् । तदुपयुक्तार्थतादधीन्यस्यापीति -तदव्यक्तम् उपयुक्तं यस्येति तदुपयुक्तार्थः , तत्साध्यार्थो महदादिरुच्यते , यदर्थोपयुक्तस्वरूपप्रवृत्तयो यदधीनास्तत्साध्यार्थस्यापि तदधीनत्वदर्श-नादितिभावः । ननु महिमवादेषु शरीरत्वप्रतिपादनेन तदात्मकत्वसिद्धावपि प्रलयवादेषु कथं तत्सिद्धिः ? पृथिव्यादीनामवा -दिषु लयमात्रप्रतिपादनादित्याशङ्कयाह - प्रलयपरत्वश्रुतेरपीति -भाष्ये उत्पत्तिवाक्यानुपादाने हेतुमाह - अप्ययपूर्वकत्वादिति इतरैरिति - यादवादिभिरित्यर्थः । निरूह्यत इति पाठः । " वहेर्यकि सम्प्रसारणे अङ्गावयहलुत्तरत्वाभावेन तस्य दीर्घाप्रसक्तेः ;

१.४.५

" उ ूह वितर्के ' इति धात्वाश्रयणेपि उपसर्गाद्रख "उ ूहते 'रिति हस्वविधानाच्चेति द्रष्टव्यम् । केन यक्तिबलेनेति - अव्यक्तपरत्व-स्येति शेषः । शङ्कते - प्रकरणपारिशेष्याभ्यामिति - रूपकविन्यस्तगृहीतेरित्याद्यसूत्रविवक्षिताभ्यामव्यक्तशब्दस्य शरीरविषय-त्वनिश्चयाच्छरीरस्य चात्मापेक्षया मुख्यस्य परस्यासम्भवेनास्मिन् प्रकरणे सर्त्रत्र परत्वस्य यथाकथञ्चिनिर्वाह्यत्वं श्रुत्यभि-प्रेतमवगम्यते , ततश्च अर्थादीनामपि परत्वं कथञ्चिदुपपद्यत इति सिद्धयतीति चेत् इत्यर्थः । तेनैवेति - युक्तिबलेनेतिशेषः ।।

१.४.६

हेतुसमुच्चये इति - पूर्वसूत्रोक्तहेतुना एतत्सूत्रोक्तहेतुं समुच्चिनोतीत्यर्थः । लोकादिमग्निं तमुवाच इत्युपक्रम्येति ।अत्रापेक्षितश्रुतिक्रमः

१.४.६

"अत्ता चराचरग्रहणा ' दित्यत्र विलिखितः, व्याख्यातश्च; तत एवावगन्तव्यः । जहातीत्युपदिदेशेति । पूर्वेणान्वय इति शेषः । पुनः पप्रच्छेति पाठ इति । पुनः पुनः पप्रच्छेति पाठस्तु न युक्त इति भावः । भाष्ये -मत्वा धीरो हर्षशोकौ जहातीति निर्दिष्टस्य

१.४.६

ब्रह्मोपासनस्येतिपाठः । धीरो न शोचतीतिपाठो लेखकदोषात् , तस्यापकृतत्वादिति द्रष्टव्यम् । ननु कृताकृताद्भूताद्भव्याच्चेत -स्त्रितयस्यापि धर्माधर्मादस्मादितिनिर्दिष्टोपायोपेयोपेतृविशेषणत्वे अन्यत्र भूताद्भव्याच्चेत्यन्यत्रपदं व्यर्थं स्यादित्यस्वरसादाह -यद्वा धर्माधर्माच्चान्यत्रेति । परैस्तु धर्माधर्मशब्दाभ्यां तत्साध्यफलानि विवक्षितानि, कृताकृतादिति कार्यकारणप्रपञ्चो विवक्षितः। भूतादिति भूतकालमात्रपरिच्छिन्नं परामृश्यते, भव्यादिति भविष्यत्कालमात्रपरिच्छिन्नम् , ततश्च तत्सर्वव्यावृत्तमित्यर्थ इति व्याख्यातम् ;

तदेतदाशङ्कते - ननु धर्माधर्मसाध्येति । प्रणवेन ब्रह्मप्रतिपादनं ह्युच्यत इति । ततश्च "तत्ते पदं सङ्ग्रहेण ब्रवीमि ' इत्ययमंशः पदशब्दितब्रह्मप्रतिपादकतया प्रणवप्रशंसापर इति भावः । भाष्ये सामान्येन ख्यापयन्निति । ओमित्यनेनैव सामान्येन

१.४.६

ख्यापयन्नित्यर्थः । प्रणवैकदेशवाच्यो हीति । तदेकदेशवाच्यस्य तद्वाच्यैकदेशत्वनियमादिति भावः ।

तच्छ "एतध्द्येवाक्षरं ब्रह्म एत् ब्दस्य प्रणववाच्यपरत्वं किष्टमित्यस्वरसादाह - यदा प्राप्ये इति । एतध्द्येवाक्षरमित्यादि । ध्द्येवाक्षरं परम् । एतध्द्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते इति वाक्यमभिप्रयन्नित्यर्थः - इदं मन्त्रद्वयमिति । "ति मन जायते मि्रयते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् । अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे । हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते ' मन्त्रद्वयमित्यर्थः ।

अर्थान्तरपरत्वस्य चेति - प्रधानपरत्वस्येत्यर्थः । हन्त त इदं प्रवक्ष्यामीति - यद्यपि "न जायते म्रियते वा विपश्चित् ' इति परमा

१.४.६

त्मविषयप्रतिवचनसन्दर्भानन्तरमेवेदं वाक्यम् , तथापि योग्यतावशात् जीवविषयप्रश्नस्येदं प्रतिवचनमिति न प्रश्नक्रमानुरोधि श्रुतौ प्रतिवचनक्रम इति द्रष्टव्यम् । नन्वन्यत्राधर्मादितिप्रश्नः किं येयं प्रेत इति प्रश्नसमानविषयकः , उत तदधिकविषयकः ? नाद्यः, तथासति अग्निजीवयोरेव प्रश्नदर्शनेन त्रयाणां प्रश्नाभावादग्निजीवपरमात्मनां त्रयाणामुपन्यासः प्रश्नश्चेति सूत्रविरोधात् । न द्वितीयः, परत्रयानन्तरभूतस्य प्रश्नानर्हत्वात् , इतरथा

प्रधानस्याप्युपन्याससम्भवेन अधिकरणविरोधापत्तेरित्याशङ्कय वस्तुगत्या परमात्मनो जीवाभिन्नतया परत्रयान्तर्भावस्याप्यनुपपत्तेः जीवपरयोः औपाधिकभेदमादाय अग्निजीवपरमात्मनां त्रयाणामिति सूत्रनिर्देशस्याप्युपपत्तेरित्यभिप्रयन्नाह - न च जीवविषयप्रश्नस्येति । परमात्मविषयतावैघट्यमिति - परमात्म - विषयप्रतिवचनवैघट्यमिति पाठे तु येयं प्रेत इति जीवप्रश्नस्य तं दुर्दर्शमिति परमात्मविषयप्रतिवचनवैघट्यमित्यर्थः ।

अनतिविरोधेपीति - अग्निजीवपराणा ं त्रित्वोपन्यासेन जीवपरयोर्भेदस्यैव सौत्रत्वप्रतिपादनेन अस्मदनुकूलत्वादिति भावः ।

प्रतिपाद्यत्वाभावस्येति -प्रधानस्य त्रिगुणद्रवव्यस्येत्यर्थः । प्रश्नोपन्याससमुच्चयस्य प्रतिपाद्यत्वे हेतुत्वाभावमुपपनदयति - उपायो

१.४.६

हीति । हृदयायतने उपास्यतया स्थितस्येति -ननु पूर्वत्र हृदयादित्यवर्तिनोरप्रकृतत्वात्कथमिदमुच्यत इति चेदुच्यते "अरण्यो-र्निहितो जातवेदा गर्भ इवेत्सुभृतो गर्भिणीभिः । दिवे दिव ईढ्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निभि एतद्वै तत् ।' इति मन्त्रेण हृदयायतनस्तस्य च "यतश्चोदेति सूर्योस्तं गच्छति यत्र च । तं देवास्सर्वे अर्पिता तदु नातयेति कश्चन । एतद्वै तत्' इति तदनन्तरमन्त्रेणादित्यमण्डलस्थस्यापि पूर्वप्रकृतत्वात् । तथाहि ; अरणनयोर्निहितोऽग्निरिव गर्भिणीभिस्सुभृतः-अन्नपानादिभिः पोषितो गर्भ इव च, दिवे दिवे अहन्यहनि, जागृवद्भिः जागृद्भिरप्रमत्तैर्हविष्यमद्भिराराधनोपकरणवद्भिर्मनुष्यैरीड्यः स्तुत्यः ध्येयः, अग्निः-अग्रनयनादियोगात् । एतद्वै तत् - एवम्भूतो हृदयायतनस्थः, तदेव अन्यत्राधर्मादित्यादिना त्वया पृष्टमेवेत्यर्थः । अतोऽस्मिन्मन्त्रे हृदयायतने उपास्यः प्रस्तुतः । यतश्चोदेति सूर्यः-सूर्योत्पत्तिलयाधारभूतः । तं देवास्सर्वे अर्पिताः-सर्वे देवास्त-दुपासिन इत्यर्थः । अतश्च सूर्यमण्डलाद्युपादानतया तदात्मकं तदन्तर्वर्तिदेवोपास्यं प्रस्तुत्य तस्याप्येतद्वैतदिति ब्रह्माभेदे बोधिते

तदनन्तरं हृदयायतेन मनुष्यैरुपास्यस्यादित्यमण्डलान्तर्वर्तिदेवोपास्यस्य चायतनभेदेन भिन्नत्वात्कथमेतद्वैतदिति एकेन ब्रह्मण अभेदो बोध्यत इति शङ्का व्यावर्त्यते-तदेव हेत्यादिना । "यदमुत्र तदेवेह, मृत्योस्य मृत्युमाप्नोति य इह नानेव पश्यती'त्यादिना

अतो नाप्रसक्तनिषेधत्वशङ्कावकाश इति ध्येयम् । एतदपेक्षया दुबर्लमिति -ऋतं पिबन्ताविति भेदश्रुत्पेक्षया दुर्बलमित्यर्थः । तच्च दर्शितमिति -"अध्यात्मयोगाधिगमेन देवम्' न जायते म्रियते वा विपश्चित् ' इत्यादिकमित्यर्थः । प्रतिवचनाव्यवहिता इति -प्रतिवचनैरव्यवहिताः अनन्तरिता इत्यर्थः । एवं प्रश्नाव्यवहितानित्यत्रापि । नन्वस्मिन् प्रकरणे उपायोपेयोपेतृवतिरिक्ताग्नेरपि

१.४.८

पृष्टतया त्रयाणामेवेत्वधारणं भवन्मतेप्ययुक्तम् , न चाग्निरप्युपायकोटिनिविष्ट इति वाच्यम् ज्ञानैकसाध्यत्त्वान्मुक्तेरित्या-शङ्कयाह - अर्थत्रयस्य चेति ।। कारणं प्रधानमेवेति -स्वतन्त्रप्रधानमेवोच्यत इत्यर्थः । तेजोबन्नपरत्वेन व्याख्यातमिति - ननु वाचस्पतिना किं स्वतन्त्रं प्रधानमनेन मन्त्रवर्णेन प्रतिपाद्यताम् ,उत परमेश्वरी मायाशक्तिस्तेजोबन्नव्याक्रियाकारणमुच्यताम् ? इत्येवं सिद्धान्ते मूलप्रकृतिपरत्वमेव प्रदर्शितम् न तु तेजोबन्नात्मकावान्तरप्रकृतिपरत्वमिति चेत् सत्यमुक्तं वाचस्पतिना, तथापि वचनस्य ज्योतिरुपक्रमादिति सूत्रतद्भाष्याभ्यां तेजोवन्नानां जननश्रवणात् कथमजात्वमिति कल्पनोपदेशादिति-

१.४.८

सूत्रावतारिकाभाष्येण च विरुद्धत्वात्तदनादृतम् । यदि हि मूलप्रकृतिर्मन्त्रवर्णप्रतिपाद्यत्वेनाभिमता स्यात् तदा तस्य जन्मरहिततया कथमजात्वमित्याक्षेपस्य वा कल्पनोपदेशादितिछागत्वकल्पनेन परिहारस्य वा असम्भवादिति ध्येयम्

। गौण्या वृत्त्या सत्त्वरजस्तमोमयीति - रक्तंकुसुम्भादि, रञ्जयतीति रक्तशब्देन रज उच्यते । एवमावारक मन्धकारं नीलं तमोगुणश्चावारक इति आवारकत्वसाधर्म्यात्तमोपि नीलादिशब्देनोच्यते इति भावः । परिणम्यमानमितिपाठः । "णिचि मितां ह्वस्व' इति ह्रश्व-विधानात्, यद्वा "मितां ह्वस्व' इत्यत्र वेत्यनुवृत्तेर्वा परिणम्यमानमित्यस्य साधुत्वं द्रष्टव्यम् । प्रकृत्यादीनामिति व्याख्येयं पदम् । नन्वत्र प्रकृत्यादीनां स्वरूपमभिहितमिति कथमुचनयते, "षड्ंवंशकमित्याहु'रित्यादाविवाऽत्रापि "एकस्तु पिबते देवः स्वच्छ-न्दोत्र वशानुगाम्' इतीश्वरस्यापि प्रतिपादनादित्याशङ्कयाह - एषु वाक्येषु ईश्वरप्रतिपादनमिति । ततश्च प्रकृत्यादीनां स्वरूपमभि-हितमिति भाष्यस्य ब्रह्मात्मकस्वरूपमभिहितमित्यर्थ इति भावः । तदन्तर्यामिभगवत्प्रतिपादकवाक्यमिति - "स्तूयते मन्त्रसंस्कृ-त्यैरथर्ववविहितैर्दिभु'रित्युत्तरखण्डे विभुशब्देन व्यापकं नियन्तारं संस्तुत्य तं षड्ंवंशकमित्यादि प्रतिपादनात् षड्ंवंशकस्या-

१.४.८

ऋषित्वकल्पना, इत्यर्थावगतिरिति भावः । भाष्ये साधनत्वमात्रं चमसशब्देन प्रतीयत इति इदमुपलक्षणम् अर्वाग्बिलोद्ध्व- त्मत्वं सिद्धमिति भावः । " प्रकृति पुरुषं चैवे'त्यादि गीतायां त्रयोदशाध्याये "सत्त्वं रजस्तम' इति चतुर्धाध्याये' "सर्वभूतानि

कौन्तेये'त्यादि नवसे, भाष्ये सिद्धान्ते च, "चमसवदविशेषा'दितिसूत्रोपादानानन्तरं नात्र तन्त्रसिद्धा प्रकृतिरभिधीयत' इति वाक्यं केषुचित्कोशेषु दृश्यते तददृष्टश्रुतप्रकाशिकैः पण्डितम्मन्यैः प्रक्षिप्तम् । उपक्रमस्थं प्रतिज्ञावाक्यमनुपज्यत इति मत्त्वेति टीकोक्तेरिति द्रष्टव्यम् ; वस्तुतस्तु, नात्र तन्त्रसिद्धा प्रकृतिरभिधीयत इत्येव प्रतिज्ञोचिता, न तु प्रकृतिर्निरस्यत इति प्रतिज्ञाया अयुक्तत्वान्नानुपङ्गोपेक्षितः, अतो यथा भाष्यमेव प्रतीमः, भाष्ये "यथार्वाम्बिलश्चमस ऊद्ध्र्वबुध्न' इति बृहदारण्यके चतुर्थपाठके शिशुब्रह्मणे -"तदेण्श्लोको भवति' अर्वाग्विलश्चमस ऊद्ध्र्वबुध्नस्तस्मिन् यशो निहितं यशोरूपम् तस्यासत ऋषयः सप्त तीरे

वागष्टमी ब्रह्मणा सविदानेति, अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एव ह्यर्वाग्बिलश्चमस ऊर्ध्वबध्नः तस्मिन् यशो निहितं विश्वरूपमिति प्राणा वै यशो विश्वरूपं प्राणानेतदाह तस्यासत ऋषयः सप्त तीर इति प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाग्ध्यष्टमी ब्रह्मणा सविता, इति श्रूयते, तत्र चमसमन्त्रपर्यालोचनायां न विशेषप्रतिपत्तिः, वाक्यशेषे तु कण्ठादुपरिभागे शिरसि चमसत्वकल्पना, तद्गतमुखविवरे विलत्वकल्पना, तदूर्ध्वभागे मूर्ध्नावयवे स्थालमूलभागरूप-बुध्नत्वकल्पना, तस्मिन् विश्रमरतया स्थितेषु प्राणादिवायुषु यशत्वकल्पना, तस्मिन् परितः स्थितेषु श्रोत्रादिषु इन्द्रियेषु

१.४.८

बुध्नशब्दाभ्यां अर्वाग्बिलोद्ध्र्वबुध्नत्वेऽपि प्रतीयत इत्यपि द्रष्टव्यम् । नचार्वाग्बिलोद्ध्र्वबुध्नत्वरूपविशेषणमहिमना विशेषप्रतीतिः, तयोर्गुहादिसाधारण्यात् - साधर्म्यदृष्टान्ततया व्याख्यात इति । तत्र "यथेदं तच्छिर' इत्यारभ्य वैधम्र्यदृष्टान्तमिति भाष्याभिमत-मिति भावः । भाष्ये यौगिकशब्दानामिति चमसेषु समाख्यानादित्यधिकरणे यौगिकस्योक्तेरिति भावः । इदमुपलक्षणम् प्रकृते चमसशब्दस्य प्रयोगनैय्यत्येन पात्रविशेषरूढत्वेऽपि प्रसिद्धस्य चमसस्य ऊर्ध्वबिलत्वेन तिर्य्यक् बुध्नत्वेन च तद्विलक्षणत्वे अर्वाग्बिलत्वोद्ध्र्वबुधनत्वे कथिते कोशावीदृशश्चमस इति विशेषजिज्ञासायाः सत्वेन विशेषनिश्चयाभावात् , अत एव "तस्मिन् यथो निहितं विश्वरूपं तस्यासत ऋषयः सप्त तीरे इत्यादौ यश आदिशब्दानां रूढत्वेऽपि तादृग्भूतयशःपदार्थादिजिज्ञासाया दर्शनादिति द्रष्टव्यम् - बलभिदादीति - बलभेदकर्त्तृत्वस्य इन्द्रासाधारणत्वादिति भावः, यथेति नः श्रुतिपदमिति पाठः, स च

१.४.९

श्रुतिभ्रान्तिनिवारणशर्थः, ततश्च यथात्रापीत्यत्र तथाशब्दप्रतिद्वन्द्वी यथा शब्दः । नचास्य यथाशब्दस्य तथात्रापीतिभाष्ये-णान्वय इति पूर्वमेवान्वयो दर्शित इति वाच्यम् ; यथाशब्दद्वयपरामृष्टस्य एकेन तथाशब्देन परामर्शसम्भवेनादोषात् , श्रुतौ यथाशब्दादर्शनाच्चेति द्रष्टव्यम् । स्वातन्त्र्यमेव प्रत्ययवाच्यमिति -कत्रर्थशानच्प्रत्ययेन स्वतन्त्रः कर्त्तेति स्वातन्त्र्यलक्षण-कर्त्तत्वमेव वाच्यमित्यर्थः, मात्रशब्दासभप्रेतनिश्चायकत्वाभावमेवाह - यदि ब्रह्मात्मकत्वमिति । तद्गततयेति -प्रकृतिशरीरक-ब्रह्मगततयेत्यर्थः ।। ६ ।। सृष्टिप्रकरणत्वादिति - यद्यपि प्रयाजादीनामङ्गत्वे इतिकर्तव्यताकाङ्क्षालक्षणं प्रकरणं प्रमाणम् , इह सृज्यमानप्रायपाठात्मकवन्निधिलक्षणं प्रकरणं प्रमाणम् , तथाऽप्युभयोरपि प्रकरणशब्दव्यवहार्यत्वमस्तीति तथोक्तमिति

१.४.९

द्रष्टव्यम् । पूर्वमेवविच्छेदादिति - "ब्रह्मा देवानां पदवीः कवीना'मित्यत्र विच्छेदादिति भावः । न सृष्टिप्रकरणविच्छेद इति - यद्यपि सृजमानामिति प्रकृतिकर्त्तृकसृष्टेः प्रतिपादनेऽपि ईश्वरकर्त्तृकसृष्टिप्रकरणाविच्छेदेनैतत् प्रमाणम् , तथापि यथा कथञ्चित् सृष्टिप्रक-रणमात्रानुवृत्तिप्रदशर्नार्थमिदमुक्तमिति द्रष्टव्यम् । प्रक्रियमाण इति ह्युक्तमिति - शानचा प्रकरणस्य वर्त्तमानत्वप्रतीतेरिति भावः। एतद्विशेणत्वेनेति - प्रकृतिविशेषणत्वेनेत्यर्थः । तस्मिन् प्रकरणोनन्यविशेषणत्वेन प्रतिपाद्यस्य प्रायपाठादुत्यत्तिरभ्युपगन्तव्य इति भावः शाखान्तरे दर्शितमिति - ननु तैत्तिरीयकेऽपि सृज्यमानप्रकरणपाठमात्रेण कथं परमात्मकारणत्वम् , मुक्तस्यापि तथात्वप्रसङ्गात्; नच मुक्तोऽन्यार्थतया निर्दिष्ट इति वाच्यम् ,प्रथमनिर्दिष्टस्याऽन्यार्थतया निर्दशे प्रमाणाभावात् ; वैपरीत्य-स्याऽपि सुवचत्वाच्च; किञ्च प्रायपाठभञ्जके जननप्रतिषेधकेऽजाशब्दे जाग्रति कथं तस्याः कार्यत्वसिद्धिरिति चेत् , अत्र केचित् उयक्रमशब्दो मुख्यवाची सन् लक्षणया नियन्तृत्वपरः , ततश्च ज्योतिरुपक्रमा ब्रह्मात्मिकेत्यर्थः, अत्र च हेतुः श्वेताश्वतरप्रकरण-मेव, तत्र हि "ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम् , मायिनं तु महेश्रम् ' अस्मान्मायी सृजते विश्वमेत'दित्यात्मशक्तितया तद्विशेषणतया च प्रतिपाद्यमानत्वात् ; अयञ्च हेतुरुत्सूत्र एव । श्वेताश्वतरे "आत्म शक्ति'मिति-श्रवणाद्ब्रह्मात्मकप्रकृतिप्रतिपादनेपि तैत्तिरीयके तथा प्रतिपादनादर्शनात्कथं तत्र ब्रह्मात्मकप्रकृतिप्रतिपादनमित्याशङ्कयाऽऽह "तथा ह्यधीयत एक इति ' तत्रापि ब्रह्मात्मिकैव प्रकृतिः प्रतिपाद्यत इत्यर्थः । तथाहि "सप्त प्राणाः प्रभवन्ति ' इत्यादिना कृत्स्नस्य जगतो ब्रह्मकार्यत्वेऽभिहिते कथं निर्विकारस्य ब्रह्मणो विकारोत्पादकत्वमिति शङ्काव्युदासाय प्रवृत्तोऽयमजामन्त्रवर्णः।

१.४.१०

यद्यं ब्रह्मात्मिकामजान्न प्रतिपादयेत्तदा प्रागुपक्षिप्तब्रह्मोपादानत्वनिर्वाहको न स्यात् , अन्यदुपक्रान्तमन्यदापतितमिति न्याय-प्रसङ्गात् , अतः सोऽपि मन्त्रो ब्रह्मात्मकप्रकृतिपर एवेति । ननु ज्योतिरुपक्रमाशब्दस्य परमात्मात्मकत्वमात्रप्रतिपादकत्वेऽजा-त्वज्योतिरूपक्रमात्वयोर्विरोधाभावात्तत्परिहारपरोत्तरसूत्रसङ्गतिः स्यादिति चेत् न, प्रकृते ब्रह्मात्मकत्वस्य तत्कार्यत्वेनैव निर्वोढव्यतया नित्यायाः प्रकृतेः तत्कार्यत्वाभावात् कथं ब्रह्मात्मकत्वमित्याक्षेपे "अस्मान्मायी सृजते विश्वमेत ' दिति निर्विकारस्य परमात्मनः कारणत्वनिर्वाहकतया सृष्टयुपयुक्ततया च प्रतिपाद्यमानायाः प्रकृतेः सर्वदा अपृथक्सिद्धविशेषण-त्वस्यावश्यम्भावेन तदात्मकत्वस्य नानुपपत्तिः, ततश्चाविभक्तनामरूपा च विभक्तनामरूपा च प्रकृतिः सर्वदा परमात्म-शरीरभूतैव यथा विभक्त-नामरूपोऽविभक्तनामरूपश्चादित्यः परमात्मशरीरभूत इति "कल्पनोपदेशा 'दिति सूत्राभिप्राय इति वदन्ति; भाष्ये "देवात्मशक्तिं स्वगुणैर्निगूढा 'मितीत्यस्यानन्तरं पठितेति शेषः । ततश्चारभ्येति क्रत्वाप्रत्ययस्योपपत्तिरिति द्रष्टव्यम् - जगद्योनिभूतां प्रकृतिमित्यर्थ इति । नच योनिशब्दस्य प्रकृतिपरत्वे प्रकृतेरेकत्वात्कथं वीप्सेति वाच्यम् , अन्यत्र योनिशब्दस्य प्रकृतिमहदादिसाधारण्यात् कल्पभेदोपाधिकभेदाश्रयणाद्वा वीप्सोपपत्तिरिति भावः -

वैदिकशब्दनिर्देशानु-सारिणाविति । ततश्च स्वायत्ते शब्दप्रयोगे "किमित्यबोधकम्पदं प्रयोक्तव्यमिति' न्यायेन "ब्रह्मोपक्रमा तु तथा ह्यधीयत एक ' "सृष्टयुपदेशाच्च मध्वादिवदविरोधः ' इति कुतो न सूत्रितमिति शङ्का पराकृता, सेदिपदस्य प्रकृत्युपस्थापकस्य

१.४.१०

ब्रह्मपर्यन्तत्वे भाष्यं प्रमाणयति - कारणावस्थं ब्रह्मैवेति । एकस्येति व्याख्येयं पदम् , भाष्ये -वस्वादिभोग्यत्वाय मधु -कल्पनमिति, वस्वादिदेवताभोगार्थकर्मनिष्पाद्यरसाश्रयतया मधुव्यपदेशो भोक्त इत्यर्थः । यथाऽऽदित्यस्य कार्यावस्था-यामृग्वेदादिप्रतिपाद्यकर्मनिष्पाद्यरसाश्रयत्वमुदयास्तमयत्वञ्च तथेतिभाष्यस्य पर्यवसितोऽर्थः अजात्वैकत्वसिध्द्यर्थमिति - एकाजात्वसिध्द्यर्थमित्यर्थः । उत्तरत्र एकच्छागत्वसिध्द्यर्थमिति वक्ष्यमाणत्वात् - तेजोबन्नवाचिशब्देनेति । लोहितकृष्णशब्दैः तद्ूपवन्ति तेजोबन्नानि लक्षयित्वा तद्दवारा तत्कारणभूता मूलप्रकृतिर्लक्ष्यते किमित्यर्थः - समुदायत्रयमेवेत्यर्थ इति - त्रिवृत्कृता पृथिवी, त्रिवृत्कृता आपः, त्रिवृत्कृतं तेजश्चेतित्रयस्समुदाया इति भावः - अद्वारकत्वे लोहितशुक्लकृष्णत्वविरोध इति । इदमुपलक्षणम् , निर्विकारत्वश्रुतिविरोध इत्यपि द्रष्टव्यम् । विकल्पपरिहारयोरिति विकल्पदूषणयोरित्यर्थः । भाष्ये -

१.४.१०

तृतीयविकल्पेपीत्यादेरयमर्थः, तेजोबन्नकारणभूता लोहितकृष्णादिशब्दैः लक्षिता अजाशब्देन रूप्यत इति, तृतीय पक्षे लोहितादिशब्दैः तेजोबन्नानि लक्षयित्वा तद्द्वारा लक्षिता कारणावस्था अजाशब्देन गौण्या वृत्त्योपस्थापनीया, न जायत इत्यजेतियोगरूपमुख्यवृत्त्यैव लोहितशुक्लकृष्णाशब्दलक्षिततेजोबन्नकारणस्याऽभिधानसम्भवे छागत्वकल्पनेन गौणवृत्त्या त्प्रतिपादनाभ्युपगमस्यायुक्तत्वादिति; तेजोबन्नानामवाचकस्येति टीकायामप्ययमेवार्थः, तेजोबन्नकारणावाचकस्याऽजा-शब्दस्य गौण्या वृत्त्या तादृशकारणप्रतिपादकत्वं परिकल्प्य तथाभ्युपगमाद्वरं योगवृत्त्याऽजाशब्दस्य मूलकारणपरत्वमिति, नत्वजाशब्दस्य तेजोबन्नलक्षणाद्वारा तत्कारणलक्षणकत्वमस्मिन् वाक्ये प्रतिक्षिप्यत इति मन्तव्यम् । परैः तथानुक्तैः, लोहितादिशब्दलक्षणा, अजाशब्दे गौणीवृत्तिरित्येवोक्तमिति मन्तव्यम् - रूढितोऽवयवशक्तया वेति । ननु एवं "प्रेतुहोतु-श्चमसः प्रोद्गातृणा'मितिमन्त्रे उद्गातृपदरूढ्यर्थबहुत्वानुपपत्तौ सत्यामवयवार्थमादाय न च सुब्रह्मण्यानां चतुर्णां ग्रहणम् -

१.४.१०

अपि तु रूढिपूर्वकलक्षणयाऽन्तरङ्गप्रत्यासत्त्या सदः प्रवेशवतामुद्रतृप्रस्तोतृप्रतिहर्त्तृणां त्रयाणां ग्रहणमिति सिद्धान्तकोपप्रसङ्ग इति चेन्न, प्रोद्गातृपदयौगिकार्थग्रहणेऽपि "प्रैतुहोतुश्चमस ' इत्यत्र सदसि भक्षयितारः स्थिताः तत्र चमसस्य नयनं भक्षार्थं प्रष्यते ; न च सुब्रह्मण्यस्तत्र स्थितः अतस्तयाणामेव भक्षणं योगपक्षेपि सिद्धयतीति योगापलापेन रूढिपूर्वकलक्षणासमर्थनेन प्रयोजनं पश्यामः ; रूढिपूर्वकलक्षणापक्षे अपसुब्रह्मण्यानां ग्रहणम् , योगपक्षे चतुर्णामपीत्यस्यार्थस्य सम्प्रतिपन्नत्वात् , तस्मात् तदधिकरणरूढ्यर्थबहुत्वासम्भवे यौगिकोऽर्थस्स्वीकर्तव्यः, नतु पाशवदत्यन्तागतिकत्वम् , पाशपदे योगार्था-प्रतीतेरित्येवं परम् , ततश्च प्रकृतेऽजाशब्दे यौगिकार्थस्य स्फुटप्रतीतेर्न रूढिपूर्वकलक्षणाप्रसङ्गोऽवतरति , अत एव कुमुदं पङ्कजमित्युक्ते कङ्कजनिकर्त्तृत्वार्थ एव प्रतीयते, नतु तत्वादृश्यमिति भावः । भाष्ये स्वस्मिन्ननादिकालसम्बन्धानामिति , स्वरूपापेक्षया नपुंसकलिङ्गनिर्देशः, दृढभक्तिः शक्यञ्चानेन क्षुत्प्रतिहन्तुं "द्विगुरेकवचन'मितिवत् स्त्रीलिङ्गविवक्षाया वा , एवमनेन वा अन्येन वा, संयोगयोग्येत्यत्तरभाष्येऽपि लिङ्गनिर्देशो द्रष्टव्यः । भाष्येष्वपरित्यागाहेतुभूतेति , अपवर्गसाधन-

१.४.१०

भूतादित्यस्य प्रतिद्वन्द्वि -गौणवृत्त्यनङ्गीकारेऽपि न वैयर्थ्यमिति । ननु अजामन्त्रे स्वरसत एतावानर्थः प्रतीयते, "काञ्चि च्छागीं त्रिवर्णां स्वरूपबहुवर्करां प्रजाकरामेकः छागः प्रीयमाणोऽनुवर्तते ' अन्यस्तामुपयुक्तां त्यज्यत इति, अत्र लोके सम्भवन्न-प्ययमर्थो वेदे तत्राप्यध्यात्मप्रकरणे न निर्बन्धमर्हतीति आध्यात्मिक एव पदार्थे योजनं कार्यमिति निश्चिते योग्यतावशात्ते-जोबन्नमूलभूतप्रकृतावेवायं गौण्या वृत्त्या वर्तत इति प्रतीतिर्भवत्येव; यथा "द्वा सुपर्णा सयुजा सस्वायौ समानं वृक्षं परिष-स्वजात ' इतिमन्त्रे वृक्षत्वेन शरीरस्य जीवपरयोः पक्षित्वेन कर्मफलस्य वृक्षफलत्वेन परिकल्पनं तद्वत् , इतरथा तत्राप्यगतेः , तथा "गौरनाद्यन्तवती ' अत्रापि गोशब्दस्य गौणत्वे इयमेव वृत्तिराश्रयणीया, इतरथाऽयं मन्त्रः काञ्चिद्वस्तुतो गोव्यक्ति- मदानिं प्रतिपादयत्वित्युक्तावगतिरिति चेत् , सत्यम् ,ृअध्यात्मप्रकरणयोग्यस्य यौगिकार्थस्य ग्रहणसम्भवे गौणार्थस्वीका-रस्यायुक्तत्वादिति भावः । रूप्यवाचिपदाश्रवणादिति - "आत्मानं रथिनं विद्धि ' इत्यादाविव रूप्यवाचिपदाश्रवणेऽपीत्यर्थः, रूढिसिद्धाजाव्यावर्त्तकमिति - रूढ्यर्थनिर्णायकमित्यर्थः । अतः प्रयूक्तपदवैय्यर्थ्येति " आत्मानं रथिनं विद्धि' इत्यत्रप्रयुक्त-रूप्यवाचिपदवैय्यर्थ्यपरिहारोऽस्ति, "गौरनाद्यन्तवती' इत्यत्र गौणार्थग्रहण एव अनाद्यन्तवती इत्यादिपदस्वारस्यमस्ति, सर्वकामदुघेत्युचितविशेषणश्रवणादर्थोचित्यवगम्यते अजामन्त्रे तु न तथा, रूप्यवाचिपदाश्रवणात् , गौणाथर्परिग्रहेऽपि पुंल्लिङ्गाजशब्दयोरपि स्वरसप्रसङ्गात्, अगौनाथर्परिग्रहेऽपि अगाशब्दस्य योगेनाऽर्थप्रतिपादकत्वसम्भवात् , बहुप्रजाजनक-त्वादिविशेषणानाञ्च मुख्याजाव्यावत्तकत्वाभावेन गौणपक्ष एवार्थोचित्यमित्यस्यापि भावाच्चेत्यर्थः,रूढार्थसदृशपरत्वाभावा-च्चेति । यद्यपि चमसशब्दः पात्रविशेषे रूढः, शिरसि तु तत्सादृश्यात्तत्कल्पनया गौण इत्येव परेषां मतम् , तथापि प्रोक्षणी-न्यायेन यागेन वृत्त्युपपत्तौ चमसशब्दस्य रूढिकल्पनायां प्रमाणाभावात् , नच यथा प्रस्तोत्रादिषु अप्रयोगादुद्गातृशब्दस्य रूढिरङ्गीक्रियते, यथा वाधीयन्त इति धाय्या, इति धाय्याशब्दस्य यौगिकत्वे इतरत्रापि प्रयोगप्रसङ्गात् " पृथुवाजिवत्यौ - धाय्ये भवत ' इति तयोरेव प्रयोगात् धाय्याशब्दस्य पाय्यसान्नाय्य निकाय्य धाय्यामानहविर्निवाससामिधेनिष्विति सामधेनिमात्रवचनत्वेन स्मृतत्वेऽपि रूढत्वमित्येवमादिषु रूढिरङ्गीक्रियते, तथा चमसशब्देऽप्यस्तु "चमसस्सामपात्रं स्यात् ' इति निघण्टुपाठादिति वाच्यम् , चमसशब्दस्य पात्रविशेषादन्यत्राप्रयोगे प्रमाणाभावात्, यदि च रूढत्वं तथापि पूर्वोक्तदोषात् परोक्तयोजना न युक्तेति तात्पर्य्यम् । ।। चमसाधिकरणम् समाप्तम् ।। ६ ।।

१.४.११

"तन्देवा ज्योदिषां ज्योतिरायुर्होपासतेऽमृतम् ' "यस्मिन् पञ्च पञ्च जना आकाशश्च प्रतिष्ठितः' "तमेवं मन्य आत्मानं विद्वान् व्रक्षामृतोऽमृतम् ' "प्राणस्य प्राणमुत चक्षुपश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनो विदुः ते निश्चिक्युर्ब्रह्म पुराणमग्रयम् ' इति श्रुतिः । तान्यपि विषय इति -"स वा एष पुरुष पञ्चधा पञ्चात्मा ' इत्यादिवाक्यमपि विषय इत्यर्थः पञ्चस्वन्यतमत्वाभावेनेति । यद्यपि "रथकारः पञ्चमाश्चत्वारो वर्णाः पञ्चजना' इति कैय्यटोक्तेर्मनुष्यनाम्नः पञ्चजनशब्दस्यापि सप्तर्षीतुल्ययोगक्षेमत्वमेवेति वक्तुं शक्यम्, तथापि मनुष्यादिनाम्नः पञ्चजनशब्दस्य पञ्चभिर्भुतैर्जननमस्येति व्युत्पत्त्यभिप्रायेण तथोक्तमिति द्रष्टव्यम् । न च तथा व्युत्पत्त्याश्रयणेऽपि सङ्खयापूर्वकत्वं सिद्धमिति कथं सङ्खयापूर्वकसमासत्वाक्षेप इति वाच्यम् , समानाधिकरणसङ्खयापूर्व-कसमासासम्भवादिति भावः - सङ्खयापूर्वकसमासत्वं युक्तमितभिप्रेत्येति । "तद्धितार्थोत्तरपदसमाहारे चे'तिसूत्रविहितसङ्खया-पूर्वकसमासत्वं युक्तमित्यभिप्रेत्येत्यर्थः, नतु "दिक्सङ्खये संज्ञाया'मिति विहितसङ्खयापूर्वकसमासत्वमिति मन्तव्यम् , तथा सति "सप्त सप्तर्षयः'इत्यत्रौकोनपञ्चाशतत्वसङ्खयाप्रतीत्यभाववत् "पञ्च पञ्चजना' इत्युक्ते पञ्जविंशतत्वप्रतीत्यभावप्रसङ्गादिति

द्रष्टव्यम् -तदाहीति । पञ्चशब्दस्य समस्तत्व इत्यर्थः -दशत्वमापद्यत इति - यथा "पञ्च सप्त च वर्णानि नववर्षशतक्रतुः' इत्यादौ द्वादशवर्षवृष्ट्यभावप्रतीतिवदिति भावः -विशेषपय्यन्तशब्दोपस्थापितस्येति । ततश्च स्वतन्त्रोपस्थित्यभावेन नैराकाङ्क्षयादिति भावः- नच द्वे शतेति - "द्वे शते ब्रह्माणास्त्रीणि शतानि ब्रह्मणा' इत्यत्र ब्राह्मणपदंसामानाधिकरण्यसिध्द्यर्थं शतशब्दस्य शतत्वसङ्खयावद्विशेष्यपर्यन्ततया विशेष्यपर्यन्तशब्दोपस्थापितस्यापि शतसङ्खयारूपविशेषणस्य सङ्खयान्तयान्वयदर्शनवदिहापि पञ्चत्वसङ्खयायाः पञ्चत्वसङ्खयान्वयोऽस्तीत्यर्थः। अवान्तरसङ्खयेति - यथा त्रयश्त्रिशद्देवेवा इति महासङ्खयायाम् "अष्टौ वसव एकादश रुद्राः द्वादश आदित्याः प्रजापतिरिन्द्रश्चे 'ति वाक्यप्रतिपन्नाष्टत्वैकादशत्वावान्तरसङ्खयानिवेशनिमित्तवसुत्वा-द्युपाधिवदिह पञ्चत्वसङ्खयारूपावन्तारसङ्खयानिवेशनिमित्तभूतस्यैकस्योपाधेर्दशनादित्यर्थः-एकग्रामस्थित्याद्युपाधिना हीति । यद्यपि एकग्रामवाविषु सहस्रेषु पुरुषेषु सहस्रसङ्खयावान्तरसङ्खयारूपशतसङ्खयानिवेशनिमित्तभूताः परस्परव्यावृत्ता उपाधयो न दृश्यन्ते, "पञ्च सप्त च वर्णानि पञ्च पञ्चाशतस्त्रिवृत् सम्वत्सरा' इत्यादिषु विनाप्येकैकमवच्छेदकं विवक्षितमहासङ्खयालाभो-पायतामात्रेण यत्किञ्चदवान्तरसङ्खयानिवेशदर्शनात् , नहि द्वादशवार्षिक्यामनावृष्टौ पञ्चसु सप्तसु च वर्षेषु विश्वसृजामयने पञ्चाशनुत्तरद्विशतसङ्खयानां त्रिवृतां सम्वत्सराणां मध्ये पञ्चाशति पञ्चाशति सम्वत्सरेषु चैकैकधर्मोस्ति, तथापि सम्भव-स्थलाभिप्रायेणदं द्रष्टव्यम् । शतसङ्खयापुरुषसमूहैक्यमिति - शतसङ्खयालक्षणधर्मैक्येन समूहैक्यमित्यर्थः । सङ्खयानिवेश-निमित्तोपाधौ सति सङ्खयानिवेशः, सङ्खयानिवेशे सति समूहैक्यमिति द्रष्टव्यम् । न तन्त्रोक्ताथर्त्वनिश्चय इति -"देवाः पितरो गन्धर्वा दैत्या दानवा राक्षसा भूताःप्रेताः पिशाचाः चत्वारो वर्णाः षडनुलोमाः षट् प्रतिलोमाश्चे 'त्येवमादिरूपेण पञ्चविंश-तिजनसम्भवादिति भावः - ऐकपद्यदर्शनादिति -इदमुपलक्षणम्, पञ्चजनशब्दस्य भाषिकाख्यशतपथब्राह्मणस्वरविधायक-ग्रन्थविहितेनान्तोदात्तस्वरेणापि समासो विधीयत इति द्रष्टव्यम्, पञ्चशब्दसमभिव्याहारबलेनेति - पञ्च सप्तर्षयः सप्त सप्तर्षय इत्यादौ सङ्खयावाचिपदसमभिव्याहारेऽपि न सङ्खया परत्वम्, समाहारस्वीकारो वा, तथापि प्रस्यस्तसभतावयवार्थसञ्ज्ञा समासत्वाश्रयणापेक्षया समाहारसमासत्वाश्रयणमेव ज्यायः, किञ्च सञ्ज्ञासमासत्वाभ्युपगमेऽपि न पञ्चजनशब्देन मनुष्याणां

१.४.११

ग्रहणं सम्भवति, अध्यात्मप्रकरणे पञ्चमनुष्यत्वकीर्तनस्यायुक्तत्वात् , इतरेषाञ्च पञ्चजनशब्दितानामप्रसिद्धैः समाहारसमा-सत्वाश्रयणमेव युक्तमिति माकः , पञ्चजनपञ्चशब्दस्येति - पञ्चजनशब्दान्तर्गतपञ्चशब्दस्येत्यर्थः - स्त्रीलिङ्गस्मृतेरिति । "अका-रान्तोत्तरपदो द्विगु स्त्रियां भाष्यत ' इति स्त्रीत्वस्य पात्रादिषु प्रतिषेधो वक्तव्य इति त्रिभुवनादिेषु अपवादवत् इह तदभावात् छान्दसत्वमिति भावः । एतच्चोपलक्षणम् , "उकालोऽञ्खस्वदीर्घप्लुतः' इत्यत्र छान्दसत्वेन "स नपुंसकम्' इति नपुंसकलिङ्गाभा-ववदिहापि छान्दसत्वेन "सनपुंसकम् ' इति नपुंसकलिङ्गाभावोऽपि द्रष्टव्यः । ननु "यस्मिन् पञ्च पञ्चजना' इतिमन्त्रे आत्माका-शव्यतिरेकेणापि पञ्चविंशतिपदार्थप्रतीतेः, ताभ्यां च सह सप्तविंशतिसङ्खयासम्पत्तेः नैतत् साङ्खयदशर्नानुगुणमित्याशङ्खय प्रकृतिद्रव्यस्य द्रव्यत्रयात्मकत्वेन सप्तविंशतिसङ्खयाया अपि न तन्मते विरोध इति परिहरति, यस्मिन्निति निर्दिष्टेन आत्मना चेत्यादिना । आत्मनः स्वस्मिन्नवस्थितत्वादिति -स्वे महिम्नि प्रतिष्ठित इतिवदिति भावः, भाष्ये मूलप्रकृतिरविकृतिरिति, मूलप्रकृतिः न कस्यापि विकृतिः, महदहङ्कारतन्मात्राणि सप्तापि किञ्चिदपेक्षया विकृतयः, किञ्चिदपेक्षया प्रकृतयश्च, पञ्च भूतानि पञ्चज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्चेति षोडसापि तत्वानि विकृतिभूतान्येव, न प्रकृतिभूतानि, पुरुषस्तु न प्रकृतिर्नापि विकृतिश्चेति श्लोकार्थः । भाष्ये - तमिति

परामर्शेनेति, "तमात्मानं ब्रह्मामृतम् एवमन्यो विद्वानमृतो भवती 'ति तच्छब्द-निर्दिष्टस्य मन्त्रवर्णे ब्रह्मत्वाविष्करणादिति भावः, ननु विश्वसृजामयने "पञ्चपञ्चाशतस्त्रिवृत्सम्वत्सराः पञ्चपञ्चाशतः पञ्चदशाः

१.४.११

पञ्चपञ्चाशतः सप्तदशा ' इत्यादौ पञ्चाशति पञ्चाशत्यहस्सु अनुगतोपाध्यभावेऽपि तथा तथा निर्देशवत् इहापि पञ्चसु पञ्चसु अनुगतोपाध्यभावेऽपि लक्षणया पञ्चविंशतिसङ्ख्याप्रतीतिः सम्भवतीति अस्वारस्यं हृदि निधायाह ,भूतसमूहासिद्धेरित्युप-लक्षणमित्यादिना । तेष्वर्थवत्वमाहेति - समस्तपञ्चजनशब्देनैव पञ्चत्वसङ्ख्यायाः प्रतीतत्वात्पुनः पञ्चशब्देन विशेषणम् व्यर्थमितिशङ्कां व्युदसितुमर्थवत्वमाहेत्यर्थः, समाससामर्थ्याभावादिति - समासस्य सामर्थ्यं नाम समर्थपदाश्रितत्वम् , पदानां सामर्थ्यं नाम परस्परसंसृष्टार्थत्वम् , ततश्च पञ्चशब्दस्य निरर्थकत्वे परस्परसंसृष्टार्थपदाश्रितत्वलक्षणसामर्थ्यं

१.४.१२

अत्रायमभिसन्धिरित्यादेरयमर्थः, साधुत्वान्वाख्यानप्रवृत्ता वैयाकरणाः सन्तमसन्तं वा कञ्चिदर्थं परिकल्प्य व्युत्पादयन्ति, नच तावता तत्पदात्तदर्थप्रतीतिरस्ति, नहि गौरित्युक्ते गच्छतीति प्रतीतिरस्ति, ततश्च पञ्चजनशब्दस्य प्रत्यस्तमितावयवार्थकत्व-त्पञ्चत्वसङ्ख्यया विशेषक्षमनुपपन्नम् ; किञ्च वासस्वी देवदत्तपदवाच्यः यः पञ्जरस्थः स सिंह इत्यादौ व्युत्पत्तिग्रहकाले वासः प्रभृतीनामुपलक्षणत्वेऽपि नाभिधानकाले प्रतीतिरिति वासस्वी देवदत्त इत्यादौ न पौनरुक्तयादिकम् तथेहापीति पञ्चशब्द-विशेषणोपपत्तिः । किञ्च अभिधानदशायामवयवार्थप्रतिपत्तौ सत्यामपि यदा कदाचित् तदर्थसत्तामात्रं प्रतीयते, नतु प्रयोगकाले तत्सत्ताप्रतीतिरिति गौगच्छतीति प्रयोगसाफल्यम् , तद्वदिहापि तादाद्विकपञ्चत्वसङ्ख्यान्वयप्रतीतिसिध्द्यर्थं पञ्चेति विशेषणं सफलमेव, अत एव "पञ्चजनादुपसङ्ख्यान'मिति वार्तिके कथमत्रैकवचनमितयाक्षिप्य पूर्वेपुकामशम्यादिवत्समुदायवृत्तस्या-वयवेऽपि वृत्त्यैकवचनम् यथा सप्तर्षिरिति, ततश्च "द्वौ पञ्चजनौ त्रयः पञ्चजनाः पञ्च पञ्च जनाः' इत्यादिसङ्ख्यासामाना-धिकरण्यं विरुद्धम् । यदा द्वौ सप्तर्षिः त्रयः सप्तर्षयः' इति कैय्यटपदमञ्जर्यादौ अभिधानान्न व्याख्यानपौनरुक्तयादिकमिति -द्रष्टव्यम् - यद्विग्रहवाक्येर्थाभिधानशक्तिरिति । ततश्च विग्रहवाक्याभिधाने स्वरूपयोग्त्वमस्ति, ततः समाससामर्थ्यमप्यस्तीति भावः। पञ्चविंशतितत्वाप्रतिपत्तिमभिप्रेत्येति - पञ्चविंशतितत्वाप्रतिपत्तिहेतौ समूहपञ्चकासम्भवे विपरिवतेमान ऐवेत्यर्थः । सन्दिग्धे तु वाक्यशेषादिति । ननु पञ्चजनशब्दरूढ्या मनुष्याणामेव निश्चयसम्भान्न सन्देहोदय इति चेत् न, अध्यात्मप्रकरणे

१.४.१३

पञ्चमनुष्याः प्रतिष्ठिता इत्यर्थपरिग्रहे वाक्यस्य निस्तात्पर्यत्वप्रसङ्गात् पञ्चशब्दस्य वृत्तिसङ्ख्यापरत्वं विहाय ब्राह्म-णत्वाद्यवान्तरोपाधीनादाय पञ्चविधा मनुष्या इति वाक्यार्थः समाश्रयणीयः, उत वाक्यशेषगताः प्राणादयो वेति सन्देहे

सति "प्राणस्य प्राणमुत चक्षुपश्चक्षुरत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मनो ये विदुः ते निश्चिक्युः ब्रह्म पुराणमग्रयम् ' इति प्राणादीनां ब्रह्माधीनप्राणनादिव्यापारसामर्थ्यप्रतिपादकत्वाक्यशेषवशेन निर्णयसम्भवादिति भावः,- पञ्चसङ्ख्यानिवेश-निमित्तैकोपाध्यभावादिति । यद्यपि प्राणादीनामिन्द्रियत्वरूपैकोपाध्यभावेऽपि ब्रह्माधीनस्वव्यापारतया "प्राणस्य प्राण 'मिति-वाक्यशेषप्रतिपाद्यत्वमेकोपाधिरिति शक्यते वक्तुम् , तथापि सति गत्यन्तरे प्रसिद्धोपाधेरेव स्वीकरणार्हत्वादिति भावः

१.४.१३

अन्तरादित्याश्रिकरण इति । शरीरस्य त्रिगुणात्मकत्वप्रकृतिपरिणामित्वशङ्कापरिहारदर्शनाद् यथा पूर्वपक्षेऽपि तच्छङ्काया अभिप्रतत्वावगम इति भावः । ननु परमतवद्द्वितीयान्तज्योतिश्शब्दार्थपरामर्शित्वं किन्न स्यादित्याशङ्कयाह - श्रुतिवाक्य-स्वारस्येति । अस्वारस्यं सोढव्यमिति - तच्चानुपदमेव स्फुटीभविष्यति - परैर्हीति । ननु परैः षष्ठयन्तज्योतिश्शब्दनिर्दिष्टेना-दित्यादिज्योतिषा इव सङ्खयापूर्णमित्येवोक्तम् , असत्यपि काण्वानामन्ने ज्योतिषा तेषां पञ्चसङ्खया पूर्येत, तेऽपि हि "यस्मिन् पञ्च पञ्चजना ' इत्यतः पूर्वस्मिन्मन्त्रे ब्रह्मस्वरूपनिरूपणायैव ज्योतिरधीयते, "तं देवा ज्योतिषां ज्योतिः ' इतीति भाष्यम् - व्याकुर्वता आनन्दगिरिणाऽस्मिन् मन्त्रे षष्ठयन्तज्योतिषा पञ्चपूर्णान्नत्वात्मज्योतिषा, तस्यैकस्य नाधाराधेयत्वादिति व्याख्यातत्वादिति चेन्न, यदि च द्वितीयान्तज्योतिश्शब्दार्थः तदाधाराधेयत्वाद्यनुपपत्तिरिति विकल्पमभिप्रेत्य दूषणमुक्तमिति

१.४.१३

द्रष्टव्यम्, परस्परसाकाङ्क्षेणेति - "पञ्च पञ्चजना 'इति मन्त्रेणलभ्यते ' नापि "तं देवा ' इति पूर्वमन्त्रेण, अतस्तदर्थनिणर्ये परस्-परसाकाङ्क्षेणेत्यर्थः, स्वरशब्देनैव व्याख्यातानीति -चक्षुष इति चक्षुरिन्द्रियमित्येवं चक्षुरादिशब्दैरेव व्याख्यातानीत्यर्थः । अन्न-शब्दं व्याचष्टे -अन्नस्येतीति -द्विः पठ्यते, न तस्य प्रयोजनं पश्यामः- लक्षणया बोधकत्वं दर्शयितुमिति -यौगिकार्थस्वीकारेऽन्न

१.४.१४

शब्दस्य वृत्तिद्वयविरोधप्रसङ्गादिति भावः -एकव्यापारेणेति । अन्नसम्बन्धित्वरूपैकव्यापारेणेत्यर्थः,प्रदर्शितानीत्यर्थ इति -निर्दि -ष्टशब्दस्य प्रदर्शितत्वमर्थः, ततश्च "पञ्च पञ्चजना ' इत्येतत्सर्वेन्द्रियोपलक्षणमिति भावः- प्रयोजनं वदन्निति । सर्वथा साङ्खयमत-प्रत्याशाभावरूपप्रयोजनं वदन्नित्यर्थः पञ्चधा भूतपञ्चतत्वसङ्घातानामिति - ज्ञानेन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, तन्मात्राणि पञ्च, भूतानि पञ्च, अवशिष्टानि पञ्च तेषामात्मेत्यर्थः स्यादिति भाघः । अद्वारकञ्चति -आनन्दमयशि अद्वारकम् , अन्यत्र स-द्वारकमित्यर्थः।। सङ्खयासम्भवे तथा वर्णनीयमिति - ब्रह्मात्मकत्वेन तथा वर्णनीयमित्यर्थः असम्भवे चेति अवतारसङ्खयानिवेश-निमित्तोपाध्याद्यसम्भवे चेत्यर्थः ।।अवर्जनीयाचिद्बोधेति -तत्राचित्प्रतिपत्तेरवर्जनीयत्वादेव व्याकुलत्वम् ,तादृशकारणवाक्यानि

१.४.१४

विषयः, सर्वाण्यपि कारणवाक्यानि विषय इत्यर्थः, एकस्मादित्यस्यैकरूपात्कारणादितिव्याख्यानं दृश्यते न तस्यं सामीचीन्यं पश्यामः, "सत्पूर्विकासृष्टिराम्नायत इति छान्दोग्ये इति शेषः "असत्पूर्विका चेति ' तैत्तिरीयके इति शेषः "अन्यत्रेति ' वृहदार-ण्यके इत्यर्थः, ब्रह्मकारणवाद इति निमित्तसप्तमी, ब्रह्मकारणवादौप्रयिकी सृष्टिकारणव्यवस्त्रितिः वेदान्तेषु नास्तीत्यर्थः - सृष्टिकारणव्यवस्थितितेरित्यर्थ इति । ततश्च सृष्टिशब्दस्य कारणमात्रासाधारणतयोपादानस्यापि सङ्ग्रहो भवतीति भावः, पूर्वापर -पर्यालोचनाप्रयत्नाविति । "तपोऽतप्यत ' इति पूर्वापरपर्यालोचना, "तप आलोचने इति हि धातुः, असृजतेति प्रयत्नश्चेति भावः चक्षुराद्युत्पादनौन्मुख्याभिप्रायमिति - चक्षुरादिशब्दप्रवृत्तिनिमित्तभूतदर्शनौन्मुख्याभिप्रायमित्यर्थः, ततश्च "पश्यत्यचक्षु 'रित्यस्य वाक्यस्य दर्शनोत्पादनाभिमुखत्वात्कर्मनामभाग्भवतीत्यर्थः, तेन "स प्राणन्नेव प्राणो नाम भवति, वदन्वाक् , पश्यन् चक्षुः, श्रृश्वन् श्रोत्रम्मन्वानो मनस्तानयस्यैतानि कर्मनामान्येवे 'ति श्र,तौ प्राणवाक्चक्षुः श्रोत्रमनश्शब्दा लावकपावकादिशब्दव

१.४.१४

त्प्राणनवदनदर्शनश्रवणमननक्रियायोगादात्मन एव क्रियानिमित्तनामानीत्येव प्रतीयते, नतु "चक्षुः पश्यन् ' इति चक्षुः कर्म -दर्शनम् चक्षुरुपादानौन्मुख्यलक्षणं प्रतीयते, परैरपि तथा व्याख्यातञ्चेति शङ्का पराकृता, ननु अव्याकृतशब्देन प्रथमत एवाचे -तनप्रतिपत्तिरित्युक्तम् , अन्याकृतत्वस्य च चेतनैकान्तत्वाभावात् , अत एव तदुपजीवि तदुत्तरसन्दर्भः सर्वोऽपि न युक्त इत्यस्वरसादाह -यद्वा कारणगता इतीति । नन्वीक्षणस्य सर्वथा मुख्यत्वभङ्गापेक्षया अंशे मुख्यत्वभङ्ग एव स्वीकार्य्य इति वैपरीत्यमेव युक्तमित्याशङ्कय चिदंशकारणत्वस्यानन्यथासिद्धप्रमाणप्रतिपन्नतया सर्वत्र ईक्षक्षादिगौणत्वमेव युक्तमित्याह - तदतिरिक्ते वस्तुनीति । नेतिपदानुषङ्गफलितेति - "न सङ्खयोपसङ्ग्रहादपी 'तिसूत्रस्थनञनुषङ्गफलित इत्यर्थः । ननु "कारण-दवनेने ' इत्यादिसूत्रे यथा व्यपदिष्टस्य सर्वज्ञत्वादिगुणकस्य "असद्वा इदमग्र आसीत् ' इत्यत्रापि जगत्कारणत्वेनोक्तेरिति हि

१.४.१४

वक्तव्यम् , तस्यैव पूर्वपक्षप्रत्यनीकत्वात् , नतु "आत्मन आकाशः सम्भूतः' इत्यादिवाक्ये सर्वज्ञस्यैवाकाशादिकारणत्वेनो-क्तेरिति प्रतिपायनं युक्तम् , किञ्च "तत्तोजोऽसृजत ' इति सद्विद्यावाक्योपादानमप्ययुक्तम् , तत्राकाशादिकारणत्वाश्रवणा-दित्याशङ्कयाह - स्वतश्चेतनैकान्तेति । भूयसां बलीयस्त्वमेवेति -आकाशादिपदविहितब्रह्मकारणत्वप्रतिपादकबहुवाक्यानुसारेण ब्रह्मकारणवादविरोधी क्वादित्कोऽसदव्याकृतादिशब्दो यथा कथञ्चिन्नेतव्य इत्यस्य सूत्रस्यार्थः, पूर्वापरवाक्यपर्यालोचनयाऽपि असदादिशब्दस्य तथैव निर्वाह इति उत्तरसूत्रार्थ इति भावः विपश्चित्वप्रतिपादनादिति - इदमुपलक्षणम् , "सत्यम् ज्ञान 'मिति ज्ञानत्वप्रतिपादनादित्यपि द्रष्टव्यम् , ननु सच्छब्दस्य चेतनपरत्वे जडवाचीदं शब्दसामानाधिकरण्यं कथमित्यत्राह -सच्छब्द-स्येति । समर्थित इत्यभिप्राय इति -तात्पर्यत इतीति शेषः एको ह वै नारायण आसीदित्यारभ्येति - अत्र आरम्भसमानकर्तृक-क्रियावाच्योचितपदाध्याहारेणान्वयो द्रष्टव्यः - उपक्रमस्थबहुश्रुतिविरोधादिति यद्यप्यव्याकृतब्राह्मणोपक्रमवाक्यमिदमेव,

१.४.१५

तथापि पूर्वब्राह्मणेषु "आत्मैवेदमग्र आसी 'दित्यादिश्रवणादेवमुक्तमिति द्रष्टव्यम् ।। स इति पुल्लिङ्गशब्देनेति - उत्तरोत्तरवा-क्यगतस्य तच्छब्दस्य स्वस्वपूर्ववाक्यप्रतिपन्नगुणविशिष्टसमाकर्षकत्वात् सोऽकामयत ' इति वाक्यप्रतिपन्नगुणविशिष्टसमा-कर्षक इति भावः, ज्ञानविपश्चिदादिबहुश्रुतिप्राबल्यसिद्धेरिति । ननु ज्ञानविपश्चिदादिशब्दैः ब्रह्मणः प्रकृतत्वेऽपि "असद्वा इदमग्र आसी 'दित्यत्रासच्छब्दश्रुतिबलात्प्रकृतब्रह्मणोऽन्यदेव, प्रकरणात् श्रुतेर्बलत्वात् , ततश्च परस्परविरोधान्निर्णयासमर्थानां वेदान्तानां कापिलत्मृत्यनुसारेण निर्णयो वक्तव्य इति वदन्तं पूर्वपक्षिण प्रतिज्ञानविपश्चिदादिबहुश्रुतिप्राबल्यकीर्तनस्य व्यर्थ-त्वात् , पूर्वपक्षिणा हि ज्ञानविपश्चिदादिश्रुतिप्राबल्यमभ्युपेत्यैव तदबाधेनैव प्रकरणमात्रबाधस्यैवोपन्यस्तत्वादितिचेत् सत्यम् , श्रुत्या बलीयस्या प्रकरणमात्रबाधश्चेत् , सोऽभ्युपगन्तुं युक्तः , इह तु न तथा; अस्मदादिशब्दश्रुतेर्बलवत्त्वे ज्ञानविपश्चिदादि-शब्दाथर्स्य जगत्कारणत्वप्रतिपादकश्रुतीनां "सोऽकामयत तदप्येष श्लोको भवती 'ति प्रकृताभिधायिसर्वनामश्रुतीनामपि

बाधप्रसङ्ग इति भावः । ननु "असदेव 'मिति बृहदारण्यकश्रुतावपि "तत्सदासी 'दिति तत्सद्रूपदाविधायकोत्तरवाक्ये तत्पदेना

१.४.१५

सचछब्दोक्तस्यैव समाकर्षात् अत्यन्तासतश्च सद्रूपतापत्त्ययोगादित्येव परमतवत् "असदेवेदमग्र आसी 'दित्यत्रापि समाकर्षे प्रदर्शयितुं शक्ये, भाष्ये तदनादरः किमर्थ इत्याशङ्कयाह - तत्रासच्छब्दोक्तस्येति । तुच्छव्यावर्तक इति -

परमतवत् अस्मन्म-तपूर्वपक्षे तुच्छकारणत्वशङ्काया अप्यनुद्धाटनात् तुच्छव्यावर्तकसच्छब्दसमाकर्षो युक्त इति भावः । ननु तुच्छकारणत्शङ्का-ऽप्यस्मिन् पूर्वपक्षे उद्घाटयतामित्यत्राह - कारणावस्थायामिति । परमात्मस्वरूपे नामरूपव्याकृतत्वतदभावयोरभावात् सद्वारके व्याकृत्वाव्याकृतत्वे इत्यभिप्रेत्य व्याचष्टे, भाष्ये -अव्याकृतम् - अव्याकृतशरीरमिति । तदात्मानं स्वयमकुरुत इत्यनेनैकार्थ्या -दिति भाव इति - व्याक्रियत इति कर्मकर्तरि लकार इति भावः । ननु "तद्धेदं तर्ह्यव्याकृतमासी 'दित्यत्र कर्मणि तिष्ठान्ततया व्याक्रियतेत्यत्रापि तदवैरूप्याय कर्मण्येव लकारो वक्तव्यः, न कर्मकर्तरि नचाव्याकृतमित्यत्रापि कर्तय्यैव कर्मवद्भावात् क्तप्रत्ययोऽस्त्विति वाच्यम् , "लिङ्य्ाशिष्यङ् ' इत्यत्र द्विलकारकनिर्देशेन लान्तकार्यं प्रत्येव कर्मवद्भावविधानात् कर्म-वद्भावेन कृत्यक्तादीनामससम्भवात् , ततश्च क्तप्रत्ययसारूप्याय लकारोऽपि कर्मण्येव युज्यते , "न कर्मकर्त्तरी ' ति कथं नामरूपव्याकरणस्य स्वयं कर्तृकता सिध्द्येदिति चेत् न, छव्याकृतमित्यत्र कर्मणः कर्तृत्वविवक्षया धातोरकर्मकत्वात् "गत्यर्थाकर्मके 'ति कर्त्तरि क्तप्रत्ययसम्भवान्नानुपपविरिति भावः ।। अत्रेयं विषयशुद्ि्थः , कौषीतकीब्राह्मणे अजातशत्रुर्नाम

१.४.१६

काशीराजः स्वसमीपमागत्य "जुह्म ते ब्रुवाणी 'त्युक्तवन्तं बालाकिम् "सहस्रं दह्मः एतस्यां वाचि जनको जनक इति वै जना धावन्ती 'ति प्रशस्य बालाक्रिना "य एव आदित्ये पुरुषस्तमेवाहमुपासे ' इत्यादिभिर्वाक्यैर्ब्रह्मत्वेन उपदिष्टानादित्य-चन्द्रविद्युत्स्तनयिस्तु - आकाशवाय्वग्न्यादिगतानू पुरुषान् अब्रह्मत्वेन तत्तत्पुरुषोक्तयनन्तरमेव प्रत्याख्याय तत्र तूष्णींभूते बालाकौ किमेतावदेव तव परिज्ञानमिति पृष्ट्वा तेनैतावदेवेत्यभिहिते "मृषा किल वै मा सम्बादयिष्ठाः' "ब्रह्म ते ब्रुवाणी ' त्युक्तवा "यो वै बालक ' इत्यादि पठ्यते । एवं हि श्रुतिक्रमः, "सहोवाच यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्य इति तदुह बालाकः समित्पाणिः प्रतिचक्रमे । उपायानीति तं होवाचाजातशत्रुः प्रतिलोमरूपमेतत् स्यात् । यत् क्षत्रियो ब्राह्मणमुपनयेत् , एहि व्येव त्वाद्य ज्ञापयिष्यामीति तं ह पाणावभिपद्य प्रवब्राज । तौ ह सुप्तं पुरुषमीयतुः, तं हाजात-शत्रुरामन्त्रयाञ्चके, बृहन् पाण्डरवासस्सोमराजन्निति सह तूष्णीमेव शिश्ये तत उ हैवैनं यष्टया विचिक्षेप, स तत एव समुत्तस्थौ तं होवाचाजातशत्रुः क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत्कुत एतदागादिति तदुह बालाकिर्न विजज्ञौ तं होवाचा -जातशत्रुः यत्रैष एतद्बालाके पुरुषोऽयिष्ट यत्रैतदभूत यत एतदागात् । हिता नाम हृदयस्य नाड्यो हृदयात्पुरीततमभिप्रतिष्ठन्ति यथा सहस्रधा केशस्यापि पातस्तावदण्व्यः पिङ्गलस्याणिम्ना तिष्ठन्ते शुक्लस्य नीलस्य पीतस्य लोहितस्येति तासु तदा भवति यदा सुप्तः स्वप्नं न कथञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति तदैवैनं वाक् सर्वैर्नामभिस्सहाप्येति चक्षुः सर्वै रूपैस्स-हाप्येति श्रोत्रं सर्वैश्शब्दैः सहाप्येति मनस्सर्वैर्ध्यानैः सहाप्येति स यदा प्रबुध्यते यथाग्नेर्विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादा

बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्यः' इति । उपक्रमे वक्तव्यतया बालाकिनोपक्षिप्तं ब्रह्माजानते तस्मां एवाजातशत्रुणा "स वै वेदितव्यः' इति ब्रह्मोपदिश्यते । "यस्य वैतत्कर्म' इति कर्मसम्ब-न्धात्प्रकृत्यध्यक्षो भोक्ता पुरुषो वेदितव्यतयोपदिष्टं ब्रह्मेति निश्चीयते, नार्थान्तरम्, तस्य कर्मसम्बन्धानभ्यु-पगमात् । कर्म च पुण्यापुण्यलक्षणं क्षेत्रज्ञस्यैव सम्भवति । न च वाच्यम्; क्रियत इति कर्मेति व्युत्पत्त्या प्रत्य-क्षादिप्रमाणोपस्थापितं जगदेतत्कर्मेति निर्द्दिश्यते, यस्यैतत्कृत्स्नं जगत्कर्म स वेदितव्य इति क्षेत्रज्ञादर्थान्तरमेव प्रतीयत इति; "यो वै बालाक एतेषां पुरुषाणां कर्त्ता यस्य वैतत्कर्म' इति पृथङ्ि्नर्देशवैयर्थ्यात्, कर्मशब्दस्य च लोकवेदयोः पुण्यपापरूप एव कर्मणि प्रसिद्धेः ।तत्तद्भोक्तृकर्मनिमित्तत्वावाज्जगदुत्पत्तेरेतेषां पुरुषाणां कर्त्तेति च भोक्तुरेवोपपद्यते । तदयमर्थः- एतेषामादित्यमण्डलाद्यधिकरणानां क्षेत्रज्ञभोग्यभोगोपकरणभूतानां पुरुषाणां

त्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवाः देवेभ्यो लोकाः तद्यथा क्षुरः क्षुरधानेव हितस्स्यात् विश्वम्भरो वा विश्वम्भ-रकुला ये एवमेवैष प्राज्ञ आत्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तमेतमात्मानमेत आत्मनोऽन्ववस्यन्ति यथा श्रेष्ठिनं स्वाः तद्यथा श्रेष्ठी स्वैर्भुङ्कते, यथा वा इन्द्र एतमात्मानं न विजज्ञौ तावदेनमसुरा अभिबभूवः, स यदा विजज्ञौ अथ हत्वासुरान् विजित्य सर्वेषां देवानां श्रैष्ठयं स्वाराज्यमाधिपत्यं परियाय यो ह वैनं विद्वान् सर्वान् पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठयं स्वाराज्यमधिपत्यं पर्य्येति य एवं वेद य एवं वेद । स वै वेदितव्य इत्यनतं विषयवाक्यमिति । "स वै वेदितव्य इत्यधीयत' इति पूर्वेणान्वय इति भावः । जीवस्य कर्मसम्बन्धपरत्वशङ्को निरस्तेति - "यो वै बालाके ' इति वाक्ये जीवस्य कमर्सम्बन्धे बोधितेऽपि तदतिरिक्तस्य ब्रह्मणःप्रत्याख्यानाभावात् , नानेन सिद्धान्तिनः किञ्चिदनिष्टमापतितमिति शङ्का निरस्ता, ब्रह्मण एव कर्मसम्बन्धप्रतिपादनेन जीवातिरिक्तब्रह्मप्रत्याख्यानादिति भावः । इह निर्दिष्टानामिति । अस्मिन् प्रकरणे निर्दिष्टाना-मादिनांपुरुषाणामित्यर्थः । सुषुप्तिस्थानं नाड्य इति - पूर्वपक्षिणोऽयमभिप्रायः,क्वैष एतद्बालाके पुरुषोऽशथिष्टेति प्रश्न उत्थापि-

१.४.१६

तस्य जीवस्य सुषुप्तिस्थानविषयः, क्व वा एतदभूदिति प्रश्नस्तदुत्थापनात्पूर्वमुपरतव्यापारस्य तदनन्तरं व्याप्रियमाणतया-नुभूयमानस्य एतच्छब्दनिर्दिष्टस्य करणग्रामस्य सुषुप्तिकालिकस्थितिविषयः, "कुत एतदागा'दिति प्रश्नस्तस्यैव करणग्रा-मस्योद्गमनापादानविषयः, एवञ्च तासु तदा भवति यदा सुप्त स्वप्नं न कथञ्चन पश्यतीति प्रथमप्रश्नस्य प्रतिवचनम् , अथा- स्मिन् प्राण एवेकधा भवतीति द्वितीयप्रश्नस्य प्रतिवचनम् , "तदेनं वाक्' इत्यादि तु तस्यैव विवरणम् , यदा प्रतिबुध्यत' इत्यारभ्य "देवेभ्यो लोका' इत्येतदन्तं तृतीयप्रश्नस्य प्रतिवचमिति । सिद्धान्तिनस्तु प्रथमप्रश्नो जीवस्य स्वप्नस्थानविषयः, द्वितीयस्तु जीवस्य सुषुप्तिस्थानविषयः, तृतीयस्तु गीवस्य प्रबोधकालोद्गनापादानविषयः, तासु तदा भवतीति प्रथमप्रश्न-प्रतिवचननम् , "यदा सुप्त ' इत्यारभ्य द्वितीयप्रश्नप्रतिवचनम् , "यदा बुध्यत' इत्यारभ्य तृतीयप्रश्नस्य प्रतिवचनमित्य- भिप्रायः - तदानीं तदाशब्द इति - नाडीनां सुषुप्तिस्थानत्वाभ्युपगमपक्ष इत्यर्थः । उक्तवानित्यन्वय इति -करणग्रामैकधा-भावस्यैव सुषुप्तिरूपतया "प्राण एवैकधा भवति ' इत्यनेन सुषुप्त्याधारतया उक्तवान्नित्यन्वय इत्यर्थः । भाष्ये स्वप्नसुषुप्ति-जागरितावस्यास्विति । यद्यपि पूर्वपक्षे प्रश्नप्रतिवचनयोः स्वप्नसम्बन्धाभावात्स्वप्नावस्थायामनुवर्तमानत्वं न प्रतीयते, तथापि स्वप्नजागरणसुषुप्तीनां सामानाधिकरण्यमर्थसिद्धमिति भावः । यद्वा "यदा सुप्तः स्वप्नं न कथञ्चन पश्यति ' इति वाकयादिति

१.४.१६

द्रष्टव्यम् । प्राधान्यं विवमिति चेदिति - यद्यपि "सङ्खयाया विधार्थे धा ' इति सङ्खयायां विधीग्रमानो धाप्रत्ययः प्राधा-न्यवाचिन एकशब्दान्न सम्भवति, तथापि छारदतत्वात् तथा शङ्कितमिति द्रष्टव्यम् । भाष्ये -अस्मिन्नात्मनि वर्तमाने प्राण एवैकधा भवति वागादिकरणग्राम इतति । ननु मुख्यप्राणस्यैकीभूतकरणग्रामाश्रयत्वे सुषुप्त्याश्रयत्वप्रसङ्गेन मुख्यप्राण - स्येश्वरस्य च सुषुप्तिप्रबोधयोरसम्भवादिति पूर्वभाष्यविरोध इति चेत् न एकीभूतकरणग्रामाश्रयप्राणाश्रयत्वस्यैव सुषुप्तित्व

१.४.१६

विवक्षया एतत्पक्षोत्थितिसम्भवादिति द्रष्टव्यम् । प्राणनामभिरामन्त्रणाश्रवणादिनेति -इदमुत्तरत्र स्पष्टम् । पूर्वपक्षे कत्रादिशब्दा-नामिति - पूर्वपक्षिणः साङ्खयस्य मते कर्तृत्वादेरध्यस्तत्वेनास्वारस्यावशनयम्भावादिति भावः । स्वाक्यस्थपदान्तरान्वययोग्यत्वं विवक्षितमिति - यद्यपि "चमसवदविशेषा 'दिति सूत्रे अर्थप्रकरणादिभिर्विनेति

भाष्यव्याख्यानावसरेऽर्थो वस्तुसामर्थ्यमि-त्युक्तम् । आलङ्कारिकैश्च अर्थः प्रयोजनं यथा "स्थाणुं भज भवभञ्जनाय' इति भञ्जनरूपप्रयोजनवशात् हरदारुसाधारणस्था-णुशब्स्य हरे पर्य्यवसानम् । प्रकरणम् प्रस्तावः, यथा चक्रवत्तिसन्निधौ सर्वं जानानि देव इतिप्रत्युक्तस्य देव इतिपदस्येन्द्रा-द्यनेकार्थसाधारणस्य युष्मदर्थे पर्य्यवसानं प्रकरणात् , लिङ्गं-वस्तु सामर्थ्यम् । यथा कुपितो मकरध्वज इत्यत्र समुद्रमन्मथ-साधारणस्य मकरध्वजशब्दस्य कोपरूपलिङ्गवशान्मन्मथे पर्य्यवसानमित्युक्तम् , तथाप्यनतिविरोधादेवमुक्तमिति द्रष्टव्यम् । ननु एतच्छब्देन कर्मशब्दसमभिव्याहृतेन एतेषां पुरुषाणां कर्त्तेति पूर्वनिर्दिष्टपरामर्शित्वं किन्न स्यादित्यत आह -लिङ्गवचन-विरोधादिति । नन्वेतेषां पुरुषाणां कर्त्तेत्यनेनोपस्थापितस्य पुरुषकर्मनिर्माणस्यैतच्छब्देन परामर्शोऽस्त्वित्यत आह - पुरुष-निर्माणरूपव्यापारमिति । प्रकरणतो वा प्रकृतार्थान्तरसम्बन्धित्वेन वेति - साक्षात् परम्परया वा शब्दोपस्तथापितत्वेनेत्यर्थः। प्रसिद्धो वेति -प्रत्यक्षादिमानान्तरतो वेत्यर्थः । प्रकरणादिना सङ्कोचानुपपत्ते रिति - नपुंसकैकवचनान्तनिर्देशार्हस्य प्रकृतस्या

१.४.१६

भावेनैतच्छब्दस्य सङ्कुचितवृत्तित्वकल्पकाभावादित्यर्थः । प्रकृतार्थान्तरसम्बन्धित्वेनापि केषाञ्चिद्बुद्धिस्थत्वं दर्शयति -चिद-चिन्मिश्रेतीति । हेत्वन्तरमाहेति - ननु पूर्वं बलीयस्त्वहेतोः कस्यापि अनुपन्यासात् कथं हेत्वन्तरोक्ति' रिति चेत् न, अत्रा-न्तरशब्दो विशेषवचनः "अन्यदेवेदं परिभाषान्तर'मिति भाष्यं व्याचक्षाणेन कैय्यटेनान्तरशब्दो विशेषवचन इति व्याख्-यातत्वात् । केचित्तु- कर्मशब्दस्यादृष्टवच्चलनेपि रूढतया रूढ्योः परस्परकलहायमानत्वेन रूढ्यन्मेषाभावरूपहेतोः न च पुण्यापुण्यालक्षणं कर्मेति पूर्वभाष्येऽभिप्रेतत्वात् ब्रह्म ते ब्रुवाणीत्युपक्रम्येत्यादेर्हेत्वन्तरत्वमुपपद्यत इति वदन्ति । युक्तयन्त-तरमाह - आदित्यमण्डलाद्यधिकरणानां पुरुषाणां कर्त्तेतिवाक्यस्येति । आदित्याद्यधिकरणानां पुरुषाणां कर्तेतिवाक्यस्येत्यर्थः। आत्मशब्दोपि प्रयुक्त इति - यदि हि "आत्मा वा अरे द्रष्टव्यः' इतिवत् "य आत्मा स वेदितव्यः' इति निर्देशः स्यात् तदा

१.४.१७

साधारणस्यात्मशब्दस्य विवक्षितविशेषपर्यवसानं स्यात् ; न चात्र तथा निर्देशोऽस्तीति भावः । एतच्छब्दस्येति - केचित्तु कर्म-सम्बन्धित्वस्यैवेतिभाष्यं यस्य वैतत्कर्मेतीत्युत्तरभाष्यैकवाक्यं मन्वाना एतच्छब्दस्योक्तर्थपरत्वाभावेऽनिष्टमाह, कर्मसम्बन्धि-त्वमात्रस्यैवेतीति पाठमाद्रियन्ते । ननु यस्य वैतत्कर्मेत्यनेनैव हिरण्यगर्भादिदेवताविशेषसमन्वितकृत्स्नजगत्कारणत्वं सिध्द्य-तीत्येतेषां कर्तेत्यस्य वैयर्थ्यमाशङ्कयाह - जगत्कतृत्वस्येति । ततश्च परस्परसाहित्यादसङ्कोचसिद्धिरिति भावः । विनियोगादृष्टवत इति -भोजनादृष्टवत इत्यर्थः । कर्मवाचिपदलक्षणेति - कर्मसम्बन्धिवाचिपदलक्षणेत्यर्थः।। ननु नहि देवदत्तयज्ञदत्तपुत्र इत्युक्ते देवदत्तं प्रति पुत्रत्वेन यज्ञदत्तं प्रति जामातृत्वेन सम्बन्धः प्रतीयत इत्यस्वरसादाह - यद्वा लिङ्गं ज्ञापकमिति । सूत्रे मुख्यप्राणलिङ्ग-

१.४.१७

मुपात्तमिति । ननु प्राणलिङ्गस्यापि जीवलिङ्गितया विवक्षितत्वे जीवलिङ्गादित्येव सूत्रणीयम् , नतु जीवमुख्यप्राणलिङ्गादिति चेन्न;गोबलीवर्दन्यायेन जीवलिङ्गत्वाविशेषेपि प्राणसङ्कीत्तर्नस्य जीवलिङ्गान्तरापेक्षया प्राधान्यं दर्शयितुं पृथगुक्तयुपपत्तेः । अयं वह्निमान् धूमज्ञापकादित्युक्ते धर्मज्ञापकस्यापि धूमद्वारा वह्निज्ञापकत्वेपि प्रापान्यविवक्षया पृथङ्ि्नर्देशदर्शनादिति भावः । ननु न प्राणसङ्कीर्त्तनमात्रं जीवलिङ्गम् , अपि तु प्राणोपकरणित्वेन सम्बन्धः । न चात्र प्रकरणे स श्रुतः । "अथास्मिन् प्राण एवैकधा भवति' इति प्राणस्य करणग्रामैकधाभावाश्रयत्वस्यैव प्रतीत्या प्राणस्य जीवोपकरणत्वस्याप्रतीतेरिति चेन्न, अथास्मिन् प्राण इति व्यधिकरणे सप्तम्याविति पक्षे अस्मिन्निति सप्तम्या इदंशब्द निर्दिष्टस्य प्राणाश्रयत्वप्रतिपादनात् प्राणभृत्त्वेन जीवस्यैव

प्रसिद्धत्वात्प्राणाधारत्वकीर्तनं लिङ्गं भवतीति नानुपपत्तिः, अत एव द्युभ्वाद्यधिकरणे प्राणाधारत्वं जीवलिङ्गतयोपवर्णितम् ननु "यथा श्रेष्ठी स्वैर्भुङ्क्ते' इति

प्रतिपादितभोक्तृत्वादिरूपजीवलिङ्गापेक्षया "अथास्मिन् प्राण' इति प्रतिपाद्यस्य प्राणाधारत्व-कीर्तनस्य किं प्राधान्यम् ? प्रत्युत द्युभ्याद्यधिकरणोक्तरीत्या अन्यथासिद्धं चेति चेत् , सत्यम्; स्थितस्य गतेर्वक्तव्यतया केनचिदाकारेण विशेषस्य समर्थनीयत्वात् जीवप्राणयोस्सम्बन्धस्यातिप्रसिद्धत्वाच्च । न तूपासनार्थत्वमप्यतिदेष्टव्यमिति भाव

१.४.१८

इति । तल्लिङ्गानन्यथासिद्धावेव तद्विशिष्टोपासनार्थत्वसम्भवादिति भावः । ननु प्राणशरीरब्रह्मोपासनार्थं प्राणसङ्कीर्तनं लिङ्गं युज्यत इति भाष्यमयुक्तम् अनन्यथासिद्धप्राणलिङ्गोपन्यासे हि एतादृशमुत्तरं वक्तुं युक्तम् प्राणलिङ्गासद्भावस्य प्रदर्शितत्वा-दित्याशङ्क्याह - प्राणलिङ्गस्य ब्रह्मपरत्वमुक्तमित्यर्थ इति । अनन्यथासिद्धब्रह्मलिङ्गानुरोधात्प्राणशब्दो ब्रह्मपरतया व्याख्या- तव्य इति भाष्यार्थः । इतरत्वविवक्षितत्वमिति भावः । जीवलिङ्गनिर्वहणाकाङ्क्षामिति - प्राणशब्दरूपलिङ्गस्य पूर्वसूत्रनिव्यू-ढत्वात्तदतिरिक्तजीवलिङ्गनिर्वहणाकाङ्क्षमित्यर्थः । जीवलिङ्गानां पुनः कथं ब्रह्मपरत्वमितिभाष्यस्याप्येवमेवार्थः । ननु तदुक्तमितिसूत्रखण्डेनैव प्राणसङ्कीर्तनरूपलिङ्गस्यैव लिङ्गान्तरस्यापि निर्वाहसम्भवाल्लिङ्गान्तरनिर्वाहाय सूत्रान्तरं किमर्थम् ? न च प्रकारान्तरेण निर्वाहार्थमन्यार्थमिति सूत्रम् , अत एव प्रकारान्तरेण निर्वाहप्रतिपादकमितिटीकाग्रन्थोयुक्त इति वाच्यम् , जीवप्राणलिङ्गयोर्द्वयोरपि निर्वाहमुक्तवेत्याद्युत्तरग्रन्थविरोधादिति चेन्मैवम् , उत्तरत्रानेन निर्वाहवैषम्यप्रदर्शनेने-त्यादिग्रन्थेनान्यार्थमिति सूत्रस्यातिदेशसूत्रानिवर्त्त्याधिकाशङ्कापरिहारार्थत्वमस्य वक्ष्यमाणत्वेनादोषात् । प्राणस्य स्वाप-प्रबोधयोरसम्भवादाह - अनुपरतव्यापारप्राणवत इत्यर्थ इति । प्राणानामभिरामन्त्रणाश्रवणं न प्राणस्य भोक्तृत्वाभावकृतम् , अपितु प्राणव्यापारोपरतिकृतमिति शङ्कां व्युदसितुं प्राणव्यापारानुपरमकीर्तनमिति द्रष्टव्यम् । किञ्च सुषुप्तिदशायां शरीरेन्द्रि-येभ्योन्यत्वं सुज्ञानमिति तदानीमप्यनुपरतव्यापारात्प्राणादन्यत्वं दुर्ज्ञानमिति तस्य ज्ञापनीयतां दर्शयितुं प्राणस्य व्यापारानुपर

१.४.१८

मोक्तिः । इति हि श्रुतिरिति -ततश्च "तौ ह सुप्तं पुरुषमाजग्मतु ' इति क्वचिद्भाष्यकोशे पाठो दृश्यते, स तु लेखकानवधानकृत इति भावः । प्राणा जीवा इति -न च "स यदा प्रतिबुध्यते' इत्येकवचनान्तनिर्दिष्टस्य जविस्य तस्मिन्नेव वाक्ये "एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते' इति बहुवचनान्तप्राणशब्देन कथं निर्देश इति वाच्यम् ; "अथ यदु चैवास्मिन् शव्यं कुर्वन्ति यदुच नार्चिषमेवाभिसम्भवन्ति' इत्यथास्मिन्नित्येकवचनान्तेन निर्दिष्टस्य अर्चिषमभिसम्भवन्तीति बहुवचनान्तेन निर्देशवत् "ते धूममभिसम्भवन्ति' इतिबहुवचनान्तनिर्दिष्टस्य "एष सोमराजा' इत्येकवचनान्तं निर्देशवच्चेदृशवचनवैरूप्यस्य सोढव्य-त्वादिति भावः। श्रुत्यन्तरेण तदुपपादयतीति - यद्यपि निष्क्रमणशपादानत्वे श्रुत्यन्तरं नोदाहृतम् । तथापि तदप्यभिप्रेतमिति

१.४.१८

भावः। उपक्रमोपसंहारमध्येष्विति - यद्यपि ब्रह्म ते ब्रुवाणीत्युपक्रमस्य ब्रह्मपरत्वं सिद्धम् । यस्य वैतत्कर्मेत्यस्य च ब्रह्मपरत्वं "जगद्वाचित्वा'दिति सूत्र एव साधितम् । सर्वान् पाप्मनोऽपहत्येति उपसंहारस्यापि ब्रह्मपरत्वं सिद्धमेव; अतश्चोपक्रमोपसं-हारैकरूप्यं ब्रह्मपरत्व एव । न जीवपरत्वे । तथापि "एहि व्येव त्वा ज्ञापयिष्यामि तं पाणावभिपद्य प्रवव्राज तौ ह सुप्तं पुरुष-मीयतु'रित्युपक्रमस्य यष्टिघातोत्थापनप्रतिपादकमध्यमस्य "इदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यः "तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते' इत्याद्युपसंहारस्य च

जीवविषयत्वावगमात्प्रतर्दनविद्यायामिवोपसंहारे भूयसां लिङ्गानामश्रवणात्सर्वान् पाप्मानोऽपहत्येति उपसंहारस्य च स यदा विजज्ञौ अथ हत्वाऽसुरान्विजित्य सर्वेषां देवानां श्रैष्ठयं स्वाराज्यं परीयाय' इति पूर्ववाक्यश्रुता सुरजयस्वाराज्यादिवदापेक्षिकसर्वपापहतिस्वाराज्यपरतयाप्युपपत्तेः स्वत्त्रेण जीवःप्रतिपाद्यत इत्यभ्यधिकोत्था-नसमभवादिति भावः। वस्तुतस्तु वैयधिकरण्य निर्देशात्तन्नयायो नावतरतीति शङ्काभिप्रायः। अस्त्यवकाश इति - यद्यपि जीव-प्रतिबोधनस्यान्यार्थत्वे प्रतर्दनविद्यान्यायोऽनपेक्षित एव, जीवलिङ्गस्य त्वाष्ट्रहनादिवज्जीवशरीरकपरमात्मनिष्ठतया योजनी-यत्वात्, तथापि यथाकथचित् जीवलिङ्गान्यथासिद्धिरेव प्रतर्दनविद्यान्याय इत्यभिप्रेत्य तथोक्तमिति द्रष्टव्यम् । अवस्थान्त-रत्वावगमादिति -अथ यदा सुप्तः स्वप्नं न कथञ्चन पश्यतीत्यन्वयः। ततश्चाथशब्दोपक्रमं वाक्यमथशब्दश्च पूर्वप्रकृतादर्थान्तरवाची सन् अर्थान्तरद्योतकस्तदाशब्दश्चाध्याहाय्यर् इति भावः। स्वप्नाभावावच्छिन्नकालादिति -सुषुप्त्यवच्छिन्नकालादित्यर्थः। अपृष्टः

१.४.१८

करणग्रामाप्ययः कथभच्यत इति -"तदैनं वाक् सर्वैर्नामभिस्सहाप्येति' इत्यादिनेतिशेषः। क्व सुप्त इत्यर्थ इति - यत्र यदा जीव एष सुप्तस्तदा क्व सुप्त इति श्रुत्यर्थ इति भावः। उपरतव्यापारं मन इथ्यर्थ इति -मनस आदानं नाम मनोव्यापारोपरमसम्पादनम् , अर्थान्तरस्यासम्भवादिति भावः। अनेनेति - आदानस्य व्यापारोपरमसम्पादनरूपतया इन्द्रियजन्यज्ञानानामप्यादानं तद्व्यापा-

१.४.१८

रोपरक्तिरूपमित्यर्थः। तेषां मनस्सापेक्षत्वादिति -मनस आदाने मनोव्यापारोपरतिरूपे पर्यवसिते सति तत्साहित्येन निर्दिश्य-मानानां वागिन्द्रियादिजन्यज्ञानानामप्यादानस्य तादृग्रूपस्यैव वक्तव्यत्वात् । इतरथा एकक्रियायां साहित्यभङ्गप्रसङ्गात् ततश्च मनोविषये यादृश आदानशब्दार्थस्तादृश एव प्राणविज्ञानेपीति भावः। यद्वा प्राणानां विज्ञानेनेति श्रुतेरयमर्थः। प्राणादीनां वागादिना यद्विज्ञानं स्वस्वविषयग्रहणसामर्थ्यापादनं मनोव्यापाररूपं सामर्थ्यम् । तेन सह मन आदाय निर्व्यापारं मनः कृत्वेत्यर्थः। एतत्परतया प्राणशब्दवाच्येत्यादिग्रन्थोपि योजनीयः । ज्ञानेन सह मन आदायेति वक्तव्ये मनसा सहत्युक्तिः फलितार्त्रकतनपरा, अतश्च श्रुत्या कण्ठोक्तेन्द्रियव्यापारोपरमे फलितत्वोक्तेर्न विरोध इति द्रष्टव्यम् । समानप्रकरणस्थप्राणा-त्मशब्देति -अथास्मिन्प्राण एवैकधा भवति एतस्मादात्मनः' इति

१.४.१८

कौषीतकीवाक्यस्थप्राणात्मशब्देत्यर्थः। वैयधिकरण्यनि-र्देशाच्चेति - तं मामायुरमृतमुपास्व' इतिवत्सामानाधिकरण्यनिर्देशाभावादित्यर्थः। ननु "तदभावो नाडीषु तच्छ्रुतेः' इत्यत्र "तद्यत्रैतत्समस्तस्संप्रसन्नः स्वप्नं न विजानाति आसु तदा नाडीषु सुप्तो भवति' इति वाक्यवशान्नाडीनां सुषुप्तिस्थानत्व-वर्णनात् "अथ या एता हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्य' इत्यस्येहापि प्रत्यभिज्ञानान्नाडीनामपि सुषुप्त्याधारत्वमेव । ततश्च "क्वैष एतद्बालाके पुरुषोऽशयिष्टेति सुषुप्तिस्थानप्रश्नः "य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति वाजसनेयके सुषुप्तौ शयनशब्दप्रयोगात् क्व वा एतदभूदिति एकधाभावप्रश्नः, तत्र प्रथमप्रश्नस्यासु तदा भवति यदा सुप्तः स्वप्नं न कथञ्चन पश्यति' इति यदातदाशब्दयोरन्वयस्य युक्तत्वात् द्वितीयप्रश्नस्य प्राण एवैकधा भव-तीत्युत्तरमिति किं न स्यादिति चेत्; सत्यम् ; नाडीनां सुषुप्तिस्थानत्वं समर्थितम् , अथापि अत्र "हिता नाम नाड्यः' इति श्रूयमाणा नाड्यस्ता इत्यत्र प्रमाणाभावात् , प्रत्युतास्मिन् प्रकरणे "अथ यदा सुषुप्तो भवति यदा न कस्य न वेद हिता नाम नाड्यो द्वासप्ततिस्सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते । आभिः प्रत्यवसृप्य पूरीतती शेते ' इति सुषुप्तिकाले

पुरीततिशयनं तत्पूर्वकाल े हितनामकनाडीसञ्चरणमिति स्पष्टं प्रतिपादनात् हितनामकनाडीप्राप्तेस्सुषुप्तिसमये असम्भवात् स्वप्नप्रश्नोत्तरमेव नाडीष्वित्यस्येतिसिद्धम् । नन्वस्मिन्नधिकरणे पुरुषस्य वेदितव्यतयोपन्यासेन प्रधानपूवेपक्षस्यै वानुत्थानात्कथमुपसंहारे न तन्त्रसिद्धस्य पुरुषस्य तदधिष्ठितस्य वा प्रधानस्येति भाष्यमित्याशङ्गयमाह -प्रधानोपादानमिति । इति जगद्वाचित्वाधिकरणम् ।।

१.४.१९

बृहदारण्यके षष्ठे - "अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः । मैत्रेयी कात्यायनी चेति । तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव, स्त्रीप्रज्ञैव तर्हि कात्यायनी, अथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन्मैत्रीयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा अरे अह-मस्मात्स्थानादस्मि हन्त ते अनया कात्यायन्या अन्तं करवाणीति स होवाच मैत्रेयी यन्नु म इयं भगोस्सर्वा पृथिवी वित्तेन पूर्णा स्यात् । कथं तेनामृता स्यामिति स्यान्वहं तेनामृता आहो नेति होवाच याज्ञवल्क्यः। यथैवोपकरणवता जीवितं तथैव जीवितं स्यात् । अमृतत्वस्य तु नाशास्ति वित्तेनेति सा होवाच मैत्रेयी । येनाहं नामृता स्यां किमहं तेन कुर्याम् । यदेव भगवन्वेत्थ तदेव मे ब्रूहीति स होवाच याज्ञसल्क्यः प्रिया खलु नो भवती सती प्रियमाववर्धतर्हि भवति ते व्याख्यास्यामि व्याचक्षाणस्यं मे निदध्यास्वेति । स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायाः कामाय जाया प्रिया भवति आत्मनस्तु कामाय जाया प्रिया भवति न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति नवा अरे वित्तस्य + नवा अरे पशुनां + नवा अरे भूतानां + नवा अरे सर्वस्य +आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मन्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं ब्रह्म तं परादात् योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योन्यत्रात्मनो क्षत्रं वेद लोकास्तं+देवास्तं+भूतानि तं+सर्वं तं परादात् योन्यत्रात्मनस्सर्वं वेद इदं ब्रह्म इदं क्षत्रं इमा लोका इमे देवा इमे वेदाः इमानि भूतानि इदं सर्वं यदयमात्मा स यथा दुन्दुभेर्हन्यमानस्य न बाह्मान् शक्नुयात् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः । स यथा शङ्ख्ध्यमानस्य वा शब्दो गृहीतः । स यथा वीणायै वाद्यमानायै न बाह्मान् शब्दान् शक्नुयाद्ग्रहणाय वीणायास्तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः । स यथार्द्रेधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्ति एवं वा अरे अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदस्सामवेदो अथर्वाङ्गिरस इतिहासपुरुणं विद्या उपनिषदः श्लोकाः सूत्राणि च भूतानि अस्यैवैतानि सर्वाणि निश्वसितानि स यथा सर्वासामपां समुद्रमेकायनमेवं सर्वेषां स्पर्शानां जिह्वैकायनमेवं सर्वेषां गन्धानां घ्राणमेकायनमेवं सर्वेषां कर्माणां हस्तावेकायनमेवं सर्वेषामानन्दानामुपस्थ एकायनमेवं सर्वेषामध्वनां पादावेकायनमेवं सर्वेषां वेदानां वागेकायतनं स यथा सैन्धवघनोऽनन्तरो बाह्यः कृत्स्नो रसघन एव, एवं वा अरेऽमात्मानन्तरोबाह्यः कृत्स्नः प्रज्ञानघन एव तेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति अरे ब्रवीमीति होवाच याज्ञवल्क्यस्य होवाच मैत्रेयी अत्रैव मा भगवान् मोहान्तरमापिवत् न वा अहं विजानामीति स होवाच न वा अरे मोहं

१.४.१९

ब्रवीमि अविनाशी वा अरेऽयमात्मानुच्छित्तधर्मा यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं रसयते तदितर इतरमभिवदति तदितर इतरं श्रृणोति तदितर इतरं मनुते तदितर इतरं स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयाद्येनेदं सर्वं विजानाति तं केन विजानीयात्स एष नेति नेत्यात्मा अगृह्यो नहि गृह्यते अशीर्यो न हि शीर्यते असङ्गो हि सज्जते अव्यथतो न व्यथते न रिष्यति विज्ञातारमरे केन विज्ञानीया-दित्युक्तानुशासनासि मैत्रेयि एतावदेव स्वल्वरे अमृतत्वमिति होक्तवा याज्ञवल्क्यो विजहार' इति श्रूयते । एवं चतुर्थपाठके किञ्चिद्भेदेनायं स्दर्भः पठितः। स्त्रीप्रजा -इतरासां स्त्रीणां यादृशी तादृशी अस्याः प्रज्ञा, ब्रह्मवादिनी न भवतीत्यर्थः। अन्तं करवाणि युवयोर्द्रव्यविभागं करवाणीत्यर्थः। शिष्टमाकरे स्पष्टम् । कर्मफलभूतभोक्तृत्वश्रवणादिति -पतिजायापुत्रादिसम्बन्धेन भोक्तृत्स्याप्रतीयमानत्वादिति भावः।

भाष्ये- मध्येपि विज्ञानघन एवेति । नचैतदुत्पत्तिविनाशकवाक्यं प्रकृतद्रष्टव्यार्थविषयं न भवति, किन्तु तत्सृज्यात्मविषय इति वाच्यम् , षष्ठे मैत्रेयीब्रह्मणे "यथा सैन्धवघनोनन्तरो बाह्यः कृत्स्नः प्रज्ञानघन एव

१.४.१९

एतेभ्यो भूतेभ्यस्समुत्थाय' इत्यादिना प्रकृतस्य द्रष्टव्यात्मन एवायमात्मेति परामृष्टस्योत्पत्तिविनाशवर्णनात् , एवं वा अरे इदं महद्भूतमनन्तमपारं विज्ञानघन एवैभ्यो भूतेभ्यः' इति चतुर्थे मैत्रेयीब्राह्मणेपि प्रकृतपरामर्शीदशब्दस्य सत्त्वेनोत्पत्तिविनाश-प्रतिपादनं द्रष्टव्यात्मविषयमेवेति भावः। ननु कथमुपसंहारगतस्य विज्ञातारमरे इत्यस्य जीवप्रत्यायकत्वं तस्य जीवपरसाधा-रणत्वादित्यत आह - जीवहेत्वनुगृहीत इति । केचित्तु - "विज्ञानं यज्ञं तनुते ' "विज्ञानमयः' इत्यादौ जीवस्यैव मनोवृत्तिवि-शेषत्वरूपविज्ञानमयत्वप्रसिध्द्या विज्ञानघनशब्दस्य जीवल्किवाचितया जीववाचित्ववत् विज्ञातृशब्दस्यापि तथोत्वोपपत्तौ दोषाभावादिति वदन्ति । तस्य तदन्यत्वमुक्तमिति - उत्तरग्रन्थार्थोपयुक्ततयेति भावः । अन्यत्वदर्शनं नामेति -अन्यत्व निषेध इति भाष्यस्य "योन्यत्रात्मनस्सर्वं वेदे 'ति श्रुत्यनुसारादन्यत्वदशर्ननिषेध इत्यर्थ सिद्धवत्कृत्यैत्तदुक्तमितिद्रष्टव्यम् । निष्कृ-ष्टस्वरूपेति - अन्यत्त्वदर्शनं नामात्मस्वरूपे स्वान्यभूतदेवतादित्वदर्शनं निषिध्यत इत्यर्थः । ततश्च श्रुतेः पूर्वपक्षेऽयमर्थः, अन्यत्र द्वितीयार्थे त्रल्प्रत्ययः । आत्मनोऽन्यद्ब्रह्मक्षत्रादि सर्वं य आत्मत्वेन वेद तं सत्रमपि ब्रह्मक्षत्रादिलक्षणं पराकुर्यादिति ।

१.४.१९

प्रबुद्धस्य - उत्पन्नतत्त्वज्ञानस्येत्यर्थः । परैरुच्यत इति - साङ्खयैः पूर्वपक्षिभिरुच्यत इत्यर्थः । अल्पशक्तित्वं मात्राचाऽभिप्रेतमिति - मात्रपदस्येतरव्यच्छेदार्थस्य महाशक्तिव्यवच्छेदकत्वमिति भावः । निर्व्यापारस्येत्येतन्मुक्तस्यैतद्विशेषणतया व्याख्यायेदानीं पुरुषमात्रस्येत्येतत्परतया व्याचष्टे - यद्वा कर्मपरवशस्येत्यादिना । स्ववाक्यत्वज्ञापनायेति - स्ववाक्यत्वात्प्रयुक्त इत्यर्थः ।

१.४.१९

स्वतन्त्रस्यापर्यनुयोज्यत्वादिति भावः। ततश्च स्ववाक्यत्वज्ञापनस्य किं प्रयोजनमिति न चोदनीयम् । नतु देवादिदृष्टिनिषेध इति- आत्मस्वरूप इति शेषः । प्रागुक्तहेतुनिबन्धनत्वादिति - ब्रह्मात्मकत्वस्य प्रागुक्तत्वाद्भेदनिषेधः, अब्रह्मात्मकभेदनिषेध इत्यर्थः। यत्र हि देहात्मविवेकं प्रकृत्य ज्ञानैकाकारत्वेनात्मनामैक्यं प्रतिपाद्यते तत्र श्रूयमाणस्य भेदनिषेधस्यैव देवादिभेदनिषेधत्वमिति भावः। मैत्रेयीब्राह्मणानामनेकत्वादिति - चतुर्थे षष्ठे च मैत्रेयीब्राह्मणस्य दर्शनादिति भावः। मैत्रेयीब्राह्मणानामिति बहुत्वमवि-वक्षितम् । काण्वमाध्यन्दिनपाठभेदेन वा द्रष्टव्यम् । भाष्ये - प्रतिनियतदेशकालस्वरूपपरिमाणमिति । लोके हि किञ्चिद्वस्तु

१.४.१९

कस्मिंश्चिद्देशे कस्मिंचित्काले कञ्चित्पुरुषविशेषं प्रति तारतम्येन प्रियतमतामनुभवतीत्यर्थः। परतन्त्रो भोक्ता भुङ्क्त इति -स्वेष्ट-निवृत्त्यर्थं प्रीतिं कुर्वन् स्वातन्त्र्यं लभते, परेष्टनिवृत्त्यर्थे प्रीतिमतः पारतन्त्र्यमवश्यम्भावीति भावः। भोक्ता भक्त इति प्रिय-शब्दस्य भोत्यत्वार्थकत्वाद्भोक्तृत्वमपि सिद्धमेव, पत्युःकामाय पतिर्भोग्य इत्युक्ते पत्युः कामाय पतिर्भुङ्क्त इत्यस्य लाभादिति भावः। आत्मशब्दवैपरीत्याभावादिति -आत्मशब्दवैरूप्याभावादित्यर्थः। तस्माज्जीववाचिशब्दस्यापीति -"प्रतिज्ञासिद्धेः'रित्या-दिसूत्रत्रयानुरोधेन जीववाचिशब्दमपि परमात्मपर्यन्तं प्रापयितुं समर्थपरमात्मानुगुणबहुवाक्यस्वारस्यं भङ्क्तवा अन्यतरात्म-शब्दस्य वा आत्मशब्दद्वयस्य वा जीववाचित्वाश्रयणापेक्षया आत्मशब्दद्वयस्यापि परमात्मपरत्वसमर्थनस्वरसस्य तत्परत्वा

१.४.१९

श्रयणमेव युक्तमिति भावः। अर्थैकरूप्यवर्णनं युक्तमिति -ननु परमात्मसङ्कल्पनिर्वृत्तये पत्यादयः प्रिया भास्तीति पतिजायादिषु प्रियत्वापादकत्वेनानन्दरूपत्वसमर्थनपरत्वमात्मनः कामायेतिवाक्यस्य न युज्यते, पतिजायादिषु कदाचित्प्रियत्वापादनेना-नन्दरूपत्ववत् कदाचित्प्रियत्वापानेनानन्दरूपत्वस्यापि प्रसङ्गात् । किञ्च "न वा अरे पत्युः कामाये 'तिवाक्यानां परमात्म-विषयत्वे प्रसिद्धिद्योतको वैशब्दोपि न सङ्गच्छते, नहि परमात्मेच्छाधीनां पतिजायादीनां प्रियत्वमिति लोकसिद्धम् , न च श्रुतिप्रसिद्धं तदिति वाच्यम्; अनधीतिनीम् -अविज्ञातश्रुत्यर्थाम् मैत्रेयीं प्रति लोकप्रसिद्धेरेव द्योतनीयत्वात् , ततश्चात्मनः-कामायेत्यात्मशब्दस्य जीवपरत्वमेवोचितम् । तथाहि सर्वेषामपि स्वात्माःप्रियः पतिजायादयोपि प्रिया इति अनुभवसाक्षिक-मेतत् , तत्र पतिजायादीनां स्वात्मवतिरिक्तानां सर्वेषां प्रियत्वं पतित्वादिप्रयुक्तं न भवति । अपितु स्वात्मप्रयुक्तमेव, तेषां स्वेष्टसम्पादकत्ववदशायामिव स्वानिष्टसम्पादकत्वदशायां पि्रयत्वादर्शनात् , स्वात्मनस्तु पतिजायादीन् प्रति इष्टसम्पादकत्व-दशायामनिष्टसम्पादकत्वदशायां चाविशेषेण स्वप्रियत्वदर्शनात् पतिजायाद्ययपेक्षया आत्मनोऽतिशयितपुरुषाथर्त्वात् जीवा-त्मैव द्रष्टव्य इत्ययमेवार्थो युज्यत इति । अत्र केचित् -अस्त्वेवमात्मनस्तु कामायेतिवाक्ये आत्मशब्दस्य जीवपरत्वम् , अमृ-तत्वप्राप्त्युपायत्वादिभिः प्रकरणस्य परमात्मपरत्वादढ्यावगमात् द्रष्टव्यत्वं परमात्मन एवेति एतावदिह नस्सिषाधयिषितम् । आत्मनः कामायेति सन्दर्भस्य जीवपरत्वे का नः क्षतिः, नच पूर्ववाक्यस्य जीवपरत्वेऽनन्वयः शङ्कनीयः। यस्मात्स्वयमेव स्वस्य परमप्रेमास्पदं तस्मात्स्वस्य महापुरुषार्थसिध्द्यौ परमात्मा द्रष्टव्य इत्यर्थसम्भवाददोषात् , नचात्मशब्दवैरूप्यं दोषः। "स्याच्चैकस्य ब्रह्मशब्दव'दितिन्यायेन वैरूप्यस्य सोढव्यत्वात् । सूत्रस्यैकप्रकरणविषयत्वात्प्रकरणस्य महावाक्यरूपत्वादिति -सूत्रस्य प्रकृतम-हावाक्यविषयत्वादिति निष्कृष्टार्थः । सूत्रेणाविवक्षितस्स्यादिति - नन्वेवं विज्ञानघन एवेत्यादिमध्यवाक्यान्वयोपि तुल्यन्याय-तया कथमविवक्षितस्स्यादिति चेत् सत्यम् ; उपक्रमस्य प्रधानत्वात् तद्विवक्षणमावश्यकम् , अत प्रवोक्तम् "उपक्रमश्च महावा-क्यावयवेषु प्रधानभूत ' इति । जीवशब्देन परमात्माभिधाननिर्वाहपरमिति - ननु जन्मविनाशवत्त्वरूपजीवलिङ्गस्य परमात्म-परत्वनिर्वाहपरत्वमित्येव वक्तव्यम् जीववाचिशब्दस्य तत्राभावात् , विज्ञानघनशब्दस्य जविवाचित्वे प्रमाणाभावादिति चेत् , विज्ञानघनशब्दस्य जीववाचित्वाभावेपि मनोवृत्तिविशेषरूपविज्ञानघनत्वस्य जीवलिङ्गतया जीवलिङ्गवाचिनां विज्ञानघनोत्था-नविनाशादिशब्दानां जीववाचिशब्देन ग्रहणोपपत्तिरिति भावः। यादवप्रकाशोक्तयोजनाव्यावृत्तिरिति -प्रतिज्ञासिद्धेरित्यादिसूत्र-त्रयार्थोपि सूत्रकाराभिमत इति यादवप्रकाशयोजनाव्यावृत्तिरित्यर्थः। जीववाचिशब्देन परमात्माभिधानस्य जीवपरमात्मैक्य-

१.४.२१

सूचकतया तल्लिङ्गत्वेपि एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादकत्वाभावादाह- एकविज्ञानेन सर्वविज्ञानप्रतिज्ञापपादकेति । ननु जीवात्मशब्देन परमात्माभिधानस्य प्रागप्रस्तुतया तल्लाभः कथमित्याशङ्कयाह - हेतुवशादिति । योग्यतावशादित्यर्थः। ततश्च एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादककार्यकारणभावकृत्यैक्यदृढीकरणाय जीववाचिशब्देन परमात्माभिधानमिति सूत्रार्थः। अयं यादवप्रकाशपक्ष इति - आश्मरथ्यमतस्य सूत्रकारानभिमत्वादेतत्पक्षस्याप्यनभिमतत्वमिति भावः। कार्यात्मनेति - कार्या-त्मना कारणात्मना च वर्तमानयोर्जीवब्रह्मणोः कार्यत्वकारणत्वात्मना भेदस्सत्त्वादिना अभेद इत्यर्थः।। "आमुक्तेर्भेद एव स्याज्जीवस्य च परस्य च । मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः' इति पाञ्चरात्रकमतमस्मिन्सूत्रे उपन्यसत इति । यद्वा

१.४.२२

वाचस्पतिनोक्तं न तन्त्रमूलं पश्यामः। ननु यादवाभिमतस्य स्वाभाविकपक्षस्य पूर्वमेव भाषिततया शङ्करभास्करमतयोरेव दूषयिषितत्वात् , तनमते स्वाभाविकभेदानङ्गीकारात्स्वाभाविकौपाधिकविकल्पाऽस्मिन्सूत्रे इत्याशङ्कयाह - सम्भावितयो

पक्षयोः पराभिमतमिति । अत उपाधेः पारमार्थ्यापारमाथ्यर्पक्षद्वयप्रीति - भास्करशङ्कापक्षद्वयेपीत्यर्थः। ब्रह्मण्यच्छेद्य इति - ब्रह्म

१.४.२२

स्वरूपोच्छित्वासम्बन्धाभावात् स्वरूपमात्रसम्बन्धित्वादुपाधेर्हेयोपाध्याश्रयैक्यप्रतिसन्धानस्य जीवपरयोरविशिष्टत्वात् जीवे-श्वरविभागाभावप्रसङ्गादित्यर्थः। तर्हि कथयभिनिष्पत्तिश्रुतिरिति - अभिनिष्पत्तिशब्दस्यापूर्वरूपप्रादुर्भावे प्रसिद्धत्वादिति भावः। न क्वचिदप्यस्तीति - उत्कटतया नास्तीत्यर्थः। अचिदन्तः प्रवेशस्य स्पष्टत्वादिति - "हन्तहमिमास्तिस्रो देवताः अनेन जीवेनात्मना-नुप्रविश्य' इत्यचिदनुप्रवेशस्य स्पष्टं प्रतीतेस्स्पष्टतया तज्ज्ञापनार्थमित्यर्थः। स्पुटतरार्थश्रुत्यन्तरेति -"य आत्मनि तिष्ठन्' इत्यादिः

१.४.२२

स्पुटतरार्थश्रुतिः। अभेदश्रुत्याभिप्रायेणेति - जगत्सृष्टिप्रलयाभिधायिश्रुतीनामप्युपादानोपादेयभावप्रतिपादनमुखेनाभेदप्रतिपा-दनपरत्वाभावादिति भावः। एतन्निर्वाहस्वीकारहेतुरिति -काशकृत्स्नीयनिर्वाहस्वीकारहेतुरित्यर्थः। याज्ञवल्क्यजनकसंवाद इति । ततश्च मैत्रेयीब्राह्मणस्यापि याज्ञवल्क्यकतृकत्वात् "अन्यश्च राजन् स परः' इत्यादियाज्ञवल्क्यकर्त्तृकश्लोकसमानार्थत्वं वक्तव्यमितिभावः। अन्यश्च राजन् स पर इति - ननु पूर्वत्र "अन्यश्च शश्वदव्यक्तं तथाऽन्यः पञ्चविंशकः। तत्स्थं समनुपश्यन्ति तमेक इव साधवः' इति लोके अव्यक्तिशब्दितदेहस्थमात्मानं लोकानुभवप्रवणबुद्धयो देहाभेदेन पश्यन्तीत्युक्तत्वात् अस्मिन्नपि श्लोके तदेकार्थ्यप्रत्यभिज्ञानात् "अन्यञ्च राजन् स परः' इति श्लोकोपि देहात्मविवेकपर एव किं न स्यात् ? नच परशब्दः परमा-त्मन्येव प्रयोगार्हो न देह इतिवाच्यम्;"महतः परमव्यक्त'मित्यादौ शरीरेपि परशब्दप्रयोगादिति चेन्न; एकप्रकरणगतयोः श्लोकयोरेकार्थत्वे अन्तरवैयर्थ्यप्रसङ्गात् । "अन्यञ्च शश्वदव्यक्त'मितिश्लोको देहात्मविवेकपरः, "अन्यश्च राजन्स पर' इति श्लोकस्तु "जुष्टं यदा पश्यत्यन्यमीशम्' "पृथगात्मानं प्रेरितारं च मत्वा' इत्यादिश्रुत्यनुसारात् जीवविलक्षणासंसारिपरमात्म-

१.४.२२

त्मप्रतिपादनपर इत्येव युक्त इति भावः। नन्ववस्थितिमात्रेण तदात्मकत्वे आकाशस्यापि तदात्मकत्वप्रसङ्ग इत्यत आह-अव-स्थानं च शरीरप्रतिसम्बन्धितयेति । ननु शरीरतया अवस्थानं हि आत्मतयाऽवस्थानम् । ततश्चात्मतयावस्थितिहेतुकं सर्वात्म-कत्वं किं सर्वशरीरत्वम् ? उत सर्वस्वरूपत्वम् ?। नाद्यः, हेतुहेतुमतोरभेदात् । न द्वितीयः, सर्वस्यापि तत्स्वरूपत्वाभावादिति चेन्न; सर्वात्मकत्वं नाम सर्वसामानाधिकरण्यनिर्देशार्हत्वम् तञ्च सर्वात्मभावनिबन्धनमित्यदोषः। सर्वेन्द्रियेति -"सर्वेन्द्रियान्तः करणं पुरुषाख्यं हि यज्जगत् । स एव' इति सामानाधिकरण्यं कृत्वा तत्र हेतुमाह -सर्वभूतात्मा विश्वरूपो यतोऽव्यय इति । चारु-रूपा सालभञ्जिकेति -तत्र रूपशब्दस्य स्वरूपपरत्वदर्शनादिति भावः। ततश्च त्वमित्यस्य ततस्त्वमुत्पन्न इति भ्रान्तिं व्युदस्यति ततश्च त्वमितीति । ननु सर्वगत्वादित्यनेन व्याप्तिमात्रं सिध्येत् कथं शरीरत्वमित्यत आह-शरीरं हीति । नृपनभोभृत्येति-नृपन-प्रतिद्वन्द्वी, भृत्यः, नभःप्रतिद्वन्द्वी कुम्भ इति द्रष्टव्यम् । तच्छब्दवाच्यत्वस्य शरीरशरीरिभावनिबन्धनत्वे "तदनु प्रविश्य सञ्च त्यञ्चा-भवत् ' "सर्वं स्वल्विदं ब्रह्म' इति श्रुत्योः प्रमाणतामाह-अत एव तदनुप्रविश्येति । ननु नास्मिन्वाक्ये तच्छब्दवाच्यत्वं शरीरशरीरिभावनिबन्धनमिति प्रतीयते, अपि तु अनुप्रवेशनिबन्धनमिति प्रतीयत इत्याशङ्कयाह-अन्तःप्रवेशनेनेति । ननु सर्वं स्वल्विदं ब्रह्मेति वाक्ये ब्रह्मधीनोत्पत्तिस्थितिलयत्वाद्ब्रह्म सर्वशब्दवाच्यमित्येव प्रतीयते, न तु शरीरशरीरिभावनिबन्धनमि-

१.४.२२

त्याशङ्कयाह-अननशब्दवाच्या स्थितिरिति । सदायतनशब्देन स्थितिहेतुत्वाभिधानादिति- "सन्मूलाः सत्प्रतिष्ठाः' इत्याभ्यां

वाक्याभ्यामुत्पत्तिलययोस्सदधीनत्वमुक्तवा स्थितेस्सदधीनत्वं वक्तुं प्रवृत्तं सदायतना इतिवाक्यं धारकत्वं दर्शयति, अतोऽ-वसीयते सदायतनशब्दनिर्दिष्टं धारणं स्थित्यर्थमिति भावः। हेतुत्वोपन्यासादिति -"सर्वं स्वल्विद'मितिवाक्य इति शेषः। शरीरशरीरिभाव एवेति -हेतुत्वाक्षिप्तशरीरशरीरिभाव एवेत्यर्थः। न केवलं

सर्वश्रुत्यविरोधमुख्यत्वोपपत्तेरिति -हेतुत्वं सिद्धमि-त्युत्तरत्रान्वयः। "आत्मनो वा अरे दर्शनेनेति आत्मनि स्वल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदित'मिति षष्ठपाठो भाष्ये उदाहृतः, आत्मनो वा अरे दर्शनेनेति तचुर्थाध्यायपाठष्टीकायामुदाहृत इति द्रष्टव्यम् । लक्षणाभिधानमिति -जगत्कारणत्व-लक्षणाभिधानमित्यर्थः। अन्यत्रात्मन इत्यस्यात्मानं विनेत्यस्यार्थस्य क्लिष्टत्वादाह-यद्वान्यत्रेति । परैरेवमर्थ उक्त इति । दुन्दु-भेर्हन्यमानस्येत्यनेन हन्यमानदुन्दुभिप्रभवशब्दसामान्यं लक्ष्यते, दुन्दुभेस्त्विवत्यनेनापि तदेव लक्ष्यते, दुन्दुभ्याघातस्सङ्ग्रा-मभूयिष्ठवीररसाद्यनुकूलो दुन्दुभिध्वनिविशेषः। ततश्चायमर्थः- यथा दुन्दुभिशब्दसामान्यस्य विशेषभूतान् शब्दान् दुन्दुभि-शब्दसामान्याद्बाह्यत्वेन ततो निष्कृष्य न कश्चिदपि गृहीतुं शक्नुयात् , किन्तु दुन्दुभिशब्दसामान्यग्रहणेनैव तद्विशेषशब्दो गृहीतो भवति । दुन्दुभिशब्द इत्येव हि दुन्दुभिशब्दविशेषा गृह्यन्ते, ततश्च दुन्दुभिशब्दसामान्यात् दुन्दुभ्याघातशब्दसामान्याच्च यथा तद्विशेषा न भिद्यन्ते, एवं चिद्रूपात्मस्फुरणं विना स्फुरणशून्यं जगच्चिदात्मनो न व्यतिरिच्यत इत्याशयः। शङ्खवीणा-दिदृष्टान्ता अप्येवमेव योजनीया इत्युक्तमित्यर्थः। दुन्दुभिशब्देऽध्यस्ता इति पाठो दृश्यते, तस्यायमर्थः, दुन्दुभिशब्दादव्यति-रिक्ता इति । विशेषस्य सामान्येऽध्यासाभावादिति द्रष्टव्यम् । उपरितनयोरिति -ननु दुन्दुभिघातशब्दस्य दुन्दुभ्याघातप्रभवशब्दे-लक्षणा, नतु दुन्दुभिशब्दमात्रस्य, ततश्चोपरितनयोर्दुन्दुभिशब्दयोरित्युक्तम् । दुन्दुभिशब्ददुन्दुभ्याघातशब्दयोरित्येव वक्तव्य-मनञ्च

१.४.२२

मिति चेन्न; अस्यापि वाक्यस्य तत्रैव तात्पर्यात् पूर्ववाक्यवैयर्थ्यं चेति -यद्यपि दुन्दुभेर्हन्यमानस्येति वाक्यस्य दुन्दुभिशब्दसा-मान्यान्निष्कृष्य विशेषशब्दान् गृहीतुं शकोतीत्यर्थप्रतिपादकतया साफल्यमस्ति, तथापि नात्यन्तप्रयोजनम् । दुन्दुभेस्तु ग्रहणेनेत्यादिना दुन्दुभिशब्दसामान्यग्रहणेनैव विशेषशब्दो गृह्यत इत्यर्थप्रतिपादनात्तेनैव तद्ग्रहणमन्तरेण विशेषशब्दो न गृह्यत इत्यर्थस्यापि सिद्धत्वादित्यत्र तात्पर्यात्, विवक्षितार्थलाभे पदान्तरेण सिद्धे तदधिकपदान्तरवैयर्थ्ये दृष्टान्तमाह-नहि गङ्गायामिति।

आघातशब्दस्येति -दुन्दुभ्याघातशब्दस्येत्यर्थः। न च दुन्दुभिशब्दावान्तरविशेषो दुन्दुभ्याघातसंज्ञितश्शब्दविशेषोऽस्तीत्युक्तमिति वाच्यम्; तत्र प्रमाणाभावात् । सत्यपि तस्मिन् दुन्दुभेस्तु ग्रहणेन विशेषा गृहीता भवन्तीत्यनेनैव चारितार्थ्यादिति भावः। परेणोपादीयमानेत्यादि - दुन्दुभितदाहन्तृपुरुषान्यतरापसरणेनेत्यर्थः। वाक्यत्रये द्रष्टव्य इति -समानार्थकमितिशेषः। तृतीयान्तयो-

१.४.२२

रित्यादिशब्दरोरिति-स यथार्द्रैधाग्नेरित्यादिना जगदेककारणत्वमेकायनमित्यादिना करणग्रामनियमनं चेत्यन्वय इति भावः। वृत्तिविशेषा बहवो दर्शिता भवन्तीति -स्पर्शानामिति बहुवचनेनैव शीतोष्णवैविध्ये सिद्धे सर्वग्रहणं शीतोष्णाद्यवान्तरवैविध्य-प्रदर्शनार्थमित्येव वक्तव्ये वृत्तिविशेषा बहवो दर्शिताभवन्तीति । कथमुच्यते ? नहि स्पर्शादिशब्दा वृत्तिविशेषपराः, तथाहि सति अनुवृत्तमयनत्वं नाम तदुपादातृत्वमिति क्लेशो नाश्रयणीयस्यादिति चेत् सत्यम्; वृत्तिविशेषा बहवो दर्शिता भवन्तीत्येतस्य फलितार्थकथनरूपतया अदोषात् । सैन्धवस्विल्य इतिवाक्यस्यापीति - चतुर्थगतस्यापीत्यर्थः। तस्यैवेति -तादृशप्रेमास्पदस्येत्यर्थः। उद्बुद्धस्येति - असङ्कुचितज्ञानस्येत्यर्थः। श्रुत्यन्तरार्थप्रत्यभिज्ञानादिति - "न संज्ञास्ति' न स्मरन् इत्यनयोरैकार्थ्यादिति भावः।

१.४.२२

स्वाभाविकत्वं फलितमिति -उपाध्यनुक्तेरिति भावः-समित्येकीकार इति । संज्ञास्तीत्यत्रेत्यर्थः। ज्ञाननित्यत्ववचनाच्चेति - न विद्यते उचिछत्तिर्विनाशो यस्य तदनुच्छिति, ज्ञानमनुच्छित्तिधर्मो यस्य सोऽयमनुच्छित्तिधर्मा इति बहुव्रीहिगर्भबहुव्रीहिणेत्यर्थः।

स्वनिष्ठभ्रमानुवाद इति-आत्मानं स्वनिष्ठं मन्वानः स्वनिष्ठत्वेनाभिमन्यमानेन करणेन स्वनिष्ठाभिमानविषयं विषयं पश्यती-त्यर्थः। कर्तृकरणकर्मसु स्वनिष्ठत्वभ्रमोऽनुवर्तत इत्यर्थः। स्वनिष्ठार्थान्तरदर्शनं स्यादिति । ब्रह्मस्वरूपानवभासे ब्रह्मात्मकत्व-दर्शनासम्भवादब्रह्मात्मकार्थान्तरदर्शनं स्यादित्यर्थः। अत्र येवेदं

विजानातीतिवाक्यस्य "ग्राह्यकादि जगत्सर्वं येन कूटस्थ-साक्षिणा । लोकस्सर्वो विजानाति जानीयात्केन तं वद' इति सुरेश्वरवार्त्तिकोक्तप्रकारेण येन वाक्षिरूपेण लोकस्सर्वो विजा-नाति तं केन विजानीयात् स केनापि दृश्यो न भवतीत्यर्थ इति परैर्व्याख्यातम् । तत्रानुपपत्तिमाह-अन्यथा आत्मा वा अरे द्रष्टव्य इत्यादि । अन्यथा केवलदुरवबोधत्वे कथित इत्यर्थः। प्रकारो व्युदस्यत इति - ब्रह्मणीतिशेषः। ग्रहणानर्ह इति । ततश्च न गृह्यत

१.४.२२

इत्यनेन न पौनरुक्तयमिति भावः। नन्वचित्सङ्गे विद्यमाने कथमचित्सङ्गनिषेध इत्यत आह - न ह्यचित्सङ्गोऽस्येति । पूर्ववाक्येन पुनरुक्तीति -येनेदं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयात्' इत्यनयो पौनरुक्तयमिति भावः। उपयान्त-रनिषेधपरमिदमिति -अत्र विजानीयादित्यनेन न मुक्तिकालीनब्रह्मानुभव उच्यते । ततश्चोपासनमन्तरा केनोपायेन विजानीया-न्मुक्तिमनुभवेदित्यर्थः। एतावदित्यस्यार्थमाह-विजानीयादित्यनेनेति । विजानीयादित्यनेन ब्रह्मानुभवलक्षणप्राप्तेरुक्तत्वादेता-

वदित्यनेन तत्परामर्शो युक्त इति भावः। अनुपयोगाद्विरुद्धत्वाच्चेति - जीवोत्पत्तिप्रलयचिन्तनं प्रकृतस्यानुपयुक्तं, नह्येक एव भ्रान्तः पुरुषः स्वाभिमतविरुद्धमर्थं कदाचिदङ्गीकरोतीति चोत्तरत्र स्पष्टम् । द्वेधा व्याख्यातमिति - पतिजायापुत्रवित्तादिप्रिय-संसूचितेन भोक्त्रत्मनोपक्रमरूपपूर्वपक्षबीजस्य परिहारपरतया त्रिसूत्र्या एका योजना, विज्ञानघन एवेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति' इति द्रष्टव्यत्वेन प्रकृतस्य विज्ञानात्मभावेन समुत्थानविनाशरूपमध्यमवाक्यगतजीवलिङ्गस्यान्यथा-सिद्धिपरा द्वितीययोजनेतिव्याख्यातमित्यर्थः। इदं सर्वं यदयमात्मेति अभेदव्यपदेशस्येति -आत्मनः कामाय सर्वं प्रियं भवति आत्मा वा अरे द्रष्टव्यः' इत्युपक्रमे अभेदव्यपदेशस्याभेदव्यपदेशपर्यवसितस्य भोक्त्र्ात्मनोपक्रमस्येत्यर्थः। "आत्मनि विज्ञातो

१.४.२२

सर्वमिदं विज्ञातं भवति' "इदं सर्वं यदयमात्मा' इति प्रज्ञाता भेदोपपादककार्यकारणाभावायत्तैक्यसूचकत्वं प्रथमसूत्रार्थ इति-वर्णितमित्यर्थः। एवमेव पाठश्चेत्समीचीनः, इतरथा यथायमर्थस्सिध्यति तथाध्याहृत्य योजनीयम् । उत्क्रमिष्यतोर्ब्रह्मभावा-पत्तीति - अत्रापि भोक्त्रात्मनोपक्रमस्येति शेषः पूरणीयः । एवं ब्रह्मण एवाविकृतस्येत्यत्रापि द्रष्टव्यम् । एवं वदतोऽभिप्राय-श्शोधनीय इति -यद्यपि शङ्करभाष्ये काशकृत्स्नस्याचार्यस्याविकृतः पर एवेश्वरो जीव इति मतम् , आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादन्वयत्वमभिप्रेतम् , तथापि कार्यकारणलक्षणभेदः कियानित्यभिप्रेत इति गम्यते, औडुलोमिपक्षे पुनः स्प-ष्टमेवावस्थान्तरापेक्षौ भेदाभेदौ गम्येते । तत्र काशकृत्स्नीयं मतं श्रुत्यनुसारीति गम्यते, प्रतिपिपादायिषितार्थानुसारात्तत्व-मस्यादिश्रुतिभ्य इति ग्रन्थे तदाशयः स्पष्ट एव प्रतीयते, तथा भामत्यामपि वह्निस्फुलिङ्गयोरिव जीवपरयोरप्युपादानोपादेय-भावकृतौ भेदाभेदावित्याश्मरथ्यमतम् । भविष्यन्तमभेदमादाय भेदकालेप्यभेदेन व्यपदेश इत्यौडुलोमिमतमिति प्रतिपादितम् । तथापि

सम्भावनामात्रादेवमुक्तमिति द्रष्टव्यम् । पुनश्चैवं योजितमिति - इत्थं हि शाङ्करभाष्यम् "यदप्युक्तं प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यस्समुत्थानं विज्ञानात्मभावेन दर्शयन् विज्ञानात्मन एवेदं द्रष्टव्यत्वं दर्शयतीति ।

तत्रापीयमेव त्रिसूत्री योज-यितव्या । प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः । इदमत्र प्रतिज्ञातम् आत्मनि विदिते सर्वं विदितं भवति इदं सर्वं यदायमात्मेति चोपपा-दितञ्च सर्वस्य नामरूपकर्मप्रपञ्चस्यैकक्रसवत्वादेकप्रलयत्वाच्च दुन्दुभ्यादिदृष्टान्तैश्च कार्यकारणयोरव्यतिरेकप्रतिपादनात् , तस्या एव प्रतिज्ञायास्सिद्धिं सूचयत्येतल्लिङ्गम् । "यन्महतो भूतस्य भूतेभ्यस्समुत्थानं विज्ञानात्मभावेन कथितमित्याश्मरथ्य आचार्यो मन्यते । अभेदे हि सति एक सिज्ञानेन सर्वविज्ञानं प्रतिज्ञातमवकल्पत इति । उत्क्रमिष्यत एवम्भावादितित्यौडुलोमिः । उत्क्र-मिष्यतो विज्ञानात्मनो ज्ञानध्यानादिसामर्थ्यात्सम्प्रसन्नस्य परेणात्मना एैक्यसम्भवादिदमभेदोपादानमित्यौडुलोमिराचार्यो मन्यते । अवस्थितेरिति काशकृत्स्नः । अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभेदाभिधानमिति काशकृत्स्न आचार्यो मन्यते । नन्वात्मोच्छेदाभिधानमेतत् , "एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति' इति कथमेतत्परस्परभेदाभिधानम् ? नैष दोषः। विशेषविज्ञानविनाशाभिप्रायमेतद्विनाशाभिधानम् नात्मोच्छेदाभिप्रायमिति ।

१.४.२२

ततश्च पुरोवादिशाङ्करभाष्यार्थोऽस्मद्वाक्याद्यथा सिध्यति तथाऽध्याहारव्युत्क्रमादिकमाश्रित्य योजनीयम् । प्रकरणस्य परमात्म-परत्वं न निवारयतीति -नन्वेवं वा "अरेयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्दस्समुत्थाये'त्यादिना प्रकृतस्य द्रष्टव्या-त्मन एवायमिति परामृष्टस्य विज्ञानाभावेनोत्पत्तिविनाशवर्णनात्कथमुत्पत्तिविनाशाश्रवणं प्रकरणस्य परमात्मपरतां न निवा-रयेत् । द्रष्टव्यस्यात्मनो जीववाचिशब्दनिर्देशकृताया अपरमात्मत्वशङ्काया निरकारणीयत्वाच्चेति स्वयमेव वक्ष्यमाणत्वाच्चेति चेत् , सत्यम् ; अविकृतस्य ब्रह्मणो जीवभावेनावस्थानं न सम्भवतीत्यादिदूषणान्तरे तात्पर्यात् । अभेदव्यपदेशनिर्वाहस्त्वत्य-न्तापेक्षित इति -एतेनेतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिरित्यधिकरणे एवं विलक्षणत्वे सिद्धे सामानाधिकरण्यनिर्वाहार्थम् "अवस्थितेरिति काशकृत्स्नः' इति सूत्रमत्रैव सङ्गतम् । एवं सूत्रत्रयमेतदधिकरणशेष इत्यर्थमिति वक्ष्यमाणत्वात्कथमत्र सङ्गति-

१.४.२२

रितिशङ्का परास्ता । यादवप्रकाशैस्त्विति -प्रतिज्ञासिद्धेरिति सूत्रत्रयमपि सूत्रकाराभिमतनिर्वाहपरमेव व्याचक्षते, नतु पूर्वसूत्र-द्वयार्थस्य दूष्यत्वं तृतीयसूत्रार्थस्य - सूत्रकाराभिमतनिर्वाहपरत्वमिति । विकल्पयोग्यत्वादिति -विकल्पेन दूषयितुमयुक्तत्वा-दित्यर्थः। इहाप्युपन्यस्तं स्यादिति -औडुलोमिमतप्रत्यभिज्ञानादिति भावः। पूर्णत्ववदिति - अंशान्तरसापेक्षत्ववदित्यर्थः। तत्त-च्छब्दवाच्यत्वाभावादिति - तृणादिशब्दवात्यत्वाभावादिति भावः।। इति वाक्यान्वयाधिकरणम् ।।

१.४.२३

पेटिकासङ्गतिमिति - पेटिकाभ्यामस्याधिकरणस्य सङ्गतिमित्यर्थः। विकल्पेनेति -आनुमानिकमपीत्याद्यधिकरणत्रये ब्रह्मका-रणत्वाप्रातक्षेपेणैव ब्रह्मणः कारणत्वमभ्युपगम्य क्वचित्प्रधानमपि कारणं भवत्वित्युत्थितो विकल्पोऽन्ययोगव्यवच्छेदेन निरस्तः कारणत्वेन चेत्याद्यधिकरणत्रये तु प्रधानमेव जगत्कारणमित्युत्थित नियमेन कारणत्वमयोगव्यवच्छेदाय निरस्तमिति भावः। नतुु द्वितीयाधिकरणत्रयस्य कथं प्रासङ्गिकत्वम् ? छायानुसारिवाक्यस्य विषयतया त्रिपाद्यासाक्षात्सङ्गतत्वादित्याशङ्कयोभय-थापि साक्षात्सङ्गतिरस्तीत्याह - तत्र छायानुसारीति । ननु सिद्धान्तेपि प्रधानश्वरयोरुभयोरपि कारणत्वस्येष्टत्वात्समुच्चयनिरासो न युक्त इत्याशङ्कय समप्रयानतया समुच्चयस्य निरसनीयत्वं विवक्षितमित्याह - स्वनिष्ठवस्तुद्वयस्येति । परस्परशरीरशरीरिभावा

१.४.२३

नापन्नवस्तुद्वयस्येत्यर्थः। सर्वशक्तित्वादितीति - सर्वं शक्तियर्स्य तत्सर्वशक्ति, तत्त्वादित्यर्थः। "यत्किञ्चित्सृज्यते येन सत्त्वजातेन वै द्विज । तस्य सृज्यस्य सम्भूतौ तत्सर्वं वै हरेस्तनुः' इति सर्वस्यापि

शक्तिस्थानीयत्वात्प्रकृतेर्विशेषणत्वमिति भावः। वेदान्तैरे-वेति - व्याख्येयं पदम् । तद्विशेषणतयेति - "तेनैवाधिष्ठिता जग'दितिवाक्ये अर्थतः प्रधानस्यापीश्वरस्य तृतीयया प्रथमान्तविशे-षणत्वप्रतिपादनविरुद्धमिति द्रष्टव्यम् । मायां प्रतिप्रेरकत्वमिति - ईशनं हि नियमनम् , तञ्च प्रेरणम् तत्र प्रेर्याकाङ्क्षायां सन्निधा-नान्मायाया एव प्रेर्यत्वं लभ्यत इति भावः । इदमुपलक्षणम् । "मायां तु प्रकृतिं विद्या'दित्यत्र प्रकृतिशब्द उपादानपरः । जनिकर्तुः प्रकृतिः' प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादित्यादिवत्, ततश्च मायाया उपादानत्वस्य मायाविनमीश्वरत्वस्य च प्रतिपानान्निमि-त्तोपादानभेदः श्रुतिप्रतिपाद्य इति पूर्वपक्षिणो हृदयमित्यपि द्रष्टव्यम् । उपादानत्वं समर्थयतीति क्वचित्कोशे पाठो दृश्यते, तत्र परिवृढमाचष्टे, परिवृढयतीतिवत्समर्थशब्दात्तत्करोतीति णिचि परस्मैपदं निर्वोढव्यम् । समर्थयत इति पाठस्तु सुगम एव ।

१.४.२३

एवमेव हीत्यादिभाष्यं श्रुत्यनभ्युपगमपक्षप्रतिपादक वाक्यव्यवहितमपि हिशब्दस्वारस्यानुरोधेन

व्यवहितश्रुत्यनुग्राहकपरतया व्याचष्टे - कारणत्वश्रुतेरिति । ननु परिणामादिति सूत्रप्रयोजनस्य " न तु दृष्टान्ताभावात् , भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्'

१.४.२७

लोकवत्तु लीलाकैवल्यम्' इत्यादिभिः कृतकरस्वाद्वैयर्थ्यमाशङ्कयाह - द्वितीयाध्याये बह्वधिकरणेष्विति । इह

प्रतिपन्नाच्छब्दादि-वदिति - "शब्दादेव प्रमितः' इत्यादाविति शेषः । प्रधानकारणत्ववादिनीनामिति । यद्यपि

प्रधानकारणत्ववादिनीनां "गौरनाद्य-न्तवती' इत्यादीनां परमात्मपर्यन्तत्वं नात्र भाष्ये कथ्यते ; तथापि तमःप्रभृतेरीश्वरत्वकथनात् शरीरवाचिशब्दानां शरीरिपर्य -

१.४.२७

न्तत्वात्परमात्मपर्यन्तत्वं तेषामपि शब्दानामभिहितमेवेतिभावः । तत्र साहित्यमात्रं विवक्षितमिति - आकाशमिन्द्रियैः संयुज्यत इत्यर्थः । आकाशलयदशायां स्पर्शरूपरसगन्धतन्मात्राणां नष्टत्वादाह - बहुवचनेन तात्पर्यमिति । लयशब्देन जीवब्रह्मणास्स्वरूपै-क्येत्यादि । अत्र विभागापत्तिदशायामपि चिद्वस्तु अतिसुक्ष्मं सकर्मसंस्कारं तिष्ठतीति पाठमाश्रित्य प्रथमतृतीयव्याख्याने,

१.४.२७

चिदचिद्वस्तु अतिसूक्ष्ममितिपाठमाश्रित्य द्वितीयव्याख्यानमिति द्रष्टव्यम् । श्रुत्यन्तरैकार्थ्यादिति "न जायते म्रियते वा विपश्चित्' इत्यादिश्रुत्यन्तरैकार्थ्यादित्यर्थः । परमात्मना एकीभूतात्यन्तसूक्ष्मचिदचिद्वस्तुशरीरादेकस्मादेवाद्वितीयादिति भाष्ये अत्यन्त-सूक्ष्मचिदचिद्वस्तुशरीरादित्यस्य एकस्मादेवाद्वितीयादित्येतद्व्याख्यानरूपत्वमित्यभिधाय सूक्ष्मचिदचिच्छरीरकत्वाभ्युपगमे एकस्मादेवाद्वितीयादित्येतद्दृष्टान्ततया व्याचष्टे - यद्वा आनन्दवल्लयामिति । उदाहृतवाक्येष्विति - स तपोऽतप्यतेत्यादिष्वित्यर्थः ।

१.४.२७

तप आलोचन इत्यस्माद्भातोरिति । यद्यपि तप आलोचन इति धातुर्गणे न पठितः, तत्र तप सन्ताप इति शब्विकरणे पठ्यते, तप ऐश्वर्ये वेति दिवादौ, तप दाहे इति चुरादौ, तथापि धातूनामनेकार्थत्वादालोचनमप्यर्थ इति भावः । घटकस्य वाक्यविशेषस्येति-भेदाभेदश्रुतिघटकस्य तदेवानुप्राविशदित्यादेरित्यर्थः । ननु सृष्ट्वानुप्राविशदिति सृष्टयनन्तरमेवानुप्रवेशश्रवणाद्विक्रियमाण-द्रव्यस्यापीति विक्रियमाणत्वावस्थायामेवात्मतयाऽवस्थानं कथमुच्यत

इत्याशङ्कयाह - तत्सृष्ट्वा तदेवानुप्राविशदित्यादि । त्वाप्रत्ययास्वारस्यप्रसङ्गमभिप्रयन्नाह - यद्वा सृष्टिपूर्वकेति । अस्मिन् पक्षे विक्रियमाणद्रव्यस्यापीत्यस्य निर्वाहमाह - तदानी-मिहोक्तमिति । ततश्च तत्सृष्ट्वेति वाक्ये स्थित्यर्थानुप्रवेशः कथ्यते, तदनुप्रविश्येत्यनुप्रवेशस्य सामानाधिकरण्यहेतुत्वप्रति

१.४.२७

पादकवाक्ये सृष्टिसमयानुप्रवेश एवोच्यते, नतु पूर्ववाक्योक्तानुप्रवेशव्यक्तिरिति भावः । निमित्तमात्रत्वे परोक्ताया इति - निमि-त्तकारणत्वमात्रे प्रमाणत्वेन परोक्ताया इत्यर्थः । भाष्ये-तदात्मानं स्वयमकुरुतेत्यादिभिरैकार्थ्यादिति । सकलश्रुतिभिरैकार्थ्या-दित्यर्थः । अन्यैरिति - शङ्करयादवादिभिरित्यर्थः । "योनिष्ट इन्द्र सदने अकारि' इतिमन्त्रस्यायमर्थः । हे इन्द्र ! ते सदने तव उपवेशाय योनिः स्थानमकारीत्यर्थः । योनिशब्दस्योपादानवाचित्वाभावे दृष्टान्तः, अत्र चोदयन्ति, यदुक्तमेकविज्ञानेन सर्व-

१.४.२८

विज्ञानप्रतिज्ञाया दृष्टान्तस्य चानुपरोधार्थं ब्रह्मण उपादानत्वं वक्तव्यमिति , तन्न; प्राधान्येन सादृश्येन वा तदुपपत्तेः । लोके हि अस्य ग्रामस्य प्रधानभूते चैत्रे दृष्टे सर्वे दृष्टा इति व्यपदेशो दृश्यते, प्रधानदर्शनस्य तदितरदर्शनकार्यधूर्वहत्वात् , एवमिहापि ब्रह्मदर्शनस्य तदितरदर्शनकार्यनिष्पादनसमर्थतया तथा व्यपदेशोपपत्तेः, तथा सादृश्यनिमित्तोपि व्यपदेशो दृश्यते, यथा एतेन गवादयोपि क्रतवो व्याख्याता इति ज्योतिर्व्याख्यानेनेतरेषां गवादीनां तत्सादृश्येन व्याख्यातत्वम् ; एवमिहापि ब्रह्मणि ज्ञाते सत्त्वादिना सादृश्यात् तदितरेषां ज्ञातत्वसम्भवात्; अत एव दृष्टान्तानुपरोधोप्यसङ्गतः, नह्येकस्मिन्मृत्पिण्डे ज्ञाते सर्वं मृण्मयं विज्ञातं भवति, सर्वस्य मृत्कार्यस्य एकमृत्पिण्डारब्धत्वाभावादेकस्य नस्वनिकृन्तनस्य लोहमणेर्वा सर्वलोहमयकाष्र्णायसोपा-दानत्वाभावात् । न च सर्वं मृण्मयमितियत्र सर्वशब्द एकमृत्पिण्डारब्धकार्यपर इति वाच्यम् ; तथा कल्पनायां प्रमाणाभावात् , अत एवाभिध्योपदेशाच्चेति सूत्रोक्तो वहुभवनसङ्कल्पोपि न प्रमाणम् , अन्तर्यामिरूपेणैव बहुभावस्य सङ्गल्पविषयत्वसम्भवे तेजोबन्नादिरूपेणैव बहुभवनस्य सङ्कल्पविषयत्वे प्रमाणाभावात्, उक्तञ्चाभियुक्तैः बहुस्यामिति सङ्कल्पस्य तेजःप्रभृतिसर्जनम् । गुरुस्यामिति सङ्गल्पस्य शिष्यसम्पादनं यथा' इति । अत एव "तदात्मानं स्वयमकुरुत' इत्यपि व्याख्यातम् । अन्तर्याम्यादि-रूपेण स्वकार्यत्वस्योपपत्तेः । एतेन "साक्षाच्च उभयाम्नानात् "योनिश्च हि गीयते' इति युक्तयन्तरमपि व्याख्यातमिति । अत्रोच्यते, यद्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञायां सादृश्यप्राधान्याभ्यां गौणमेव सर्वविज्ञानमभिहितं स्यात् तर्हि "कथं नु भगवस्य आदेशो भवति' इतिप्रश्नस्य "यथा सोम्यैकेने'ति प्रतिवचनस्य चासङ्गतत्वापत्तेः, ब्रह्मविज्ञानेन प्रपञ्चज्ञातत्वस्य मुख्यतायां कृत्स्नश्रुतिसन्दर्भस्य सामञ्जस्यात् । एवं ह्युपाख्यायते - उद्दालको ह्यारुणिः स्वपुत्रं श्वेतकेतुं स्वनियोगाद्द्वादशवर्षाणि गुरुकुले स्थित्वा सर्वान् वेनानधीत्य प्रतिनिवृत्तं "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इति पृष्ट्वा "कथन्तु भगवस्य आदेश' इति एकविज्ञानेन सर्वविज्ञानं कथन्नूपपद्यत इत्याशयवता पुनः पृष्टो मृत्पिण्डादिदृष्टान्तैस्तदुपपाद -

१.४.२८

यामासेति । यद्यत्र सर्वविज्ञानं प्राधान्याद्यभिप्रायं गौणं स्यात् तदा प्रधानज्ञानेन सर्वमन्यदप्रधानमविदितमपि फलतो विदितप्रायं भवतीत्यस्यार्थस्य लोकसिद्धत्वेनैकविज्ञानेन सर्वविज्ञानस्यानुपपत्तिं पश्यतः"कथं नु भगवस्य आदेश' इतिप्रश्नो न स्यात्, तदभिप्रायानभिज्ञेन कृतेपि प्रश्ने प्राधान्यात्सादृश्याद्वा सर्वं स्यादित्येव प्रत्यवक्ष्यत, नैतदुभयं युज्यते "वाचारब्भणं विकारो नाधेयम्' इति दृष्टान्तेपि तदुपपादनमत्यन्तमनवलम्बनमेव स्यात्, तथा "बहु स्यां प्रजायेये'त्यभिध्योपदेशोपि उपादानत्वो-पपादक एव, तत्तेजोऽसृजतेत्यादिनानन्तरवक्ष्यमाणतेजः प्रभृत्यात्मना बहुभवनस्यैव सङ्कल्पविषयतया वक्तव्यत्वात्, एकमेवाद्वितीयमित्यादिना सृष्टेः

प्रागेकत्वेनाद्वितीयत्वेनावधारितस्योपादानत्वनिमित्तत्वयोरवश्यम्भावाच्च, तस्मादुपादानत्व-प्रत्याख्यानं वेदान्तद्वेषनिमित्तमिति युक्तमित्युत्पश्यामः । उपासनफलपरमिति - "यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति फलपरवाक्यस्थत्वादिति भावः । लक्षणायोगादिति उपादानलक्षणयोगादित्यर्थः - पीतशङ्खस्य शङ्खान्तरेणेति - शङ्खशब्दः शङ्खान्तरपरः । ततश्च शुक्लशङ्खे पीतशङ्खोऽध्यस्यत इति भावः। देहेऽधिष्ठानेऽध्यस्तत्वादिति - ततश्चाध्यस्तं यत्सामानाधिकरण्येन प्रतीयते तदुपादानमिति लक्षणायोगादिति भावः । आत्मनि देहाध्यास इति चेदिति । ततश्च देहं प्रति आत्मन एवोपादानत्वम्, नत्वात्मानं प्रति देहस्येति भावः । अध्यासो मिथ्येति भवितुं युक्तमिति - अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येति च विषये युष्मदर्थ इति पाठो दृश्यते, तत्र भवितुं युक्तमित्यरयान्तरमाक्षिप्य तथा पीतिशेषः पूरणीयः । अध्यासो मिथ्येति भवितुं युक्तमित्यन्तग्रन्थस्याध्यासो नास्तीति ह्यर्थः।

१.४.२८

तदन्तस्य शाङ्करभाष्यस्याध्यासाक्षेपरूपत्वात् ,
तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामित्यादिग्रन्थस्यैवाध्याससमर्थनपरत्वाच्चे-तिद्रष्टव्यम् । भास्करमतमाह - यश्चापीति । यादवप्रकाशीये त्विति । अव्यवहितसाध्येनेति - ब्रह्मण उपादानत्वमव्यवहितसाध्यं तन्निर्वाहकम् , प्रकृत्यैक्यं तु व्यवहितं साध्यमित्यर्थः । वक्तव्यमिति - प्रकृतिश्चेतिपदेन साध्यतया वक्तव्यमित्यर्थः ।

१.४.२८

उपादात्वं हि प्रधानसाध्यमिति - अध्यवहितं चेतिविशेषः । विक्रियामितीति -दर्शयतीतिपूर्वेणान्वयः । नहि प्रलयात्पूर्वमेकत्वाप-त्तिरिति -"एकमेवाद्वितीयम्' "तदैक्षत बहु स्यां प्रजायेयेति' श्रुतिवशादेकत्वावस्थाया बहुभवनसङ्कल्पात्पूर्वभावावश्यम्भावादिति भावः । अलुप्तविभक्तिकत्वेनेति- यद्यपि समासाभेवेपि "स्वमोर्नपुंसका'दिति अमो लुगस्त्येव, तथापि दधि पश्येत्यादिवत्स्मृताया विभक्तेरेवार्थप्रत्यायकत्वोपपत्तौ समासे लक्षणाश्रयणस्यायुक्तत्वादिति भावः। मिथः प्रकारप्रकारिभावानभ्युपगमाच्चेति - अभ्युपगमे-ऽस्मदिष्टसिद्धिरितिभावः । प्रकृतेरेव महदाद्युपादानत्वं स्यादिति -ततश्चाभिन्ननिमित्तोपादानब्रह्मवादो न स्यात्, नियन्त्रंशस्य निमि-त्तत्वादितिभावः । इदमुपलक्षणम्; ब्रह्मबहुत्वं च स्यादित्यपि द्रष्टव्यम् । तत्किं वृक्षसमुदाय इति - यद्यपि भोक्तृभोग्यनियन्तारः किं

१.४.२८

प्रत्येकं ब्रह्मेति पूर्वविकल्पादस्य विकल्पस्य न विशेषः । ततश्च त्रयाणां मिथो भिन्नत्वेपीत्येतत्पर्यन्तो ग्रन्थो नातीव सप्रयोजन इति भाति । तथापि दूषणान्तरं वक्तुं पुनर्विकल्प इति द्रष्टव्यम् । शङ्कते त्रयाणां मिथो भिन्नत्वेपीति । ब्रह्मात्मनैकत्वं वर्णनीयमिति - ननु पत्रस्कन्धादीनां भेदाप्रहाणेन एकवृक्षानन्यत्ववदिष्टकानामिष्टकात्वरूपभेदाप्रहाणेन एकब्रह्मानन्यत्वं सिद्धान्तिनोप्यभिमतमिव प्रतीयते, नचैतत्सिद्धान्तिनोऽभिमतं भवति । त्रयाणामेकब्रह्मात्मकत्वाभावादितिचेन्न; चिदचिद्विशिष्ट ईश्वरो हि ब्रह्म, नतु विशेष्य-मात्रम्, ततश्च विशिष्टान्तर्गतत्वं त्रयाणामपि साधारणमित्येतदभिप्रायेण ब्रह्मात्मना एकत्वं वर्णनीयमित्युक्तमिति द्रष्टव्यम् । छिन्ना-यामङ्गुलाविति -छेदेन स्वदेहात्पृथक्कृतत्वादित्यर्थः । कस्यचित्स्वरूपमिति - विशिष्टस्येत्यर्थः । यावद्विशेष्यभाविनामिति - इद-मुपलक्षणम् । दण्डविशिष्टस्वरूपे दण्डस्यान्तर्भावेपि न दोष इत्यपि द्रष्टव्यम् । अग्नेरुष्णत्वं स्फोटजनन इति - ननूष्णस्पर्शस्य कथ-मग्निस्वरूपत्वम् ? गुणगुणिनोर्भेदात् स्वं हि रूपं स्वरूपमित्युच्यते, न तु स्वापृथक्सिद्धं सर्वं स्वरूपम् यदि कारणतावच्छेदककोट्य-नुप्रविष्टं सर्वं स्वरूपमित्युच्यते तर्ह्यालोकगतोद्भूतरूपत्वस्य चाक्षुषप्रत्यक्षे उद्भूतरूपगतकारणतायामवच्छेदकत्वादालोकस्याप्युद्भूत-रूपस्वरूपत्वप्रसङ्गः, तथार्द्रेन्धनप्रभववह्नित्वस्य

धूमजनकतावच्छेदकत्वादार्द्रेन्धनादेरपि वह्निस्वरूपानुप्रवेशप्रसङ्गात्, अतस्तेषु स्वरूपत्ववादः स्वीयरूपत्वाभिप्रायः, न तु स्वाभिन्नरूपत्वाभिप्रायः, एवञ्च प्रकृत्यादीनामपि परमात्मापृथक्सिद्धविशेषणतया तन्वं-
शशक्तिरूपशब्दाद्यभिधेयत्वमस्तु नाम, नैतावता तद्गतावस्थाया एतन्निष्ठत्वमस्ति, तथा हि सति तद्गतशक्तित्वशरीरत्वांशत्वजडत्वा-

१.४.२८

दीनामपि परमात्मगतत्वप्रसङ्गात्, ततश्च प्रकृतेर्महदादिरूपेण परिणममानत्वेन प्रकृदेरेवोपादानत्वं स्यात्, न तु ब्रह्मण इत्याशङ्कामुप-संहारव्याजेन निराकरोति - महदाद्यवस्थाविदचिद्विशिष्टब्रह्मस्वरूपगता इति । न हेत्वसिद्धिरिति - अयं भावः, चिदचिद्विशिष्टमेव ब्रह्म, न विशेष्यमात्रम् चिदचिद्विशिष्टे च महदाद्यवस्थायोगित्वमस्त्येवेति । नहि नाभिमात्रं रथचक्रमिति - यथा परस्परमाधाराधेय-भावमापन्ना नाभिरथनेमयः रथचक्रशब्दवाच्यस्वरूपान्तर्गताः, यथा वा बाह्यदलविशिष्टेषीकास्वरूपं मुञ्चादिशब्दवाच्यम्, यथा वा त्वक्पत्रादियुक्तकाण्डस्वरूपमेव कलीशब्दवाच्यम्; एवमाधाराधेयभावापन्नभोक्तृभोग्यनियन्तृस्वरूपं ब्रह्मशब्दवाच्यमित्यर्थः । ननु काष्ठगतज्वालायाःकाष्ठगतकरणत्वोपपादकत्वे प्रकृतिगतावस्थायाः प्रकृतिगतोपादानत्वनिर्वाहकत्वमेव स्यात्, नतु ब्रह्मोपादानत्व-निर्वाहकत्वमित्यत आह - करणकारकस्य तु स्वनिष्ठत्वादिति । प्रकृतेस्तु स्वनिष्ठत्वाभान्नोपादनत्वमिति भावः । ननु मृत्पिण्डाश्र-यस्य चक्रस्य मृत्पिण्डगतघटत्वाद्याश्रयत्वं किं न स्यादित्याशङ्कयाह - आश्रयिनिष्ठामिति । स्वतन्त्रं मृत्पिण्डादिवस्तु स्वाधारे चक्रे स्वगतावस्थायोगितां न निर्वाहयतीत्यर्थः । व्यवहितपत्रवेध इति - पत्रवेधान्तरेण व्यवहितपत्रवेध इत्यर्थः । कुलालस्येति - हेतुत्वेन सजातीयव्यापारव्यवहितत्वादितिभावः । शराव्यवहितस्येति - धनुश्शरयोर्द्वयोरपि हेत्ववान्तररूपप्रहरणत्वाक्रान्तत्वादिति भावः । निष्पादककार्यनिष्पादनरूपकिञ्चित्कारसद्भावादिति - तन्निष्पादकव्यापारनिष्पादनरूपकिञ्चित्कारसद्भावादित्यर्थः । अतिप्रसङ्गः

एतेन सर्वे व्याख्याताव्याख्याताः ।। २९ ।।

१.४.२९

परिहृत इति - अन्वयव्यतिरेकाभ्यामतिप्रसङ्गस्य निवार्यत्वादित्यनेनेत्यर्थः । अग्न्यादेरिति - अव्यवहितस्यापीति शेषः । संयोगमात्रेण व्यवधायकत्वमिति - आस्तरणादिकं शयानस्य पर्यङ्कसंयोगं परं निरुणद्धि, नत्वानयाश्रयिभावमपीति भावः । स्वधारणसमर्थवस्तु-निष्ठव्यवधायकत्वादिति - नन्वेवं दर्भाणां स्वाश्रितदर्भत्वाद्यवस्थासु भूतलाश्रितत्वव्यवधायकत्वं न स्यात्, तथा यूकादीनां यूकात्वा-द्यवस्थासु मनुष्याश्रितत्वव्यवधायकत्वं न स्यात् । स्वधारणसमर्थवस्तुनिष्ठव्यवधायकत्वादिति चेन्न, स्वधारणसमर्थेत्यस्य स्वाश्रितधा-रणसमर्थेत्यर्थः । मूतलमनुष्यादीनां दर्भत्वयूकत्वादिधारणसामर्थ्यं नास्ति, तेषां तदाश्रितत्वे प्रमाणाभावात् । नन्वेवं यत्र यदाश्रितत्व-ग्राहकप्रमाणमस्ति, तत्रान्तरालिकपदार्थानां तदव्यवधायकत्वम्, अत एव प्रासादे शेते पर्यङ्के शेते वेद्यां हवीष्यासादयति बर्हिषि हवीं-ष्यासादयती'त्यादौ आन्तरालिकानां पर्यङ्कबर्हिरादीनामव्यवधायकत्वमिति पर्यवसन्नमिति चेत्, इष्टापत्तेः, व्यवहितस्याप्याश्रयताग्रा-हकप्रमाणसत्त्वे आश्रयत्वम्, प्रकृते च महदादिव्यवहितब्रह्मणोपि तत्तदवस्थं प्रत्याधारत्वग्राहकं प्रमाणमस्ति, सञ्च त्यच्चाभवदित्यादि। अतोऽवस्थाश्रयत्वान्मुख्यमुपादानत्वमुपपन्नमिति भावः । ननु महदाद्यवस्थाश्रयत्वस्य परमात्मनि मुख्यत्वे तुल्यन्यायतया देवत्वाद्यव-स्थाश्रयत्वस्यात्मन्येव मुख्यत्वात्तत्र कथं न देवो न नर इति निषेधः? नचाद्वारकाश्रयत्वाभावान्निषेध उपपन्न इति वाच्यम्; संयोगेन भूतलाधारे घटे सम्बन्धान्तरेण घटाधारत्वं नेत्येतावता भूतलं न घटाधार इति वचनं समञ्जसं स्यात् । किञ्च तथा निषेधप्रतिपादकशा-स्त्रस्य भ्रमजनकतया अनुपादेयत्वमेव स्यादिति चेन्न; पर्वापरवाक्यानुरोधेन वाक्यतात्पर्यस्य वर्णनीयतया

देवत्वादिनिषेधकशास्त्राणां "चत्वारः पञ्चदश रात्रा देवत्वं गच्छन्ति'
इत्यादिशास्त्रविरोधेनाद्वारकनिषेधपरत्वस्यावश्याश्रयणीयत्वान्नानुपपत्तिरिति भावः ।

त्रय एव यज्वान इति - एवकारः कोशेषु दृश्यते, तस्य नतीव प्रयोजनं पश्यामः । सद्ब्रह्माक्षरशब्दैरिति - अन्विता इत्यादिशेषः पूर-णीयः । द्वात्रिंशदधिकरणन्यायनिर्णीतत्वादिति - अतीतेषु चतुस्त्रिंशत्यधिकरणेषु सामान्यतो ब्रह्मविचारकर्तव्यतापरस्याद्याधिक

१.४.२९

रणस्यापशूद्रधिकरणस्य च देवताविशेषनिर्णयानुपयोगमभिप्रेत्य द्वात्रिंशत्त्वोक्तिः, अत एव जन्माद्यस्य यत इत्यादीनामधिकरणाना-मिति पृथक्कृत्य वक्ष्यति; अपशूद्राधिकरणं च नोदाहरिष्यति । नचैवं भगवच्छब्दतुल्यत्वं प्रथमसूत्रे उपपादितमिति वक्ष्यमाणग्रन्थ-विरोध इति वाच्यम्; तत्रापि भगवत्परत्वसम्भवाभिप्रायेण तथोक्तमिति द्रष्टव्यम् । यद्वा तृतीयं तु सामान्येनोपयुक्तमितिवक्ष्यमाणत्वात् तृतीयाधिकरणबहिर्भावेन द्वात्रिंशत्त्वं द्रष्टव्यम् । नारायणातिरिक्तेति - पाशुपतमते "उपादानं तु भगवान्निमित्तं तु महेश्वरः' इति नारायणातिरिक्तनिमित्तप्रतिपादनात्तन्मतनिरास इति भावः । हिरण्यमयत्वविशेषणेन चेति - आदित्यवर्णमित्यस्य प्रत्यभिज्ञाना-दिति भावः । परमपुरुषविषयतया समर्थनपरत्वमिति - आकाशाधिकरणे आकाशस्य भूतेभ्यो ज्यायानिति ज्यायस्त्वकीर्तनेन "ततो ज्याया'नित्युक्तपुरुषसूक्तोक्तार्थस्य प्राणाधिकरणे तस्योक्तार्थन्यायातिदेशरूपतया आकाशशब्दोक्ताथर्परत्वस्य ज्योतिरधिकरणे ज्योतिश्शब्दस्य "पादोऽस्य विश्वाभूतानि' इत्यनेन पुरुषसूक्तार्थपरत्वस्य प्राणाधिकरणे इन्द्रप्राणयोः "मामेव विजानीहि मामुपाख' इति हिततमोपासनकर्मत्वप्रतीतेः "तमेवं विद्वानमृत इह भवति नान्यः पन्था' इतिपुरुषसूक्तार्थपरत्वस्य च स्वरसतः प्रतीयमानत्वा-त्तत्परत्वसमर्थनं स्फुटमिति भावः । अत्रेन्द्रशब्दो मामितिशब्दपरो द्रष्टव्यः । इदञ्च पूर्वमेव प्रदर्शितम्, "हृदा मनीषा मनसाभिक्लृप्तः' इति, अस्य वाक्यस्य तैत्तिरीयगतस्य पुरुषविषयत्वादिति भावः । अमृतत्वस्य परमपुरुषत्वसाधकतामुपपादयति -तस्मिन्नयमि-तिवाक्यप्रत्यभिज्ञानादिति । मुण्डोपनिषदः कार्त्स्न्ेनेति - येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् "दिव्यो ह्यमूर्तः पुरुषः कर्तारमीशं पुरुषम्'इति पुरुषशब्दाभ्यासदर्शनादिति भावः । तत्र श्रुतरूपविशेषान्वयादेवेति - मुण्डकोपनिषच्छुतेत्यर्थः । इदञ्च स्मर्यमाणमनुमानं स्यादित्यत्र स्पष्टम् । अन्तर्यामिविद्ानन्तरवाक्यप्रतिपाद्यत्वाच्चेति - यद्यप्यनतर्यामिब्राह्मणमुद्दालककर्तृकस्यान्त-र्यामिप्रश्नस्योत्तरम्, गार्गिब्राह्मणं तु गार्गिकर्तृकाकाशाधारप्रश्नस्योत्तरमिति नानयोरेकविषयत्वनियमः । अथापि कियदपि नियामकं सम्भवन्न परित्याज्यमित्यभ्युच्चययुक्तितयोपन्यस्तमिति द्रष्टव्यम् । आकाशो ह वै नामेतिवाक्यमिति - सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वा' इति पुरुषसूक्ते श्रवणात्तत्प्रत्यभिज्ञापकमिति भावः । यस्मात्परमितिवाक्यस्याधीतत्वादिति - तत्र "तेनेदं पूर्णं पुरुषेण सर्वमिति पुरुषशब्दश्रवणादिति भावः । बृहदारण्यक इति -"ब्रह्म वा इदमग्र आसीत्तदेकं सन्न व्यभवत्तच्छ्रेयोरूपमत्यसृजत क्षत्रम् । यान्येतानि देवक्षत्राणि इन्द्रो वरुणस्सोमो रुद्रः पर्जन्यो यमो मृत्युरीशानः इति तस्मात्क्षत्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रिय-मधस्तादुपास्ते राजसूये क्षत्र षव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म तस्माद्यदपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति-

१.४.२९

स्वां योनिं य एनं हिनस्ति स्वां योनिमृच्छति स पापीयान्भवति यथाश्रेयांसं हित्वा स नैव व्वभवत्स विश्वमसृजत यान्येतानि देवजा-तानि गणश आख्यायन्ते वसवोरुद्रा आदित्या विश्वेदेवा मरुत सति स नैवं व्यभवत्स शौद्रं वर्णमसृजत पूषणं इश्वं वै पूषा इयं हीदं सर्वं पुष्यति यदिदं किञ्च स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यतो बलीयान्बलीयांसमा-शंराते यथा धर्मेण राज्ञा यं यो वै स

धर्मस्सत्यं वैतत्तस्मात्सत्यं वदन्तमाहुर्धर्मं वदन्तीति । धर्मं वा वदन्तं सत्यं वदतीत्येव तद्धैव तदुभयं भवति तदेतद्ब्रह्म क्षत्रं विट्छूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यश्शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्तो ब्राह्मणो मनुष्येषु एताभ्यां हि रूपाभ्यां ब्रह्माभवत्' न व्यभवत्-न विभूतवत्कर्मणे नालमासीदित्यर्थः । श्रेयो-रूपम् प्रशस्तरूपम् अत्यसृजत-अतिशयेनासृजत् देवताक्षत्राणि देवेषु क्षत्राणि, राजसूयेऽभिषिक्तमासाद्यस्थितम् राजानमधस्ता-त्स्थितमृत्विक् हे राजन् । त्वं राजन् ब्रह्मासीदिति ब्रूयादिति उपासनं विहितं तद्यश आत्मीयं यशो दधाति, परमतां राजसूयाभिषेके-णोत्कृष्टतां गच्छति, अन्ततः कर्मसमाप्तौ परोहितमेवाश्रयतीत्यर्थः । यस्तु क्षत्रियः स्वकारणभूतां ब्रह्मयोनिं हिनस्ति, स स्वां योनिं नाशयति, इयं पृथिवी क्षत्रस्य क्षत्रं क्षत्रियस्यापि नियन्त्रीत्यर्थः । अभलीयान् दुर्बलः, बलीयांसमात्मनो बलवत्तरमपि धर्मेण बलेन जेतुमाशंसते, यथा राज्ञा लोके बलवत्तरेणापि कश्चिद्दरिद्रो धर्मेण विजिगीषते, तस्मात्सिद्धं धर्मस्य बलवत्वम् । तदधिष्ठितब्राह्मण-जातिपर इति - अग्निदेवताधिष्ठितब्राह्मणजातिपर इत्यर्थः । प्रथमपक्षे ब्राह्मणजातिपरत्वसत्त्वेपि अग्निदेवताधिष्ठितब्राह्मणजातिपर-त्वाभावात्तत्पक्षादस्य पक्षस्य विशेष इति द्रष्टव्यम् । क्षत्रियसृष्टिश्रवणादिति - यदि परं ब्रह्मैव प्रकान्तं स्यात् तदा सर्ववर्णसृष्टिरपि कथ्येत, न क्षत्रप्रमुखसृष्टिरिति भावः । ब्रह्मशब्दो ब्राह्मणपर इत्यन्तेन ब्राह्मणपरत्वं प्रसाध्य इतरपक्षद्वयमुपक्षिपति - तदभिमान्य-ग्निपर इत्यादिना । उपक्रमस्थब्रह्मशब्देति - चातुर्वर्ण्यनिगमनस्थब्रह्मशब्दस्य ब्राह्मणवर्णपरत्वस्य सम्प्रतिपन्नत्वादिति भावः । अग्निसृष्टत्वायोगश्चेति - इदमुपलक्षणम् । ब्राह्मणजातिसृष्टत्वयोगश्चेत्यपि द्रष्टव्यम् । इन्द्रादिस्रष्टृत्व कल्पभेदनाग्नेस्स्यादित्यत्राह- अस्याः श्रुतेरिति । अग्निब्राह्मणान्यत्वञ्च प्रतीयत इति - ननु तच्छब्दपरामृष्टब्रह्मणः अग्निनेति व्यधिकरणनिर्दिष्टाग्नेरन्यत्वं प्रतीयतां नाम, ब्राह्मणानन्यत्वं कथं प्रतीयतामिति चेन्न, मृत्पिण्डो घटो भवतीतिवत् तद्ब्राह्मणो भवतीत्युक्ते तच्छब्दितस्य ब्राह्मण्यात्पूर्वभावि-त्वप्रतीतेरनुभवसिद्धत्वादिति भावः । देवमनुष्यविभागेनेति - देवरूपो मनुष्यरूपश्च ब्राह्मणोऽस्तीत्यर्थः । परमात्मसृष्टतया प्रागुक्त इति - "नैवेह किञ्चनाग्र आसी'दित्यस्मिन्ब्राह्मण इत्यर्थः । क्षत्रादिविभागवत्तदभिमानीति - क्षत्रादिभेदभिन्नतत्तज्जात्यभिमानी-न्द्रादिसृष्टिरित्यर्थः । ब्राह्मणाभिमान्यग्निसृष्टेरिति - तस्य श्रान्तस्य तप्तस्य तेजो निरवर्त्तते पूर्वब्राह्मण इति भावः । ब्राह्मणत्वादि-विभाग उक्तस्यादिति । ततश्च ब्राह्मणवाचिनो ब्रह्मशब्दस्य लक्षणा न समाश्रयणीयेति भावः ।तत्परं ब्रह्म मनुष्येष्विति - तदग्निनैव देवेष्वित्यतःपरं ब्रह्मपदतच्छब्दोऽनुकृष्यते, अग्निनैव देवेषु ब्रह्माभवदित्यतो ब्रह्माभवदित्यप्यनुकृष्यत इति भावः । नन्वग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येष्वित्यत्र देवेषु देवानां मध्ये ब्रह्माग्निनैवागमत् विकारान्तरमप्राप्यैवाग्निस्वरूपयुक्तमेवाभवत्, मनुष्याणां मध्ये-

१.४.२९

च विकारमप्राप्यैव ब्रह्मस्वरूपमेव ब्रह्म स्थितम् अग्नौ ब्राह्मणजातौ च ब्रह्माविकृतमित्यर्थः । क्षत्रियादिषु तु क्षत्रियादिविकारनिमित्तकं क्षत्रियत्वं ब्रह्मणः, तस्माद्यत अग्निब्राह्मणवविकृतब्रह्मस्वरूपौ तस्माल्लोकमिच्छन्तो अग्नौ ब्राह्मणे च कुर्वन्तीत्येवं परोक्तरीतिः कुतो नाश्रीयत इत्याशङ्कयाह - श्रुतपदानुषङ्गेणेति । तत्प्रशंसाया विवक्षितत्वादिति - ननु प्रकरणस्य चातुर्वर्ण्यतदभिमतानिसृष्टिसाधा-

१.४.२९

रण्येऽग्निब्राह्मणयोः प्रशंसायां किं बीजम्? नह्यस्मिन्प्रकरणेऽग्निब्राह्मणयोरिन्द्रक्षत्रादिव्यावृत्ततया असाधारण्येनोद्देश्य विधेयकोट्यो-रनुप्रवेशोस्ति, येन विशिष्य तयोः प्रशंसा विवक्षिता स्यात्, अग्निब्राह्मणप्रशंसामुखेन चातुर्वण्यर्तदभिमानिप्रशंसाया विवक्षितत्वमि-त्यत्र तात्पर्यात् । मुख्यार्थासम्भव इति - अग्निनैव देवेषु ब्रह्माभवदित्यत्र मुख्यार्थसम्भवात् ब्राह्मणजातिरूपमुख्यार्थस्वीकारेपि ब्रह्मण इदमग्र आसीदित्यत्र मुख्यार्तसम्भवस्थलेपि ब्राह्मणजातिरूपामुख्यार्थस्वीकारस्यायुक्तत्वादिति भावः । आत्मैवेति - "आत्मैवा-सीत्पुरुषविदस्सोन्वीक्ष्य नान्यदात्मनोऽपश्यत्सोहमस्मीत्यग्रे व्याहरत्ततोऽहन्नामाभवत्तस्मादप्येतर्ह्यामन्त्रितोऽहमयमित्येवाग्र उक्त्वा अथान्यन्नाम

प्रब्रते यदस्य भवति स यत्पुर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन ओषत्तस्मात्पुरुष ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद सोबिभेत्तस्मादेकाकी बिभेति सहायमीक्षाञ्चक्रे यन्मदन्यास्ति कस्मान्नु बिभेमीति तत एवास्य भयं विहाय कस्माध्द्यभेष्यत् द्वितीयादौ भयं भवति स वै नैव रे मे तस्मादेकाकी न रमेत स द्वितीयमैच्छत्' इत्यादि । एतर्ह्यामन्त्रित इति-अस्मिन्नपि काले आहूत इत्यर्थः । स यत्पूर्व इति-यत् यस्मात्काणादस्मात्सर्वस्मात्पूर्वस्सन् सर्वान्पाप्मनोऽटहत्तस्मात्पुरुष इत्यर्थः । ओषति ह वै स तमित्यादि- य एवं वेद सः स्वस्मात्पूर्वं प्रजापतित्वप्रेप्सुं दहतीत्यर्थः । लोके हि उत्कृष्टसाधनशाली तादृशसाधनशून्यं दहन्निव दृश्यते । नैवेह किञ्चतेत्यादि- "आसीन्मृत्युनेवेदमामृतमासीदशनाया अशनायया हि मृत्युस्सतं मनोऽकुरुत आत्मन्वी स्यामिति सोऽर्चन्नचरत्तस्यर्चत आपो जायन्त अर्चते वैमेकमभूदिति तदेवार्कस्यार्कत्वं कं ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद आपो वा अर्कः यद्यदपां रस आसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य आन्तस्य तेजो रसो निरवर्ताग्निः' इति हि श्रुतिः । आत्मन्वी स्यामिति-मनस्वीस्यामिति सङ्कल्प्य मनोऽकरोदित्यर्थः । अर्चते वैमे अशनाया विशिष्टत्वाञ्चेति । यद्यपि मृत्युनानशनायेतिसामानाधिकरण्यमेव प्रतीयते, नत्वशनायाविशिष्टत्वम्, तथापि मृत्योरिहाशनायात्वासम्भवात् अशनायाशब्देन अशनायावान् लक्ष्य इति भावः । अर्च-नादिकर्मकर्तृत्वमिति - अचर्नादिक्रियाकर्तृत्वमित्यर्थः । सुबालोपनिषदीति - सुबालोपनिषदुपक्रमे "तदाहुः किं तदासीत्तस्मै स होवाच न सन्नासन्नसदसदिति तस्मात्तमस्सञ्जायते तमसो भूतादिर्भूतादेराकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोऽब्भ्यः पृथिवी तदण्डं समभवत्तत्सं वत्सरमात्रमुषित्वा द्विधा करोत् । अधस्ताद्भूमिमुपरिष्टादाकाशं मध्ये पुरुषो दिव्यः सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्र-पात्सहस्रबाहुरिति सोग्ने भूतानां मृत्युमसृजत्त्रयक्षं त्रिशिरस्कं त्रिपादं खण्डपरशुं तस्य ब्रह्मा बिभीते' इत्यादि श्रुतिः । मृत्यो परे देव एकीभावः श्रूयत इति - मृत्योरिति पञ्चमी परे देवे मुक्तस्य एकीभावः श्रूयत इत्यर्थः । कोशं भिनत्तीत्यादि - प्रकरणस्य मुच्यमान-विषयत्वात्, अत्र मृत्योः परत्वं नाम मृत्युं प्रति कारणत्वं तस्य च देवशब्दितत्वं श्रूयत इति भावः । युक्तयन्तरमाह- विभागापादा-नस्यैवेति । अस्यामेवोपनिषदि अक्षरं तमसि लीयते तम एकी भवति परस्मिन्निति परस्य तमोविभागस्थानत्वप्रतिपादनादविभाग-स्थानस्यैव तमस्सञ्जायत इति विभागपादानत्वं युक्तमिति भावः । मुक्तप्राप्यत्वादीति - अक्षरं भिनत्तीत्यादेर्मुक्तगतिप्रकरणत्वान्मु-क्तप्राप्यत्वस्य च सोध्वनः पारमाप्नोति तद्विष्णोः परं पदम्' इत्यादिषु नारायणस्यैवेति स्थितत्वादिति भावः । केवलाच्चेतनादित्यादि न सन्नासच्छबनदाभ्यां केवलचेतनाचेतनवैलक्षण्यं विवक्षितम् न सदसदितिशब्देन मिश्रवैलक्षण्यं विवक्षितम् । व्यष्टिभ्य इत्येतन्मिश्रा-दित्येतस्य व्याख्यानमिति द्रष्टव्यम् । तदुक्तमृषिणेति - ऋषिणा-वेदेनेत्यर्थः । जगतस्तस्थुषश्चेति - जङ्गमस्य स्थावरस्य चेत्यर्थः । परमकारणव्याप्तत्वादिति - इदमुपलक्षणम् । स्थावरजङ्गमान्तर्यामित्वस्यापि कारणत्वव्याप्तत्वादिति द्रष्टव्यम् । आदित्यमभिजायत इति - अनेनादित्यलोकप्राप्तिप्रतिपादनेनार्चिरादिगतिः प्रत्यभिज्ञायत इति भावः । प्रत्यगात्मा विशोध्यत इति - मोक्षसाधनीभूत-परमात्मोपासनाङ्गभूतप्रत्यगर्थानुसन्धानार्थमितरव्यावृत्त्यर्थं प्रत्यगात्मस्वरूपं प्रतिपाद्यत इत्यर्थः । नन्वस्यामेव ऋचि "स दधार पृथिवीं द्यामुतेमाम्' इति पृथिव्यादिधारकत्वं व्यावर्तकमस्त्विवत्याशङ्कयाह - पृथिव्यादिधारकत्वं त्विति । श्रुतौ दधारेति-दधारेत्यर्थः। धृजा-दीनां "दीर्घोभ्यासस्ये'ति अभ्यासस्य छान्दसो दीर्घः । नन्वस्मिन्नेवाष्टर्चे "यस्य छायामृतं मृत्यु'रिति अमृतमृत्युशब्दितयोर्बन्धमोक्षयो-र्नियाम्यत्वश्रवणात् परमात्मपरत्वमित्याशङ्कयाह - अमृतमृत्युशब्दौ चेति । यमन्तस्समुद्र इति - अन्तस्समुद्रे कवयो वयन्ति-अव-गच्छतीत्यर्थः। तपश्शब्देनेति "ऋतञ्च सत्यं चाभीद्धात्तपसो जायते'ति तपश्शब्देनेत्यर्थः । तपश्शब्दश्च "ये चेमेरण्ये श्रद्धां तपइत्युपा-

सते' इत्यादाविव परमात्मपर इति भावः । उपक्रमस्थधातृशब्दैकरूप्यस्येति - "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' इतिपूर्ववा-क्यश्रुतधातृशब्दैकरूप्यस्यैव धातुः प्रसादिति धातृशब्देप्याश्रयणीयत्वादित्यर्थः । उत्तरे

चानुवाक इति - "स ब्रह्मा स शिव' इतिना-रायणानुवाके प्रतिपादनादिति भावः । ब्रह्मकार्यवर्गप्रतिपादनप्रकरण इति - "सप्त प्राणाः प्रभवन्ति तस्मात्सप्तार्चिषस्समिधस्सप्त-

१.४.२९

जिह्वाः। सप्तमे लोका येपु चरन्ति प्राणाः गुहाशयां निहितास्सप्त सप्त । अतस्समुद्रा गिरयश्च सर्वे तस्मात्यन्दन्ते सिन्धवस्सर्वरूपाः । अतश्च विश्वा ओषधयो रसाश्च येनैषभूतस्तिष्ठत्यन्तरात्मा । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृद्ध्णां स्वधितिर्वनानां सोमः पवित्रमत्येति रेफन्' इति हि प्रकरणम् । तस्मात्तुल्यबलेति - ननु तुद्रमहेश्वरश्रुत्योरुपक्रमस्थेन धातृपदेन तुल्य-बलत्वं पूर्वतन्त्रे हि "विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सवर्मवत्वम्' इत्यधिकरणे कस्मिंश्चित् काम्येष्टिविशेषे ऐन्द्राग्न एकादश-कपालः प्राजापत्यं दधि मधु घृतमाप इति पञ्चानां हविषामाद्ययोरैन्द्राग्नसान्नायविकारत्वेनामावास्याविध्यन्तप्राप्तौ उपांशुयाजविका-राणां मधूदकधृतानां चरमश्रुतत्वेपि भूयस्त्वात्तदनुग्रहाय पौर्णमासविध्यन्त इति निर्णीतम् । ततश्चोपसंहारस्थानेकप्रमाणापेक्षयोपक्र-मस्थमेकं दुर्बलम् । अन्तर उपपत्तेरित्यधिकरणे तथा निर्णीतं चेति चेन्न; विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्धर्मत्वमिति पूर्वपक्षं कृत्वा मुख्यं वा पूर्वचोदनाल्लोकवदिति सिद्धान्त्यते, अतश्च द्वयोरपि सूत्रयोरैकाधिकरण्यमिति एकदेशिमतानुसारेणेदमिति द्रष्टव्यम् । किञ्चात्रापि "धाता यथापूर्वमकल्पयत् धातुः प्रसादा'दिति धातृशब्दाभ्याससत्त्वाच्च भूयोऽल्पत्वरूपवैषम्यं नास्तीति द्रष्टव्यम् । अनु-वादस्यान्यसापेक्षत्वादिति । ननु यो वेदानामित्येतस्य कथमनुवादत्वशङ्का? नहि विश्वाधिकस्य महर्षेः रुद्रस्य हिरण्यगर्भजनकत्व-रूपः प्रतीयमानोऽर्थो मानान्तरप्राप्तेः, येनेदं वाक्यमनुवादि स्यात्, असत्यां च मानान्तरप्राप्तौ यदुपबन्धसहस्रेणापि अनुवादकत्वस्य कल्पयितुमशक्यत्वात् । न च यदुपबन्धबलाद्रुपदस्य नारायणो लक्षणमाश्रित्य नारायणाद्ब्रह्मा जायत इतिवाक्यस्य पुरोवादित्वमङ्गी-कृत्यास्य वाक्यस्यानुवादित्वं परिकल्प्यत इति वाच्यम्; तथासति यदाग्नेय इत्यादिवाक्येष्वपि यदुपबन्धबलेन सौर्यचरुपरत्वाश्रयणेना-नुवादित्वप्रसङ्गादिति चेन्न; द्वयोर्हिरण्यगर्भकारणत्वासम्भवात् श्रुतिविशेषश्रुतयोरुद्रनारायणपदयोरन्यतरलक्षणावश्यम्भावात् यदुप-बन्धानुग्रहाय रुद्रपदस्यैव लक्षणाश्रियते सम्भवान्नियामकस्य त्यागायोगादिति भावः । ननु "अकारेणोच्यते विष्णुः' इत्याकारवाच्यस्य विष्णुत्वप्रतिपादकवाक्यमेकम् "यः परस्य महेन्वरः' इत्याकारवाच्यस्य रुद्रत्वप्रतिपादकमपरम्, कोऽनयोर्विशेषः? चैत्रो मित्रायाः प्रतिरित्येकं वाक्यम्, यो मित्रायाः पतिस्स मैत्र इत्यपरम्, नह्यनयोरुपजीव्योपजीवकभावोऽनुवाद्यनुदकभावो वा बलाबलप्रयोजकः, कश्चिन्मृग्यमाणोपि वीक्ष्यत इत्यस्वरसादाह - नारायणस्याकारवाच्यतासिद्धेश्चेति । नारायणस्याकारवाच्यत्वस्य "अकारेणाखि-लाधारः परमात्माभिधीयते । समस्तशब्दमूलत्वादकारस्य स्वभावतः । समस्तवाच्यमूलत्वाद्ब्रह्मणोपि स्वभावतः । वाच्यवाचकसम्ब-न्धस्तयोरर्थात्प्रतीयते । "अ निषेधे पुमान्विष्णौ अकारो विष्णुवाचकः अकारोणोच्यते विष्णुः अ इति ब्रह्म' अ इति भगवतो नारा-यणस्य प्रथमाभिधानमभिदधता' इत्यादिबहुप्रमाणसम्प्रतिपन्नतया तदनुरोधेनैवैतद्वाक्यार्थस्य वर्णनीयतया यः पर इत्यनेन नाराय-णमेवानूद्य महेश्वरशब्दे रूढिं परित्यज्य योगार्थभूतं महत्त्वविशिष्टमीशितृत्वं विधीयत इति भावः । अनुवादरूपतयेति- "यो देवानां प्रभवश्चोद्भवश्च विन्वाधिको रुद्रो महर्षिःहिरण्यगर्भं जनयामास पूर्वं स नो देवश्शुभया संयुनक्त' इति यच्छब्दयुक्ततया श्रवणादनुवा-दरूपत्वमिति भावः । अविरोधश्च वस्त्वैक्येनेति - पिण्डरूपमृज्जन्यस्य घटस्य कपालत्वावस्थापन्नमृज्जनकत्वदर्शनाद्वस्त्वैक्यमवि-रोधसम्पादकमिति भावः । अवस्थाद्वयपौर्वापर्येति - मृज्जन्यघटस्य तज्जनकत्वदर्शनेपि यदवस्थापन्नमृज्जन्यत्वं घटस्य तदवस्थापन्न-भृज्जनकत्वं न दृष्टमिति भावः । आकाशप्राणादिष्वपीति - "सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते' सर्वाणि ह वा इमानि भूतानि प्राणमवाभिसंविशन्ति' इत्यादिवाक्यानामपि कल्पविशेषप्रवृत्तवृत्तान्तविषयतया अविरोधसम्भवात्तद्वाक्यानां परमा-त्मपरत्वं न कल्पयेत इति भावः । ननु "त्रयस्ते कारणात्मानो

जातास्साक्षान्महेश्वरात् । ब्रह्मा सर्गे हरिस्त्राणे रुद्रस्संहरणे पुनः । तथाप्यन्योन्यमात्सर्यादन्योन्यातिशयार्थिनः । तपसा तोषयित्वा तं पितरं परमेश्वरम् । ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत् । कल्पान्तरे पुनर्ब्रह्मा रुद्रविष्णू जगन्मयः । विष्णुश्च भगवांस्तद्वद्ब्रह्माणमसृजत्पुनः । नारायणं पुनर्ब्रह्मा ब्रह्माणं च पुनर्भवः । एवं कल्पेषु

१.४.२९

कल्पेषु ब्रह्मविष्णुमहेश्वराः । परस्परस्माज्जायन्ते परस्परजयैषिणः । तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः । प्रभावः कथ्यते तेषां परस्परसमुद्भवात् । क्वचिद्ब्रह्मा क्वचिद्रुद्रः क्वचिद्विषकणुः प्रशस्यते । नानेन तेषामाधिक्यं न्यूनत्वं वा कथञ्चन । तत्तत्कल्पान्तवृत्तान्त-मधिकृत्य महर्षिभिः । तानि तानि प्रणीतानि विद्वांस्तत्र न मुह्यति । अयं परस्त्वयं नेति संरम्भाभिनिवेशिनः । यातुधाना भवन्त्येव पिशाचाश्च न संशयः । यो ब्रह्मविष्णुरुद्राणां भेदमुक्तमभावतः । साधयेदुदरव्याधियुक्तो भवति मानवः । निर्दिष्टः परमेशाना महेशो नीललोहितः । पुत्रो भूत्वानुगृह्त्वाति ब्रह्माणं ब्रह्मणोऽनुजः । अहं च भवतो वक्त्रान्कल्पान्ते घोररूपधृक् । शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रक । अंशभूतो महादेवः सर्वदेवनमस्कृतः । अर्धनारीश्वरो भूत्वा प्रादुरासीत्कृपानिधिः । तस्य हृत्कमलस्थस्य नियो-गादंशजो विभोः । ललाटं तस्य निर्भिद्य प्रादुरासीत्प्रभोर्मुखात्' इति कौर्मसूतसंहितालैङ्गैः स्मृतिवचनैः कल्पभेदस्यावताररूपत्वस्य च प्रतिपादनात् "न चास्य कश्चिज्जनिता न चाधिपः' इतिश्वेताश्वेतरे रुद्रस्य जनयितृभावप्रतिपादनाच्च तथाभ्युगन्तव्यमित्यस्वरसादाह -

१.४.२९

वस्त्वैक्यकल्पभेदावतारेति । न चैवमुदाहृतवचनानुसारात्रिमूर्तिसाम्यैक्यमेक्षोन्मज्जनप्रसङ्ग इति वाच्यम्; तामसपुराणेषु अपचरदव-स्थतया प्रक्षेपशङ्कास्पदेषु एवं श्रवणेप्यतादृशेषु तथा श्रवणाभावात् श्वेताश्वतरस्य शिवपरत्वस्यासम्प्रतिपन्नत्वाच्चेति द्रष्टव्यम् । रुद्र-शब्दस्यैव प्रसिध्यानादर इति - रुद्रहिरण्यगर्भशब्दयोर्मध्ये रुद्रशब्दस्य मुख्यत्वादसञ्जातविरोधित्वान्न तत्र मुख्यार्थत्यागो युक्तः । किन्तु जघन्यविरण्यगर्भशब्दस्यैव स्कन्दपरत्वमितिवाच्यम्; रुद्रशब्दस्य "रुद्रो बहुशिरा बभ्रुः' इत्यादिषु भगवत्परतया प्रयोगद्धि-रण्यगर्भशब्दस्य स्कन्दे क्वापि प्रयोगादर्शनात् ततोपि मुख्यानां विश्वाधिकादिशब्दानां बहूनां सत्त्वाच्च तदनुग्रहाय रुद्रशब्दस्यैव भगवत्परत्वं युक्तमिति भावः । उदगादितिब्राह्मणानुरोधेनेति - शैलालिब्राह्मण इति । शैलालिब्राह्मणं समन्वयसूत्रे उदाहृतम् । "अस्य देवस्य मीदुष' इति । अस्य विष्णोः, देवस्य दीप्तस्य एषस्य एषणीयस्य सर्वैः स्वामित्वेनापेक्षणीयस्य, मीदुषः-सेतुं वा वशाखेति निरुक्तभाष्यम्, शाखा यथा तथा विष्णोस्तरुस्थानीयस्य शाखास्थानीयो रुद्रः, प्रभुते- यज्ञे रुद्रकर्तृके, हविर्भिः रुद्रियं महित्वं विदधे लब्धवानित्यर्थः । महापुरुषं वार्चयेदितीति - यद्यपि "वेदाहमेतं पुरुषं महान्त'मित्यत्र महापुरुषशब्दो न प्रयुक्तः, तथापि महच्छब्दसमानाधिकरणपुरुषशब्दोसाधारण इति भावः । ननु यथा "नारायणाद्ब्रह्माऽजायत' इति श्रुत्या ब्रह्मजनकत्वस्य नारायण-चतह्नत्वनिश्चयः तद्वदिहापि रुद्रो महषिर्र्हिरण्यगर्भं जनयामास' इति श्रुत्या हिरण्यगर्भजनकत्वस्य रुद्रदिह्नत्वनिश्चयोऽस्त्वित्याशङ्कय प्रतिबन्धकसदसद्भावाभ्यां वैषम्यमाह - नचानयैव श्रुत्येति । ननु नारायणाद्ब्रह्माजायत इत्यत्रापि ईदृशोन्योन्याश्रयस्सृवचः, नच प्रतिबन्धकसदसद्भावाभ्यां विशेष इत्युक्त इतिवाच्यम्; तर्हि स एव दोषः, न त्वन्योन्याश्रयः । न ह्यस्य वाक्यस्य रुद्रपरत्वनिश्चयोः हिरण्यगर्भजनकत्वस्य रुद्रलिङ्गत्वनिश्चयाधीनः, रुद्राभिधानश्रुत्यैव तत्परत्वस्य निश्चेतुं शक्यत्वात्, इतरथा नारायणाद्ब्रह्माजायत इत्यत्राप्यगतेरित्यस्वरसादाह - अनुवादरूपत्वाच्चेति । देवात्मप्रेरित्रीशब्रह्मशब्दैरिति - उत्तरत्र प्रेरितृशब्दप्रत्यभिज्ञाप्यश्रुतिर्न दृश्यते, तथाप्यन्तरोमययत इत्यादिसौबालादिवाक्यं द्रष्टव्यम् । तृतीयेचेति - खण्ड इति शेषः । ईशानपदं त्विति - "सर्वस्य प्रभु-मीशानं सर्वस्य शरणं सुहृत्' इत्यत्र श्रुमीशानपदमित्यर्थः । मायाप्रेरकत्वपर इति - यौगिकार्थपर इत्यर्थः । मायाप्रेरके प्रयुज्यमानो महेश्वरशब्दो यौगिक एव नारायणस्यैव सुबालोपनिषत्प्रतिपाद्यतमोधिष्ठातृत्वेन श्रवणादिति भावः । ईशानशब्देनोच्यत इति -

१.४.२९

"येनेदं सञ्चविचैति सर्वं तमीशानं वरदं देवमीड्यम्' इति हि श्रुतिः । तमीशानमित्यत्रेशानप्रतिसम्बन्ध्याकाङ्क्षायां यस्मिन्निदमिति पूर्व-वाक्यनिर्दिष्टस्यैव सर्वस्य प्रतिसम्बन्धितया ग्रहणमिति भावः । तत्रेशानो भूतभव्यस्येति - यद्यपि श्वेताश्वेतरे "अङ्गुष्ठमात्रः पुरुषोन्त-रात्मा सदा जनानां हृदये सन्निविष्टः । हृदा मनीषा मनसाधिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ति' इत्येव पाठः, न तत्रेशानशब्दोस्ति तथा कठवल्लयामेतद्वाक्यप्रत्यभिज्ञाप्याङ्गुष्ठमात्रवाक्ये प्रतिसम्बन्ध्युपादानेन ईशानपदस्य योगार्थपरत्वमिति भावः । इह सर्यशब्देनेति - येनेदं सञ्चाविचेति सर्वमितिवाक्य इति भावः । कालस्यापि परिच्छेदक इति - ततश्च "यः कालकालः' इत्यन्तकरिपुर्नोच्यत इति भावः। योनियोनाविति - प्रतीयोनीत्यर्थः । विभक्तिविपरिणामेनानुषङ्ग इति - कारणानां कारणं धाता स्रष्टा ध्याता आदिसर्ग-

१.४.२९

सङ्कल्पकर्ता न प्रसूयत इति योजनेति भावः । न ब्रह्मादिवदुत्पत्तिरित्यर्थ इति - ननु ब्रह्मविष्णुरुद्रास्ते सर्वे सम्प्रसूयन्ते कारणं कारणानां धाता ध्यातेतिवाक्ये ब्रह्मविष्णुरुद्रेन्द्राणामुत्पत्तिसत्त्वाध्येयत्वं प्रतिपाद्यत इति वाक्यतात्पर्यं वक्तव्यम्; नैतत्सिद्धान्तिन उपपद्यते, ब्रह्मरुद्रमध्यपठितस्य विष्णोः ध्येयत्वप्रतिक्षेपकस्य सिद्धान्त्यनभिमतत्वादिति चेन्न; त्रिमूर्तिमध्यस्थितस्य विष्णवतारस्य

१.४.२९

मुमुक्षुध्येयत्वं प्रतिक्षिप्य परवासुदेवमूर्तेः समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः । तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् । समस्तशक्ति-रूपाणि तत्करोति जनेश्वर । देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया' इत्यादिप्रमाणप्रतिपन्नाया एव ध्येयतया विधिपरत्वादस्याः श्रुतेरिति द्रष्टव्यम् । नतु परमपुरुषासाधारणधर्मासम्भवादिति - प्रतर्दनविद्यायां हि चिदचिद्व्यावर्त्तकधर्मानन्वयेन तच्छरीरकपर-मात्मपरत्वमुक्तम्, इह तु सार्वात्म्यस्य परमपुरुषासाधारणधर्मत्वप्रतिपादनमुखेन तद्धर्मानन्वयेन सिद्धान्तः क्रियते, नह्ययं न्यायस्त-त्रोपन्यस्तः, येन गतार्थता स्यादिति भावः । नतु रुद्रवाक्यमिति - ततश्च"सोन्तरादन्तरं प्राविशत् इतिश्रुतिवाक्ये तच्छब्देन रुद्र एव परामृश्यते, ततश्च तस्यैवान्तर्यामित्वमुच्यत इति भावः । अहमेकमासमिति कारणत्वमुक्तमिति । ननु "को भवा'नित्यभिमुखस्य

१.४.२९

रुद्रस्य स्वरूपे देवैः पृष्टे "अहमेकः प्रथममास'मित्यादिना मदन्तर्यामी परमात्मेति प्रतिवचनम् "आम्रं पृष्टः कोविदारा'नितिन्यायः कथं नानुसरेत्? नच मदन्तर्यामी सर्वात्मेत्मुक्तेस्सर्वात्मभूतभगवच्छरीरभूतोहमित्यर्थे पर्यवसन्नतया को भगवानिति प्रश्नंप्रति उत्तरत्वस-म्भादितिवाच्यम्; तथा सति किं त्वं सकलकारणसर्वान्तरर्यामिशेषभूतः, उत स्वतन्त्र? इतिप्रश्नाभिप्रायः पर्यवसन्नस्यात् ततश्च तादृ-शप्रश्नस्यानुगुणे अहं न स्वतन्त्रः, अपि तु सर्वकारणसर्वान्तर्यामिशेषभूत इत्युत्तरे वक्तव्ये विरुद्धमतिकृतेदृशप्रतिवचनस्यासम्भवादिति चेन्न, श्रुतीनां परोक्षप्रियत्वेन गूढाभिप्रायतया समीचीनमीमांसावसेयतात्पर्यकत्वस्यादोषत्वादिति द्रष्टव्यम् । बुध्द्या प्राविशदिति - मनसि कृतवानित्यर्थः । तेन तेन हि तं नरम् अनुप्रविश्येति - तत्तद्भावयुक्ततया तं ज्ञात्वेत्यर्थः । रुद्रवाक्यानुवादेनेति - "अहमेकः प्रथममासम्' इत्यादिरुद्रवाक्यार्थीभूतनारायणसर्वान्तर्यामित्वानुवादेन स्तुतिपरत्वादित्यर्थः । तद्धितद्वयकल्पकाभावादिति - पशुप-तिना प्रोक्तं पाशुपतं शास्त्रं तत्प्रतिपाद्यं पाशुपतमिति तद्धितद्वयकल्पकाभावादितिभावः । इदमुपलक्षणम् । पाशुपतशब्दस्य वृद्धत्वा-

१.४.२९

च्छप्रत्ययप्रसङ्गेन पाशुपतमिति रूपासिद्धिप्रसङ्गादित्यपि द्रष्टव्यम् । समन्त्रकभसितस्पर्शनं त्विति - अग्निरित्यादिना भस्म गृहीत्वा विमृज्याङ्गानि संस्पृशेद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षायेतिश्रुतमित्यर्थः । ननु "भस्माद्धूलनस्य मद्यंपीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा प्रह्महत्यां च कृत्वा भस्मच्छन्नो भस्मशय्याशयानो रुद्रध्यायी मुच्यते सवपाशैः' इति शातातपस्मृतौ सर्वपापक्षयहेतुत्वस्मरणात् पापक्ष-यस्य सर्वब्रह्मविद्यापेक्षितत्वादपेक्षालक्षणवस्तुसामर्थ्यलिङ्गेन पाशुपतप्रकरणं बाधित्वा सर्वविद्यार्थत्वमेवाभ्युपगन्तव्यम् । अत एव "तमेतं वेदानुवचनेन' इत्यत्र दहरविद्यायाः प्रकृतत्वेपि"धर्मेण पापमनुदति' इतिश्रुतिप्रतिपन्नस्य कर्मजन्यस्य पापक्षयरूपद्वारस्य सर्वविद्यापेक्षितत्वाद्यज्ञादिकर्मणां सर्वविद्यासाधारण्यम्; तथा "तस्मादेवंविच्छान्तो दान्त' इत्यादिश्रुतौ प्रकृतविद्यापरामर्शकैवविच्-छब्दे सत्यपि शमदमादिसाध्यचित्तैकाग्र्यादेस्सर्वविद्यापेक्षित्वादेव सर्वविद्यासाधारण्यमभ्युपेयत इति चेन्न; यदि प्रकरणपठिताना-मप्यपेक्षामात्रेण सर्वसाधारण्यम्, तर्हि दर्शपूर्णमासप्रकरणपठितानां व्रीहिप्रोक्षणावघातादीनां सन्निपत्याङ्गानां "वर्म वा एतद्यज्ञस्य क्रियते' इत्याद्यर्थवादप्रतिपन्नयागापेक्षितोपकारजनकानां प्रयाजद्यङ्गानामपि उपदेशत एव सर्वयागसाधारण्यप्रसङ्गः "यज्ञेन दानेन' इत्यादिस्थलेतु "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इत्यादिसर्वविद्यासाधारण्यप्रतिपादकशास्त्रान्तरवशेन सर्वविद्यासाधारण्य-

१.४.२९

सिद्धावप्यन्यत्र तथात्वे प्रमाणाभावाच्छमदमादिस्थलेपि शमाद्येकसाध्यचित्तैकाग्र्यैकसाध्यत्वाद्ब्रह्मोपासनस्य शमादेस्सर्वविद्यासा-धारण्यम्, ब्रह्मविद्यापेक्षितपापक्षयस्य भस्मोद्मूलनैकसाध्यत्वे प्रमाणाभावात् भस्मोद्धूलनस्य न सर्वब्रह्मविद्याङ्गत्वमित्यलमतिचर्चया । ज्ञातव्यार्थस्य समाप्तिसूचक इति - "तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदम्, "य यतमेवं विद्वानादित्यं ब्रह्मेत्युपास्ते अभ्योशो ह यदेनं साधवो घोषा आगच्छेयुरुपनिम्रेडरन् निम्रेडरन्' इत्यादौ अब्रह्मप्रतिपादकोपनिषद्भागेपि अभ्यासदर्शनात् गौतमधमर्शास्त्रे प्रतिखण्डिकमभ्यासदर्शनाच्च प्रायिकमेतदिति मन्तव्यम् । पादषट्कात्मकत्वेनेति - शरभादावष्टचरणत्ववद्भ्रमरादौ षट्चरणत्वस्यापि दर्शनाच्छरभाध्यायवद्भ्रमराध्यायतयापि निबन्धनप्रसङ्गादिति भावः । ननु इतिहासपुराणाद्यनुग्राहका न्याया अभ्यासेन सङ्ग्राह्यास्सूच्या इत्याशङ्कयाह - इतिहासपुराणादीनामिति । अर्थसमाप्तिर्हीति - सर्वे व्याख्याता इत्येतावतैवार्थसमाप्तावगतायामध्यायसमाप्तिरप्य-वगंस्यत इति किं समाप्तिद्योतकेनाभ्यासेनेति भावः । शास्त्रावसाने त्विति - इदमुपलक्षणम् । अध्यायान्तरेष्वपीति द्रष्टव्यम् । ननु महतः परमव्यक्तमिति महत्तत्त्वस्याव्यक्तभेदप्रतिपादनात् प्रकृते ब्रह्मत्वसमर्थनमात्रादेव महदादीनां ब्रह्मत्वासिद्धेस्सफलमिदमधिकरण-मित्याशङ्कयाह - महतः परमव्यक्तमित्यादिवाक्यानाञ्चेति । चतुर्थाद्यविरुद्धमिति - महच्छब्दस्यात्मविशेषणत्वेन महत्तत्त्वपरत्वा-भावस्य समर्थितत्वादित्यर्थः । पूर्वमकृतत्वाच्चेति - प्रधानकारणवादनिरासस्य पूर्वमकृतत्वेन तस्या एतच्छब्देन परामर्शायोगादिति

१.४.२९

भावः । अनुदाहृतवाक्यानामतत्परत्वमिति - अनुदाहृतवाक्यानां परमाण्वादिपरत्वाभाव इत्यर्थः । इन्द्रियाणामपि तच्छरीरत्व-मुक्तमिति - स्थानादिव्यपदेशाच्चेति सूत्र इति भावः ।। इति सर्वव्याख्यानाधिकरणम् ।।

इति दशोपनिषद्भाष्यकारैः श्रीरङ्गरामानुजमुनिभिर्विरचितायां श्रुतप्रकाशिकाव्याख्यायां भावप्रकाशिकायाम् प्रथमस्याध्यायस्य- चतुर्थः पादः ।।

Second Chapter

First Pada

२.१.१

प्रत्यक्षादिप्रमाणगोचरादिति - न च साङ्खयाभिमतस्य कथं प्रत्यक्षगोचरत्वमिति शङ्कयम्, कार्यावस्थायां प्रत्यक्षसम्भ-वात्; अत एव वक्ष्यति प्रत्यगर्थवदिति । पदविवक्षितमाह-मुक्तव्यावृत्त्यर्थमिति । एकशब्दविवक्षितमर्थमाह -निमित्तोपादानरूपेति । शरीरगतदोषाणां शरीरिण्यस्पर्शः सर्वान्तरभूतमित्यनेन भाष्ये विवक्षित इत्यभिप्रयन्नवतारिकामाह - जगत्कारणत्व इति । वक्ष्यत इति - परैरुद्भाविता दोषाः परिहृताः । इदानीं स्वपक्षरक्षणाय परपक्षाः प्रतिक्षिप्यन्त इति द्वितीयपादाद्यभाष्येणेत्यर्थः । चालयितुं शक्यत इति कम्पने चलिरितिघटादिपाठान्मित्वम् । तदेतदभिप्रेत्याह, विरोधे त्वनपेक्षं स्यादिति पाठश्चेत्समीचीनः । उक्तं हीति

२.१.१

भाष्यस्य पूर्वमेव अवतारितत्वादिति द्रष्टव्यम् । अतो व्याकुलत्वाद्वेदान्तवाक्यानामिति - अयमाशयः, श्रुतिस्मृत्योर्न श्रुतिस्मृतित्व-कृतं नियतं प्राबल्यदौर्बल्यम्, अपि तु श्रुतिस्मृत्योर्विरोधे श्रुतिर्बलीयसीत्युत्सर्गमात्रम्; तत्तु क्वचिद्बलाबलवैपरीत्यहेतुना अपोद्यते; अत एव तवेदं कृत्वा वेदि'रितिपदार्थधर्मभूतक्रमविषयश्रुतेः "क्षुत आचामे'दितिस्मृतेः धर्मिभूतपदार्थविषयत्वं प्राबल्यकारणमस्तीति बला-बलवैपरीत्यमाश्रितम् । यथोक्तं वार्तिककारैः दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा । तदा हि विपरीतत्वं शिष्टाकोपे यथोदितम् । अत्यन्तबलवन्तोपि पौरजानपदा जनाः । दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः' इति । तद्वदिहापि अव्यवस्थितार्थत्वव्यवस्थितार्थ-त्वरूपमन्यद्बलाबलवैपरीत्यकारणमस्ति । अत एव "यदृचा स्तुवत तदसुरा अन्ववायन् यत्साम्ना स्तुवत तदसुरा नान्ववायन् य एवं विद्वान् यत्साम्ना स्तुवते' इत्यत्र स्तुतिविधिरूपयोरुपक्रमोपसंहारयोः अप्रतिग्रहेष्टिगतयोरिव प्राप्तस्य प्राबल्यदौर्बल्योत्सर्गस्य यदृचा स्तुवत इत्यादिना किमसुरागमनहेतुतया ऋकनिन्द्यते, उत वशीकर्तुमशक्यानामपि वशीकरणहेतुतया ? अव्यवस्थितार्थकत्वात् । कापिलस्मृतेस्तु प्रधानकारणत्वैकविषयतया व्यवस्थिताथर्कत्वात् कापिलस्मृतेरेव प्राबल्यमिति । "वचनविरोध' इति

कापिलस्मृतिवचनविरोध इत्यर्थः । ततश्च वचनस्यैव न्यायाभासमूलत्वाद्वचनविरोधे न्यायस्य दुर्बलत्वादिति कथमुच्यत इति शङ्का

२.१.१

परास्ता । इममर्थमभिप्रेत्या-हेति - इदं वैषम्यमभिप्रेत्य वाक्यद्वयमुपात्तमित्यर्थः । तस्याप्तत्वे प्रमाणमुक्तमिति - "ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति न जायमानं न पश्येत्' इति हिरण्यगर्भस्येव कपिलस्यापि जायमानावस्थाप्रसृतभगवत्कटाक्षलब्धाप्रतिज्ञानाति-शयशालित्वप्रतिपादनादिति भावः । अन्यपरत्वमुक्तमिति - अत एतद्ग्रन्थानुसारादेतदुक्तं भवतीति ग्रन्थावतारिकायामपि साङ्खय-स्मृतीनामन्यपरत्वं किं न स्यादित्याक्षेपोऽपि न निवेशनीयः । साकल्येनानवकाशत्वमिति - यथा "यत्किञ्चित्प्राचीनमग्नीषोमीयाते-नोपांशुचरन्तीति सावकाशादुपांशुत्वविधेः मन्द्रं प्रायणीयायां मन्द्रतरमातिथ्यायाम् इति । प्रायणीयादिगतमन्द्रादिस्वरविधेः अनव-काशत्वेन प्राबल्यं तद्वदिहापिनिरवकाशकपिलस्मृतेः प्राबल्यमिति भावः । तत्र परमकारणभूतस्यैवेति - अग्नीन्द्राद्याराधनात्मनां

कर्मणां भगवदाराधनरूपत्वस्योपपादयिषितस्य भगवतस्सर्वदेवतातादात्म्यमन्तरेणोपपादयितुमशक्यतवात्तादात्म्यस्य कारणत्व-

निर्वाह्यत्वात्तादात्म्यनिर्वाहकं कारण-त्वमुपपादयितुं तन्मुखेन भगवत एव "यतो वा इमानी'त्यादिलक्षणलक्षितब्रह्मत्वं च प्रतिपादयितुं वेदान्तेषु सृष्टेः प्रलयपूर्वकत्वस्य प्रतिपादितत्वात्प्रथमं प्रलयदशामाहेत्यर्थः । सर्वदेवतातादात्म्योपपत्त्यर्थमिति - परमकारणत्वंवक्तुम् इत्यनेनान्वयः । सर्वथा साम्यव्या-वृत्त्यर्थमिति - कतिपयवस्तुविषयत्वेन साम्यव्यावृत्त्यर्थमित्यर्थः । उक्तं हि प्रकृत्यधिकरणे सुषुप्तावे- कदेशलयः । अत्र तु सर्वलय इत्यर्थ इति । सम्प्राप्ते सर्गकाल इति - "क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ' इति श्रीविष्णुपुराण-श्लोकः । लक्षणहेत्वोरिति - आर्जयन् वसतीतिवद्धेतौ शतृप्रत्यय इत्यर्थः ।

आसीदिदं तमोभूतमित्यस्यार्थमाह- पूर्वमविभक्ततमश्शरी-रक इति । व्यञ्जयन्नित्यस्यार्थमाह - व्यष्टिसृष्टीति । महाभूतादिवृत्तौजा इत्यस्यार्थमाह - स्वसङ्कल्पादिति । तमोनुदशब्दार्थमाह -

- विभक्ततमश्शरीरक इति । अत्र भूत्वेत्यध्याहार्यम्, अत्र तमोनुद इत्यत्र अकारादनुपपदात् कर्मोपपदो भवति, विप्रतिषेधेनेति इगुपदइतिकस्य अणाबाधाद्रूपासिद्धि-श्शङ्कनीया, मूलविभुजातित्वात्तत्सिद्धेः । ननु तमोनुद इति क्विबन्तं पञ्चम्यन्तपदम्, ततश्च आसीदिदं तमोभूतमिति पूर्वश्लोके प्रतिपादनात्, यदातमस्तदिति मन्त्रप्रतिपाद्यशिवात्तमोधिष्ठातुः अव्यक्तः प्रादुरासीदित्यर्थः किं न स्यादिति चेन्न; तथापि यस्य तमशश-रीरमित्यादिसुबालोपनिषद्वाक्यपर्यालोचनया भगवत एव तमश्शरीरकत्वेन देवतान्तरस्याप्रतीतेः परस्येष्टासिद्धेः । अव्यक्त इत्यस्या-र्थमाह - अव्यक्तावस्थेति । नन्वव्यक्तशब्दस्य नपुंसकलिङ्गस्य त्रिगुणे रूढत्वेपि पुल्लिङ्गाव्यक्तश-ब्दस्य तदुपस्थापकत्वे किं प्रमाणम्? नहि पङ्कजो वर्तत इत्युक्ते अर्श आद्यजन्ततया पद्मवतः प्रतीतिरस्ति, तं व्यञ्जयन्निति व्यक्तिवा-चिपदसमभिव्याहारादव्यक्तपदेपि व्यक्तयभावरूपार्थस्यैवोन्मेषात् । किञ्च प्रादुरासीदित्यस्य तमोनुद इति सन्निहितेनान्वयसम्भवे व्यव-हितेनाव्यक्त इत्येनेनान्वयस्य क्लिष्टत्वाच्च; ततश्च प्रलयकाले रूपादिहीनतया अव्यक्तः परमात्मा विभक्ततमश्शरीरकः प्रादुरासीदित्यर्थः किं न स्यादिति चेन्न; तस्याप्यर्थस्येष्टत्वेनादोषात् । अतीन्द्रियग्राह्येत्यत्रातिशब्दस्येन्द्रियेणेन्द्रियग्राहेण वा समाससम्भवादुभ- यथाप्याचष्टे - इन्द्रियम-तीत्येत्यादिना । इन्द्रियमतीत्य वर्तमानेनेति - शास्त्रस्येन्द्रियातीतत्वं नाम इन्द्रियक्राह्यक्रहणशक्ति-

मत्त्वमिति भावः । शाब्द-प्राधान्यं चेति - "तस्मिन् जज्ञे स्वयं ब्रह्मा' इत्यत्र ब्रह्मशब्दस्य चतुर्मुखशरीरकभगवत्परत्वस्य तैरनभ्युपगमादिति भावः । अज एको नित्य इतीति - "अज एको नित्यो यस्य पृथिवी शरीरम्' इत्यादि वाक्य इत्यर्थः । अज इति निर्विकारत्वं "यस्याक्षरं शरीरम् यस्य मृत्युश्शरीरम्' इति कारणत्वमन्तर्यामित्वं चोक्तमिति भावः । विशब्दाथर्भूतविशेषं दर्शयति - जीवबुद्धयव्यवधानेनेति । अण्डान्तर्वर्तिपदार्थसृष्टौ तु हिरण्यगर्भादिजीवानां सिसृक्षारूपां बुद्धिमुत्पाद्य तद्द्वारा सृजतीति भावः ।

भूतशब्द सिद्धपर इति - भूमिशब्दो भावप्रधानः, ततश्चातिक्रान्ता सकलेतरप्रमाणसम्भावनाभूमिर्येन सोऽतिक्रान्तप्रत्यक्षादिसकलेत-

२.१.२

रप्रमाणसम्भावनाभूमिः, प्रत्यक्षादिप्रमाणानामविषय इति यावत् । स चासौ भूतार्थश्चेति समास इति भावः ।।

२.१.३

ननु ईश्वरत्वाभ्युपगमस्साङ्खयानामप्यविशिष्ट एव, सेश्वरसाङ्खयानामपि वाक्यात्तन्निराकरणस्यापि पूर्वाधिकरणे कर्तव्य-त्वादित्यस्वरसादाह; भाष्ये-योगस्य चाभिधानादिति । योगशास्त्रे प्रधानप्रतिपाद्यस्य श्वेताश्वेतरादिप्रत्यक्षश्रुतिषु मोक्षोपायतया विधानान्न साङ्खयस्मृतितुल्येति भावः । ननु सृज्यत्वश्रुतिर्ब्रह्मणः क्षेत्रज्ञत्वे कथं प्रमाणमित्याशङ्कयाह - कर्मकृतनामरूपाभ्यामिति । भगवद्वचनेनेति भावः। भगवदंशत्वमिति -शौनकेन प्रदर्शयत इत्यर्थः । स्तम्बस्याप्यकर्मवश्यत्वप्रसङ्गादिति - ननु "आब्रह्मस्तम्ब-पर्यन्ता जगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनित संसारवशवर्तिनः' इति श्लोके आब्रह्मस्तम्बपर्यन्ता इति नैकं पदम्, आङो ब्रह्मस्त-

२.१.३

म्बाभ्यामन्वये वैरूप्यपरिहारार्थमुभयत्राप्येकार्थत्वमाश्रयणीयं स्यात्, किन्तु स्तम्बपर्यन्ता इति पृथक् पदम् । इतरथा पर्यन्तशब्द-वैयर्थ्यप्रसङ्गात्, ततश्च पर्यन्तपदस्वारस्यात्स्तम्बस्य माण्यन्तर्भावेपि न ब्रह्मणोऽन्तर्भावो युक्तः, तत्राङो मर्यादार्थत्व सम्भवदिति चेन्न; अभिविधिसाहचर्यादभिविधित्वोपपत्तेर्वैरूप्याश्रयणस्यान्याय्यत्वादिति भावः । प्रविश्य च तथापूर्वामिति - अपूर्वाभितिछेदः । युक्तावस्थायामिति - योगदशायामित्यर्थः । कार्यस्मृत्यनुपपत्त्येति - महदहङ्कारादिकार्यविषयस्मृतेर्यथा मूलश्रुत्यनुपलम्भादप्रामा-

ण्यम्; एवं कारणप्रधानविषयस्मृतेरपीति सूत्र तात्पर्यार्थः । परैस्तु औपनिषदयोगसापेक्षाच्छ्रुतिसंवादबाहुल्याच्च योगस्मृतिः प्रमाणमि-

२.१.३

त्यधिकाशङ्का युक्तिद्वयेन वर्णिता, तत्र प्रथमयुक्तेर्मोक्षसाधनतया वेदान्तविहितयोगस्य चाभिधानादिति भाष्येणोक्तत्वाद्द्वितीयां संवा-दबाहुल्ययुक्तिमनूद्य दूषयति - अधिकाशङ्कापरिहारौ परैरेवमुक्तावित्यादिना । तत्कारणं साङ्खययोगाधिगम्यमिति - नच साङ्खय-योगशब्दयोः ज्ञानपरत्वं शाङ्करभाष्ये वर्णितमितिवाच्यम्; प्रसिद्धार्थपरित्यागे हेत्वभावादितिभावः ।।

३.अधिकरणम्

शास्त्रस्य व्युत्पत्तिग्रहादिकार्यान्तरसापेक्षत्वादन्यापेक्षत्वं न सम्भवतीत्याशङ्कय व्याचष्टे - प्रमाणान्तरानपेक्षस्येति । प्रमित्यन्तरनैर-पेक्ष्यमिति - समानविषयप्रमित्यन्तरनैरपेक्ष्यमित्यर्थः । प्रमाणव्यवस्थापनमिति - नीलं नभ इति चाक्षु ज्ञानस्य नीरूपाकाशविषयत्वं

वा सामग्रीविषयेण वा निरूपणेनार्थविशेषे प्रमाणं व्यवस्थापयत्तदितिकर्तव्यतारूपमूहापरपर्यायं ज्ञानम्, तद-पेक्षा च सर्वेषां प्रमाणानां समाना; शास्त्रस्य तु विशेषेण आकाङ्क्षासन्निधियोग्यताज्ञानाधीनप्रमाणभावस्य सर्व-त्रैव तर्कानुग्रहापेक्षा; उक्तञ्च मनुना "यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः' इति । तदेव हि तर्कानुगृहीतशास्त्रा-र्थप्रतिष्ठापनं श्रुत्या च "मन्तव्यः' इत्युच्यते । अथोच्येत-श्रुत्या च जगतो ब्रह्मैककारणत्वे निश्चिते सति तत्कार्य-स्यापि जगतश्चैतन्यानुवृत्तिरभ्युपगम्यते । यथा चेतनस्य सुषुप्तिमूर्च्छादिषु चैतन्यानुपलम्भः, तथा घटादिष्वपि सदेव चैतन्यमनुद्भूतम्; अत एव चेतनाचेतनविभाग इति । नैतदुपपद्यते; यतो नित्यानुपलब्धिरसद्भावमेव साधयति, अत एव चैतन्यशक्तियोगोऽपि तेषु निरस्तः । यस्य हि क्वचित्कदाचिदपि यत्कार्यानुपलब्धिः, तस्य तत्कार्यशक्तिं ब्रुवाणो वन्ध्यासुतसमितिषु तज्जननीनां प्रजननशक्तिं ब्रूताम् । किञ्च वेदान्तैर्जगतो ब्रह्मोपादान-ताप्रतिपादननिश्चये सति घटादीनां चैतन्यशक्तेश्चैतन्यस्य वाऽनुभूतस्य सद्भावनिश्चयः, तन्निश्चये सति वेदान्तै-र्जगतो ब्रह्मोपादानताप्रतिपादननिश्चय इतीतरेतराश्रयत्वम्, विलक्षणयोर्हि कार्यकारणभावः प्रतिपादयितुमेव न शक्यते । किं पुनः प्रकृतिविकारयोः सालक्षण्यमभिप्रेतम्, यदभावाज्जगतो ब्रह्मोपादानताप्रतिपादनासम्भवं ब्रूषे ।

३.अधिकरणम्

नास्ति, अपि तु मेघादिविषयत्वमितिव्यवस्थापनमित्यर्थः । श्रेयस्करत्वप्रमितिजनकेति - विशेषरूपत्वेन शीघ्रप्रवृत्ते-ष्टसाधनताप्रमितिसामग्रयवरुद्धवैधहिंसायां बलवदनिष्टसाधनताज्ञानसामग्रीनां शंभत इत्येवं सामग्रीविवेचनमित्यर्थः । अर्थस्वभाव-सामग्रीस्वभावनिरूपणयोर्व्यवस्थितविषयत्वमुक्ता एकैकस्मिन्विषये द्वयोरपि पर्यायेण वृत्तिस्सम्भवतीत्याह -वद्वार्थस्वभाववि-षयनिरूपणं नामेति । स्वप्नमूर्च्छादिष्वनुपलभ्यमान चैतन्यसत्तयावैशेषिकादिभिरनभ्युपेतत्वात्कथं प्रतिबन्दीकरणमित्याशङ्कयाह - वेदान्तिभिनिर्त्यस्येति । वेदान्तप्रामाण्यमभ्युपगच्छतेति साङ्खयेन वेदान्तप्रामाण्यस्याभ्युपेतत्वाज्जगतो वेदान्तप्रतीतब्रह्मोपादान-

२.१.५

कत्वसिध्द्यर्थं चैतन्ययोगोऽङ्गीकार्य इत्याशङ्कयाहेत्यर्थः । द्रव्यत्वावान्तरजातिविशेषस्सालक्षण्यमितीति - द्रव्यत्वसाक्षाद्व्याप्यजात्या उपादानोपादेययोस्सालक्षण्यं विवक्षितमित्यर्थः । ततश्च पिण्डत्वकपालत्वरुचकत्वस्वस्तिकत्वादिना सालक्षण्याभावेपि न दोष इति ध्येयम् । तच्चात्र चेतनत्वमिति आत्मत्वस्य

द्रव्यत्वसाक्षाद्व्याप्यजातित्वादिति भावः । दृश्यते तु चेतनत्वानुवृत्तिरप्यस्तीति - अत्र केचित्, कारणकोटौ विशेष्यभूतस्य ब्रह्मणः कार्यकोटौ विशेषणभूतेष्वतेवचेतनेष्वप्युपादानत्वमुपपादनीयम्, अन्यथा तस्य सर्वोपादा-नत्वा-सिद्धेः, अत एव श्रुतिप्रक्रियायां यद्वा जगत इति निष्कर्षकशब्दः । ब्रह्मशब्दो विशेष्यमात्रपर इत्यादिना कार्यकोटौ विशे-षणभूतस्य जगतः कारणकोटौ विशेष्यभूतब्रह्म प्रति उपादेयत्वशरीरत्वे स्त इत्याचार्यैरेव प्रतिपादितम् । ततश्च तत्र सालक्षणयाभावा-

२.१.७

दुपादानत्वं न सम्भवतीत्याक्षेपस्य चेतनांशे चेतनाशत्वानुवृत्तिरप्यस्तीति परिहारस्यासम्भवादेतत्सूत्रोक्तन्यायेन विलक्षणयोरप्युपा-दानोपादेयभावोऽस्तीत्येव परिहर्तव्यमिति वदन्ति । इति माक्षिकस्येति - मधुन इत्यर्थः । तत्तु क्रिम्यादौ नास्तीत्यर्थः । ननु द्रव्यत्व-साक्षाद्व्याप्यजात्या सालक्षण्यस्य पूर्वं विवक्षितत्वात्तत्र कथं व्यभिचारः प्रदर्शित इति चेन्न; माक्षिकस्य पृथिवीत्वात् क्रिम्यादेश्चेतन-त्वेनात्मत्वात्तदानीमपि व्यभिचार एवेति भावः । किञ्च

पार्थिवेभ्योऽरण्यादिभ्यः वह्नेस्सामुद्रजलात्पार्थिवस्य मुक्ताफलस्योत्पत्ति-दर्शनाद्व्यभिचारस्य तादवस्थ्यमिति द्रष्टव्यम् । असदिति चेन्न प्रतिषेधमात्रत्वात् । भाष्ये - कारणे परस्मिन् ब्रह्मणि कार्यं जगदिति ।

२.१.८

तादात्म्येनेतिशेषः । कारणावस्थायां कार्यं जगत्का-रणात्मना न विद्यत इति असत उत्पत्तिप्रसङ्ग इत्यर्थः । कार्यकारणयोस्सजा-तीयत्वमेवेति - प्रतिषिद्धमितिशेषः । तस्य व्याख्या-नमस्येदमितिप्रत्यभिज्ञानार्हावान्तरजात्या सालक्षण्यनियमः प्रतिषिद्धः, न त्वेकद्रव्यत्वमित्यर्थ इति । अपीतौ तद्वत्प्रसंगादसमञ्जभसम् । भाष्ये - अपीतिपूर्वकसृष्टयादेः प्रदर्शनार्थर्मिति । अत्र केचित् - प्रपञ्च-स्थितिकाले तद्दोषैर्दुष्टत्वेपि तत्प्रलये निर्दोषं कल्याणगुणविशिष्टं ब्रह्मावतिष्ठत इति तद्विषयत्वं वेदान्तवाक्यानामुपपद्यते । चेत्रस्सुखं जीवतीतिवाक्यानामिव व्याध्यादिरहितकालविषयत्वमिति शङ्कानिराकरणार्थमपीताविति प्रत्यस्य सूत्रे विशिष्यग्रहणम् प्रलयेपि भाविकल्पभोग्यफलहेतूनां पाप्मनां सूक्ष्मरूपापन्नेषु जीवेषु सत्त्वावश्यम्भावात्तैर्दुष्टत्वं स्थिति-काल इव प्रलयकालेपि ब्रह्मणः प्रसज्यत इति अपहतपाप्मत्वादिश्रुतीनामसामञ्जस्यमितिभाव इति वदन्ति । मत्वर्थीय प्रत्यय इति - भावप्रधानश्च निर्देश इति भावः । परोक्त-मिति - चेष्टाभोगेन्द्रियाश्रयत्वरूपं तार्किकोक्तं लक्षणत्रयमित्यर्थः । अन्तर्गतत्वमेवोपपादयति सुखदुःखेतीति । भोगाश्रयत्वे इन्द्रि-याश्रयत्वोक्तिरिति - यद्यपि सुखदुःखसाधनेन्द्रियाश्रयत्वमेकं लक्षणं सुखदुःखोपभोगसाधनत्वस्येन्द्रियविशेषणत्वात् तथाप्यर्थात्त-दपि सूचितामित्यभिप्रायः । मुक्तेश्वरशरीरस्येति - मुक्तेश्वरयोश्शरीरासम्भवद्योतनार्थमित्यर्थः । चेष्टाश्रयत्वोक्तिरिति - प्राण-

२.१.८

शरीरसंयोगासमवायिकारणक्रियाया एव चेष्टात्वादिति भावः । भोगायतनत्वं पृथग्दूषयतीति - पूर्वोक्तानि लक्षणानि पूर्वं न दूषि-तानि अपितु तेषां लक्षणानां सामाचीन्यं सिद्धवत्कृत्यैव चिदचितोस्तादृशलक्षणाभावाद्भगवच्छरीरत्वं न सम्भवतीति शरीरत्वमेव दूषितम् । भोगायतनलक्षणे त्वतिव्याप्त्या लक्षणमपि दूष्यत इति वैरूप्यं द्रष्टव्यमिति भावः । असम्भव- माहेति - चेतनेषु शरीरत-याभिमतेषु लक्षणस्याभावमाहेत्यर्थः । न त्वव्याप्त्यतिव्याप्तिसमभिव्याहृतमसम्भवरूपं लक्षणं दूषणमिति मन्तव्यम् । इन्द्रियाधिष्ठाना-वयवनिषेधमुखेनेति - पाण्यादिमत एव शरीरत्वादिति भावः ।। सू नतु दृष्टान्तभावात् । असामञ्जस्यं प्रतिषेधता नेत्यनेनैव हेयसम्ब-न्धगन्धासम्भवस्य सिद्धतया तुशब्दस्य शरीरशरीरिभावसम्भवज्ञापकत्वमेव तुशब्दोत्रेति भाष्येपि विवक्षितमित्यभिप्रेत्याह -

नेतिपदेनैवेत्यादि । केचित्तु "तद्वत्प्रसङ्गादसमञ्जसम्' इति सूत्रेणापुरुषार्थसम्बन्धप्रसङ्गादसामञ्जस्यमिति शङ्कितेनेत्यनेनासामञ्जस्यं

२.१.९

निषिद्धयते, तुशब्देन तद्वत्प्रसङ्गादित्युक्तहेयसम्बन्धगन्धाभावः प्रदर्श्यत इति यथाश्रुतभाष्यमेव समर्थयन्ते - तच्च तल्लक्षणमिति -

२.१.९

प्रवृत्तिनिमित्तभूतं लक्षणमित्यर्थः । अयं भावः, गोर्हि त्रीणि लक्षणानि, गमिकर्तृत्वरूपं व्युत्पत्तिलक्षणमेकं लक्षणम्, गोशब्दप्रवृत्ति-निमित्त गोशब्दप्रवृत्तिनिमित्तगोत्वव्यञ्जकं सास्नादिमत्त्वमेकम्, गोशब्दप्रवृत्तिनिमित्तभूतं गोत्वमेकमिति इह च शरीरशब्दव्युत्पत्ति-निमित्तलक्षणम्, विशरण कर्मफलभोगः इत्यादिकं तु सास्नादिवदुपलक्षणरूपलक्षणं न भवितुमर्हति, सास्नादिव्यङ्गयगोत्वरूपजा-तिवद्भोगेन्द्रियाश्रयत्वादिव्यङ्गयायाश्शरीरत्वजातेरभावादि इतीदमेव प्रवृत्तिनिमित्तभूतं लक्षणमिति पर्यवस्यतीत्यभिप्रेत्य कर्मफलहेतु-रित्यादिकं प्रवृत्तिनिमित्तलक्षणमिति प्रवृत्तिनिमित्तलक्षणत्वेन भाष्येऽनूदितमितिभावः । प्रथमोपात्तमिति - इन्द्रियाश्रयत्वादेर्मुक्त-

२.१.१०

शरीरेषु सम्भवादितिभावः । नन्वाकल्पमिन्द्रियाणामवस्थानात् "तदन्तरप्रतिपत्तौ रहति' इत्यधिकरणे भूतसूक्ष्मेन्द्रियाणामनुवृत्ति-कथनाच्च कथमहल्यादिशरीराणामिन्द्रियाश्रयत्वाभाव इत्याशङ्कयाह - इन्द्रियाश्रयत्वं ज्ञानप्रवृत्तिजननेति । चेष्टेन्द्रियार्थाश्रय इति

अर्थशब्दो भोगपरः । नहि ज्ञानं ज्ञानविशिष्टेनेति - अयमर्थः, यदीयधर्मभूतज्ञानेन यद्धार्यं यन्नियाम्यं च तत्तस्य शरीरमिति विवक्षि-तम् । ततश्च यावइसुस्तं धार्ये यूकादौ गर्भस्थविनष्टजन्तौ वा नातिव्याप्तिः । प्रभाव्यावृत्तिरिति - प्रभायाः प्रभावता नित्यधार्यत्वादिति-

२.१.१२

भावः । मृषावादिपक्षं दूषयति - तर्काप्रतिष्ठानादित्यादिकमिति । व्यपदेशाच्च क्रियायामिति -

अस्यायमर्थः, "विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपिच' इति लौकिकवैदिकक्रियासु कर्तृत्वव्यपदेशाच्च कर्ता जीवः । ननु विज्ञानशब्देन नात्मनो व्यपदेशः, अपि तु अन्तःकरणस्येति चेत्; एवं सति निर्देशविपर्ययः स्यात् बुद्धेः करणत्वात्, विज्ञानेनेतिकरणविभक्तिनिर्देशस्स्यादिति । सूत्रत्रयं परै-स्त्वेवं व्याख्यातमिति - इतरेषां

सूत्राणामत्यन्तवैरूप्याभावान्न तानि दूषितानि, यद्यपि "असदिति चेन्न प्रतिषेधमात्रत्वात्' इति सूत्रे यदि विलक्षणाद्ब्रह्मणो विलक्षणं जगदुत्पद्यते तर्हि प्रागुत्पत्तेः कार्यमसत्स्यादित्यसत्कार्यवादप्रसङ्ग इतिचेन्नैष दोषः । प्रागुत्पत्ते-

२.१.१२

रसदितिवादस्य प्रतिषेधमात्रत्वात्प्रतिषेधस्य प्रतिषेध्य शून्यत्वान्निर्विषयत्वादित्यर्थः । प्रागुत्पत्तेः कार्यमसत्स्यादिति किं कार्यस्य कार-णात्मना सत्त्वं न स्यादित्यापाद्यते, उत कारणात्मतां विहाय स्वातन्त्र्येण? नाद्यः, कारणात्मना सत्त्वस्य प्रागुत्पत्तेरपि सत्त्वात् । न द्वितीयः, स्वातन्त्र्येण सत्त्वस्येदानीमप्यभावात्; अत उत्पत्तेः प्रागसदित्युक्तिरुक्तिमात्रमेव नार्थवतीत्यर्थो वर्णितः । तथापि तस्यार्थ-स्यात्यन्तविरुद्धत्वाभावादुपेक्षितम् । यथा स्वप्नदृगेकस्वप्नदर्शनमायया न संस्पृश्यते, प्रबोधसम्प्रसादयोरनन्यगतत्वात्, एवमवस्थात्र-यसाक्षी एकः, अव्यभिचारी अवस्थात्रयेण व्यभिचारिणा न स्पृश्यते, मायामात्रं ह्येतत् । यत्परमात्मनोऽवस्थात्रयभासनं रज्ज्वा इव सर्पादिभावेनेतिपरभाष्योक्तं दृष्टान्तमर्थतोऽनुवदति - स्वप्नतर्शी च पुरुषः स्वमायया न स्पृश्यत इति । अस्य चायमर्थः, एको जाग-रितसुषुप्त्योरनुवर्तमानः स्वप्नदृक् स्वप्नदर्शनरूपया स्वप्नोपादेयमायया उपादानभूतो यथा न स्पृश्यते, अवस्थान्तरेऽनुवृत्त्यदर्शनात्, एवमु-त्पत्तिस्थितिप्रलयरूपावस्थादर्शी परमात्मापि नावस्थात्रयेण संसृज्यते, अवस्थात्रयस्यापि मिथ्यात्वादिति । इदमस्योपादानमिति - इदमस्य भोगसाधनं मन इन्द्रियादीत्यर्थः । जडत्वानृतत्वपरित्यागाभावादिति - यद्यपि शाङ्करभाष्ये अत्यल्पं चेदमुच्यते, कार्यमपी-तावात्मीयेन धर्मेण कारणं

संसृजेदिति स्थितावपि समानोयं प्रसङ्गः । कार्यकारणयोरनन्यत्वाभ्युपगमात् । "इदं सर्वं यदयमात्मेति' श्रुतिः त्रिष्वपि कालेष्वविशेषेण कार्यकारणानन्यत्वं ग्राह्यते, तत्र यः परिहारः कार्यस्य कार्यधर्माणां चाविद्याध्यारापितत्वान्न तैः कारणं संसृज्यत इति अपीतावपि समान इति अप्ययस्थित्ययोस्साम्यप्रतिपादनात्

कार्यकारणानन्यत्वप्रयुक्तदोषस्योद्भावनीयत्वे स्थूलत्व-

२.१.१२

ह्रस्वत्वादिदोषाणामपि जडत्वानृतत्ववदापादयितुं शक्यत्वात् स्थूलत्वाद्याकारे परित्यक्तेपि जडत्वानृतत्वपरित्यागाभावादितिवैषम्यं किन्निबन्धनम् ? नहि स्थूलत्वादिदशायामैक्यम् अप्ययदशायां जडनैक्यमस्तीति तैरभ्युगतम् येनायं सरम्भस्सफलस्स्यात्, तथाप्य-पीताविति‌सूत्रे अप्ययस्य विशिष्योक्तया तत्र किञ्चिद्वैषम्यं वक्तव्यमित्यभिप्रेत्यैवमुक्तमिति द्रष्टव्यमिति - हस्तिशस्त्रादेरविप्रकर्षादिति - हस्तिशस्त्रादेरपि कायस्य ज्ञानोपादानकस्योपादानादनधिकदेशत्वादितिभावः । वर्तमानाविद्याया आदिमत्त्वं च भवेदिति - पूर्वा-विद्यायाः पूर्वं मुक्तिकाले नष्टत्वादितिभावः । बन्धमोक्षव्यवस्थोक्तिरिति - जीवोपाधिभूतानामविद्यानां नानात्वात् यस्य जीवस्य तत्त्वज्ञानेनाज्ञानं नष्टं तस्य मुक्तिः नान्यस्येति व्यवस्थोक्तिरित्यर्थः । पूर्वोक्तदोष इति - निवृत्ताविद्यानां पुनरुत्पत्तिस्यादित्यर्थः । उपाधिविरह एव भेद इतिचेदिति । यद्यपि निवृत्तोपाधित्वमेव भेद इति चेदिति पूर्वमेव शङ्कितम् तथापि दूषणान्तरदानाय पुनरु-

२.१.१२

पन्यास इति द्रष्टव्यम् । अंशभेदस्याबाध्यत्व इति - उपाधिविरहरूपांशभेदस्य बाध्यत्व इत्यर्थः । क्षणमात्रमपसरणमपीति -मृषा-वादिमतमपरमार्थकञ्चुकाश्रयणादेकां कक्ष्यां सहते, भास्करमतं तु तावदपि न सहत इत्यर्थः । कार्यावस्थायामेवेति - मूलकारण-दशाव्यतिरिक्तदशायामित्यर्थः । आनीदवातमिति "अन प्राणने' आनीदिति सत्त्वलक्षणाननसम्बन्धकथनादितिभावः । विनाश-हेतुवैयर्थ्यप्रसङ्गादिति - प्रलयहेतुभूतसञ्जिहीर्षादिवैयर्थ्यप्रसङ्गादित्यर्थः । तद्वत्प्रसङ्गादसामञ्जस्यमिति - तद्वत्प्रसङ्गात्-शून्यत्व-प्रसङ्गादित्यर्थः । असच्छब्दवाच्यमपीति - कार्यावस्थमित्यनुषज्यते । अधिकरणद्वयेन निर्णीत इति - असदिति चेत् अपीता-

२.१.१३

वित्यधिकरणद्वयेनेत्यर्थः । तदभावस्येति - सत्त्वाभावस्येत्यर्थः ।। एतेन शिष्टापरिग्रहा अपि व्याख्याताः तथा सति हीति-शिष्टाश्च ते अपरिग्रहाश्चेति व्याख्याने पूर्वोक्तप्रधानकारणवादस्यापि शिष्टापरिग्रहससिध्यति । शिष्टैरपरिगृहीता इति व्याख्याने तु वक्ष्यमाणानां वैशेषिकादिमतानामेव शिष्टापरिगृहीतत्वं पूर्वोक्तस्य प्रधानकारणवादस्य तु शिष्टपरिगृहीतत्वमित्येव प्रतीतेरितिभावः । प्रतिबन्द्या समाधत्ते कथं धर्मशास्त्रपरिगृहीतस्येति । ननु मीमांसान्यायविस्तर इति न्यायमतस्य परिगृहीतत्वेपि वैशेषिकमतस्य परिगृहीतत्वं नेत्याशङ्कयाह - नैयायिकोवैशेषिकश्चेति । शङ्कते - कारणत्वस्येति । पर भाष्ये-परमाणुकारणवाद इत्यादिना परमाणुत्वकीर्तने-

२.१.१४

नान्यदपि शङ्काकारणं सूचितम् अल्पाधिकपरिमाणयोर्हि तन्तुपटादिषूपादानोपादेयभावो दृष्टः, नतु वैपरीत्यं दृष्टम् । अतस्त्रिसरेणुप्रभृतिषु पृथिवीलोकादिपर्यन्तेषु कार्येषु परमाणूनामेव कारणत्वं युक्तम्, नतु कार्येभ्योऽधिकपरिमाणस्य प्रधानादेरित्यानन्दगिरिणोक्तमनुवदति - तर्ककुशलताप्र-सिद्धेरिति । ।। इति शिष्टापरिग्रहाधिकरणम् ।।

चरमो विचार इति - न ह वै सशरीरस्येत्यर्थः । न त्वसाधारणतयेति भोक्तृत्वं किं सशरीरत्वप्रयुक्तम्, उत कर्मपारतन्त्र्यप्रयुक्तम् ?

२.१.१४

इति चिन्ताया एव तदधिकरणकृत्यत्वादितिभावः । सूत्रभेदस्त्विति - सम्भोगप्रा-प्तिरित्यस्य भोक्त्रापत्तेरिति सूत्रस्य चेत्यर्थः । मुक्तिपाद इति - भावं जैमिनिरितिसूत्र इति भावः । भाष्ये - प्रचुरदन्दशूक इति । दन्दशूकशब्दो दन्दश्यत इत्यवयवव्युत्पत्त्यादंश-मशकादिपरः, नतु रूढ्या सर्पपर इति द्रष्टव्यम् । भोग्यस्य भोक्तृतापत्तिमिति - एकब्रह्मोपादेयत्वेन भोक्तृभोग्ययोरुपादानभूत

२.१.१४

ब्रह्मानन्यतया भोक्तृभोग्ययोः परस्पराभेदप्रसङ्ग इत्याशङ्कय एकसमुद्रोपादानकतया समुद्रादनन्ययोरपि फेतनारङ्गयोः परस्परभेदवद्भो-क्तृभोग्यव्यवस्थेति परिहृतमित्यर्थः । त्रयाणामपि वाचक इति - कारणान्तर्गतशक्तयविद्योपाध्युपहितस्येति कुदृष्टित्रयाभिहतानां त्रयाणामपि परामर्शादिति भावः ।। ।। इति भोक्त्रापत्यधिकरणम् ।।

२.१.१५

तदसत्त्वमिति सूत्रं शिक्षणीयमिति - न विलक्षणत्वादित्यादिषु प्रपञ्चस्यापि प्रकृतत्वाविशेषेण तच्छब्देन प्रपञ्चस्यापि परामर्शः सम्भवतीति भावः । सन्मात्रस्य कारणादनन्यत्वं स्यादिति - कार्यस्य कारणानन्यत्वं नाम कार्यशब्दोपलक्षितस्य सन्मात्रस्य

२.१.१५

कारणशब्दोपलक्षितत्वात्सन्मात्रादनन्यत्वमिति पर्यवसिताथर् इति भावः । पत्रपुष्पाद्युपादानत्वमिति - शाखागतपत्रपुष्पाद्युपादान-त्वमित्यर्थः । ननु शाखागतपत्रपुष्पाणां चन्द्रगतत्वे प्रमाणाभावात् चन्द्रोपादानकत्वाभावेपि प्रपञ्चस्याविद्यागतत्वमेव न ब्रह्मगतत्व-मित्यत्र प्रमाणाभावात्, प्रत्युत ब्रह्मण एव उपादानत्वग्राहकश्रुतिसत्त्वात् तदुपलक्षितस्य ब्रह्मण उपादानत्वं वक्तुं सुशकमिति चेन्न, ब्रह्मणो निर्विकारत्वश्रुतिबलेन तदसम्भवात् । न च विकारस्यापारमाथिर्कत्वात्तदविरोध इति वाच्यम्; अद्याप्यपारमार्थिकत्वासिद्धे-स्तथा निर्वाहायोगादिति भावः ।

यद्व्यतिरेकेणेति - "भावे चोपलब्धे'रितिसूत्रे भाव इत्येतदुपलब्धेरप्युपलक्षणम्, उपलब्धेरित्येतत् भावस्याप्युपलक्षणम्; तथाच भावे उपलब्धौ च भावदुपलब्धेश्चेत्यर्थः, ततश्च कारणभावे कार्यस्य भावात् कारणोपलब्धौ कार्योप-लब्धेश्च कार्यस्य कारणादनन्यत्वमिति व्याख्यातमित्यर्थः । धूमाग्न्योरिति - अग्निभाव एव धूमस्य भावः । आलोकोपलम्भे सत्येव रूपोपलम्भ इति एकैकसत्त्वेपि धूमस्य अग्न्युपलम्भानुविधाप्युपलम्भविषयत्वाभावात् रूपस्य चालोकसद्भावानुविधायित्वसद्भावाच्च न व्यभिचार इति भावः । जातीयव्यक्तयोरनेकान्तत्वाच्चेति - यद्यपि जात्युपलम्भ एव व्यक्तयुपलम्भ इति न नियमोऽस्ति, दूरत्वादि-

दोषवशेन गोत्वब्राह्मणत्वाद्यग्रहेपि व्यक्तिग्रहणसम्भवात्; तथाप्यसति बाधके तदुपलम्भानुविधाय्युपलम्भवत्त्वमस्तीति भावः । निर-धिष्ठानभ्रमासम्भवनिराकरणेनेति - श्लोकः "स्वरूपानादित्वस्वपरघटने दुर्घटनता प्रवाहानादित्वं पुनरिति चतस्त्रो हि गतयः ।

२.१.१५

असत्या विद्याया वदितुमनवस्थापरिहृतौ मतास्त्वेतास्तुल्याः स्फुटमसदधिष्ठानसरणौ' इति दत्तोत्तरमित्यर्थः । सामान्यरूपमिति - जाति-रूपमित्यर्थः । उपाधिरूपमिति - अर्थक्रियाकारित्वप्रमाविषयत्वतद्योग्यत्वादिरूपमित्यर्थः । तदवस्थतन्त्वादिभाव एव प्रावर-णादिकार्यदर्शनादिति - पटावस्थतन्त्वादित एव प्रावरणादिलक्षणस्य घटकार्यस्य दर्शनात्तन्त्वादिरेव प्रावरणादेः

कारणम्; न तन्त्वादिव्यतिरेकेण पटादिः कश्चिदस्तीत्यर्थः । निर्विषयत्वप्रसङ्गमेवोपपादयति - सद्द्रव्यं हीति । तत्र दूषणमुक्तमिति

२.१.१५

-

सत्यपीत्यादिना सर्वदा कारकव्यापारेण नोपरन्तव्यमित्यन्तेन भाष्येणेत्यर्थः । नहि घटार्थमारोपित इति । ननु वर्णनित्यत्वपक्षे उच्चार-णविशेषाणां वर्णविशेषव्यञ्जकत्वनियमवत्कारकव्यपारेष्वप्यभिव्यङ्गयनियमोपपत्तेः, वर्णनित्यत्वपक्षेपि रविकिरणैर्युगपदभिव्य-ङ्गययोर्नैल्योत्पलत्वयोः प्रदीपप्रभया उत्पलत्वस्यैवाभिव्यक्तिर्न नैल्यस्य, वियति विक्षिप्तकूपजलगतशौक्लयजलत्वयोः रविकिरणैस्स-होपलब्धावपि कूपान्तरावस्थितिसमये रविकिरणैर्जलत्वस्यैवाभिव्यक्तिरित्यादिव्यवस्थादर्शनादवस्थानां प्रतिनियतव्यञ्जकव्यङ्गयत्व-मुपपद्यत इति चेदुच्यते, केयमभिव्यक्तिः ? ज्ञानं चेत्तदा दण्डचक्रादिमेलनस्य घटज्ञानकारणत्वापत्त्या तदपनयनानन्तरं घटज्ञानादयो

न स्युः, आवरणापनयश्चेत् घटसामग्रया किमावरणमपनीयते ? ननु मृदि पूर्वस्थिता पिण्डावस्था, तस्या नित्यमेव स्थिताया

२.१.१५

अपि घटावस्थायाआवरणं तदा आवृतत्वात् सा तदा न प्रतीयते; घटसामग्रया पिण्डावस्थोपमर्दे सति तिलपीडनेन तैलमिव अवघातेन तण्डुल इव दोहनेनपय इव खननेन कूपजलमिव प्रक्षालनेन पटशौक्लयमिव प्रतीयते । न च तथासति मुद्गरपातानन्तरमपि घटावस्थायाः प्रतीतिप्रसङ्गः, तदावरणभूतायाः पिण्डावस्थाया अपि तिरोहितत्वादिति वाच्यम्, मुद्गरपाताभिव्यक्तायाः कपालत्वावस्थायास्तदावर-णत्वात् । कारणेऽभिव्यक्तायाः कस्याश्चित्कार्यावस्थायास्तद्गतसकलकार्यावस्थान्तरावरणत्वाभ्युपगमात् । नच तथा सति कपालेषु कदादिद्घटकारणमेलने सति घटावस्थाभिव्यक्तिप्रसङ्गः, इष्टापत्तेः । कपालानि चूर्णीकृत्य जलमृदन्तरसंयोजनमर्दनव्यापारैर्मार्दवं प्रापय्य दण्डचक्रादिमेलने घटावस्थाभिव्यक्तिदर्शनात् । नच दग्धपटानां पुनः पटभावो न दृश्यत इति वाच्यम्, तद्भस्मनां क्षितितल-पतितानां क्षितिप्ररूढकार्पासतरुफलपरिणतौ क्रमेण तेषां पटभावोपपत्तेः । न च तन्त्ववस्थायाः पटवस्थावरणत्वस्य वक्तव्यत्वाद्विरल-तन्त्वारब्धपटे तत्तिरोधानशङ्कानास्पदे पटावस्थाभिव्यक्तिर्न स्यादिति वाच्यम्; फलबलेन कुविन्दकृतसंयोगविशेषरहिततन्त्ववस्थाया-स्तदावारकत्वकल्पनात्, तस्मादविशेषिता विशेषिता वा पूर्वकार्यावस्थैव घटपटाद्यवस्थानामावरणमिति, नैतद्युक्तम्; तथा परिणाह-शालिनी पटावस्था कुविन्दव्यापारात्प्रागपि यथादृष्टेन स्थूलेनैव रूपेण सती तन्तुत्वेनाव्रियते, उत कूर्माङ्गवत्सङ्कुचितेन

रूपेण सती ? नाद्यः यथा दृष्टरूपायाः पटावस्थायास्तन्तुषु कुविन्दव्यापारात्प्राग्व्यस्तेषु समस्तेषु वा विप्रकीर्णेषु संहतेषु वा पर्याप्त्यवृत्त्यसम्भवात् । न द्वितीयः, यथा दृष्टपटावस्थायाः आगन्तुकत्वापरिहारात् । न च वाच्यमनादिरेव सा पटावस्था अद्यतनेषु तन्तुषु न वर्तते, किन्तु

मूलकारण इति; तथा सति यत्रेदानीं भविष्यत्पटप्रादुर्भावप्रदेशे तन्तवो न सन्ति, तत्रावरणाभावेन तदभिव्यक्तिप्रसङ्गात् । न च तत्र

२.१.१५

या काचन कार्याव-स्थाऽस्ति सैवावरणं स्यादिति वाच्यम्; तस्याः कुविन्दव्यापारानन्तरमपि सर्वत्रावर्जनीयत्वेन सवर्दा पटानभि-व्यक्तिप्रसङ्गः, तस्मात् कार्याणि सर्वाण्यपि सादीन्येवेति भावः।

मिथ्यात्वे हेत्वन्तरमिति - मिथ्यात्वं तु सदसद्विलक्षणत्वादन्यज्ज्ञाननिवर्त्त्यत्वादिकमितिभावः । व्यतिरेकिणं हेतुमाहेति उप-

२.१.१५

लब्धिविनाशयोगित्वलक्षणं व्यतिरेकिहेतुमाहेत्यर्थः । पक्षेपि साधितत्वेनेति - प्रतिपन्नोपाधौ बाधितत्वरूपो बाधः उपाधेः पक्षवृत्तित्वेन साधव्यापकत्वादितिभावः । उपसंहारादितात्पर्यलिङ्गस्य प्रागनुक्तया यथोक्तशब्देन परामर्शो न सम्भवतीत्यस्वरसादाह - यद्वा

किंशब्दत इति । यद्यपि नचागमावगतार्थस्य प्रत्यक्षविरोधः शङ्कनीय इति ग्रन्थस्योपरि किंशब्दतः प्रतीत्यभावादितिपक्षस्य नोत्थितिः सम्भवति, तथापि सम्भावनामात्रेणैवमुक्तमितिद्रष्टव्यम् । जीवाज्ञानपक्षमिति - "तदधीनत्वा-दर्थवत्' इतिसूत्रे अविद्यात्मिका सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी सूषुप्तिः, इतिशाङ्करभाष्यं व्याचक्षाणेन वाचस्पतिना जीवाधिकरणाप्यविद्या-

२.१.१५

निमित्ततया विषयतया वेश्वरमाश्रयत इति ईश्वराश्रयेत्युच्यते, न त्वाधारतया विद्यास्वरूपे ब्रह्मणि तदनुपपत्तेरितिप्रतिपादनात्, तत्रैव न वयं प्रधानवदविद्यां सर्वजीवेषु एकामाचक्ष्महे; येनैवमुपलभ्येमहि, किन्त्विवयं प्रतिजीवं भिद्यते, तेन यस्यैव जीवस्य विद्यो-

त्पद्यते तस्यैव साऽविद्यापनीयते, न जीवान्तरस्य, भिन्नाधिकरणयोः विद्याविद्ययोरविरोधात् तत्कुतः समस्तसंसारोच्छेदप्रसङ्गः, न चाविद्योपाधिभेदाधीनः जीवभेदः जीवभेदाधीनोऽविद्याभेद इति परस्पराश्रयादुभयासिद्धिरपि साम्प्रतम् । अनादित्वाद्बीजाङ्कुरादि-वदुभयसिद्धेः, अविद्यात्वमात्रेण एकत्वव्यवहार इति प्रतिपादनात् तथा "ज्योतिरुपक्रमा' दिति सूत्रे "यो योनिंयोनि'मितिवीप्सावशा-द्योनिशब्दिताविद्या प्रतिजीवं भिद्यत इति वाचस्पतिनोक्तेश्च वाचस्पत्यभिमतं जीवाज्ञानपक्षमुपन्यस्यतीत्यर्थः । अविद्याश्रयत्वोपपत्ते-रित्यन्तभाष्यस्यैव एतावानर्थ इति भावः । काल्पनिकत्वोपपत्तिरित्यस्य जन्मजरामर-णादिकाल्पनिकत्वपरतयोत्तरत्र व्याख्यास्य-मानत्वादिति द्रष्टव्यम् । अशुद्धिविषयभ्रमेणेति - शुद्धस्याविद्याश्रयत्वासम्भवादशुद्धय-धीनापि अविद्या अविद्याधीना च अशु-द्धिरित्यर्थः । भेदवादेप्यकौशलं विवक्षितमिति - सबहुमानावलोकनकर्त्तृणामित्यर्थः । उभयतोपि भ्रष्टैरिति - मतान्तरस्थस्य

२.१.१५

मतान्तरस्थबहुमानलिप्सया उभयतो भ्रष्टत्वावश्यम्भावादित्यर्थः । भाष्ये-आगतोसि मदीयं मार्गमिति । ब्रह्माज्ञानवादमित्यर्थः । या जीवभेदकल्पिकेति - बद्धमुक्तव्यवस्थाहेतुतया जीवाश्रयतया च या अविद्याः सम्प्रतिपन्नास्तासामेव जीवभेदकल्पकत्वमस्तीतिपक्षम-नूद्य तत्कल्पकस्य तदाश्रयत्वासम्भवादिति पूर्वोक्तदूषणेनैव दूषयतीत्यर्थः । ततश्च पूर्वदूषणे जाग्रति कथं पक्षान्तरोपन्यास इति न

चोदनीयम् । यद्यप्यत्र कल्पिका अविद्या इतिबहुश आवृत्त्या पठ्यते तस्य च निर्वाहःसम्भवति तथापि कल्पिकाविद्येति एवमित्वरहित पाठ एव समीचीनः लेखकदोषादन्यथापाठ इति द्रष्टव्यम् । पूर्वपूर्वजीवभावाश्रयाविद्येति-पूर्वपूर्वजीवभावः आश्रयो निमित्तं यस्या

इति बहुव्रीहिः,भ्रमाश्रय इत्यर्थ इति रजतकल्पकत्वं रजतभ्रान्त्याश्रयत्वमिति जीवकल्पकत्वमपि जीवविषयभ्रमाश्रयत्वमिति भावः । स्वेनैव सापेक्षत्वादिति - स्वस्यैव सापेक्षत्वे आत्माश्रयत्वमित्यर्थः । एतद्विभागहेतुरिति - सर्वज्ञस्यापि तस्यमायिनं त्विति मायि-

त्वावेदनान्मायाविद्ययोर्भेदोऽस्तीतिप्रतिपादनादितिभावः । तस्याश्चापरमार्थत्वादिति - मायायाः इच्छाधीनदर्शनानुपपत्तेरपरमार्थ-

त्वाच्चाविद्याकृतमेव तद्दर्शनमित्यर्थः । वक्ष्यमाणानुमानगर्भमिति - बन्धमोक्षव्यवस्था स्वपरव्यवस्थाश्च स्वाविद्याकल्पिता इत्यादि-

वक्ष्यमाणानुमानैः काल्पनिकत्वस्य सिद्धिं मनसि निधायाहेत्यर्थः । तञ्च भेदवादिनञ्चेति - जीवाज्ञानवादिमते शरीराणां भिन्नभिन्न-जीवैरात्मवत्ताया मायैवात्मवन्तीत्यनभ्युपगमादितिभावः । नच प्रथमतृतीययोरप्यनुमानयो-र्भेदवादिनिरासकत्वं किं नस्यादिति

वाच्यम्; तन्मते अपारमार्थिकत्वात्कल्पितत्वादितिहेतोः असम्प्रतिपन्नत्वादिति द्रष्टव्यम् । सोपाधिकत्वकालात्ययापदिष्टत्वेति - प्रतिपन्नोपाधौ निषेधेन मिथ्यात्वसाधकव्यावर्तमानत्वहेतोः सोपाधिकत्वं मिथ्यात्वस्य प्रत्यक्षादिभिर्बाधः । ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वे साध्ये मिथ्यात्वस्य मिथ्यात्वसाधनाद्व्याहतिः । ब्रह्मणो व्यावर्तमानाद्व्यावर्तमानतया अनैकान्त्यमित्यादिदूषणानि द्रष्टव्यानि ।

यदि बाधमात्रमेव हेतुरिति - यदि बाधमात्रमेवोपाधिरित्यर्थः । यथा दुर्दिने सायङ्कालभ्र-मान्वित इति । ननु दुर्दिने सायङ्कालभ्रम-

स्थले दुर्दिन रूपकालस्यैवोपाधिशब्दवाच्याधिष्ठानत्वाद्देशकालयोरुपाधित्वव्यभिचारस्य नेदमुदाहरणमिति चेत्, सत्यम्; अध्यस्य-मानकालव्यतिरिक्तस्यैवोपोधित्वमिति तात्पर्यात् । देशभ्रमे काल उपाधिरिति - सायङ्काले काञ्चीदेशं प्राप्त इति काल उपाधिः ।

२.१.१५

काञ्च्यां सायङ्कालः संवृत्त इति देश उपाधिरिति द्रष्टव्यम् । प्रमाणमुक्तमिति - अबाधितं दृश्यमानमिति भाष्येण प्रत्यक्षं प्रमाणमुक्तमित्यर्थः । सा प्रतीतिर्मिथ्या चेदिति - सा प्रतीतिः भ्रान्तिश्चेदित्यर्थः । भ्रान्तिजनकत्वपक्षेऽपि कायर्कारणभावः सिद्ध एवेति दूषणे सत्येव दूषणान्तरमाह - बाध एव इति ।

भाष्ये-स्वस्तिकाश्रयतया हेम्नोऽप्यनुवृत्तेरविरुद्धेति । ननु कथमाश्रयभूतस्य हेम्न आश्रितस्य स्वस्तिकस्य च अभेदः । तत् कथं स्व-स्तिकहेमैक्यप्रतीतिर्घटतामिति चेन्न, गोत्वस्य हेम्नः ? स्वस्तिकावयवरूपत्वेपि द्रव्यत्वादिवत् अपृथक्सिद्धतया ? सत्त्वेन स्वस्तिकं द्रव्यमितिवद्धेमेति प्रतीतौ विरोधाभावादित्यत्र तात्पर्यात् । न हि परशरीरगत आत्मेति - अपरोक्षत्वे च चेष्टादिभिरनुमीयमानत्वं

२.१.१५

न स्यादिति भावः । ननु चेतनादन्यस्य जडत्वदर्शनात् सर्वचेतनानामनन्यत्वमित्यस्य प्रागुक्तत्वात् यच्चो-क्तमिति भाष्यं न सम्भवती-त्याशङ्कयाह - सर्वं चेतनजातमहमेवेत्यादिना । अनिष्टप्रसङ्गमाहेति - मोक्षार्थश्रवणार्थप्रयत्ने अविद्याकायर्त्वस्योभयवादिसम्प्रति-पन्नत्वेन हेतुविधयानुमानरूपत्वाभावात् तर्करूपत्वं वाच्यमिति भावः । अभाविन्येव सा पश्चादिति - यदि इतः पूर्वं कस्यापि मुक्ति-र्नास्ति, केषाञ्चिन्मुक्तत्वप्रतिपादिकापि श्रुतिः स्वप्नवाक्यतुल्येत्युच्येत, तर्हि इतः परमपि कस्यापि मुक्तिर्न स्यात् प्रतिपादिकाश्रुतिः

२.१.१५

स्वप्नवाक्यतुल्येत्यर्थः । यद्वा निर्विशेषज्ञानस्येति पूवर्स्मिन् पक्षे निर्विशेषज्ञानस्य ज्ञातृत्वज्ञानगतत्वयोरभावाच्च न प्रतीतिभासव्यव-हारौ प्रतिहेतुत्वमित्युक्तम् । द्वितीये तु प्रतीयमानतयाप्रकारान्तरेण वा न हेतुत्वमुच्यत इति भिदा । पारमार्थिकापारमार्थिक-

२.१.१५

शब्दाविति - प्रतिभासव्यवहारादेः पारमार्थिकत्वापारमार्थिर्कत्वयोर्विषयाधीनत्वादिति भावः । तथात्वेन तेषामानन्त्य-

२.१.१५

मिति - न्यूनाधिकभावेनानन्त्यमित्यर्थः । अत्र केचित्-दशघटाः सहस्रं माषा इति सङ्खयावत्त्वं दृश्यत इत्यानन्त्याक्षेपभाष्यस्य आनन्त्यं दर्शयितुमिति तात्पर्यवर्णनमयुक्तमिति वदन्ति । दश घटाः सहस्रं माषा इत्युक्तमिति - न त्वैकरूप्येण दश घटा दश

२.१.१५

माषा इति वा सहस्रं घटा सहस्रं माषा इति वा उक्तमित्यर्थः । सिद्धान्ते- प्रतिजानतोऽभिप्रायमिति । ध्यानस्य विवक्षितत्वात् "सम्प्रतिभ्यामनाध्यान' इति नात्मनेपदम् । ननु भाष्ये-वाचेत्यस्य वाक्पूर्वकेण व्यवहारेणेत्यर्थः कथं

वर्णितं इत्याशङ्कयाह - अजहल्लक्षणेयमिति । उभयोरपि हेतुत्वायेति - वाक्शब्दिताभिलपनस्य नामधेयप्रयोजनत्वेऽपि विकारप्रयोजनत्वाभावात् अज-

हल्लक्षणया व्यवहारपरामर्शीति भावः । जात्युक्तिरिति । श्लों "धर्मस्य तदतद्रूपविकल्पानुपपतः । धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमा भवेत्' इति तल्लक्षणम् । अवस्थैवोत्पत्तिरित्यभ्युपगमादिति । ननु घटत्वावस्थावस्थाया एवोत्पत्तिरूपत्वे यावद्घटावस्थत्वमुत्पद्यत

इति व्यवहारः स्यात्, न तुत्पन्न इति उत्पत्तेरनतीतत्वान्मृत्पिण्डोनश्यतीति च स्यात्, न तु नष्टः इति नाशस्यानतीतत्वादिति चेन्न;

घटत्वावस्थागताऽद्यक्षणसम्बन्धः घटत्वावस्थस्योत्पत्तिः पूर्वावस्थस्य नाश इत्यभ्युपगमेनादोषात् । ननु यस्यागन्तुकत्वमाद्यक्षणस-म्बन्धश्च न तस्योत्पत्तिः, यस्य च द्रव्यस्य नागन्तुकत्वं नाद्यक्षणसम्बन्धश्च तस्योत्पत्तिः लोकविरुद्धा काचन परिभाषा कृता स्यादिति चेन्न; श्रुतियुक्तयनुसारिण्या ईदृश्याः परिभाषाया एव शोभनत्वात् । पृथगुत्पत्तिनिरपेक्षा इति । ननु "छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति छन्दांसि जज्ञिरे तस्मात्' इत्यादीनां गुणक्रियोत्पत्तिप्रतिपादकानां नामरूपव्याकरणप्रतिपादकश्रुतीनां
गुणक्रियाद्युत्पत्तिग्राहिसर्वलोकप्रत्यक्षादिप्रमाणानां च विरोधप्रसङ्गात्, अन्ततो गत्वा सर्वस्यापि ब्रह्मापृथक्सिद्धतया पृथक्स्थिति-प्रतिपत्तिकार्यानर्हत्वेन ब्रह्मव्यतिरिक्तस्यापि उत्पत्त्यभावप्रसङ्गेन सर्वप्रमाणसङ्क्षोभापत्तेः । न च ब्रह्मापृऽथक्सिद्धस्य द्रव्यस्योत्पत्ति-सम्भवेपि द्रव्यभिन्नस्योत्पत्तिर्नास्तीति वाच्यम्;
विनिगमकाभावात्सर्वप्रकरणविरोधस्याविशिष्टत्वादिति चेत्, सत्यम् न द्रव्यव्यतिरि-
क्तानामागन्तुकधर्माणामुत्पत्तिरपलपितुं शक्यते । अभूत्वा भवनरूपोत्पत्तेर्लोकवेदसिद्धतया अपलपितुमशक्यत्वात् । अपि तु द्रव्ये तादृशोत्पत्तिर्नाभ्युपगन्तुं शक्यते । यदि वैशेषिकादिरीत्या मृदादिव्यतिरिक्तं तदुत्पाद्यद्रव्यान्तरमभ्युपेयते तदा कारणगुणप्रक्रमेण तस्य गुरुत्वान्तराधिकरणतया गुरुत्वद्वैगुण्यमुपलभ्येत । अपि च महति कनकसूत्रे कालायसृङ्खले वा लोहकारैः सङ्ग्रथ्यमाने तत्रान्त-राकण्डसूत्राणि खण्डृङ्खलानिच जायन्त इत्यभ्युपगन्तव्यम्, अन्यथा किञ्चिद्ग्रथनानन्तरमुपरि सूत्रृङ्खलग्रथने परित्यक्ते सति

ग्रथितभागे सूत्रृङ्खलव्यवहारो न स्यात् महासूत्रृङ्खलग्रथनानन्तरं खण्डिते तस्मिन् सूत्रृङ्खलव्यवहारश्च न स्यात् । एवञ्च यत्रो-पर्युपरि खण्डसूत्रृङ्खलग्रथनक्रमेण महासूत्रृङ्खलग्रथनं समापितम्, तत्र खण्डसूत्रृङ्खलवृन्दारब्धं महासूत्रृङ्खलमभ्युपगम्येत । तत्र

सूत्रृङ्खलनिर्माणार्थं यावत्सु वर्णकालायसं लोहकारहस्ते दत्तम् । तावत उपादानस्य गुरुत्वं तदारब्धखण्डसूत्रृङ्खलानां गुरुत्वानि तदारब्धमहासूत्रृङ्खलानां प्रत्येकं गुरुत्वानि तदारब्धमहासूत्रृङ्खलगुरुत्वं चेत्यतिमहत्तरं गुरुत्वमापद्येत, तस्मान्मृत्पिण्डखण्डसूत्र ृङ्खल व्यतिरिक्तं घटशरावमहासूत्रृङ्खलं तत्त्वतो नास्तीत्येवाभ्युपगन्तव्यम्, किञ्च उभयसम्प्रतिपन्नावस्थयैवोपपत्तौ अवस्थान्तरवतो द्रव्यान्तरस्याप्युत्पत्तिकल्पने गौरवात् । पूर्वाह्ने मृत्पिण्डात्मना स्थितैव मृत् अपराह्ने घटाद्यात्मतां भजत इत्यबाधितप्रत्यभिज्ञासिद्ध-त्वाच्चासतो द्रव्यस्योत्पत्तिर्नास्ति । तत्रोत्पत्तिवादास्तु अवस्थामात्रनिबन्धना इत्यत्रैव नः संरम्भ इति न कश्चिद्दोषः ।

सद्वारकत्वा-दविरोध इति - एकस्मिन् ब्रह्मण्यनेकत्वावस्थायाः सद्वारकत्वादितिभावः । तन्त्वादिसाधारणं पारमार्थिकं च परि-हारमाह - काल-भेदाच्चाविरोध इति । ननु विरलतन्त्वारब्धपटे एकस्मिन्नेव काले कथमेकत्वानेकत्वयोर्युगपदुपलम्भः ? एकस्मिन् धर्मिणि विरुद्धधर्मद्वयासम्भवादिति चेन्न, एकस्मिन्नेव वृक्षे मूलाद्यवच्छेदकभेदेन संयोगतदभावसत्त्ववत्कुविन्दकारितसंयोगविशेषा-वच्छेदेन तन्तुषु पटत्वमेकत्वं च तन्तुत्वावच्छेदेनानेकत्वं चेत्युपपत्तेः । ननु कुविन्दकारितसंयोगाः तन्तुत्वसङ्कीर्णा एवेति कथं विरु-द्धधर्मावच्छेदक-त्वमिति चेन्न; एकस्मिन्नेव वह्नौ आर्द्रेन्धनप्रभववह्नित्वावच्छेदेन व्याप्तेः, सदसङ्कीर्ण वह्नित्वावच्छेदेन व्याप्यमानस्य च, आर्देन्धनप्रभव वह्नित्वावच्छेदेन व्याप्यत्वावच्छेदकत्वति वह्नित्वे अविशेषितवह्नित्वत्वावच्छेदेन व्याप्यतावच्छेदकत्वाभावस्य न वृत्त्यभ्युपगमात् । एवं कार्यकारणानन्यत्ववादेपि एकस्मिन्नेव द्रव्ये तन्तुत्वावस्थाप्रापकसंयोगविशेषावच्छेदेन तन्तुत्वं तन्तुत्वावच्छे-देनन अनैकत्वं च पटत्वप्रापकतन्तुसंयोगविशेषावच्छेदेन पटत्वं तदवच्छेदनैकत्वं चेति पटत्वतन्तुत्वयोरेकत्वानेकत्वयोश्च समावेशो-पपत्तेनर् कश्चिद्दोषः एवम् । उपादानोपादेययोः तृणच्छदिषोरिष्टकाप्राकारयोश्चानन्यत्वेपि तृणत्वच्छदिष्ट्वादिसमावेशे अविरोधो द्रष्टव्यः । इयांस्तु विशेषः, छदिषि तृणानां तदीयतनुत्वाद्याकारस्य प्राकारे इष्टकानां चतुरत्वाद्याकारस्यानुपलम्भः, विरलतन्त्वारब्धे तूपलम्भ इति ।

भाष्ये-स एवेदमिदानीमिति । अत्र वक्तव्यं प्रथमसूत्र एवोक्तम् । सदेव एकमेवाद्वितीयमिति वाक्यस्य सजातीयविजातीयस्वगत-भेदनिषेधः क्रियत इति मते अनुपपत्तिमाह - नहि सजातीयेति । कार्यकारणयोरनन्यत्वं च लब्धमित्याह-आत्मनो बहुभवनं सङ्क-ल्प्येतेति पाठश्चेत्समीचीनः शङ्काविशेषव्युदासकत्वादिति । ननु सेयं देवतेति उत्तरश्रुतिसन्दर्भस्य व्यष्टिप्रतिपादनमुखेन निखिलज-गदुपादानत्वप्रतिपादनद्वारा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानिर्वहणार्थप्रवृत्तितया कथं पूर्वसन्दर्भप्रतिपादितार्थशङ्काविशेषव्युदासकत्व-मितिचेत्-सत्यम्; तस्यापि सम्भवतस्त्यागायोगादितिभावः । चेतनांशैक्यानुपपत्तिमभिप्रयन्नाह -नामरूपविभागाभावेनैकत्व-मितीति । सच्छब्दस्य जगत्परत्वे तदैक्षतेत्यादिभिर्विरोध इत्यभिप्रयन्नाह-बहुभवनसङ्कल्परूपेक्षणमिति पाठश्चेत्समीचीनः । स तु

२.१.१५

कारणावस्थायामेकत्वादिति - शरीरशरीरिभावस्य भेदगर्भत्वादिति भावः । शक्तौ हस्तिकवाटयोरित्यादि-हस्तिकवाटयोरुप-

२.१.१५

पदयोः शक्तौ गम्यमानायां "हन्तेष्ठक्' हस्तिघ्नो भटः, हस्तिनं हन्तुं शक्य इत्यर्थः । एवं कवाटघ्नश्चोर इत्यपि द्रष्टव्यम् । "शकि लिङ् च' शक्तयर्थोपाधिकार्थवृत्तेर्धातोर्लिङ् च, चकारात्कृत्याश्च, भवान् खलु भारं वहेत् भवता खलु भारो वोढव्यः, वोढुं शक्य इत्यर्थः । कृत्प्रत्ययान्तराणामिति - अन्तरशब्दो विशेषवाची । कृत्प्रत्ययविशेषाणाम्-कृत्यत्प्रत्ययाणामित्यर्थः । कृत्याश्चेत्यनुवृत्तेः । भाष्ये-पाचकादिष्वगत्येति । कदापि पाकमकुर्वति शक्तिमात्रेण यत्र पाचकशब्दः प्रयुज्यते तत्र पाचकशब्दस्य लक्षणेत्यर्थः, नतु तादात्विकपाकाभावमात्रेण पाचकशब्दस्य लक्षणेति मन्तव्यम् । तृजादिषु वर्तमानकालोपा-दानमध्यापकवेदाध्ययनार्थमिति वार्तिकेन पूर्वपक्षं कृत्वा न वा कालमात्रे दर्शनादन्येषामिति वार्तिकेन धात्वर्थस्य वर्तमानत्वाभावेपि ण्वुलादिप्रत्ययसाधुत्वस्य समर्थितत्वादिति द्रष्टव्यम् । नचैवं सुप्ते शास्त्रज्ञादिशब्दमुख्यत्ववत्सुप्तिस्थानीयप्रलयदशापन्ने सन्मात्रब्रह्मणिसर्वज्ञादिशब्दस्य सार्वदिकज्ञानाभावेपि साधुत्वसम्भवात् ज्ञानस्य नित्यत्वं न सिध्येत् । नहि यश्शास्त्रज्ञस्तमानयेत्युक्ते शास्त्रज्ञानस्य नित्यत्वमस्ति, न वा तद्दशायां ज्ञान-

२.१.१६

मस्तीति वाच्यम्; "स्वाभाविकी ज्ञानबलक्रिया च' इत्यत्र भावार्थल्युडन्तज्ञानादि-शब्दस्य शक्तय-र्थत्वाभावेन लक्षणत्वावश्यम्भावादिति भावः । यद्वा अध्येष्यमाणशास्त्रेऽधीतविस्मृतशास्त्रे वा शास्त्रज्ञं इति प्रयोगा-भावेन शास्त्रज्ञादि-शब्दस्य वस्तुतो वर्तमानविषयत्वमेव सुषुप्तादौ तत्प्रयोगश्च वर्तमानत्वोपचाराल्लक्षणया, अत एवोत्सृष्टसृजि पुरुषे स्रग्विशब्दस्य व्यव-हाराभावात् अकुर्वति मृत्पिण्डे कार्यजननिमित्तस्य कारणशब्दस्य न मुख्यत्वं तदा तत्प्रयोगस्तु लाक्षणिक इति मीमांसकोक्तेरकुर्व-द्दशायां पाचकशब्दो लाक्षणिक एव । न चेह तथाश्रयणं युक्तम्, मुख्यार्थत्वे सम्भवत्युपचारस्य अन्याय्यत्वादिति भावः । काशस्य कुशत्वेन कुशस्थानेवलम्बनमिति - यद्यपि काशस्य कुशस्यावलम्बनं काशकुशावलम्बनम् तथापि प्रकृते अस्यार्थस्य उचितत्वादेवमुक्तमिति द्रष्टव्यम् । प्रत्यभिज्ञाप्रत्यक्षसिद्धानन्यत्वमिति - प्रत्यभिज्ञारूपप्रत्यक्षसिद्धानन्यत्वमित्यर्थः ।। सामा-नाधिकरण्येन प्रत्यभिज्ञानस्याभिमतत्वे युक्तिमाह - समवायिकारणानुवृत्तिमिति । स्वपक्षासाधकत्वादिति विद्धान्तसाधकत्वादि-

२.१.१७

त्यर्थः । नहि घटस्थे जल इति - यद्यपि हिरण्यत्वस्य पृथिवीत्वादिवत्कुड्यावयवे कुण्डले च सत्त्वाभ्युपगमेन कुण्डलं हिरण्यमिति नोपादानोपादेया भेदसाधिका, तथापि पिण्डावस्थं तदेव हिरण्यं कुण्डलमभवदिति प्रत्यभिज्ञाया अस्मिन्सूत्रे अभेदसाधकत्वेन विवक्षितत्वादितिभावः ।। सोयमितिज्ञानं प्रत्यभिज्ञेति - प्रत्यभिज्ञा हि द्विविधा, तदर्थविशेष्यका इदमर्थविशेषणिका इदमर्थविशे-ष्यका तदर्थविशेषणिका च, यदा संस्कारस्य प्राधान्यमिन्द्रियस्योपसर्जनत्वं तदा तदर्थविशेष्यकत्वम्, इन्द्रियस्य तु प्राधान्ये इदमर्ध-विशेष्यकत्वं तदर्थविशेषणकत्वं च; ततश्च पूर्वसूत्रे तदेव हिरण्यं कुण्डलमभवदिति प्रत्यभिज्ञायाः प्रमाणतयोपादानात्तदर्थविशेष्य-

२.१.१८

कत्वम् । अस्मिंस्तु सूत्रे "सदेव सोम्येद'मिति श्रुत्यर्थस्य विवक्षितत्वात् इदमर्थस्य विशेष्यत्वं सद्रूपतापत्तेर्विशेषणत्वमिति मतमाश्रि-त्यैवमुक्तमिति द्रष्टव्यम् । सोयमिति या प्रत्यभिज्ञा सा पूर्वोक्ता, अयं स इति या प्रत्यभिज्ञा सा अत्रोच्यते इति पाठश्चेत्समीचीनः । अयं स इति ज्ञानमभिज्ञा सा अत्रोच्यत इति पाठे तु न समीचीन्यम्, अत एवायं स इति विपरीतप्रत्यभिज्ञेति सर्वार्थसिद्धौ व्यवहृतम् । श्रुतिसिद्धमिति - वाचारम्भणमितिश्रुतिसिद्धमित्यर्थः । यद्यपि ज्ञानव्यपदेशभेदेन पूर्वोत्तरसूत्रयोर्भिदा पूर्वमेव वर्णिता, तथापीति ज्ञानव्यपदेशयोः श्रुतिसिद्धत्वलोकसिद्धत्वरूपविशेषणान्तरमप्यस्तीति प्रदर्श्यत इति द्रष्टव्यम् । प्रदेशेषु निर्वाहमाह, तदैकार्थ्यादिति-ग्रन्थस्यानन्तरं युक्तेश्चेतीति प्रतीकोपादानं दृश्यते, न तस्य प्रयोजनं पश्यामः । कालविशेषविशिष्टदेशविशेषत्वमिति - यस्मिन् देशे यस्मिन् काले परैघर्टाभावोभ्युपगम्यते, तत्कालविशिष्टदेशविशेषत्वमेव घटात्यन्ताभाव इत्यर्थः । अल्पत्वविशेषितदेशान्तरसंसर्गइति

२.१.१९

परिच्छिन्नस्य घटस्य युगपद्देशद्वयेप्यवस्थातुमशक्तस्य देशान्तरसंसर्गोस्य देशस्य घटात्यन्ताभाव इत्यर्थः । साधिते सतीत्यर्थ इति - साधितप्रायो सतीत्यर्थः । ततश्च साधितत्वे दृष्टान्तोपन्यासेन साधनीयांशाभावात् दृष्टान्तवैफल्यं स्यादिति शङ्का परास्ता ।। यथा विशिष्टवस्तुनीति - यथा चिदचिद्विशिष्टे अंशभूते ब्रह्मण्येकत्वं विशिष्टत्वस्य

कृत्स्नव्यक्तित्वात्, विशेषणत्वेनांशभूतानां चिदचितां प्रत्येकं भेदः, एवं विशिष्टत्वस्थानीयं पटत्वं विशेषणत्वस्थानीयं तन्तुत्वमित्यभिप्रायः । कृत्स्नतन्तुवृत्तिना पटत्वेनेति - तन्तुष्वेव तन्तुत्वावच्छेदेनानेनकत्वं पटत्वावच्छेदेनैकत्वमित्यर्थः । नन्वतिरिक्तपटानभ्युपगमे तन्तुषु पटाशत्वव्यवहारः कथम् ? तन्त्वन्तरं प्रति तन्त्वरस्यांशत्वाभावादित्याशङ्कयाह - पृथगवस्थानदशायामिति । अंशिन एकत्वं चेति - सङ्घातो विशषष्यमंशी च । तन्तवो-विशेषणभूताः अंशाश्चेतिभावः । पटस्य प्रादेशिकविशेषणानि भवन्तीति - तन्तुपटयोरभेदेपि तन्तून्प्रति प्रादेशिकविशेषणत्वा-भावेपि पटं प्रति प्रादेशिकविशेषणानि भवन्ति । आकारभेदसत्त्वादितिभावः । प्रादेशिकविशेषाः कादाचित्का इति - कादाचित्का

२.१.२०

एवेत्यर्थः । स्वाभाविकांशवादोपि निरस्त इति - स्वाभाविकांशसद्भावे केचन प्रादेशिकविशेषा नित्या अपि स्युरितिभावः । गगना-दिव्यापकपदार्थानामिति - गगनादिरूपव्यापकपदार्थानामित्यर्थः । गगनादीनां क्षणिकत्वमेवोपपादयति । परिणामविशेषादि-त्यादिना ।।

२.१.२३

अर्हशब्दो मुक्तव्यावृत्तिपर इति - सुखदुःखयुक्तात्प्रत्यगात्मनोऽधिकमित्युक्ते मुक्तादाधिक्यं न प्रतिपादितं स्यादित्यर्थः । ननु उभ-येपीतिसूत्रस्य कथमादिपदग्राह्यत्वम् ? तस्य भेदप्रतिपादनमात्रप्रवृत्तत्वेन प्रकारप्रकारिभावाप्रतिपादकत्वादित्याशङ्कयाह - उभये-पीत्यादिसूत्रमिति । घटकवाक्यविषयमिति - यो विज्ञाने तिष्ठन्नित्यादिना शरीरशरीरिभावप्रतिपादनादितिभावः । भाष्ये-अवि-द्याावियुक्तावस्थामभिप्रेत्येति । नित्यशुद्धवद्धमुक्तस्वभावस्य ब्रह्मणो जीवाद्भेदं वर्णयन्तीत्यर्थः । एवं हि तत्र परेषां भाष्यम्; यत्सर्वज्ञं सर्वशक्ति ब्रह्म नित्यमुक्तशुद्धबद्धस्वभावं शारीरादधिकमन्यत् तत् वयं जगतः स्रष्टृ ब्रूम इति । ततश्चाविद्याावियुक्तावस्थामभिप्रेत्येति वदन्तं प्रति किमविद्याावियुक्तस्य वा, तत्संसृष्टस्य वा ? इतिविकल्पमुखप्रवृत्तोत्तरभाष्यस्य कथं प्रवृत्तिः ? कथं वा ब्रह्मणो जीवाद्भेदे

२.१.२३

वक्तव्ये जीवस्य ब्रह्मणो भेद इति शङ्काद्वयं निरवकाशम्, तस्य वाक्यस्य नित्यशुद्धस्वभावस्य ब्रह्मणो जीवप्रतियोगिकभेदस्य प्रतिपादनपरत्वेनादोषादिति द्रष्टव्यम् । तत्र परभाष्ये नित्यशुद्धबद्धमुक्तस्वभावमितिविशेषणादविद्याावियुक्तस्येति पक्षस्योत्थानम् सर्वज्ञं सर्वशक्तीतिविशेषणात् अविद्यापरिकल्पितस्येतिपक्षस्योत्थानमिति पक्षद्वयसम्भवं हृदि निधाय विकल्प्य दूषयतीत्याह - जीवादविद्याावियुक्तस्येत्यादि । अकल्पितजीवस्वरूपज्ञानस्येति - परमार्थप्रत्यगभिन्नब्रह्मस्वरूपज्ञानाय विचारस्य कर्तव्यतया जिज्ञासासूत्रे प्रतिपादनादित्यर्थः । अबाधिते भेदव्यवहारे "सोन्वेष्टव्यः स विजिज्ञासितव्यः' इत्येवञ्जातीयेन भेदनिर्देशेनावगम्यमानं ब्रह्मणेऽधिकत्वं हिताकरणादिदोषं निरुणद्धीति परभाष्योक्तमर्थादनुवदति - किञ्च तत्त्वमस्यादिवाक्यार्थप्रतिबोधनात्प्रागीश्व- रस्य भेदेन प्रतिपाद्यमानस्य-हिताकरणाद्यप्रसक्तिरिति । भेदेन प्रतिपाद्यमानस्य-भिन्नतया निर्दिश्यमानस्येत्यर्थः । ननु भेदसत्त्वेपि तान् जीवानात्माभिन्नाननुभवतो हिताकरणादिदोषः किं न स्यादित्याशङ्कयम्, सत्यम्, अयं परमात्मा सर्वज्ञत्वात् यथा जीवान् वस्तुत आत्मनोभिन्नान्पश्यति एवं तत्त्वत एषां सुखदुःखादिवेदनासंयोगोऽस्ति अविद्यावशात्तेषां तद्वदभिमान इति पश्यति तथा च तेषां सुखदुःखादिवेदनायामपि अहमुदासीन इति । न च बन्धनागरनिवेशेपि अस्ति काचित्क्षतिमर्मेति । न

हिताकरणादिदोषा-पत्तिरिति वाचस्पतितोक्तमनुवदति-मिथ्याभूतैर्जीवगतदोषैरिति । अस्यायंभावः, यथा ईश्वरः सर्वज्ञत्वात्स्वाभिन्नतया जीवान्पश्यति तथा सर्वज्ञत्वादेव तद्गतांश्च दोषान् मिथ्यात्वेन पश्यत्येवेति तस्य संसारप्रवर्ततेपि स्वाभिन्नस्य दुःखाप्रसक्तेः हिताकरणादिदोषप्रसङ्ग इति । यदा तत्त्वमसीत्येवञ्जतीयकेन भेदनिर्देशनाभेदः प्रतिबोधितो भवति, अपगतं तदा जीवस्य संसारित्वम्, ब्रह्मणश्च स्रष्टृत्वं समस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यज्ज्ञानोदयेन बाधात् कुत एव सृष्टिः कुतो वा हिताकरणादयो दोषा इति भाष्यमनुवदति - ऐक्यज्ञानोदयात्पश्चादिति । वक्तृणामित्यादि - अयं भावः,
तत्त्वमस्यादिवाक्यजन्यज्ञानात्प्राग्भेदव्यवहारः,

२.१.२३

ततः पश्चान्न भेदव्यहार इति वक्तुं युक्तम् "तद्यो देवानां प्रत्यबुध्यत स एतदभवत्' इत्यादिश्रुतेः । "शुकस्तु मारुताच्छीघ्रां गतिं कृत्वा अन्तरिक्षगः । दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवत्'
इत्यादिशुक्तमुक्तत्वप्रतिपादकप्रमाणाच्च शुकादीनां तत्त्वज्ञानावश्यम्भावात् शुकादीनां जातेपि तत्त्वज्ञाने इतरेषां यथापूर्वं भेदव्यवहारस्य स्थितत्वात् यस्य तत्त्वज्ञानं तस्य न भेदप्रतिभास इत्येव वक्तव्यम् । ततश्चेश्वरस्य तत्त्वज्ञाने विद्यमानेपि भेदप्रतिभाससंसारतन्त्रप्रवर्तकत्वादिकं न स्यादिति । भेदेन प्रतिपत्तेरिति - ल्यप्लोपे पञ्चमी,
भेदप्रतिपत्तिमपेक्ष्येत्यर्थः । ईश्वरस्य
तत्त्वमस्यादिवाक्यार्थानवबोधाधीनभेदप्रपित्त्यधीनस्रष्टृत्वनिबन्धनदोषपरिहारोऽनुपपन्न इत्यर्थः । स्रष्टृत्वे सति हिताकरणादिदोषः परिहार्यः । तत्त्वमस्यादिवाक्यार्थानवबोधाधीनभेदप्रतिपत्त्यधीनस्रष्टृत्वस्यैवाभावेन सृष्टिनिब-न्धनहिताकरणादि◌ोषाप्रसक्तया तत्परिहारो न प्रतिपाद्यः स्यादितिभावः । दोषपरिहारोऽनुपपन्न इति - ननु परभाष्ये अश्मादिवच्च तदनुपपत्तिरिति सूत्रे पाषाणत्वाद्यविशेषेपि वज्रवैडूर्यसूर्यकान्तादिवैचित्र्यवद्वृक्षे पत्रपुष्पादिवैचित्र्यवत्स्वप्नदृश्यभाववैचित्र्यवज्जीव-प्राज्ञपृथक्त्वमनुपपन्नमित्युक्तम् । तच्च सूत्रं
हिताकरणादिदोषप्रसक्तिनिवारकतया परैर्व्याख्यातम् । यदि ब्रह्मविवर्ततो जीवः स्या- द्धन्त सर्वस्यैव जीववच्चैतन्यप्रसङ्गइत्यत आह - अश्मादिवच्च तदनुपपत्तिरिति । वाचस्पतिना अश्मादिवच्च तदनुपपत्तिरिति सूत्र-स्यावतारितत्वेन तस्य सूत्रस्य चिदचिद्वैचित्रीमात्रप्रतिपादनहिताकरणादिदोषपरिहारपरत्वाभावेन वक्ष्यमाणदोषाणां प्रसक्ति- रितिचेत् सत्यं वाचस्पतिना तथा व्याख्यातम्; न तु तदुपपत्तिमत्, हिताकरणादिदोषप्रसङ्गे तदवैचित्र्यशङ्काया अनुत्थितेः तत्प-

२.१.२४

रिहारस्यावक्तव्यत्वात्, न विलक्षणत्वादित्यादौ कृतकरत्वाच्च, अतो वाचस्पत्युक्तस्यानुपपन्नतामभिप्रेत्य यथाश्रुतभाष्यदूषणमुप-न्यस्तम् । कर्मारब्धेनेति - शरीरेणेतिशेषः ।कर्मवश्येनेति - जीवेनेतिशेषः ।
तत्रास्कार्यवादनिराकरणं दृश्यत इतीति - तत्रा-सत्कार्यवादनिराकरणस्यापि दर्शनादित्यर्थः । ।।
इतरव्यपदेशाधिकरणम् ।। सङ्कुचितवृत्तित्वशङ्कयोत्थानादिति उपकरणान्त-रसद्भावदशायां सङ्कल्पस्य सत्यत्वेपि तद्राहित्यदशायां सङ्कल्पस्य सत्यता नास्तीति सङ्कोच इत्यर्थः । किं बाह्यकरणसापेक्षत्व-

२.१.२५

मुच्यते, उतान्तः करणसापेक्षत्वम् ? आद्ये क्षीरादौ व्यभिचारः । द्वितीये कालादृष्टाद्यनन्तकारणसद्भावान्न ब्रह्मणस्स्रष्टृत्वविरोध इत्यभिप्रयन्नाह, भाष्ये-यथा क्षीरजलादेरिति । वैदिकं दृष्टान्तमाहेति - क्षीराचेतनस्य कार्यजनने

ब्राह्यकारणे निरपेक्षत्वेपि चेतनस्य बाह्यकरणान्तरसापेक्षत्वमस्तीत्याशङ्कय वैदिकदृष्टान्तमाहेत्यर्थः । भाष्ये - सुखग्रहणायेति प्रतिपत्तव्यमिति । परमितशक्तीनां देवा-

२.१.२६

दीनामपि श्रुतिवशात्तादृशसामर्थ्येऽभ्युपगम्यमाने किमु वक्तव्यं सर्वशक्तेः परस्य ब्रह्मणः इति ग्रहणायेत्यर्थः ।।

२.१.२९

"श्रुतेस्तु शब्दमूलत्वा'दिति सूत्रेण पौनरुक्तयमाशङ्कयाह । श्रुत्या निरवयवत्वेति - नन्वपहतापाप्मेत्यादीनामपि धर्मिवैलक्ष-

२.१.३१

ण्यद्वारा सर्वशक्तियोगलक्षणधर्मवैलक्षण्यापादकत्वस्यापि सम्भवात् सत्यकामस्सत्यसङ्कल्प इत्यस्य विशेष्यसर्वशक्तियोगप्रतिपा-दकत्वकथनं भाष्ये कथमित्याशङ्कयाह - एवं धर्मिवैलक्षण्यादिति । आसन्नेति - धर्मिवैलक्षण्याद्धर्मवैलक्षण्यमात्रं सिध्येत्, नतु सर्वशक्तियोगरूपधर्मविशेषः । पारिशेष्यादिना तत्सिद्धिस्तु विलम्बिता । सत्यसङ्कल्पत्वलक्षणकार्यलिङ्गसर्वशक्तिप्रतीतिस्तु शीघ्रं

२.१.३१

भवतीतिभावः । चन्द्रद्वित्वाभावेपि चन्द्रो बहुधा विभज्य इति पाठो दृश्यते, वस्तुतस्तु चन्द्रानेकत्वाभावेपि चन्द्रोऽनेकधाप्रतीयत इत्यर्थः । वस्तुतोऽनेकत्वशून्यस्यापि चन्द्रस्य तिमिरकल्पितानेकत्ववदिति पर्यवसितोर्थः । नात्मा श्रुतेरित्यादि । एषु सूत्रेषु श्रुति-शब्दादिपदस्य मिथ्याविषयत्वाभावस्य सिद्धत्वादित्यर्थः । नित्यसम्पन्नत्वादिति - ततश्च सुषुप्तिकाल इत्यनुपपन्नमिति भावः । तस्यैन्द्रियिकत्वादिति - ततश्च द्रष्टव्य इति विधिवैयर्थ्यमिति भावः । द्वितीयपक्षे परिहारमाशङ्कते - यदेव ब्रह्मेति । ननु सर्वत्रा-परमार्थभूते अविद्यासंसर्गे विद्यमानेपि परमार्थभूताविद्यासंसर्गाभावान्न कृत्स्नप्रसक्तिरित्याशङ्कते - न तावता अविद्यानिर्मुक्त-ब्रह्मसिद्धिरिति । परिणामोपयोगिन्या अविद्यया वियुक्तब्रह्मासिद्धिरित्यर्थः । सर्वमपि ब्रह्म जगदाकारेण परिणमेतेत्यर्थः । यादृ-शोऽभिमत इति - जगदाकारेण परिणामोपयोगी यादृशोभिमत इत्यर्थः । कार्यप्रयोजककारे विद्यमाने तदप्रयोजकाकारनिवृत्ते-रप्रयोजकत्वे दृष्टान्तमाह - यथा स्वप्नदृष्टेति । किञ्च किमविद्याकल्पितेति - ननु शाङ्करभाष्ये अविद्याकल्पितेन नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्मपरिणामादिसर्वव्यवहारास्पदत्वं प्रतिपाद्यते, पारमार्थिकेन

२.१.३१

च रूपेण सर्वव्यवहारातीतमपरिणतमेव तिष्ठत इति ृङ्गग्राहिकयानिर्वचनीयस्य नामरूपलक्षणभेदस्यैव अविद्याकल्पितरूपत्वेन प्रदर्शितत्वात् तथा वाचस्पत्येपि नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मना तत्त्वान्यत्वाभ्यामनिर्वचनीयेन परिणामव्यव-हारास्पदं ब्रह्म पतिपद्यते । न च कल्पितं रूपं वस्तु स्पृशति । नहि चन्द्रमसि तैमिरिकजनस्य द्वित्वकल्पनं चन्दमसो द्वित्वमावहति । द्वित्वानुपपत्त्या वा चन्द्रमसोऽनुपपत्तिः । तस्माद्वास्तवपरिणामकल्पनानुपपद्यमानापि न परमार्थसतो ब्रह्मणोऽनुपपत्तिमावहतीति स्पष्टं प्रतिपादितत्वाच्च

कथमस्य विकल्पस्यावकाशः? अस्तु वा कथञ्चिदवकाशः; तथाप्यविद्याविशिष्टस्य वा तदुपलक्षितस्य प्रधा-नस्य वा अविद्याकल्पितरूपभेदशब्दार्थत्वे तेषामवयवत्वमेव सिध्येत्, न तु सावयवत्वम् यथा देवदत्तो यज्ञदत्तेन पितृमानित्युक्ते यज्ञदत्तस्य पितृत्वमेवायाति न तु पितृमत्त्वम्; एवमविद्याकल्पितरूपभेदेन सावयवमित्युकतै अविद्याकल्पितरूपभेदस्यावयवत्वमेव सिध्येत्, न तु सावयवत्वमिति चेन्न; अविद्याकल्पितरूपभेदेन सावयवत्वमित्यस्याविद्याकल्पितरूपभेदयुक्तं यत्सावयवत्वमि-त्यस्याप्यर्थस्य सम्भवात्, तत्र च सावयवत्वेन प्रतिपिपादयिषितम् अविद्याकल्पितनामरूपयुक्तं ब्रह्म किमविद्याविशिष्टम्, उतो-पलक्षितम्, उत प्रधानं वेति विकल्पसम्भवान्नानुपपत्तिः, किमविद्याकल्पितं किमविद्याविशिष्टमिति ग्रन्थे अविद्याकल्पितं रूपं यस्येति बहुव्रीहिः, ततश्चाविद्याकल्पितनामरूपयुक्तमित्यर्थः । अतो नानुपपत्तिरिति द्रष्टव्यम् । तदुभयविरोधपरिहार इति - कृत्स्न-प्रसक्तिनिरवयवत्वपरिहार इत्यर्थः । पाश्चात्यसूत्रद्वयार्थस्येति - सर्वोपेता च । विकरणत्वान्नेतिचेदिति सूत्रद्वयार्थस्येत्यर्थः ।

२.१.३३

उपपाद्यकोटिघटकमिति - सर्वकारणत्वोपपाद्यत्वान्नामरूपोपेतत्वस्येत्यर्थः । ननु निरवयवस्य सर्वकारणत्वे श्रुतिवाक्यस्यैव साक्षा-दुपपादकत्वात्तदेवास्मिन्विवक्ष्यताम्, किं सवर्शक्तियोगोपन्यासेनेति । कन्तुकाद्यारम्भस्य लीलात्वं युक्तमित्यादि - ननु केवलं

२.१.३५

लीलैकप्रयोजनाः कन्तुकाद्यारम्भा दृश्यन्ते । जन्मस्थितिध्वंसादेर्लीलैव प्रयोजनमिति कन्तुकारम्भजन्मस्थितिध्वंसादेर्लीलप्रयो-जनकत्वप्रतिपादकभाष्ये विद्यमाने तदनादरेण कन्तुकाद्यारम्भस्य लीलात्वं युक्तम् । यत्नगोरवाभावाज्जगद्व्यापारस्य लीलात्वम-नुपपन्नमिति कथं व्यापारस्यैव लीलात्वकथनमिति चेत्-अत्र केचित्; "क्रीडार्थं सृष्टिरित्यन्ये भोगार्थमितिचापरे देवस्यैष स्वभा-

२.१.३६

वोयमाप्तकामस्य का स्पृहा' इति माण्डूक्यश्रुतौ सृष्टेर्लीलाथर्त्वस्य परपक्षत्वोपन्यासात् लीलाशब्दोत्रानायासकर्मपरः, लीलामात्र-मेतस्य भारत्रयधान्यवहनमिति । तत्रापि प्रयोगदर्शनात्, यथा अङ्गुलिचालनादयोऽनायाससाध्याः क्रियाः, न प्रयोजनापेक्षाः । अत एव न तत्र प्रयोजनप्रश्नः, तत्प्रश्नेपि तूष्णीमेवोत्तरम्, एवं परमात्मनोप्यनायाससाध्याः सृष्टयादिक्रियाः, न प्रयोजनापेक्षाः, अत्र च "अखिलभूवनजन्मस्थेमभङ्गादिलीला' इत्याद्यपद्यस्यैव साक्षित्वात् केवललीलैकप्रयोजनाः कन्तुकाद्यारम्भाः ध्वंसादेर्लीलैव प्रयोजनमिति भाष्यस्यापि स्वस्य स्वयं दास इतिवत् स्वस्य स्वयमेव प्रयोजनमित्यर्थे तात्पर्यमित्येवाचार्याभिप्रायं वर्णयन्ति ।।

२.१.३६

स्वान्यत्वज्ञानाच्चेति न लीलासम्भव इत्युत्तरत्रान्वयः । विषमसृष्टया सम्बन्धमर्हतीति - ननु पररीत्या ईश्वरेण सृष्टेत्यर्थः । नहीश्व-रश्चेत् कर्मसापेक्ष इति नियमो नहीत्यर्थः । एवं सृष्टिश्चेदित्युत्तरवाक्येपि द्रष्टव्यम् । समष्टितत्त्वसृष्टाविति - ननु कार्यमात्रे जीवदृष्टस्य कारणत्वात्तत्रापि कर्मसापेक्षत्वं शक्यते वक्तुमिति चेन्न; मुक्तापेक्षितमाताश्चित्रादिभोग्यसृष्टौ व्यभिचारेण सर्वत्र कार्ये तत्सापेक्षत्वा-भावादिति भावः । सूत्राभिप्रायो भवतीत्यभिप्रायेणाहेति - सूत्राभिप्रेतो भवतीत्यभिप्रायेणोक्तवानित्यर्थः । सूत्रमप्यधिकरणा-न्तरमाहुरिति - यद्यपि

मृषावादिमतेपीदं सूत्रमधिकरणान्तरमिति कल्पतरौ व्यक्तमुक्तम्, तथापि भाष्यभामत्योरप्रतीतत्वादेवमुक्त-मिति द्रष्टव्यम् । प्रलयात्ययज्ञानजन्मत्वादिति - प्रलयोऽतीत इति ज्ञानजन्यत्वादित्यर्थः । योग्यतान्तरानुपपत्तेरिति - प्रबोध-

२.१.३६

शक्तेरपि योग्यतारूपत्वादितिभावः । प्रलयकालात्ययज्ञानादीति - प्रलयकालात्ययं

Second Pada

२.२.१

भाष्ये - मूलप्रकृतिर्नाम सुखदुःखमोहात्मकानीत्यादि । यथाहुः सांख्याः - "प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयमिथुनप्रवृत्तयश्च गुणाः । सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः । गुरुवरणमेव तमः प्रदीपवच्चार्थतो वृत्तिः' । अयमर्थः - गुणाः सत्त्वरजस्तमांसि प्रीत्यप्रीतिविषादात्मकाः क्रमात् सुखदुःखमोहात्मानः क्रमादेव प्रकाशप्रवृत्तिनियम

२.२.१

प्रयोजनाः स्वच्छं सत्त्वं प्रकाशयति प्रकाशकार्ये सत्त्वं प्रवर्तयति । रजोगुणो लघोः सत्त्वगुणस्य रजसा सर्वत्र प्रवर्तने प्रसक्ते यथाकार्यं गुरुः तमोगुणो नियच्छति । ततश्च तमोनियतं रजः क्वचिदेव प्रवर्तयति, तेन क्वचिदेव प्रवर्तितं, सत्त्वं किञ्चिदेव प्रकाशयति । अतो न सर्वं सर्वदा सर्वस्य प्रकाशत इति व्यवस्था । एवं गुणानां प्रयोजनं स्वरूपं च उक्तं, तेषां व्यापार उच्यते । अन्योन्याभिभवाश्रय जननमिथुनवृत्तयश्च । वृत्तिः व्यापारः प्रत्येकमभिभवादिभिः सम्भध्यते, अन्योन्याभिभववृत्तयो गुणाः तेषामन्यतमेन प्रयोजनवशात् उद्भूते नान्यतमोऽभिभूयते, तथा सत्त्वं रजस्तमसी कदाचिदभिभूय शान्तां वृत्तिं लभते, एवं रजः सत्त्वतमसी अभिभूय घोरां स्ववृत्तिम्, तथा तमः सप्तवरजसी अभिभूय मूढां स्ववृत्तिमिति अन्योनयाश्रयवृत्तयश्च गुणाः, यदपेक्षया यस्य व्यापारो भवति स तस्याश्रयो विवक्षितः, अन्योन्यजननवृत्तयश्च गुणाः - अन्यतमनान्यतमो जन्यते, जननमत्र परिणामविशेषः, अन्योन्यमिथुन्वृत्तयश्च अन्येन्यसहचराः अविनाभूता इत्यर्थः । "अन्योन्यमिथुनाः सर्वे सदा सर्वत्र गामिनः । नैषामादिस्सम्प्रयोगो वियोगो वोपलभ्यते' इति हि तदागमः । सत्त्वं लघु प्रकाशकमिष्टं सांख्याचार्याणाम्, तत्रानलपवना-दीनामूर्ध्वज्वलनतिर्यग्गमनादिहेतुः धर्मो लाघवम्, सत्त्वतमसि रजसा स्वकार्योन्मुखेन कार्येते इत्येतद्रजसा उपष्टकत्वम्,

२.२.१

तदुपपादकं विशेषणं चलमिति । रजस्सक्रियमक्रिययोः सत्त्वतमसोः कार्योन्मुखावस्थापादकमिति चलविशेषणेन दर्शितम् । तमस्तु गुरु, अत एव स्वयं चञ्जलतया लघु सत्त्वमपि चालयद्रजो गुरुणा तमसा तत्र प्रवृत्तिप्रतिबन्धकेन क्वचिदेव प्रवृत्तिमत्क्रिर्या इति वरणकं नियामकं तमः, परस्परविरोधिनामप्येषामेककार्यकरणत्वमितयुच्यते, प्रदीपवच्चार्थतो वृत्तिः - यथा वर्तितैले पावकविरुद्धेपि मिलिते सह पावकेन रूपप्रकाशनमार्यं कुरुतः, एवं सत्त्वरजस्तमांसि परस्परविरुद्धान्यप्यर्थवशात्सह कार्यं कुर्वतीति उपष्टम्भकम् । धारणमिति सत्त्वतमसोः

कार्यौन्मुख्यापादकत्वमेव रजसो धारकत्वमितिभावः । भाष्ये - सर्वज्ञज्ञानमूल इति । पारुषेय इति यावत् । भाष्ये - एकमूलत्वमवश्याभ्युपगमनीयमिति । प्रपञ्चस्य प्रधानकारणमूलकत्व-कल्पनायां तदैक्यल्लाघवम् । परमाणुकारणकत्वकल्पनायाम् एकस्य परमाणोस्सर्वकारणत्वायोगेन कारणबहुत्वकल्पना-वश्यम्भावात् गौरवमित्येकमूलकमित्यत्राभिप्रेतम् । भाष्ये - षड्भिः - पार्श्वैरिति । यथा दशदिक्सम्बन्धि दशा प्रदेशबन्तो-ऽङ्गुल्यादयः परस्परं संक्लिष्यमाणा एकया महादिशा विदिग्द्वयेनावच्छिन्नैः प्रत्येकं त्रिभिस्त्रिाभिः प्रदेशैः सम्बन्ध्यन्दे, एवं तन्त-वोपि संक्ष्णिष्यमाणा प्रत्येकमसंयुक्तस्वपार्श्वयुक्ताः स्वाधिकपरिमाणं पटादिकार्यमारम्भन्ते तथा निरवयवेषु परमाणुषु संयुज्य-मानेषुे असंयुक्तप्रदेशसम्भवात्तेषां स्वाधिकपरिमाणकार्यारम्भकत्वं न स्याि◌ादत्यर्थः । भाष्ये - भेदानां परिणामादिति । अयं हि

श्लोको वाचस्पतिना एवं व्याख्यातः - स्यादेतत्, व्यक्तेद्व्यक्तमुत्पद्वयत इति कणभक्षाक्षचरमादयः । परमाणवो हि व्यक्ताः, तैद्वर्यणुकादिकमेण पृथिव्यादिलक्षणं कार्यं व्यक्तमारभ्यते, प्रथिव्यादिषु च कारणगुणकमेण रूपाद्वयत्पत्तिः तस्माद्वयक्ताद्वय-क्तस्य तद्गुणानां चोत्पत्तेः कृतमव्यक्तेनादृष्टचरेणेत्यत आह - भेदानामिति । भेदादीनां विशेषाणां महदादीनां भूम्यन्तानां मूलकारणमस्त्यव्यक्तमकुतः? कारणकार्यविभागात् । अविभागात् वैश्वरूपस्य, कारणे सत्कार्यमिति स्थितम् । तथाच यथा कूर्मशरीरे सन्त्येवाङ्गानि निस्सरन्ति विभज्यन्ते । इदं कूर्मशरीरं एतान्यस्याङ्गानीति, एवं निविशमानानि

तस्मिन्नव्यक्तानि भवन्ति, एवं कारणान्मृत्पिण्डात् सुवर्णपृत्पिण्डाद्वा कार्याणि घटमुकुटादीवि सन्त्येव विभज्यन्ते, सन्त्येव पृथिव्यादीनि कारणात्तन्मात्राद्विभज्यन्ते, सन्तयेव तन्मात्राण्यहङ्कारात्कारणात्, सन्नेव चाहङ्कारः कारणान्महतः सन्नेव च महान् परमाव्य-क्तादिति ।सोऽयं कारणात् परमाव्यक्तात् साक्षात्पारम्पर्येण विश्वस्य कार्यस्य विभागः, प्रतिसर्गे तु भृत्पिण्डं वा घत्तभुकुटादयो विशन्तोऽव्यक्तीभवन्ति"तत्कारणस्वरूपमेवानाभिव्यक्तयन्ति कार्यमपेक्ष्याव्यकं भवतीति, एवं पृथिव्यादयस्तन्मात्राणि विशन्तः स्वापेक्षया तन्मात्रमव्यक्तयन्ति, एवं तन्मात्राण्यहङ्कारं विशन्ति अहङ्कारमव्यक्तयन्ति, एव महङ्गारो महान्तभाविश-न्महान्तमव्यक्तयति, महान, प्रकृतिं स्वकारणमाविशन् प्रकृतिमव्यक्तयति, प्रकृतेस्तु न क्वचिन्निवेश इति सा सर्वकार्याणामव्य-क्तमेव । सोयमविभागः प्रकृतौ वैश्वरूप्यस्य कार्यस्य । तस्मात्कारणे कार्यस्य सत एव विभागाविभाभ्यामव्यक्तं कारमस्ति; इतश्चाव्यक्तं कारणमस्तीत्याह - शक्तितः प्रवृत्तेश्चेति । कारणशक्तितः कार्यं प्रवृर्तत इति सिद्धम् । अशक्तात्कारणात्कार्यस्यानु-त्पत्तेश्शक्तिश्च कारणगता न कार्यस्यानमिव्यक्तत्वादन्या, नहि सत्कार्यपक्षे कार्याव्यक्तताया अन्यस्यां शक्तवस्ति प्रमाणम्,

अयमेव हि सिकताभ्यस्तिलानां भेदः, यदेतेष्वेव तिलेषु तैलमनागतावस्थं न सिकतास्विाति । स्यादेतत् - शक्तितः प्रवृतिः कारणकार्यविभागाविविभागौ च महत एव परमाव्यक्तत्वं साधयिष्यतः । कृतं ततः परेणाऽव्यक्तेनेत्यत आह -"परिणामा' दिति - परिकितत्वात्, अव्यापित्वादितियावत् । विवादाध्यासित भेदाः अव्यक्तकारणवन्तः परिमितत्वाद्घटादिवद्, घटादयो हि परिमितापृदाद्यव्यक्तकारणका दृष्टाः । उक्तमेतद्वयथाकार्यस्याव्यक्तवस्था कारणमेवेति, यत्तु महतः कारणं तत्परमाव्यक्तं ततः परतराव्यक्तकल्पनायां प्रमाणाभावात्, इतश्च विवादाद्यासिता भेदाः अव्यक्तकारणवन्तः समन्वयात्, भिन्नानां सरूपता समन्वयः, सुखदुःखमोहसमन्विता बुद्धयादयोऽध्यवसायादिलक्षणाः प्रतीयन्ते यानिच यद्रुपसमन्वितानि तानि तत्स्वभावाव्य-क्तकारणकानि, यथा

मृद्भेमरूपसमन्विता घटमुकुटादयो मृद्भेमापिण्डाव्यक्तकारणका, इति कारणमस्त्यव्यक्तं भेदानामिति सिद्धम् तस्यचाविरूद्धत्वात्सोपि ग्राह्यु एवेति द्रष्टव्यम् । प्रत्यनुमानोपयोगिनीव्याप्तिं शिक्षयतीति - अत्र प्रत्यनुमानं दर्शयति । न भवदुक्तमिति पाठः समीचीन इति केचिद्वदन्ति । सुखदुःखादिहेतुत्वमिति मन्तव्यमिति - न तु तेषामेव सुखादिरूपत्वम्, तथा सति गुणत्रायाश्रये पटादौ सुखी दुःखीत्यादिप्रयोगस्रसंगात पटादीनामेव सत्त्वरजस्तमोरूपत्वमिति सांख्यमते पटः सुखं दुःख्-

२.२.१

मित्यादिप्रतीतिप्रयोगप्रसंगाच्च; न च विषयस्य दुःखादिरूपत्वाभावे तज्ज्ञानादान्तरसुखादयो न स्यादिति वाच्यम्, विषयस्ये-च्छादिरूपत्वाभावेपि तज्ज्ञानादिच्छाप्रयत्नोदयात्तदुभयस्याप्युपपत्तेः । सुखदुःखाज्ञानवशात्सुखमाहात्मकत्वे लाघवादिकार्य-वशात् अन्यात्मकत्वस्यापि कल्पनाप्रसंगेन त्रैगुण्यावस्थाभङ्गप्रसंगाच्च । न च सुखलाघवप्रकाशानां दुःखोपष्टम्भप्रवर्तनानां मोगौरवावरणानां चैकैकगुणसमजबन्धित्वकल्पनायां प्रमाणमस्ति । येन त्रैगुण्यव्यवस्थाभङ्गो न स्यात् तथा सति सुखदुःख-मोहानामपि एकगुणसम्बन्धित्वकल्पनोपपत्तेः, विरोधस्य प्रतियोगिभेदेन च सुपरिहरत्वात्, परेणापि सुखादिरूपोद्भवे तद्भेदस्यैव शरणीकरणीयत्वाच्चेति भावः ।।

२.२.३

अवस्थाया अवस्थानतदभाववादस्यावस्थाया उत्पत्तितदभाववादस्य तुल्यतया

अयुक्तत्वं मन्वानो अवस्थोपलक्षितद्रव्यत्यावस्थानाभावपरतया व्याचष्टे । प्रतिसर्गावस्थोपलक्षितेति - अवधारणगर्भमिदमिति - यद्यपि नात्रावधारणगर्भत्वमाश्रयणीयम्, समस्तपदेनैवावधारणप्रयोजनस्य लब्धत्वात्तथापि उपायस्योपायान्तरादूषकत्वादिति

२.२.३

द्रष्टव्यम् । तया स्वातन्त्र्यहानिरिति -तथा परिणामविशेषापत्त्या स्वातन्त्र्यहानिरित्यर्थः । अतो निर्दयत्वहितुरनैकान्तिक इति -

२.२.३

दया चेत् गुणः ततश्च निर्दयत्वे निर्गुणत्वं स्यादिति हेतुरनैकान्तिक इत्यर्थः । जीवानां फलान्वयराहित्यञ्चेति । जीवस्य परत-

२.२.४

न्त्रत्वे कर्मफलान्वयो जीवस्य न स्यादिति दूषणं चेत्यर्थः । उपजीव्यापदीति । उपजीवकानामुपजीव्यदुःखासहिष्णुत्वं स्वप्रयो-जनभङ्गनीत्यैव । तत्रापि स्वार्थनिरपेक्षत्वे दयात्वमिष्टमेवेति भावः । सततयुक्तानामित्यत्रेति - अत्र वक्तव्यं सर्वं प्रथमसूत्रे एवेक्तम् । केवलदार्वादिव्यावृत्त्यर्थमिति - प्रीहणस्य काष्ठस्सन्निहितस्य तृणस्य क्षीराभावददर्शनाच्चित्सन्निधिमात्रमेवोप-गन्तव्यामित्यर्थः । न च तदपि पक्षीकार्यमिति - अचेतनं चेतनाधिष्ठितमेव प्रवतर्त इत्यनुमानेन तृणादिरपि पक्षीक्रियतामिति न वाच्यमित्यर्थः । तावतेति - चित्सन्निधिमात्रेणेत्यर्थः ।। * ।।

प्रहीणं वेतीति - अस्य तदूषितमिति पूर्वेणान्वयः । एवमुत्तर-त्रापीति द्रष्टव्यम् । भाष्ये - व्यभिचारप्रदर्शनायेति । पयोदृष्टान्ते व्यभिचारपरिहारप्रदर्शनायेत्यर्थः । मशकेभ्यो धूम इतिवत् ।।

भाष्ये - प्रधानोपभोगार्थमितिश्लोके प्रधानस्य दर्शनापेक्षया कर्मत कर्माणि षष्ठीति भावः ।। अनुमितिरेवार्थतो बुद्धिस्थेतीति - अनुमामेन प्रधानसिद्धयभ्युपगमेपीतिभाष्यस्यानुमित्यभ्युपगमेऽपीत्यर्थ इति भावः भाष्ये - संघातपरार्थत्वादित्याति अव्यक्तम-हदहङ्कारप्रभृतयः सुखदुःखमोहात्मकतया संघाता इति सिद्धम्, ततश्च यथा शयनासनादीनां संघातत्वात्परार्थत्वम्, एवं तेषामपि पारार्थ्यं वक्तत्यमित्यर्थः । ननु पारार्थ्यमस्तु तथापि संघातान्तरं प्रत्येव पारार्थ्यमस्तु न त्वसंहतात्मानं प्रति इत्यत्राह - त्रिगुणा-दिविपर्य्ययादिति । अयमभिप्रायः, संहतस्य संहतार्थान्तरत्वे तस्यापि संहतत्वेन पारार्थ्यस्य वक्तव्यतयाऽनवस्था स्यात्, अतः

सुदूरं गत्वाऽपि असंहत आत्मा शेषितयाऽभ्युपगन्तव्यः । ततश्च तादृशे आत्मनि संहतत्वं व्यावर्तमानं स्वव्याप्यत्रिगुणादिकमपि व्यावर्तयति, तत्रादिपदेन "त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मिव्यक्तम् । तथा प्रधानं तद्विपरीतश्तथा च पुमान्' इतिश्लोकार्थो विवक्षितः; तस्यायमर्थः- त्रयो गुणाः सुखदुःखमोहा अस्येति त्रिगुणम् तदनेन सुखादीनामात्मगुणत्वं पराकृतम्, अविवेकि यथा प्रधानं स्वतो न विविच्यते, एवं महदादयोऽपि प्रधानान्न विविच्यन्ते तदात्मकत्वात्, अथवा सम्भूयकारिता अविवेति न किञ्चिदेकं कार्ये पर्य्याप्तमपि तु सम्भूयाहुः, विज्ञानमेव विषयाकारमिति तान्प्रत्याह - विषय इति । विषयो ग्राह्यः विज्ञानभिन्न इति यावत् । अत एव सामान्यं साधारणम् विज्ञानरूपत्वे तु विज्ञानानामसाधारणत्वात् विषया अप्यसाधारणा भवेयुः तथाच नर्तकीभ्रूलताभङ्गे एकस्मिन् बहुना प्रतिसन्धानन्न स्यात्, अचेतनम् स्पष्टोऽर्थः । प्रसवधमिर् परिणामशाणीत्यर्थः, एवम्भूतं व्यक्तं महदादि, तद्धमार्न प्रधानेऽप्यतिदिशति - तथा प्रधानमिति, शिष्टं स्पष्टम् । एतादृशाकारविपर्य्यादित्यर्थ इति - इतश्च पुरुषोऽस्ति, अधिष्ठानात्; त्रिगुणात्मकस्य रथादिवदधिष्ठेयत्वस्यावक्तव्यत्वात्, अन्योधिष्ठितापेक्षित इत्यर्थः । भोक्तृ-भावात् सुखदुःखभोक्तृभावादित्यर्थः । सुखदुःखेच्चनुकल,प्रतिकूलवेतनीये, ततश्च सुखदुःखयोरनुकूलनीयेन च प्रकूलनीयेन च केचिद्भवितव्यम्, स चात्मा कैवल्यार्थप्रवृत्तेश्च, कैवल्यम् - आत्यन्तिकदुःखप्रशनम्, न च तत्त्रिगुणात्मकस्य वस्तुनः सम्भ-वति स्वाभाववियोगप्रसंगादित्यर्थः - तस्माच्च विपर्यासादिति । त्रिगुणादिविपर्ययादिति पूर्वश्लोकोक्तादित्यर्थः । ततश्चायमर्थः - पुरुस्यात्रिगुणत्वात्, विवेकित्वात्, विषयत्वात्, असाधारणत्वात्, चेतनत्वात्, अप्रसवधर्मित्वाच्चेति - अत्र चेतनत्वविष-यत्वाभ्यां साक्षित्वदृष्टृत्वे सिद्धयतः, चेतनो हि दृष्टा भवति, नाचेतनः, दुःखसाक्षी च दर्शितविषयो भवति, न तु विषयस्य साक्षित्वम्, अत्रिगुणत्वादेव, आत्यन्तिकदुःखत्रयाभावरूपकैवल्यम्, अत्रैगुण्यादेव च माध्यस्थ्यसिद्धिः । त्रैकुण्यसुखदुःखयोः सत्वात् रागद्वेषसत्त्वेनौदासीन्यरूपमाध्यस्थ्यन्न सिद्धययेत्,विवेकित्वाच्च अकर्मकत्वं सिध्द्येत् पुरुषविमोक्षनिमित्तमितिवत् "वत्सविवृद्धिनिमितं क्षीरस्य यथा प्रवृत्तिरज्ञस्य । पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्ये'ति श्लोकः । नानाश्रयप्रकृतिरिति - नानाश्रया प्रकृतिरित्यर्थः । न तु चेतनस्याकर्तृत्वेन अहं जानामि, अहं करोमि, इति कर्तृत्वचैतन्ययोः सामानाधिकरण्यानुभवः कथमित्याशङ्कय चैतन्यकर्तृत्वयोर्भिन्नाधिकरणत्वस्य युक्तिसिद्धत्वात् सामानाधिकरण्यप्रतीतिर्भ्रान्तिरित्याह - तस्मात्तत्संयोगा-दिति । तस्मात् कर्तृत्वचैतन्ययोर्भिन्नाधिकरणत्वस्य युक्तिसिद्धत्वादित्यर्थः । तत्संयोगात् - चेतनसंयोगात्, अचेतनलिङ्ग-

मन्तःकरणादिकं चेतनावदिव भवति, तथैवोदासीनोऽप्यात्मा कर्तृभूतत्रिगुणस्रव्यसन्निधानात्कर्त्तेव भवतीत्यर्थः । "पुरुषस्य दर्शनार्थमित्ययं श्लोकः पूर्वमेव व्याख्यातः । भाष्ये - जननमरणप्रतिनियमादिव्यवस्थासिद्धयर्थमिति, "जन्ममरणकरणानां प्रतिनियामाद् अयुगपत्प्रवृत्तेश्च । जीवबहुत्वं विद्धम् त्रैगुण्ये'ति सांख्यश्लोकः, अयमर्थः - देहेन्द्रियादिसम्बन्धो जन्म, तत्त्यागो मरणम्, करणानि इन्द्रियाणियद्येक एव परुषः सर्वभतस्स्यात्तर्ह्येकस्मिन् जायमाने सर्वेऽपि जायेरन्, एकस्मिन् म्रियमाणे सर्वेऽपि म्रियेरन्, एकस्मिश्चान्धे बधिरे वा तादृशा भवेयुः, अयुगपत् प्रवृत्तेश्च । एकत्रशरीरे यतमाने, पुरुषे स एव सर्वशरीरेष्वेक इति सर्वत्र प्रयतेत, ततश्च सर्वाण्यपि शरीराणि युगपच्चलयेत्, त्रैगुण्यविपर्ययाच्चापि - त्रय एव गुणाः त्रैगुण्यं स्वार्थे ष्यञ्, तस्य विपर्पयः - अन्यथाभावः । केचित् खलु सत्वबहुला यथोर्ध्वरेतस।, केचिद्रजोबहुला यथा मनुष्याः, केचित्तमोबहुला यथा तिर्य्यग्योनयः, नेयं व्यवस्था पुरुषैक्ये सम्भवतीत्यर्थः । ननु कारणावस्था प्रधानस्था प्रधानस्य कायर्गजद्गूपेण परिणतौ चेतना-धिष्ठाननिरपेक्षशङ्कानिराकरणाथश्र्र न "पयोम्बुव"दिति सूत्रम्, अपि तु तच्छङ्कानिराकरणम्' अन्यत्राभावाच्च न तृणा'दिव- दिति सूत्र एव करिष्यते, इदञ्च सूत्रम् अप्रवृत्तेश्च इति पूर्वसूत्रोक्तायाः पुरुषानधिष्ठिताचेतनस्य पुरुषार्थानुगुणप्रवृत्त्यनुपपत्तेः ।

२.२.९

आक्षिप्य समर्थनपरं किन्न स्यादित्याशङ्कयाह - पुरुषार्थसिद्धयनुगुणत्वदूषणस्येति । एकं करणं त्रीणितानीति - कचित्त्रीण्यन्तः

२.२.९

करणानि बुद्धिरहङ्गारो मन इति वर्णसन्त, कचिङ्बुद्धिरूपान्तःकरणमितिवर्णितमित्यर्थः । तद्वाचित्वस्वातस्वाच्चेति - ीवप्रतिषेये परं कार्यम्' इति सूत्रे परस्परविरोधप्रसिद्धेः दर्शितिवादितिभावः । हेतुमदनित्यभित्यादि - आश्रितं कारणाश्रितमित्यर्थः । लयं

२.२.१०

गच्छतीति लिङ्गं तनमूलं स्यादिति प्रकृतेर्मूलं स्यादिस्यर्थः ।। इति रचनानुपपत्त्यधिकरणम् ।। * ।।

दूष्य समुच्चयोऽभिप्रेत इति - गगननित्यत्वादि दूष्यसमुच्चयोऽभिप्रेत इत्यर्थः । महद्दीर्घशब्दौ भावप्रधानाविति । ननु भाव-प्राधान्यानाश्रयणेऽपि पदार्थतायच्छेदकभेदादेव द्वन्द्वोस्त्विति चेन्न, पदार्थभेदं विना पदार्थतावच्छेदकभेदमात्रेण द्वन्द्वस्य भाष्यकृता निराकृतत्वात् "चार्थे द्वन्द्व' इति सूत्रैर्भाष्यकृता याज्ञीयकश्चायं वैयाकरणश्चेत्यादिषु पदार्थतावच्छेदकभेदाद्द्वन्द्व-माशंक्य "शेषो बहुब्रीहि' रिति सूत्रात् शेष इत्यस्यानुवृत्तेः तस्य समानाधिकरणसमासविषयत्वेन शेषत्वाभावात् तदप्राप्तेरुपपादितत्वात्, सत्यपि पदार्थतावच्छेदकभेदेन द्वन्द्वसमासे महद्दीर्घशब्दयोः समानाधिकरणत्वेनाप्रसक्तेरनिवार्यत्वा-च्चाऽतो भावप्रधान एवायं निर्देश इति भावः । ननु महद्दीर्घशब्दाभ्यां महत्वदीर्घत्वयोर्विवक्षितत्वे ह्रस्वपरिमण्डलशब्दावपि भावप्रधानौ स्याताम् ततश्च ह्रस्वपरिमण्डलाभ्यां महत्वाणुत्वोपपत्तिवदित्यर्थः स्यात्, न चेत्थं वैशेषिकैरभ्युपगम्यते

२.२.११

"कारणबहुत्वात् कारणमहत्वात् प्रचयविशेषाच्च महत्' इति कारणादसूत्रे महत्वकारणानां परिगणितत्वादित्याशंक्याह - एवं भावप्रधानाभ्यामिति । अत्र कारणद्वयोपादानमिति ननु निरवयवात् परमाणोद्वर्यणुकोत्पत्तिवादेऽनुपपत्तिसत्वेन परमाणोद्वर्यणुकोत्पत्तिवद् अन्यत् तदभ्युपगतं सर्वमसमञ्जसमित्येतावति वक्तव्ये ह्रस्वाद् द्वयणुकात् महद्दीर्घत्र्यणुकोत्पत्तिः किमिति दृष्टान्तीक्रियते तत्रानुपपत्त्यभावादिति चेन्न, द्वयणुकात्परस्परसंयोगे तदवयवानामति संयोगावश्यम्भावेन षण्णामपि परमाणूनाम् एकपरमाणुमात्रपरमाणत्वापत्तेरिति दूषणस्य द्वयणुकात् ह्स्वात् महदीर्घत्र्यणुकोत्पत्तिसत्वेन

२.२.१२

तस्यापि दृष्टान्तीकरणीयत्वादिति दृष्टव्यम् ।। * ।। सिद्धेऽपीश्वर इति - अयम्भावः तत्पक्षे हि प्रलये सृष्टयभावः कस्य कारणस्य कैवल्येनोपपादनीयः,न तावददृष्टस्य, प्रलयेऽपि तस्य सत्वात्,नाप्यद्ृष्टविपाकस्य,तत्पक्षे फलकालागमस्य वा प्रति-बन्धककर्माभावसाहित्यस्य वा विपाकशब्दार्थत्वात्, तस्य सर्गकाल इव मलयकालेऽपि अनन्तप्राणिगतानन्तकर्ममद्ये केषु च कर्मस्ववर्जनीयत्वात् नापीश्वरसिसृक्षाया नित्यसर्वविषयायाः तदिच्छायाः कदापि सिसृक्षारूपत्वानपायात् सृःट्युप-योग्यदृष्टविपाकोपाधानरूपपारिभापिकसिसृक्षात्वस्यापि प्रलयसाधारणत्वात् ; न च प्रलयकाल एव प्रति- बन्धक इति वाच्यम्, प्रलय एव न सम्भवतीति वदन्तम्प्रति प्रलयाधारकालस्य सृष्टिप्रतिबन्धकत्वोक्तेरसंगतत्वात् ; न च कल्पावसानप्रभृति-द्विपरार्द्धकालः पूर्वसर्गकालसमानपरिमाणः प्रतिबन्धक इति वाच्यम्, सिद्धान्त इव क्षणलवनिमेषादिलक्षणस्वाभाविककाल-परिणतिविशेषानभ्युपगमात् ; सूर्यगतिलक्षणकालोपाध्यभावेन च एतावान्कालो द्विपरार्द्धकाल इति वक्तुम-शक्यत्वात् । सिद्धान्ते तु यथाशास्त्रं स्वाभाविकानां कालपरिणतिविशेषाणां क्षणलवादिभेदानां द्विपरार्धकालं जगत्सृजानीति, ततो द्विपरार्द्धकालं निरन्तरगतास्विन्नं जगद्विश्रमयानीत्येवंलक्षणसिसृक्षा सञ्जिहीर्पालक्षणेश्वरेच्छापरिणामविशेषस्य चाभ्युपगमान्नानुपपत्तिरिति ।। * ।। ननु समवायापलापे संयोगस्याप्यपलापः किन्न स्यादित्याशंक्याह - संयोगस्त्विति ।

२.२.१३

धर्मिकल्पनातो वरमिति । अत्र कलृप्तम् समवायं परिकल्प्य तस्य च सम्बन्धत्वकल्पनापेक्षायाः कलृप्तानापेवायुतसिद्धस्वरूपाणां सम्बन्धमात्रत्वकल्पनमेव लघ्वित्यर्थः । ननु समवायपक्षे समवामस्वतूपं तद्गतं सम्बन्धत्वञ्चेति द्वयमेव कल्पनीयम्, स्वरूप-सम्बन्धपक्षे तु अवयवावयविगुणाद्यनुगतस्य एकस्य सम्बन्दत्वस्याप्तवाद् अनन्तानि सम्बन्धत्वानि कल्पनीयानि इत्यस्ति, समवायकल्पने लाघवम्, नचाययवादिस्वरूपेषु तत्तदभावादिकं प्रति सम्बन्धत्वमपि कलृप्तमेवेति वाच्यम् । अभावादिनि-रूपितासम्बन्धत्वस्यावयवादिषु कलृप्तत्वेऽपि अवयवादिनिरूपितसम्बन्धत्वस्य कलृप्तवादिति चेत्, तर्हि समवायेऽपि तत्तन्नि-रूपकभेदेन सम्बन्धत्वस्यापि भिन्नतया अनन्यस्यापि कल्पनाप्रसंगात्, ननु तन्तुनाशे तन्तनिष्ठमवयाविगुणक्रियादिकं

२.२.१५

नश्यति, नतु तन्तुनिष्ठमपि तृणाति, अत्र विनिगमकापेक्षायां तन्तुसमवेतनाशत्वमेव प्रयोज्यमिति समवायः स्वीकार्य इति चेत् न, तन्तुनाशे तन्त्वयुतसिद्धाधेयनाश इत्युपपत्तेः ; न चैवं तन्त्वयुतिेसद्धस्य पटध्वंसस्यापि नाशप्रसंग इति वाच्यम् तर्हि त्वत्पक्षेऽपि तन्तुसमवेतजात्यादिनाशप्रसंगात् यदि तु समवेतानित्यनाशत्वं प्रयोज्यं तर्हि ममापि तुल्यम्, ध्वंसस्य नित्यत्वादित्यलमतिचर्चया । स्वरूपाभावादनित्यवमिति - समवायनित्यलवादिमते घटगतरूपस्य लागे घटमतसमवायस्थ नित्यतया

२.२.१६

नाशभावेऽपि रूपनिरूपिरसम्बन्धत्वन्नास्तीति वक्तव्यम्, यदि च रूपनिरूपितसम्बन्धत्वमपि समवायस्य स्वरूपमेव स्यात्

२.२.१७

तर्हि रूपनिरूपितसमवायत्वापायो नाम समवायापाय इत्येव प्रर्थ्यवसन्नमिति तस्यानित्यत्वं स्यादित्यर्थः ।। * ।। गन्धरस-रूपस्पर्शगुणेति - गन्वरसरूपस्पर्शा गुणा यस्या सा गन्धरसरूपस्पर्शगुणा ।। * ।। समुदाये कार्यविशेषे शरीर इति - तार्किका हि जाठरागपिना पच्यमाचानां मुत्पीताहारौषधरसद्रव्यरूपसागवयवानां प्रतिक्षणोपचयापच-यवैषम्यादवयवी शरीरमपि प्रतिक्षणमुपचयापचयवद् अन्यद्भवति, यद्यपि प्रतिक्षणं शरीरस्योपचयापचयदर्शनन्नास्ति तथापि वर्षाधारानिपातैः तटाकजलस्येव घटीयन्त्रोत्क्षेपणैः कूपजलस्येवान्ते तद्दर्शनादलौकिकं प्रतिक्षरं किञ्चित् किच्चिद् उपचयापच-यज्ञानमस्त्येव, चन्द्रतारकादीनां मुहूर्त्तादिकालव्यवधानेन बहुदेशान्तरव्याप्तिदर्शनात् प्रतिक्षणं स्वदेशान्तरप्राप्तिज्ञानवदित्यभ्युपगच्छन्ति; एवं प्रतिक्षणमवश्यम्भाविभिः खननपूरणादिभिः भूगोलकस्य नदीजलसंसर्गशीकरोत्पतनैः समुद्रजलस्य चोपचयापचयवतः क्षणिकत्वमभ्युपगच्छन्तीति भावः । भाष्ये - चतुर्विधा इति माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसञ्ज्ञाश्चतुविधा बौध्धाः, ते सर्वेऽपि आदिबुद्धस्य शिष्याः ते क्रमेण सर्वशून्यत्वबाह्यार्थानुमेयत्वाबाह्यार्थप्रत्यक्षत्ववादिनः, तत्र बुद्धया विविच्यमानानां स्वभावो नावधार्यते, अतो निरभिलप्यास्ते निरस्वभावाश्च दशिर्ताः । यथा यथा विचार्य्यन्ते विशीर्य्यन्ते तथा तथा - इत्यादिन्यायैः गुरुणा सर्वशून्यत्वं बोधितेषुे शिष्येषु ये गुरूक्तं तथैवाङ्गीकृत्य पर्य्यनुयोगं नाकुर्वन् ते गुरूक्तस्य श्रद्धयाऽङ्गीकरणाद् उत्तमाः; तत उपर्य्यनुयोगाकरणाद् अधमाश्चेत्युत्तमाधमत्वयोगात् "मध्यमां स्थितिमास्थिताः' इति

२.२.१७

माध्यमिकाः; ये तु बाह्यार्थानां शून्यत्वमङ्गीकृत्य कथं विज्ञानस्याऽपि शून्यत्वं जगदान्ध्यप्रसंगादिति पर्य्यनुयोगमकुर्वन् ते गुरूक्ताङ्गीकरणस्याचारसञ्ज्ञया बौद्धमते परिभाषितस्य तत उपर्य्यनुयोगस्य योगसञ्ज्ञया तन्मते परिभापितस्य सद्भावाद् योगाचाराः, गुरुणा तान्प्रत्यान्तरं विज्ञानमात्रमस्ति, तदेव नीलाद्याकारम्, नतु तद्व्यतिरेकेण बाह्यं नीलादिकमस्ति,सहो-पलम्भनियमेन नीलादीनां तत्तद्विज्ञानादीनां चाभेदसिद्धेः, गवाश्वावत् तन्नियमाभावप्रसंगात्, तदेव विज्ञानात्मकं नीलादि-कमनादिवासनावशात् वहिर्वदवभासत इति बोधिते कथं सर्वथैव बाह्यार्थस्य शून्यत्वं बाह्यस्य नीलादेरवभासात्, अहमुल्लेस्वेन विज्ञानस्यान्तरतया इदमुल्लेखेन नीलादेर्बाह्यतया च भेदेन भासमाने सहोपलम्भनियममात्रस्याप्रयोजकस्य अभेदसाधनाक्ष-मत्वात् सहत्वोक्तयैव भेदानुमतेश्चेति यैः पर्य्यनुयुक्तं तान् प्रति सत्यमस्ति बाह्यं नीलादिकम्, न तु तत्प्रत्यक्षम्, अनुत्पन्नस्य अविद्यमानस्य प्रत्यक्षायोगात्, उत्पन्नस्य क्षणिकस्य स्थित्यभावात्, किन्तु उत्पद्यमानं नीलादिकं विज्ञानेऽर्पयित्वा नश्यति ततो विज्ञानगतेनाकारेणातीतं नीलादिकमनुमीयत इति बोधिते सति तैरित्थं शिष्यप्रश्नानुराधेन कियत्पर्य्यन्तमुपदेशसूत्रं प्रवर्तिष्यत इति सूत्रस्यान्ते पृष्टे गुरुणाभिहितं भवन्तः सूत्रस्यान्तं पृष्टवन्तः सौत्रान्तिका भवन्त्विति; अतस्ते सौत्रान्तिकाः । ततो विज्ञान-नुमेयं बाह्यमितीयं विरुद्धाभाषा तस्यैव विज्ञानस्य तद्विषप्रत्यक्षत्वात् प्रत्यक्षस्य कस्यचिदपि अर्थस्याभावे व्याप्तिसम्वेदन-स्थानामावेनानुमाप्रवृत्तेश्च इति यैः पर्य्यनुयुक्तम् ते वैभाषिकाः, तान् प्रति बाह्यप्रत्यक्षत्वमप्युपदिष्टमिति चतुर्विधा इति भावः । चैत्तं रागादिकमिति - विज्ञानस्कन्धव्यतिरिक्तं स्कन्धचतुष्टयञ्चैत्तमित्यर्थ ः । चित्तचैत्तशब्दनिर्दिष्टं पञ्चस्कन्धीरूपमित्यो - रूप-विज्ञानवेदनेति ।

ज्ञौद्धोक्तमहमित्याकारकमालयविज्ञानगिन्द्रियादिजन्यं रूपादिविषयञ्च ज्ञानम् एतदृूंम् प्रवाहापन्नदण्डायमानं विज्ञानस्कन्ध इति वाचस्पतिनोक्तत्वात्, रूपादिज्ञानमपि विज्ञानस्कन्ध इति वदन्ति, सञ्ज्ञास्कन्धः सविकल्पकप्रत्यय इत्यर्थः । कुण्डली ब्राह्मण इत्येव रूप इत्यर्थः । शाङ्करभाष्यञ्चति - यद्यपि रूप्यमाणः पृथिव्यादयो बाह्याः, तथापि कायस्थत्वाद्वा, इन्द्रि-

२.२.१८

यसम्बन्धाद्वाभवन्त्वाध्यात्मिका इति वाचस्पतिमोक्तत्वात्, शाङ्करमाप्येऽप्युक्तप्रायमित्यर्थः । कदिदमाहेति । अन्यतरः पक्षो

प्राद्य इति भावः । प्रस्त्वन्तरत्वानम्युपगमादित्यर्थ इति । अभ्युपगमे तु नामान्तरेण आत्मैव वाभ्युपगत इति भावः । स्कन्धा-नामुपपन्नत्व इति - यद्यप्यणूनामुपपन्नत्वेऽपि अणुसंयोगभूतादेरनुपपत्तिवत् स्कन्धानामुपपन्नत्वेऽपि तत्समुदायात्मा पञ्चस्कन्धी नोपपद्यत इति शक्यते वक्तुम् तथापि रूपस्कन्धरूपस्य भूतेन्द्रियविषयलक्षणस्य अणुहेतुसंघातस्य अस्मिस्सूत्रे निराचिकीर्षित-तया तत्समुदायापत्तेरत्रापि दूष्यत्वादिति भावः ।। * ।। वृत्तिसिद्धः पाठ इति - ततश्चेतरेतरप्रत्ययत्वाद् उपपन्नमिति चेत्

२.२.१८

नोत्पत्तिमात्रनिमित्तत्वादिति पाठस्तु असाम्प्रदायिक इति पाठः । प्रत्ययशब्दो हेतुवानीतिः - तन्मते प्रलयशब्दस्य पारिमा-षिकत्वादिति भावः । ननु क्षणिकस्य चित्तसन्तानस्य कथं देशान्तरगमनकुक्षिप्रवेशादय इत्याशङ्कयाहः - दीपसन्तानस्येवेतिः । अत्र तृष्णा वाक्कायचेष्टेति क्वचित्पाठो दृश्यते, तत्र मध्ये लेखकदोषात् प्रन्थलेशः यतितः । एवं हि वांचस्पतिप्रन्थः- वेदनाया सत्यां कर्तव्यमेतत् सुखं पुनमर्येत्यध्यवसानं तृष्णाभाव इति, उपादानं वाक्कायचेष्टा भवन्ति, ततो भवो भवत्यस्माज्जन्मेति भवो धर्म्माधमौ, तद्धेतद्धेमस्कन्धप्रादुर्भावो जातिः । जातानां स्कन्धानाम् अपरिपाको जरास्कन्धानां नाशो मरणम्, प्रियमाणस्य साभिपङ्गस्य पुत्रकलत्रादिषु अन्तर्दाहश्शोकः तदुत्थः प्रलापः परिदेवनम्, पञ्च विज्ञानकार्यसंयुकप्तमसाध्वनुभवं दुःखं मानसं च दुखं दौर्मनस्यमिति, ननु वाचस्पत्ये - जन्मादिहेतुका अविद्यादयः अविद्याहेतुकाश्च जन्मादयो घटीयन्त्रवदनिशमावर्तमानास्-सन्तीत्युक्तम्, भाष्ये तु वेदनाद्यविद्याद्योरेवेतरताराश्रयणं प्रदृश्यते, किमत्र विनिगमकमित्याशङ्कय उभयथापिि नार्थभेद इत्याह - अविद्यादिभिर्वेदनादय इति । ।।* ।। क्षणिकपदार्थवाचीति - बौद्धमते वस्तुतः कालाभावेन खतो भङ्गरघटादेरेव क्षणपरिकल्प-

२.२.२०

नानिमित्ततवा क्षणिक इति व्यवहियमाणो घट एव क्षण्यत इति व्युत्पत्त्या च क्षण इत्यपि व्यवहियत इति भावः । भाष्ये - न कस्यचिदर्थस्य ज्ञानविषयत्वमिति, वर्तमानत्वग्राहिप्रत्यक्षविषयत्वान्न स्यादित्यर्थः ।। * ।। भाष्ये - इन्द्रियसम्प्रयोगज्ञानयौग-पद्यम् पसज्येतेति, वर्तमानत्वग्राहिप्रत्यक्षविषयस्योत्तरघटक्षणस्य इन्द्रियसम्प्रयुक्तपूर्वघटक्षणस्य च एकक्षणवृत्तित्वे इन्द्रिय-

२.२.२२

सम्प्रयोगज्ञानयौगपद्यप्रसंगेन कार्य्यकारणयौगपद्यप्रसं इत्यर्थः ।। * ।। भाष्ये - प्रतिसंख्याप्रतिसंख्यानिरोधशब्दाभ्याम् अभिधीयेतेति, संख्याबुद्धि। नाशप्रतीपा संख्या प्रतिसंख्या, तयः निरोधः प्रतिसंख्यानिरोधः। सन्तभिममसन्तं करोमीत्येवंरू- बुद्धेः प्रतीतत्वम् तद्भिन्नो निरोधः । यद्वा संख्य्ाविषयः तस्य प्रतिकूला तदसत्वग्राहिणी लौकिकानां बुद्धिः प्रतिसंख्या तया विषयीक्रियमाणषो निरोधः प्रतिसंख्यानिरोधः तद्विपरीतो निरोधोऽप्रतिसंख्यानिरोध इति भावः ।। * ।। भाष्ये - न च

२.२.२३

जगत्तुत्थात्मकत्वं भववद्भिरभ्युपेयत इति, उत्पत्तिदशायामपीत्यर्थः । उत्तरक्षणे तु निरन्वयविनाशेन तुच्छतापत्तेरभ्यपग-तत्वादिति दृष्टव्यम् । ननु जगतस्तुच्छेदुत्पत्तिर्नेङ्गीक्रियते, येन तुच्छात्मकत्वं स्यादित्यत आह - सता निरन्वयविनाश - इति ।। * ।। भाष्ये - ताभ्यां सह तुच्छत्वेनेति, "आकाशं द्वौ निरोधौ च नित्यं नियमसंस्कृतमिति सहपरिगणितस्येत्यर्थः । भाष्ये - श्येनादिपतनदेशत्वेनेति, नचात्रेति श्येनपतनाधारतया प्रतीयमानालोकाभाव एवास्त्विति वाच्यम्, अत्रालोक अत्रान्धकार इति आलोकान्धकाराधारतया प्रतीयमानस्य आलोकाभावरूपत्वासम्भवादितिभावः । भाष्ये - न च पृथिव्याद्य-भावमात्रमिति, निविडद्रव्याभावारूपावकाश एव अकाशशब्दार्थ इति वक्तुं शक्यम् । अत्यन्ताभावस्तु पृथिव्यादीनान्न सम्भव-तीति - केषाञ्चिदुत्पत्स्यमानानां प्राग्भावस्य केषाञ्चिदुत्पन्नानां ध्वंसस्य च सत्वेन सर्वेषामत्यन्ताभावसम्भवादिति भावः ।

२.२.२४

इदनुपलक्षणम्, प्राग्देशे निविडद्रव्यमस्ति, प्रत्यग्देशे तन्नास्तीति निविडद्रव्यतदभावाधारतया प्रतीयमानस्य प्राग्देशादे-र्निविडद्रव्याभावरूपावकाण्त्वासम्भवेन प्राग्देशादिबुद्धिबोध्यस्याकाशस्यावशायाभायुपगन्तव्यत्वादित्यपि दृष्टव्यम् । ननु नीरूपस्याकाशस्य कथमिह श्येन इत्यादि चाक्षुषप्रत्यक्षविषयत्वमित्याशङ्कयाह, भाष्ये - त्रिवृत्करणोपदेशेति ।। * ।। भाष्ये - अन्त्यघटक्षणसत्वात् पूर्वघटक्षणसत्वानीति, अन्त्यघटक्षणात् पूर्वघटक्षणाः विनाशिनः घटक्षणत्वात्, अन्त्यघटक्षणवदितिपर्य-वसितोर्थः । घटक्षणतत्सत्वयोरभेदात् सत्वमिति व्यवहृतमिति दृष्टव्यम् । अत एव वक्ष्यति -अन्त्यक्षघटक्षणस्य हेतुतो विना-शदर्शनादित्यादि । प्रकरणसमत्वमुक्तमिति - पूर्वं साध्यविपरीतस्यापि साधकमित्युक्तम्, इदानीं साध्यविपरीतस्यैव साधक-

२.२.२४

मित्युच्यत इति भेद इति भावः । व्यापारासम्भवादिति - व्याख्येयं पदम्, व्यापाराश्रयत्वव्यापारहेतुत्वयोरन्यतराभावे व्यापारि-त्वमेव न सम्भवतीति भावः । समीहितविपर्ययसाधन इति - विपर्ययमात्रसाधन इत्यर्थः । ततश्च किञ्चेत्यादिना विरुद्धत्वमुच्यते, ततत्पूर्वमाष्येण प्रकरणसमत्वमुच्यत इति भेद इति भावः । भाष्ये - मुद्गरादिहेतुतूपनिपातादिति, प्रागिति शेषः; आमुद्गरादिहे-तूपनिपातादिति पाठस्तु सुगम एव; भाष्ये विनाशस्य कपालोत्पत्तिव्यतिरिक्तत्वाभ्युपगमेपीति योजना, ननु प्रत्यभिज्ञायाः किमिन्द्रिवं कारणम्, उत संस्कारः, न तावदिन्द्रियम्, तत्तांशे सन्निकर्षाभावात्, नापि संस्कारः, अननुभूते तत्तांशे संस्का-रासम्भवातथ, इत्याशङ्कयाह, - न च प्रत्यभिज्ञाया इति । एकज्ञातयैवावभासमानत्वादिति - तदिदं साक्षात्करोमीत्यनुभववलात् सर्वांशेऽपि साक्षात्कारत्वमेव, न च तत्तांशे सन्निकर्षाभावात् प्रत्यक्षत्वाभावश्शङ्कनीयः, संयुक्तविशेषणतायाः संस्कारस्य वा प्रत्या-सक्तित्वोपपत्तेः, यदि च तयोर्न प्रत्यासक्तित्वं तर्हीदं रजतमिति ज्ञानस्य धर्मंशे प्रमात्ववत् तत्तांशे परोक्षत्वेऽपि बाध-काभावादिति दृष्टव्यम् । । * ।।

भाष्ये - ज्ञाने स्वाकारं समर्प्येति, एवं हि तन्मतास्थितिः, अर्थेन्द्रियसन्निकृष्टे सति तेनार्थेन जायमानं ज्ञानम्

२.२.२५

अपरोक्षरूपं न बाह्यार्थविषयकं किन्तु तदेव ज्ञानमर्थवत् नीलाद्याकारं भवति, तच्च ज्ञानं स्वप्रकाशतया स्वात्मानं स्वप्रकाशतया स्वात्मानं विषयीकुर्वन् स्वगतं नीलाद्याकारमपि विषयीकरोति, अतो न नीलादिज्ञानस्वापरोक्ष्यविरोधः, नापीन्द्रियव्यापारानुविवानविरोधश्च, तदनन्तरं ज्ञानगतनीलाद्याकारेण बाह्यार्थानुमितौ सत्यां तद्वशात् बाह्यार्थ-प्रवृत्तिर्भवति, नापरोक्षज्ञानात्, यथा वायुनिषेवणार्थिनः शास्वाचलनं दृष्टवा वृक्षमूले प्रवृत्तिः न चाक्षुषशाखाचलनज्ञानात्, किन्तु तन्मूलकवायुसञ्चारानुमानदिति, ततश्च यस्मिन्नपरोक्षज्ञाने विषयस्य स्वाकारसमर्पकत्वं न तस्मिन् ज्ञाने बाह्यार्थस्य विषयत्वम्, यत्र चानुमितौ विषयत्वं न तत्र स्वाकारसमर्पकत्वम्, अनुमितिपूर्वक्षणे इन्द्रियसम्प्रयुक्तस्य घटक्षणस्य नष्टत्वा-दिति चेन्न स्वाकारसमर्पणादिपरम्परया हेतुत्वेन विषयत्वमिति भावः । योगाचारमतमाशङ्गयेति - इदमत्तरसूत्रे स्पष्टीभविष्यति । भाष्ये - नीलज्ञानसन्ततावित, अनुवर्तमानायामिति शेषः, । न केवलं धर्ममात्रस्येति - इदमुपलक्षणम्, परोवर्तिगतनीलादि-संक्रमणे तद्गतबाह्यत्वजडत्वादीनां संक्रमप्रसंगः, न चेष्टापत्तिः, तथा सति स्फटिके लौहित्यसंकात्तौ तद्विराधिनः शौक्लयस्यान-

२.२.२७

वभासवत् बाह्यार्थत्वजडत्वादिसंक्रान्तौ तसद्वरुद्वज्ञानत्वान्तरत्वादेरनुपम्भप्रसंगादित्यपि दृष्टव्यम् ।। इति समुदायधिकरणम् ।। ३ ।। चरमज्ञानं विजातीयोत्पादनशक्तमित्यर्ध इति शक्तेः कार्येण कारणेऽनुमेयत्वादितिभावः । न च कपालाकारज्ञानस्य घटाकार-

२.२.२७

ज्ञानप्रवाहो न वासनेति तस्य न वासनाजन्यत्वं समर्थितं स्थादिति वाच्यम् व्यवहितस्य कालान्तर्य्यकपालज्ञानप्रवाहस्य वासना-त्वासम्भवात् मनुष्यशरीरानन्तरं तिर्य्यभ्योर्नि गतस्य मनुष्यजन्मव्यवीहततिर्य्यग्योनिवासनायाः कार्यकरत्वदर्शनादिति भावः । बहिर्वदवासो भ्रमकृत इति - यथा उपरि स्थिनानां नक्षत्राणां भूमिष्ठत्वङ्गमः तद्वदिति भावः । भाष्ये - सहोपलम्भनियमाच्चेति, नीलादिकं ज्ञानाभिन्नं ज्ञानसहोपलम्भनियमत्वात्ल ज्ञनवत् द्वितीरचन्द्रवच्चेत्यनुमानमिह विवक्षितम्, तत्स्ववचनाविरुद्धम्, साहित्यस्यार्थभेदहेतुत्वादिति भाष्यं व्याचष्टे, साहित्य ं द्वयोरेवेत्यारभ्य - असाधारणानैकान्तिकत्वमित्यन्तेन, भाष्ये तदर्थव्य-

२.२.३०

वहारयोग्यतैकस्वरूपस्य ज्ञानस्य तेन यः सहोपलम्भनियमः तस्मादवैलक्षण्यसाधनमिति तच्छब्दानुरोधेन यच्छब्दमध्याहृत्य एकवाक्यतया अन्वयो वक्तव्यः ।। * ।। ।। इति उपलब्ध्यधिकरणम् ।।

२.२.३०

अन्यथा वेति पक्षस्य भाष्ये दूषराभावामाशङ्कयाह - उभयात्मकत्वेचेति । पराभ्युपगमप्रकारेणेति - सिद्धान्त्यभ्युपगतप्रकारेणे-त्यर्थः । ननु "नेष्टं तदपि धीराणां विज्ञानं पारमार्थिकम् । एकानेकस्वमावेन वियोगाद्वियदव्जवत् । न सन्नासन्नसदसन्नचाप्य-नुभयात्मकम् । चतुष्कोटिविर्निमुक्तं तत्वं माध्यमिका विदुः । इति चतुष्कोटिविर्निमुक्तस्यैवोक्तेः कथं सत्वासत्वयोः एवं तावदित्याशङ्कय चतुष्कोरितिर्निमुक्तत्वमपि सदात्मना असदात्मना सदसद्विलक्षणात्मना च असत्वमिति असत्वकोटावेव

२.२.३०

पर्यवस्यतीत्यभिप्रायेण आह - न हि शून्यवादिन इति । उभयात्मकत्वे च अवस्थान्तरापत्तिरेव उक्ता स्यादिति अमुमर्थं सिंहा-वलोकितकेनोपपादयति । घटस्स्वापेक्षयेत्यादिना- अणुहेतुको भूतभौतिकसंहतिरूप इति -अणुहेतुको भूतभौतिकसंगो बाह्यः, चित्तच्चैत्तात्मा आन्तरः पञ्चस्कन्धारम्भः पञ्चस्कन्धीरूपश्च समुदायो बाह्य उभयहेतुकः समुदाय इति परैरपरैश्चोक्तमित्यर्थः । ज्ञानमिथ्यात्वार्थसत्यत्वयोरन्यतरप्रसंगादिति - उभो रैक्यज्ञानस्य सत्यत्वेऽर्थस्यापि सत्यत्वं स्यात्, अर्थस्य मिथ्यात्वे ज्ञानस्यापि

२.२.३०

मिथ्यात्वं स्यादित्यर्थः । यद्वाऽर्थेनाश्रेयणेनेति - यद्यपि शाष्कयभाष्ये नेयं व्याख्यास्पष्टं प्रतीयते; अर्थानुपलब्धिपरतयैव

२.२.३१

व्याख्यातत्वात् । वासनानुपलब्धिपरतया व्याख्यानादर्शनात्, तथाऽप्यभिप्रेतत्वसम्भवाद्वाएवनुक्तमिति दृष्टव्यम् ।

अन्ये त्वित्यादि - शून्यवादिनिरासपरतया व्याख्यातसिति; "नाभाव उपलब्धेः' "वैधर्म्याच्च न स्वप्नादिवत्' इति सूत्रद्वयं सिद्धान्त इव तन्मतेऽपि योगाचारमतनिराकरणपरत्वात् नोद्भावितमिति दृष्टव्यम् ।
अर्थसद्भावप्रतिधेधरूपेण वैषम्यस्येति - ज्ञानास्तित्वं वैभाषिकसौत्रास्तिकयोगाचाराणां त्रयाणामपि सामानम्, तत्र चाद्ययोरर्थस ूद्भावप्रतिषधवादि निराकरणमिष्ट -मिति भावः । नापि स्वयमसदिति - असतः पदार्थात् उतपत्तिर्नास्ति, असतः पदार्थस्योत्पत्तिर्नास्तीति प्रतिज्ञाद्वयं सूत्रे विवक्षितमिति भावः ।। ।। इति सर्वथानुपपत्त्यधिकरणम् ।।

२.२.३१

भाष्ये - पञ्चास्तिकाया इति चेति, अस्तीति कायन्ते शब्द्यन्त इत्यस्तिकायव्युत्पत्तेरिति भावः । भाष्ये - आकाशस्तिकाय इति, आकाशास्तिकायमपि द्वेधा वर्णयन्ति, लोकाकाश आलोकाकाए इति, उपर्य्युपरि स्थितानाम् आलोकानामन्तर्वर्त्ती लोकाकाशः, तेषानुपरि मोक्षस्यानमालोकाकाशः तत्र न लोकाः सन्ति उक्तञ्च "गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः । अद्यापि न निवर्तन्ते त्वालोकाकाशमार्गगाः' ।। भाष्ये - मोक्षोपायश्च गृह्ीत इति, यद्यपि सम्वरशब्देनैव मोक्षसाधनमप्युक्तमेव, आस्त्रवो भवहेतुस्स्यात् सम्वरो मोक्षकारणमिति तथापि सम्वरशब्दविवक्षितमोक्षकारणविशेषातिरिक्तस्योपायस्याऽपि संग्रहार्थमिदमुक्तमिति दृष्टव्यम् । भाष्ये - भोगोपकरण-मिन्द्रियादिकमिति "आस्त्रवः कर्मणा बन्धः निर्जरस्तद्विमोचन"मिति जिनदत्तवचनं मतान्तराभिप्रायेणेति दृष्टव्यम् । भाष्ये - घातिकर्मचतुष्टयमघातिकमचतुष्टयञ्चेति, ज्ञानावरणीयं दर्शनावरणीयं मोहनीयम् आन्तरायकं

चत्वारिघातिकर्माणि, वेदनीयं नामिकंगोत्रिकम् आयुष्कञ्चेति चत्वार्यघातिकर्माणि, तत्र सम्यग्ज्ञानं न मोक्षसाधनं नहि ज्ञानाद्वस्तुसिध्धिः, अतिप्रसंगादिति विपर्ययो ज्ञानावरणीयं कर्मोच्यते, आहितदर्शनाभ्यासान्न मोक्ष इति ज्ञानं दर्शनावरणीयम्, बहुषु विप्रतिषिद्धेषु तीर्णकरैरुपदर्शितेषु मोक्षमार्गेषु विशेषानवधारणीयम् बहुषु विप्रतिषिद्धेषु तीर्थकरैरूप- दर्शितेषु मोक्षमार्गेषु विशेषानवधारणीयम् मोहनीयं कर्म, मोक्षमार्गप्रवृत्तानां विघ्नकरं विज्ञानमान्तरायिकं कर्म, "तानीमानि श्रेयोहन्तृत्वात् घातिकर्माणि उच्यन्ते, शुक्रशोणितव्यतिकरे जाते मिलितं तदुभयस्वरूपं आयुः काय इति कथयति इत्युत्पा-

दनद्वारेणेत्यायुष्कम्, तस्य देहाकारेण परिणामशक्तिर्गोत्रिकम्, शक्तौ सिद्धायां तस्मिन् बीजे कलिलबुद्बुदात्मतारम्भक-क्रियाविशेषो नामिकम्, धर्त्रीवबीजस्य तेजः पाकवदीषिद्धनीभावशरीराकारपरिणामहेतुर्वेदनीयमिति चत्वार्थ्यपि श्रेयो हन्तृत्वाभावात् अघातीनीति तेषां प्रक्रिया, भाष्ये - तप इति, तप्तशीलारोहणादिकमित्यर्थः । भाष्ये - सम्वरो नामेति, सम्वृणोति इन्द्रियप्रवृत्तिमिति व्यत्पत्त्या गुप्तिसमित्यादिकं मोक्षसाषनं सम्वर इत्युच्यते, कायवाकानोनिग्रहो गुप्तिरिति जैनानां परिभाषा, भूमिगतं जन्तुर्हिसापरिहाराय प्रहते मार्गे सम्यगादित्यरश्मिप्रकाशिते निरीक्ष्य सञ्चरणम्, मितभाषणम्, नियताहारनिषेवणमित्यादिकं समितिरिति परिभाष्यते । भाष्ये - आत्मस्वरूपाविर्भाव इति निवृतसमस्त-क्लेण्स्य लोकाकाशा-वस्थानं मोक्षमित्येके, पञ्चरमुक्तशुकस्येव जलनिमज्ज्नप्रक्षीणपङ्कलेपः शुष्कालाबुफलस्येव धर्माधर्मास्तिकायबद्धविनिर्मुक्तस्य सततोध्वैगमना मोक्ष इति केचिदाचक्षते। भाष्ये - स्यादस्तीति, स्याच्छब्दो तिङन्त-प्रतिरूपको नैकान्त्यद्योतकः सत्त्वासत्त्व-सदसद्विलक्षणत्वरूपाश्चत्वारः पक्षाः, तत्र च सदसद्विलक्षणत्वसत्वासत्व-सदसत्वमेलनैः अयः पक्षाः इत्येव सप्तपक्षवादिभिः उत्प्रेक्षितुं शक्याः, ते सर्वेऽपि पक्षाः जैनैः स्वाङ्गीकृतसर्वपदार्थेषु हीषदीषदङ्गीक्रियन्ते । पर्य्यायोऽवस्थेति - तन्मते पर्याण्शब्दस्य अवस्थासु परिभाषितत्वादिति भावः । द्रव्यस्य सत्वादिकमुपपन्नमित्यर्थ इति - भास्करादिमत इव जात्यात्मना एकत्वं व्यक्तयात्मनाऽनैकत्वमित्याद्यविरोध-निर्वाहकाकारान्तरमनपेक्षितमितिभावः, ननु सत्वासत्वादिसमावेषस्य आकारभेदेनैव परेण उपन्यस्ततया सर्वस्यैव सत्वासत्वसमावेषस्यानुक्तेः कथं तत्प्रतिषेध इत्याशङ्कयाह - सत्वासत्वविरोधो नाकारभेदेनेति । भाष्ये - तदानीमेव नैतद्विपरीतेति, ननुएकस्मिन्नपि देशकालाद्युपाधिभेदेन यथा सत्वासत्वादिविरुद्धधर्मसमावेशः, तथा

उपाधिभेदं विनाष्यस्तु, तत्र लोकसिद्धानि प्रमाणानि सन्तीति चेदिहापि सन्त्येव प्रपञ्चसत्वासत्वादिकं व्यवस्थापयत् तैस्तैर्वादिभिरुपपादितानि तानि तानि प्रमाणानि, अत एवोक्तम् - स्याद्वादमञ्जर्याम्,"अन्योन्यपक्षप्रतिपक्षभेदात् यथा परे मत्सरिणः प्रथानाः । न यानशेषा न विशेषमिच्छन् न पक्षपातिस्समयस्तथा ते' इति वस्तुतो देशकालाद्युपाधिभेदोऽपि सर्वत्र न सम्गवति, स देश इह नास्ति, स काल इदानीन्नास्तीत्यादिप्रतीतौ देशकालाद्युपाध्यन्तराभावात्, तत्राप्युपाध्यन्तरान्वेषे-णाऽनवस्थानात्, इतरानङ्गीकार इत्थम्, परं गुडजिह्विकान्यायेन देशकालाद्युपाधिभेदमन्तर्भाव्य सत्वासत्वप्रतीतिरुपन्यस्यते, वस्तुतो सवमृष्यमाना सा निरुषाधिक एव सत्वासत्वादिसङ्करे प्रमाणम्, अत एव स्याद्वादिनो "घटोऽस्ति घटो नास्ति पटस्सन् पटोऽसन्' इत्यादि प्रत्यक्षप्रतीतिमेव सत्वासत्वाद्यनैकान्तिके प्रमाणमुपगच्छन्ति । सर्वमनैकान्तिकं वस्तुत्वात् चित्रपट-वदित्यानुमानमपि प्रमाणयन्ति । नहि चित्रपटे नीलपीताद्यसङ्करार्थं प्रदेशभेद आश्रयितव्यः, प्रदेशभेदासङ्करार्थं उपाध्यन्त-रान्वेषणेऽनवस्थानात्, एतेन संयोगतदभावाद्यसङ्करोपि प्रत्याख्यातः, तस्मात्सर्वं वस्त्वनैकान्तिकमेवेति

स्याद्वादरहस्यमिति चेत् - उच्यते, परस्परधर्मसमावेशे सर्वानुभवसिद्धस्तावदुपाधिभेदो नापह्नोतुं शक्यते लोकमर्यादामनुसरता देशकालादिसत्व-निषेधेऽपि देशकालाद्युपाध्यवच्छेदोऽनुभूयत एव, इह आत्माश्रयः परस्पराश्रयोऽनवस्था वा न दोषः, यथा प्रमेयत्वाभिधेय-त्वादिप्रवऽत्तौ, यथा च बीजाङ्कुरादिकार्यकारणभावे विरुद्धर्मसमावेशे सर्वदोषाधिभेदं प्रत्याचक्षाक्षस्य चायमस्याः पुत्रोऽस्याः पतिरस्याः पिता अस्याः श्वशुर इत्यादि व्यवस्थाऽपि न सिद्धयेदिति कथं तत्र तत्र स्याद्वादिनो मातृत्वाद्युचितानं व्यवहारान् व्यवस्थयाऽनुतिष्ठेत् सर्वबहिष्कार्योऽपमनेकान्तवाद इत्यत्तं विस्तरेण, । नास्तित्वशङ्कानिरवकाशेत्यर्थ इति - ततश्च कालस्या-स्तिकायशब्दवाच्यत्वं कुतो न भवेदिति भावः ।। * ।। एवंशब्दं व्याचष्ट इति । अध्याहृत्य व्याचष्ट इत्यर्थः । भाष्ये - हस्त्यादिशरीरेऽवस्थितस्येति, हस्त्यादिशरीरात् पिपीलिकादिशरीरं प्रविशतस्तत्रामान्तमंशं विहाय प्रवेशस्स्यादिति जीवस्य

२.२.३३

पूर्वावस्थातो विकल्पत्वरूपमकार्त्स्न्यं प्रसज्येतेत्यर्थः । इदमुपलक्षणम्, मशकदेहात् मातङ्गदेहं प्रविशतः व्यापनसमर्थ-परिमाणं नास्तीति तत्र तस्य सर्वाङ्गीणसुखादिकं न स्यात्; किञ्च जीवस्य देहेपरिमाणत्वे योगसिद्धस्य कायव्यूहपरिग्रहे कृत्स्नदेहव्यापित्वं न सम्भवतीति तस्य अनेककायाधिष्ठानत्वं न स्यादित्यपि दृष्टव्यम् ।। * ।। अवस्थाभेदेनाविरोथवर्णन इति - अवस्थाभेदोपग-माभ्यामविरोधवर्णने प्रसक्ते विकारित्वमुपपादयन्तीति योजना, एवं हि परेषां सूत्रावतारिकाभाष्यम् । अथ पर्यायेन बृहच्छरीर-प्राप्तौ केचिज्जीवावयवा उपगच्छन्ति, तनुशरीरप्राप्तौ केचिदपगच्छन्ति इत्युच्यते, तत्राप्युच्यते न च पर्य्यायादप्यविरोधो विकारादिभ्यः'इति । वृक्षादिगतवृद्धिक्षयादिव्यावृत्तिरिति - न ह्यत्र सूत्रे पर्य्यायशब्देन वृद्धिक्षयौ विवक्ष्येते, येनावयवोपगमापगमयोवश्यम्भावस्स्यात्, किन्तु सङ्कोचविकासावेव, जैमिनैरपि सङ्कोचविकासमात्रस्यैवाभ्युपगतत्वाति भावः । निरुपाधि-

२.२.३४

कधर्मत्वादिति - "विज्ञातुर्विज्ञातेर्विपरिलापा े विद्यते' इति नित्यत्वस्य शास्त्रप्रतिपन्नत्वात् "श्रुतेस्तु शब्दमूलत्वात्' इति न्यायात् यथाप्रमाणमभ्युपगन्तव्यत्वात्, युक्तयनुसारेण कल्पयतां तु जैनानामयं दोषो भवत्येवेति भावः । ।। * ।। अत्र परैरात्मकालगताद्यमध्यपरिमाणे नित्ये, आत्मपरिमाणत्वात्, अन्त्यपरिमाणवत्, ततश्च वयाणामपि आद्यमध्यमान्त्य-परिमाणानां नित्यत्वात् सर्वशरीरेषु तुल्यत्वं स्यात्; न तु शरीरभेदेनावयवोपचयापचयलक्षणपरिणामभेदः, अत्र पक्षे सौत्र उभयशब्द आद्यमध्यमपरिमाणपरः, परिमाणत्रयाभ्युपगमादिति एका व्याख्या, द्वितीया तु मोक्षकालगतात्मपरिमाणस्य नित्यत्वात्, तस्य च भूत्वाभावित्वानुपपत्तेः, प्रागपि तदस्तीति तद्विरुद्धपरिमाणायोगात्, आद्यं मध्यमञ्च परिमाणं तदेवेति आद्यमध्यमकालयोरपि एकपरिमाण एव जीवः स्यात्, न च शरीरभेदेन परिमाणभेदस्स्यात्, अत्र च पक्षे सौत्र उभयशब्द आद्यमध्यमावस्थापरः, न तु पूर्वपक्षवत् आद्यमध्यसपरिमाणपरः, परिमाणभेदाभावात् - सति व्याख्याद्वयं कृतम् । तदेतदनुवदति । अन्त्यावस्थितेश्चान्त्यपरिमाणस्य नित्यत्व इत्यादिना - अत्र चाऽन्त्यपरिमाणस्य नित्यत्वे आत्म -परिमाणत्वाविशेषेण आद्यमध्यमपरिमाणयोरपि नित्यत्वादविशेषः, एकशरीरपरिमाणता च स्यात्, एकशरीरत्वं नित्य-सकलपरिमाणः स्यात्, ततश्च उपचितापचितशरीरप्राप्तिर्न स्यादिति परे, अन्त्यपरिमाणस्य नित्यत्वे तस्याभूत्वाभावि-त्वानुपपत्तेः प्रागापि तदस्तीति तद्विरुद्धपरिमाणाविरोधायोगाध् आद्यं मध्ममञ्च परिमाणं तदेवेति उभयोराद्यमध्यमावस्थयोः

२.२.३४

अन्त्यपरिमाणस्य नित्यत्वादविशेषः सर्वदाऽणुत्वमेकरूपं महत्वं स्यादिति, ते चापरे च योजनान्तरमाहुरिति पाठः समी चीनः, एवं विविच्यकल्पतरुणा व्याख्यातत्वात्, अर्थौचित्याच्चेति वदन्ति । भेदाभेद इति नाममाि◌ं कृतं स्यादिति - अत्र क्रमो विवक्षितः, अभेदो भेद इति च नाममात्रं कृतं स्यादित्यर्थः । बहुप्रतियोगिकमिति - घटत्वं बहुसाधारणमित्युक्ते बहुत्वस्य भेदगर्भत्वात् साधारण्यं भेदसहमिति भावः । साधारणाकारस्य भेदसहत्वमुपपादयति । विरोधिधर्मानाश्रयत इति - अभेदस्य स्वाभावरूपत्वादिति । यदा न भिनत्ति तर्हि भेदाभावरूपस्याऽभेदस्य सत्वात् भेदात्मा घटादिरेव न स्यादित्यर्थः । विवसनादिति - जैनादेरित्यर्थः । पर्य्यायानपेक्षमाणस्येति - अविरोधनिर्वाहकान्तरनिरपेक्षमेव स ब्रूते, वयन्तु तत्सापेक्षमेव ब्रूम इति चेदित्यर्थः । भिन्नाभिन्नत्वाभ्युपगमादिति - यादवभास्कराभ्यामिति शेषः । ननु अवस्थातद्वतोरवस्थान्तरकल्पकाभावादेव तन्निरपेक्षमेवावस्थातद्रतोर्भिन्नाभिन्नत्वमभ्युपगम्यते - इत्याशङ्कयाह - यथैकस्य द्रव्यस्येत्यादिना । द्रव्यस्यावस्थान्तरसा-पेक्षत्वादिति - अवस्थावन्निरूपितयोः अवस्थावद्गतयो-र्भेदाभेदयोरवस्थायाः स्वपरनिर्वाहकतया निर्वाहकान्तरनिपेक्षत्वेऽपि अवस्तानिरूपितयोः अवस्थावद्गतयोः भेदाभेदयोः निवोहकावस्थान्तरस्यापेक्षितत्वादिति भावः । ययावस्थयेति - ययावस्थया साकमित्यर्थः । नाम्नि विवाद इति - पटत्वावस्थाया एव भिन्नाभिन्नत्वमिति परिभाषा कृता स्यादित्यर्थः । श्वश्रूभिक्षापतिक्षे-

२.२.३५

पायेतेति - वेदान्तिनामस्माकं सर्ववस्त्वनैकान्त्यवादो युज्यते, न तु जैनानामिति वदन् सूत्रकारः श्वश्रूभिक्षाप्रतिक्षेपं कुतो नानुसरेदित्यर्थः । त्वपक्षे दोष इत्याह - अविशेषशब्देनेति । ।। * ।। ।। इति एकस्मिन्नसम्भवाधिकरणम् ।।

२.२.३५

सिद्धान्ते व्याघातमाह - मुद्रिकेतरति । बहुषु तन्त्रेष्वक्ता इति - मुद्रिकाषट्कधारणभगासनस्थात्मध्यानादिकं क्वचित्तन्त्रे निःश्रेयससाधनतयोक्तम्, तन्त्रान्तरे तद्विरुद्भसुराकुम्भस्थापनतत्स्थदेवातारचनादिकं निःश्रेयसाधनतया वर्णितम्, एवं

२.२.३६

नानातनि◌ोक्तानि साधनानि क्रमेण मुद्रिकाष्ट्कधारणभगासनस्थात्मध्यान - इत्यादि भाष्ये परिगणितानीत्यर्थः ।। * ।। भाष्ये - शास्त्रयोनित्योनित्वादित्यत्र दोषस्योक्तत्वादिति, तच्छरीरं नित्यत्वाविरोधाद् इश्वरासिध्धेः, नाष्यनित्यम्त तद्वयतिरिक्तस्य तद्धेतोः तदानीमसम्भवदित्यादिनोक्तत्वादित्यर्थः ।। * ।। ननु जगच्छरीरं परमात्मानमभ्युपगच्छता

२.२.३८

सूत्रकारेण शरीरवत्वे भोगादिप्रसङ्ग इति वक्तुं न शक्यत इत्याशङ्कयाह - अशरीरत्वाभ्युपगमेन परिहार इति । अशरीरत्वानभ्यु-पगमेनेति - शरीरत्वेऽपि तस्य उभयीलङ्गत्वप्रतिपादकशास्त्रवलात् न भोगादिप्रसंग इति भावः ।। * ।। ।। कृतकरत्वप्रसङ्ग इति ।। ततश्च नेदमधिकरणं वेदविरुद्धार्थत्वज्ञापनपरम्, अपि तु प्रतिपन्नस्य

वेदाविरोधस्यपातप्रतीत्वसमर्थनपूवर्कं श्रुतिशैवागम-योरविरोधनयनपरभेवेति भावः । अविरोधे निनीषीतेऽपीति - अस्मिन्नधिकरण इति शेषः । तत्स्वारस्यभञ्जक इति -श्रुतिस्वा-रस्यभञ्जक इत्यर्थः । बाधविकल्पसमुच्चयसङ्कोचैरिति - बाधरूपैः विकल्पसमुच्चयसङ्कोचैरित्यर्थः विकल्पो हि पाक्षिकवाधः, समुच्चयश्श्रुतनैरपेक्ष्यबाधः, सङ्कोचस्तु एकदेशबाधः, सर्वात्मना श्रुतिबाधे विवक्षितेऽविरोधनयनासम्भवादिति दृष्टव्यम् । श्रेद्धकल्पस्थमांसविधानेनेति - श्राद्धकल्पस्थगवालम्भविधानेनेत्यर्थः, मांसविधानमात्रस्य " न हिंस्या'दिति निषेधविरो-धाभावात् सङ्कोचकत्वाभावात्, पत्रीसंयाजेषु "ज्याधिन्या पत्रीस्संयाजयन्ती'ति पत्नीसंयाजार्थतया विहिताया आलम्भमन्तरेण क्रियादिनां स्वतस्सिद्धज्याधिन्या एवाग्रहणस्य "ज्याधिनी चैकदेशत्वा'दिति तार्त्तीयाधिकरणसिद्धतया तद्वदेव

२.२.३८

मत्स्यहरिणरुरुशशकूर्मवराहमेषमांसैः सम्वत्सराणि वार्ध्रीणसेन कालसाकछागलोहखड्गमांसैर्मधुमिश्रैश्चानन्त्यमिति विहित-मांसस्यान्यथाप्युपपत्तेरिति दृष्टव्यम् युगान्तरेऽनुष्ठानमस्तीत्यस्वरसादाह - यद्वा वह्वर्थविरोध इति । आचान्तेन कतर्व्यं दक्षिणा-चारेण कर्तव्यमित्यादिस्मृतीनां वेदं कृत्वा पेदिरिति कमप्रतिपादकश्रुतिसङ्कोचकत्वस्य शिष्टाकोपाधिकरण सिद्धत्वादिति भावः । तत्वविरोधश्च दुष्परिहर इति - ननु श्रीपाञ्चरात्रेऽपि यन्त्रविशेषादिषु लक्ष्मीसुदर्शनादीन् प्रति वासुदेरड्गत्वप्रतिपादकवनेऽपि कथञ्चिदविरोधसमर्थनेन यथे तत्प्रामाण्यनिर्वाहः, न तु तत्वविपर्यासप्रतिपादनेन अप्रामाण्यमङ्गीक्रियते, एवंपाशुपतागमेऽपि चेन्न, श्रीपाचरात्रशास्त्रस्य आपादचूडं नारायणप्रतिपादकस्य मध्ये तद्विपर्यासप्रतिपादकत्वेनावभासमानस्य द्वित्रिवाक्ये-ष्वेकस्यान्यथानयनं युक्तम्, पाशुपतागस्य तु आपादतूडं विपर्यासप्रतिपादकस्य मोहनार्थत्वेन पुराणसिद्धस्य आन्यपर्यकथनं न पण्डितहृदये पुण्डतरकमधिरोहतीति भावः । शेषा वैडालिका भवन्निति - महापराधानां वाभ्रव्यशाण्डिल्यव्यतिरिक्तानां

२.२.३८

वैदिकनिश्वाससंहितानुप्रवेशाभावात् वैडालिकत्वं प्राप्तमित्यर्थः, "यस्य धर्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः । चरितानि च

२.२.३८

पापानि वैडालव्रताम तद्व्रतम्' ।। इति हि स्मर्यते । तृतीयार्थे षष्ठीति - "कृत्यानां कर्क्षरि च" इति कर्तरि षष्ठीत्यर्थः । अर्ह-द्बुद्धाधिकृतस्य अशास्त्रीयस्य कथं यजनरूपत्वमित्याङ्कयाह - यजनरूपतोक्तिरिति । तदभिप्रायेणेति - बुध्धार्हतभीष्माद्यभि-

२.२.३८

प्रायेणेत्यर्थः । ननु "अहं तमोतिरिक्तैर्यष्टव्य" इति भगवद्वाक्ये कथं भगवतो यष्टव्यत्वमुच्यते, नहि तमोनिष्ठा भगवन्तं कथञ्चिद् यजन्ति, तेषां रुद्रमात्रयाजकत्वादित्याशङ्कयाह - अहमिष्टव्य इत्युक्तिरिति । नतु तदभिप्रायेणेति - तामसजनाभिप्रायेणेत्यर्थः । मध्यमश्लोकोक्तमिति - यद्वेदबाह्यं कर्मोति श्लोकोक्तमित्यर्थः । एवमुक्तस्ततस्त;नति - एवमुक्तोऽहम्प्रकाशः कृतः स्वात्मा गोपित इति योजना । त्रयीबाह्यादिकारत्वस्य व्यस्थितत्वादिति - न चैवमथर्वशिरः पुरोक्तपशुपतिशरीरकब्रह्मविद्यानुष्ठानं वैदिकं वक्ष्य-

२.२.३८

माणं त्रयीबाह्यपाशुपतानां कथमुपपद्यत इति वाच्यम्, तस्यापि वैदिकतान्त्रिकत्वेन शुद्धवैदिकत्वाभावात्, तत्राधिकारो- पपत्तिरिति दृष्टव्यम् । साक्षादेव वैदिककर्मान्वय इति - शुद्धवैदिकधर्मान्वय इत्यर्थः । अव्यवधानेन श्रुतिसिद्धभगवदपासनार्हा अपीति - अव्यवधानेन श्रुतिसिद्धभगदुपसनाति दहरोपासनादीनि तत्र जीवान्तरस्य व्यवधानाभावात् तदनर्हा अपीत्यर्थः,

२.२.३८

शास्त्रस्य प्राप्तार्थत्वबाधितविषयत्वाभ्यामप्रामाण्यप्रसङ्गमुपपादयति । अनुमानेनेत्यादिना - प्रतिरुद्धबाधिता वा स्यादिति । प्रार्थत्वबाधितविषयत्वाभ्यां शास्त्रस्य अप्रामाण्यप्रसङ्गपरिहारार्थं शास्त्रोम्भे अनुमाननिरसनमपेक्षितमिति भावः । इह श्रुतिविरुद्धागमप्रामाण्यभङ्गार्थत्वस्य स्फुदत्वात् तन्नोपपादितमिति दृष्टव्यम् । प्रदानवदेव तदुक्तमित्यादीति - सङ्कर्षणकाण्ड-स्यापि पूर्वभागत्वादिति भावः । ततश्च शून्यवादप्रसंग इति - कदाचिदसतः सर्वदा असत्वादिति भावः । वास्तवसङ्खयेति

२.२.३९

परमार्थसङ्खयेत्यर्थः । प्रसञ्जकविपर्य्ययेऽपीति - अनित्यत्वप्रसजकसङ्खयावत्त्वस्य विपर्य्यये सङ्खयावत्वाभावेऽपि प्रसञ्जनीयस्य अनित्यत्वरूपानिष्टधर्मस्यापेत्तेरित्यर्थः ।। * ।।

२.२.४१

विज्ञानं च तदादि चेतीति - ननु युज्यन्तां घुरित्यादिशब्दस्य नित्यपुँल्लिङ्गत्वात् कथमेतदिति चेन्नायं घुः, किन्तु "अद भक्षणे'

२.२.४२

इत्यस्मादावश्यकार्थेणिनि प्रत्यये आदिरिरूपं सिद्धयति, तेन च निखिलजगत्संहर्तृत्वमुखेनैव कारणत्वं प्रतिपाद्यत इति द्रष्टव्यम् । परयोजनामनूद्य दूषयति । विज्ञानैश्वर्य्यादीति - ननु परव्यूहविभवभेदभिन्नमिति वक्तव्ये कथं सूक्ष्मव्यूहविभव-भिन्नमित्युच्यत इत्याशङ्कयाह - सूक्ष्मं परमित्येकार्थं पदद्वयमिति - व्यूहश्चतुर्व्यूह इति निर्देशस्य अयुक्ततां मन्वान आह - चतुर्व्यूहन्चतुर्विभाग इति । उक्तार्थे प्रमाणमाहेति - ज्ञानपूर्वेण कर्मणा अभ्यर्चितं परं ब्रह्म वासुदेवाख्यं प्राप्यमित्यस्मिन्नर्थे प्रमाणमाहेत्यर्थः - फतेषामेव जीवादिशब्दैरभिधानं विरुद्धम्' इति, ननु सङ्कर्षणप्रद्युस्नानिरुद्धशब्दैरेव जीवमनोहङ्गाराणा-मभिधानं युक्तम्, पञ्चरात्रे - सङ्गर्षणादिशब्दानां जीवादिषु परिभाषितत्वात् यत्र शास्त्रे यच्छब्दो यत्रार्थे परिभाषितः तत्र तस्य शब्दस्य स एव स्वल्वर्थो ग्राह्यः शब्दशास्त्रगतनदीवृध्द्यादिसंज्ञावत्, अत एव प्रद्युम्नसंज्ञकं मन इत्युक्तिरपि सङ्गता, इतरथा

२.२.४२

प्रद्युम्नस्य मनोऽधिष्ठातुः प्रादुर्भावे नपुंसकलिङ्गस्वारस्याभावादिति चेन्न, अस्मिन् शास्त्रे तथा परिभाषायां प्रमाणाभावात्, सङ्कर्षणप्रद्युम्नानिरुद्धानां जीवमनोहङ्काराधिष्ठातृत्वस्य वासुदेवात्सङ्कर्षणस्य

सङ्कर्षणात्प्रद्युम्नस्य प्रद्युम्नादनिरुद्धस्य च प्रातुर्भावस्य तस्मिन् शास्त्रे बहुशः क्षुण्णतया जीवाद्यधिष्ठातृणां सङ्गर्षणादीनामेव ग्रहणौचित्यादिति भावः ।। * ।। यद्वा प्रतिपन्नेप्वर्थेष्विति-

२.२.४२

इदं श्रेयो वा इदं श्रेयो वेति - संशयं विना यत् श्रेयः तन्न जानामि - इति श्लोकार्थ इत्यर्थः । श्रीपाञ्चरात्रमूलभूतैकायनशास्वा-विषयमूलभूतवचनमुदाहरति । मोक्षधर्म इति - अत्र निषच्छब्देन एकायनमन्त्रा उच्यन्ते इति द्रष्टव्यम् । मूलभूतो महानयमिति - अयमित्येकायन वेद उच्यत इत्यर्थः । भेदापाश्रयणेनेति - वैदिकं कर्मावलम्व्य सात्विकजनोपमर्दप्रवृत्तानामसुराणामित्यर्थः । तच्च न रक्षणोपयुक्तमिति - असुरनिरसनरूपरक्षणोपयुक्तमित्यर्थः । भक्तसंरक्षणार्थमिति - दुष्कृतविनाशमन्तरेण साक्षात् भक्त-संरक्षणार्थमितयर्थः । सूत्रद्वयमित्यर्थ इति - अस्मिन् सिद्धान्त इवेति शेषः । सूत्रपदाननुगुणमित्यर्थ इति - तदुत्तरत्र स्पष्टम् ।

२.२.४२

अधिकारिभेदेनेति - उदितानुदितहोमयोरधिकारिभेदेन विकल्पः । कालभेदेनेति - कदाचित् घ्रीह्यनुष्ठानं कदाचित् विद्या-नुष्ठानमित्यर्थः । षोडशीग्रहणादौ फलभेदेन विकल्पः; तत्र हि फलभूमार्थिना षोडशीग्रहणं कर्त्तव्यमिति भावः । आरभ्य-शब्दोपात्तानीति - भाष्यगत आरभ्य इमानि वचनायभिप्रेतानीत्यर्थः । आर्थमेकत्वमुक्तमिति - पाञ्चरात्रन्तु कथ्यत इत्यत्र

२.२.४२

पञ्चरात्रमित्येकवचनार्थ उक्त इत्यर्थः । कर्तृसामान्यं दर्शितमिति । दर्शितमित्यर्थः - विरुद्यतयाभिमतार्थानामिति ।

२.२.४२

त्रयधर्मपरित्यागात्रयीधर्मपरित्यागादीनां पञ्चरात्रप्रतिपाद्यानामित्यर्थः । प्रत्यक्षहेतवो योगःल, ह - अत्र हि शाक्षात्कारान्मोक्ष इति ।योगशास्त्रस्थाः प्रत्यक्षस्य मोक्षनः, साङ्खयास्तु शास्त्रजन्यज्ञानस्य मोक्षहेतुत्ववादिन इति श्लोकार्थ इति भावः । भ्रमरा-हित्यवचनं कथं घटत इति । भ्रमराहित्यप्रतिपादनं कथं घटतइत्यर्थः । भ्रमप्रतिपादकं वचनमेव दर्शयति । कपिलादिभिरित्यादि-

२.२.४२

भिरित्यादिशब्देनेति । एवं तस्य वेदनस्येति । एवं सतीत्यर्थः ।अधिकरणनिष्कर्ष उपपन्नतर इति - ननु "साङ्खयं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा । ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ।। साङ्खयस्य वक्ता कपिलः परमर्षिः स उच्यते । हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः ।। अवान्तरतपा नाम वेदाचार्यः स उच्यते । प्रचीनगर्भं तमृर्षि प्रवदन्ति हि केचन ।। उमापतिः पशु- पतिः श्रीकण्ठो ब्रह्मणस्सुतः । उक्तवानिदमव्यग्रो ज्ञानं पाशुपतदं शिवः ।। पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम् । सर्वेषु च नृपश्रेष्ठ! ज्ञानेष्वेतेषु दृश्यते ।। यथागमं यतान्यायं निष्ठा नारायणः प्रभुः । न चैवमभिजानन्ति तमोभूता विशांपते । तमेव शास्त्रकर्त्तारं प्रवदन्ति मनीषिणः' इति साङ्खयाद्याभमानां वैदिकमतान्तरत्वं नारायणैकनिष्ठत्वं च प्रतिपादितम् । तथा-साङ्खयं योगः

पाञ्चरात्रं वेदाः पाशुपतं तथा । आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः ।। तथा-सर्वे प्रमाणं हि तथा यथैतच्छास्त्र-

२.२.४२

मुत्तमम् । तथा एव तत्वमिदं साङ्खयानां विदितात्मनाम् ।। यदुक्तं यतिभिर्मुख्यैः । कपिलादिभिरीश्वरैः । यस्मिन्न विभ्रमाः केचित् दृश्यन्ते मनुजर्षभः ।। गुणाश्च यस्मिन् बहवोदोषहानिश्च केवला ।। तथा-ब्रह्मविष्णुमहादेवप्रमुखैः परिकीर्तिताः । आगमाश्चानया नेया दिशा नैवान्यथा बुधाः ।। अन्यथा ते तु नेयाश्चेत् विरुद्धाः स्युर्न संशयः, तथा-त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् । ब्रह्माचारविभेदेन भगवन्तमुपासते' इत्यादीनि भारतमानवभागवताद्युक्तानि सर्वागमानां साधारण्येन प्रामाण्यप्रतिपादकानि, तथा-तस्माद्वेदबाह्यानां लक्षणार्थं च पायिनाम् । विमोहनाय शास्त्राणि करिष्यावो वृपध्वज ! ।। एवं सञ्चोदितो रुद्रोमाधवेन मुरारिणा । चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ।। कापालं लागुडं शाक्तं भैरवं पूर्वपश्चिमम् । पञ्चरात्रं पाशुपतं तथा- न्यानि सहस्राः ।। तथाबुद्धश्रावकनिर्गन्धाः पञ्चरात्रविदो जनाः । कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः । यस्याश्नन्ति हविश्शेते दुरात्मानस्तु तामसाः । न तस्य तद्भवेच्छ्राद्धं प्रेत्येह च न तत्फलम् । वामाः पाशुपताचाराः तथा वै पाञ्चरात्रकाः ।

२.२.४२

भविष्यन्ति कलौ तस्मिन् ब्राह्मणोः क्षक्षियास्तथा ।। श्रुतिशिष्टस्मृतिप्रोक्तप्रायश्चित्ते भायं गताः । क्रमेण श्रुतिसिद्धयँ मनुष्य-स्तन्त्रमाश्रायेत् ।। इति वैष्णवशिवागमसाधारणदूषणानि, तथा-धर्मशास्त्रे पुराणे च प्रोक्तं हि मरणान्तिकम् । प्रायश्चित्तं मनु- ष्याणां पापिष्ठानां सुदारुणम् ।। भयदुर्बलचित्तानां मरणं जायते भृशम् । तेषामेव हि रक्षार्थं खल्वहं तन्त्रमुक्तवान् ।। तथा - अथांशः सात्वतो नाम विष्णुभक्तः प्रतापवान् । महात्मा दाननिरतो धनुर्वेदविदां वरः ।। स नारदस्य वचनाद्वासुदेवार्च्चने रतः । शास्त्रं प्रवर्तयामास कुण्डगोलादिभिःश्रुतम् ।। तस्य नाम्ना तु विख्यातं सात्वतं नाम शोभनम् । प्रवर्तते महाशास्त्रं कुण्डादीनां हितावहम् ।। इति; तथा-तेनोक्तं सात्वतं तन्त्रं यज्ज्ञात्वा मुक्तिभाग्भवेत् । यत्र स्त्रीशूद्रदासानां संस्कारो वैष्णवः स्मृतः । पञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम् ।। वेदभ्राष्टान् समुद्दिश्य कमलापतिरुक्तवान् ।। तथा-मत्तन्त्राश्रयणेनैव मत्पूजा च कृता त्वया । तपसा प्रतीवानस्मि तव शाण्डिल्य! मे प्रिय ।। कुमार्गेणापि शाण्डिल्य मम पूजा कृता त्वया । अतः कालेन महता देवमार्गं गमि- ष्यसि' इत्यादिनि कौमर्भागवतवासिष्ठलैङ्गकादीनि पञ्चरात्रनिन्दाकानि वचनानि; "इदं शतसहस्राद्धि भारताख्यानविस्तरात् । आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतम् ।।' इत्यादीनि भाष्योदाहृतानि भारतवचनानि पञ्चरात्रस्तावकानि, "एवमभ्यर्थित- स्तैस्तु पुराहं द्विजसत्तम् !। वेदक्रियां सामायुक्ता कृतवानस्मि संहिताम् ।। निश्वासाख्यां ततस्तस्यां लीना वाभ्रव्यशाण्डिलाः । अल्पापराधा इत्येव शेषा वैलालिका भवन् ।। मयैव मोहितास्ते तु भविष्यज्जानता द्विजाः । निश्वाससंहितायां हि लक्ष्यमात्रप्रमा- णतः ।। सैव पाशुपती दीक्षा योगः पाशुपतश्च सः ।। एतस्मामद्वेदमार्गाद्धि यदन्य इह जायते ।। तच्छ्रद्रक्रमविज्ञेयं रौद्रं शौचविव- र्चितम् । ये रुद्रमुपजीवन्ति कलौ वैलालिका नराः ।।

उच्छिष्टरुद्रास्ते ज्ञेया नाहं तेषु व्यवस्थितः । तेषां गौतमशापाद्धि भविष्यन्त्यनु ये द्विजाः ।। तेषां मध्ये सदाचारा ये तु मच्छासन रताः ।। ते स्वर्गमपवर्गञ्च यान्त्येव खलु निश्चायः । वैलालिका ये यास्यन्ति मम सन्ततिदूषकाः ।। प्राक् गौतमाग्निनिर्दग्धाः पुन-र्मद्वचनाद्द्विजाः । नरकं तु गभिष्यन्ति नात्र कार्या विचारणा ।। निर्मितंहि मया पूर्वं व्रतं पाशुपतं शुभम् । गुह्याद्गुह्यतमं सूक्ष्मं वेदसारं विमुक्तये ।। एषः पाशुपतो योगः सेवनीयो मुमुक्षुभिः । भस्मच्छन्नैहिर् सततं निष्कामैरिति हि श्रुतिः ।। वामं पाशुपतं सोमं

२.२.४२

लाङ्गलं चैव भैरवम् । न सेव्यमेतत्कथितं वेदबाह्यं तथेतरत् ।। इत्यादि वचनेषु वैदिकावैदिकविभागपूर्वकं केषाञ्चित् पाशुपता-गमविशेषाणशं वैदिकबाह्यत्वं प्रतिपाद्यते, एवं सति पाशुपतपञ्चरात्रयो। किं वैषम्यमिति चेत् उच्यते, वेदाविरुद्धांशे सर्वेषां प्रामा-ण्यम्, साङ्खययोगादावपि प्रकृतेः अब्रह्मात्मकत्वस्य वेदविरुद्धत्वात्, तस्मिन्नंशेऽप्रामाण्यम्, पाशुपतस्यापि शैवागमोऽपि द्विविधः-श्रौतः स्मार्त्तश्च सा स्मृतः । स्वतन्त्रो दशधा चैव तथाऽष्टादशधा पुनः ।। कामिकादिप्रभेदेन बहुधा स व्यवस्थितः ।। श्रुतिसारमयो-ऽन्यस्तु शतकोटिप्रविस्तरः । परं पाशुपतं यत्र व्रतं ज्ञानं च कथ्यते । इति कामिकाद्यष्टाविंशतिभेदमित्रसिद्धान्ततन्त्राणां स्वतन्त्र-त्वप्रतिपादनादवैदिकत्वं सिद्धम्, पञ्चरात्रे तु तन्निन्दापरवचनप्रक्षेपशङ्कारहितेषु पुराणेषु न दृश्यते इति सर्वत्र प्रामाण्यमेव, अत एव पञ्चरात्रकर्त्तुः वासुदेवस्य वेदादावेव सर्वज्ञत्वोपगमात् पतञ्जल्यादीनाञ्च जीत्वात्, पञ्चरात्रस्यच पुराणेषु बुद्धातिदेशनावत् व्यामोहनाथर्मीश्वरप्रणीतत्वात्, न योगाद्यधिकरणेन गतार्थतेति मध्यस्थेन कल्पतरुकारेण प्रतिपादितमित्यलमतिचर्चया । परै-स्त्वित्यादि - कार्यविशेषरूपातिशयेति । सङ्कर्षणप्रद्युम्नानिरुद्धानां सम्भारस्थितिसृष्टिरुपकार्यविशेषरूपातिशय सद्भावमित्यर्थः ।।

।। इति उत्पत्त्यसम्भवाधिकरणम् ।।

इति दशोपनिषद्भाष्यकारैः श्रीरङ्गरामानुजमुनिभिर्विरचितायां श्रुतिप्रकाशिकाव्याख्यायां

भावप्रकाशिकायाम् द्वितीयस्याध्यायस्य द्वितीयः पादः ।।

समुदिताधिकरणराङ्ख्या - ५३ - समुदितसूत्रसङ्ख्या - २०६ ।।

Third Pada

२.३.१

अयमर्थ इति - संगतिरित्ययमर्थ इत्युत्तरत्रान्वयः । कार्यविषये परोक्तेति - यद्यपि परस्परविरोधेन वेदान्तानामप्रामाण्यशङ्का परेषामिव वियत्प्राणाधिकरणेषु पूर्वपक्षत्वेन उद्भाव्यते, कार्यताप्रकारविरोधसमाधानमात्रपरत्वात्, तथा वियदनुत्पत्त्यादि-पूर्वपक्षोद्भावनपूर्वकं वियदुत्पत्त्यादिश्रुतीनां स्वार्थसमन्वये स्थूणानिखननन्यायेन साधिते सति विप्रतिषेधेन निरस्तानां सांख्यानां हृदि विपरिवर्तमानानां वेदान्तेष्वपि विप्रतिषेधप्रतिवन्दी दूरनिरस्ता भवति, अत एव विरोधाध्यायसंगतिरपि सिद्धा भवतीतिभावः । सूत्राभिप्रायविवरणमिति - न तु श्रुतिशब्दस्य श्रवणार्थत्वप्रतिपादनपरमितिभावः । श्रुतिनिर्देशस्वार

२.३.२

स्यादिति - गौणत्वस्य शब्दधर्मत्वेन प्रमितधर्मत्वाभावादितिभावः । निरवयवत्वस्यानित्यगुणसाधारणतया तत्रानैकान्त्य-परिहाराय द्रव्यत्वा-दित्युक्तम्, नचास्य हेतोरसिद्ि्थः, क्वचिदपि तदभावस्य बुद्धावारोहासम्भवात्, अत्र वियत् नास्तीति निषेधस्य व्याहतत्वात्, "आकाशे चाविशेषात्' इति वैभापिकाधिकरणसूत्रे - इहेतिप्रत्ययवेद्यो देश आकाश इति व्यवस्थापितत्वात्, न च हेतोरप्रयोज्क-त्वम्, निरवयवस्य सवगतस्य समवाविकारणाद्यनिरूपणादितिभावः । तैत्तिरीयकतर्कविरुद्धेति - तैत्तिरीयकगततर्कविरुद्धेत्यर्थः ।। * ।। अस्तीति श्रुतिस्साधकतयेति - अस्तीत्यस्मिन्नर्थे श्रुतिः साधकतयेत्यर्थः । उत्पत्तिप्रमितिजननहेतुरेवेति - मानान्तरागोच-रत्वस्य

श्रौतत्वानुगुणत्वादित्यर्थः । प्रत्यक्षसिद्धत्वमात्रेणेति - मानान्तरसिद्धत्वमात्रेणेत्यर्थः । प्रत्यक्षमनुमानं वेति - शब्दोऽद्रव्यातिरिक्तद्रव्याश्रित इत्यनुमानं वेत्यर्थः । अनुमानान्तरञ्चेति - आकाशं नित्यं निरवयवद्रव्यत्वादित्यनुमानान्तरमित्यर्थः । ननु सर्गाद्यसमयादच्छिन्नाकाशस्य पक्षीकारे तु तस्य श्रुत्यैकसमधिगम्यतया तस्यानुत्पत्तिसाधने धर्मिग्राहकमानविरोधः, आमाशमात्रपक्षीकारे तु धर्मिग्राहकमानबाधस्य कः प्रसंग

२.३.४

इत्यस्वरसादाह - निरवयवत्वहेतोर्महदादिष्विति । निरवयवत्वहेतोरिति -निरवयवद्रव्यत्वहेतोरित्यर्थः । संयोगविशेषवचनाच्चेति -निरवयवस्य संयोगाभावादितिभावः । सर्वगतद्रव्यत्वहेतोरिति - सर्वगतत्वादित्युक्ते नैयायिकमते प्रमेयत्वादिप्रत्यासत्तिजन्य-ज्ञानस्य सर्वगोचरत्वेन सर्वगततया तस्मिन् व्यभिचाराभावार्थं द्रव्यत्वादिति वाच्यमिति भावः ।। "तपसा ब्रह्मेति तपसा ब्रह्म विजिज्ञासख" इति वाक्ये ब्रह्मशब्दो मुख्यः, तपो ब्रह्मेति वाक्यशेषे तु ब्रह्मज्ञानसाधनत्वेन गौण इति भावः । मुख्यामुख्यविष- यतत्वाभावादिति - "अन्वयादिति चेत्स्यादवधारणात्' इत्यत्र अन्नमयादिषु आत्मशब्दा अपरमात्मबुध्या नोपचारतः प्रयुक्ताः, अपि तु परमात्मबुद्धयैव, "अन्तः प्रविष्टः शास्ताजनानाम्' इति तत्तदन्तः प्रवेशेन नियन्तृत्वामात्मत्वम्, तत्र प्राणमये अन्न-

२.३.६

मयात् अन्तरात्मत्वमात्रेण परमात्मत्वबुद्धिः जाता, तस्यापि अन्तरदर्शनेन तत्रापि परमात्मबुद्धिर्जाता, पूर्वत्र तु निवृत्ता; यस्यादन्यदन्तरं नास्ति र्सक्षणादिकञ्च श्रुतम्, तस्मिन् परमात्मबुद्धिः आत्मबुद्धिश्च प्रतिष्ठिते, एवञ्च पूर्वत्रापि परमात्मबुद्धि-विषय एव आत्मशब्दप्रयोगात्, सर्वेष्वपि पर्य्यायेषु आत्मशब्दः परमात्मविषय एव, न तु औपचारिक इति वक्ष्यमाणत्वात्, तत्र्यायेन " अन्नं ब्रह्म" इत्यत्र ब्रह्मशब्दस्यापि ब्रह्मबुद्धया प्रवृतत्वान्न भाक्तत्वम्, यथा शुक्तौ रजतबुद्धया प्रयुज्यमानस्य रजतशब्दस्य नौपचारिकत्वं तथेत्यर्थः । उभयत्रापि समाधिभङ्ग इति - अनुपङ्गश्रवणावृत्त्योः वृत्तिद्वयविरोधरूपसमयभङ्गः कार्य इत्यर्थः ।। * ।। ।। कार्यतयैवाव्यतिरेको विवक्षित इति भाव इति ।। ननु नित्यविभूत्यादीनामकार्यत्वेऽपि प्रतिज्ञया अहानिवत् आकाशस्य अकार्यत्वेऽपि प्रतिज्ञाया अहानिर्न प्रसज्यते, न च "येनाश्रुत"मित्यादौ अश्रुतादिशब्दा नित्यविभूतिव्यतिरिक्त-पराः, उत्तरत्र "सदेव सोभ्येदमग्र आसीत" इति इदङ्कारगोचरस्यैव ततः पूर्वसन्मात्रतापक्षिप्रतिपादनादिति वाच्यम् । इदंशब्द- स्य प्रत्यक्षादिप्रमाणोपस्थापिरसर्ववस्तुपरामर्शतया नित्यविभूत्यपरिग्रहे बीजाभावात्, इतरथा अतीन्द्रियपदार्थानां सर्वविज्ञा-नप्रतिज्ञाविषयत्वं न स्यात्, ततश्च त्यक्तव्यम्वा नित्यविभूतीनां नित्यत्वम्, स्वीकर्त्तव्यम्वा आकाशस्यापि नित्यत्वमिति

२.३.९

न, अस्य दोषस्य सर्वैरपि समाधेयत्वात्, इतरथा अविद्यावद् आकाशस्यापि अनाद्यध्यस्ततया अजन्यत्वमस्तु, ब्रह्माव्यति-रेकेऽपि तद्वदेव उपपद्यत इत्युक्तौ समाधानस्य मृग्यत्वात्, न च कल्पतरौ - "तथा प्राण"इत्यत्र प्राणानामविद्यावद् अनाद्य-ध्यस्तत्वे साक्षिण्यव्यवधानात् सुपुप्तावपि उपलम्भप्रसङ्गः इत्युक्तम्, तत्र्यायादत्रापि सपुप्तावपि उपलम्भप्रसङ्ग इति वाच्यम् । अनाध्यद्यस्तेश्वरवत् उपपत्तेः, जीवान्तराविद्यावदनुपलम्भोपपत्तेश्चानन्यथासिद्धप्रमाणवलात् अविद्याजन्यत्वमभ्युपगन्त- व्यम्, आकाशे न तथा, प्रत्युत्पत्तिश्रुतिरेववर्तत इति, यदि तर्हि प्रकृतेऽपि नित्यविभूतावपि समानमेतत्' । अवान्तरसाध्य-

विषयहेतुभेदानामिति - "असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषाद् युक्तेः
शब्दान्तराच्च" इत्यादाववान्तरसाध्यविषयत्-
२.३.९

वात्,असमस्तपदोपात्तहेतूनामप्येकसूत्रप्रतिपाद्यत्वं दृष्टं परमसाध्येऽपि समस्तपदोपात्तहेतूनामेकसूत्रप्रतिपाद्यत्वं दृष्टम्, "कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवञ्च" इत्यादिप्विति भावः । इदञ्च चशब्दाभावस्थल इति द्रष्टव्यम्, तेन "वाङ्मनसि दर्शनाच्छब्दाच्च" उपादानाद्विहारोपदेशाच्च" इत्यादौ परमसाध्ये असमस्तपदोपात्तहेनूनामपि एकसूत्रप्रतिपा- द्यत्वं दृश्यत इति न चोदनीयम् ।। * ।। ननु कार्य्यत्वं सिद्धवत्कृत्य कथं विभागशब्दिता उत्पत्तिः समर्थ्यते । विकारशब्दि-तकार्यत्व एव विवादादितरथा उत्पत्तावप्यविवादादिति चेत् न, छान्दोग्ये क्वचिद्विकारेषु उत्पत्तिवादाभावस्य गतिप्रदर्शन-भावपरत्वेनाऽददोषात् । परे त्वित्यादि - परमसाध्यत्वाभावादिति । विप्रतिषेधमात्रस्य स्वतोऽनिष्टत्वाभावेन तस्यैव पूर्वपक्ष-पर्य्यवसानभूमित्वाभावादित्यर्थः । न विप्रतिषेधमात्रं पूर्वपक्षितम्, नाप्युत्पत्तिसिद्धान्त्येकदेशिनतं कृत्वेति पाठः, यद्यपि कल्पतरौ - एवमध्यायपरिसमाप्तेः प्रथमं विप्रतिषेधादप्रामाण्येन पूर्वपक्षः, तत एकदेशिमतेन व्याख्या ततः सिद्धान्त इति दर्श-नीय इत्युक्तम्, तथापि तस्य ग्रन्थस्याधुनिकत्वात् तन्नोद्धाटितामिति द्रष्टव्यम् । हेतुतया उपन्यासोऽनुपपन्न इति - ननु वाच-स्पतिना तैत्तिरीयके वियदुत्पत्तिश्रुतिः यद्यप्यस्ति, तथापि तस्याः प्रमाणान्तरविरोधात्, बहुश्रुतिविरोधाच्च गौणत्वम्; ततश्च
२.३.९

मुख्यार्थश्रुत्यभाव एवाश्रुतेरित्यस्यार्थः, ततश्च "वियदश्रुतेः' "गौण्यसम्भवात्, शब्दाच्च, स्याच्चैकस्य ब्रह्मशब्दवत्' इति सूत्रचतुष्टयमपि सिद्धान्त्येकदेशिमतमस्त्विति पूर्वपक्षसूत्रम्, तस्य च आकाशसृष्टिप्राथभ्यपअतिपादकं तैतिरीयके, तेजस्सृ-ष्टिप्राथम्यप्रतिपादकञ्च छान्दोग्येऽस्ति, अतः श्रुत्योः परस्परप्रतिषेध इति व्याख्यातमिति चेत्, सत्यं व्याख्यातम्, तत्तु
२.३.९

शाङ्करभाषेयविरुद्धमिति भाष्टाभिमतयोजनयैव दूषितमिति द्रष्टव्यम् । पृथक् परिहरणीयत्वाभाताच्चेति - ननु "वायुश्चान्तरिक्ष-ञ्चैतदमृतम्' इति उभयसाधारण्येन अमृतत्वमुक्ता पुनः वायोः विशिेष्योच्यते "सैषाऽनस्तमिता देवता यद्वायुः' इति अतो-ऽभ्यासाद्वायोरमृतत्वं विवक्षितमिति ज्ञायते, अभ्यासे भूयस्त्वमर्थस्य भवतीति न्यायात्, अधिकाशङ्काव्यवृत्यर्थमतिदेशाधि-करणमेवास्तु, नतु पृथभ्योगकरणमुत्तरार्थमिति सामाधानं युक्तम्, तेनसि विशेषपक्षपाताभावात् "तेजोऽतस्तथाह्माह' इत्- येव वूत्रयितव्यम्' अहङ्कारस्तथेत्याहेति वा वक्तव्यम् । महदहङ्कारादीनामपि तन्मिन्नधिकरणे विषयत्वस्य भाष्य एव वक्ष्य-माणत्वात्, अतः पृथग्योगकरणमुत्तरार्थमिति नातीव युज्यत इति चेत् सत्यम्, महदहङ्काराकाशवाय्वादिसाधारणावेव पूर्वो-
२.३.१०

त्तरपत्तौ, तथापि "तदैक्षत तत्तेजोऽसृजत"इति बहुभवनसङ्कल्पपूर्वकसृष्टेः स्फुटप्रतिपादनेन सिद्धान्तावतरणस्य सौलभ्यं पर्य्यालोच्य "तेजोऽतस्तथा ह्याह' इति सूत्रयिष्यन् तदर्थेऽधिकाशङ्कामाद्येऽप्यतिदिशति "एतेन मतिरिश्वा व्याख्यात;' इति, अतो न किञ्चिदवद्यमित्युत्पश्यामः ।। इति वियदधिकरणम् ।।

।। सृष्टयनन्तरानुप्रवेशकृतमौपचारिकमिति ।। कादाचित्कानुप्रवेशनियमन मात्रेण शरीरत्वोक्तिः, नतु यावत् सत्तं धार्य्यत्वादि-कमभिप्रेत्य येन तन्मूख्यं स्यादिति भावः ।। * ।।

२.३.१३

ननु "तेजोऽतस्तथा ह्याह' इति न्यायसाम्ये अप्सु पृथक् सूत्रकरणं किमर्थमिति चेत् न, तथा ह्याहेत्यंशस्य साम्येऽपि तेजसि विषये "तदैक्षत" तत्तेजोऽसृजत इत्यस्य परम्परयाऽप्युपपत्तिरिति परिहर्तव्यम् । अप्सु "ततेज षक्षत" तदापोऽसृजत" इति प्रथमश्रुततजश्शब्दानुासारात्, "तस्माद्यत्र क्कचन शोचति स्वदेते हि पुरुषः तेजस एव तद्धयापोऽजायन्त" इति वाक्यशे-षश्रवणाच्च ईक्षण ं गौणमिति वा"अभिमानिव्यपदेशस्तु विशेषानुगतिभ्या'मिति न्यायेन वा निवोदव्यमिति पूर्वपक्षिणो

२.३.१५

निर्वाहभेदप्रकारसत्वात् पृथक् सूत्रकरणसार्थक्यात्, न च पृथिव्याः पृथक् सूत्रं व्यर्थमिति वाच्यम् । अत्र पअथिवीशब्दयोः विरोधपरिहारार्थतया तदापि पृथक् सूत्रणमिति गन्तव्यम् ।। * ।। तच्छरीरकत्वं श्रौतमित्याहेति - तच्छरीरकस्य कारणत्वं श्रौतमित्याशय इत्यर्थः, "यः पृथिवीमन्तरो यमयति" इति तदधिष्ठितवस्तुन एव कार्यकरत्वश्रवणादिति द्रष्टव्यम् । तेषाम-पीक्षणपूर्वकसृष्टिसिद्धय इति - अत्र केचित् पूर्वग्रन्थे ईक्षापूर्वकसृष्टयुपपाद्यतयोक्तस्य तच्छरीरकत्वस्य ईक्षापूर्वकसृष्टिसिध्य-र्थत्वकथनमयुक्तम्, ततश्च महदादीनामपि परमात्मशरीरत्वप्रतिपादकवचनं दर्शयति, सुबालोपनिषदि चेति - इत्येवावतरणि-का देयेति च मन्यन्ते ।। * ।। ।। आनन्र्य्यरूपक्रमप्रतीतेरिति - यद्यपि पौर्वापर्य एव क्रमः, नतु अव्यवधानलक्षणमानन्तर्य्यम्,

२.३.१७

तथापि आनन्तर्य्यरूपाव्यवधानविशिष्टपौर्वापर्य्यलक्षणक्रमप्रतीतेरित्यर्थे बाधकाभावात्, न च क्रियाद्वारकमेव पौर्वापर्य्यं वक्तव्यमिति वाच्यम्, तथा सति "तस्माज्जायत' इत्यस्य सृष्टयुन्मुखादित्यर्थः प्रतीयते, ततश्च, सृष्टयौन्मुख्यस्य प्राणाद्युत्पत्तेश्च क्रमिकत्वद्वारा तदाश्रययोः कार्यकरणयोरपि इत्यदोषात् । इत्यन्वयाभिप्रायेणेति नतु "एतस्माज्जायते प्राणः ततो मनः सर्वेन्द्रियाणि' इत्यन्वय इति भावः ।। * ।।

२.३.१७

भाष्ये - भङ्कत्वा व्यपदिश्यत इति, अस्मिन् पक्षे "भञ्जोऽवमर्दने' इति धातोःक्तिनि सति भक्तिः भङ्गः भकत्या प्रयुक्त इति भावः । पुर्वसाध्येनानन्दमयादिति, "पृथिवी' इति सूत्रे पृथिव्यत्पत्तेरेव साध्यत्वात् तत्र च अधिकाररूपशब्दान्तराणामत्र -

२.३.१७

शब्दवाच्यपृथिवीत्वहेतुत्वेऽपि पृथिव्युत्पत्तावहेतुत्वादिति भावः । अभिमानिचेतनानुप्रवेशनिबन्धनत्वस्य चोक्तत्वादिति - ततश्च स्वतश्चैतन्यं नास्तीति भावः । ननु वाचस्पतिना तेज आद्यधिष्ठानदेवतानां परमेश्वराधिष्ठितानामेव भूतसर्गे प्रवृत्तिः, उत

२.३.१७

तदनधिष्ठितानामिति विचारप्रवृत्तिरिति चेन्न, तस्य तद्भाष्यविरुद्धत्वात् "परात्तु तच्छ्रुते'रित्यादिना कृतकरत्वाच्च तदना-

दृत्य यथाश्रुतभाष्य एवदूषणमुक्तमिति द्रष्यव्यम् । एकशब्देन विवक्षितत्वे कारणाभावादिति - न च प्राणशब्देन बुद्धिरुच्यते, बुद्धिर्नाम निश्चयहेतुभूतान्तःकरणावस्था संशयहेतुभूतान्तःकरणावस्थं मन इति तयोर्भेदः,तत्र ज्ञायते अनेनेति व्युत्पत्त्या सौत्रविज्ञानशबब्देन प्राणशब्दितबुद्धेरिन्द्रियाणाञ्च ग्रहणम्, मनश्शब्देन मनसो ग्रहणञ्चच सम्भवतीति वाच्यम्, एता-दृकल्पनायां प्रमाणाभावादिति भावः । जीवस्य परस्मादात्मन उत्पत्तिः,वियदादीनामस्ति नास्तिं वेत्युत्तरसूत्रेण वक्ष्यति, देहाश्रयौ तावत् जीवस्य स्थलौ उत्पत्तिप्रळयौ न स्त इत्यनेन सूत्रेणावाचदिति परभाष्योक्तमाह - अत्र देहाश्रयाविति ।

२.३.१७

शरीरजन्मविनाशयोः जीवगतत्वशङ्कायाअनुदयादिति - ननु देवदत्तादिनामधेयं तावत् जीवस्य, न शरीरस्य, तन्नाम्ने शरीराय श्राद्धकरणानुपपत्तेः; तस्मात् मृतो जातो देवदत्त इति व्यपदेशस्य मुख्यत्त्वं मन्वानस्य पूर्वपक्ष इति वाचस्पत्ये स्पष्टमेव जीवभेदं सिद्ॅधवत्कृत्य देहभिन्नजीवस्य देहोत्पत्तिविनाशानुयाय्युत्पत्तिविनाशवत्वं पूर्वपक्षीकृत्य सिद्धान्तित इत्याभिधानात्, शाङ्करभेष्येऽपि शरीरानुयायिविनाशिनि जीवे - इति, तद्भेदसिद्धवत्कारणेवै देहे उत्पद्यमाने जीवोऽप्युपपद्यते, नश्यति तस्मिन् स्वयमपि नश्यतीति पूर्वपक्षप्रतीतेः तस्यैवार्थस्य देदाश्रयौ तावज्जीवस्य स्थूलोत्पत्तिप्रलयोै न स्त इति भाष्येऽनुवाद्यमानत्वात्, देदाश्रयावित्यस्यापि देहोत्पत्तिविनाशवित्येवार्थप्रतीते कथमयं प्रपञ्च इति चेत्, सत्यम्, देहानुविविधायिविनाशित्वे जीवस्वरूपस्याभ्यमाने "नात्मा श्रुते'रित्वनेन पौनरुकत्यात् देहोश्रया उत्पत्तिविनाशावित्यस्य यथाश्रुत एवार्थः स्वीकर्तव्यः,

२.३.१७

गत्यन्तरामावादित्यभिपेत्यैवमुक्तमितं द्रष्टव्यम् । अन्ये त्वित्यादि - प्रलयावस्थापुरुषस्य चेति । प्रलयावस्थस्य भोक्त्रंशस्य चेत्यर्थः । अस्य पाठक्रमस्येति - त्वदभिमतस्य सूत्रपाठक्रमस्य कुत्रापि अप्रसिद्धत्वादित्यर्थः । सर्वेषामुत्पत्तिं च पूर्वपक्षीकृत्येति - सर्वेषामुत्पत्तिर्वा स्यात्, सर्वेषामनुत्पत्तिर्ता स्यादिति पूर्वपक्षीकृत्येत्यर्थः, । मनस्याकाशमेव चेति प्रयोगाच्चेति - एतस्माज्जायत इति श्रुतौ यदि मनश्शब्दो मनः परः तदाऽऽकाशस्य इन्द्रियेषु इन्द्रियाणाञ्च मनसि मनसश्च प्राणशब्दितमहत्तत्त्वे च लयः कीर्त्यत इति भावः । आकाशादिषु क्रमविवक्षादर्शनादिति - "खं वायुर्ज्योतिराप" इत्युत्तरवाक्ये क्रमविवक्षादर्शनादिति भावः । पदार्थनिर्देशमात्रञ्च अत्र वागादिक्रमविवक्षाप्रतीतेरभावादिति भावः । अहङ्काराज्जातानीत्यर्थ इति - अहङ्कारात स्वादीनि

२.३.१७

साक्षाज्जातानि, इन्द्रियाणि तु स्वादिद्वारा जातादीत्यर्थ इति भावः। अतो विरोध इति - "इन्द्रियेभ्यः परा ह्यर्थाः' इति श्रुत्यनुसारेण "सर्वेन्द्रियाणि च स्वं वायुर्ज्योतिराप" इत्यत्र विरोधस्य परिहृतत्वात्, मनश्शब्दिताहङ्कारस्य महतश्च मध्ये "मनसस्तु परा बुद्धिः, बुद्धिं तु सारथिं विद्धि, विज्ञानसारथिर्यस्तु' इति बुद्धिविज्ञानाब्दितं तत्त्वान्तरं प्रतीयत इति विरोध इत्यर्थः । मनश्शब्दः वाच्येति - "मनसस्तु परा बुद्धिः' इति श्रुतपरापरभावो यथा कथञ्चिन्निर्वोढव्य इति भावः । नभः प्रकृतयस्स्युरिति चेदिति - ततश्च अष्टौ प्रकृतयः षोडश विकाराः' इति श्रुतिविरोध इति भावः' । इन्द्रियमेव मन इति - अन्तरिन्द्रियमेव मनः नाहङ्कार इत्यर्थः । न चैवं " इन्द्रियेभ्यः परा ह्यर्थाः' इति इन्द्रियापेक्षया परत्वेन प्रतिपादितादथात् इन्द्रियविशेषस्य मनसः कथं परत्वमिति शङ्कयम् आकारान्तरेण परापत्वयोरूपपत्तेरिति भावः, । औचित्यभङ्गप्रसङ्गादिति - आत्मशब्दस्यैव महत्त्वेन विशेषणस्योचितत्वादिति भावः । अर्थविरोधत्वादिति -प्रकृतिमहदहङ्काररूपार्थप्रतिपादकत्वात् अस्य सन्दर्भस्य वशीकार्यप्रकरणबाधो युक्त इति चेदित्यर्थः । प्राचीनाधिकरणेति - आनुमानकाधिकरण इत्यर्थः ।।

।। इति तेजोधिकरणं सामाप्तम् ।।

२.३.१९

नियतधर्मधर्मिभाव उपपद्यत नेति - धर्म्यपेक्षया अधिकदेशस्य धर्मत्वं सम्भवति नेति चिन्तायां निवेशनीयम् । अस्यार्थस्य

"अविरोधश्चन्दनवत्, गुणाद्वा लोकवत्, इति सूत्रोपारूढतया तस्यावश्यं वक्तव्यत्वात् । विप्रकृष्टार्थग्रहणाग्रहणासम्भवेनेति - सर्वाङ्गीणवेदनासम्भवेन आत्मनो विभुत्वस्य वक्तव्यतया तस्य च नित्यज्ञानाश्रयत्वेन नित्यत्वोपलब्धिप्रसङ्ग इत्यर्थः । भाष्ये-ज्ञानस्वरूप एव न ज्ञानमात्रम्, नापि जडस्वरूप इति ज्ञातृत्वे साधितेऽपि न जडत्वव्यावृत्तिः, नैयायिकैऋजडत्वाभ्युपगमात्, तथापि

२.३.२०

"यावदात्माभावित्वाच्च' इति च शब्देन सिद्धिमभिप्रेत्य उक्तमिति द्रष्टव्यम् । भाष्ये-यदुक्तं ज्ञातृत्वे स्वाभाविके सतीति, ननु स्वा-भाविकज्ञातृत्वे कथं विभुत्वनिराकरणमुपयुज्यते, विभुत्वस्य स्वाभाविकज्ञातृत्वमात्रापरिपन्थित्वात्, "नित्योपलब्ध्यनुपलब्धी'ति सूत्रोक्तन्यायेन विभुत्वस्य आगन्तुकज्ञानाश्रयत्वज्ञानरूपत्वस्वाभाविकज्ञत्वरूपसर्वपक्ष-विरुद्धत्वेन विशिष्य सिद्धान्तिनामपि निरा-करणायत्वात्, तत एव नैकाधिकरणत्वमपि "उत्कान्तिग्कयागतीना'मित्यादेः युज्यते, अणुत्वसमर्थनस्य स्वाभाविकज्ञातृत्वानुपयुक्तत्वात् कथञ्चिदुपयोगमाश्रित्यैकाधिकरण्याश्रयणे "कर्त्ता शास्त्रार्थवत्वा'दित्यस्य ज्ञातृत्वकर्त्तृत्वसमर्थनार्थस्य कुतो नैकाधिकरण्यम्, यदि कर्त्तत्वनिराकरणं ज्ञातृत्वोपयुक्तं तर्हि तन्निराकरणार्थानामेकत्रैव निवेशनीयतया "ज्ञोऽत एव, व्यतिरेको गन्धवत्, पृथगुपदेशात्, तद्गुणसारत्वात्तद्व्यपदेशः, यावदात्मभावित्वाच्च न दोषः तद्दर्शनात्,पुंस्त्ादिवत्त्वस्य सतोऽभिव्यक्तियागा'दिति ज्ञत्वं समाप्य "उत्क्रान्ति-गत्यागतीनाम्, स्वात्मना चोत्तरयोः, नाणुरतछ्रुतेरिति चेन्नेतराधिकारात्, स्वशब्दोन्मानाभ्याञ्च, अविरोधश्चन्दनवत्, अवस्थिति वैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि गुणाद्वा लोकवत्, नित्योपलब्धि'रित्येव सूत्रन्यासः स्यादिति चेत्, उच्यते- यदुक्तं विभुत्वस्य स्वाभाविकज्ञातृत्वमात्रापरिपन्थित्वादिति-सत्यमेतत्, तथापि पूर्वपक्षिणः तथाभिमानसम्भवेन तत्खण्डनस्य कर्तुं यक्तत्वात्, यदुक्तं "कर्त्ता शास्त्रार्थवत्वात्' इत्यस्याप्यैकाधिकरण्यमिति, तत्र ज्ञातृत्वं हि ज्ञानाश्रयत्वं न तु कर्तृत्वं, प्रत्ययस्याश्रयत्वमात्रार्थकत्वात्, अस्तु वा कथञ्चिदुपयोगः, नैतावता

एकाधिकरण्यं, तस्य सूत्रकदनभिमत्वात्, प्रकृते तु ज्ञत्वाणुत्वसमर्थनसूत्राणां परस्परान्तरिततया करणादेवावसीयते-एकाधिकरण्यं सूत्रकृदभिमतमिति, इतरता त्वदुक्तरीत्या महत्वनिराकरणसूत्राणां बुद्धिसौकर्याय सङ्कीर्णतयैव निवेशः स्यात्, अतः सर्वं समज्जम् ।। * ।। "स यदा तेजोमात्रास्समभ्याद-

२.३.२३

दाना हृदयमेवापक्रामति शुक्तमादाय पुनरेति स्थान'मिति परोक्तगतिश्रुत्यनुपन्यासे हेतुमाह - उत्क्रान्तिशब्दानन्तरेति । ।। * ।। भाष्ये-शरीरविभोगरूपत्वेनेति, उत्क्रामणं हि अपसर्पण इव मरणे विनिरूढम्, तच्चातलतोऽपि सतः कर्मक्षये देहस्वात्म्यनिवृत्त्या उपपद्यते, गत्यागत्योश्चलेन निरूढयोः कर्तृस्वभावरूपत्वादिति भावः ।। * ।। भाष्ये-अणुसदृशं वस्तूद्धृत्य तन्मानत्वं जीवस्य

२.३.२६

श्रूयत इति उद्धरणञ्च पृथक्करणम्, बालाग्रशतभागस्ये'ति अवयवावयविनोरवयवस्य पृथक्करणं श्रूयते, श्राव्यते प्रदर्श्यत

२.३.३२

इत्यत इत्यर्तः, ततश्च पृथक्करणाश्रवणयोः श्रुतिकर्त्तृकत्वात् समानकर्त्तृत्वोपपत्तिरिति द्रष्टव्यम् । आराग्रम्-चर्मभेदिसूच्यग्रम् ।। * ।। "ननु-उक्तं ज्ञानमेवात्मेति' "विज्ञानात्मा पुरुष'

इत्यादिश्रुतिष्विति‌अर्थः ।। * ।।

विशिष्टवाचिना शब्देनेति - ज्ञानविशिष्टवाचिशब्देनेत्यर्थः ।। * ।।

३२. सू। नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । नित्योपलब्धिः प्रसज्यताम् - कथं नित्यानुपलब्धिप्रसङ्गः - उभयप्रसङ्गो वा कथम्

आत्मा कुत्रचिदुपलभ्यत इति - आत्मा शरीरान्त उपलभ्यते, तथा बहिर्नोपलभ्यत इत्येतत् "अहमिहैवास्मि सदने न जानान' इति सर्वलौकिकानुभवसिद्धम्, न चैतत्पक्षद्वयेऽपि उपपद्यते, ज्ञानेरूपः सर्वगत आत्मेति पक्षे किं उपलभ्यानुपलभ्यस्वभावः, उत उपलभ्यैकस्वभावः, उतानुपलभ्यैकस्वभावः । आद्ये दहेस्यान्तरे उपलब्ध्यनुपलब्धी स्याताम्, द्वितीये सर्वत्रोलब्धिस्स्यात् । तृतीये अनुपलब्धिः स्यात्, दहेस्यान्तरुपलभ्यस्वभावः अन्यत्रानुपलभ्यस्वाभाव इति व्यवस्था न युज्यते, न ह्येकस्य क्वचिदेशे स्वप्रकार-मन्यत्र नेति शक्यते वक्तुमिति भावः । एवं जडत्वपक्षेऽपि दूषणं द्रष्टव्यम् । भाष्ये-सर्वैः करणैः सर्वदा संयुक्तत्वेनेति, नन्विदं सिद्धान्तेऽपि समानभेव, नित्यानां मुक्तानाञ्च धर्मभूतज्ञानानामनन्तानां सर्वत्र विद्यमानत्वात्, धर्मभूतज्ञानामपि सर्वात्मसम्बन्धत्वात् मध्ये इदमेदतदीयमिति नियन्तुमशक्यत्वात् कथमेतदिति चेन्न, "श्रुतेस्तु शब्दमूलत्वात्' इति न्यायेन श्रुतिप्रतिपन्ने अर्थे यथा श्रुत्यभ्युपगन्तुं युक्तम्, इतरथा न युज्यत इत्यत्र तात्पर्यात् । ज्ञशब्दस्यापि व्यक्तिवाचित्वाभावादिति - "इगुपधज्ञा प्रिय- किरः कः' इति कप्रत्ययस्य कर्त्तरि कृ'दिति कर्त्रर्थेऽनुशिष्टत्वादिति भावः । अविकृतब्रह्मण एवेति - आविकृतब्रह्मण एवोपाधिना जीवभावेनावस्थानादनुत्पन्नत्वेनेति योजना । तस्य चैतन्यस्वरूपत्वादिति - ब्रह्मणः चैतन्यस्वरूपत्वात् तदभिन्नस्य जीवस्यापि चैतन्यस्वरूपत्वमिति भावः । साध्यतया प्रकृतेति - पूर्वाधिकरणे

साध्यतया प्रकृतेत्यर्थः । साक्षादेव ज्ञानस्वरूपत्वसाधकत्वभावादिति - इदमुपलक्षणम्, परम्परयाऽपि साधकत्वं नास्ति, न ह्यनुत्पत्त्युपपादकस्य ब्रह्मानन्यत्वस्य चैतन्यस्वरूपत्व-

३२. सू। नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । नित्योपलब्धिः प्रसज्यताम् - कथं नित्यानुपलब्धिप्रसङ्गः - उभयप्रसङ्गो वा कथम्

साधकत्वमस्तीति एतावतानुत्पत्तेः परम्परया उपयोगेऽस्तीत्यपि द्रष्टव्यम् । तस्य ज्ञानस्वरूपत्वञ्चेति - ब्रह्मणो ज्ञानस्वरूपत्वञ्चे-त्यर्थः । परमसाध्येति - जीवचैतन्यस्वरूपत्वस्येत्यर्थः । प्रकृत्यर्थसाम्यस्य चेति - श्रुतेः अत इति शब्दप्रकृत्योः श्रुत्येतच्छब्दयोः एकार्थत्वस्य ज्ञाप्यमानत्वादित्यर्थः । ननु पूर्वसूत्रस्थस्य श्रुतेरिति यदस्य एतत्सूत्रस्थस्यात इति पदस्य नैकार्थत्वं युक्तम् अनुत्प-त्तिसाधकश्रुतेः ज्ञत्वसाधकश्रुतेश्च भिन्नार्थत्वादित्याशङ्कयाह - योग्यतावशादिति । विलम्बत्रयाभावाच्चेति - परमते तु तदुपपादकब्रह्मानन्यत्वमित्यादिना विलम्बत्रयं पूर्वमेव प्रतिपादितमति भावः । उच्छेदरहितज्ञानधर्मत्वं विवक्षितमिति - अनु-च्छित्तिधर्मेत्यत्र बहुव्रीहिगर्भबहुव्रीहिरिति भावः । ताभ्य इति अन्वयो घटत इति - यद्यपि अत एवेत्यनेन पूर्वसूत्रे ताभ्य इत्यत्र निर्दिष्टानां बुद्धिस्थानां श्रुतीनामेवातश्शब्देन परामर्शे तासामेव श्रुतीनाम् उत्क्रान्तिसूत्रेऽप्यनुवृत्तौ - उत्क्रान्तिगत्यागतीनाम्

३२. सू। नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । नित्योपलब्धिः प्रसज्यताम् - कथं नित्यानुपलब्धिप्रसङ्गः - उभयप्रसङ्गो वा कथम्

श्रुतिभ्य इत्यस्यार्थस्य सम्भवाददोषः; तथापि ताभ्य इत्यस्य विशेष्यतया श्रुतिभ्य इत्याध्याहारोऽप्यवश्यापेक्षितः, अतः इहापि -ताभ्यः श्रुतिभ्यः इति पदद्वयाध्याहारादिति भावः । कारकव्यापारवैयर्थ्यमिति - चक्षुरादिव्यापारजीवचैतन्य-स्वरूपत्वस्येत्यर्थः । प्रकृत्यर्थसाम्यस्य चेति - श्रुतेः अत इति शब्दप्रकृत्योः श्रुत्येतच्छब्दयोः एकार्थत्वस्य ज्ञाप्यमानत्वादित्यर्थः । ननु पूर्वसूत्रस्थस्य श्रुतेरिति यदस्य एतत्सूत्रस्थस्यात इति पदस्य नैकार्थत्वं युक्तम् अनुत्पत्तिसाधकश्रुतेः ज्ञत्वसाधकश्रुतेश्च भिन्नार्थत्वादित्याशङ्कयाह - योग्यतावशादिति । विलम्बत्रयाभावाच्चेति - परमते तु तदुपपादकब्रह्मानन्यत्वमित्यादिना विलम्बत्रयं पूर्वमेव प्रतिपादितमिति भावः । उच्छेदरहितज्ञानधर्मत्वं विवक्षितमिति - अनुच्छित्तिधर्मेत्यत्र बहुव्रीहिगर्भबहुव्रीहिरिति भावः । ताभ्य इति अन्वयो घटत इति - यद्यपि अत एवेत्यनेन पूर्वसूत्रे ताभ्य इत्यत्र निर्दिष्टानां बुद्धिस्थानां श्रुतीनामेवातश्शब्देन वैयर्थ्यमिति भावः । तदा-श्रितेष्विति - तदाश्रयो मुख्यः प्राणः, तदाश्रिता इतरे प्राणा इति भावः । सङ्घातरूपस्य इति - उपाधेः सङ्घातरूप इत्यर्थः ।

३२. सू। नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । नित्योपलब्धिः प्रसज्यताम् - कथं नित्यानुपलब्धिप्रसङ्गः - उभयप्रसङ्गो वा कथम्

सुषुप्तिप्रलययोरप्रबोधेनेति - सुषुप्तिप्रलययोरन्तःकरणादेः लीनत्वादित्यर्थः ।
आत्मेन्द्रियविषयसन्निधानान्नित्यमुपलब्धिरिति - आत्मेन्द्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नित्यमेवोपलब्धिः प्रसज्यते, अत असत्यपि हेतुसमवधाने फलाभावः नित्यमेवानुपलब्धिः प्रसज्येत, अत आत्मेन्द्रियविषयसन्निधाने सत्यपि कादाचित्कोपलम्भाभावस्य कारणव्यतिरेकप्रयोज्यत्वात्,

२.३.३३

कारणान्तरसमवधाने कारणव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगिता अन्तःकरणं स्वीकार्यमिति भावः । अन्यतरनियमो वेऽन्यथेति सूत्रखण्डं व्याचष्टे । आत्मनीन्द्रियेऽपि वेति ।। ।। इति ज्ञाधिकरणम् ।।

२.३.३३

सेतुं जन्तुमितिवदिति - औणादिके तुमुन्प्रत्ययान्तः "य एवं वेति हन्तारं यश्चैनं मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते ।।' इति चेदिति गीतावचनादिति भावः । भाष्ये-"शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात्स्वयं प्रयोगस्स्या'-दिति जैमिनिसूत्रम्, अस्यार्थः यस्मात्-शास्त्रफलं स्वर्गादिकं प्रयोक्तरि भवति "स्वर्गकामो यजेत' इति शास्त्रप्रामाण्यात्, तस्मात्

२.३.३७

स्वयं प्रयोगे कर्त्ता स्यादिति ।। * ।। भाष्ये- स यथा सहाराजेति प्रकृत्येति, "स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तते एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तत' इति स्वप्नविषया श्रुतिः प्राणान् गृहीत्वा जागरितस्थानेभ्य उपसंहृत्य स्वे शरीरे यथेष्टं सञ्चरतीत्यर्थः । शरीरप्रेरणे चेति - शरीरे ग्रथष्टसञ्चारे शरीरप्रेरणमपि सिद्धमिति भावः ।। * ।।

२.३.३९

त्वन्मते बुद्धयुपधानात्पूर्वमिति - स्फटिकलौहित्यस्य जपाकुसुमसन्निधानोपाधिनिबन्धनत्वं जपाकुसुमसन्निधानात् प्राक् स्फ- टिके सत्यापि लौहित्याभावदर्शनात् उपपद्यते, सत्यपि जीवेऽन्तःकरणोपाधिसन्निधानात् प्राक् यदि कर्त्तत्वन्नोपलम्येत, तदा-ऽन्तःकरणस्य जीवगतकर्त्तत्वोपाधित्वं वक्तुं शक्यते, न च तथास्तीत्यर्थः । विज्ञानशब्दस्य बुद्धिमात्रविषयत्वनिर्बन्धश्चेति - यस्त्वयं व्यपदेशो दर्शितः "विज्ञानं यज्ञं तनुते' इति स हि बुद्धेरेव कर्त्तत्वं ज्ञापयति । विज्ञानशब्दस्य तत्र प्रसिद्धत्वादिति "यथा च तक्षोभयथा' इति सूत्रे यध्याख्यानं तदनुपपन्नमित्यर्थः । परिहर्त्तव्याभावमेवोपपादयति । हितबुध्द्यैव सर्वं चेतनः करोतीति - नाम्नि विवाद इत्युक्तमिति । यत् करणभिन्नं कर्त्ततया त्वयाऽन्तःकरणमित्यभिलप्यत इति तदेव मया जीव इत्यभिलप्यत इत्यर्थः । चित्तमनसोरिवेति - यथा प्राप्तकालानुरूपबोधरूपस्य चेतयितृत्वलक्षणस्य चित्ताख्यस्य मनोवृत्तिविशेषस्य मनसश्च प्रकृतिविकृतिभावोपदेशो नान्ति, एवं बुद्धेः मनोवृत्तिरूपत्वे बुद्धिमनसोरपि प्रकृतिविकृतिभावोपदेशो नास्ति, एवं बुद्धेः मनो-वृत्तिरूपत्वे बुद्धिमनसोरपि प्रकृतिविकृतिभावोपदेशो न स्यात्, दृश्यते च मनोबुद्धिमनसोरपि प्रकृतिविकृतिभावोपदेशो न स्यात्, दृश्यते च मनोबुद्धिरेव वाहङ्कार इति मनोबुध्द्यहङ्काराणां प्रकृतिविकृतिभावापदेश इति भावः । अतः प्रकृतेरन्यत्वेन समाधिविधानमेव विवक्षितमिति - यद्यपि भोक्तृत्वशून्यायाः प्रकृतेः कमर्फलभोक्तृत्वानुसन्धानेन यागादिप्रवृत्तिवत् प्रकृति-

२.३.४१

भिन्नत्वसमाधावपि न दोषः तथापि प्रकृतिकर्त्तृकस्य प्रकृतेरहमन्योऽस्मीति समाधेः भ्रान्तिरूपतया मोक्षहेतुत्वं न स्यादिति भावः । स्त्रक्चन्दनाद्युपयोग इति - स्त्रक्चन्दनादिधारण इत्यर्थः ।। ।। इति कर्त्रधिकरणम् ।।

२.३.४१

गुणत्रयोद्भवाभिभवविशेषवासनाविशेषविषयसन्निधीनां रुचिविशेषहेतुत्वं क्रमेणोपपादयति । तथाहीत्यादिना - वस्तुस्वभाव-विशेषरूपेति । वस्तुसन्निधि विशेषरूपत्वेत्यर्थः ।। इति परयत्ताधिकरणम् ।। *।।

२.३.४२

तत्र शरीरवाचिशब्दस्येति - श्रुतिविप्रतिपत्त्या शरीरित्वमेवाक्षिप्य समाधीयत इति भावः । भाष्ये-न प्रतितिष्ठतीति, अनन्यत्वाधि-कत्वयोः परस्परविरुद्धयोरविरोधस्य अंशांशिभावेनैव समाधेयत्वादिति भावः, अपृक्सिद्धप्रकारत्वमेव ह्यंशत्वं; तत्र पृथक्सिद्धत्वेन-नन्यत्वसमर्थनं, प्रकारत्वेन भेदसमर्थनम्, अपृथक्सिद्धत्वप्रकारत्वाभ्याम् मिलिताभ्याम् उभयव्यपदेशमुख्यत्वसमर्थनमित्यर्थः ।

२.३.४२

प्रभाप्रभावतोरिवापृथक्सिद्धांशांशित्वनिर्णयेनेति - यद्यपि तदनन्यत्वमिति सूत्रे समर्थनीयमनन्यत्वं कारणावस्थस्य कार्याव- स्थस्य चाभेदं, न तु जगद्ब्रह्मणोरंशांशित्वरूपं; तथापि सूक्ष्मचिदचिच्छरीरकेण स्थूलचिदचिच्छरीरकस्यानन्यत्व स्य समर्थनीयतया अंशत्वरूपशरीरत्वं जगतः समर्थनीयम्, तत्र च चिदंशस्यांशत्वमिह साध्यते, अचिदंशस्यांशत्वन्तु अहिकुण्डलाधिकरणे साध्यते इति दृष्टव्यम् । भाष्ये"ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा' इति, दासाः- धीवराः, कितवाः- द्यूतकृतः । उत्कृष्टैः सामानाधिकरण्य इति - श्रुताध्ययनसम्पन्नः साक्षाद्विष्णुरित्युक्ते स्तुतिपरत्वनुपपद्यते, निकृष्टसामानाधिकरण्यं तु न ब्रह्मणः स्तुतये

२.३.४४

भवति, विरुद्धत्वात्, नापि दासादीनां स्तुतये, तेषां स्तुत्यनर्हत्वात्, नापि ब्रह्मणो निन्दायै-ब्रह्मणो निन्द्यत्वाभावात्, नापि दासादी-नां निन्दायै वा-असम्भवात्, तस्माद्ब्रह्मणः दासादिसामानाधिकरण्यमभेदस्य तात्त्विकत्वमेव द्योतयतीत्यर्थः । भाष्ये-कुर्वाणेन भ्रमि-तव्यमिति, कुर्वाणत्वेन भ्रमितव्यम् कुर्वाणमिव ब्रह्म भ्राम्यति, नोपदिश्यत इति पर्य्यवसितोर्थः । शङ्कते - जीवब्रह्मणोरिति ।। * ।।

२.३.४५

भाष्ये-मन्त्रे सूत्रेऽप्यंश सति एकवचनमिति, मन्त्रे सूत्रेऽपि पादोंश इत्येकवचनमित्यर्थः । पराकत्वेन च भेदो गृह्यत इति - इद-मुपलक्षणं परात्मसु भेदग्रहसिध्द्यर्थम् "शक्तयः सवर्भावानामचिन्त्यज्ञानगोचराः' इत्युक्तरीत्या शकत्यादिलक्षणः परस्परभेदः प्रत्य-क्परात्वातिरिक्तोऽप्यस्तीति द्रष्टव्यम् ।। * ।। भाष्ये-एकस्त्वेकदेशत्वं ह्यंशत्वमिति, यद्येवं विशेष्यस्यापि परमात्मनोऽशत्वप्रसङ्गः, विशिष्टवस्त्वेकदेशत्वाविशेषात्, ततश्च जीवपरयोरविशेषत्वप्रसङ्गः, किञ्च ममैवांशो जीवलोके जीवभूतः' इति विशेष्यभूतपरमात्मानं प्रत्येकदेशत्वं जीवस्य प्रतीयते, न तु विशिष्टं प्रति, ममेत्यस्य विशिष्टपरत्वे प्रमाणाभावात्, इश्वरांशत्वं हि स्वरसतः प्रतीयत इति वक्ष्यमाणत्वाच्च, विशिष्टे विशेषणमंश इति लोकप्रतिसिद्धतयाऽयमेवांश इत्युपदेशवैयथ्यात्, तदर्थं समानाधिकरणत्वस्यापि व्यर्थत्वात्; किञ्च "जीवभूतः सनातनः' इति विशिष्टजीर्वेऽशत्वकीर्त्तनं व्यर्थम् । ईदृशांशत्वस्य चिदचित्साधारण्यात्, अत एवाचितः पार्थक्येनांशत्वसमर्थनपर-महिकुण्डलाधिकरणमपि व्यर्थमिति चेत्-न, अंशत्वस्य नियाम्यशेषत्वलक्षणशरीररूपत्वस्य इहाधिकरणे समर्थनीयत्वात्, वक्षयति च विशेष्यस्य प्रधानतयांशित्वोपपत्तिरिति - अहिकुण्डलाधिकरणेऽचितोंशत्वसमर्थनेऽपि न

२.३.४७

तेनाऽस्य गतार्थता, भिन्नत्वाभिन्नत्वांशत्वप्रतिपादकश्रुतिविरोधसमाधानप्रकारत्वादस्याधिकरणस्य, अतो मुख्भेदान्न गतार्थता, अत एव "अवस्थितेरिति काशकृत्स्न' इत्यनेनापि न गतार्थता, एकवस्त्वेकदेशत्वं ह्यंशत्वमित्यस्याष्यत्रैव तात्पर्य्यम्, यद्यपि अपृथक्सिद्धत्वलक्षणमठशत्वं समर्थ्यते, तर्हि अपृथक्सिद्धविशेषणभूतचिदचिद्गतदोषाणां ब्रह्मणि परस्परं चाप्रसक्तेः तत्परिहारा-र्थानां "प्रकाशादिवत्तु नैवं परः'"अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्' इत्यादीनामानर्थक्यमिति चेन्न, अंशपदश्रवणमा- त्रात् विशेष्यैकदेशत्वरूपांशत्वमिह विवक्षितमिति भ्रान्त्या प्रवृत्तां शङ्कामभिमतांशत्वप्रदर्शनेन निराकरोतीत्युक्तौ दोषाभावात् । भानुर्मानुमानिति अत्र केचित् यथा घटाश्रये घटे प्रयुक्तौ घटघटवच्छब्दौ न तुल्यार्थौ, एवं प्रभारूपभानुमन्तराश्रये भानौ प्रयुज्यमानौ

२.३.५२

भानुभानुमच्छब्दौ न तुल्यार्थौ, यदि च भानुशब्दः प्रभावचन एव सन् पर्यवसानवृत्त्या जातिगुणादिशब्दवत्प्रभावद्वचनस्स्यात्, तर्हि मत्वर्थप्रत्ययनिरपेक्षसामानाधिकरण्यं स्यात्, तस्माज्जात्यादिवाचकाः शब्दा उदाहार्थ्या इति वदन्दि । परे त्वित्यादि - जीवेश्वरसम्बन्धनिरूपणमिति । किं स्वामिभृत्यवत् सम्बन्धः? उताग्निविस्फुलङ्गादिवत् इति निरूपणमित्यर्थः । स्वात्मानं प्रत्यंशत्वानुपपत्तेरिति - विशिष्टस्य विशिष्टं प्रत्यंशत्वानुपपत्तेरित्यर्थः । वस्तुनिस्वतोंऽशभेदाभावेनेति - आकाशस्य तु स्वतः

२.३.५२

स्वांशत्वादुपहितानुपहितभेद उपपद्यत इति भावः । अयुक्तावस्थायामिति - योगराहित्यदशायामित्यर्थः । अनन्वयस्य वक्तुमश-क्यत्वाच्चेति - नियोज्यत्वानन्वयस्य वक्तुमशक्यत्वाच्चेत्यर्थः । परिच्छन्नत्वे सति अनुपलभ्यमानत्वमणुत्वमिति - नत्वणुपरि-माणत्वमिति भावः । अन्तःकरणोपाधिकत्वानुपपत्तेरिति - इदमुपलक्षणम् "प्रदीपवदावेशस्तथाहि दर्शयति, इत्यधिकरणे काय-व्यूहस्थलेऽन्तःकरणभेदमभ्युपगम्यान्तःकरणभेदेऽपि प्रतिसन्धानस्याभ्युपेतत्वादिति द्रष्टव्यम् । गोमहिषहेमाद्यंशित्वाभावादिति

२.३.५२

ननु भूतलस्याधारत्वादिलक्षणप्राधान्ये विवक्षितेऽपि भूतलस्य गोमहिषादिकमंश इति व्यवहारो न दृश्यते, देवदत्तादेः दण्डकुण्डला-देश्च विशेष्यविशेषणभावलक्षणप्राधान्यविवक्षायामपि देवदत्तस्य दण्डकुण्डलादिकमंश इति व्यवहारो न दृश्यते, द्रव्यस्वामिन्यंशि-त्वव्यवहारास्तु समुदायापेक्षया विभुत्वद्रव्यस्यांशेनैतत्स्वामित्वात् देवदात्तादेः, न तु स्वामित्वादिलक्षणप्रामाण्यप्राधान्यमात्रात्, तथा सति क्रयदानादिलब्धगोमहिष्यादिस्वामिनि अंशित्वव्यहारप्रसङ्गादिति चेन्न, अत्रांशशब्दस्य शरीरमथर् इति प्रागेवोक्तत्वा-ददोषात्, केचित्तु पटारम्भकतन्तुषु घटावच्छिन्नाकाशे यङ्कच्छिन्नपाषाणशकलादौ सर्वत्रांशशब्दव्यवहारेऽनुगतं प्रवृत्तिनिमितं तदे-कदेशत्वमेव, अतः चिदचिद्विशिष्टस्यैव ब्रह्मशब्दार्थतया चिदचितोः तदेकदेशतया तदंशत्वमुपपद्यते, केवलविशेष्यमीश्वरं प्रति

२.३.५२

नांशत्वम्, "ममैवांशः' इत्यादावपि विशिष्टाभिप्रायेणैवांशत्वम्, न चैवमीश्वरस्यापि जीववदंशत्वप्रसङ्गः, अल्पेकदेशेऽशत्वव्य-वहारदर्शनेन ब्रह्मणोऽधिकत्वेनांशत्वव्यवहाराप्रसक्तेरिति वदन्ति ।।

इत्यंशाधिकरणम् ।। ७ ।।

Fourth Pada

२.४.३

पृथक् "तथा प्राणाः' इत्यस्य पूर्वपक्षसूत्रत्वादिति भावः ।। * ।। अदृष्टसंस्कारस्थितिकार्यदर्शनादिति - संस्कारे वासनाप्रलयेऽपि अदृष्टसंस्कारस्थितिरूपकार्यदर्शनादित्यर्थः । परैस्त्वित्यादि - पूर्वाधिकरणविषयवाक्यस्थेति । केषुचित् कोशेषु पठ्यते, तत्र

२.४.३

पूर्वशब्दो लेखकदोषायातः, तत्र प्राणोत्पत्तिवाक्यजातमुदाहरणमिति शाङ्करभाष्यदर्शनात् । तद्धर्मातिदेश इति - लोकादिधर्म-स्योत्पत्तेरतिदेश इत्यर्थः, जन्मशब्दस्येति व्याहृतपूर्वसूत्रोपस्थापि परामर्शसम्भवेऽनौचित्यादिति भावः । जन्मशब्दस्येति - जन्मवाचकशब्दस्येत्यर्थः । इन्द्रियसमष्टयुत्पत्तेः पूर्वमेव सिद्धतांमत्वेति - इन्द्रियसमष्टयुत्पत्तः न्यायनिरपेक्षतयैव निश्चितेत्यर्थः ।। * ।।

।। इति प्राणोत्पत्यधिकरणम् ।।

२.४.४

विशेषिताश्च ते गतिमन्तः प्राणाः स्वरूपत इति, ज्ञानानि पञ्च बुद्धिश्च मनश्चेत्येवं ृङ्गग्राहिकया विशिष्य निर्दिष्टा इत्यर्थः, भाष्ये-सप्तानामेव गतिश्रवणात्, लोपदशायां ज्ञानानि पञ्च मनो बुद्धिश्चेति सप्तानामेव निरोधश्रवणाच्च तेषामेव प्राणत्वमिति भावः । ज्ञाना-नीति विशेषितत्वादिति - भाष्ये-ज्ञानान्येतत् प्रतीकोपादानं "ज्ञानानि मनसा सह' इत्यादिना ज्ञानानि मनोबुद्धिरिति विशेषि-तत्वादित्यर्थः । भाष्ये-यानि त्वितराणि-इति, क्वचिदष्टौ प्राणा ग्रहत्वेन गुणेन सङ्कीर्त्यन्ते, "अष्टौ ग्रहा अष्टावतिग्रहा-इति, अति-ग्रहा विषयाः, रागोत्पादनेनेन्द्रियाकर्षकत्वात् विषयाणामतिग्रहत्वम्, क्वचिन्नव सङ्कीर्त्यन्ते, "सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चा'

२.४.५

विति, अवाञ्चौ-पायूपस्थावित्यर्थः । क्वचिद्दश " न व वै पुरुषे प्राणाः नाभिर्दशमी'ति, क्वचिदेकादश "दशेमे पुरुषे प्राणा आत्मै-कादश' इति, अत्र आत्मशब्देन मन उच्यते, क्वचिद्द्वाददश "सर्वेषां स्पर्शानां त्वगेकायनम्' इति त्वङ्नासिकारसनचक्षुश्श्रोत्रम-नोहृदयहस्तपादोपस्थापायुवाग्रूपाः, क्वचित्त्रयोदश' चक्षुश्च द्रष्टव्यञ्चेत्यत्र अहङ्काराधिका पूर्वोक्ताः त्रयोदश प्रतिपाद्यन्ते, क्वचिच्चतुर्दश "सप्त सप्त' इत्यादिषु ।। * ।। भाष्ये-हस्तादीनामपि कार्यभेद आदानादिरिति, यद्यपि श्रुतयः स्वतः प्रमाणतया नापेक्षिताः तथापि परस्परविरोधात्

नार्थतत्वपरिच्छेदायालम्, न च सिद्धे वस्तुनि अनुष्ठानरूपविकल्पः सम्भवति, तस्मात्प्रमाणान्तरोपनीतार्थवशेन व्यवस्ताप्यन्ते, यथा हस्तेनावद्यति श्रुवेणावद्यति स्वधितिनावद्यतीत्यत्र, अत्र ह्यविशेषण हस्तश्रुवस्वधितीनाम् अवदानसामान्यसाधनत्वश्रुतावपि सामर्थ्यवशेन द्रवद्द्रव्यावदाने श्रुवस्य मांशावदाने स्वधितेः पुरोडाशावदाने हस्तस्य इति श्रुतेः

२.४.५

व्यवस्था आश्रिता, तथा इहापि गन्धाद्युपलब्धिपञ्चकमादानादिक्रियापञ्चकमान्तरज्ञानं ज्ञातं चेति कार्यवशेन एकादशत्वमेव युक्तमाश्रयितुमिति भावः । सर्वाधिकरणेषु यथा पूर्वपक्षं न मन्तव्यमित्युच्यत इति - न च स्वपक्षेपि समानोऽयं दोषः, अतो हस्तादयो न सन्तीत्येवं न मन्तव्यमित्यर्थः- इत्येवभाष्ये व्याख्यातत्वादितिवाच्यम्, उक्तयुकत्यनुग्राह्यश्रुतिप्रदर्शनार्थत्वेन सपलत्वोक्तेः- इति ।। * ।। ।। इति सप्तगत्यधिकरणम् ।।

२.४.७

परिछिन्नत्वे सत्युपलब्ध्यर्हस्तूलताराहित्यमिति ।। ननु निदाघदूनदेहस्य शिशिरह्रदनिमग्रनाभेः सर्वाङ्गीणशीतस्पर्शोपलब्धेः कथं त्विगिन्द्रियस्याणुत्वम्, कथं च उत्क्रान्तिवशेनाणुत्वे सूक्ष्मशरीरस्यापि नाणुत्वं स्यादित्याशङ्कयाह - परिमाणावान्तरभेदे

सत्य-पीति । कार्यबाहुल्यविशेषणविशिष्टतयोपासनार्थमानन्त्यकथनमित्यर्थ इति - न च

स्वरूपानन्त्यसैवोपासनार्थत्वमस्त्विति‌वाच्यम्, अनारोपितोपासनसम्भवे आरोपितोपासनस्य अन्याथ्यत्वात् ।। * ।।

लङिति - "रुदश्च पञ्चम्यः' इतीडागम्, यद्यपि लुङ्य-

२.४.८

प्येतद्रूपमस्ति, तथापि अनद्यतनत्वात् लङीत्युक्तम् ।। ।। इति प्राणाणुत्वाधिकरणम् ।।

सह शिष्टिरादिर्यस्य विशेष्याभिधानस्य तदेतमेवेति सह शिष्टयादिनेति वक्तुं युक्तम्, न तु सह शिष्टयादिभ्य इति तद्गुणसंविज्ञा-नबहुव्रीह्याश्रयणेऽपि सह शिष्टे विशेष्याभिधानस्य द्वित्वात् द्विवचनमेव स्यात् इत्याशङ्कयाह - अनेन बहुश्रुतिष्विति । अनेन

२.४.१०

बहुवचनेनेत्यर्थः । अस्यार्थस्य भाष्यकृदभिमतत्वं दर्शयति - श्रुतिभेदेन सह शिष्टय इति । ननु चक्षुरादिवत् ुपकरणसमर्थनेन स्व-तन्त्रशङ्काव्यावृत्तिवत् भूतान्तरत्वशङ्का न व्यावर्त्यते, भूतान्तरत्वेपि

उपकरणत्वसम्भवात्, "यः प्राणः स वायुः' इति श्रुत्या तच्च-ङ्कावारणे उपकरणत्वमकिञ्चिकरमिति चेत् न, न वयमुपकरणत्वेन भूतान्तरत्वं प्रतिक्षिपामः, येनायं दोषस्स्यात्, तु शब्देन भूता-न्तरत्वं प्रतिक्षिप्यते, तत्र च "यः प्राणः स वायुः, इति श्रुतिरेव हेतुः ततश्च तु शब्देन भूतान्तरत्वे प्रतिक्षिप्ते किं तदित्याकाङ्क्षायां

२.४.११

चक्षुरादिवदुपकारकमित्युच्यते, ततश्च द्वयमपि अनेनैव सूत्रेण प्रतिपाद्यत इति भावः ।। * ।। भाष्ये- नन्वेवं नामभेदात् रूपभेदा-च्चेति, ननु कथं अस्याः शङ्काया उत्थानं पञ्चधा आत्मानं विभज्य एतद्वाणमवष्टभ्येति श्रुत्यनुसारेण पञ्चधा अवस्थितः देहेन्द्रिय-धारणादीनि करोतीति वदन्तं प्रति अस्याः शङ्काया अनुपन्यसनीयत्वादिति चेदुच्यते संज्ञाकार्यभेदसद्भावावस्थान्तरापत्तावपि ञ्चधा विभज्येत्यस्य विरोधादिति शङ्काभिप्रायात् ।। * ।। भाष्ये-न कामादिकं मनसः तत्वान्तरमिति, कामादिकमित्यनेन कामा-

दिहेर्तुमभन उच्यत इति द्रष्टव्यम् । केचित्तु मनशब्देन धमर्भूतज्ञानमुच्यत इत्यपि वदन्ति, भाष्ये-अपानादयोऽपि प्राणस्यैव वृत्ति विशेषाः- इति, स्थान-विशेषवृत्यवच्छिन्नप्राण एव अपानादिव्यपदेशं लभत इति भावः । ननु श्रोत्रादिनिमित्ताश्शब्दादिविषयाः पञ्चवृत्तयो मनसः प्रसिद्धाः, ततश्च पञ्चवृत्तित्वांश एव मनसो दृष्टान्तत्वं वक्तव्यमिति यद्यभिनिवेशेन तदा योगशास्त्रप्रसिद्धाः प्रमाणविपर्ययादयः पञ्चवृत्तयः ग्राह्यन्त इत्यभिप्रेत्य पक्षान्तरमाह - प्रमाणविपर्ययादय । द्वितीयपक्षंदूषयति - सङ्कल्पस्यातिरिक्त-त्वादिति । अत औचित्यादिति सङ्ख्याविशेषानादरे सिद्धे कामः सङ्कल्प इत्यादिशुति प्रसिद्धकामादिनानावृत्तेरिव पञ्चवृत्तिरिति वृत्तित्वेन ग्रहणमुचितम् । न तु श्रोत्रादिनानावृत्तेरिति भावः ।। * ।। ।। इति वायुक्रियाधिकरणम् ।।

न तथास्य वाक्यस्य निर्वाह इति - यद्यपि "य एवमेतत्सामवेद' इत्युपासनं प्रतीयते, तथापि "स यो ह वैताननन्तानुपासते' इत्यु-पासनविधिवाक्ये आनन्त्यकीर्तनवत् साम्यस्य विधिवाक्ये कीर्तनाभावात् उदाहृतश्रुतौ प्राणस्य सर्वसाम्यमुकत्वा "सर्वहीदं प्राणे-नावृत'मिति उपपविकीर्तनात् सोपपत्तिकविभुत्वग्रहणस्य प्राबल्यमिति अधिकाशङ्का सम्भवति, तथापि "समः प्लुषिणा समोमश- केन समो नागेन सम एभिस्त्रिभिन्स्त्रभिर्लोकैः समः सर्वेण' इति विरुद्धपरिमाणश्रवणात् उत्क्रान्त्यादेः अनन्यथासिद्धत्वात्,

"सर्वं हीदं प्राणेनावृत'मिति प्राणे सामान्यविषयतया कथञ्चित् वैभवविषयरूपतया वा उपपत्तिरिति सिद्धान्तः, आधिदैवकेन

समष्टिरूपेण हैरण्यगर्भेण प्राणात्मना एतद्विभुत्वमाम्नायते नत्वध्यात्मिकेनेति तद्भाष्योक्तमनुवदति ।

परैरान्त्यश्रुतेरिति - समष्टिरूपेण समष्टिस्सामान्यम् ।। * ।। ।। इति श्रेष्ठाणुत्वादिकरणम् ।।

जीवस्याऽप्यारप्यत्वादिति - आदित्यादीनां चक्षुराद्यधिष्ठातृणां परमात्मदत्तैश्वर्य्याणाम् ईश्वरवदाराध्यत्वपलप्रदत्वसत्त्वेन स्वात-न्त्र्यमप्यस्तु, कर्तृत्वस्य परायत्तताश्रुतेः मनुष्यादिविषयत्वेन सङ्कोचसम्भवेन स्वातन्त्र्यश्रुतेः वावनायोगादिति भावः । जीवस्यो-

पादानं दृष्टान्ततयेति मन्तव्यमिति । नन्वग्न्यादीनामपि जीवरूपतया "परात्तु त्तच्छ्रुतेः' इत्यस्य विषयतया सिद्धत्वात् प्राणवतो दृष्टान्तत्वमग्न्यादीनां दार्ष्टान्तिकत्वमिति व्यवस्था कथं सिद्धयति इति चेत्-सत्यम्, अग्न्यादीनां महामहिमशालिनां परमात्मा-यत्तकर्तृत्वमनपेक्षितमितिशङ्कायामग्न्यादिविषयसम्भवादिति भावः । केचित्तु-वस्तुतस्तु इदं तस्यैव स्मरणार्थम् अत एव संज्ञा-मूर्त्यधिकरणभाष्ये स्थिरीकरणाय स्मारितमित्याहुः ।। * ।। भाष्ये

परमात्माधिषिंतत्वास्य नित्यत्वादिति, पूर्वसूत्रे तदामबननात्, भवतीति यद्भवनं प्रतीतं तदेव परमाधि◌ेठतत्वं तस्येति तच्छब्देन परामृश्यत इति भावः । ।। इति ज्योतिराद्यधिष्ठानाधिकरणम् ।।

२.४.१७

देवानामपीति - जीवदृष्टान्तेनेति शेषः, देवानां जीवदृष्टान्तेन परायत्तप्रवृत्तित्वनिर्णयेनापि जीवानां परायत्तकतत्रृत्वं स्थिरं भव- तीति मत्वा तदेव दृष्टान्ततया स्मारितमित्यर्थः, दृष्टान्ततया सूचनस्य सम्प्रतिपत्तिसूचनार्थत्वात् । पी◌ेटकेसङ्गतिरिति - पेटिकया सङ्गतिरित्यर्थः । न तु पेटिकयोः सङ्गतिरिति, संज्ञामूर्त्यधिकरणस्य एकत्वेन पेटिकात्वासम्भवात् । त्रयो हेतव इति -पाठकगात्

२.४.१७

अण्डान्तर्वर्त्तिन्निवृत्करणप्रदर्शनत्रिवृत्करणश्रुतय इत्यर्थः । भाष्ये- प्रविशतिर्लाक्षणिकस्स्यादिति, प्रवेश्येत्येवं णिजर्थलक्षणा स्यादित्यथः । भाष्ये-जीवसमष्टिविशिष्टेनात्मनेति, जीवसमष्टिविशिष्टेन स्वरूपेणेत्यर्थः । मृदात्मको घट इत्यादौ आत्मशब्दस्य स्वरूपपरत्वदर्शनात्, ततश्च व्यपदेशिवद्भावेन स्वरूपस्य भिन्नतया व्याकरवाणीत्यनेन स्वरूपस्यानभिधानात् तृतीयोपपद्यत, नन्वेवं जीवशब्दस्य जीवमात्रपरत्वमाश्रित्य आत्मशब्दस्य शरीरपरत्वं किन्न स्यादिति चेन्न, तदा कत्वाप्रत्ययास्वारस्यात्, नन्वे- वमपि जीवशरीकेण मयेति आत्मशब्दस्य प्रत्यगर्थपरत्वं किन्न स्यादिति चेन्न, तदा व्याकरणकत्तर्रीति ज्ञाविहिते अनभिहिताधि-कारविहिततृतीयानुपपत्तेः, ननु व्याकरणकर्त्तुरभिधानेऽपि प्रवेशकर्त्तुरनभिधानात् तृतीयोपपद्यते, अनभिहित इति पर्य्युदासपक्षा-श्रयणात्, अत एव अनभिहितसूत्रे द्वयोः क्रिययोः कारकेऽन्यतरेणाभिहिते विभकत्यभावसङ्ग इति वार्त्तिकेन प्रासादाख्यकं तच्चा- न्यरेणास्तिप्रत्ययेन घञाभिहितं, प्रसीदन्त्यस्मिन्निति प्रासादः, तत्राभिहिते कारके न भवतीत्युच्यमाने सप्तमी न स्यादिति प्रति-षेधपक्षाश्रयणेन शङ्कामुत्थाप्य नचान्यतरेण अनभिधानादिति असिक्रियाधिकरणशुक्तेरुपरितनप्रत्ययेन यदभिधानं तदाश्रया च सप्तमी भविष्यतीति नायं दोषः प्रसज्यत इति पर्युदासाश्रयणेन परिहारो वर्णित इति चेत्, एवं तर्हि अहं भुकत्वाव्रजामीति प्रयोग- स्थले मया भुकत्वा व्रजामीति प्रयोगप्रसङ्गः, तथा पकत्वाभुज्यत ओदन इत्यत्र भुजिप्रत्ययेनाभिहितेष्योदने कत्वाप्रत्ययेनानभिधान-माश्रित्य द्वितीयाप्रसङ्गः, तदयमत्र वैयाकरणनिष्कर्षः । अहं भुकत्वा व्रजानीत्यत्र अहमर्थस्य युगपदुभाभ्यां भोगनव्रजनक्रियाभ्यामपि न शाब्दोऽन्वयः । किं तर्हि व्रजनक्रिययैव प्राधान्यात्,आर्थस्तु भोजनक्रियायामन्वयः, अतः शब्दव्यापारापेक्षायां अभिधानमेव नत्वनभिदानमपीति, नाहंशब्दात् तृतीया प्राप्नोति तथा पकत्वौदनो भुज्यत इत्यत्रापि ओदनस्य भुजिनैव शाब्दोन्वयः, सन्निधा- नात्तु वचनान्वयः, केवलशब्दव्यापारनिरूपणे तु किमिष्टकाःपकत्वौदनो भुज्यते-उत ओदनमेवेति द्वितीया न भविष्यति, प्रासाद

२.४.१८

आस्त इत्यत्र तु प्रासादस्य प्रसादनासनक्रियाभ्यां शाब्द एवान्वयः, पदार्थदशायां घञ्प्रातिपादिकेन प्रसादाधिकरणतयान्वितस्यैव हि प्रासादद्रव्यस्य वाक्यार्थदशायां असनक्रियाधिकरणत्वेनाप्यन्वयः, अतः तत्र शब्द- व्यापारापेक्षयैव अनभिहितासन-क्रियाधिकरणशकत्याश्रयत्वमपि प्रासादस्यास्तीति तत्र सप्तम्युपपत्तिरिति, कैय्यटस्तु, स्वाभिप्रवीणमाश्रित्य कत्वाप्रत्ययस्य भावार्थत्वात् पकत्वौदनं भुङ्क्ते देवदत्तः, पकत्वौदनं भुज्यते देवदत्तेनेतिकत्वाप्रत्ययेन कर्तृकरणयोरभिधानात् द्वितीयातृतीये कुतो नेत्याशङ्कयाख्यातादिपदवाच्यक्रियाविशेष्यत्वात्प्रधानम्, इतरा तु विशेषणत्वादप्रधानम्, तत्क्रियासाधनयोरपि शकत्योः तद्द्वारको गुणप्रधानभावः, तत्र प्रधानशकत्यभिधाने गुणक्रियाशक्तिरभिहितवत् प्रकाशते, प्राधानानुरोधित्वात्ल गुणानां प्रधानमुखप्रेक्षि- त्वात् पृथक् तद्विरुद्धस्वकार्यारम्भाभावादिति समादधे, एवं सति

उभाभ्यामपि शाब्दे युगपदन्वयेऽपि न दोषः, इत्यलं विस्तरेण, तस्मेदनेन जीवेनेत्यस्य न मयेत्यर्थः, अपि तु स्वरूपेणेत्यर्थः, तथा च व्यपदेशिवद्भावेन भेदात्तस्य च करणत्वात्तृतीयोपपत्तिः, अत एव वेदान्ताचार्यैरधिकरणसारावल्यां "तेनेशस्तद्विशिष्टस्वकरणतयाऽनुप्रवेशेऽपि कर्ता' इति करणत्वमुक्तम् ।। * ।।

भाष्ये - अन्नमशितं त्रेधा विधीयत इत्यत्र-इत्यादि, एवं छान्दोग्ये श्रूयते, अन्नमशितं त्रेधा विधीयते । तस्य यः स्थविष्ठो भागः तत्पुरीषम्, वो मध्यमस्तन्मांसं योऽणिष्ठः तन्मनः, आपः पीताः त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुः तन्मूत्रं भवति, यो

२.४.१८

मध्यमः तल्लोहितं भवति, योऽणिष्ठः स प्राणः । तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्टो धातुः तदस्थि भवति । यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् । अन्नमयं हि सोम्य मनः । आपोमयः प्राणः । तेजोमयी वागिति । कारणानुविधायित्वेनेत्यादि - त्रिवृत्करणेन पृथिव्यप्तेजांसि कार्यकारणभावमापन्नानि स्थूलाण्यणीयांसि, अतः त्रिवृत्कृतेष्वपि तत्तस्भूतांशानां स्वकारणानु- गुण्येन स्थूलत्वाणुत्वाणीयस्त्वानि स्युः, तस्मात् "अन्नमशित' मित्यादि वाक्यं त्रिवृत्करणप्रदर्शनपरञ्चेत् स्थविष्ठं पुरुषं पार्थिवम्

२.४.१९

अणु मांसमाप्यम् अणीयो मनश्च तेजसमापद्येत, तथा द्वितीयपर्य्याये" सूत्रं पार्थिवं लोहितमाप्यं प्राणः तैजस इति स्यात्, तृतीये पर्य्याये अस्थि पार्थिवमाप्यं मज्जा तैजसी वागिति स्यात्, ततश्च"यदन्नमशितं त्रेधा विधीयते' इति पुरीषमांसमनसां पार्थिवत्वमु- क्तम्, यच्चापः पीताः त्रेधा विधीयन्ते' इति सूत्रशोणितप्राणानामाप्यत्वमुक्तम्, यच्च विदीयत इति अस्थिमज्जावचसां तेजस्त्वमु- क्तम्. पुनश्च अन्नमयं हि सोम्य मनः आपोमयः प्राणः इति यन्मनः प्राणयोः पार्थिवत्वाप्यत्वमुक्तम्; तत्सर्वं विरुध्येत, अतो नात्र त्रिवृत्करणप्रकाण उपदिश्यते, यत्तु अण्डान्तर्वर्त्तिषु अग्न्यादित्यादिषु त्रिवृत्करणप्रदर्शनं तत्सम्बोध्यस्य श्वेतकेतोः बुद्धिसम्वादा- र्थम्, न तु तत्रैव त्रिवृत्करणमिदं प्रथमतया प्रवृत्तमिति बोधनार्थमिति, ननु सिद्धान्ते बिम्बप्रतिबिम्बभावयोरैक्यात् कथं तद्विरुद्ध-मुच्यत इत्यस्वरसादाह - छायया आदर्श इति । तृतीयसूत्रेण अनुपपत्तिविशेषपरिहारायेति - इदमन्नम् इमा आपः- इदं तेजः- इति विशेषव्यपदेशहेतुम् उत्तरसूत्रेण कीर्त्तियिष्यन्तदुपयुक्ततया "अन्नमशितं त्रेधा विधीयते' इति श्रुति प्रतिपन्नमेवार्थं"मांसादि-भौम'मिति सूत्रेण कीर्तयतीत्यर्थः, वाचस्पत्युक्तिमाह - मनस आहङ्कारिकत्वनित्यत्वयोरिति । इदमुपलक्षणं वाचोऽपि द्रष्ट- व्यम् । साङ्खययोः वाङ्मनसो द्वयोरपि आहङ्कारिकत्वत्वस्याविदानात्, वाचस्पतिपक्षे च सूत्रस्यायमर्थः, मांसादि भौममित्येतत् दृष्टन्तार्थं यथा मांसादिभौमं भवति, एवं वाङ्मनसी अपि तैजसभौमे-इति ।। * ।। ।। संज्ञामूर्तिकल्पप्त्यधिकरणं समाप्तम् ।।

इति दशोपनिषद्भाष्यकारैः श्रीरङ्गरामानुजमुनिभिर्विरचिताया श्रुतिप्रकाशिका-

व्याख्यायां भावप्रकाशिकायां द्वितीयस्याध्यायस्य चतुर्थ पादः ।।

समुदिताधिकरणसङ्ख्या -६८- समुदितसूत्रसङ्ख्या - २८७ ।।

Third Chapter

First Pada

३.१.१

भाष्ये - तद्दुर्धर्षणत्वहेतुभिरिति, प्रथमाध्यायार्थदुर्धषर्णत्वहेतुभिरित्यर्थः, अनेन द्वितीयाध्यायार्थस्य प्रथमाध्यायशेषत्वं रव्यापितम् । अत एव द्वितीयाध्यायार्थः तृतीयान्तपदाभ्यां निर्दिष्टः "सह युक्तेऽप्रधान' इति हि स्मृतिः, इदानीमिति व्याख्येयं पदम् । विषयि-चिन्ता क्रियत इत्यर्थः इति - प्राप्तेरप्यनुभवरूपतया उपासनप्राप्त्योः तृतीयचतुर्थाध्यायप्रतिपाद्ययोः ब्रह्मविषयकतया विषयिचि-न्तात्वेन क्रोडीकारो युक्त इति भावः, भाष्ये - लोकान्तरेषु सञ्चरतो जाग्रत इति, लोकन्तरेषु सञ्चरतो जाग्रतो दोषा इति वैराग्य-पदार्थ उक्तः । अत एव हि सन्ध्याधिकरणे एवं कर्मानुरूपगमनागमनजन्मादियोगेन जाग्रतो जीवस्य दुःखित्वं ख्यापितमिति भाष्य-कारः स्वयमेव वक्ष्यति । परैश्च यस्य पूर्वस्मिन् पादे जाग्रदवस्थायामिह लोकपरलोकसञ्चार उक्तः, तस्यैव जीवस्य अवस्थाभेदः स्वयं-ज्योतिस्स्वसिद्धयर्थं प्रपञ्च्यत इति तत्रैवाधिकरण उक्तम् । भाष्ये - स्वपत इति, स्वप्नावस्थस्य ग्रहणं सुषुप्तपदसमभिव्याहारेण गौबलीवर्दन्यायात् सुषुप्तस्येति भूतत्वमविवक्षितम्, अत्रावैरूप्याय सुस्वपत इति शत्रन्ततया निर्देशे कर्तव्ये निष्ठान्ततया निर्देशः, "तत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानाति, यदा सुषुप्तः स्वप्नं न कथञ्चन पश्यति' इत्यादि श्रुतिनिर्देशाभिप्रायेणेति

३.१.१

द्रष्टव्यम् । कल्यागुणकरत्वञ्चेति भाष्यानन्तरमितिशब्दः अध्याहर्त्तव्यः, सच प्रकारवचनः, ततश्च उभयलिङ्गत्वं सर्वस्मात्परत्वं फलप्रदत्वमित्येवंरूपोऽर्थः प्रतिपाद्यत इति, एवञ्च प्रतिपाद्यत इति एकवचनस्य बहुवचनान्तदोषशब्दानन्वयेऽपि नानुपपत्तिः । केचित्तु "आदिञिटुडवः' कर्मणोरोमन्थतषोभ्यां वर्त्तिचरोः "दिवादिभ्यो भुव्यच्वे'रित्यादिवत् प्रत्येकमभिसम्बन्धादेकवचनम् समर्थयमानाः सर्वोत्तरत्वफलप्रदत्वयोरपि कल्याणगुणाकरत्वान्तर्भावं मन्यमाना इति शब्दाध्याहरं न ममृषिरे । ननु पूर्वद्विका-र्थानुक्रमण एव निरस्तनिखिलदोषगन्धस्यापरिमितगुणसागरस्य प्रतिपादितत्वाभिधानात् परस्य ब्रह्मणः तद्रहितता कल्याणगुणा-करत्वं च प्रतिपाद्यत इति भाष्यमसङ्गतमिति चेत्, उभयलिङ्गपादस्य सद्दाढर्ढ्यार्थत्वेन वैयर्थ्याददोषः । ननु लोकान्तरे सञ्चरतो जीवस्य दोषाः प्रतिपाद्यन्त इति यदभाषि, तदभ्युपगम्यते-प्रथमपादे तथा प्रतिपादनात्. तथाहि प्रथमे तावदधिकरणे संसार-दुःखायतनस्य भूतेन्द्रियसङ्घातरूपस्य सूक्ष्मदेहस्य इह परत्र च गतागतयोरनुवृत्तिरस्तीति निरूप्यते, तत्रैव "भाक्तं वाऽनात्मवि-त्त्वा'दिति सूत्रेण देवभृत्यभावमवलम्ब्य तत्प्रयुक्तक्लेशकरं बितस्य स्वर्गभोगानुभवस्य प्रक्षीणत्वं सातिशयत्वञ्चाविष्कृतम्, द्विती-याधिकरणे सूक्ष्मदेहस्यापि कारणतया सकलसंसारक्लेशनिदानस्य कर्मबन्धस्य मुक्तिपर्यन्तमनुवृत्तिर्निरूपयिष्यते । तत्रैव स्वर्गभो- गस्य क्षयिष्णुत्वञ्च "कृतात्यये' इति सूत्रभागेन दर्शयिष्यते, एवमनेकदोषदुष्टस्यापि स्वर्गभोगजनकं यागादिकमपि यावज्जीवकर्त्त-व्यस्नानसन्ध्यावन्दनादिविहितानुष्ठाननिषिद्धपरिहाररूपबहुविधक्लेशसाध्यस्मार्त्ताचारसापेक्षत्वादिति दुष्करमिति "चरणा'दित्या-दिसूत्रैः प्रकटीकरिष्यते; अनिष्टादिकारिणान्तु ग्रामं गच्छन्वृक्षमूलान्युपसर्पति इति न्यायेनापि स्वर्गप्राप्तिर्नास्ति, यमसदने रौर- वादिषु च भूयान् यातनानुभवः कीटादिजन्मप्राप्तिश्च तृतीये वर्णयिष्यते, चतुर्थे स्वर्गादवरोहतां आकाशादिभावश्रवणात् तदभि-मानिदेवतानामिव आकाशादिशरीरित्वप्रयुक्तः कियान् द्विभोगानुभवोऽस्तीति शङ्कावारणाय आकाशदिषु संश्लेषमात्रमिति वर्ण-यिष्यते । । पञ्चमे चिरमचिरं

वाऽवस्थानमित्यनियमनिरासव्याजेन व्रीह्यादिषु सुखभोगरहितमतिचिरावस्थानं दृढीकरिष्यते, तेषु च अवस्थानं तत्तदभिमानिजीवात्मना चेत् तल्लवनपर्यन्तमेव स्यात् ततश्च नातिहेयत्वं सिध्द्येदिति अतिहेयत्वसिध्यै तेषु संष्लेषमा-त्रमिति वर्णयिष्यते, संश्लेषस्तेषां शोणषकुशूलावस्थापनावहन्नफलीकरणपाकभक्षणादिदशासु अनुवर्त्तमानः पितृवीयात्मना परि-णामपर्यन्तः, पुरुषभक्षणविषयत्वं मनापन्नेषु व्रीह्यादिषु संश्लिष्टानामनुशयिनां तेषु संश्लेषस्तु व्रीह्यादिपरिणामान्तरपरम्पराक्रमेण यथा-कथञ्चित्पुरुषभक्षणविषयत्वप्राप्त्यनन्तरं तेषां तद्वीर्यात्मना परिणामपर्यन्त इति "रेतः सिग्' सूत्रे संसूचयिष्यते, तथा पुरुषवी-र्यानुप्रवेशेऽपि योषितमप्राप्य तेषां न शरीरलाभः तद्वीर्यं यदि उर्ध्वरेतषां बन्ध्यादिषु प्रवर्त्तानां वा स्यात्, तदा तद्वीर्यपरिणा-मान्तरक्रमेण पुनरपि पुरुषभक्षणविषयत्वं प्राप्य तद्वीर्यसंषक्ततया रितुमतीनां योषितां गभर्गोलकप्रवेशानन्तरमेव क्कचिज्जन्मनि भोगाश्रयस्य भोगमोक्षोपयोगिनश्च शरीरस्य लाभः, तथा स उल्वावृते गर्भो दशा मासानन्तः शयित्वा यावद्वा अथ जायत इति मातुः कुक्षौ मूत्रपुरीषवातपित्तश्लेष्मादिपूर्णे तदनुलिप्तस्य गभर्स्य उल्वाशुचिपाटवृतस्य

लोहितरेतोऽशुचिबीजस्य मातुरशितपीतरसानु- प्रवेशेन विवर्द्धमानस्य निरुद्धबलशक्तिवीर्यतेजःप्रज्ञाचेष्टस्य शयनम्, ततो योनिद्वारेण पीड्यमानस्य कष्टतरा निसृतिर्जन्मेति "योनेः शरीर'मिति सूचयिष्यते । अत एव तस्मात् जुगुष्सेतेति पञ्चप्रश्नीप्रतिवचनानन्तरं श्रूयते, ततश्च युक्तम् इहामुत्र च सञ्चरतो दोषाः प्रतिपाद्यन्त इति, जागराद्यवस्थस्य दोषाः प्रतिपाद्यन्त इत्येतत्तुन युज्यते, क्कापि तास्ववस्थासु दोशाप्रतिपादनात्, इहामुत्र च

सञ्चरणं जागरावस्थस्यैवेति जागरावस्थदोषप्रतिपादनस्य वैराग्यपादे फलितत्वेऽपि स्वप्नाद्यवस्थस्य दोषप्रतिपादनपराधिकरण-स्यादर्शनात्, "सन्ध्ये सृष्टिराह हि' इत्यधिकरणानां उभयलिङ्गपादगतानां अत्याश्चर्यस्वाप्नपदार्थस्त्रष्ट्रत्वसुषुप्तविश्रान्त्याधारत्वा-दिपरमात्ममहामहिमप्रतिपादनपरत्वेन स्वप्नाद्यवस्थादोषप्रतिपादनपरत्वाभावादित्याशङ्कां निराकरोति । लोकान्तरेष्वित्यादिना फलितमित्यन्तेन ग्रन्थेन - अयम्भावः, सन्ध्याद्यधिकरणेषु स्वप्नाद्यवस्थानिरूपणस्य "नाहमत्र भोग्यं पश्यापि नाहं खल्वयमेवं सम्प्रति आत्मनं जानाति अयमहमस्तीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि' इति प्रजापति-विद्योदितदोषसंसूचकत्वात्, "परामिध्यानात्तु तिरोहितम्' "देहयोगाद्वा सोऽपी'ति स्वप्नावस्थायां कर्मदेहसम्बन्धाधीनापहतपाप्म-त्वादितिरोधानवर्णनाच्च परमात्ममहिमप्रतिपादनपरेभ्योऽप्याधिकरणेभ्यः स्वप्नाद्यवस्थस्य दोषाः फलन्तीति । प्रथमाधिकरण- स्य संशयमाहेति -अवयवावयविभावे षष्ठी । किं श्रद्धादिशब्दैरिति - आदिशब्देन सोमवृष्टयादयो गृह्यन्ते । पितृयानेन पथा निवर्त्तने एष सोमो राजेति सोमशब्दस्येति - निवर्त्तनं सञ्चरणम्, अथैतमेवाध्वानं पुनर्निवर्तन्त इत्यारभ्यैव निवृत्तेः प्रतिपादयि-ष्यमाणत्वात्, यद्वा निवर्त्तन इति अपादाने ल्युट् ततश्च पितृयानेन पथा यस्मात् द्युलोकात् निवर्त्तते, तत्र विषये "एष सोमो राजे'ति सोमशब्दस्येत्यन्वयः, अयमर्थः "आकाशाच्छन्द्रमसम्' एष सोमो राजा तद्देवानामन्नम् तं देवा भक्षयन्ति' इति पितृ-यानवाक्यस्थसोमशब्दस्य यत्सोमदेहविशिष्टजीवपरत्वं तत् "तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुहति तस्या आहुतेः सोमो राजा सम्भवति' इति पूर्वप्रवृत्तपञ्चाग्निविद्यावाक्यगतस्य सोमशब्दस्य सोमदेहविशिष्टपरतामवगमयति उतनेति । श्रद्धाहुत्यनन्तरवाक्य- स्थ सोमशब्दस्येति - "श्रद्धां जुह्वति' इति वाक्यानन्तरं यत्तंस्या आहुतेः सोमो राजा भवतीति वाक्यं तत्स्थस्येत्यर्थः । भाष्ये - भूतसूक्ष्माणां सुलभत्वादिति, भोग्यभोगोपकरणभोगस्थानवत् भोगायतनानामपि शरीराणां तत्रत्यैरेव भूतैरदृष्टाकृष्टै-

रारम्भसम्भवात् न तदर्थमितो भूतसूक्ष्मानयनापेक्षेति भावः । भाष्ये - रंहति गच्छतीत्यर्थः इति, रहि गताविति धातोः निष्पन्न-त्वादितिभावः । ननु भूतसूक्ष्मपरिष्वङ्गपरप्रश्नप्रतिवचनमात्रस्यैव उपन्यसनीयतयाऽधिकोपन्यासासाङ्गत्यमित्याशङ्कयाह -प्रश्नप्रति-वचनाभ्यामित्यादिना । अत्र प्रश्नप्रतिवचनाभ्यामिति सूत्र्यते, नहि "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति भूतसूक्ष्मपरिष्वङ्गपरप्रश्नानन्तरं सम्परिष्वङ्गपरं प्रतिवचनं दृश्यते, "यामेव कुमारस्यान्ते वाचमभासथाः ताभेव मे बूहि' इति गौत-मकर्त्तृकप्रश्नान्तरेण व्यवधानात्' इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इत्यस्य पाञ्चालराजकर्त्तृकप्रतिवचनस्य "वेत्थ यथा पञ्चम्यामाहुता'विति पाञ्चालराजकर्त्तृकस्य गौत्तमप्रश्नव्यवहितप्रश्नस्योत्तरत्वासम्भवात्, एवं हि तत्र श्रूयते "श्वेतकेतुमारुणेयं पाञ्चालराजः प्रवाहणो, वेत्थ यदितोधिप्रजाः प्रयन्ति' इति कर्मिणां गन्तव्यदेशं "वेत्थयथा पुनरावर्त्तन्ते' इति पुनरावृत्तिप्रकारं "वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्तना' इति यानयोः व्यावर्त्तकाकारौ "वेत्थ यथाऽसौ लोको न सम्पूर्यते' इति अमुष्य लोकस्य अप्राप्तारं "वेत्थयथा पञ्चम्यामाहुवापः पुरुषवचसो भवन्ति' इति पञ्चम्यामाहुतावषां पुरुषवचस्त्वञ्च पप्रच्छ । निवर्तयितुं तस्य हि प्रश्नस्य् "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति पाञ्चालराजप्रतिवचनमिति । इमांमन्दाशङ्क इतितु - "पञ्चम्यामाहु-तावापः' इत्यादिप्रतिवचनानां पाञ्चालाराजकर्तृकाणां पञ्चानां पाञ्चालराजकर्तृकप्रश्नपञ्चकाव्यवधानक्रमरूपतां दर्शयति-इत्यर्थः । "यामेव कुमारस्यान्ते वाचमभाषथाः' इति गौतमप्रश्नस्य पाञ्चालराजकर्तृकपञ्चप्रश्न्यभिन्नत्वेन तद्भिन्नत्वानुपपत्तेः, यद्ययं प्रश्नः भिन्नः स्यात्-तदा एकमेव प्रतिवचनं स्यात्, अतः प्रतिवचनपञ्चकदशर्नात् पाञ्चालराजकर्तृकाणामेव पञ्चानां प्रश्नानामुत्तरमवसीयते, अत एव "यामेव

कुमारस्यान्ते वाचमभाषथाः' इति गौतमप्रश्नस्य पाञ्चालप्रश्नाभिन्नत्वात् प्रश्नप्रतिवचनयोरव्यवधानरूपक्रमः सिद्ध.। नत्वत्र पञ्चानां क्रमेण प्रश्नानां प्रतिवचनानि-प्रथमस्य प्रथमं द्वितीयस्य द्वितीयम् इत्येवमितिन भ्रमितव्यम्, न ह्यत्र प्रश्नक्रमेण प्रति-वचनानि प्रवृत्तानि, अपि तु "वेत्थ यथा, पञ्चम्यामहुतौ' इति स तावदिमान् प्रश्नात् प्रतिवक्तुमजानन् स्वापित्रे व्यवेदयत् । सीपिच अजानन् तमेव पाञ्चलारज पप्रच्छ । प्रश्नात्हि प्रथमतः प्रतिवचनं दृश्यते, न च प्रश्नप्रतिवचनानामानन्तर्य्यरूपः क्रमोभाष्ये न दर्शित इति चोदनीयम्, इममर्थं पप्रच्छ प्रतिब्रुवँश्चेति भाष्यग्रन्थेन तत्प्रश्नानां प्रतिवचनत्वख्यापनेन तदानन्तर्यस्य ख्यापनात् । होतव्यद्र-व्याकाङ्क्षायामिति -यद्यप्यापां पुरुषवचस्त्वविशेषि-तभवनक्रियासम्बन्धमात्रं शाब्दं, तथापि आहुतीनां द्रव्याकाङ्क्षायां सन्निधानेनाप एव द्रव्यत्वेन सम्बध्यन्ते, ततश्च अपरं पञ्चम्य पञ्चमस्य प्रश्नस्य, 'इति तु पञ्चम्या माहुतौ इति तासामेवापां पुरुषाकारेण परिणामं

वेत्थ इति प्रश्नवाक्यार्थः पर्यवस्यति, न च अपां सन्निहतत्वेऽपि तत्सन्निधेः पुरुष-

वचस्त्वविशेषितभवनक्रियान्वयार्थतया अन्यार्थसन्निहिताभिरद्भिः आहुतीनान्न विशेषितत्वं सम्भवति, नह्यश्वेन गच्छति श्वेतेन पटेन प्रावृत इत्युक्ते पटार्थसन्निहितेन श्वेतेनाश्वोऽपि विशेष्यत इति वाच्यम् सत्यामाकाङ्क्षायामन्याथर्सन्निहितस्यापि अन्यविशेषक-त्वसम्भवात्, "मूलतः शाखां परिवास्योपवेशं करोति' इत्यत्र परिवसनापादानतयाऽन्वितस्य मूलत इत्यस्य उपवेष करोतीत्यनेन साकाङ्क्षेणाऽप्यन्विस्य प्रयुक्तिलक्षणे दर्शितत्वादिति भावः - वाक्यान्तरस्थेति । ननु वाक्यान्तरस्थत्वेऽपि प्रयमेऽग्नौ श्रुतां श्रद्धां परित्यज्य स्ववाक्यस्थत्वरूपसन्निधिकात्रमवलम्व्य अपो होम्यत्वेन परिकल्प्यन्त इत्येतत्कथमिति चेत्, असञ्जातविरोध्युपक्रम-

गतप्रश्नवाक्ये एवापां होम्यत्वस्य निर्णयात्, उपसंहारे "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इत्यत्रापि तथैव प्रतीतेः, वाक्यान्तरस्था श्रद्धा प्रश्नप्रतिवचनवाक्यमध्यस्था, अन्तरशब्दो मध्यवचनः, मध्येऽपि तत्प्रकार एव उपपादित इति ग्रन्थकृतैव प्रथमे श्रवणादित्यत्र वक्ष्यमाणत्वात्, ततश्च सन्दंशन्यायेनोपक्रमाधिकरणन्यायेन च तदनुगुणतयैवात्मानं लभते न तद्विरोधेनेत्यदोषः । परिणामस्यायोग्येति - इदमुपलक्षणम् । आत्मधर्मभूतायाः श्रद्धायामः आत्मतो निष्कृष्यहोमासम्भवाच्चेत्यपि द्रष्टव्यम्, एतत्सर्वं "प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्ते'रिति सूत्राभिप्रेतम् तत्रैवोपन्यसनीमय् प्रतिपत्तिसौकर्याया-

नागतवेक्षणन्यायेन इहोपात्तमिति द्रष्टव्यम् प्रश्नप्रतिवचनाभ्यामिति प्रश्नयोः निरुपणे प्रश्ननिरुपणे ताभ्यां इति व्याख्यातव्यम् विग्रहो विवक्षित इति भावः ।। ।। त्र्यात्मकत्वात्तु भूयस्त्वात् ।। शङ्काग्रन्थस्थपरिष्वङ्गब्देनेति । अस्य पूर्वेणान्वयः, कथं परिष्वङ्ग इति शङ्कायामाह - त्र्यात्मकत्वादिति । भाष्यग्रन्थेन त्र्याताम-कत्वात् परिष्वङ्ग इत्यन्वयो दर्शित इति भावः ।। प्राणगतेश्च (३-२-१) ।। अवान्तरसाध्यान्वयव्यावृत्त्यर्थमिति - भूयस्त्वादिति हेत्वंशस्य यत्साध्यं केवलानामषां श्रवणमुपपद्यत इति तदन्वयव्यावृत्त्यर्थमित्यर्थः ।। अग्न्यादिगतिश्रुतेरितिचेन्नमाक्तत्वात् (३-१-४) ।। ओषधिवनस्पतिषु चाप्ययरिंहतैरिति - मृतस्य लोभ्नां केशानाञ्च उत्प्लुत्योत्प्लुत्य ओषधिवनस्पतिषु अप्ययादर्शनादिति भावः । लोमाभिमानि देवता इति - "अग्निर्वाग्भूत्वा मुखं प्रविशत्, वायुः प्राणो भूत्वा नासिके प्राविशत्, आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्, दिशः श्रोत्रं भूत्वा कर्णौ प्राविशत्' ओष-धिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशत्' इत्यादिवाक्यपर्यालोचनया ओषध्यभिमानिदेवतानां लोमाभिमानिदेवतानां च

ऐक्यं सिद्धम्, ततश्च "ओषधिर्लोमानि वनस्पतीन् केशा' इति वृहदारण्यकवाक्यस्यापि लोमाभिमानिदेवतासु अप्ययो नाम तद-भिमन्तृत्वरूपतन्नियन्तृत्वपरित्याग इत्यर्थः समाश्रयणीयः, एवं वागादिष्वपि उपपद्यत इति भावः । ननु अग्न्यादीनां मरणकाले वागाद्यभिमानित्वपरित्यागे प्राणानामुत्क्रान्तिगतिचन्द्रसम्वादादिकार्याण्यपि न सिध्द्यन्ति, ततश्च प्राणगतेश्चेति सूत्रासामञ्जस्यं परिहरता प्रकारान्तरेण सूत्रासामञ्जस्यमेव दृढीकृतं स्यात्, ततश्च वागादीन्द्रियाणां भ्रियमाणानुपकारकत्वेनासत्कल्पत्वेनापीत-सादृश्यात् वागादिरपीत इत्युच्यत इत्युपचाराश्रयणमेव ज्याय इति चेत्

म्रियमाणजीवं प्रति वागादीनामुपकारविशेषापादकत्वा-नुकूलाभिमानविशेषपरित्यागस्यैव विवक्षितत्वात्, न च भाक्तत्वाश्रयणेऽविशिष्टे असत्कल्पत्वेनापीतसादृश्यात् भाक्तत्वमिति परोक्तं किं नाश्रियत इति वाच्यम्, शरीरवाचिशब्दानां शरीरिपर्यन्तत्वस्य सिद्धतया वागादिशब्दानां तद्देवतापरस्वस्य सम्भवात् तत्राप्ययश्रुतेरभिमानविशेषमात्रपरित्यागमात्रेण कथञ्चिदुपपत्तिरस्तीति तदपेक्षया ज्यायस्त्वमिति भाष्यकाराभिप्रायः ।।अश्रुतत्वादितिचेन्न इष्टादिकारिणां प्रतीते ।। नन्वस्मिन्नेव वाक्य इति भाष्यमयुक्तम्, पितृयाणवाक्य एवेष्टादिकारिणां सोमराजभावः श्रूयते, नास्मिन् पञ्चाग्निविद्यावाक्य इत्य; अत आह - महावाक्य इत्यर्थः इति । भाष्ये - सोमराजान इति निर्देशस्समासान्तविधेरनित्यत्वात्, तस्य च "प्रतेरंश्चा-दयस्तत्पुरुष' इत्यादिषु राजाशब्दपाठेन ज्ञापनात्, सोमाराजान इति वा-सोमराजा इति वा पाठः समीचीनः । उक्तप्रकारेणा-

नुतिष्ठन्तीति - श्रुताविवितिशब्दः प्रकारवचनः. ततश्च इष्टं-पूर्त्तं दत्तं-अनशनम् एवं जातीयकानि कर्माणि सुकृतशब्दवाच्यानियेऽनुतिष्ठन्तीत्यर्थः, उक्तप्रकारेणेत्यस्यापि स एवार्थः, पूर्वश्रुतावनुष्ठानप्रकारस्यानुक्तेः तद्योगी भवतीत्यर्थ इति, इदन्तु रेतः सिग्- सूत्रे ग्रन्थकृतैव स्पष्टयिष्यते । उभयत्र सोमराजशब्देनेति - इदमुपलक्षणम्, द्युलोकस्थानसम्बन्धित्वेनेत्यपि द्रष्टव्यम् ।। * ।। तत्सेवकत्वादिति - नृत्तगीतादिना तत्सेवकत्वादित्यर्थः । परे त्वित्यादि - द्रवद्रव्यभूयस्त्वादिति पूर्वेणान्वयः, अग्निहोत्रादिकर्मणां द्रवद्रव्यसाधनकतया तत्कर्मसम्बन्धिषु दधिपयःप्रभृतिषु हविष्षु भूयसीनामुपलम्भात् ता एवाप इहाप्शब्देन अभिधीयन्त इति भावः, ते वा एते आहुती, अग्निहोत्राहुती, इमामिति पृथिवीमित्यर्थः । अपूर्वरूपेणेति - कर्मसमवायिन्य आहुतीमत्य

३.१.७

आप अपूर्वरूपास्सत्यः तानिष्टादिकारिणो जीवान् परिवेष्टययामुं लोकं फलदानाय नयन्तीतिशाङ्करभाष्योक्तेरिति भावः । जीवान् परिष्वजत इति पाठः पटैकदेश इति । यथा पटैकदेशे दग्धेपटो दग्ध इति व्यवहारः अमुख्यः, तथा "ते वा एते आहुती' इत्यत्र आहुतिशब्दस्य आहुत्येकदेशे प्रयोगोऽमुख्यः स्यादित्यर्थः । पूर्वपक्षपराणि व्याख्यातानीति - पूर्वपक्षसूत्रितया व्याख्यातानीत्यर्थः, ननु द्युपृथिवीपुरुषयोषिद्रूपाणां प्रत्यभिज्ञापकानां पञ्चाग्निविद्यायां भूयसां सत्वेन षट्प्रश्नप्रमाणप्रत्यभिज्ञानमस्त्येव, किञ्चित् न्यू-नातिरेकवशेन प्रत्यभिज्ञाभङ्गे "अर्चिरादिना तत्प्रथितेः' "सर्वाभेदादन्यत्रेमो' इत्यधिकरणविरोधप्रसङ्गात्, देवतातृप्तिहेतुत्वेन श्रुतानां पुरुषवचस्त्वपर्य्यन्तावस्थाविशेषस्यापि नानुपपत्तिः, "तं देवा भक्षयन्ति' इति श्रुतस्य सोमाकारपरिणामदेहगतदेवभक्ष्य- त्वस्य जीवे "एतदेवामृतं दृष्ट्वा तृप्यन्ति' इति न्यायेन तृप्तिहेतुभूतदर्शनकर्मत्वरूपतया सिद्धान्तिनोऽपि सम्मतत्वेन देवतातृप्तिहेतु-त्वस्य वृष्टयन्नादिपरिणामाविरोधित्वादित्यस्वरसादाह - भवतु वा विभाग आहुतीनामिति । यथा स्वप्शब्द एवेति श्रप्श-ब्दस्य पुरुषशब्दसामानाधिकरण्यनिर्वाहाय लक्षणयापि समाश्रयणीयस्य जीवपरत्वस्यान्यतरेणैव लक्षणां मुख्यया वृत्त्या सिद्धौ कस्तत्परित्यजेदिति भावः । चन्द्रप्राप्तिदशायामिति - एष इत्येतच्छब्दस्य "आकाशाच्चन्द्रमसमभिसम्भवन्ति' इति पूर्वनिर्दिष्ट-

३.१.७

चन्द्राभिसम्भवनविशिष्टजीवपरामर्शित्वात् चन्द्रप्राप्त्यनन्तरं सोमराजत्वे सिद्धे तत्प्रत्यभिज्ञानात् पञ्चाग्निविद्यायामपि सोमभाव- स्य चन्द्रप्राप्त्यनन्तरभावित्वं सिध्यतीति भावः । एष इति सर्वनामपदेनेति - प्रथमान्तसर्वनामपदेनेत्यर्थः, विभक्तिसारूप्येन प्रथमान्तनिर्दिष्टस्यैव प्राप्तुः जीवस्य परामर्शो युक्तः "प्रजापतिर्वरुणायाश्वमनयत् सस्वां देवतामार्च्छत्' इत्यत्र स इति प्रथमान्तपदेन न चतुथ्यर्न्तनिर्द्दिष्टस्य प्रतिगृहीतुर्वरुणस्य ग्रहणम्, अपि तु समानविभक्तिनिर्दिष्टस्य प्रजापतेः ग्रहणमिति "तस्यैवारुणान्चतुष्कपा- लान् निर्वषेत्' इति विहितेष्टिरिति पूर्वतन्त्रे स्थितत्वादिति भावः, न च विभकत्यैकरूप्येण प्रथमान्तनिर्दिष्टस्य ग्रहणे "स उत्तमः पुरुषः' इत्यत्रापि स इति तच्छब्देन "एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' इति पूर्ववाक्ये प्रथमान्तसम्प्रसादशब्दनिर्दिष्टस्य जीवस्यैव ग्रहणं

स्यात् , न तु परं ज्योतिरुपसम्पद्येति द्वितीयान्तपदनिर्दिष्टस्य परस्य ब्रह्मण इति चेत्-न, प्रथमान्तनिर्दिष्टस्य जीवस्य स इत्यनेन ग्रहणे तस्योत्तमपुरुष इति प्रतिपाद्यमानपुरुषोत्तमत्वस्य जीवे बाधित- त्वेन तत्र विभकत्यैकरूप्यावगतसम्प्रसादशब्द वाच्य जीवपरित्यागोपि असति बाधके विभकत्यैकरूपस्य नियामकत्वसम्भवात्

। विभक्तिमात्रस्येति - वचनमात्रस्येत्यर्थः, एवमुत्तरत्रापि विभक्तिशब्दो वचनपरो द्रष्टव्यः, विभकत्यर्थक्लेशस्याप्रसक्तेः, ततश्च बहु-पत्नीकप्रयोगेऽपि "पत्नीं सन्नह्य' इत्येकवचनवत् वाक्यस्य प्रातिपदिकस्य च गुणभूतं वचनं प्रत्येकमेकत्वाभिप्रायेण वा जात्यभि-प्रायेण वा योजनीमय्, अभ्युदितेष्टौ "यस्य हविर्निरुक्तं पुरस्ताच्चन्द्रमा अभ्युदियात् स त्रेधा तण्डुलान् विभजेत्' इत्यत्र तण्डुलानां त्रेधा विभागो न विधीयते, ये मध्यमाः स्युरित्यादिवाक्यैरेव मध्यमादिविभागस्य सिद्धत्वेन वाक्यवैयर्थ्यप्रसङ्गात्, तण्डुलशब्देन दार्शिकहविर्लक्षयित्वा तस्य पूर्वदेवतापनयो विधीयते इत्येवं वाक्यावैयर्थ्याय वाक्यान्तर्गतबहुपदास्वारस्याश्रयणे न्यायसिद्धे वाक्या-वैयर्थ्याय वचनमात्रास्वारस्याश्रयणं कैमुत्यसिद्धमिति भावः । विभकत्यर्थनिर्बन्धाभावदर्शनादिति - एकवचनान्तनिर्दिष्टस्य एक-वचनान्तेनैव निर्देशः, बहुवचनान्तशब्दनिर्दिष्टस्य बहुवचनान्तेनैव निर्देशः इति नियमाभाव इत्यर्थः । ननु पञ्चाग्निविद्यायामपीति - अयं भावः- पञ्चाग्नि विद्यायां सोमराजशब्दस्य चन्द्रेतरविषयत्वे सिद्धे तत्प्रत्यभिज्ञापनेन प्रयोजनवत्तया "एष सोमो राजा' इति

३.१.७

पितृयाणवाक्ये एतच्छब्दस्य प्राप्तविषयत्वं स्यात्, पञ्चाग्निविद्यावाक्यथसोमराजशब्दस्यापि चन्दविषयत्वे "एष सोमो राजा' इत्य-स्यापि प्राप्तृपरत्वेऽपि निष्प्रयोजनत्वाविशेषात् एकवचनस्वारस्येन स्यादिति । अस्यसोमराजशब्दस्येति - पञ्चाग्निविद्या-वाक्य-स्थसोमराजशब्दस्येत्यर्थः । चन्द्रव्यतिरिक्तविषयताज्ञानमात्रमिति - तस्यचन्द्रविषयत्वनिश्चयेऽपि पितृयाणवाक्ये "एष सोमः' इति इष्टादिकारिणं निर्दिश्य पञ्चाग्निाविद्यावाक्यप्रतिपन्नचन्द्राभेदबोधनासम्भवात्, ननु तावता चन्द्रविषयतेवनिश्चयाभावस्य प्रति-बन्धकाभावत्वेन अपेक्षितत्वेऽपि चन्द्रव्यतिरिक्तविषयत्वनिश्चयोनापेक्षित इति चेत् सत्यम्, "चन्द्रव्यतिरिक्तविषयत्वनिश्चयसाम-ग्रीभूतसम्भवहोम्यत्वानुपपत्तेः सत्वात् इह तथोक्तमिति द्रष्टव्यम् । सम्भवहोम्यत्वानुपपत्त्येति - सोमराजा सम्भवति सोमं राजानं जुह्वतीति प्रतिपादितसम्भवहोम्यत्वयोरनुपपत्तेरित्यर्थः । एतावज्ज्ञापनेनेति - ननु चन्द्रप्राप्तिदशायां श्रद्धाहुतिसम्भूत-सोमराजभावज्ञापनं "एष सोमो राजा' इति वाक्यस्य प्रयोजनम्, एष इत्यनेनापि सम्भवतीति लटा वर्त्तमानाभिसम्भवविशिष्टः चन्द्रं प्राप्नुवन् जीवः कथ्यते, "सोमो राजा' इत्यनेन तु "तस्या आहुतेः सोमो राजा सम्भवति' इति पञ्चाग्निवाक्यात् प्रतिपन्नश्रद्धा-हुतेरुत्पाद्यमानः सोमो राजा विधीयते; ततश्च तयोरभेदबोधने चन्द्रप्राप्तिसोमराजभावयोरेककालत्वप्रतीतेः चन्द्रप्राप्तिदशायां सोम-राजभावस्सिध्यतीत्येवं क्लेशेनोपपादनीयस्य चन्द्रप्राप्तिदशायां सोमराजभावस्य प्रयोजनत्वं किमित्याश्रीयते, एष इति निर्दिष्टस्य प्राप्तुः सोमराजेति पञ्चाग्निविद्यावाक्यस्थसोमराजाभेदबोधनेन सिध्यतः पञ्चाग्निविद्यावाक्यगतसोमराजशब्देष्टादिकारिविषयित्व-स्येव प्रयोजनत्वोपपत्तेरिति चेत्-सत्यम्, प्रयेजनान्तरस्य सम्भवतः त्यागायागात् तदप्युपन्यस्तम्, ननु एष सोमराजेति इष्टादि-कारिणि प्रयुज्यमानस्य सोमराजशब्दस्य पञ्चाग्निविद्यावाक्यस्थसोमराजशब्दस्य गौणार्थीभूतश्रद्धाहुतिसम्भूतामृतदेहाभेदबोध- कत्वं न युज्यते, अतः तस्मिन्तच्छब्दस्य प्रयुज्यमानस्य तच्छब्दस्य तत्सादृश्यबोधकत्वमेव, न तु तत्सदृशगौणार्थाभेदबोधकत्वमित्यस्वरसा-कृतात्ययाधिकरणम्

३.१.८

दाह - अथवेति । चन्द्रसादृश्यज्ञानमेवेति - "तद्देवानामन्न'मिति वाक्यशेषे तस्यैव विवरणदर्शनात्, देवानामन्नं, देवनामुपभो-ग्यमित्यर्थः । न च तत्सादृश्यप्रतिपादनं फलमिति वाच्यम्, तस्य तं देवा भक्षयन्तीति

देवोपभोग्यत्वरूपभयत्वप्रतिपादनेनार्थ-वत्त्वात्, न चास्मिन्पक्षे पञ्चाग्निविद्यावाक्यगतसोमराजाभेदबोधनाभावात् तद्गतसोमराजशब्दस्य इष्टादिकारिविषयत्वासिद्धेः "अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीते'रिति सूत्रविरोधः, पञ्चाग्निविद्यायां "आपः पुरुषवचसो भवन्ती'ति चेतनवाचिपुरुष-शब्दसामानाधिकरणेन सिध्युपपत्तेः गौणचन्द्रपदप्रयोगविषयत्वद्युलोकसम्बन्धित्वकृततदैक्यप्रत्यभिज्ञानस्यानुनिष्पादिनः प्रत्या-ख्यातुमशक्यत्वादिति भावः । तेषां

न सोमराजशब्दाभिलप्यत्वमिति - किमिष्टादिकारिणां सोमराजशब्दगौणार्थत्वं निषिध्यते, उत मुख्यार्थत्वमिति विकल्प्य आद्यं दूषयति । छान्दोग्यस्थस्य सोमराजशब्दस्येति - यथा श्येनेनाभिचरन् यजेत्,-इत्यत्र श्येन-शब्दस्य कथं नाम यागे प्रवृत्तिः स्यादित्येवमर्थं यथा वैश्येन, इत्यादिवाक्यं प्रवर्तते तद्वदिति भावः । द्वितीयमिष्टापत्त्या दूषयति - न हि वृत्यन्तर इति ।। ।। इति तदन्तरप्रतिपत्त्यधिकरणम् ।।

अत्र भाष्ये - पुनरावर्त्तनञ्च आम्नातमित्यस्य अनन्तरं "अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूमभिमस्मवन्ति' इत्या- रभ्य इत्यध्याहृत्य "यावत्सम्पातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्ते' इत्याम्नातमित्यन्वयो द्रष्टव्यः, ततश्च यावत्सम्पातमिति भाष्योपात्तश्रुतिवाक्येपि पितृयाणपथा नाम्नानं न दोषः, अथवा केवलेष्टादिकारिणां धूमादिना पितृयाणेन पथा गमनं भूतपरिष्व-ङ्गादिप्रकारयुक्तम्, चिन्तितमिति शेषपूरणेन समाप्तं वाक्यम्, कर्मफलावसान इत्यादि तु वाक्यान्तरम्, अस्मिन् पक्षे अवान्तर

सङ्गतेः भाष्ये कण्ठतः प्रतिपादनात् विषयशुध्द्यर्थम् अवान्तरसङ्गत्यर्थञ्चेति टीका सुसङ्गता, पादसङ्गतिसूचकं सङ्गत्यन्तरमनयो-रधिकरणयोर्दर्शयति - यावत्संसारमित्यादिना अर्थः सङ्गतिरित्यर्थः इति । अत्रेतिशब्दः प्रकारवचनः, प्रयोजनं एवं जातीया सङ्गतिः प्रयोजनं फलितेति यावत् भुक्तशिष्टं कर्म न शिष्यत इति विरोधमाशङ्कयाह - तच्छब्देति । अवशिष्टं कर्म न सम्भवतीत्यर्थ इति - नाव-शिष्यत इत्यस्य न सम्भवतीत्यर्थः इति भावः । वाक्यवैयर्थ्यमिति - यावन्मरणं जीवनमिति वाक्यवत् इति भावः । भाष्ये - सम्पतन्त्यनेनेति करणे घञिति भावः । अभ्याङ्पूर्वादिति - यद्यपि "कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स कामः समृध्द्येत' इत्यादौ अभ्यागन्तृवचनत्वं न सम्भवति, परोक्तं क्षिप्रवचनत्वं तु सम्भवति तथापि अत्रास्यार्थस्य सम्भवात् तथोक्तमिति द्रष्टव्यम्, भाष्ये - प्रत्यवरूढेष्विति

तद्विषयमेव । अभुक्तफलानामकृतप्रायश्चित्तानां च कर्मणां कर्मान्तरफलानुभवान्नाशोऽप्यनुपपन्नः । अतोऽमुं लोकं गताः सानुशया एव यथेतमनेवं च पुनर्निवर्त्तन्ते-आरोहप्रकारेण प्रकारन्तन्तरेण च पुनर्निवत्तन्त इत्यर्थः । आरोहणं हि धूमरात्र्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्रक्रमेण; अवरोहणन्तु चन्द्रमसः स्थानादाकाशवायुधूमाभ्रमेधक्रमेण । तत्राकाशावरोहणात् यथेतम्, वाय्वादिप्राप्तेः पितृलोकाद्यप्राप्तेश्चा- नेवम् ।। ८ ।।

३.१.८

निर्द्धारणे सप्तमी, भाष्ये दर्शयतीति, श्रुतिरित्यनुषज्यते । गौतमापस्तम्बवचनमिति - वर्णा इत्यादि गौतमवचनम्, तत इत्या-द्यापस्तम्बवचनम्, भाष्ये-यावत्सम्पातमिति, फलदानप्रवृत्तकर्मविशेषविषयमिति, यावन्त्यस्य कर्माणि तानि सर्वाण्यपि कदाचि-च्चन्द्रमसमारूढेन न भोक्तुं शक्यन्ते, अनादिजन्ममरणप्रवाहे केषाञ्चित् कर्मणां ततः प्रागेव भुक्तत्वात् नानाविधदेवमनुष्यपशुप-क्षिसरीसृपादिदेहभोग्यत्वेन श्रुतानां कर्मणां एकेन स्वशरीरेण भोकतुमशक्यत्वात् । तस्मादुपक्रमगतस्यापि सम्पातशब्दस्य स्वत एव सङ्कोचकापेक्षायां

स्मृत्यनुगृहीतोपसंहारगतरमणीयचरणादिश्रुत्यनुरोधेन तथा सङ्कोचः कर्त्तुं युक्त इति भावः - तद्वय इच्छेद इति । फलदानाप्रवृत्तस्वर्गार्थकर्मैकदेशनिरास इत्यर्थः । स्वर्गकामो यजेतेति श्रुतिस्वारस्यविरुद्धमिति - स्वर्गार्थज्योतिष्टोम-स्यैव रमणीययोन्यादिफलत्वे स्वर्गस्य निरपेक्षसाध्यत्वप्रतिपादकश्रति विरोध इत्यर्थः, अत एव "सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकामः' इत्यादिवाक्यप्रतिपन्नब्रह्मवर्चसादिफलकेषु सौर्यादिषु शास्त्रस्य बहुविषयत्वसिध्द्यै विश्वजिन्न्यायेन स्वर्गस्यापि फलत्वे कल्प्य- माने कामश्रुतिप्रतिपन्ननिरपेक्षसाध्यत्वभङ्गप्रसङ्गात् न स्वर्गाद्यर्थत्वमित्युक्तम् पूर्वतन्त्रे । अत एव सर्वकामसाधनत्वेन प्रतिपन्न-ज्योतिष्टोमादेरपि एकस्मिन् प्रयोगे न फलद्वयसाधनत्वमित्यपि, पूर्वतन्त्रे वर्णितमिति भावः । भाष्ये - फलानुभावान्नाश इति, हेतौ पञ्चमी, विभाषा गुण इति योगविभागात् फलानुभवेन नाश इत्यर्थः, "प्रायः पापं विजानीयात् चित्तं तस्य निरोधन'मिति पापस्यैव प्रायश्चित्तनाश्यत्वं न पुण्यस्येति शङ्कां निरस्यति - पुण्यकर्मणोमुमुक्ष्वपेक्षयेति । ननु यथेतमनेवञ्चेति सूत्रखण्डो व्यर्थः, निवर्त्तनीयशङ्काया अभावात्, श्रुतिवाक्य एवास्यार्थस्य स्पष्टं प्रतिपादनात्, अतो न्यायनिबन्धनात्मके सूत्रे किमर्थं तन्निबन्धनमति चेत्, अत्र ब्रूमः "अथैतमेवाध्वानं पुनर्निवर्तन्ते यथैतमाकाश'मिति शब्दादारोहपर्वणामेवावरोहेऽपि प्राति- लोम्येन क्रमप्रतीतावपि "आकाशाद्वायुमित्यौपसंहारिकबहुवाक्यानुरोधात् यथा यथेतमनेवञ्च अवरोहणमभ्युपगम्यते, तथै-वोपक्रमश्रुतयः यावदिति श्रुत्या निरवशेषकर्मभोगप्रतीतावपि "रमणीयचरणाः कपूयचरणा' इत्यादौ औपसंहारिकबहुवाक्यानुरो धात् सावशेष एव कमभोग इति दृष्टान्तसूचनार्थमिति ।। * ।।

३.१.११

पृथङ्निर्देशो भिन्नार्थत्वकृत इत्यर्थ इति - अत एव "न वायुक्रिये पृथगुपदेशात्' इति पृथगुपदेशस्य अर्थभेदनिबन्धत्वं सूत्रितमिति भावः । आचारशब्दस्येति - पूर्वपक्षिणा आचारवाचित्वेनोपन्यस्तस्य चरणशब्दस्येत्यर्थः । भाष्ये -पुण्यं कर्माचरतीति, आङुप-सर्गस्य प्रयोगस्त्वविवक्षितः, अत एव हि उतरत्र कर्मणि चरतेः प्रयोगादिति भाष्यम्, चरणशब्दसाधारण्याय चरतेरेव प्रयोगस्य

३.१.१२

वाच्यत्वादिति द्रष्टव्यम् । कर्मानुष्ठाने प्रयोगादिति - ततश्च चर्यत अनुष्ठीयत इति "कर्मणि कृत्यल्युट' इति ल्युटि चरणशब्दस्य कर्मवाचित्वमुपपद्यत इति भावः । भाष्ये - आचारानुमितश्रुतिविहितसन्ध्यावन्दनादेरिति, "आचारहीनं न पुनन्ति वेदा' इत्यादि स्मार्तप्रयोगानुसारेण आचारानुमितश्रुतिविहितत्वेन आचारशब्दवाच्यानां सन्ध्यावन्दनादीनाम् अग्निहोत्रादिवैदिककर्माधिका-रापादकत्वं युक्तमिति भावः । ननु कृत्स्नस्याप्याचारस्य कथमाचारान्वितश्रुतिविहितत्वेन आचारशब्दवाच्यत्वम्, आचारेष्वेव सन्ध्यावन्दनादिषु केषुचित् स्मृत्यनुमितश्रुतिविहितत्वस्यापि दर्शनात् सन्ध्योपासनस्यैव "अहरहः सन्ध्यामुपासीत' इति प्रत्यक्ष-श्रुतिसिद्धत्वाच्च, किं बहुना, सिद्धान्ते विप्रकीर्णशाखाया एव स्मृत्याचारमूलत्वाभ्युपगमेन सर्वेषामप्याचाराणां प्रत्यक्षश्रुतिसिद्ध- तया आचारशब्दवाच्यानां सन्ध्यावन्दनादीनामङ्गत्वमिति व्यवस्था कथमिति चेत्, अत्र ब्रूमः, सत्यम्, सर्वमपि कर्मप्रत्यक्षश्रुति-सिद्धमिति, तथाप्यस्त्येव व्यवस्थापकं वैदिकत्वावैदिकत्वयोः, त्रयी हि वैतानिककर्माधिकारेण प्रवर्तते तन्मध्ये तु प्रसङ्गादेवावैता- निकं किञ्चिदुच्यते, ततश्च यदधिकृत्य त्रयी प्रवर्तते तद्वैदिकम्, इतरत्त्ववैदिकम्, ततश्चान्यत् सर्वं लौकिकं स्मार्तमाचार इत्येव हि वैदिकगोष्ठीव्यवहारः, अयञ्चार्थः पूवर्तन्त्रे सप्तमे विध्यन्तराधिकरणे स्पष्टः, ततश्च वैतानिके कर्मणि अवैतानिकमङ्गमित्यर्थः।। * ।।

।। इति कृतात्ययाधिकरणं समाप्तम् ।। * ।।

साधुकर्मसन्बन्धनियमो नास्तीयुच्यत इति - अत्र साधुकमर्शब्देन तत्फलभूतद्युलोको लक्ष्यते, अस्याधिकरणस्य साधुकमर्र- हितेषु द्युलोकसम्बन्धाभावप्रतिपादनपरत्वादिति द्रष्टव्यम्, अथवा इत्युच्यत इत्यत्र इतिशब्दः प्रकारवचनः, ततश्च वैराग्यहेतोः केषृचिदनिष्टादिकारिणोऽपि जीवाः सनति तृतीयस्थानस्थिताः केचन याम्ययातना अनुभवन्ति, सर्वेऽपि चन्द्रमसं गच्छ- न्तीति एवं जातीयकमिहाधिकरणे प्रतिपाद्यत इति भावः, भाष्ये - केवलेष्टापूर्तेति, केवलेत्यनेन ब्रह्मविद्याङ्गभूतेष्टादिव्यावृत्तिः

३.१.१३

पापव्यावृत्तिर्वा, भाष्ये-विहितम् न कुर्वन्तीति, ननु कथमुभयेषां अनिष्टादिकारिशब्देन ग्रहणं, न च नञ इष्टादिकारिशब्देना- न्वये ये सुकृतं न कुर्वन्ति ते लभ्यन्ते, इष्टादिशब्देनान्वये तद्विरुद्धदुष्कृतकारिणो लभ्यन्ते, तत्रासङ्कोचात् समासद्वयलब्दार्थद्वय-सङ्ग्रहः, ततश्च सुकृतं ये सेवमाना "अपि दुष्कृतमपि न सेवन्ते तेषामपि चन्द्रलोकप्राप्तिव्युदासः सिध्द्यतीति वाच्यम्, तन्त्रावृत्त्ये-कशेषाणाम् अन्यतमाश्रयेन समासद्वयाश्रयणस्य क्लिष्टत्वादिति शङ्का व्युदस्यते । भाष्ये-उभयेऽपि पापकर्माणः इति अयं भावः- नञ इष्टादिशब्देन सुकृतवाचिना समासः, ततश्च दुष्कृतकारित्वमेवानिष्टादिकारिशब्दार्थः, तच्च दुष्कृतं द्विविधमपि भवतीति वस्तुतस्तु सर्वेषामेव पुण्यकारिणां किञ्चित् निषिद्धकर्तृत्वस्यापि सम्भवेन सर्वेषामपि चन्द्रप्राप्तिसम्भवेन इष्टादिकारिशब्देन स्वर्- र्गफलोन्मुखेष्टादिकारिण उच्यन्ते, ताच्छील्ये णिनिप्रत्ययान्तत्वात्, तद्भिन्ना इहानिष्टादिकारिण उच्यन्ते, इति न काऽप्यनुप- पत्तिः । दत्तपूते उच्येते इति - इष्टादिशब्दः सुकृतोपलक्षकः इति भावः । श्रुत्यर्थापत्तिरिति - पञ्चमाहुत्यपेक्षारूपश्रुत्यर्थापत्तिरि- त्यर्थः "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इत्य विशेषश्रवणात्, न च एतन्मनुष्यमात्राभिप्रायमिति वाच्यम्, रमणीय चरणाः कपूयचरणाः श्वयोनिं वा सूकरयोनिंवा' इत्यविशेषश्रवणात्, भाष्ये - अविशेषेण सर्वेषां गतिश्रवणादिति, अनेन पूर्वत्र यावत्सम्पातमिति विशेषश्रवणस्य स्वतः सङ्कोचसाकाङ्क्षस्य रमणीयचरणा इत्यौपसंहारिकवचनानुसारेण सङ्कोचाश्रयणेपि इह"चन्द्रमसमेव ते सर्वे गच्छन्ती'ति श्रुतेः न सङ्कोचः सम्भवतीति प्रत्यवस्थानलक्षणसङ्गतिः सूचितेति द्रष्टव्यम् - पापस्य निष्फलत्वं स्यादित्यर्थ इति । यद्यपि द्वयोः तुल्यफलत्वे बहुवित्तव्ययास साध्यस्य सुकृतस्य व्यर्त्थत्वं स्यात्, इत्येव वक्तुमुचितम्, तथापि "संयमने त्वनुभूय'

इति पापफलानुभवप्रदर्शकसूत्रावतरणभाष्यत्वात् तथोक्तमिति द्रष्टव्यम् ।। * ।। यमाज्ञयेत्यर्थ इति - ननु च संयमनपदं निरोधने

३.१.१३

प्रसिद्धम्, नतु शासने,तत्रापि यमशासन इत्यर्थश्च दुर्ल्लभः, यमस्याप्रसक्तत्वात्, निमित्तसप्तमी चात्यन्तक्लिष्टा, निमित्तात् कर्मसं- योगे सप्तमी वक्तव्येति प्रयोजनतया निमित्त एव, कर्मसंयोगे च सा शिष्टा, यथा-"चर्मणि द्वीषिनं हन्ति दत्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः'इत्यादौ कैयटे क्रियाफलमिह निमित्तत्वेन विवक्षितम्, यत्क्रियायाः प्रयोजकं यदर्थः क्रियारम्भः ततो हेताविति तृतीयायां प्राप्तायां सप्तमी विधीयते, तस्य निमित्तस्य कर्मणा यदि संयोगः सम्बन्धः तेन वेतनेन धान्यं लुनातीत्यत्र सप्तमी न भवति, वेतनस्य धान्येन संयोगाभावादिति वर्णितम्, न ह्यत्र यमाज्ञायाः प्रयोजनतया निमित्तत्व- मस्ति संयमनशब्दस्य यमाज्ञापरत्वे "तत्रापि च तद्ययापारादविरोधः' इति न सामञ्जस्यम्, यमसदनपरत्वे हि यमसदननरकगम- नयोः विरोधशङ्कापरिहारार्थतया सूत्रं समञ्जसं स्यात्, तथा संयमनपदस्य यमाज्ञापरत्वे तत्सूत्रावतरणभाष्यग्रन्थस्यापि सामञ्जस्यम्, न च पुराणान्तरसिद्धयमसदनगमनमादाय विरोधाशङ्कोत्थितिरिति टीकायामुपपादितमिति वाच्यम्,

तस्यातिक्लिष्टत्वात्, संय- मने यमशासने तत्प्रयुक्तयमयातना अनुभूयेति भाष्यस्यापि यमशासने शासत्यस्मिन्नित्यधिकरणे ल्युट्, यमाज्ञाविषये संयमनपत्तने यमप्रयुक्तयातना अनुभूयेति व्याख्यानसम्भवात्, तत्रापि तदयापारादविरोध इति सूत्रावतारिकाभाष्यानुरोधेनार्थाश्रयणे दोषाभा-वादिति चेत्, सत्यम्, सूत्रकाराभिप्रायदर्शिबोधायनवृत्यनुसारेणार्थस्यवर्णनीयत्वेन एवं व्याख्यानोपपत्तिः, "प्रभवति संयमने ममापि विष्णुः' इत्यादौ संयमनशब्दस्य शासनेऽपि प्रयोगदर्शनात् संयमनीयशब्दस्य यमपुरवाचित्वेऽपि संयमनशब्दस्य यमपुर-वाचित्वप्रसिध्द्यभावाच्च परिपाल्यमानतया यमाज्ञायाः फलत्वेन निमित्तत्वसम्भवात्, कर्मसंयोगाभावेऽपि सप्तम्या नानुपपत्तिः, अन्तर्द्धौ येनादर्शनमित्यत्र अन्तर्द्धिर्व्यवधानम्, अन्तर्द्धौ निमित्त इति निमित्तसप्तमीति व्याख्यातं वृत्तिकारैः, अत्र हि इच्छाकर्मण अदर्शनेन अन्तर्द्धेर्योगो नास्तीति, ततश्च अन्तर्द्धावित्यत्र कर्मसंयोगाभावेऽपि प्रयोजनतया निमित्तत्वस्याभावेऽपि निमित्तमात्र-सप्तमीदशर्नात् अत्रापि न दोषः, ननु तत्र पदमञ्जर्यां "निमित्तात्कमर् संयोगः' इति यदि कारणं निमित्तं गृह्यते जाव् बद्धः, इत्यत्रापि प्राप्नोति तस्मात् प्रयोजनस्य निमित्तस्य ग्रहणम् यथा "चर्मणि द्वीषिनं हन्ति' इत्यादौ इहान्तर्द्धानमदर्शनस्य कारणम्, अन्तर्हितः स्वल्वसौ न दृश्यते तस्मान्निमित्तात् सप्तमी, पञ्चम्यर्थस्य शेषत्वविवक्षया षष्ठीसमासः, ततश्च "यस्य च भावेन भाव-लक्षणम्' इति सप्तमी वा, सप्तम्यधिकरणे चेति विषयसप्तमी वा भविष्यतीत्युक्तमिति चेत्, इहापि तथास्तु, अथवा संयमने यम-शासने तत्प्रयुक्ततया तत्प्रयुक्तयातना अनुभूयेतिभाष्ये संयमन इत्यस्य यमशासन इति नार्थकथनम्, अपि तु संयमने यमपुरे यम-शासने सति यमाज्ञायां सत्यां तत्प्रयुक्तयातना अनुभूयेत्यर्थः, अयमेवार्थः संयमन इति निमित्तसप्तमी, यमाज्ञयेत्यर्थ इति टीका-ग्रन्थस्याप्यभिप्रेतः, अस्य वाक्यस्याऽयमर्थः, संयमन इत्यादिवाक्यस्थ यमशासनपदे निमित्तसप्तमी, सा च पूवर्मेवोपपादिता, नचैवं संयमनप्राप्तेः नरकगमनस्य च विरोधशङ्कायाः सम्भवात् यमसदनप्राप्तिपराणिवचनानि पुराणादिषु पठ्यन्ते, तन्निमित्तेयं शङ्केति टीकाग्रन्थास्वारस्यमिति वाच्यम् नहि संयमननरकगमनयोः "तत्रापि च तद्वयापारादविरोध' इति विरोध आशङ्कय परिहृतः, अपि तु यमगृहनरकगमनयोः "संयमने' इति सूत्रे यमपुरप्रवेश एव उक्तः, न तु सदनप्रवेशः, ततश्च सूत्रप्रतिपाद्येन विरो-धासम्भवात् यमसदनप्राप्तिवचनानि पुराणादिषु पठ्यन्ते', तन्निबन्धनेयं शङ्केति ग्रन्थस्सङ्गच्छते, इत्थं हि तत्रापि च तद्वया-पारादविरोधः' इत्यस्य शङ्काभाष्यं, ननु सप्तसु लोकेषु सञ्चरतां गच्छतां कथं यमसदनप्राप्तिरिति । अयं लोको नास्ति न पर इतीति -"न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्' "अयं लोको नास्ति न परः इतिमानी पुनः पुनर्वशमापद्यते मे' इति कठवल्लीषु मृत्योर्नचिकेतसं प्रति वचनमिदम्, सम्यगवश्यम्भावेन, परस्तात् भेदादस्य पश्चात् ईयते गम्यत इति साम्परायः तत्प्राप्त्यर्थसाधनविशेषस्साम्परायः, बालम् अविवेकिनम् अत एव प्रमाद्यन्तमनवहितं प्रति न भाति, अत एवायमेव लोकस्त्र्य-न्नपानादिरूपोऽस्ति न परः परलोक इति, मानीति मननशीलः तदनुरूपमाचरन् पुनः पुनर्जन्ममरणप्राप्त्या मम वशमापद्यत इत्ये- वमयं लोक इत्यत्र एवशब्दमध्याहृत्य व्याख्यातं परैः, आचार्य्यास्तु च शब्दमध्याहृत्य व्याचक्षते । अत्रामुत्र च सुखं नास्ती- त्यर्थः इति - देहान्तरोपभोग्यमिति शेषः, भाष्ये-वैवस्वतं सङ्गमनं जनानाम्' इति सङ्गमनं सङ्गम्यमित्यर्थः, भाष्टे स्मन्ति चेति सूत्रस्यानवतारितत्वात् स्वयमवतारयति । तद्गतिदर्शनादित्यत्रेत्यादिना - संयमने त्वनुभूयेतरेषामारोहावरोहाविति प्रतिज्ञाते

३.१.१७

पापफलानुभवार्थे प्रमाणप्रदर्शनं ह्युचितम् न तु तद्रतौ, अतः तद्गतिदर्शनादित्यर्थे अनुशयानः सूत्रकारः पापफलनुभवप्रदर्शकं "सर्वे चैते वशं यान्ति' इति स्मृतिवचनमेव प्रमाणं दर्शयति-स्मरन्ति चेति सूत्रेणेत्यर्थः, नन्विदानीमपि स दोषस्तदवस्थ एव, "अङ्गुलस्या-ष्टभागोऽपि न "सोऽस्ति द्विजसत्तम् । न सन्ति प्राणिनो यत्र

कर्मबन्धनिबन्धनाः' इति प्रकृत्य "सर्वे चैते वशं यान्ति यमस्य भगवन् किल' इति स्मर्य्यते, नह्येतद्वचनं पापिनं यमयातनारूपफलानुभवे प्रमाणयितुं शक्यते, यमवश्यतामात्रस्मरणात् सर्वसाधारणत्वेन पापिमात्रपरत्वाभावाच्चेति चेन्न, "आयुषोऽन्ते तदा यान्ति यातनाः तत्र चोदिता' इति पापफलयातनानुभवदर्शनात्, नचैतस्य सर्वसाधारणत्वात् पापिनां पापफलानुवेदेन प्रमाणीकर्तुं शक्यम्, उत्तरत्र भगवद्भक्तानां यमविषयगमनाभावप्रतिपादनेन "सर्वे चैते वशं यान्ती'ति वचनस्यानिष्टादिकारिमात्रविषयत्त्वस्य निश्चेतुं शक्यत्वात् । ननु एतस्य वचनस्य पापफलभूतयातनानुभवप्रदर्शनपर्य-न्तवे स्मरन्ति च यमवश्यतां पराशरादय इति भाष्यविरोधः फलानुभवं स्मरन्तीति हि भाष्येण भाष्यमिति चेन्न, यमवश्यतामित्यस्यैव

फलानुभवपर्यन्तयमवश्यतापरत्वसम्भवेन विरोधात् ।। ।।।८ ।। ।। विद्याकर्मणोरिति तु प्रकृतत्वात् ।। सम्बन्धसामान्यविषया षष्ठीति - अयमत्र सौपिदान्वयक्रमः देवयानपितृयाने इति प्रथमानावचनान्तं पदमध्याहार्य्यम्, ततश्च यतो देवयानपितृयाने विद्याक- र्मणोः विद्याकर्मसम्बन्धिनी विद्याकर्मार्थे-इति यावत्, तादर्थ्यञ्च तत्फलानुभावार्थत्वमेव, इतिर्हेतौ, ततश्च यतो देवयानपितृयाने विद्याकमर्फलार्थे, अतो विद्याकर्मविधुरेषु न देवयानपितृयाने विद्याकर्मफलायै अतो विद्यार्मविद्युरेषु न देवयानपितृयाने इत्यर्थः । ननु कुतो देवयानापितृयानयोर्विद्याकर्मार्थत्वमित्यत्राह - प्रकृतत्वादिति । विद्वांसमिष्टादिकारिणञ्च प्रकृत्याम्नानादित्यर्थः, यद्यपि विद्याकर्मणोरिति साध्यसाधनभावे षष्ठी, देवयानपितृया-नयोः विद्याकर्मसाध्यत्वादित्यर्थाश्रयणे प्रतीतिसौकर्यं भवति, अत एव हि "देवयानपितृयानयोः विद्याविषयत्वं पुण्यविषयत्व'मिति वक्ष्यति, ततश्चोक्तक्लिष्टगतिमन्तरेणैव विवक्षितार्थस्य प्रतिपत्तिस्सुलभा, तथापि देवयानपितृयानयोः फलभूतयोः फलान्तरशेषत्वमप्यस्तीति सूचयितुं तथोक्तमिति द्रष्टव्यम् । विशिंषन् हि विषय इति पाठः समीचीनः, "विशब्दो हि विशेषार्थ सिनोतिर्बन्ध उच्यते विशेषेण सिनोतीति विषयोऽतो नियामक' इत्यभियुक्तोक्तेः, सिञ् बन्धने,कर्त्तर्युत् सृष्टोऽच्प्रत्ययः, (कर्तरि रनुः. शतृ प्रत्ययः विषिष्वन्?) यद्वा विशिंषन् इत्येतत् फलितार्थकथनम्, ननु देवयानपितृयानयोर्विद्याकमर्फलार्थत्वात् विद्याभावेन देवयानाभाववत् कर्माभावेन पितृयानाभाव इति सूत्रार्थाश्रयणमस्थानविजृम्भणम्, न हि पूर्वपक्षिणा देवयानेन पितृयानेन वा चन्द्रप्राप्तिराशङ्किता "ये वै केचास्माल्लोकात् प्रयन्ति चन्द्रसमेव ते सर्वे गच्छन्ति' इति कौषीतकीवचनानुसारेण चन्द्रप्राप्तिमात्रमाशङ्कितम् नैतस्य पितृयानप्रापकं किञ्चिदस्ति नियामकम्, येनात्र पूर्वपक्ष्यभिमतं स्यात्, अत एव आचार्यः स्वयमेव यादवमिश्रमतदूषणावसरे वक्ष्यति, "गन्तव्यैक्येपि गन्तृभेदेन मार्गनियमश्च भवति' इति, तथा घूमादिनिरपेक्षापितृलोकप्राप्तिः सम्भवति इति, अत एव देवयानस्य दृष्टान्तीकरणमप्ययुक्तम्, तदभावस्य सम्प्रतिपन्नत्वे हेत्वभावादिति चेन्न, द्वे सृती अृणवं पितृणामुत देवानामुत मर्त्यानां ताभ्गयामिदं विश्वं एतत् समेति' इति बृहदारण्यकश्रुत्यनुसारेण गतिद्वयव्यतिरिक्तगत्यन्तराभावात्, "एतेन प्रतिपद्यमानाः इमं मानवमावर्त्तं नावर्त्तन्ते' इति देवयान-स्यानावृत्तिहेतुत्वात्, पितृयानेन पथा चन्द्रमसं गच्छन्तीत्येवं पूर्वपक्षीकत्तर्व्यतया भाष्यकारोक्तरीत्या विद्याकर्मणोरिति सूत्रार्था-श्रयणस्य स्थानविजृम्भणत्वा भावात् ।। * ।। न तृतीये तयोपलब्धेः सम्पूर्यते प्राप्यत इत्यर्थ इति - "अमुष्य लोकस्य अप्राप्तार'मिति रंहत्यधिकरण-

भाष्यदर्शनात्तथोक्तमिति द्रष्टव्यम्, ननु भाष्ये वाकिमिति "यथासौ लोको न सम्भूर्यते' इत्यत्र यथाशब्दसम्पूर्णशब्दयोः स्वारस्य-परित्यागेन केन पुंसा असौ लोको न सम्पूयर्त इत्यर्थाश्रयणं नित्यं बहुभिः प्रयद्भिरपि येन कारणेन

चन्द्रलोको न सम्पूर्यते न निबि-न्दीर्कियत इत्यर्थो हि स्वरसतः प्रतीयत इति चेन्न, जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते' इति प्रतिवचने तृतीयस्थानशब्दितक्रमिकीटादिलक्षणपापकर्मभिरप्राप्यत्वप्रतिपादनेन प्रश्नस्याप्यप्राप्तपरत्वमेवोचितमिति भाष्याभिप्रायात ननु इदमन्धस्य जात्यन्धेन यष्टेः प्रदानम्, प्रतिवचने ह्येवमर्थः प्रतीयते, एवं हि तस्य प्रश्नस्य प्रतिवचनं श्रूयते, अथैतयोः पथोः न कत- रेण चन तानीमानि भूतानि क्षुद्राण्यसकृदावर्त्तीनि इति भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते' इति, एतयोर्देवयानपितृयानयोः मध्येन कतरेण च न केनापि मार्गेण गच्छन्ति तानीमानि क्षुद्राणि यूकालिक्षमशकादीनि असकृदावर्त्तीनि जायस्व म्रियस्वेति भवन्ति, जननमरणपौनःपुन्यरूपासकृदावृत्तियुक्तानि भवन्ति, एतत् तृतीयं स्थानं जनन-मरणरूपमसकृदावर्त्तनम् तृतीयं स्थानं तृतीयो मार्गः, तस्मात् क्षुद्रजन्तूनां मार्गान्तरसत्वात् देवयानपितृयाणप्राप्त्यभावेन चन्द्र-प्राप्त्यभावात् क्षुद्रजन्तुभिराक्रान्तोऽयं लोक इव असौ लोको न सम्पूर्यत इत्यर्थः स्वस्सतः प्रतीयते, न च स्थानशब्दस्य मागर्वाचि- त्वं न स्वरसमिति वाच्यम्, अथैतयोः पथोरिति प्रकृतमार्गद्वयापेक्षया तृतीयत्वस्य मार्गान्तर एवान्वयात् अस्य गौर्द्वितीयोऽन्वेष्टव्य यादाविव सङ्खयाया सजातीयनिवेशित्वौचित्यात्, न च स्थानशब्दः फलानुभवाश्रयपरः, ततश्च विद्याफलभूतब्रह्मप्राप्त्याश्रय एकः, इष्टापूर्त्तादिफलानुभवरूपचन्द्रप्राप्त्याश्रयोऽपरः, पाप्यफलभूतजनामरणरूपासकृदावर्त्तनाश्रयः तृतीय इति पापकर्मणां तृतीयस्था- नत्वं सङ्गच्छत इति वाच्यम् तथा सति ब्रह्मचन्द्रप्राप्तिरूपस्थानद्वयापेक्षया सुकृतविशेषफलभूतब्राह्मणादियोनिप्राप्तिरूपफलानु-भवाश्रयाणामपि तृतीयराशित्वेन सङ्ग्रहापत्तेः, "तस्मादेतत् तृतीयं स्थानम्' इति स्थानशब्दो जननमरणपौनःपुन्यरूपासकृदा-वृत्तिरूपमार्गान्तरवाचक एवाभ्युपगन्तव्यः, अतः "तेनासौ लोको न सम्पूर्यते' इत्यत्र तेन तस्मादित्यर्थः, हेतौ तृतीया, यस्मात् मार्गान्तरमस्ति ततो हेतोरित्यर्थः, ननु तेन तृतीयस्थानशब्दितेन जीवेन पापकर्मणोति कर्त्तरि तृतीया, अतो न सम्पूर्यत इति औपसंहारिकस्यापि नास्वरसार्थसमाश्रयणमिति चेत्, अत्र ब्रूमः, सर्वनाम्नां हि पूर्वनिर्दिष्टप्रधानपरामर्शित्वं न्यायसिद्धम्, अत एव "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा' इत्यत्र पूवर्स्मिन् वाक्ये आनयनकर्मणा दध्नापि व्याप्यमानतया यत्प्रधानं पयः तस्यैव तच्छब्देन परामर्शः, न तु अप्रधानस्य दध्नः, ततश्चामिक्षयाः पयोविकारत्वमिति चतुर्थे अष्टमे च स्थितम्, यथा षड्विंशतिरस्य वंक्रयस्ता अनुष्ठयोच्यावयतात्' इत्यत्र तच्छब्दनिर्देश्यत्वं प्रधानस्यैवेति सिद्धवत्कृत्यता अनुष्ठयोच्यावता इति स्त्रीलिङ्गद्वितीया-बहुवचनान्ततच्छब्देन वंक्रीणामेव परामर्शदर्शनात् तासामेव प्राधान्यम्, न तु षड्ि◌ंवंशतिशङ्खयायाः अस्य शब्दाभिधेयस्य पशोर्वाप्राधान्यम्, ततश्च वंक्रिप्रधानत्वाद्वाक्यस्य वंक्रीयताप्रदर्शनाय ऊहः कर्त्तव्य इति नवमे स्थितम्, ततश्च जायस्व मियस्वेति भूतानि भवन्ति एतत्तृतीयं स्थानम्, इत्यत्र एतच्छब्देन पूर्ववाक्ये भवन्तीति भावनाश्रयतया निर्दिष्टानां भूनानामेव ग्रहणमुचितम्, नतु भवितृविशेषणतया उपस्थितस्य जननमरणादिरूपभवनस्य भवन्तीत्याख्यातेन साध्यतया अविधीयमानस्य भवनस्य एत-दितिसिद्धपरमर्शिसर्वनाम्ना परामर्शश्च न स्वरसः, ततश्च जननमरणाशालिनांपापकर्मणां तृतीयस्थानशब्देन परामर्शात् "तेनासौ लोको न सम्पूर्यते' इत्यत्रापि तच्छब्दः प्रकृततृतीयस्थानशब्दितजीवपरामर्श्येव, तृतीयापि कतर्येव, न तु तस्मादिति हैतौ, न चैतम् तृतीयं स्थानमित्यत्र प्रकृतानाम्, "असकृदावृत्तीनि भूतानि भवन्ति' इति निर्दिष्टानां पापकर्मणाम् एतच्छब्देन परामर्शे तेषां बहुत्वात् एकवचननिर्देशानुपपत्तिरिति वाच्यम्, सा वैश्वदेव्यामिक्षा' इत्यत्र तच्छब्दस्य नपुंसकलिङ्गपरामर्शिनोऽपि आमि-क्षापदसामानाधिकरण्यप्राप्तस्त्रीलिङ्गपदानुवादवत् अत्राप्येतत् तृतीयं स्थानमिति नपुंसकलिङ्गैकवचनान्तस्थानशब्दसामाना-धिकरण्यप्राप्तलिङ्गवचनानुवाद उपपन्नः,एवमुत्तरत्रापि "तेनासौ लोको न सम्पूर्यते' इत्यत्र तेनेति निर्देशोपपत्तिः, केचित्तुक्रिया-प्रधानमाख्यातमिति न्यायेन भवन्तीत्यत्र भवनक्रियाया एव प्राधान्यात् तस्या एवैतच्छब्देन परामर्शः, न तु भवितुः, अत एव

आलङ्कारिकैरपि "पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम् । तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः' इत्यत्र समुद्रस्य फेनचन्दनम् । तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः' इत्यत्र समुद्रस्य चन्दनधर्मणशिलाप्रान्तस्थानीये तटे हस्तस्थानतरङ्गैः फेनप्रेरणे दिगङ्गना घवलीकरणहेतुचन्द्रकिरणव्यापने च पेषणलेपनतादात्म्यमात्रमुत्प्रेक्ष्यते, नतु तयोः पेषणलेपनकर्त्तृतादात्म्यं, पिनष्टि लिम्पति-इत्याख्यातयोः कर्त्तृवाचित्वेऽपि "भावप्रदानमाख्यात'मिति कर्तुः प्रधानभूतक्रियोपसर्जनस्य ैअन्वयासम्भवादित्युक्तम्, अत एव "लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः' इत्युत्प्रेक्षामुदाहृतवता दण्डिना उदाहरणयोरिवशब्दश्रवणात् लेपनवर्षणकर्तृ- भ्यां तमोनभसोरुपमामाशङ्कय "कर्ता यद्युपमानं स्यात् न्यग्भूतोऽसौक्रियापदे । स्वक्रियासाधनव्यग्रो नालमन्यद् व्यपेक्षितुम्' इति दूषितम्, अत एव पश्य मृगो धावतीत्यादौ धावनक्रियायाः दर्शनकर्मत्वमित्यभियुक्तानां व्यवहारः, तस्मात् जायस्व म्रियस्व भवन्तीति निर्दिष्टम् पौनःपुन्येन जननमरणभवनमेव एतच्छब्देन परामर्शयोग्यम्, अतश्च "तेनासौ लोको न सम्भूर्यते' इत्यत्रापि तस्माद्धेतोरसम्पूर्णमित्येवार्थः प्रतीयते, द्युलोकारोहाभावेन द्युलोकासम्पूर्त्तिवचनादिति भाष्ये द्युलोकासम्पूर्णस्य द्युलोकाप्राप्ति-हेतुकत्वकीर्तनात् तत्स्वारस्यानुग्रहाय तृतीयस्थानशब्देन पापकर्माण उच्यन्त इति भाष्यस्थपापकर्मशब्दस्य मार्गलक्ष्यकत्वमेवा-श्रीयते, आचार्यगन्थोऽपि तदनुसारेण नेय इति वर्णयन्ति । ईश्वरशासनानुवर्त्तिनीति - जायस्व म्रियस्वेतीश्वरशासनानुकरणम् । वेदस्वातन्त्र्ाादिति - "छन्दसि व्यत्ययो बहुलम्' इति अनुशासनादिति भावः, इदञ्च काकाक्षिन्यायेन जज्ञे ममारयति भूता-र्थतावेत्युत्तरेण सम्बध्यते, जज्ञे मध्रे इति क्वचित् पठ्यते, तत्र म्रियतेर्लुङ्लिङोश्चेति परस्मैपदप्रसङ्गात् भावे प्रयोग इति केचिद्व- दन्ति - पुरीमवस्कन्ध ळुनीहि नन्दनमित्यादिवदिति । अत्र भूतार्थतावेत्यतो वेत्यनुकृष्यते, पुरीमवस्कन्द लुनीहि नन्दनमित्या-दिवद्वेत्यर्थः अयम्भावः- सुमुच्चयेऽन्यतरस्यामिति अनेकक्रियाव्याहारः समुच्चयः, समुच्चीयमानक्रियावचनाद्धेतोः विभाषा लोट्, तस्य च हि स्वौ भवतः तद्धम्भाविनस्तु वा भवत इति सूत्रार्थः, तत्र "समुच्चये सामान्यवचनस्ये'ति सामान्यवाचिनो धातोरनु- प्रयोगो विहितः । ओदन ं भक्ष्व धानाः रवाद सक्तून् पिवेत्येवाभ्यवहरति इति, अत्र समुच्चयद्योतनाय समुच्चयेऽन्यतरस्यामिति

३.१.२१

वैकल्पिकलोण्मध्यमपुरुषः, असकृदावृत्तीनि भवन्तीति क्रियासामान्यवाचिनः भवतेरनुप्रयोगश्च, ततश्च "पुरीमवस्कन्द लुनीहि नन्दनम् मुषाण रत्नानि हरामराङ्गनाः । विगृह्य चक्रे' इति अवस्कन्दनलवनमोषलक्रियाणां समुच्चयेऽन्यतरस्यामिति लोण्मध्य-मपुरुषैकवचनम्, समुच्चये सामान्यवचनस्येति सामान्यवाचिनश्च कृ इत्यस्य अनुप्रयोगश्च यथा भवति, एवमिहापि जायस्व म्रिय- स्वेति जननमरणक्रियासमुच्चये लोण्मध्यमपुरुषैकवचनम्, भवन्तीत्यस्य च सामान्यवाचिनोऽनुप्रयोग इत्ययमेव पारमार्थिकः परि- हारः आचार्याणामभिमतः, इतः परं परिहारान्तरानुपन्यासात् ।। * ।। दर्शनाच्च-तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भयन्ति इति बीजत्रैविध्ये प्रतिज्ञातेऽण्डं जीव उद्भिदित्येव वकतुमुचितम्, न त्वाण्डजम् जीवजमुद्भिज्जमित्यतीशङ्कय स्वतन्त्रायाः श्रुतेः पर्य- नुयोगासम्भवात् बीजत्रैविध्यफलकं प्रकारमुपदिशतीत्याह - बीजत्रेविध्यमिति । अण्डजमिति अण्डजमेव आण्डजं स्वार्थेऽण जरायुः गर्भपरिवेष्टनम् जरायुजं पुरुषपश्वादि, अत्र श्रुतावपि दृश्यत इति भाष्यस्याऽयमर्थः, श्रुतावपि चतुर्विधभूतजातं दृश्यते तन्मध्ये केषाञ्चिदुद्भिज्जानां स्वेदजानाञ्च उभयविधानां पञ्चमाहुत्यनपेक्षा लोके दृश्यत इति, तेषां खल्वेषां भूतानामित्याद्युत्तरभाष्यग्रन्थस्तु एतद्व्याख्यानरूपः, ततश्च दर्शनाच्चेत्यत्र दर्शनादित्येतत् तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणेन अर्थद्वयं प्रतिपादयति, न त्वत्र यथाश्रुतार्थो ग्राह्यः नह्याण्डजं जीवजमुद्भिज्जमिति श्रुतौ पञ्चमाहुत्यनपेक्षा श्रूयते, यद्येवं पररीत्या चतुर्विधभूतग्राममध्ये केषाञ्चित् पञ्चमाहुत्यनपेक्षयैव उत्पत्तिर्दृश्यत इत्येवं व्याख्यायतां किं श्रौतदर्शनस्यापि

सङ्ग्रहयत्नेनेति चेत्, उत्तरसूत्रनिवर्त्य-शङ्कोत्थापनार्थतया तन्त्रावृत्त्यादीनामन्यतमाश्रयणेनैव एवमर्थद्वयप्रतिपादनमिति भावः - परे त्वित्यादि श्रुत्या सर्वेषां चन्द्र-

३.१.२१

प्राप्तिशङ्केति । "चन्द्रमसमेव ते सर्वे गच्छन्ति' इति कौषीतकीश्रुत्या सञ्जाता सर्वेषां चन्द्रप्राप्तिशङ्केत्यर्थः । द्वितीयसूत्रे तु व्युदसनीयशङ्केति - संयमने त्वितिसूत्रस्थतुशब्दव्युदसनीयशङ्का सुकृतदुष्कृतकारिणोरविशिष्टैव गतिःस्यात् इत्युपन्यस्तेत्यर्थः -याम्यार्यातना इति । यमाच्चेति वक्तव्यमिति ण्यप्रत्ययः, यामी र्यातना इति पाठे तु निर्वाहान्तरं द्रष्टव्यम् । ततोऽवरोहण-स्यचासम्भवादिति - एतेन संयमने त्वनुभूय इति सूत्रश्रुतस्य संयमनस्यैवावरोहापादनता शीघ्रं गम्यते, न चन्द्रे मण्डलस्य, चन्द्र-मण्डलादवरोह इत्यध्याहारसापेक्षत्वात्, ततश्चेदं सिद्धान्तसूत्रमेव, न तु भास्कररीत्या पूर्वपक्षसूत्रमिति भामतीकल्पतर्वादा- वुक्तं निरस्तम्, संयमनस्यैवावरोहापादानत्वेऽनुभूयारोहेति अनुभवानन्तर्भाव्यारोहाश्रयत्वस्यापि संयमनस्यैव वक्तव्यतया तस्य च तत्रासम्भवात् । नरकानुभवादनन्तरमिति अनन्तरशब्दस्य पश्चाच्छब्दादिवत् दिक्शब्दत्वमभिप्रेत्य पञ्चमीनिर्देशः कृत इति द्रष्टव्यम्, अथवा उर्ध्वमित्यध्याहारेण दिग्योगलक्षणा पञ्चमी, यथोक्तं वैयाकरणैः-

"अनुनासिकात्परोऽनुस्वारः' इत्यत्र अन्यशब्दाध्याहारेणानुनासिकादिति पञ्चमीति । अनन्तरमिति यमालयमित्यस्य विशेषणं, नरकानुभवादूर्ध्वं सन्निहितं यमालयमि- त्यर्थः । स्वमते सूत्रस्य साफल्यमाह - यमप्राप्तिवाक्य इति । अयं लोको नास्ति न पर इति वाक्य इत्यर्थः । अन्ये त्वित्यादि -किमनिष्टादिकारिणः पापफलानुभवार्थं धूमादिना गच्छन्ति उत सुकृतफलानुभवार्थमिति विकल्पद्वयमभिप्रेत्य प्रथमं दूषयति । तत्र पापफलभोगाभावादिति - तत्र मार्गे पापफलभोगस्यासम्भवात् इत्यर्थः, द्वितीयं दूषयति । कर्मणा विनेति - इष्टादिना पुण्येन कर्मणेत्यर्थः । शास्त्रावैयर्थ्याच्चेति - ज्योतिष्टोमादीकामन्तरेणैव तत्फललाभे तत्र कोऽपि न प्रवर्त्तत इति "ज्योतिष्टोमेन स्वर्गमामो यजेत' इत्यादिशात्रस्य स्वर्गार्थतया ज्योतिष्टोमादौ प्रवर्तकस्य वैयर्थ्यं, प्रवर्त्तकत्वं न स्यादित्यर्थः अथवा शास्त्रशब्दः तत्प्रतिपाद्यकर्मपरः, "द्वे सृती' इति द्वे गती इत्यर्थः, अृणवम्-अश्रौषम्, पितृणां देवानाञ्च प्रापिकेत्यर्थः । मर्त्यानामित्यत्र

३.१.२१

प्राप्तृत्वेन सम्बन्धः, पितरं मातरञ्चेतिः द्यावापृथिव्यावेव मातापितरौ । गमनस्यापुरुषतन्त्रस्येति - विद्याकर्मरूपसाधनेऽनुष्ठिते स्वयमेव सिध्द्यतो मार्गस्य विधेयत्वायोगात् । अत एव तृप्तिर्भक्षानुनिष्पन्ना न व्यपारान्तरमपेक्षत इत्यपुरुषतन्त्रत्वेनाविधेयतया अननुष्ठेय- त्वेन बन्त्रप्रकाश्यत्वायोगात् तृप्तिप्रकाशकमन्त्रांशस्य न तृप्तौ विभज्य विनियोज्यत्वमिति शेषलक्षणे स्थितमिति भावः - तृतीय-स्थानमृतानामिति । यूकमक्षिकादीनामित्यर्थः - पापिनां दुःखभोकतृत्व इति । पापिनां दुःखभोक्तृत्वे आरोगभ्राजादीनां सप्तानां सूर्याणां दुःखभोजयितृत्वरूपयातयितृत्वे वा संशयाभावात्, यद्वेत्यादि द्वितीयायोजनाऽपि असङ्गतेत्यर्थः । अत एव तृतीयस्था-नमृतानामिति - अनिष्टादिकारिणां पुरुषाणामपि चन्द्रप्राप्तिनिवारण े किमु वक्तव्यं तृतीयस्थनमृतानां यूकमक्षिकादीनामिति

३.१.२२

भावः ।। * ।। ।। इति अनिष्टादिकार्यधिकरणम् ।।

पेटिकाभेदेनेति - पेटिकाविशेषेणेत्यर्थः, कृतात्यय इत्यारभ्य आपादपरिसमाप्ति अवरोहणपेटिकातयाऽस्याधिकरणस्य सङ्ग-त्यर्थमित्यर्थः, पूर्वस्मिन्नधिकरणे हि देवयानपितृयाणयोः विद्याकर्मफलार्थत्वादनिष्टादिकारिणाञ्च विद्याकर्मफलाभावात् देव-यानाभाववत् पितृयाणमपि
नास्तीत्युक्तम्,एवमत्राप्यनुशायिनामाकाशादिशरीरकत्वफलभूतसुखदुःखोपमोगाभावात् आकाशादि-शरीरकत्वं नास्तीति समर्थ्यत इति प्रकृताधिकरणसङ्गतिर्द्रष्टव्या, भाष्ये - यथेतमनेवञ्चेत्युक्तमिति, "यथेतमनेवञ्च भवती'ति "कृतात्यय' इति सूत्रे उक्तमित्यर्थः, केचित्तु यथेतमनेवञ्चेति सूत्रखण्ड एव परामृश्यते, उक्तमिति नपुंशकनिर्देशोऽपि"द्विगुरेकव-चनम्' इत्यादिवदुपपन्न इति वर्णयन्ति, अनेन भाष्येण कृतात्ययेऽनुशयवानिति व्यवहिताधिकरणेन सङ्गतिः, समनन्तराधिकर- णन्तु प्रासङ्गिकमिति सूच्यते । अपो विभर्ति इत्यभ्रमिति - मूलविभुजादित्वादिति कप्रत्ययः, मिह सेचने-इति धातोरिति पचादित्वात् देवमेपादिवत् दिगुपधालक्षणं कं बाधित्वाऽच्प्रत्यये "न्यंक्कादीनाञ्चे'ति कुत्वे रूपम्, तत्र हि आकाशदिप्रतिपत्ता- विति भाष्यस्याऽयमर्थः, यथेतमाकाशाद्वायुमित्यादौ कर्मनिर्देशेनाकाशवायुप्राप्तेः स्फुटमनवगमेऽपि, "वायुर्भूत्वा धूमो भवति धूमो भूत्वा अभ्रं भवति' इत्युपरितनस्फुटतरभूयोवाक्यानुसारेण इहाष्याकाशादिभाव प्राप्तेरेव प्रतिपाद्यत्वे स्थिते सति स किमा-काशादिभावो देवमनुष्यादिभाववदाकाशादिशरीरकत्वम्, उत तत्सादृश्यापत्तिमात्रमिति । तत्स्वाभाव्यापत्तिरिति, स्वभाव एव स्वाभाव्यम्, वर्तमानसामीष्य इत्यादिवत् स्वार्थिकःष्यञ्, स्वस्य भाव इव भावो येषां ते स्वभावाः सदृशाः तद्भावः स्वाभा- व्यम्-सादृश्यम्, तत्स्वाभाव्यापत्तिः तत्सादृश्यापत्तिरित्यर्थः, स्वाभाविकमेवेतदिति महा भाष्यनिर्देशात् स्वभाव- शब्दस्य न द्वारादीनाञ्चेत्यैजागम इति प्राहुः एवं साम्प्रदायिकपाठमनुसृत्य समर्थनसम्भवे भामतीरीत्या स्वाभाव्यापतिरिति पाठ- शिक्षा न कल्पनीया । यथेतमाकाशमित्यादेरयमर्थः, या आपश्च चन्द्रमण्डले शरीरमारब्धवत्यः तासां कर्मक्षये द्रवीभूतानामाका-

शमतानां भेदकाकारप्रहाणेन आकाशसादृश्ये तदुपश्लिष्टानुशयिनोऽपि आकाशसमा भवन्ति, ता आप इतश्चामुतश्च नीयमाना वायुसमा भवन्ति, अनुशयी अपि तादृशो भवति, एवमभ्रादिभावेऽपि द्रष्टव्यमिति । भाष्ये- अत्र त्वाकाशादावित्यादि, ननु प्रयोजनाभावेन श्रुतपरित्यागो न सम्भवति, तथाहि सति भूतानां सर्वत्र सुलभत्वात् प्रयोजनाभावात् भूतपरिष्वक्तगमनमपि न कल्पनीयं स्यात्, किञ्च "तानि परे तथा ह्याह' इत्यत्र प्रयतां परमात्मम्पत्तौ प्रयोजनाभावात् तेजः परस्यां देवतायामिति श्रुता परमात्मसम्पत्तिर्न सम्भवतीत्याक्षिप्य प्रमाणानुरोधेन प्रयोजनस्य कल्पनीयत्वात् न प्रमाणप्रतिपन्नार्थत्याग इत्युक्तम्, तस्मा-दाकाशदिशरीरकत्वप्रमाणानुरोधेन आकाशादीनां तदभिमानिदेवताप्रीतिभोगाश्रयाणामनुशयिनोऽपि प्रतिभोगाश्रयत्वमङ्गी-कतर्व्यमिति चेत्-न, युगपत् भोक्तृद्वयसमावेशे तयोः परस्परभोगार्थितायां शरीरोन्मथनप्रसङ्गात्, ननु तदभिमानिदेवतात्वेनैव आकाशादिशरीरित्वमस्त्विति चेत्, सर्गाद्यकालमारभ्य आप्रलयमाकाशाद्यभिमानिदेवानामनुशयिभ्योऽन्यासां वलृप्तानां सत्त्वेन प्रतिक्षणमवरोहतामनुशयिनामाकाशद्यभिमानिदेवतात्वानुपपत्तेरिति भावः । परे तु-आकाशादिस्वरूपापत्तिं पूर्व-पक्षीकुर्वन्तीति । ननु नचान्यस्य अन्यभावानुपपत्तिः, मनुष्यशरीरस्य नन्दिकेश्वरस्य देवदेहरूपपरिणामस्करणात् देवदेहस्यापि नहुषस्य तिर्यअकत्वस्मरणात् तद्वदिहोपपत्तेरिति भामत्युक्तेः, नन्दिकेश्वरो हि रुद्रमाराध्य मनुष्यशरीरेणैव देवत्वेन परिणनाम, तथा नहुषोऽपि इन्द्रत्वं गतोऽगस्त्यशापात् अजगरत्वं जगामेति कल्पतरूक्तेश्च, आकाशादिशरीकत्वमेव परैः पूर्वपक्षितमिति प्रतीयत इति कथं तन्मतदूषणमिति चेन्न, शाङ्करभाष्ये आकाशादिस्वरूपमेव प्रतिपद्यन्त इति पूर्वपक्षं उक्तत्वात्, सिद्धान्ते च न ह्यन्यस्य अन्यभाव उपपद्यते इत्युक्तत्वाच्च तथाभिप्रायं निर्वर्ण्य दूषणोपपत्तेः तथा पूर्वपक्षो न युक्त इति मन्यमानैः तद्वयाख्यातृभि-रस्मदभिप्रेतार्थ एव पर्यवसानं कारितञ्चेत् न कापि क्षतिरिति द्रष्टव्यम् ।। २२ ।। ननु "अतो वै स्वलुदुर्निष्प्रपतरमिति व्रीह्यादितो विशिष्य

चिरनिष्क्रमगाभिधानात् पूर्वत्र ह्याकाशादिप्राप्तावचिरनिष्क्रमणं गम्यत इति शक्यते वक्तुम्, अतो वै स्वल्वित्यादिवाक्येन व्रीह्यादिषु चिरावस्थानसत्तामात्रं विधित्सितम्, चिरमचिरं वेत्यनियतस्य चिरावस्थानस्य व्रीह्यादिष्ववस्थानोक्त्यैव

३.१.२३

सिद्धत्वेन तस्याविधेयत्वात्, किन्तु व्रीह्यादिषु चिरावस्थाननियमप्रतिपादनसामर्थ्यात् आकाशादिभ्यः चिरावस्थाननियम एव व्यावर्त्तते, नत्वनियतं चिरावस्थानमपि, अत एव वैस्वानसं पूर्वेहन् साम भवति षोडश्युत्तर इति विशिष्याङ्गिरसां द्विरात्रस्य उत्तरेऽहनि षोहसिग्रहनियमविधानसामर्थ्यात् उत्तरेऽहन् द्विरात्रस्य गृह्यत इति सामान्यवचनप्राप्तषोडशीग्रहोऽपीत्युक्तं दशमे, अत एव "कर्तृकर्मणोः कृति' इति सूत्रप्राप्तषष्ठीविषये "उभयप्राप्तौ कर्मणी'ति प्राप्तनियमस्य अकाकारयोः प्रतिषेध इति प्रतिषेधे पुनः कर्त्तृकमर्णोः कृति' इत्यनियतप्राप्तषष्ठया न निषेधः, यथा भेदिका काष्ठानां देवदत्तस्येति वैयाकरणैरभ्युपगम्यते, ततश्च व्रीह्यादिषु चिरावस्थाननियमप्रतिपादनात् पूर्वत्र चिरावस्थाननियमो व्यावर्त्त्यताम्, न तु चिरावस्थानस्वरूपमपि व्यावर्त्त्यर्त इत्यस्वरसादाह - भाष्ये छान्दसस्तशब्दलोप इत्यादिना । अयंभावः, नात्र दुर्निष्प्रपतरमिति दुर्निष्प्रपतरशब्दस्य ल्युडन्ततामाश्रित्य दुःखनिष्क्रमणनियमः प्रतिपाद्यते, अपि तु स्वलन्तात् दुर्निष्प्रपतरशब्दादातिशायिनि केतरमिति तरप्रत्यये छान्दसे तशब्दलोपे दुर्निष्प्रपतरमिति रूपम्, ततश्च अतिशयस्य प्रतियोग्याकांक्षायां प्रागनुक्रान्ताकाशादीनां बुद्धिसन्निधानात् तत्प्रतियोगित्वेन अन्वयस्त्यात्, ततश्च व्रीह्यादिषु आकाशापेक्षया चिरावस्थानोकत्या आकाशादिषु अवस्थानस्य तदपेक्षया अल्पकालत्वपर्यवसानात् समीहितसिद्धयुप- पत्तेः । ननु नायं वर्णविकारः, अपि तु तरपितशब्दलोप एवेत्यत्र किं विनिगमकमिति चेत्, ईषदुःषुषु कृछ्राकृछ्र्रार्थेषु खलिति खला बाधितं ल्युटं काशकुशावलम्बनेन समर्थ्य नकारस्य चरेफरूपवर्णविकाराश्रयणस्यायुक्तत्वात्, कश्चित्तु दुरुपपदात् पदि धातोः खलर्थे डप्रत्यये सति दुर्निष्प्रपमिति रूपसिद्धौ ततस्तरप्प्रत्ययेन दुनिर्ष्प्रपतरमिति दुर्निष्प्रपतरशब्दनिष्पत्तिः, "अन्येष्वपि दृश्यते' इति जनेरुपपदान्तरयोगे ढविधायकसूत्रे "अन्येभ्योऽपि दृश्यत' इति वक्तव्यमिति धात्वन्तरेभ्योऽपि डस्य शिष्टत्वात् दृशिग्रहणं सर्वोपाधिव्यभिचारार्थमिति वृत्तावुक्तत्वात् "कृत्यल्युटो बहुलम्' इति सूत्रे बहुलग्रहणात् अन्येऽपि कृतः प्राप्तमभिधेयं व्यभिचरन्ती-त्यपि वृत्तावुक्तत्वात्, तस्य डस्य खलर्थत्वोपपत्तेश्च वर्णागमवर्णलोपादिकमन्तरेणैव रूपं सिध्द्यतीत्याह, तदतिमन्दम्, एतादृश-क्लिष्टगत्याश्रयणापेक्षया छान्दसवर्णलोपाश्रयणस्यैव ज्यायस्त्वात् । केचित्तु- अतो वै खलु दुर्निष्प्रपतरमित्यत्र वैशब्दस्य एवकार-समानाथर्त्वात् "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टष् च अत्र ह्येवावपन्त्यत एवोद्वपन्ति' इत्यत्र एवकारेण पवमानगतगाय-व्यादिभ्योन्यत्रावापपरिसङ्खयानवत् अत एव दुर्निष्प्रपतरमिति व्रीह्यादिभ्योऽन्यत्र चिरनिष्क्रमणप्रतिषेधस्य श्रौततया आकाशा-दिष्वनतिचिरेण निष्क्रमणसिद्धिः, अतो "युचि छन्दसि गत्यर्थेभ्यः' इति छन्दसि विशेषविहितयुजन्त एवायं शब्दः, रेफरूपवर्ण-विकारः छान्दसः इतरथा खलर्थप्रत्ययस्य "तयोरेव कृत्यक्तखलर्थाः' इति भावकर्मणोरेव विधानात् अस्य चाकर्मकत्वेन भावार्थस्ये; व परिशिष्टत्वात्, तदर्थस्य प्रकर्षाभावेन ततस्तरषो दुर्ल्लभत्वात्, नचैवं तशब्दलोपः छान्दस इति भाष्यविरोधः इति वाच्यम्, कर्त्र-र्थपचाद्यजन्तात् प्रकर्षसम्भवेन तरपस्संभवादिति वदन्ति ः।।

।। इति नातिचिराधिकरणम् ।। * ।।

३.१.२५

नित्यकर्मादीनामपि सम्वत्सरपश्वालम्भनादिभिरशुद्धियुक्तत्वमिति - सम्वत्सरग्रहणं निन्दितकर्माभ्यासवशेन महापातक-युक्तत्वसूचनार्थम्, अत्रादिपदेन सायंप्रातःकालनिषिद्धमग्निहोत्राद्यङ्गहविश्शेषभक्षणं गृह्यते, अतो

हिंसाशून्यानामपि अग्नि-होत्रादीनामशुद्धियुक्तत्वमिति द्रष्टव्यम्, भाष्ये-न वा उत्वेतदित्यादि, एतत् अधुना न म्रियसे न रिष्यसि, न हिंष्यस इत्यर्थः,

३.१.२६

रुष् रिष् हिंसायामिति धातुः - अयमेव समीचीनो दुष्प्रधर्षणः परिहार इति । ननु हिरण्यशरीर उर्ध्व इत्यर्थवादार्थे बाधकाभावात्, पशुसंज्ञ- पनस्य स्वर्गसाधनत्वेऽपि मरणोद्देश्यकमरणानुकूलव्यापारत्वेन हिंसात्वमप्यवश्यमभ्युपेत्यमेव । न च तस्य रक्षणरूपत्वात् अहिंसा- त्वम्, व्रणदाहच्छेदयोः दाहच्छेदरूपत्वेऽपि रक्षणरूपत्ववत् हिंसारूपत्वेऽपि पशुरक्षणरूपत्वोपपत्तेः, अस्य परिहारस्य सार्वत्रिक-त्वाच्च । न खलु सौत्रामण्यां वर्णत्रयेऽपि निषिद्धायाः पैष्टयाः सुरायाः पानन्नपानम्, नापि अश्वमेधे राजाज्ञया अश्वसंरक्षकैः क्रिय-माणमश्वमेधमन्त्रब्राह्मणानभिज्ञब्रह्मस्वहरणन्नहरणम्, नापि वामदेव्योपासकत्य प्रार्थयमानसर्वयोषिदपहरणन्न परस्त्रीहरणमिति वक्तुं शक्यम्, तस्मात् तेष्वन्य एव परिहारो वक्तव्यः, स एव हिंसायामप्यस्तु, किमनेन लोकविरुद्धेन हिंसात्वापलापेन, तर्हि कः सार्वत्रिकः परिहारः, न हिंस्यादिति निषेधवाक्ये पुरुषार्थ एव हिंसाधातुना अनूद्यते, न क्रत्वर्थतापि, कर्त्तुराख्यातवाच्यत्वपक्षे समानपदश्रुत्या हिंसायाः तच्छेषत्वप्रतीतेः, तस्याख्यातवाच्यभावनाक्षेप्यत्वपक्षेऽपि तदाक्षिप्तकर्तृशेषत्वप्रतीतेः नात्र क्रतोः वाचकं किञ्चिदस्ति, येनाथातोऽग्निष्टोमेनानुयजन्तीति अनारभ्याधीतवाक्ये क्षित्याग्नेर्यजिशब्दोक्तयागशेषत्ववत् अस्याः क्रतुशेषत्वमव-गम्येत, नापि क्रतोराक्षेपकं किञ्चिदस्ति, येन पर्णताया जुह्वाश्रिप्तक्रतुशेषत्ववदस्याः क्रतुशेषत्वमवगम्येत, न च प्रकरणेन क्रतो-र्विपरिवृत्तिरस्ति, येन "नानृतं वदेत्' इति दर्शपूर्णमासप्रकरणाम्नातवाक्येऽनूद्यमानस्यानृतवदनस्येव क्रत्वर्थत्वप्रतीतिर्भवेत्, तस्मा- दिह हिंसिधातुनाऽनुवादः पुरुषार्थहिंसाया इति तस्य एव निषेधो न क्रत्वर्थायाः, ननु तथापि हिंसिधातोः क्रत्वर्थपुरुषार्थहिसाद्व-यसाधारण्येन शब्दशक्तिबलादुपस्थितं हिंसाद्वयमप्यनूद्य निषेध्यतामिति चेत्-नैतत् न्याय्यम् । आख्यातवाच्यत्वेन तदर्थभावनाक्षे-प्यत्वेनो पस्थितस्य पुरुषस्य शेषभूताया हिंसायाः शीघ्रोपस्थितिकतया तन्निषेधेन चरिताथर्स्य हिंसावाक्यस्य विलम्बितोपस्थिति-कक्रतुशेषहिंसानिषेधकत्वस्यापि कल्पनायोगात् । ननु शब्दशक्तिसाम्येऽपि शीघ्रोपस्थितस्यैव शक्यस्य वाक्यार्थान्वयः न विल-म्बितोपस्थितिकस्येति वैषम्याभ्युपगमे "दर्शपूर्णमासाभ्यां स्वगर्कामो यजेत' इत्यत्र पूर्णमासपदेन उत्पत्तिवाक्यश्रुतदर्शपूर्णमां-सकालयोः आग्नेयाग्नीषोमीययोरेव खटिति प्रवृत्तिनिमित्तावगत्या शीघ्रोपस्थितिकयोः फलान्वयः स्यात्, उपांशुयाजस्य तु

३.१.२७

पौर्णमासीकर्तव्याग्नेयाग्नीषोमीययागद्वयान्तरालविधानात् अर्थसिद्धपौर्णमासीकालस्य खटिति प्रवृत्तिनिमित्तावनगत्या विलम्बितोपस्थितिकस्य फलान्वयो न स्यादिति चेत-सत्यम्-आग्ने याग्नीषोमीयवत् उपांशुयाजस्यापि श्रौतपौणर्मासीपवलत्वेन ज्ञदिति प्रवृत्तिनिमित्ताव शीघ्रोपस्थिति-कत्वाविशेषेण फलान्वयसिदध्यर्थमेव, "तावब्रूतामाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' इत्याहत्य पौर्णमासीकालविधानमाश्रीयते । एतदेवास्य विधानस्य प्रयोजनम् उपांशुयाजाधिकरणे "प्रयोजनाच्च' इति सूत्रेण तद्वार्त्तिकेन स्पष्टीकृतम् ततश्च शीघ्रप्रत्तीतस्यैव पदार्थस्य वाक्यार्थान्वय इति सिद्धत्वात् पुरुषार्थहिम्साया एव शीघ्रपस्थितिक-त्वात् तस्या एव निषेध्यत्वम्, अपि च यदर्थतया यतप्रसक्तं तस्य निषेधोपि तदर्थ इति न्यायमर्यादा । अन्यथा अप्रसक्तप्रतिषेधत्वाद-सामञ्जस्यं स्यात् । अत एव दर्शपूर्णमासप्रकरणाम्नातः "नानृतं वदे' दिति निषेधः प्रकरणात् क्रत्वर्थो भवन् क्रत्वर्थस्यैवानृतवदनस्य निषेधः, तेन क्रतूपयोगिद्रव्यादिसम्पादनार्थानृतवदने क्रत्वर्थनिषेधातिक्रमात् क्रतोर्वैगुण्यम्, क्रतुमध्येपि पुरुषार्थानृतवदने सति न क्रतोर्व्रैगुण्यम्,"यो नाम क्रतुमध्यस्थः कलञ्जादीनि भक्षयेत् । न क्रतोः तस्य

वैगुण्यं यथाचोदितसिद्धितः' इति न्यायात्, किन्तु पुरुषस्य प्रत्यवाय मात्रम्, प्रकरणाम्नातोऽपि यो निषेधः क्रत्वर्थस्य निषेधो भवितुं नार्हति नासौ क्रत्वर्थः, यथा दर्शपूर्णमासप्रक-रणाम्नातः "मलवद्वाससा न सम्वदेत न तया सहासीत नास्या अन्नमद्यात्' इति निषेधः, यद्यपि पत्न्या सह सम्वादः सहासनञ्चे- त्युभयं क्रत्वर्थतया अर्थतः प्राप्नोति, तथापि मलवद्वाससा तथा न प्राप्नोति, यस्य व्रत्येहन पत्नी अनालम्भुका स्यात्, तामवरुद्धय यजेत' इति मलवद्वाससः क्रतौ सर्वात्मना उदासीनीकरणरूपस्य अवरोधस्य विहितत्वात्, तदन्नादनन्तु "अथो खल्वाहुरभ्यञ्जनं वा व स्त्रिया अन्नम् अभ्यञ्चनमेव न प्रतिग्राह्य'मिति अभ्यञ्जनशब्दोक्ततत्वङ्गमरूपतया व्याख्यातं क्रत्वर्थत्वेन कथमपि न प्राप्नोति, एवञ्च न हिंस्यादिति निषेधः क्रत्सर्थपुरुषार्थोभयविद्यहिम्सारूपत्वे स्वयमपि क्रत्वर्थपुरुषार्थोमयरपो भवन् स्वस्य क्रतुपुरुषसम्बन्धबोधनार्थं वाक्यं भिन्द्यात्, एवमेव सुराग्रहणपानादिनिषेधकवाक्यानामपि क्रत्वर्थग्रहणाद्यस्पर्शित्वं वक्तव्यम्, नान्या गतिरस्ति, न च तेषामस्त्येव पापत्वम्, अपितु प्रायश्चित्तेन समाधीयत इति वाच्यम्, तर्हि हिंसापि तथा समाधीयताम्, किमनेन लोकप्रसिद्धहिंसात्वनिरसनव्यसनेन, यच्चोक्तं सोमपाने उच्छिष्टदोषनिषेधोस्ति, "न सोमेनोच्छिष्टा भवन्ति,' इति निषेधात्, हिसायां न सोस्ति, येनायम् उत्सर्गा-पवादन्यायस्य विषयस्स्यादिति-तन्न, "सोमेनोच्छिष्टा भवन्ति' इत्यत्र उच्छिष्टताया एव निषिद्धत्वेन दोषस्यानिषिद्धत्वात्, न च उच्छिष्टत्वस्य निषेद्धुंयमशक्यत्वात् तद्दोषनिषेधपरत्वम्, तर्हि "न वा उ एतत् म्रियसे त रिष्यसि' इत्यत्र हिंसात्वस्य नि◌ेषेद्धुम-शक्यत्वात् तद्गतदोषाभावादिपरत्वस्यैव सम्भवात् न दोषो हिंसायाम् "आहवेऽध्वन्नेनस्वीराजे'ति, क्वचित् हिंसाविशेषेषु दोषाभावप्रतिपादनस्याप्युपलम्भात्, "अहिंसन् सवर्भूतान्यन्यत्र तीर्थेभ्यः' इति छान्दोग्यश्रुतौ यागीयहिंसायाः हिंसात्वमुपगम्य तस्याः निषेध्यत्वाविष्करणाच्च, श्रुतिष्वपि यागीयसंज्ञपने हि सात्वव्यपदेशस्य बहुलमुपलम्भाच्च हिंसात्वमभ्युपगम्यैव परिहार उक्त-रीत्या समाश्रयणीय इति चेत्, अत्र ब्रूमः, यदुक्तं यदर्थः प्रतियोगी तदर्थः प्रतिषेधः इति न्यायमर्यादेति, तन्न, "दीक्षितो न ददाति न जुहोति न पचते' इत्यत्र पुरुषार्थानामेव होमानां प्रतिशेधः क्रत्वर्थ इति स्थापितत्वात्, यच्चाप्युक्तम्-पुरुषार्थहिंसायाः शीघ्रोपस्थितिकत्वात् तस्या एव निषेधवाक्यार्थान्वयित्वमिति, तदपि न, "यदाहवनीये जुहोति' इत्यत्र शीघ्रोपस्थितपुरुषर्थाक्षामे-वाऽऽहवनीयाङ्गकत्वप्रसङ्गात्, तस्मादुभयविधहिंसानिषेधे प्रवर्तनानिवर्तनारूपयोर्विधिनिषेधयोः पदाहवनीयादिवत् परस्परविरो- धात् उत्सर्गापवादन्यायेन क्रत्वर्थहिंसाव्यतिरिक्तविषयत्वकल्पनमेव ज्यायः, अत एव भामतीकल्पतरुभ्यां विशेषविधिविहितस्य

३.१.२७

सामान्यविधिना विषयीकारे ह्युत्सर्गावादम्यायः "यथांहवनीये जुहोति' इति होममात्रस्याहवनीयान्वयविधायिना पदहोभस्यापि विषयीकारे पदहोमान्वयविशेषविधानात्, तदतिरिक्तपरत्वं सामान्यशास्त्रस्य, अत्र तु वर्णितेन न्यायेन उत्पत्तिसमय एव निषे- धस्य पुरुषार्थहिंसाविषयत्वात् न क्रत्वर्थहिम्साप्रवेशः, शाङ्करभाष्ये-उत्सर्गापवादन्यायोक्तिस्तु अविशेषप्रवृत्तत्वेनावभासमानस्य शास्त्रस्य विशेषत्याजनलक्षणगुणसाम्यात् गौणीति यच्छाङ्करभाष्यशिक्षणं कृतम्, तदयुक्तमेव, उत्सर्गापवादन्यायोक्तिस्तु अवि-शेषप्रवृत्तत्वेनावभासमानस्य शास्त्रस्य विशेषत्याजनलक्षणगुणसाम्यात् गौणीति यच्छाङ्करभाष्यशिक्षणं कृतम्, तदयुक्तमेव, उत्-सर्गापवादन्याय एव सार्वत्रिकः परिहारः, हिसायां तु मन्त्रार्थवादादिभिः हिंसात्वाभावावगमनेन सम्भवतः परिहान्तस्योपेक्षानर्ह- त्वात् भगवता भाष्यकृता हिंसाविषये परिहारान्तरमुक्तम्, यच्चोक्तं मरणोद्देश्यकमरणानुकूलव्यापारत्वं हिसात्वं हिसापदप्रवृतिनिमित्तमिति तन्न, अथोपहारकशाप्रहारादिना महतीं वेदनामुत्पादयर्था हिंसकत्वव्य्यवहारासम्भवप्रसङ्गेन वेदनत्पत्त्यनुकूलव्यापारत्वस्यैव सर्वत्रानुगततया हिंसापदप्रवृतिनिमित्तत्वे वक्तव्ये सति व्रणचिकित्सके तादात्विकतीव्रवेदनोत्पादके

हिंसकत्वव्यपदेशाभावेन बलवदिष्टाजनकत्वे सति दुःखसादनव्यपारत्वमेव हिंसापदप्रवृत्तिनिमित्तम्, तत्कर्तर्येव हिसकत्वव्यवहारात्, मरणोद्देश्यकमर-णानुकूलव्यापारेऽपि अनेनैव बलवदिष्टाजनकत्वे सति अनिष्टसाधनव्यापारत्वरूपसाधारणप्रवृत्तिनिमित्तेन हिंसात्वव्यपदेशो- पपत्तेः, मरणोद्देश्यकमरणानुकूलव्यापरत्वस्य पृथक् प्रवृत्तिनिमित्तत्वकल्पनानौचित्यात्, पशुसंज्ञपनस्य तादात्विकदुःखजन- कस्यापि बलवदिष्टभूतस्वर्गजनकतया न हिंसात्वमित्यभिप्रेत्य भगवता भाष्यकृताऽयं परिहार उपन्यस्तः, न तु हिंसात्वमभ्यु पगम्य उत्सर्गापवादन्यायेन परिहारः, यथा हिंसां विधितन्निषेधविषयभेदन्यायानभिज्ञेन वादकथायां "श्येनेन यजेत' इति वाक्यमयु- क्तार्थं, श्येनपक्षिणः पुरोडाशादिवत् यागीयद्रव्यत्वे अहिंसाशास्त्रविरोधादिति शङ्कितं श्येनाङ्गपशुषु आवश्यकेनापि विषयभेद-न्यायोपन्यासेन न तत्समाधानमुचितम्, किन्तु वस्तुः स्थितिमनुसरता वाक्यशेषमुदाहृत्य कर्मनामत्वोपन्यासेनैव तत्समाधीयते, एवमिहाप्युत्सर्गापवादन्यायेन परिहार्येप्यस्मिन्नाक्षेपे वस्तुस्थितिमनुसरन् भगवान् भाष्यकारो हिसात्वाभावमेव प्रत्यपीपददिति न किञ्चिदवद्यम् ।। * ।। ।। योनेः शरीरम् ।। संसारिजीवशरीरञ्चेति - यत्र पुण्यापुण्यरूपे कर्मणी तत्रैव सुखदुःखे, यत्र च सुखदुःखे तत्रैव तद्धेतुभूतं शरीरम्, ततश्चाकाशादिषु कर्मकीर्त्तनाभावेन तत्फलभूतसुखदुःखाद्यनुभवाभावात् न तद्धेतुभूतं शरी- रमिति भावः ।।* ।।

इति अन्याधिष्ठिताधिकरणम्

इति दशोपनिषद्भाष्यकारैः श्रीरङ्गरामानुजमुनिभिर्विरचितायां श्रुतप्रकाशिका-

व्याख्यायां भावप्रकाशिकायां तृतीयस्याध्यायस्य प्रथमः पादः ।।

समुदिताधिकरणसङ्ख्या - ७४ - समुदितसूत्रसङ्ख्या - ३०४ ।।

Second Pada

३.२.१

सुखानुभवेऽपीति - कृतात्यय इति सूत्रांशेन स्वर्गक्षयिष्णुत्वस्य सूत्रकृताख्यापितत्वादिति भावः, दुःखित्वज्ञापनप्रकारः सर्वोषि रंहत्यथिकरणेऽस्माभिः प्रपञ्चितः तत्रैवानुसन्धेयः - भाष्ये स्वप्नमधिकृत्येति । प्रवृत्तेति शेषः, स्वप्नमधिकृत्य प्रवृत्ता श्रुतिः श्रूयत इति योजना, तेन समानकर्तृकत्वात् न क्तवानुपपत्तिः, अधिकृत्य प्रस्तुत्येत्यर्थः, भाष्ये रथयोगा इति, रथैर्युज्यन्त इति रथयोगा रथाश्वाः कर्मणि घञ् कर्तृकरण इति समासः, वेशान्ताः पल्वलानीत्यर्थः, पुष्करिण्य इति द्वितीयार्थे "सुपां सुपो भवन्ती'ति जसा-देशः, अथवा छान्दसः पूर्वसवर्णदीर्घाभावः - स्प्नं पश्यतीति हि प्रकृतमिति । यद्यपि "स यत्र स्वपिति अस्य लोकस्य सर्वाबतो मात्रा उपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति अत्रायं पुरुषः स्वयंज्योतिर्भवती'त्युपक्रम्य हि "न तत्र रथा' इति बृहदारण्यके श्रूयते, अत एव शाङ्करभाष्ये स यत्र प्रस्वपितीत्युक्रम्येत्येवोक्तम्, तथापि प्रस्वपितीत्यस्य अस्पष्टाथर्-त्वात् स्पष्टार्थं लौकिकं वाक्यान्तरमुपात्तम्, न त्वेतत् श्रुतिवाक्यमुपात्तमिति द्रष्टव्यम्, एवमुत्तरत्र स्वप्नं पश्यतीति प्रकृतो जीव इत्य-त्रापि द्रष्टव्यम् । भाष्ये-सन्ध्यं स्वपनस्थानमुच्यत इति, तस्य ह वा एतस्य पुरुषस्य द्वे एव स्थाने भवतः इदं च परलोकस्थानं च सन्ध्यं तृतीयं स्वप्नस्थानं तस्मिन् सन्ध्ये स्थाने तिष्ठन् एते उभे स्थाने पश्यति इदं च परलोकस्थानञ्चेति श्रुतिः, यथा ग्रामसन्धिः द्वौ ग्रामौ भजते एवं स्वप्न उभौ लाकौ लक्षणतो भजते एतल्लोकवर्त्तिचक्षुराद्यजन्यरूपादिसाक्षात्कारवत्वलक्षणं परलोकलक्षणं

३.२.३

भजते, परलोकवर्त्तिचक्षुराद्यजन्यरूपादिसाक्षात्कारवत्वरूपमैहलौकिकलक्षणमपि भजत इत्यर्थमस्याः श्रुतेः केचन वर्णयन्ति, भाष्ये-सृजते स हि कर्त्तेत्याह हीति, हि शब्दो हेत्वर्थः, ततश्च कर्त्तेत्यस्य सृजत इत्यनेनैकार्थ्यात् हेतुहेतुमद्भावाभावात् कर्तृ-त्वोपयुक्तसत्यसङ्कल्पत्वगुणशालीत्यथर्।, ततश्च सत्यसङ्कपत्वात् जीवस्य कर्त्तृत्वं युज्यत इत्यर्थः इति पूर्वपक्षिणो भावः, न च सत्यसङ्कल्पत्वादिसद्भावे जागरेऽपि जीवस्य रथादिस्रष्ट्टत्वं स्यादिति वाच्यम्, जागरदशायां तिरोहितस्य स्वप्नदशायां मुक्ता-विवाविर्भावसम्भवात्, पूर्व पश्चात् चासतां स्वप्नपदार्थानां स्वप्नकाले भवनवत् सत्यसङ्कल्पत्वस्याऽपि तन्मात्र एवाऽऽविर्भा-वोपपत्तेः, नचैवं सति प्रवुद्धस्य रथादीनद्राक्षमिति परामर्शवत् रथादीनस्त्राक्षमित्यपि परामर्शः स्यादिति वाच्यम्, स्वप्ने जागरानु-भूतपितृपितामहात्ययादिवृत्तान्तस्याननुसन्धानवत् स्वपनेऽनुभूतरथादिस्त्रष्ट्टत्वस्य जागरणे अननुसन्धाने दोषाभावात्, न च जीवस्य स्वाप्नार्थस्त्रष्ट्टत्वे शुभसूचकानेव सृष्ट्वा पश्येत् नाशुभसूचकान् इति वाच्यम्, तदानीं स्वाप्नार्थस्याऽशुभसूचकत्वाननुसन्धा- नेन तत्स्त्रष्ट्टत्वोपपत्तेः, स्वप्नदृक्कर्त्तृकेषु तैलपानतैलघटावगाहनविषभक्षणमध्वशनैकपुण्डरीकदारणादिषु सिद्धान्तेऽप्येवमेवोपपाद-नीयत्वात्, तस्मात् जीव एव कर्त्तेति पूर्वपक्षिणो भावः ।। १ ।। जीवलिङ्गं दर्शयतीति - ततश्च परमात्मनस्तत्र प्रकृतत्वेऽपि पुत्रपौत्रादिसम्बन्धरूपस्य जीवलिङ्गस्य बलवत्वात् "एषु सुप्तेषु' इति वाक्ये जीव एव कर्तृत्वेन प्रतिपाद्यत इति भावः ।। २ ।। तुश-ब्दसिद्धार्थ उक्त इति - जीवकर्तृकत्वरूपपूर्वपक्षव्यावर्तकतुशब्दवलात् परमात्मकर्तृकत्वं लभ्यते, मायामात्रं स्वप्ने पुष्करिण्या-

३.२.४

द्यर्थजातं परमपुरुषसृष्टमिति भाष्ये योजना, मायामात्रमित्येतत् हेतुगर्भं पक्षविशेषणम्, सर्वांशस्याऽप्याश्चय्यर्रूपत्वात् परमा-त्मसृष्टमिति भावः, ततश्च परमपुरुषसृष्टमित्येनन्मायामात्रमित्यस्य व्याख्यानमिति न मन्तव्यमिति भावः । ।न भवन्तीति वाक्- यस्य वैयर्थ्यमिति - पूर्वकालीनाभावपरत्वेनाभूवन्नित्येवं निर्देशप्रसङ्गेन लङन्तनिर्देशानुपपत्तिरित्यस्वारस्यमपि बोध्यम्, ननु यद्यपि प्रसिद्धरथादीनामभावस्य लोकसिद्धत्वेऽपि तेषामनुभवाभावो न लोकसिद्ध।, सुप्तोत्थितो हीत्थं परामृशति, पुरा यो रथो माहिष्मत्यां दृष्टः तमेव रथं स्वप्नेऽन्वभूवमिति, ततश्च कथमनुभवाभावो लोकसिद्ध इति चेत्, सत्यम्, "सृजते स हि कर्त्ता' इति सृज्यत्वकथनादेव प्रसिद्धानामननुभूतत्वस्य सिद्धिसम्भवात्, न तत्प्रतिपादनाय "न तत्रे रथाः' इत्यादिवाक्यमथर्वदिति भावः -विजातीयविचित्रार्थसृष्टिपरत्वमिति । ननु वैजात्यं लोकसिद्धम्, स्त्रष्ट्टत्वमात्रमेव हि प्रतिपिपादयिषितमिति पर्यवसन्नम्. ततश्च सृजत इत्येतन्मात्रस्यैव सार्थक्यम्, न तु "न तत्र रथा' इत्यादि पूर्व भागस्येति चेत्, सत्यम्, "जन्माद्यस्य यतः''यतो वा इमानि' इत्यादौ इदंशब्दस्य कार्यवर्गवैचित्र्यतूचकत्वेन साफल्यवत् "न तत्र रथाः' सत्यादिवाक्यस्यापि स्वप्नार्थवैचित्र्यसूचनमुखेन अतिविचित्रस्वप्नार्थस्त्रष्ट्टत्वरूपपरब्रह्ममहिमप्रतिपादने तात्पर्य्यमिति, तत्कालमात्रावसायित्वरूपमित्यनन्तरं पय्यर्वस्यतीति पूरणीयः, अथ वा इति सगाप्तौ द्रष्टव्यः । णमुलन्तमिति - "आभीक्ष्ण्े णमुल्-

३.२.६

चेति णमुल्, आभीक्ष्ण्े द्वे भवत सति द्विर्भावः ।। ३ ।। ननु तिरोधानस्य तत्सङ्कल्पायत्तत्वं प्रतिज्ञातं चेति ततो ह्यस्य तिरोधा-नविपर्ययावित्येव निर्देष्टव्यमित्यत आह - बन्धस्य तत्सङ्कल्पायत्तत्व इति । ।। ४ ।। ।। ५ ।। स्वप्नवाचिवेदवाक्यविद इति - ननु स्वप्नाध्यायस्य पुराणगतस्य ग्रहणे न किञ्चिद्बाधकमिति चेन्न, श्रुतेराचक्षते च तद्विदः-

इत्यत्र तच्छब्दस्य सन्निहितश्रुतिपरामर्शकत्वस्यैव युक्तत्वात्, श्रुतावप्यध्यायव्यवहारसत्वेन भाष्यविरोधाभावाच्च, भाष्यध्यस्वप्ना-ध्यायदेन श्रुतिरेव गृह्यत इत्यभिप्रायः । भाष्ये शुभस्य सूचकमेवेति । न च अशुभसूचकत्वापरिज्ञानात् तत्सृष्टिरिति वाच्यम्, तदानीन्तनानिष्टकारिणां चोरव्याघ्रादीनामनिष्टकारित्वेन ज्ञायमानानां सृष्टिदर्शनेन स्वाप्नसृष्टेः जीवकर्तृकत्वासम्भवादिति भावः । परे तु स्वाप्नाः पदार्थाः वियदादिवत्सत्याः, वृहदारण्यके स्वप्नमधिकृत्य "अथ रथान् रथयोगान् रथपथः सृजते' इति सृष्टयाम्नानात्, उपसंहारे स हि कर्त्तेति सुप्तजीवकर्त्तृकत्वाम्नानात् अपरमार्थस्य सृष्टेः कर्तुर्वा असम्भवात् तथा कठशाखायां "एषु सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' इति कामशम्दनिर्दिष्टानां स्वाप्नानां पुत्रपौत्रादीनां निर्माणश्रवणात् तस्य निर्माणस्य प्राज्ञकर्त्तृकत्वाच्च प्राज्ञकत्रृकाणां वियदादीनां पारमार्थ्यवत् स्वाप्नानामपि तथ्यरूपत्वमेवोचितम्, न च प्राज्ञकर्त्तृकत्वहेतोरसिद्धिः, "एषु सुप्तेषु' इति वाक्यस्याधस्तात् परमात्मन एव प्रकृतत्वात् "तदेव शुक्रह तद्ब्रह्म' इति वाक्यशेषाच्च, जीवकर्तृकत्वेऽपि जीवस्य प्राज्ञाभिन्नत्वेन प्राज्ञकर्तृकत्वानपायात्, किञ्च स्वाप्नप्रत्ययः प्रमा प्रत्ययत्वात्, संवादिप्रत्ययवदित्यनुमानाच्च स्वाप्नार्थस्य सत्यत्वसिद्धेः, नचोत्तरकालं बाधदशर्नात् असत्यत्वं भुयोर्भिन्नविषयत्वेन बाध्यबाधकभावाभावात्, एकस्यैव क्षीरस्य कालान्तरे दधिभाववत् स्वप्नेरथादिरूपाणामेव तेषां जाग्रद्दशायां तद्भिन्नरूपेण परिणामसम्भवेन बाध्यबाधकत्वेनाभिमतयोः कालभेदेन वस्तुद्वयविषययोरविरोधात्, अथवा सर्वं सर्वरूपमेव निद्रारूपव्यञ्जकसमवधाने रथाद्यात्मना गृह्यते, अतद्रूपत्वव्यञ्जिका तु जाग्रद्दशा, किञ्च केषाञ्चित् स्वप्नानां जाग्रत्प्रत्ययसंवाददर्शनात् तत्सामान्यादितरेषामपि स्वप्नानां तथात्वं वक्तव्यम्, एवं प्रामाण्योपपादनसम्भवे अप्रामाण्याश्रयणस्यान्याय्यत्वात्, न तत्र रथा इत्यादि रथाद्यभावश्रुतिस्तु जाग्रदवस्थादर्शनयोग्या न सन्तीत्येवं भाक्ततया व्याख्येया, इत्येवमाद्याभ्यां सूत्राभ्यां पूर्वपक्षं कृत्वा माया मात्रं तु इत्यादिभिः सूत्रैः सिद्धान्तः कृतः, मायामात्रं, न परमार्थगन्धोस्तीत्यर्थः, परमार्थवस्तुधर्माणां देशकालनिमित्ताबाधानां कार्त्स्न्ेन तत्राभावात्,न तावत् स्वप्ने रथगिरिनदीसमुद्रादीनामुचितो देशः सम्भवति, अतिस्वल्पे स्वप्नदृग्देहदेशे रथादीनामवकाशासम्भवात्, न च तत्रैव "बहिष्कृुलायादवरश्चरित्वा स ईयते अमृतो यत्र काम'मिति कुलायशाब्दितात् शरीरात् बहिश्चरित्वा यत्र विषये कामो भवति तत्र तत्र ईयते गच्छतीति शरीरात् बहिस्सञ्चरणश्रवणेन स्वप्नदृक् न स्वदेहान्तर्गतदेश एव स्वाप्नान् पदार्थान् पश्यति, येन देशस्याननुरूपत्वं स्यादिति वाच्यम्, देहाद्बहिस्सञ्चरणे दण्डताडनादावनुत्थानप्रसङ्गेन तस्याः श्रुतेरुपपत्तिविरुद्धत्वात्, "स्वे शरीरे यथाकामं परिवर्तते' इति श्रुतिवशाच्च बहिष्किुलायश्रुतेर्गौणत्वस्य वक्तव्यत्वात् स्वप्नदृग्देहान्तर्वर्तिदेशस्यैव स्वाप्नपदार्थदेशत्वात् तस्य च तदुचितदेशसम्पत्त्यभावात् देशस्यदुर्निरूपत्वं सिद्धम्, तथा मुहूर्तमात्रेस्वप्नकालेन चिरकालसाध्यविवाहपुत्रोत्पादनादय-स्सम्भवन्ति, न वा रथाद्युत्पत्तिनिमित्तानि दार्वादीनि तद्दर्शननिमित्तानि वा बाह्यकरणानि वा सम्भ- वन्ति, यच्चोक्तं कालभेदेन भिन्नविषयत्वात् न प्रतीत्योर्बाध्यबाधकभाव इति, तन्न, नहि जात्वीश्वरगृहे चिरस्थितरजतभाजनानि शुक्तिभावमनुभवन्ति दृश्यन्ते, न वाऽन्येन रजततया अनुभूयमानानि वस्तूनि अन्येन अनाकुलेन्द्रियेण पुंसा शुक्तित्वेनाऽनुभू- यन्ते, नाप्येकस्य सर्वदा सर्वरूपत्वमिति पक्षः सम्भवति, तथा सति सर्वास्य वस्तुनः सर्वर्थक्रियाकारित्वप्रसङ्गात्, तस्मादुपपत्ति- विरुद्धा
सगर्श्रुतिरुपपत्तिसहितप्रक्रमश्रुतरथाद्यभावश्रुत्यनुरोधेन भाक्ततया व्याख्येया, सृजते प्रत्येतीत्यर्थः. स हि कर्त्तेत्यत्रापि नहि जीवस्यसुप्तस्य रथादिषु स्त्रष्टत्वं वक्तुं शक्यते, तद्दर्शननिमित्तसुकृतदुष्कृतकर्तृत्वेन तत्कर्तृत्वमुपचरितम्, एतेन "एषु सुप्तेषु जागर्ति' इति कठशाखायां निर्माणश्रुतिः

भाक्ततया व्याख्येया, यदप्युक्तं प्राज्ञमेतं निर्मातारमामनन्तीति तदसत्, बृहदारण्यके "स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्विपिति' इति जीवव्यापारश्रवणात् इहाप्येषु सुप्तेषु जागर्त्तीति प्रसिद्धानुवा-

दात्, जीव एवायं स्वयं कामानां निर्माता सङ्कीर्त्यते , ब्रह्मप्रकरणन्तु तदभेदबोधनार्थत्वान्न विरुद्धयते, ततश्च प्राज्ञकर्तृकत्वहेतो-रसिद्धिः, अस्तु वा प्राज्ञकर्तृकत्वम्, न चास्माभिः स्वप्नेऽपि प्राज्ञव्यापारः प्रतिषिद्धयते, तस्य सर्वेश्वरत्यात् सर्वास्वप्यवस्थासु अधिष्ठातृत्वोपपत्तेः, न ह्येतावता प्राज्ञकर्त्तृकत्वमात्रेण सत्यत्वं साधयितुं शक्यम्, प्रत्यक्षविरोधात्, एवमपरमार्थद्रव्यावच्छिन्नस्य स्वप्नदर्शनस्य प्रमाणबलात् सूचकत्वमप्यभ्युपेयम्, ननु न जीवकर्तृकत्वश्रुतेरौपचारिकत्वमभ्युपेयम्, सत्यसङ्कल्पस्य तस्य सृष्टि-सम्भवादिति

शङ्कापकरणार्थं "पराभिध्यानात्तु' इत्यादिसूत्रद्वयं वर्णयन्ति, तत्र दूष्यांशमनूद्य दूषयति, परे त्वित्यादिना, एषां च जीवकर्तृकत्वमेव सृजत इत्युच्यत इत्यस्यानन्तरमिति यदुक्तं पूर्वपक्षिणेति शेषः । तच्चौपचारिकमिति - तच्चोच्यमानं जीवकर्तृक-त्वमौपचारिकमुपचरितमित्यर्थः, ननु न देशस्य दुर्निरूपत्वं, यदि वयं संवृते देहदेश एव स्वाप्नार्थानां सृष्टिमभ्युपगच्छामः, तदा हि तस्य दुर्निरूपता नैवमभ्युपगम्यते, "बहिष्कुलायादवरश्चरित्वास ईयते अमृतो, यत्र हिरण्मयः पुरुष एकहंसः' इति श्रुतेरित्या-शङ्कय सुप्तस्य जन्तोः क्षणमात्रेण

योजनशतान्तरितदेशपर्यटनसामर्थ्याभावात् "स्वे शरीरे यथा कामं परिवर्त्तते' इति स्वशरीर एव स्वप्नावस्थस्य परिवर्तनाम्नानाच्च बहिष्कुलायश्रुतिरुपचरितार्थेत्युक्तम्, तदेतदनुभाषते, बहिष्कुलायादवरश्चरित्वेति, "एषु "सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्मिमाणः' इति कठबल्लीषु न प्राज्ञकर्तृकत्वमभिधीयते, "य एषु सुप्तेषु जागर्त्ती'ति प्रसिद्धानुवादाज्जीव एवायं कामानां निर्माता सङ्कीर्त्यते, तस्मिन् प्रकरणे "तदेव शुक्रं तद्ब्रह्म' इति सङ्कीर्त्तनं जीवस्य ब्रह्माभेदोप दशार्थमित्येतदनुभाषते । तस्मिन् प्रकरण इत्यादिना - तस्मिन् प्रकरण इति कठचल्लीस्वप्नप्रकरण इत्यर्थः, न तु बहिष्कुलायादवरश्चरित्वेति प्रकरण इति भ्रमितव्यम्, तस्य वृहदारण्यकवाक्यस्थतया तत्र ब्रह्मप्रकरणाभावात् परैस्तथाऽनुक्तेश्च, तच्च द्वितीयमिति मायामात्रं

सूत्रानन्तरं "पराभिध्यानात्' इत्यस्मात् प्राक् पठितमिति भावः । अस्य बन्धमोक्षौ हीति - परमात्मा-ज्ञानज्ञानाधीनावित्यर्थः । स्वाप्नार्थानां जीवकत्रृकतयेति - यद्यपि न परैर्मिथ्यात्वे जीवकर्तृकत्वं हेतूकृतम्, किन्तु प्राज्ञकर्त्तृकत्वरूपहेत्वभावसम्पादकत्वेन जीवकर्तृकत्वं वर्णितम्, तथापि साधकाभावस्य बाधकत्वमिति न्यायेन सत्यत्वसाधकाभावस्य

तदभावसाधकत्वलक्षणं तद्बाधकत्वमस्तीत्यभिप्रेत्य तथोक्तम्, एवमुत्तरत्रापि द्रष्यव्यम् ।
श्रुतिवाक्यकृतसत्यत्वशङ्केति -

३.२.६

सर्गनिर्माणादिश्रुतिवाक्यकृतसत्यत्वशङ्केत्यर्थः । व्याववहारिकसत्यत्वनिवृत्त्यविरोधादिति - अभिमतार्थविरुद्धत्वे हि त्याग उचित इति भावः, यद्यपि तैरेव नचास्माभिः स्वप्ने प्राज्ञव्यापारः प्रतिषिध्यते, स्वप्ने प्राज्ञव्यापारः प्रतिषिध्यते, तस्य सर्वेश्वरत्वात् सर्वाप्वप्यवस्थास्वधिष्ठतृत्वोपपत्तेः, अपि तु न प्राज्ञर्तृकत्वस्य सत्यत्वसाधकत्वमित्युक्तम्, तथापि पूर्वस्मिन् ग्रन्थे परमात्मकर्त्तृ-कत्वव्युदासेन जीवकर्तृकत्वं प्रसाध्य पुनः परमात्मकर्तृकत्वं प्रसाधयतो वाक्यं कथं "विप्रतिषेधाच्चासमञ्जस'मिति न्यायमतिवर्त्तेत इति भावः । जीवस्त्रष्ट्टत्वस्येति - ततश्चायमप्यपरो विप्रतिषेध इति भावः । एवं जीवानामिति - "पराभिध्यानात्' इति साक्षात् सूत्रितत्वादिति योजना, अथवा साक्षादित्यस्य स्वाप्नार्थकर्तृकत्वाभावस्येत्यनेनान्वयः, साक्षात्कर्तृकत्वाभावस्य मुख्यकर्त्तृकत्वा-भावस्येत्यर्थः । न त्वनुपयुक्तविरुद्धानीति - यद्यपि विरुद्धान्यप्यनुपयुक्तान्येव, तथापि बलीवर्दन्यायेन सूत्रार्थविरुद्धत्वे साध्य-स्यात्यन्तपरिहर्त्तव्यत्वख्यापनार्थं तदुपादानम्, यस्मिन् साध्ये सूत्राण्यनुपयुक्तानि विरुद्धानि च न स्युः तदेव साध्यं

भवितु-मर्हतीत्यर्थः, अर्थक्रियाया इति छेदः, सूचनरूपार्थक्रियाकारित्वस्य सत्यत्वासाधकत्वेन मिथ्यात्वविरोधित्वादित्यर्थः । अध्या-हारव्युत्क्रमान्वयावित्यादि - अयमर्थः, पराभिध्यानात्तिरोहितमाविर्भवतीति योजनायाम् आविर्भवतीतिपदाध्याहारः परा-भिध्यानादिति पञ्चम्यन्तपदस्य तिरोहितमित्यनेनाव्यवहितान्वयः परित्यज्य आविर्भवतीत्यनेनान्वयात् व्युत्क्रमान्वय इति । तिरोभावशब्दस्य प्रकृतत्वादिति - तिरोहितमाविर्भवतीत्याविर्भावस्यैव त्वन्मते प्राधान्येन प्रकृतत्वादित्यर्थः । स इति परा-मर्शायोग्यत्वाच्चेति - न च सिद्धान्तेऽप्येष दोषः समान इति वाच्यम् पूर्वोक्तप्राधान्याप्राधान्य एव तात्पर्यात् । निरूप्य-

मिति - विचारणीयमित्यर्थः । न्यायविदामिति - उक्थ्याग्निष्टोमाधिकरणन्यायविदामित्यर्थः, "अप्यग्निष्टोमे राजन्यस्य गृह्वीयात् अप्युक्थ्ये ग्राह्यः' इति विहितस्य षोडशीग्रहस्य स्तोत्रशस्त्राद्यङ्गकत्वे अग्निष्टोमोक्थ्यस्तोत्राभ्यां तस्य यागस्य समाप्त्यभावेन उक्थ्यत्वाग्निष्टोमत्वरूपोद्देश्यविशेषणभङ्गप्रसङ्गाद्विधेयस्य षोडशीग्रहस्य शस्त्राद्यङ्गराहित्यमेवाश्रयणीयमिति पूर्वपक्षे प्राप्ते साङ्ग-प्रधानाविधायकत्वात् विधेस्तत्स्वारस्यस्याभञ्जनीयतया अग्निष्टोमत्वोक्थ्यत्वरूपोद्देश्योपमर्दः सोढव्यः, ततश्च य उक्थ्यसंस्थः प्राप्तः स षोडशीसंस्थः कर्त्तव्य इति भवतीति व्यवस्थापितम्, न च स्वाप्नार्थानामिति प्राक्कालीनपदं प्रयोगबाहुल्यात् तद्धिता इत्यत्र बहुवचननिर्देशेन "अन्यत्रापि तद्धितप्रत्यया भवन्ती'ति प्रतिपादितत्वाच्च सौम्यधुरीणादिवत् साध्विति मन्तव्यम् । ज्ञाना-धिष्ठितेनेति - ततश्चाणोरपि जीवस्य धर्मभूतज्ञानेन अनेकदेशाधिष्ठानमुपपद्यत इति भावः । बहिर्वृत्त्युपपत्तेरिति - बहिर्व्यापा-रोपपत्तेरित्यर्थः, अनेन "प्राणेन रक्षन्नवरं कुलायम्' इति श्रुत्यर्थः प्रदर्शितो भवति, प्राणेन सहितं कुलायं धर्मभूतज्ञानेन रक्षन्निति तस्यार्थः, एतेन बहिष्कुलायश्रुतेर्गौणत्वं बदन्तः प्रत्याख्याताः, कुलायात् बहिस्चरणस्य वस्तुतोऽभावे पूर्वकुलायस्य विनाश- प्रसङ्गेन रक्षणप्रतिपादनं व्यर्थं स्यात्, अतो बहिष्कुलायश्रुतेः सञ्चरणे तात्पर्यमवसीयते, नन ु "स्वे शरीरे यथाकामं परिवर्तते' इति श्रुतिविरोधात् "बहिष्कुलायादवरश्चारित्वा' इति बहिष्कुलायश्रुतिः गौणी व्याख्यातव्या, यो हि वसन्नपि शरीरे न तेन प्रयोजनम्, करोति बहिरिव शरीरात् भवतीत्युच्यते, न च शरीरात् बहस्संचरणेऽपि तस्यापि शरीरस्य स्वीयत्वादेव स्वे शरीर इत्युपपद्यत इति वाच्यम्, तथात्वे स्व इत्यस्य वैयर्थ्यप्रसङ्गात्, अवश्यञ्च बहिष्कुलायश्रुतेः भाक्तत्वमभ्युपेयम्, अन्यथा प्रधान-

प्रकरणार्थविरोधापत्तेः, आत्मनः स्वयञ्ज्योतिष्ट्वं प्रतिपादयितुं प्रवृत्ते हि प्रकरणे जाग्रदवस्थायामादित्यादिन्तेतिव्यतिकारात् तद्दुविवेचमिति तद्विवेचनार्थं स्वप्नावस्थाऽवतारिता, तत्र यदि सृष्टिः प्रतिपाद्येत तदा तत्रापि तद्दुविर्वेचं स्यात्, आदित्यचन्द्राग्नि-वाक्प्रतिभासस्य तदानीमपि सत्वात्, अतः प्रधानप्रतिपाद्यविरोधात् स्वर्गार्थज्योतिष्टोमप्रकरणे तदङ्गविध्यर्थवादस्य "को हि तद्वे-दयत्यमुष्मिन् लोकेऽस्ति वा नवां' इति वाक्यस्व स्वाप्नसृष्टिवचनस्य न स्वार्थे तात्पर्य्यम्, इहापि "न तत्र रथा न रथयोगा न रथपन्थानो भवन्ति' इत्युपक्रमेणैव सृष्टिवचनस्यापारमार्थिर्कविषयत्वं द्योतितम्, न च लोकसिद्धतदपारमार्थ्यकथने वाक्यवैयर्थ्य-मिति वाच्यम्, लोकसिद्धस्वाप्नरथादिमिथ्यात्वस्य स्वयञ्ज्योतिष्ट्वविवेचनोपयोगित्वेनानुवादोपपत्तेरिति चेत्, मैवम्, उक्तरीत्या बहिष्कुलायश्रुतेः तात्पर्यवत्वात्, "स्वे शरीरे' इति श्रुतिरपि स्वाप्नशरीराणां घर्मभूतज्ञानमात्रव्याप्त्यैव स्वाधिष्ठितानामणोर्जीवस्य यथाकामं सञ्चरणपरत्वात् अनेकजनपदाधिपतेर्महारजस्य स्वजनपदेषु स्वीयत्वाविशेषेण यथेष्टसञ्चरणपात्वत्"स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तते' इति पूर्ववाक्यानुसारेण सौभरिन्यायेन शरीरेषु यथेष्टं स्चरणप्रतिपादनपरत्वा-दस्य वाक्यस्य स्वपदस्य च

स्वीयत्वरूपहेतुसाधारण्यप्रतिपादनपरत्वेन सार्थक्यात् प्रकरणस्य रथादिमिथ्यात्वप्रतिपादनद्वारा स्व-यज्ज्योतिष्ट्वप्रतिपादनार्थत्वमप्यसत्,आदित्यादीनामवभासकानाम् अभावेऽपि मनस आत्मव्यतिरिक्तस्य सत्त्वेन सञ्वयज्जयोति-ष्ट्वस्यासिद्धेः, न च मनः स्वप्ने सदपि दृश्यत्वान्नात्मावमासकमिति वाच्यम्, तर्हि आदित्यानामपि दृश्यत्वाविशेषेणानवभासक-त्वसिद्धेः तद्व्यतिरेकप्रतिपादनस्य व्यर्थत्वात्, "अस्तमिते आदित्ये याज्ञवल्क्य चन्नमस्यस्तमिते शान्तेऽगौ शान्तायां वाचि किं ज्योतिरेवायं पुरुषः' इति पृष्टप्रतिपन्नादित्याद्यभावस्य "न तत्र रथ' इत्यादिवाक्यप्रतिपाद्यत्वायोग्यत्वाच्च, आदित्यावभासका-न्तराभावस्य प्रतिपाद्यत्वे न तत्रादित्या इत्येव श्रुतिनिर्देशोऽपि स्यात्, तस्मात् सकलेतरविजातीयरथादिस्रष्ट्टत्वरूपपरमात्म-महामहिमप्रतिपादनार्थेयं श्रुतिः' अत एव रथादिसृष्टयनन्तरं "स हि कर्त्ता' इति हेतूपन्यासस्सङ्गच्छते, स्वप्नदृक् यस्मिन् देशे रथं पश्यति यदा तदानीं तत्र स्थितोऽन्यः तन्न पश्यति, स्वप्नदृगपि प्रबोधानन्तरं तत्र गतः तन्न पश्यति तथा तत्र तस्यान्यत्र नयनचि-ह्नानि नादचिह्नानि वा पश्यति कथमेतादृशाश्चर्यसहस्रलिनि स्वप्नसृष्टिर्भवतीत्याकाङ्क्षायां "स हि कर्ता' इति तत्र हेतुरुच्यते, सकलप्रपञ्चनाटकसूत्रधारस्सर्वेश्वरः खलु तत्र कर्त्ता स किं कर्त्तुं न शकनुयादिति हि शब्दाभिप्रायः, न चास्यार्थस्य

प्रकरणासङ्गतिः "उभयान् पाप्मनः आनन्दाँश्च पश्यति' इति स्वप्नद्रष्टुरनुकूलप्रतिकूलविषयप्रतिभासकत्वेन स्वयज्ज्यरोतिष्ट्वेनिर्दिष्टे तदानीं लोक- दृष्टया द्रष्टव्यान्तराभावशङ्कां निवर्तयितुं परमात्मकर्तृकाणां सद्भावः प्रतिपद्यत इति न तु मिथ्यात्वप्रसक्तिः, न चात्मनो विषया-वभासकत्वं सिद्धान्ते नाभ्युपगतम्, धर्मभूतज्ञानस्य तथात्वादिति वाच्यम्, धर्मभूतज्ञानगतभासकत्वस्यैव तद्द्वारा आत्मनिष्ठस्यैव प्रतिपाद्यत्वात्, "कतम आत्मा योऽयं विमानमय' इति विज्ञानगुणकत्वमुपपाद्य तस्य स्वयज्ज्योतिष्ट्वप्रतिपादनपरत्वात् प्रकरण-स्येति नात्र मिथ्यात्वप्रसक्तिरित्यलं विस्तरेण - देशान्तर्गतविशेषप्रश्ने प्रतिवचनाभावोपपत्तिरिति । तद्देशगतस्वाप्नार्थव्य-तिरिक्तार्थान्तरदर्शनं नास्तीत्यर्थः, ननु स्वप्नदृष्टकाञ्चयादिदेश स्यापि भिन्नत्वेन तत्र जाग्रद्दृश्यपदार्थान्तरस्य सन्त्वाप्रसक्त्या तत्प्रश्नप्रतिवचनयोरपि अप्रसक्तत्वेन तेषां चक्षुरादिना स्वाप्नार्थमात्रग्रहणयोग्य, त्वात् तद्देशगतविशेषान्तरप्रश्ने प्रतिवचनाभावोपपत्तिरस्थानसंभ्रमः, अत एव प्रतिधातकत्वा प्रतिघातकत्वादिविचारात्मकोत्तरसन्दर्भोपि तादृश

एव देश भेदेन प्रतिघातकत्वादि विचारस्यासङ्गतत्वादिति चेत्, सत्यम्, ज्ञक्ये परिहारस्सम्भवतीत्यभिप्रेत्य एवमुक्तमिति

३.२.७

द्रष्टव्यम् । आपेक्षिका भवन्तीति - नहि भारतवर्षवासिनां या प्राची दिक्यैः प्रातःकालः सैव केतुमालवासिनां प्राची स एव प्रात- काल इति भावः । जलगतं वस्तु दृष्टुमशक्यमिति - विषयालोकसंयोगस्य कारणत्वेनागाधस्वच्छजलान्तवर्र्त्तसिकतादिरूप-विषयाणाम् आलोकसंयोगस्यावश्यकत्वेन सलिलानामप्रतिघातकत्वस्य वक्तव्यत्वादिति भावः । निमनपातिततयेति - उर्ध्वाधर- भावेन संयुक्तानां गुरुतया निपतनशीलानां द्रवद्रव्याणां मध्ये छिद्रासम्भवादित्यर्थः । निरुद्धयमानतयेति - असति सेत्वादौ निरो-धके परस्परसंसर्गानुकूलगतिमतां दक्षिणोत्तरभावेनावस्थितानामपि द्रवद्रव्याणां न छिद्रसम्भव इति भावः । तत्र पराभिध्यानात्तु- इत्यादि - अत्रैषा योजना पराभिध्यानात्त्वित्यादिसूत्रद्वययोजनायां पूर्ववत् परमत इवानुपयोगविरोधाभावेऽपि सूत्रान्तरे श्रुतौ चास्वारस्यं पूर्ववदनुसन्धेयमिति सूत्रश्रुत्योरस्वारस्यं क्रमेणदर्शयति - मायाशब्दस्येत्यादिना ।। ।। इति सन्ध्याधिकरण् ।।

तद्यत्रैतदित्यादि-छान्दोग्ये श्रूयते, तत् तत्रैव सति यस्मिन् काले एतत् स्वप्नं सुषुप्तः कुर्वन् ओदनपाकं पचतीतिवत् स्वापस्य द्विप्र-कारत्वात् सुषुप्तिसिद्धयर्थं विशेषणम् - समस्त इति । उपसंहृतसर्वकरण इत्यर्थः, विषयसम्पर्कजनितकालुष्याभावात्, सम्प्रसन्नः सुप्तो भवति प्रविष्टो भवतीत्यर्थः, इदन्तु छान्दोग्ये दहरविद्यागतं वाक्यम् "अथ यथा सुप्तो भवति' इत्यादि वृहदारण्यकवाक्यम्, "यत्रैतत् पुरुषः स्वपिति' इत्यादिकं छान्दोग्यसद्विद्यागतम्, ननु "न सता साम्य' इत्यत्र सप्तम्या अश्रवणात् कथमाधारत्वप्रतीति- रिति चेत्, सत्यम्, तद्वाक्यशेषे "सति सम्पद्य न विदुः सति सम्पत्स्यामहे' इति सप्तम्याः श्रवणात्, तथा "य एषोऽन्तर्हृदय आकाशः

तस्मिन् शेते' इति श्रुत्यन्तरैकार्थ्याच्च आधारत्वप्रतीतेः । खट्वापर्यङ्कवदिति - पर्यङ्कशब्दोऽयमास्तीर्णवाची, "नागपर्यङ्कमुत्सृत्य' इत्यादौ प्रयोजदर्शनात्, अतः पर्यङ्कशब्दस्य खट्वापर्यन्तत्वमेवेति न भ्रमितव्यम् । कार्यभेदावगमकत्वे त्विति - यद्यपि ब्रह्मणः प्रबोधश्रवणं ब्रह्मणो नियमेन सुषुप्तिस्थानत्वरूपस्य परमसाध्यस्यैवोपपादकम्, न तु कायर्भेदावगमद्वारां ब्रह्मणो नियमेन सुषु- प्तिस्थानत्वोपपादकम्, तथापि समुच्चयरूपस्थाधिकरणार्थस्य कार्यभेदावगममन्तरेण अनिर्वाहात्, सोऽप्युपादककोटौ निविशत इति दृष्टव्यम्, ननु "सन्मूला सोम्येमाः सर्वाः प्रजाः सदायतानाः सत्प्रतिष्ठाः' इति श्रवणात् नियमेन ब्रह्माश्रितस्य कथं तदनपेक्ष्य नाड्यां पुरीततीव सुषुप्तिराशङ्कयते, उच्यते, न केवलस्य ब्रह्मणोऽत्र विकल्पकोटित्वम्, किन्तु दहराकाशरूपस्य छान्दोग्य एव दहारविद्यायां दहराकाशरूपं बह्म प्रस्तुत्य "एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति' इति सुषुप्तिस्थान-त्वश्रवणात्, किञ्च सद्विद्यावाक्यशेषोऽपि "सत ;आगम्य न विदुः सत आगच्छामहे' इति श्रूयते, तेन किञ्चित् प्रदेशावच्छिन्नमेव सुषुप्तिस्थानमिति सिद्धयति; नर्हि ग्रामादिवापरिच्छिन्नात् ब्रह्मण आगमनं सम्भवति, स च अवच्छेदकों हृदयपुण्डरीकरूप इति छान्दोग्य एव प्रदेशान्तरपर्यालोचनया निश्चीयते, श्रुत्यन्तरे "य एषोन्तर्हृदय आकाशस्तस्मिन् शेते' इति हृदयपुण्डरीकावच्छि-न्नब्रह्माधारकत्वस्य स्पष्टमाम्नानाच्च, तस्मात् उपपन्ना ब्रह्मणो वैकल्पिकाधिकरणत्वशङ्का, भाष्ये -

निरपेक्षत्वप्रतीतेरिति, उक्तं हि पूर्वतन्त्रे "एकार्थास्तु विकल्पेरन् समुच्चये ह्यावृत्तिस्स्यात् प्रधानस्य' इति, तत्र हि "व्रीहिभिर्यजेत् यवैर्यजेत ' इत्यादिषु सर्वा-ङ्गोपसंहारिप्रयोगवचनानुग्रहायाष्टदोषदुष्टविकल्पपरिहाराय समुच्चय एव स्यात्, ततश्चज्योतिष्टोभवत् दर्शपूर्णमासप्रदानमागा-भ्यासमाश्रित्य समुच्चयोऽभ्युपगन्तव्यः, अथवा व्रीहियवानां मिश्रणेन वा यागः कर्तव्य इति पूर्वपक्षं कृत्वा एकार्थानाम् एक- स्मिन् उपकारे अन्योन्यनिरपेक्षतया विनियुक्तानां विकल्प एवाभ्युपगन्तव्यः, ज्योतिष्टोमे, हि द्रव्यदेवतासंयोगानाम् अदृष्टा- र्थानाम् अपर्य्यायविधायिना प्रकरणेन युगपत् ग्रहणात् सर्वसम्पादनाय युकतम्, यद्यभ्यस्यते व्रीहियवौ तु द्वाभ्यां वाक्याभ्याम् अन्योन्यनिरपेक्षौ यागद्रव्यपुरोडाशप्रकृतितया विधीयमानौ तद्द्वारेण प्रयोगवचनो गृह्णन् पर्यायेण गृहणाति, न यगपत्, येन बलात् ज्योतिष्टोमवत् प्रधानयागाभ्यासः स्यात्, मिश्रणमपि निरपेक्षविधानात् अयुक्तम्, मिश्रणे हि; वाक्यद्वयमपि बाधितं स्यात्, तस्मात् द्वाभ्यामपि वाक्याभ्यां द्वयोरपि निरपेक्षयोः प्रकृतित्वेन विधानात् तद्वलेन द्रव्यान्तरनिवृत्तिः प्रतीयते, तस्मात् विकल्प इत्युक्तम्, तन्न्यायेन इहापि विकल्प इति भावः । श्रुत्यनुसारादिति - स्वप्नाभावसुषुप्त्योः सम्बन्धस्य श्रुतिप्रसिद्ध-

त्वात् स्वप्नाभाववाचिशब्देन सुषुप्तिलक्षणा उचितेति भावः । पूर्वपक्षयुक्तिव्युदासार्थमिति - पूर्वपक्षयुक्तित्वव्युदासार्थमित्यर्थः, त्रयाणशं स्थानत्वश्रुतेः विकल्पस्यैव साधकत्वेन पूर्वपक्षयुक्तित्वेन समुच्चयसाधकयुक्तित्वाभावादिति शङ्काव्युदासार्थमाहेत्यर्थः, अयम्भावः,असम्भवत्कार्यभेदस्थले एकविभक्तिनिर्देशस्य विकल्पसाधकत्वेऽपि सम्भवत्कार्यभेदस्थले एकविभक्तिनिर्देश-स्याष्टदोषदुष्टविकल्पभीत्या समुच्चयस्यैव साधकत्वात्,इतरथा नित्यपदाम्नानभङ्गप्रसङ्गादिति । अथ तु यथासम्भवं बाध इति - अपूर्वोत्पत्तिबाधफलबाधयोरत्यन्तासम्भवादित्यर्थः, इदमुपलक्षणम्, व्रीहियवादिशास्त्रेष्विव प्रामाण्यपरित्यागाप्राका- ण्यस्वीकारस्वीकृताप्रामाण्यपरित्यागपरित्यक्तप्रामाण्यस्तीकाराःचत्वारो दोषाः एकस्मिन् शास्त्र इति नाडीपुरीतद्ब्रह्मशास्त्रेषु त्रिष्वपि प्रत्येकं चत्वारश्चत्वारो दोषाः इति द्वादश दोषा दृष्टव्याः, तथाहि एकस्यां सुप्तौ नाड्यां शयने पुरीतद्वाक्ये ब्रह्मवाक्ये च प्रत्येकं प्रामाण्यापरित्यागाप्रामाण्यस्वीकारौ द्वौ द्वौ दोषौ, सुप्त्यन्तरेपुरीतति शयने नाडीवाक्ये प्रामाण्यपरित्यागाप्रामाण्यस्वी- कारौ द्वौ द्वौ दोषौ, परीतद्वाक्ये तु परित्यक्तप्रामाण्यस्वीकारस्वीकृताप्रामाण्यपरित्याग इति दोषद्वयमिति चत्वारो दोषाः पुनः सुप्त्यन्तरे ब्रह्मणि शयने ब्रह्मवाक्येऽपि स्वीकृताप्रामाण्यपरित्यागापरित्यागपरित्यक्ताप्रामाण्यस्वीकाररूपौ द्वौ द्वौ दाषौ, ततः सुप्त्यन्तरे नाड्यां शयने नाडीवाक्येऽपि पूर्ववत् दोषद्वयमिति स्वापचतुष्टये द्वादश दोषाः प्रादुःप्युः, "अष्टदोषदुष्टो विकल्प' इति उक्तिस्तु प्रसिद्धव्रीहियवोदाहरणाभिप्राया,भाष्ये - नाडीपुरीततावति, यद्यपि आन्तरं पुरीतदिति निघण्टुषु नपुंसकत्या निर्दिष्टं तद्वयाख्यातृभिर्व्याख्याञ्च, तथापि पुरीततमभिप्रतिष्ठन्त इति वैदिकव्यवहारदर्शनात् उभयलिङ्गत्वमस्तीत्यभिप्रेत्य भाष्यकृता पुँल्लिङ्गतया निर्देशः कृत इति द्रष्टव्यम् । परम्परया एकप्रयोजनत्व इति - अङ्गानाम् अवान्तरकार्यभेदद्वारा करणसामर्थ्यात् बोधनरूपैकप्रयोजनपर्यवसितानामपि समुच्चयदर्शनादिति भावः, न च साक्षात् एकप्रयोजनत्वं विकल्पप्रयोजकमिति वाच्यम्, एकवाक्यप्रतिपाद्यतया साकाङ्क्षयोः एकक्रयनिर्वर्त्तकयोरारुण्यैकहायन्योर्विकल्पाभावेन नैरपेक्ष्यस्याप्यपेक्षितत्वादिति भावः । नाड्यादिसमुच्चयश्च श्रुत्या प्रदशिर्त इति - "तासु तदा सुक्तो भवति' इति श्रुत्या नाडीनां प्राणशब्दितस्य ब्रह्मणश्च समुच्चयः प्रदर्श्यते, इति भावः । कथमविरोध इति - पुरीतता हृदयात् बाह्यत्वेन प्रासादखट्वापर्य्यङ्कन्यायास्भवादिति भावः । हृदय इति वच इति - परमरत्मनो व्यापकत्त्वेऽपि हृदयावच्छिन्नपरमात्मनोऽतथात्वात्, तत्र शयनस्य पुरीतच्छयनं विरुद्धमेवेति ३.२.९

भावः । अविरोध इति वाच्यमिति - तच्चायुक्तमिति शेषः । हृदि शयनस्य च विरोधादिति - २अन्तर्हृदय आकाशः तस्मि- ञ्छेते' इति प्रतिपादितेन हृदयाकाशसदनेन, "हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयांत् पुरीततमभिप्रतिष्ठन्ते' ताभिः प्रत्य-वसृष्य पुरीतति शेते' इति पुरीतति शयनस्य च विरोधात् न हि प्रासादान्निर्गत्य प्रासादप्रावरणप्राकारे शयानः प्रासादे शेते इति शक्यते वक्तुमिति भावः,कस्तर्हि परिहार सति चेत्, इत्थम्, अवहितमनाः ृणु, पुरीतताख्यं मांसं हृदयमध्यगतं

दहरपुण्डरी-काधारभूतम्, दहरपुण्हरीकावच्छिन्नः आकाशः दहराकाशः, तत्र जीवस्य सुषुप्तिः, "हृदयस्य मध्ये लोहितं मांसपिण्डं यस्मिंस्त- दहरं पुण्डरीकं कुमुदमिवादेकधा विकसित'मिति सौबलश्रुतेः; पुरीततो हृदयवेष्टनोक्तिस्तु हृदयान्तर्वर्तिदहरपुण्डरीकवेष्टनाभिप्रा- येण, ततश्च न क्कापि विरोधगन्धः, तस्य च हृदयस्य दश छिद्राणि जागराद्यवस्थजीवस्तानभूतानि प्राकारस्य द्वाराणि वसन्ति, तत्र जागरस्वप्नावस्थे अनुभूय सुषुप्तिदशायां हिता नाम नाडीद्वारा अन्तःप्रविश्य प्राकारस्थानीयस्य हृदयस्य मध्यवर्त्ति यत्पुरीत- ताख्यं लोहितं मांसपिण्डं तत्प्राप्य तस्योपरि निविष्टदहरपुण्डरीकान्तर्वत्तिदहराकाशशब्दितपरब्रह्मणि सुषुप्तौ विरोधाभावात्, प्राकारद्वारे विहृत्य राजमार्गेण प्राकारद्वारात् राजभवनं प्रत्यवसृष्य प्रासादे शयाने महाराजे प्राकारान्निर्गत्व राजमार्गेण राज- भवनं प्रत्यवसृष्य राजभवने शेते-इत्युक्तौ वि ोधाभावात् ।।

।। इति तदभावाधिकरणम् ।।

अत्र न कञ्चन पाष्मानं स्पृशतीति श्रुतिरभिप्रेतेति - "आसु तदा नाडीषु सुप्तो भवति तन्न कश्चन पाष्मा स्पृशति तेजसा हि तदा सम्पन्नो भवति' इति श्रूयते, तत्र पाष्मशब्दस्यसुकृतदुष्कृतसाधारणत्वेन सर्वोपाधिविनिर्मोक्षाभिप्रायत्वादिति भावः, ततश्च सुषुप्तस्य पुनरावृत्तिहेत्वाभावादन्य एवोत्तिष्ठति, ततश्च कर्मानुस्मृतिशब्दविधयो यथाकथञ्चिदुपपादनीयाः,कथं कर्मा-फलभोगनियमस्सुषुप्तयभावे, अतः पुण्यफलं भोगार्धिना सुषुप्तितोऽपि रक्षणीयम्, अनुस्मृतिस्तु भ्रान्तिरूपैव, " त इह व्याघ्रो

३.२.९

वा' इत्यादिशब्दो यच्छरीरकः प्राचीनः तच्छरीर एवान्य उत्तिष्ठत्येवं परः, मोक्षार्थविधयोऽपि ब्रह्मानन्दानुभवार्थिविषयाः, सुषुप्त- स्य तु स्वरूपानन्दानुभव एव, न ब्रह्मानन्दानुभवोऽपि , अतो नानुपपत्तिरिति भावः । यद्यद्भवन्तीति - "त इह व्याघ्रो वा सिंहो वा वराहो वा कीटो वा दंशो वा मशको वा यद्यत् भवन्ति' इति छान्दोग्ये श्रूयते, यद्यत् भवन्ति-ये येऽभवन् तत्तदेव त एवेत्यर्थः, आसुषुप्तादागत्य भवन्तीत्यर्थः । पूर्वं ये यथा भवन्ति ते तथा भवन्ति-इत्यर्थः इति - भवन्तु फलितार्थकथनम्, श्रुतौ यथातथाशब्दाभावात् यद्यत् भवन्ति तथा भवन्तीति हि श्रुतिवाक्यम् । अनुष्ठानाशक्तिर्विवक्षितेति - ननु परमात्मसम्पत्ति- दशायां तन्महिम्ना पाष्मनामस्पर्शः परं कथ्यते, न त्वनुष्ठानाशक्तिः, अशब्दार्थत्वात्, "तेजसा हि तदा सम्पन्नो भवति' इति पर-मात्मसम्पत्तेः पापासंस्पर्शहेतुत्वप्रतिपादकोत्तरवाक्यविरोधाच्चेति चेत्,. भैवम्, "तेजसा हि तदा सम्पन्नो भवति' इति परमात्म-सम्पत्तेः पापासंस्पर्शहेतुत्वप्रतिपादकोत्तरवाक्यविरोधाच्चेति चेत्, भैवम्, "तेजसा हि तदा सम्पन्नो भवति' इत्यत्र आशंशायां त्यप्रत्ययः, ब्रह्मणा सम्पत्तिं तदाभिलषति ततश्च अनुष्ठानाशक्तस्सन् तदानीं परमात्मनं हि विश्रान्तिस्थानमभिलषतीत्यर्थः सिध्यति । अर्थान्तरप्रत्यङिज्ञाधारत्वमिति - मयेदं प्रक्रान्तं मयेदं दृष्टमित्यर्थान्तरप्रत्यभिज्ञानं कर्मशब्देन उच्यते, "योऽहं

३.२.१०

सुप्तः स एव जागर्मि' इत्यादिस्वविषयप्रत्यभिज्ञानमनुस्मृविशब्देनोच्यत इति वैषम्यमिति भावः । निर्हेतुकत्वप्रसङ्गाभिप्रायत्वादिति - "नायुक्तं क्षीयते कर्म, इत्यादि स्मारकत्वादिति भावः ।। * ।। ।। इति कर्मानुस्मृतिशब्दविध्यधिकरणः ।।

भाष्ये - निमित्तं हि मूर्च्छाया अभिघातादिरिति, सुषुप्तेस्तु श्रमादिर्निमित्तमिति भावः, सदञ्चोपलक्षणम्- आकारवैरुप्यस्यापि, भाष्ये स्पष्टत्वात् नोदाहृतम्, सुषुप्तौ हि प्रसन्नवदनत्वश्चासपूर्णत्वादिरुपलभ्यते, मूर्च्छायां तु करालवदनत्वसूक्ष्मश्वासादिरूपमा-कारवैरूप्यम्, मूर्च्छामरणयोरप्येवमेव निमित्तवैरूप्यमाकारवैरूप्यञ्च स्पष्टमेव, अतो निमित्तवैरूप्यादाकारवैरूप्याच्चैतद्वयमपि सुषुप्तिमरणयोर्द्वयोरप्यन्वेतीति केचिद्वर्णयन्ति, न चैवं निमित्तवैरूप्यात् सुषुप्तिव्यावृत्तिः, आकारवैरूप्यात् मरणव्यावृविरिति टीकाविरोध इति वाच्यम्, मार्गान्तरस्य मार्गान्तरादूषकत्वात्, न चास्यां योजनायां निमित्ताकारवैरूप्याभ्यां मूर्च्छायाः सुषुप्ति मरणभेदस्य सिद्धत्वात् मरणं हि सर्वप्राणदेहसम्बन्धोपरतिरित्याद्युत्तरभाष्यग्रन्थो व्यर्थ इति वाच्यम्, मरणार्द्धसम्पत्तिर्मूर्च्छेत्युक्ते किं तन्मरणं केयमर्द्धसम्पत्तिरित्याकाङ्क्षायाम् अस्य ग्रन्थस्य प्रवृत्तेः नासङ्गति । मरणार्द्धसम्पत्तिः मूर्च्छेति वाक्यस्यायमर्थः, मरणं

सर्वप्राणवियोगसर्वप्राणवियोगार्थाः कतिपयपाणवियोगसम्पत्तिः मूर्च्छेति, न च यत्रौषधादिवशास्त्र मरणम् । तत्र सर्व-प्राणविरतिलक्षणमरणार्थत्वाभावात् तत्र कतिपयप्राणवियोगसम्पत्तिरूपमूर्च्छायाः मूर्च्छात्वं न स्यदिति वाच्यम्, मरणार्थाधर्-सम्पत्तिरित्यत्र फलोपधानस्य विवक्षितत्वात् , नहि प्रतिबन्धकवशेन मरणकार्यानुत्पविमात्रेण स्थूलप्राणविर्योगरूपमूर्च्छायाः मरणार्थत्वं हीयते, अतः सुष्टूक्तम्-मरणायार्थ सम्पत्तिरिति, ननु मरणव्यावर्त्तकाकारवैरूप्यविवरणात् प्रागेव सुषुप्तिमरण-पारिशेष्यकथनं कथं युज्यते, सुषुप्तिव्यावर्त्तककथनात् सुषुप्तिपारिशेष्यकथनं हि युज्यत इत्याशङ्कयाह - न सुषुप्तिमरणे इत्यु- क्तेरिति ।। ।। इति मुग्धाधिकरणम् ।। ४ ।।

३.२.११

अवस्थास्वित्यर्व इति - सुषुप्तिमुग्ध्युत्क्रान्तीनां स्थानत्वासम्भवादिति भावः, भाष्ये - तच्च देहसम्बन्धस्यापुरुषार्थत्वेन भवतीति,

३.२.११

कर्मणां दहयोग द्वारा ैअपुरुषार्थसाधनत्वमित्यर्थः ।। * ।।

३.२.१४

पूर्वसूत्रे निगव्याख्यानेति - अनिगदव्याख्यानेति छेदः अनिगदव्याख्या अस्पष्टार्था नेयार्थेति भावः, निगदः पाठः, पाठमात्रेण यस्य व्याख्यानं नास्ति सा तथोक्ता, नित्यादिसाधारणस्यामृतशब्दस्यनिर्दोषत्वार्थकस्यास्पष्टार्थकत्वात् । अप्रकृतविग्रह इति - अत्र तद्योग्यत्वं विवक्षितमम्, अतःतादात्विकाप्राकृतविग्रहशून्ये जीवे नानुपपत्तिरिति द्रष्टव्यम् ।। * ।। भाष्ये - नामरूपेति, उदा-हृतश्रुतौ नामरूपनिर्वोदुः तत्सम्बन्धा भावः उक्तः, स च बाधितः निर्वाह्यनिर्वाहकभावरूपसम्बन्धस्यैव सत्त्वात्, अतः तत्कार्य-

ब्रह्म निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वरूपोभयलिङ्गमेव ।। १४ ।।

३.२.१७

रूपदुःखेर्ष्यादिसम्बन्धाभावपरा सा श्रुतिरिति भावः । अर्थानुपपत्त्येति - सर्वज्ञस्य सर्वनियुन्तुरीश्वरस्य बुदध्यद्यधीनज्ञानवत्त्वस्य विधिप्रेर्यत्वस्य वा प्रयोजनस्यानुपपत्त्येत्यर्थः । सद्वारकं कर्मवश्यत्वमिति - सर्वज्ञस्यसर्वनियन्तुरपि ज्ञाप्यत्वप्रेर्यत्वादिकं सद्वा-रकमुपपद्यते -इति भावः । अधिकारस्तादर्थ्यबोधनमिति - अधिकारो विनियोग इत्यभियुक्तेः-अधिकुर्वन्ति । विनियुञ्चत इत्यर्थः

३.२.१९

इत्यभिप्रायः, विनियोगो हि व्यापारणम्, कर्मवश्यानेव ब्राह्मणादीन् तदर्थज्ञापनेन व्यापारयन्तीत्यर्थः, आह च - इतरनिषेध-व्यवच्छेदपर इति । सत्यज्ञानादिवाक्यस्य सर्वज्ञत्वादिगुणान्तरनिषेधपरत्वव्यवच्छेदपर इत्यर्थः ।। * ।। अथोशब्दः कार्त्स्न्यपर इत्यर्थ इति - अत्रार्थशब्दोऽभिप्रायपरः, अथो पीति सूत्रे "ओत्' इति प्रगृह्यसंज्ञायां "प्लुतप्रगृह्या अचि' इति प्रकृतिभावः । गुणविशेषनिषेध इति -"निष्कलं निष्क्रियम्'

इत्यवयवक्रियादिरूपगुणविशेषनिषेधे सति निर्गुणमिति सामान्यनिषेधस्य तत्पर्यवसायित्वादिति भावः, न चैवं ब्राह्मणो न हन्तव्य इति निषेधस्यआत्रेयन्न हन्यादिति विशेषनिषेधपर्यवसायित्वं किन्न स्या- दिति वाच्यम्, अत्र गुणविशेषविधायकवचनसत्त्वेनासङ्कोचेन निषेधाप्रवृत्या विशेषपर्यवसानमपेक्षमाणस्य श्रुतेर्गुणविशेषनिषेधे पर्यवसानस्यावश्यकत्वात्, अत एव चोक्तम् । एकस्वभाव इत्यर्थ इति - "आकाशमेकं हीयथा' इत्यादिस्मृतौ पृथक् पृथक्

३.२.२०

संयुज्य वघटादिषु वर्तमानमाकाशं तद्गतदोषाद्यसंस्पृष्टं यथा एकस्वभावमेव भवति, यथा नानाजलाधारेषु प्रतिबिम्बितोंऽशुमान् तथा अनेकस्थोऽप्यात्मा तद्गतदोषास्पृष्टतया एकस्वभाव एव भवतीत्युद्देश्यविधेयभाव इति भावः ।। १७ ।। ।। १८ ।।

तुल्यत्वाभावादिति - तुल्यत्वाभावप्रसङ्गादित्यर्थः, ततश्च सूत्रे न तथात्वमित्यत्र स्यादिति शेषोऽध्याहर्तव्य इत्याचार्याणामभि- प्रायः ।। १९ ।। ।।* ।। भाष्ये - पृथिव्यादिस्थानान्तर्भावादिति - अत्र प्रतीयमानादिति शेषोऽध्याहर्तव्यः, ततश्च प्रतीयमानात् पृथिव्यादिस्थानान्तर्भावाद् यत् प्रसक्तम् -वृद्धिह्रासभाकत्वम्, तन्निवर्त्यत इत्यर्थः, प्रतीतिश्च प्रमाभ्रमसाधारणी, ततश्च घटादि-ष्ववस्थिततया प्रतीयमानस्य वस्तुतोऽसतोऽप्यंशुमतः तद्गतदोषास्पृष्टत्वम्, तथा पृथिव्यादिस्थानस्थिततया प्रतीयमानस्य परमा-

३.२.२१

त्मनः तद्गतदोषास्पृष्टत्वमुपपद्यत इत्यर्थः, एतेनान्तर्भावप्रयुक्तदोषस्पर्शशङ्कायाः तदन्तर्भावशून्यांशुमद्दृष्टान्तेन कथमपनेयत्व- मिति शङ्काप्यपास्ता, तदन्तर्भावप्रतीतिप्रयुक्तशङ्काया एवात्रापनेयत्वात्, तत्र यथाऽन्तर्गततया प्रतीयमानस्यांशुमतो न तद्दोष-भाकत्वमिति दृष्टान्तोपन्याससम्भवाच्च, भाष्ये - द्वे वा व ब्रह्मणो रूपे-इति, अत्र मूर्तशब्देन पृथिव्यप्तेजांसि, अमूमूर्तशब्देन वाय्व-न्तरिक्षे च कथ्यन्ते, उत्तरत्र "तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्च अतोऽभूर्तं वायुश्चान्तरिक्षञ्च' इति श्रवणात् यथा महारजनं वासो यथा - पाण्ड्वाविदिक यथेन्द्रकोपो यथाऽग्न्यचिर्र्यथा पुण्डरीकम्' इत्यादिना आत्मनो मूर्तामूर्तानुभवजनितवासनाजन्य-विज्ञानविषयभूतस्वप्नरूपाणि च उपन्यस्य "अथात आदेशो नेति नेति' इति रूपद्वयमपि प्रतिषिध्य "सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यम्' इति प्राणशब्दोपलक्षितस्य प्रपञ्चस्य व्यावहारिकसत्यत्वमुकत्वा ब्रह्मण एव परमार्थसत्यत्वमुक्तमित्युपसं- हृतम् । वृहदारण्यक इति - अथ स्यादिति भाष्यप्रस्यार्थः ।। * ।। अत्र तु तैर्गुणैः यदेतावत्वमिति समासद्वयमप्यभिप्रेतम्,

३.२.२२

ये ब्रह्मणो विशेषाः प्राकृताः तद्विशिष्टतया ब्रह्मणः प्रतीयमाना इयत्तेति च या ब्रह्मण इयत्ता प्रकृतेति च भाष्ये दर्शनात् उक्तप्रकार-मात्रविशिष्टतया ब्रह्मण इयत्ता प्रकृतेति, ननु गुणानां प्रकृतत्वेऽपि कथं तन्मात्रतन्मात्रगुणकत्वं प्रकृतम्? गुणान्तरनिषेधस्य अशर्ब्दत्वात्' आह च तन्मात्रै इति न्यायविरुद्धत्वाच्चेति चेत् सत्यम्. "सर्वं वाक्यं सावधारणम्' इति न्यायेन गुणान्तरनिषेधविशिष्टतद्गुरणवत्वरूपविशिष्टस्य एतावत्वस्य प्रकृतत्वमभिप्रेत्य तथोकत्युपपत्तेः । एतावदित्येव वक्तव्यमिति - वस्ततस्तु न तदपि वक्तव्यम्, प्रकृतान् प्रतिषेधतीत्येवं चारिताथ्यादिति द्रष्टव्यम् । भूयिष्ठत्वमु- च्यत इति गुणभूयिष्ठत्वमुच्यत इत्यर्थः, ततश्च भूयो भूयो ब्रवीतीति न

क्रियान्वय इति भावः । सार्थसंग्रहमिति - अर्थसंग्रहयुक्तं विषयवाक्यमुपादात्तुं सौत्रं पदं पुनरप्युपादत्ते, अतो न पौनरुक्त्यशङ्का कार्येति भावः । अचेतनजीवव्यावृत्तिरिति - अचेतनस्य

हेत्वन्तरं चाह -

३.२.२६

जडरूपतया स्वरूपतो निकृष्टत्वम्, जीवस्य तु गुणतो निकृष्टत्वमियर्थः ।। ।। इति उभयलिङ्गाधिकरणम् ।।

ननु "द्वे वा व ब्रह्मणो रूपे' इत्यत्र चिदचित्संवलनरूपस्यैव मूर्त्तामूर्त्तशब्दिततया कथं मूर्त्तामूर्त्तात्मकाचित्प्रपञ्चस्येति भाष्योक्ति-रित्याशङ्कय आह - चिदचिदात्मकेत्यादिना । भाष्ये - अहिकुण्डलन्यायेनेति, यथा ह्यहेंरहित्वेनाऽभेदेऽपि कुण्डलभावर्जु-भावरूपसंस्थानविशेषापत्त्या भेदः, एवं ब्रह्मणः स्वरूपेणाभेदेऽपि कार्यप्रपञ्चरूपापत्त्या भेदः, न चाहेर्विश्रान्तिसञ्चारणादिप्रयु-क्तभोगविशेषलाभार्थं कुण्डलभावर्जुभावापत्तिर्भवतीति युक्तम्, ब्रह्मणस्तु सर्वज्ञस्य सर्वशक्तिकस्य ज्ञानानन्दरहिताचित्प्रपञ्चता- पत्तिर्न युक्तेति वाच्यम्, नह्यहिवत् ब्रह्म स्वप्रयोजनार्थं प्रवर्तते, अपि तु प्राणिनामनुग्रहार्थम्, तदनुग्रहश्च भोगानुष्ठानाद्युपयुक्त-प्रपञ्चात्मतापत्त्यभावेन भवतीति तदात्मतां ब्रह्म प्रतिपद्यते । अचिद्धर्मप्रतिषेध इति - अज इत्यादिना जननाद्यचिद्धर्मप्रतिषेध

३.२.२८

इत्यर्थः । पृथगधिकरणत्वे निदानं श्रोतव्यमित्यादि - यद्यपि "अतोऽनन्तेन तथा हि लिङ्ग'मिति सूत्रस्य परमसाध्योपसंहार-त्वप्रतिपादनमुखेन अधिकरणसमाप्तेराविष्करणात् प्रकृतैतावत्त्वमित्यादेः तादर्थ्यानन्तर्याभ्यां न पृथगधिकरणत्वमित्यादेर्वक्ष्य-माणत्वात् तत्रैव सूत्रे अनन्तरशब्देन ततश्शब्दो व्याख्यातः, भूयश्शब्देन भूयिष्ठत्वमुच्यत इति ततोभूयश्शब्दयोर्व्याख्यातत्वाच्च न श्रोतव्यान्तरमवशिष्यते, तथापि तदर्थस्य गहनत्वमभिप्रेत्य तथोक्तमिति द्रष्टव्यम् ।। * ।।

द्वितीये जगत्कारणत्वेति - जातेर्जगत्कारणत्वसर्वज्ञत्वाद्यसम्भवादितिभावः ।।

विशेषणतया यथांऽशत्वं तथेह जीवस्याचिद्वस्तुनश्च ब्रह्म प्रत्यंशत्वम् ।। २८ ।।

३.२.२९

परे त्वित्यादि - अतत्प्रधानेभ्याहि बलीयांसीति । श्रुतिप्रतिपाद्ययोः एकत्वनानात्वयोः एकस्मिन् वस्तुन्यसम्भवात्, अन्यतरस्मिन् समाश्रयणीये एकत्त्वस्य मानान्तराप्राप्तत्वेन विधेयत्वस्य उचिततया एकत्वविधानाय प्रमाणान्तरसिद्धं नानात्वं तदङ्गतयाऽनूद्यत इत्यस्यैवार्थस्योचितत्वात्, भेददर्शने निन्दायाः श्रवणात् साक्षात् भूयसीभिः श्रुतिभिः अभेदप्रतिपादनाच्चाकारवद्ब्रह्मविषयाणाञ्च कासाञ्चित् श्रुतीनान् उपासनारूपत्वं कासाञ्चित् द्वैताभिधायिनीनां "द्वा सुपर्णा' इत्यादिश्रुतीनां बुद्धयुपाध्यस्तकर्त्तृत्वनिषेधमुखेन

३.२.२९

निर्विशेषप्रतीत्युपयोगित्वमिति अतत्प्रधानभेदश्रुतिभ्यः तत्प्रधानानाम् अभेदश्रुतीनां प्राबल्यमित्यर्थः । "तर्हि निषेधप्रपञ्चं ब्रह्म कीदृशं तत्राह' इति क्वचित् पाठो दृश्यते, स तु चिन्तनीयः । "आह च तन्मात्र'मिति सूत्रेणापि निष्प्रपञ्चत्वस्यैव तन्मते प्रतिपि-पादयिषितत्वेन निष्प्रपञ्चत्वं सिद्धवत्कृत्य तत् कीदृशमिति जिज्ञासायां तस्य

सूत्रस्यानवतारात् । पुरश्चक्रे द्विपद इति - पुरः पुराणि द्विपदोपलक्षितानि शरीराणि चक्रे, पुरः पुरस्तात्, चक्षुराद्यभिव्यक्तेः पूर्वमेव, स ईश्वरः पक्षी, लिङ्गशरीरस्य तैत्तिरीयादौ पक्षपुच्छादिसम्पादनात् पक्षीति लिङ्गशरीरमुच्यते, तदभिमानी पुरुष आविशत्-प्रविष्ट इत्यर्थः, ततश्च इयं श्रुतिः "अनेन जीवेन आत्मना अनुप्रविश्य' इत्यादि श्रुतिश्च परमात्मन एव अन्तर्भावादिति पूर्वसूत्रोक्तमुपाध्यन्तर्भावं दर्शयतीति हि सूत्रार्थ इति भावः । अन्यस्य नास्तित्वमिति - ब्रह्मण इति शेषः "न ह्येतस्मादिति नेत्यन्यत्परमस्ती'ति वाक्यम् "नेति नेतीत्यस्य निर्व- चनम्, न हि एतस्मात् ब्रह्मणः व्यतिरिक्तमस्तीत्यतो नेत्युच्यते, न पुनः स्वयमेव नास्तीति कृत्वा नेतीत्युच्यत इति तस्य वाक्य- स्यार्थः । ततश्च यतोन्यत्परं नेतीति प्रतिषिध्यते । तस्य ब्रह्मणः सिद्धमेवास्तित्वमिति न तस्य प्रतिषेध इति भावः । इदं वाक्य- मिति - न ह्यतस्मादिति नेत्यन्यत्परमिति वाक्यमित्यर्थः । अथ नामधेयमिति वाक्यविषयमिति - न ह्येतस्मादिति नेत्य-न्यत्परमस्तीति वाक्यस्य इति नेत्येवंरूपान्यादेशनिषेधपरत्वेन ब्रह्मान्यनिषेधपरत्वाभावेन ब्रह्मपरिशेषकत्वासम्भवात्, अथ नाम-धेयमिति वाक्यस्यैव"ब्रवीति च भूयः' इति सूत्रखण्डविषयत्वम्, तत्र हि वाक्ये सत्यस्य सत्यमिति ब्रह्मणः परमार्थसत्यत्वावेद- नात् । ब्रह्मणोपि सूर्यप्रकाशाद्यवैशेष्यं तत्तुल्यत्वमिति - सूर्यप्रकाशादेरवैशेष्यं सूर्यप्रकाशाद्यवैशेष्यम् अवैशेष्यम्-विशेषरहि

३.२.२९

तत्वम्, अङ्गुल्याद्युपाधिकृतर्जुवक्रत्वादिविशेषरहितत्वमिति यावत्,सम्प्रतिपन्नमिति शेषः, तत्तुल्यत्वं ब्रह्मणोपीत्यन्वयः । सूर्य-प्रकाशादिवत् ब्रह्मणोऽप्यवैशेष्यम्; निविर्शेषत्वम्, उपाधिकृतविशेषराहित्यमित्यर्थः । नतु सौत्रस्यावैशेष्यशब्दस्य तत्तुल्यत्वमि-त्येतद्विवरणमिति भ्रमितव्यम्, परैस्तथा अव्याख्यानात्, प्रकाशादिवदिति वतिप्रत्ययेनैव तुल्यत्वस्य प्रतिपादितत्वेन प्रकाशा- दिवच्च तुल्यत्वमित्यस्यासङ्गतत्वाच्चेति बोध्यम् । अवस्थाभेदादिति - "उभयव्यपदेशा'दिति सूत्रे जीवस्य परमात्मावस्थाभेद- त्वात् संराध्यसंराधकभावाविरोध उपन्यस्तः, "प्रकाशाश्रयवद्वे'ति सूत्रे तु जीवस्य ब्रह्मैकदेशत्वेन तदंशत्वात् संराध्यसरोधक-भावस्समर्थित इत्यर्थः । अर्थान्तरत्वामिति-गन्धविधितन्निषेधश्रुत्योः प्राकृताप्राकृतगन्धविषयत्वेत विषयभेदः अङ्गीकार्य इत्यर्थः ।सार्वज्ञ्यादीनां स्वरूपपरवाक्यसिद्धत्वादिति - "यः सर्वज्ञः सर्ववित्'

इत्यादिवाक्यसिद्धत्वादित्यर्थः, इदमुपलक्षणम्, चतुष्पात्वषोडशकलत्वादीनां "बुद्ध्यर्थः पादवत्' इति न्यायेन उपासनार्थानां व्यावहारिकसत्यत्वाभाववत् सार्वज्ञ्यादीनाम् उपासनार्थत्वे व्यावहारिकसत्यत्वाभावप्रसङ्गाच्चेति द्रष्टव्यम् । अन्यतराप्रमाण्यमेवोक्तं स्यादिति - उक्तं हि-

३.२.२९

को हि मीमांसको ब्रूयात् विरोधे शास्त्रयोर्मिथः । एकं प्रमाणमितरस्त्वप्रमाणं भवेदिति । प्रतिज्ञानुगुणहेतुसिद्धौ तु नान्योन्यश्रय इति - साकारत्वनिराकारत्वरूपोभयलिङ्गत्वप्रतिषेधस्य साध्यत्वे निश्चिते तदानुगुण्येन सर्वत्र निर्विशेषप्रतिपादनस्यैव हेतूकर्तुमु-चितत्वेन योगैयतावशेन तस्यैवाध्यहारो युक्त इति भावः । एकत्वेन निर्देश इति - सदसत्त्ववदिति भावः । अतद्वचनत्वं च तदु-दाहृतश्रुतौ नास्तीति - यद्यपि "यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुराणः, यश्चायम्, अध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुराणः, अयमेव सोऽयमात्मे'ति प्रत्युपाधिभेदवचनेनाभेदवचनत्वरूपमतद्वचनतत्वमस्त्येव, तथापि न तावता निर्विशेषत्वसिद्धिः, न हि सर्वत्रावस्थितस्य ब्रह्मणः एकत्वमात्रेण शास्त्रप्रतिपादितानां तेजोमयत्वादीनां मिथ्यात्वसिद्धिरिति भावः । निर्विकारत्वा-नन्दरूपत्वेति - एतत् द्वयमप्यमृतमयशब्दफलितमिति भावः । अरूपवदित्यत्र वच्छब्दवैयर्थ्यमिति - मतुप्प्रत्ययवैयर्थ्यमिति भावः, न विद्यते रूपमस्येति बहुव्रीहिणैव मत्वर्थस्योक्तत्वात् उक्तार्थानामप्रयोग इति न्यायेन

मतुप्प्रत्ययो व्यर्थ इति भावः । यद्यपि "उगवादिभ्यो यत्' इत्यत्र महाभाष्ये अनरवन्तिचक्राणीति प्रयुक्तं, तथापि यत्र बहुव्रीहिमत्वर्थयोःतुल्यार्थत्वं तत्र बहुव्रीहिरेव लाघ-वात् भवति, यथा अगुः-अनश्व इति, नतु- अगोमान् अनश्ववानिति भवति, यत्र त्वतुल्यार्थत्वं तत्र कृते मत्वर्थीयतदन्तेन नञ्समासः, यथा अहस्तीति, नह्यहस्त इत्युक्ते जातिपर्युदासप्रतीतिः, यत्रापि मत्वर्थीयेनार्थविशेषप्रतीतिः, यत्रापि तदन्तेन नञ्समासः, यथ अदण्डी अक्षत्री अवाग्मीति, दण्डछत्रसंयोगनिषेधस्य सम्यग्भाषितत्वनिषेधस्य च बहुव्रीहेरनवगमात्, अत एव कैयटे "उगवादिभ्यः' इत्यत्र अनराणीति वक्तव्ये जातिविशेषप्रतिपत्यर्थो मतुबनिर्देशः, अनराणीति ह्युक्ते भग्नाराण्यपि चक्राणि प्रतीयेरन् तस्मात् अरवत्पर्युदासेन अनुपजातारचक्रप्रतीतिः-अनवरन्तीत्यनेन भवतीति अर्थविशेषसत्वात् मतुब् निर्देशः उपपादितः, अत्र तु अर्थभेदाभावात् मतुप्प्रत्ययो दुर्लभ इति भावः । तात्पर्यलिङ्गावगमाच्चेति - सद्विद्यायां सविशे-षत्व एव षड्विधतात्पर्यलिङ्गस्य प्रथमे सूत्र एव समर्थितत्वादिति भावः । औपाधिकाकारयोगे दृष्टान्तत्वादिति - ततश्च

३.२.२९

प्रकाशवच्च औपाधिकाकारयोग इत्येव सूत्रं स्यादिति भावः । आस्त्रीबालं प्रसिद्धत्वादिति - यद्यपि स्वपक्षेऽपि समानोऽयं दोषः, तथापि स्वपक्षे पृथिव्यादिस्थानानवस्थितिपर्यन्तत्वात् आक्षेपस्य तस्यच अवश्यपरिहरणीयत्वाच्च तत्परत्वे न दोष इत्यभिप्रायः । चिह्नपर्या यत्वाच्चेति - नचात्र लिङ्गशब्दस्य अन्यार्थदर्शनरूपलिङ्गपरत्वात् श्रुतेश्च तादृक्त्वसम्भवात् न दोष इति वक्तुं शक्यम्, उक्तार्थसाक्षात् प्रतिपादकस्य "ब्रह्मवेद ब्रह्मैव भवती'त्यस्यान्यार्थदर्शनरूपलिङ्गत्वाभावादिति भावः । प्रकाशादिवदिति सूत्रस्य तत्प्रयुक्तजीवभेदव्युदासकत्वाभावादिति - तथात्वे हीदं सूत्रद्वयं मतान्तरोपन्यासपरं स्यात्, तस्यैव निराकृतत्वादिति भावः ।

३.२.२९

अपरे त्वित्यादि - स्वाप्नाद्यवस्थानां प्रकृतत्वादिति । ननु भाष्ये "भेदादिति चेति'ति सूत्रे देवादिदेहयोगरूपावस्थाभेदादित्ये-वोक्तम्, न तु स्वप्नाद्यवस्थाभेदादिति चेन्न, तत्र स्वप्नाद्यवस्थदेहयोगरूपावस्थाभेदस्यैव विवक्षितत्वेन दोषाभावादिति भावः । अन्ये त्वित्यादि - मधुविद्या वाक्य इति । वृहदारण्यके मधुविद्यावाक्ये "यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चा-

३.२.२९

यमध्यात्म'मित्यादिभिर्वाक्यैः प्रतिपर्यायमेकत्ववचनादित्यर्थः, "न स्थानतोऽपी'त्यारभ्य "अरूपवदेव ही'त्यन्तं ब्रह्मस्वरूपाभेद-प्रतिपादनपरमेकमधिकरणं, "प्रकाशवच्चावैयथ्यर्'मित्यारभ्य "प्रकृतैतावत्व'मित्यतः प्राक् ब्रह्मणो दीप्तिमत्ताप्रतिपादनपरमेकमधि-करणं, "प्रकृतैतावत्व'मित्यारभ्य "उभयव्यपदेशा'दित्यतः प्राक् रूपद्वयातिरिक्तं ब्रह्मेति सिद्धान्तयन्ति, "उभयव्यपदेशा'दित्या- रभ्य "परमतस्सेतून्माने'त्यतः प्राक् ब्रह्मजगतोरहिकुण्हलन्यायेन अत्यन्ताभिन्नतया उपादानोपादेयभावः, ईश्वरस्य तु निर्विकार- त्वात् तस्य जगतश्च मणिप्रभयोरिव शक्तिमच्छक्तिविक्षेपरूपेण उपादानोपादेय भाव इति वर्णयन्ति । व्रवीति च भूयोऽपीत्युपपाद-

३.२.३०

नादिति । व्रवीति च भूय इत्यस्य सूत्रखण्हस्य पूवोक्तार्थोपपादकत्वमभ्युपगच्छता तेन खण्डेन तदुपपादनार्हं तस्यैव "प्रकृतैतावत्वं हि प्रतिषेधती'ति सूत्रखण्हऽप्रतिपाद्यत्वस्य वक्तव्यतया "व्रवीति च भूय' इति निर्दिष्टस्य सत्यमिति वाक्यार्थस्य रूपद्वयनिषेधेन प्रपञ्चातिरिक्तकारणरूपास्तित्वस्य च उपपाद्योपपादकत्वायोगादित्यर्थः ।। ।। इति अहिकुण्डलाधिकरणं ।।

३.२.३१

उभयलिङ्गात् ब्रह्मण इति - यद्यप्येतदधिकरणपूर्वपक्षदशायां नोभयलिङ्गत्वं ब्रह्मणः सुप्रतिष्ठितं, उभयलिङ्गस्थेमार्थत्वादस्याधि-करणस्य, तथापि पूर्वपक्षस्य अतिमन्दत्वात् उभयलिङ्गत्वं सिद्धवत्कृत्य एवमुक्तं, अत एव भाष्ये-कैश्चिद्धेत्वाभासैराशंक्येत्यु- क्तमिति द्रष्यव्यम्, भाष्ये-चतुष्पात् ब्रह्मेति, षोडशकलब्रह्मविद्यानां हि ब्रह्मणश्चत्वारः पादा निरूपिताः "प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कला उदीची दिक्कला एष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम । पृथिवीकलान्तरिक्षं कला द्यौः कला समुद्रः कला एष वै सोम्य चतुष्कलः पादो ब्रह्मणः अनन्तवान्नाम, अग्निः कला सूर्यः कला चन्द्रः कला विद्युत् कला एष वै सोम्य चतुष्कलः पादो ब्रह्मणः ज्योतिष्मान्नाम, प्राणः कला चक्षुष्कला श्रोत्रं कला मनः कला एष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवान्नामे'ति, गवां पादेषु पुरस्तात् द्वौ खुरौ पश्चात् द्वौपार्ष्णी' इत्येकैकस्मिन् पादे चत्वारश्चत्वरोखुरांशास्सन्ति, ते कला शब्देन उच्यन्ते, प्राची प्रतीची दक्षिणोदीची दिगिति चतस्त्रः कलाः अवयवा इव कलाः स प्रकाशवान् प्रथमः पादः, तदुपा-सनायां प्रकाशवान् उपासको भवती'ति प्रकाशवान् पादः, पृथिव्यन्तरिक्षं द्यौस्समुद्र इति चतस्त्रः कलाः एष द्वितीयः पादोऽन-न्तवान्नाम, सोऽयमनन्तवत्वेन गुणेनोपास्यमानोऽनन्तवत्वमुपासकस्यावहतीति अनन्तवान् पादः, अग्नि-स्सूर्यश्चन्द्रो विद्युदिति चतस्त्रः कलाः स ज्योतिष्मान्नाम तृतीयपादः, तमुपासीनो ज्योतिष्मान् भवतीति ज्योतिष्मान् पादः, प्राण-श्चक्षुः श्रोत्रं मन इति चतस्त्रः कलाः चतुर्थः पादः आयतनवान्नाम, तदुपासनादायतनवान् भवतीत्यायतनवान्नाम पादः, तदेवं चतुष्पाद् ब्रह्म अष्टा-

३.२.३२

शफं षोडशकलं , भाष्ये -अनुन्मितस्यास्तितां द्योतयतीति, नन्वेतस्योन्मितत्वमात्रेण तत्प्राप्यस्य कथमनुन्मितत्वं, नह्युन्मितेन

मृद्दार्वादिप्रचयात्मकेन सेतुना प्राप्यस्य प्रदेशान्तरस्यानुन्मितत्वमस्तीति चेत्-मैवं,यत्प्राप्यं मोक्षशास्त्रेषु अपरिमितं प्रसिद्धं, तस्यानेन सेतुना प्राप्यत्वरूपभेदेनास्तितां द्योतयति, चतुष्पात्त्वादीनामनुन्मितत्वात् ब्रह्मणो वेदान्तप्रसिद्धादनुन्मितात् प्राप्यात् भेदोऽवसीयत इति पर्य्यवसितोऽर्थ इति भावः ।। * ।। भाष्ये-सेतुसामान्येनेति, अत्र सामान्यशब्दो भावप्रधानः, सर्वलो-कासङ्करकरत्वस्य "एषां लोकानामसम्भेदाये'ति श्रुत्रौ साधारणधर्मत्वेन श्रवणात् तद्गुणयोगेन तत्र सेतुशब्दो गौण इत्यर्थः ।। * ।। भाष्ये-पादोऽस्य विश्वाभूतानीति, अत्र पादस्यांशपरत्वेन स्वरूपोपदेशपरत्वात् बुध्यर्थत्वोक्तिः प्रौढिवादेनेति द्रष्टव्यम् । भाष्ये-ब्रह्मणो वागादिपादव्यपदेश उपासनार्थ इति, ब्रह्मप्रतीकस्य मनस आकाशस्य वावागादिपादव्यपदेश उपासनार्थ इत्यर्थः । एवं हि श्रूयते-"मनो ब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशो ब्रह्मेत्युभयामादिष्टं भवत्यध्यात्मञ्चाधिदैवतञ्चे'ति । "तदेतत् चतुष्पाद्ब्रह्म वाक् पादः प्राणः पादश्चक्षुः पादः श्रोत्रं पाद इत्यध्यात्ममथाधिदैवतम्-अग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इत्युभय-मादिष्टं भवत्यध्यात्मञ्चावाधिदैवतञ्श्चे'ति, तदेतत् चतुष्पाद् ब्रह्म, तदेतन्मान आस्यं ब्रह्म

चतुष्पात् चत्वारः पादा अस्येति, कथं चतुष्पात्त्वं मनोरूपस्य ब्रह्मण इत्यत आह - वाक्पाद इत्यादि । मनो हि वक्तव्यघ्रातव्यद्रष्टव्यश्रोतव्यान् गोचरान्

वागादिभिस्सञ्च-

रत इति सञ्चरणसाधनतया मनसः पादाः, आकाशस्य ब्रह्मप्रतीकस्य अग्निर्वायुरादित्योदिश इति चत्वारः पादाः, ते हि व्यापिनो

नभस उदर इव गोः पादा विलग्ना उपलक्ष्यन्त इति भावः ततश्च अध्यात्मब्रह्मप्रतीकस्य मनस अधिदैवतब्रह्मप्रतीकस्य चाकाशस्य वा वागादिपादत्वव्यपदेशो यथा वस्तुतः मनस आकाशस्य वा वागादिपादत्वासंभवाद् उपासनार्थः तथा ब्रह्मणोऽपि चतुष्पात्वषो-डशकलत्वाद्युपदेश उपासनार्थ इति भावः ।। निखिलजगत्कारणस्येश्वरस्येति - निखिलजगत्कारणेश्वरप्रतीकस्य मनस आका-

३.२.३५

शस्य वेत्यर्थः ।। * ।। तत्रैवेति व्याख्येयं पदम् - समाधिकनिषेधः कृतस्स्यादिति । अयमेव सर्वस्मात्परः, अतोऽन्यः सर्वस्मात् परो नास्तीत्युक्तेः समाधिकनिषेधः सिध्यतीत्यर्थः । परत्वेन विवक्षितेति - अपरं परभूतरुद्रव्यतिरिक्तं यस्मात्परं नास्तीत्यर्थः । अपरशब्दाभावे हि रुद्रस्यापि परत्वनिषेधप्रसङ्गः, अतोऽपरशब्दास्यार्थत्वमिति भावः । अनन्यथासिद्धसङ्कोचकाभावादिति - अपर-शब्दस्य यस्मादिति श्रुतपञ्चम्यन्तपदान्वयेन एव समाभ्यधिकनिषेधकतया सप्रयोजनतसंभवेनान्यथा सिद्धत्वेनापरशब्दो न सङ्कोचक

३.२.३६

इति भावः । तस्यान्यथासिद्धिः कथमित्याहेति - अन्यथासिद्धिं वक्तुं प्रश्नमवतारयतीत्यर्थः, अतो निधायेति वत्वाप्रतिपाद्यनिधा-नसमानकर्तृकत्वोपपत्तिरिति द्रष्टव्यम् ।। * ।। उपपत्तेश्चेति सूत्रार्थमाह - ईदृश इति । नह्यनपायिना स्वरूपेण सम्बन्धः संयोगादि-

३.२.३७

र्भवितुमर्हति, अपि तु भेदोपशमरूप एवेत्यर्थः । न हि कारणमेवेति - यदि हि कारणमेव सेतुः, कार्यमेव तत्प्राप्यमिति नियमस्-स्यात्, तदा सेतुवत्-प्राप्यभेद साधकस्य कायर्कारणभेदसाधकत्वमपि भवेत्, न त्वेतदस्तीतिभावः । तस्य भेदरूपत्वाभावा- दिति -सर्ववस्तुसामानाधिकरण्यानर्हत्वस्यैव वस्तुपरिच्छेदरूपत्वादित्यर्थः । अन्यथा ईश्वरद्वयप्रसङ्गादिति - अन्यथा स्वरूपभेदाभ्युपगम इत्यर्थः ।। ।। इति पराधिकरणम् ।।

पुरुषस्य निर्दोषत्वं, कल्याणगुणाकरत्वं, सर्वस्मात्परत्वं च । अतः परमुपासनं विवक्षन्नुपासीनानां परस्मा-

देवास्मात्पुरुषात्तत्प्राप्तिरूपमपवर्गाख्यं फलमिति संप्रति ब्रूते । तुल्यन्यायतया शास्त्रीयमैहिकामुष्मिकमपि फलम् अत एव परस्मात्पुरुषाद्भवतीति सामान्येन "फलमतः' इत्युच्यते ः कुत एतत्? उपपत्तेः- स एव हि सवर्ज्ञः सर्वशक्तिर्महोदारो यागदानहोमादिभिरुपासनेन चाराधित ऐहिकामुष्मिकभोगजातं स्वस्वरूपा-वाप्तिरूपमपवर्गं च दातुमीष्टे; न ह्यचेतनं कर्म्म क्षणध्वंसि कालान्तरभाविफलसाधनं भवितुमर्हति ।। ३७ ।।

३.२.३८

सर्वस्मात् परत्वं प्राप्यत्वमिति पाठो दृश्यते, तस्यायमर्थः-प्राप्यत्वोपयुक्तं सर्वस्मात् परत्वं तत्कल्याणगुणान्तर्भूतमपीति आयु-र्घृतमितिवत् अभेदोपचारात् सामानाधिकरण्यनिर्देशः । तच्च कल्याणगुणगण इति - अन्तर्भूतमितिशेषः, समूहसमूहिनोरभे-दोपचाराद्वा सामानाधिकरण्यनिर्देशः कल्याणगुण इति पाठे तु नानुपपत्तिः । अत्र तु द्वारविशेषो निरूप्यत इति भिदेति - अतो न पूर्वोत्तरविरोधः, तत्र धर्मस्य द्वारतायाः कण्ठतोऽनुक्तेरितिभावः । उत कर्मोपासनाराधितादित्यादि - अत्र कर्माराधि- तत्वं-वाय्वादिदेवतारूपस्य, उपासनाराधितत्वं केवलस्य ब्रह्मण इति योग्यतावशेन यथाक्रमेण सम्बन्धः, यथा शीतोष्णस्पर्शगु- णकं जलं तेजश्च, इति निर्देशे इति द्रष्टव्यम् । भाष्ये-नह्यचेतनं कर्मेति, अयं भाव, किं कर्मजनितस्यापूर्वस्य फलसाधनत्वम्? उत कर्मण एव तावत्पर्य्यन्तमवस्थतायित्वम्? उत फलस्यापि कर्मानन्तरमेवोत्पत्तिः? इत्यभ्युपेयते, उत विनष्टस्यैव कर्मणः कार्यजनकत्वमिति चतुर्धाविकल्पमभिप्रेत्य प्रथमं दूषयति, भाष्ये-नह्यचेतनमिति,

यद्यदचेतनं तत्सर्वं चेतनाधिष्ठितमेव प्रवर्त्तत इति प्रत्यक्षागमा-भ्यामवधारितत्वात् नापूर्वस्य फलहेतुत्वमित्यर्थः । द्वितीयं दूषयति - कर्म क्षणध्वंसीति । तृतीयं दूषयति - कालान्तरभावीति ।

३.२.४०

अधुना स्वर्गोत्पत्तेः बाधितत्वादितिभावः । चतुर्थं दूषयति - भवितुमर्हतीति । विनष्टस्यापि कार्यजनकत्वे अतिप्रसङ्गः स्यादिति भावः ।। * ।। भाष्ये-कृप्यादिकं गात्रर्दनादिकं चेति, गात्रमर्दनादिकं साक्षात् सुखहेतुः, कृप्यादिकं तु परम्परया, शास्त्रं दर्श- यति-एवं वेदेऽपीति, क्वचित्पठ्यते स तु न समीचीनः, शास्त्रं दर्शयति, तथा यजेतेति पठ्यते, अयं तु पाठः समी- चीनः ।। * ।। अपयोरणशतयातनासाध्यसाधनभावेति - अपगोरणं-वदोद्यमः, शतयातना-नरकविशेषः, "यो ब्राह्मणायाप- गुरेत् तं शतेन यातया'दित्येतद्धि तस्मात् "ब्राह्मणाय नावगुरेत' इति निषेधविधेरर्थवादः, तत्र च"हेतुहेतुमतोर्लिङ्' इत्यनुशासन-बलात् अपगोरणशतयातनयोः साध्यसाधनाभावस्य अर्थवादप्रतिपन्नस्य स्वीकारादित्यर्थः । शर्कराञ्जनद्रव्यपशुविशेषादीति - अत्र विशेषशब्दश्शर्कराञ्जनद्रव्येणापि सम्बध्यते,"अक्ताः शर्करा उपदधाति' इत्यत्र शर्कराञ्जनसाधनद्रव्याकांक्षायां "तेजो वै घृत'मिति स्तुतस्य घृतस्यैवाञ्जनसाधनत्वेन स्वीकारात्, तथा "पशुना यजेत' इति सामान्यश्रुतस्य विशेषाकांक्षायां "छागस्य वपाया'मिति मन्त्रवर्णप्रतिपाद्यस्य छागरूपविशेषस्य च स्वीकारादित्यर्थः । देवतानामपि फलदत्त्वमस्त्विति - कर्मोपासना-

३.२.४०

राधितस्य प्रसन्नस्य फलदत्त्वपक्षेऽपि कर्मानुष्ठानानन्तरमेव प्रसादः वक्तुं न शक्यते, परमस्वतन्त्रस्य प्रसादे सति फले विलम्बायो- गात्, प्रयाजादिभिरङ्गैः तदनुष्ठानानन्तरमेव प्रसादे सति प्रधाननानुष्ठानेऽप्यङ्गान्तरवैकल्येऽपि फलनिष्पत्तिप्रसङ्गाच्च, तस्मात् कर्मान्तरमपूर्वे निष्पादिते तस्य परिपक्वतया फलजननौन्मुख्यदशायामीश्वरस्य प्रसादो वक्तव्य इति भावः, भाष्ये-प्रामाणिका न सहन्ते इति, न च देवताप्रसादहेतुत्वपक्षेऽप्यपूर्वस्यापि द्वारत्वमकामेनापि स्वीकार्यमिति वाच्यं, भोजनादिना राजानमाराधायत्सु पुरुषेषु भोजनाङ्गभूतासनविशेषसमर्पणाद्युपचारैः प्रीतिविशेषस्योत्पादनवत्, प्रयाजादिमिरपीश्वरे प्रीतिविशेषस्य फलप्रदानहेतु-

३.२.४०

भूतप्रीतिविशेषसम्पादकस्य उत्पत्तिसम्भवेन जीवसमवेताङ्गापूर्वकल्पने प्रमाणाभावादिति भावः ।। * ।। विग्रहाद्यभावमिति । आदिशब्देन तृप्तिप्रसादादयो विवक्षिताः । उपबृहण सिद्धत्वादिति । न तु ध्यान वत् मोक्षसाधनत्वादिति भावः ।

।। इति फलाधिकरणम् ।। ८ ।।

इति दशोपनिषद्भाष्यकारैः श्रीरङ्गरामानुजमुनिभिर्विरचितायां श्रुतप्रकाशिकाव्याख्यायां

भावप्रकाशिकायां तृतीयस्याध्यायस्य द्वितीयः पादः ।।

समुदिताधिकरणसङ्ख्यां - ८२ - सनुदितसूत्रसङ्ख्या - ३५४ ।।

Third Pada

२.३.१

अयमर्थ इति - संगतिरित्ययमर्थ इत्युत्तरत्रान्वयः । कार्यविषये परोक्तेति - यद्यपि परस्परविरोधेन वेदान्तानामप्रामाण्यशङ्का परेषामिव वियत्प्राणाधिकरणेषु पूर्वपक्षत्वेन उद्भाव्यते, कार्यताप्रकारविरोधसमाधानमात्रपरत्वात्, तथा वियदनुत्पत्त्यादि-पूर्वपक्षोद्भावनपूर्वकं वियदुत्पत्त्यादिश्रुतीनां स्वार्थसमन्वये स्थूणानिखननन्यायेन साधिते सति विप्रतिषेधेन निरस्तानां सांख्यानां हृदि विपरिवर्तमानानां वेदान्तेष्वपि विप्रतिषेधप्रतिवन्दी दूरनिरस्ता भवति, अत एव विरोधाध्यायसंगतिरपि सिद्धा भवतीतिभावः । सूत्राभिप्रायविवरणमिति - न तु श्रुतिशब्दस्य श्रवणार्थत्वप्रतिपादनपरमितिभावः । श्रुतिनिर्देशस्वार

२.३.२

स्यादिति - गौणत्वस्य शब्दधर्मत्वेन प्रमितधर्मत्वाभावादितिभावः । निरवयवत्वस्यानित्यगुणसाधारणतया तत्रानैकान्त्य-परिहाराय द्रव्यत्वा-दित्युक्तम्, नचास्य हेतोरसिद्ि्थः, क्वचिदपि तदभावस्य बुद्धावारोहासम्भवात्, अत्र वियत् नास्तीति निषेधस्य व्याहतत्वात्, "आकाशे चाविशेषात्' इति वैभापिकाधिकरणसूत्रे - इहेतिप्रत्ययवेद्यो देश आकाश इति व्यवस्थापितत्वात्, न च हेतोरप्रयोज्क-त्वम्, निरवयवस्य सवगतस्य समवाविकारणाद्यनिरूपणादितिभावः । तैत्तिरीयकतर्कविरुद्धेति - तैत्तिरीयकगततर्कविरुद्धेत्यर्थः ।। * ।। अस्तीति श्रुतिस्साधकतयेति - अस्तीत्यस्मिन्नर्थे श्रुतिः साधकतयेत्यर्थः । उत्पत्तिप्रमितिजननहेतुरेवेति - मानान्तरागोच-रत्वस्य श्रौतत्वानुगुणत्वादित्यर्थः । प्रत्यक्षसिद्धत्वमात्रेणेति - मानान्तरसिद्धत्वमात्रेणेत्यर्थः । प्रत्यक्षमनुमानं वेति - शब्दोऽद्रव्यातिरिक्तद्रव्याश्रित इत्यनुमानं वेत्यर्थः । अनुमानान्तरञ्चेति - आकाशं नित्यं निरवयवद्रव्यत्वादित्यनुमानान्तरमित्यर्थः । ननु सर्गाद्यसमयादच्छिन्नाकाशस्य पक्षीकारे तु तस्य श्रुत्यैकसमधिगम्यतया तस्यानुत्पत्तिसाधने धर्मिग्राहकमानविरोधः, आमाशमात्रपक्षीकारे तु धर्मिग्राहकमानबाधस्य कः प्रसंग

२.३.४

इत्यस्वरसादाह - निरवयवत्वहेतोर्महदादिष्विति । निरवयवत्वहेतोरिति -निरवयवद्रव्यत्वहेतोरित्यर्थः । संयोगविशेषवचनाच्चेति -निरवयवस्य संयोगाभावादितिभावः । सर्वगतद्रव्यत्वहेतोरिति - सर्वगतत्वादित्युक्ते नैयायिकमते प्रमेयत्वादिप्रत्यासत्तिजन्य-ज्ञानस्य सर्वगोचरत्वेन सर्वगततया तस्मिन् व्यभिचाराभावार्थं द्रव्यत्वादिति

वाच्यमिति भावः ।। "तपसा ब्रह्मेति तपसा ब्रह्म विजिज्ञासख" इति वाक्ये ब्रह्मशब्दो मुख्यः, तपो ब्रह्मेति वाक्यशेषे तु ब्रह्मज्ञानसाधनत्वेन गौण इति भावः । मुख्यामुख्यविष- यतत्वाभावादिति - "अन्वयादिति चेत्स्यादवधारणात्' इत्यत्र अन्नमयादिषु आत्मशब्दा अपरमात्मबुध्द्या नोपचारतः प्रयुक्ताः, अपि तु परमात्मबुद्धयैव, "अन्तः प्रविष्टः शास्ताजनानाम्' इति तत्तदन्तः प्रवेशेन नियन्तृत्वामात्मत्वम्, तत्र प्राणमये अन्न-

२.३.६

मयात् अन्तरात्मत्वमात्रेण परमात्मत्वबुद्धिः जाता, तस्यापि अन्तरदर्शनेन तत्रापि परमात्मबुद्धिर्जाता, पूर्वत्र तु निवृत्ता; यस्यादन्यदन्तरं नास्ति र्सक्षणादिकञ्च श्रुतम्, तस्मिन् परमात्मबुद्धिः आत्मबुद्धिश्च प्रतिष्ठिते, एवञ्च पूर्वत्रापि परमात्मबुद्धि-विषय एव आत्मशब्दप्रयोगात्, सर्वेष्वपि पर्य्यायेषु आत्मशब्दः परमात्मविषय एव, न तु औपचारिक इति वक्ष्यमाणत्वात्, तत्र्यायेन " अन्नं ब्रह्म" इत्यत्र ब्रह्मशब्दस्यापि ब्रह्मबुद्धया प्रवृतत्वान्न भाक्तत्वम्, यथा शुक्तौ रजतबुद्धया प्रयुज्यमानस्य रजतशब्दस्य नौपचारिकत्वं तथेत्यर्थः । उभयत्रापि समाधिभङ्ग इति - अनुपङ्गश्रवणावृत्त्योः वृत्तिद्वयविरोधरूपसमयभङ्गः कार्य इत्यर्थः ।। * ।। ।। कार्यतयैवाव्यतिरेको विवक्षित इति भाव इति ।। ननु नित्यविभूत्यादीनामकार्यत्वेऽपि प्रतिज्ञया अहानिवत् आकाशस्य अकार्यत्वेऽपि प्रतिज्ञाया अहानिर्न प्रसज्यते, न च "येनाश्रुत"मित्यादौ अश्रुतादिशब्दा नित्यविभूतिव्यतिरिक्त-पराः, उत्तरत्र "सदेव सोभ्येदमग्र आसीत" इति इदङ्कारगोचरस्यैव ततः पूर्वसन्मात्रतापक्षिप्रतिपादनादिति वाच्यम् । इदंशब्द- स्य प्रत्यक्षादिप्रमाणोपस्थापिरसर्ववस्तुपरामर्शतया नित्यविभूत्यपरिग्रहे बीजाभावात्, इतरथा अतीन्द्रियपदार्थानां सर्वविज्ञा-नप्रतिज्ञाविषयत्वं न स्यात्, ततश्च त्यक्तव्यम्वा नित्यविभूतीनां नित्यत्वम्, स्वीकर्त्तव्यम्वा आकाशस्यापि नित्यत्वमिति

२.३.९

न, अस्य दोषस्य सर्वैरपि समाधेयत्वात्, इतरथा अविद्यावद् आकाशस्यापि अनाद्यध्यस्ततया अजन्यत्वमस्तु, ब्रह्माव्यति-रेकेऽपि तद्वदेव उपपद्यत इत्युक्तौ समाधानस्य मृग्यत्वात्, न च कल्पतरौ - "तथा प्राण"इत्यत्र प्राणानामविद्यावद् अनाद्य-ध्यस्तत्वे साक्षिण्यव्यवधानात् सुपुप्तावपि उपलम्भप्रसङ्गः इत्युक्तम्, तत्र्यायादत्रापि सपुप्तावपि उपलम्भप्रसङ्ग इति वाच्यम् । अनाध्यद्यस्तेश्वरवत् उपपत्तेः, जीवान्तराविद्यावदनुपलम्भोपपत्तेश्चानन्यथासिद्धप्रमाणवलात् अविद्याजन्यत्वमभ्युपगन्त- व्यम्, आकाशे न तथा, प्रत्युत्पत्तिश्रुतिरेववर्तत इति, यदि तर्हि प्रकृतेऽपि नित्यविभूतावपि समानमेतत्' । अवान्तरसाध्य-विषयहेतुभेदानामिति - "असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषाद् युक्तेः शब्दान्तराच्च" इत्यादाववान्तरसाध्यविषयत्-

२.३.९

वात्,असमस्तपदोपात्तहेतूनामप्येकसूत्रप्रतिपाद्यत्वं दृष्टं परमसाध्येऽपि समस्तपदोपात्तहेतूनामेकसूत्रप्रतिपाद्यत्वं दृष्टम्, "कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवञ्च" इत्यादिप्विति भावः । इदञ्च चशब्दाभावस्थल इति द्रष्टव्यम्, तेन "वाङ्मनसि दर्शनाच्छब्दाच्च" उपादानाद्विहारोपदेशाच्च" इत्यादौ परमसाध्ये असमस्तपदोपात्तहेनूनामपि एकसूत्रप्रतिपा- द्यत्वं दृश्यत इति न चोदनीयम् ।। * ।। ननु कार्य्यत्वं सिद्धवत्कृत्य

कथं विभागशब्दिता उत्पत्तिः समर्थ्यते । विकारशब्दि-तकार्यत्व एव विवादादितरथा उत्पत्तावप्यविवादादिति चेत् न, छान्दोग्ये क्वचिद्विकारेषु उत्पत्तिवादाभावस्य गतिप्रदर्शन-भावपरत्वेनाऽददोषात् । परे त्वित्यादि - परमसाध्यत्वाभावादिति । विप्रतिषेधमात्रस्य स्वतोऽनिष्टत्वाभावेन तस्यैव पूर्वपक्ष-पर्य्यवसानभूमित्वाभावादित्यर्थः । न विप्रतिषेधमात्रं पूर्वपक्षितम्, नाप्युत्पत्तिसिद्धान्त्येकदेशिनतं कृत्वेति पाठः, यद्यपि कल्पतरौ - एवमध्यायपरिसमाप्तेः प्रथमं विप्रतिषेधादप्रामाण्येन पूर्वपक्षः, तत एकदेशिमतेन व्याख्या ततः सिद्धान्त इति दर्श-नीय इत्युक्तम्, तथापि तस्य ग्रन्थस्याधुनिकत्वात् तन्नोद्धाटितामिति द्रष्टव्यम् । हेतुतया उपन्यासोऽनुपपन्न इति - ननु वाच-स्पतिना तैत्तिरीयके वियदुत्पत्तिश्रुतिः यद्यप्यस्ति, तथापि तस्याः प्रमाणान्तरविरोधात्, बहुश्रुतिविरोधाच्च गौणत्वम्; ततश्च

२.३.९

मुख्यार्थश्रुत्यभाव एवाश्रुतेरित्यस्यार्थः, ततश्च "वियदश्रुतेः' "गौण्यसम्भवात्, शब्दाच्च, स्याच्चैकस्य ब्रह्मशब्दवत्' इति सूत्रचतुष्टयमपि सिद्धान्त्येकदेशिमतमस्त्विति पूर्वपक्षसूत्रम्, तस्य च आकाशसृष्टिप्राथभ्यपअतिपादकं तैतिरीयके, तेजस्सृ-ष्टिप्राथम्यप्रतिपादकञ्च छान्दोग्येऽस्ति, अतः श्रुत्योः परस्परप्रतिषेध इति व्याख्यातमिति चेत्, सत्यं व्याख्यातम्, तत्तु

२.३.९

शाङ्करभाषेयविरुद्धमिति भाष्टाभिमतयोजनयैव दूषितमिति द्रष्टव्यम् । पृथक् परिहरणीयत्वाभाताच्चेति - ननु "वायुश्चान्तरिक्ष-ञ्चैतदमृतम्' इति उभयसाधारण्येन अमृतत्वमुक्ता पुनः वायोः विशिेष्योच्यते "सैषाऽनस्तमिता देवता यद्वायुः' इति अतो-ऽभ्यासाद्वायोरमृतत्वं विवक्षितमिति ज्ञायते, अभ्यासे भूयस्त्वमर्थस्य भवतीति न्यायात्, अधिकाशङ्काव्यवृत्यर्थमतिदेशाधि-करणमेवास्तु, नतु पृथभ्योगकरणमुत्तरार्थमिति सामाधानं युक्तम्, तेनसि विशेषपक्षपाताभावात् "तेजोऽतस्तथाह्याह' इत्- येव वूत्रयितव्यम्' अहङ्कारस्तथेत्याहेति वा वक्तव्यम् । महदहङ्कारादीनामपि तन्मिन्नधिकरणे विषयत्वस्य भाष्य एव वक्ष्य-माणत्वात्, अतः पृथग्योगकरणमुत्तरार्थमिति नातीव युज्यत इति चेत् सत्यम्, महदहङ्काराकाशवाय्वादिसाधारणावेव पूर्वो-

२.३.१०

त्तरपत्तौ, तथापि "तदैक्षत तत्तेजोऽसृजत"इति बहुभवनसङ्कल्पपूर्वकसृष्टेः स्फुटप्रतिपादनेन सिद्धान्तावतरणस्य सौलभ्यं पर्य्यालोच्य "तेजोऽतस्तथा ह्याह' इति सूत्रयिष्यन् तदर्थेऽधिकाशङ्कामाद्येऽप्यतिदिशति "एतेन मतिरिश्वा व्याख्यात;' इति, अतो न किञ्चिदवद्यमित्युत्पश्यामः ।। इति वियदधिकरणम् ।।

।। सृष्टयनन्तरानुप्रवेशकृतमौपचारिकमिति ।। कादाचित्कानुप्रवेशनियमन मात्रेण शरीरत्वोक्तिः, नतु यावत् सत्तं धार्य्यत्वादि-कमभिप्रेत्य येन तन्मूख्यं स्यादिति भावः ।। * ।।

२.३.१३

ननु "तेजोऽतस्तथा ह्याह' इति न्यायसाम्ये अप्सु पृथक् सूत्रकरणं किमर्थमिति चेत् न, तथा ह्याहेत्यंशस्य साम्येऽपि तेजसि विषये "तदैक्षत" तत्तेजोऽसृजत इत्यस्य परम्परयाऽप्युपपत्तिरिति परिहर्तव्यम् । अप्सु "ततेज

षक्षत" तदापोऽसृजत" इति प्रथमश्रुततजश्शब्दानुासारात्, "तस्माद्यत्र क्कचन शोचति स्वदेते हि पुरुषः तेजस एव तद्धयापोऽजायन्त" इति वाक्यशे-षश्रवणाच्च ईक्षण ं गौणमिति वा"अभिमानिव्यपदेशस्तु विशेषानुगतिभ्या'मिति न्यायेन वा निवोदव्यमिति पूर्वपक्षिणो

२.३.१५

निर्वाहभेदप्रकारसत्वात् पृथक् सूत्रकरणसार्थक्यात्, न च पृथिव्याः पृथक् सूत्रं व्यर्थमिति वाच्यम् । अत्र पअथिवीशब्दयोः विरोधपरिहारार्थतया तदापि पृथक् सूत्रणमिति गन्तव्यम् ।। * ।। तच्छरीरकत्वं श्रौतमित्याहेति - तच्छरीरकस्य कारणत्वं श्रौतमित्याशय इत्यर्थः, "यः पृथिवीमन्तरो यमयति" इति तदधिष्ठितवस्तुन एव कार्यकरत्वश्रवणादिति द्रष्टव्यम् । तेषाम-पीक्षणपूर्वकसृष्टिसिद्धय इति - अत्र केचित् पूर्वग्रन्थे ईक्षापूर्वकसृष्टयुपपाद्यतयोक्तस्य तच्छरीरकत्वस्य ईक्षापूर्वकसृष्टिसिध्द्य-र्थत्वकथनमयुक्तम्, ततश्च महदादीनामपि परमात्मशरीरत्वप्रतिपादकवचनं दर्शयति, सुबालोपनिषदि चेति - इत्येवावतरणि-का देयेति च मन्यन्ते ।। * ।। ।। आनन्र्य्यरूपक्रमप्रतीतेरिति - यद्यपि पौर्वापर्य एव क्रमः, नतु अव्यवधानलक्षणमानन्तर्य्यम्,

२.३.१७

तथापि आनन्तर्य्यरूपाव्यवधानविशिष्टपौर्वापर्य्यलक्षणक्रमप्रतीतेरित्यर्थे बाधकाभावात्, न च क्रियाद्वारकमेव पौर्वापर्य्यं वक्तव्यमिति वाच्यम्, तथा सति "त्तस्माज्जायत' इत्यस्य सृष्टयुन्मुखादित्यर्थः प्रतीयते, ततश्च, सृष्टयौन्मुख्यस्य प्राणाद्युत्पत्तेश्च क्रमिकत्वद्वारा तदाश्रययोः कार्यकरणयोरपि इत्यदोषात् । इत्यन्वयाभिप्रायेणेति नतु "एतस्माज्जायते प्राणः ततो मनः सर्वेन्द्रियाणि' इत्यन्वय इति भावः ।। * ।।

२.३.१७

भाष्ये - भङ्कत्वा व्यपदिश्यत इति, अस्मिन् पक्षे "भञ्जोऽवमर्दने' इति धातोःक्तिनि सति भक्तिः भङ्गः भकत्या प्रयुक्त इति भावः । पुर्वसाध्येनानन्दमयादिति, "पृथिवी' इति सूत्रे पृथिव्यत्पत्तेरेव साध्यत्वात् तत्र च अधिकाररूपशब्दान्तराणामत्र -

२.३.१७

शब्दवाच्यपृथिवीत्वहेतुत्वेऽपि पृथिव्युत्पत्तावहेतुत्वादिति भावः । अभिमानिचेतनानुप्रवेशनिबन्धनत्वस्य चोक्तत्वादिति - ततश्च स्वतश्चैतन्यं नास्तीति भावः । ननु वाचस्पतिना तेज आद्यधिष्ठानदेवतानां परमेश्वराधिष्ठितानामेव भूतसर्गे प्रवृत्तिः, उत

२.३.१७

तदनधिष्ठितानामिति विचारप्रवृत्तिरिति चेन्न, तस्य तद्भाष्यविरुद्धत्वात् "परात्तु तच्छ्रुते'रित्यादिना कृतकरत्वाच्च तदना-

दृत्य यथाश्रुतभाष्य एवदूषणमुक्तमिति द्रष्यव्यम् । एकशब्देन विवक्षितत्वे कारणाभावादिति - न च प्राणशब्देन बुद्धिरुच्यते, बुद्धिर्नाम निश्चयहेतुभूतान्तःकरणावस्था संशयहेतुभूतान्तःकरणावस्थं मन इति तयोर्भेदः,तत्र ज्ञायते अनेनेति व्युत्पत्त्या सौत्रविज्ञानशबब्देन प्राणशब्दितबुद्धेरिन्द्रियाणाञ्च ग्रहणम्, मनश्शब्देन मनसो ग्रहणञ्चच सम्भवतीति वाच्यम्, एता-दृकल्पनायां प्रमाणाभावादिति भावः । जीवस्य परस्मादात्मन उत्पत्तिः,वियदादीनामस्ति नास्तिं वेत्युत्तरसूत्रेण वक्ष्यति, देहाश्रयौ तावत् जीवस्य स्थलौ उत्पत्तिप्रळयौ न स्त इत्यनेन सूत्रेणावाचदिति परभाष्योक्तमाह - अत्र देहाश्रयाविति ।

२.३.१७

शरीरजन्मविनाशयोः जीवगतत्वशङ्कायाअनुदयादिति - ननु देवदत्तादिनामधेयं तावत् जीवस्य, न शरीरस्य, तन्नाम्ने शरीराय श्राद्धकरणानुपपत्तेः; तस्मात् मृतो जातो देवदत्त इति व्यपदेशस्य मुख्यत्त्वं मन्वानस्य पूर्वपक्ष इति वाचस्पत्ये स्पष्टमेव जीवभेदं सिद्ॅधवत्कृत्य देहभिन्नजीवस्य देहोत्पत्तिविनाशानुयाय्युत्पत्तिविनाशवत्वं पूर्वपक्षीकृत्य सिद्धान्तित इत्याभिधानात्, शाङ्करभेष्येऽपि शरीरानुयायिविनाशिनि जीवे - इति, तद्भेदसिद्धवत्कारणेवै देहे उत्पद्यमाने जीवोऽप्युपपद्यते, नश्यति तस्मिन् स्वयमपि नश्यतीति पूर्वपक्षप्रतीतेः तस्यैवार्थस्य देदाश्रयौ तावज्जीवस्य स्थूलोत्पत्तिप्रलयोै न स्त इति भाष्येऽनुवाद्यमानत्वात्, देदाश्रयावित्यस्यापि देहोत्पत्तिविनाशवित्येवार्थप्रतीते कथमयं प्रपञ्च इति चेत्, सत्यम्, देहानुविविधायिविनाशित्वे जीवस्वरूपस्याभ्यमाने "नात्मा श्रुते'रित्वनेन पौनरुकत्यात् देहोश्रया उत्पत्तिविनाशावित्यस्य यथाश्रुत एवार्थः स्वीकर्तव्यः,

२.३.१७

गत्यन्तरामावादित्यभिपेत्यैवमुक्तमितं द्रष्टव्यम् । अन्ये त्वित्यादि - प्रलयावस्थापुरुषस्य चेति । प्रलयावस्थस्य भोक्त्रंशस्य चेत्यर्थः । अस्य पाठक्रमस्येति - त्वदभिमतस्य सूत्रपाठक्रमस्य कुत्रापि अप्रसिद्धत्वादित्यर्थः । सर्वेषामुत्पत्तिं च पूवर्पक्षीकृत्येति - सर्वेषामुत्पत्तिर्वा स्यात्, सर्वेषामनुत्पत्तिर्ता स्यादिति पूर्वपक्षीकृत्येत्यर्थः, । मनस्याकाशमेव चेति प्रयोगाच्चेति - एतस्माज्जायत इति श्रुतौ यदि मनश्शब्दो मनः परः तदाऽऽकाशस्य इन्द्रियेषु इन्द्रियाणाञ्च मनसि मनसश्च प्राणशब्दितमहत्तत्त्वे च लयः कीर्त्यत इति भावः । आकाशादिषु क्रमविवक्षादर्शनादिति - "खं वायुर्ज्यातिराप" इत्युत्तरवाक्ये क्रमविवक्षादर्शनादिति भावः । पदार्थनिर्देशमात्रञ्च अत्र वागादिक्रमविवक्षाप्रतीतेरभावादिति भावः । अहङ्काराज्जातानीत्यर्थ इति - अहङ्कारात स्वादीनि

२.३.१७

साक्षाज्जातानि, इन्द्रियाणि तु स्वादिद्वारा जातादीत्यर्थ इति भावः। अतो विरोध इति - "इन्द्रियेभ्यः परा ह्यर्थाः' इति श्रुत्यनुसारेण "सर्वेन्द्रियाणि च स्वं वायुर्ज्योतिराप" इत्यत्र विरोधस्य परिहृतत्वात्, मनश्शब्दिताहङ्कारस्य महतश्च मध्ये "मनसस्तु परा बुद्धिः, बुद्धिं तु सारथिं विद्धि, विज्ञानसारथिर्यस्तु' इति बुद्धिविज्ञानाब्दितं तत्त्वान्तरं प्रतीयत इति विरोध इत्यर्थः । मनश्शब्दः वाच्येति - "मनसस्तु परा बुद्धिः' इति श्रुतपरापरभावो यथा कथञ्चिन्निर्वोढव्य इति भावः । नभः प्रकृतयस्स्युरिति चेदिति - ततश्च अष्टौ प्रकृतयः षोडश विकाराः' इति श्रुतिविरोध इति भावः' । इन्द्रियमेव मन इति - अन्तरिन्द्रियमेव मनः नाहङ्कार इत्यर्थः । न चैवं " इन्द्रियेभ्यः परा ह्यर्थाः' इति इन्द्रियापेक्षया परत्वेन प्रतिपादितादथात् इन्द्रियविशेषस्य मनसः कथं परत्वमिति शङ्कयम् आकारान्तरेण परापत्वयोरूपपत्तेरिति भावः, । औचित्यभङ्गप्रसङ्गादिति - आत्मशब्दस्यैव महत्त्वेन विशेषणस्योचितत्वादिति

भावः । अर्थविरोधत्वादिति -प्रकृतिमहदहङ्काररूपार्थप्रतिपादकत्वात् अस्य सन्दर्भस्य वशीकार्यप्रकरणबाधो युक्त इति चेदित्यर्थः । प्राचीनाधिकरणेति - आनुमानकाधिकरण इत्यर्थः ।।

।। इति तेजोधिकरणं सामाप्तम् ।।

२.३.१९

नियतधर्मधर्मिभाव उपपद्यत नेति - धर्म्यपेक्षया अधिकदेशस्य धर्मत्वं सम्भवति नेति चिन्तायां निवेशनीयम् । अस्यार्थस्य

"अविरोधश्चन्दनवत्, गुणाद्वा लोकवत्, इति सूत्रोपारूढतया तस्यावश्यं वक्तव्यत्वात् । विप्रकृष्टार्थग्रहणाग्रहणासम्भवेनेति - सर्वाङ्गीणवेदनासम्भवेन आत्मनो विभुत्वस्य वक्तव्यतया तस्य च नित्यज्ञानाश्रयत्वेन नित्यत्वोपलब्धिप्रसङ्ग इत्यर्थः । भाष्ये-ज्ञानस्वरूप एव न ज्ञानमात्रम्, नापि जडस्वरूप इति ज्ञातृत्वे साधितेऽपि न जडत्वव्यावृत्तिः, नैयायिकैरजडत्वाभ्युपगमात्, तथापि

२.३.२०

"यावदात्माभावित्वाच्च' इति च शब्देन सिद्धिमभिप्रेत्य उक्तमिति द्रष्टव्यम् । भाष्ये-यदुक्तं ज्ञातृत्वे स्वाभाविके सतीति, ननु स्वा-भाविकज्ञातृत्वे कथं विभुत्वनिराकरणमुपयुज्यते, विभुत्वस्य स्वाभाविकज्ञातृत्वमात्रापरिपन्थित्वात्, "नित्योपलब्ध्यनुपलब्धी'ति सूत्रोक्तन्यायेन विभुत्वस्य आगन्तुकज्ञानाश्रयत्वज्ञानरूपत्वस्वाभाविकज्ञत्वरूपसर्वपक्ष-विरुद्धत्वेन विशिष्य सिद्धान्तिनामपि निरा-करणायत्वात्, तत एव नैकाधिकरणत्वमपि "उत्कान्तिग्कयागतीना'मित्यादेः युज्यते, अणुत्वसमर्थनस्य स्वाभाविकज्ञातृत्वानुपयुक्तत्वात् कथञ्चिदुपयोगमाश्रित्यैकाधिकरण्याश्रयणे "कर्त्ता शास्त्रार्थवत्वा'दित्यस्य ज्ञातृत्वकर्त्तृत्वसमर्थनार्थस्य कुतो नैकाधिकरण्यम्, यदि कर्त्तत्वनिराकरणं ज्ञातृत्वोपयुक्तं तर्हि तन्निराकरणार्थानामेकत्रैव निवेशनीयतया "ज्ञोऽत एव, व्यतिरेको गन्धवत्, पृथगुपदेशात्, तद्गुणसारत्वात्तद्व्यपदेशः, यावदात्मभावित्वाच्च न दोषः तद्दर्शनात्,पुंस्त्ादिवत्त्वस्य सतोऽभिव्यक्तियागा'दिति ज्ञत्वं समाप्य "उत्क्रान्ति-गत्यागतीनाम्, स्वात्मना चोत्तरयोः, नाणुरतछ्रुतेरिति चेन्नेतराधिकारात्, स्वशब्दोन्मानाभ्याञ्च, अविरोधश्चन्दनवत्, अवस्थिति वैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि गुणाद्वा लोकवत्, नित्योपलब्धि'रित्येव सूत्रन्यासः स्यादिति चेत्, उच्यते- यदुक्तं विभुत्वस्य स्वाभाविकज्ञातृत्वमात्रापरिपन्थित्वादिति-सत्यमेतत्, तथापि पूर्वपक्षिणः तथाभिमानसम्भवेन तत्खण्डनस्य कर्तुं यक्तत्वात्, यदुक्तं "कर्त्ता शास्त्रार्थवत्वात्' इत्यस्याप्यैकाधिकरण्यमिति, तत्र ज्ञातृत्वं हि ज्ञानाश्रयत्वं न तु कर्तृत्वं, प्रत्ययस्याश्रयत्वमात्रार्थकत्वात्, अस्तु वा कथञ्चिदुपयोगः, नैतावता एकाधिकरण्यं, तस्य सूत्रकदनभिमत्वात्, प्रकृते तु ज्ञत्वाणुत्वसमर्थनसूत्राणां परस्परान्तरिततया करणादेवावसीयते-एकाधिकरण्यं सूत्रकृदभिमतमिति, इतरता त्वदुक्तरीत्या महत्वनिराकरणसूत्राणां बुद्धिसौकर्याय सङ्कीर्णतयैव निवेशः स्यात्, अतः सर्वं समज्जम् ।। * ।। "स यदा तेजोमात्रास्समभ्याद-

२.३.२३

दाना हृदयमेवापक्रामति शुक्तमादाय पुनरेति स्थान'मिति परोक्तगतिश्रुत्यनुपन्यासे हेतुमाह - उत्क्रान्तिशब्दानन्तरेति । ।। * ।। भाष्ये-शरीरविभोगरूपत्वेनेति, उत्क्रामणं हि अपसर्पण इव मरणे विनिरूढम्, तच्चातलतोऽपि सतः

कर्मक्षये देहस्वात्म्यनिवृत्त्या उपपद्यते, गत्यागत्योश्चलेन निरूढयोः कर्तृस्वभावरूपत्वादिति भावः ।। * ।। भाष्ये- अणुसदृशं वस्तूद्धृत्य तन्मानत्वं जीवस्य

२.३.२६

श्रूयत इति उद्धरणञ्च पृथक्करणम्, बालाग्रशतभागस्ये'ति अवयवावयविनोरवयवस्य पृथक्करणं श्रूयते, श्राव्यते प्रदर्श्यत

२.३.३२

इत्यत इत्यर्तः, ततश्च पृथक्करणाश्रवणयोः श्रुतिकर्त्तृकत्वात् समानकर्त्तृत्वोपपत्तिरिति द्रष्टव्यम् । आराग्रम्- चर्मभेदिसूच्यग्रम् ।। * ।। "ननु-उक्तं ज्ञानमेवात्मेति' "विज्ञानात्मा पुरुष'

इत्यादिश्रुतिष्वित्यर्थः ।। * ।।

विशिष्टवाचिना शब्देनेति - ज्ञानविशिष्टवाचिशब्देनेत्यर्थः ।। * ।।

३२. सू। नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । नित्योपलब्धिः प्रसज्यताम् - कथं नित्यानुपलब्धिप्रसङ्गः - उभयप्रसङ्गो वा कथम्

आत्मा कुत्रचिदुपलभ्यत इति - आत्मा शरीरान्त उपलभ्यते, तथा बहिर्नोपलभ्यत इत्येतत् "अहमिहैवास्मि सदने न जानान' इति सर्वलौकिकानुभवसिद्धम्, न चैतत्पक्षद्वयेऽपि उपपद्यते, ज्ञानेरूपः सर्वगत आत्मेति पक्षे किं उपलभ्यानुपलभ्यस्वभावः, उत उपलभ्यैकस्वभावः, उतानुपलभ्यैकस्वभावः । आद्ये दहेस्यान्तरे उपलब्ध्यनुपलब्धी स्याताम्, द्वितीये सर्वत्रोलब्धिस्स्यात् । तृतीये अनुपलब्धिः स्यात्, दहेस्यान्तरुपलभ्यस्वभावः अन्यत्रानुपलभ्यस्वाभाव इति व्ववस्था न युज्यते, न ह्येकस्य क्वचिदेशे स्वप्रकार-मन्यत्र नेति शक्यते वक्तुमिति भावः । एवं जडत्वपक्षेऽपि दूषणं द्रष्टव्यम् । भाष्ये-सर्वैः करणैः सर्वदा संयुक्तत्वेनेति, नन्विदं सिद्धान्तेऽपि समानभेव, नित्यानां मुक्तानाञ्च धर्मभूतज्ञानानामनन्तानां सर्वत्र विद्यमानत्वात्, धर्मभूतज्ञानामपि सर्वात्मसम्ब्धत्वात् मध्ये इदमेदतदीयमिति नियन्तुमशक्यत्वात् कथमेतदिति चेन्न, "श्रुतेस्तु शब्दमूलत्वात्' इति न्यायेन श्रुतिप्रतिपन्ने अर्थे यथा श्रुत्यभ्युपगन्तुं युक्तम्, इतरथा न युज्यत इत्यत्र तात्पर्यात् । ज्ञशब्दस्यापि व्यक्तिवाचित्वाभावादिति - "इगुपधज्ञा प्रिय- किरः कः' इति कप्रत्ययस्य कर्त्तरि कृ'दिति कर्त्रर्थेऽनुशिष्टत्वादिति भावः । अविकृतब्रह्मण एवेति - आविकृतब्रह्मण एवोपाधिना जीवभावेनावस्थानादनुत्पन्नत्वेनेति योजना । तस्य चैतन्यस्वरूपत्वादिति - ब्रह्मणः चैतन्यस्वरूपत्वात् तदभिन्नस्य जीवस्यापि चैतन्यस्वरूपत्वमिति भावः । साध्यतया प्रकृतेति - पूर्वाधिकरणे साध्यतया प्रकृतेत्यर्थः । साक्षादेव ज्ञानस्वरूपत्वसाधकत्वभावादिति - इदमुपलक्षणम्, परम्परयाऽपि साधकत्वं नास्ति, न ह्यनुत्पत्त्युपपादकस्य ब्रह्मानन्यत्वस्य चैतन्यस्वरूपत्व-

३२. सू। नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । नित्योपलब्धिः प्रसज्यताम् - कथं नित्यानुपलब्धिप्रसङ्गः - उभयप्रसङ्गो वा कथम्

साधकत्वमस्तीति एतावतानुत्पत्तेः परम्परया उपयोगेऽस्तीत्यपि द्रष्टव्यम् । तस्य ज्ञानस्वरूपत्वञ्चेति - ब्रह्मणो ज्ञानस्वरूपत्वञ्चे-त्यर्थः । परमसाध्येति - जीवचैतन्यस्वरूपत्वस्येत्यर्थः । प्रकृत्यर्थसाम्यस्य चेति - श्रुतेः अत इति

शब्दप्रकृत्योः श्रुत्येतच्छब्दयोः एकार्थत्वस्य ज्ञाप्यमानत्वादित्यर्थः । ननु पूर्वसूत्रस्थस्य श्रुतेरिति यदस्य एतत्सूत्रस्थस्यात इति पदस्य नैकार्थत्वं युक्तम् अनुत्प-त्तिसाधकश्रुतेः ज्ञत्वसाधकश्रुतेश्च भिन्नार्थत्वादित्याशङ्कयाह - योग्यतावशादिति । विलम्बत्रयाभावाच्चेति - परमते तु तदुपपादकब्रह्मानन्यत्वमित्यादिना विलम्बत्रयं पूर्वमेव प्रतिपादितमति भावः । उच्छेदरहितज्ञानधर्मत्वं विवक्षितमिति - अनु-च्छित्तिधर्मेत्यत्र बहुव्रीहिगर्भबहुव्रीहिरिति भावः । ताभ्य इति अन्वयो घटत इति - यद्यपि अत एवेत्यनेन पूर्वसूत्रे ताभ्य इत्यत्र निर्दिष्टानां बुद्धिस्थानां श्रुतीनामेवातश्शब्देन परामर्शे तासामेव श्रुतीनाम् उत्क्रान्तिसूत्रेऽप्यनुवृत्तौ - उत्क्रान्तिगत्यागतीनाम्

३२. सू। नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । नित्योपलब्धिः प्रसज्यताम् - कथं नित्यानुपलब्धिप्रसङ्गः - उभयप्रसङ्गो वा कथम्

श्रुतिभ्य इत्यस्यार्थस्य सम्भवाददोषः; तथापि ताभ्य इत्यस्य विशेष्यतया श्रुतिभ्य इत्याध्याहारोऽप्यवश्यापेक्षितः, अतः इहापि -ताभ्यः श्रुतिभ्यः इति पदद्वयाध्याहारादिति भावः । कारकव्यापारवैयर्थ्यमिति - चक्षुरादिव्यापारजीवचैतन्य-स्वरूपत्वस्येत्यर्थः । प्रकृत्यर्थसाम्यस्य चेति - श्रुतेः अत इति शब्दप्रकृत्योः श्रुत्येतच्छब्दयोः एकार्थत्वस्य ज्ञाप्यमानत्वादित्यर्थः । ननु पूर्वसूत्रस्थस्य श्रुतेरिति यदस्य एतत्सूत्रस्थस्यात इति पदस्य नैकार्थत्वं युक्तम् अनुत्पत्तिसाधकश्रुतेः ज्ञत्वसाधकश्रुतेश्च भिन्नार्थत्वादित्याशङ्कयाह - योग्यतावशादिति । विलम्बत्रयाभावाच्चेति - परमते तु तदुपपादकब्रह्मानन्यत्वमित्यादिना विलम्बत्रयं पूर्वमेव प्रतिपादितमिति भावः । उच्छेदरहितज्ञानधर्मत्वं विवक्षितमिति - अनुच्छित्तिधर्मेत्यत्र बहुव्रीहिगर्भबहुव्रीहिरिति भावः । ताभ्य इति अन्वयो घटत इति - यद्यपि अत एवेत्यनेन पूर्वसूत्रे ताभ्य इत्यत्र निर्दिष्टानां बुद्धिस्थानां श्रुतीनामेवातश्शब्देन वैयर्थ्यमिति भावः । तदा-श्रितेष्विति - तदाश्रयो मुख्यः प्राणः, तदाश्रिता इतरे प्राणा इति भावः । सङ्घातरूपस्य इति - उपाधेः सङ्घातरूप इत्यर्थः ।

३२. सू। नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । नित्योपलब्धिः प्रसज्यताम् - कथं नित्यानुपलब्धिप्रसङ्गः - उभयप्रसङ्गो वा कथम्

सुषुप्तिप्रलययोरप्रबोधेनेति - सुषुप्तिप्रलययोरन्तःकरणादेः लीनत्वादित्यर्थः । आत्मेन्द्रियविषयसन्निधानान्नित्यमुपलब्धिरिति - आत्मेन्द्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नित्यमेवोपलब्धिः प्रसज्यते, अत असत्यपि हेतुसमवधाने फलाभावः नित्यमेवानुपलब्धिः प्रसज्येत, अत आत्मेन्द्रियविषयसन्निधाने सत्यपि कादाचित्कोपलम्भाभावस्य कारणव्यतिरेकप्रयोज्यत्वात्,

२.३.३३

कारणान्तरसमवधाने कारणव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगिता अन्तःकरणं स्वीकार्यमिति भावः । अन्यतरनियमो वेऽन्यथेति सूत्रखण्डं व्याचष्टे । आत्मनीन्द्रियेऽपि वेति ।। ।। इति ज्ञाधिकरणम् ।।

२.३.३३

सेतुं जन्तुमितिवदिति - औणादिके तुमुन्प्रत्ययान्तः "य एवं वेति हन्तारं यश्चैनं मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यते ।।' इति चेदिति गीतावचनादिति भावः । भाष्ये-"शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात्स्वयं प्रयोगस्स्या'-दिति जैमिनिसूत्रम्, अस्यार्थः यस्मात्-शास्त्रफलं स्वर्गादिकं प्रयोक्तरि भवति "स्वर्गकामो यजेत' इति शास्त्रप्रामाण्यात्, तस्मात्

२.३.३७

स्वयं प्रयोगे कर्त्ता स्यादिति ।। * ।। भाष्ये- स यथा सहाराजेति प्रकृत्येति, "स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तते एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तत' इति स्वप्नविषया श्रुतिः प्राणान् गृहीत्वा जागरितस्थानेभ्य उपसंहृत्य स्वे शरीरे यथेष्टं सञ्चरतीत्यर्थः । शरीरप्रेरणे चेति - शरीरे ग्रथष्टसञ्चारे शरीरप्रेरणमपि सिद्धमिति भावः ।। * ।।

२.३.३९

त्वन्मते बुद्धयुपधानात्पूर्वमिति - स्फटिकलौहित्यस्य जपाकुसुमसन्निधानोपाधिनिबन्धनत्वं जपाकुसुमसन्निधानात् प्राक् स्फ- टिके सत्यापि लौहित्याभावदर्शनात् उपपद्यते, सत्यपि जीवेऽन्तःकरणोपाधिसन्निधानात् प्राक् यदि कर्त्तत्वन्नोपलम्येत, तदा-ऽन्तःकरणस्य जीवगतकर्त्तत्वोपाधित्वं वक्तुं शक्यते, न च तथास्तीत्यर्थः । विज्ञानशब्दस्य बुद्धिमात्रविषयत्वनिर्बन्धश्चेति - यस्त्वयं व्यपदेशो दर्शितः "विज्ञानं यज्ञं तनुते' इति स हि बुद्धेरेव कर्त्तत्वं ज्ञापयति । विज्ञानशब्दस्य तत्र प्रसिद्धत्वादिति "यथा च तक्षोभयथा' इति सूत्रे यध्याख्यानं तदनुपपन्नमित्यर्थः । परिहर्त्तव्याभावमेवोपपादयति । हितबुध्द्यैव सर्वं चेतनः करोतीति - नाम्नि विवाद इत्युक्तमिति । यत् करणभिन्नं कर्त्ततया त्वयाऽन्तःकरणमित्यभिलप्यत इति तदेव मया जीव इत्यभिलप्यत इत्यर्थः । चित्तमनसोरिवेति - यथा प्राप्तकालानुरूपबोधरूपस्य चेतयितृत्वलक्षणस्य चित्ताख्यस्य मनोवृत्तिविशेषस्य मनसश्च प्रकृतिविकृतिभावोपदेशो नान्ति, एवं बुद्धेः मनोवृत्तिरूपत्वे बुद्धिमनसोरपि प्रकृतिविकृतिभावोपदेशो नास्ति, एवं बुद्धेः मनो-वृत्तिरूपत्वे बुद्धिमनसोरपि प्रकृतिविकृतिभावोपदेशो न स्यात्, दृश्यते च मनोबुद्धिमनसोरपि प्रकृतिविकृतिभावोपदेशो न स्यात्, दृश्यते च मनोबुद्धिरेव वाहङ्कार इति मनोबुध्द्यहङ्काराणां प्रकृतिविकृतिभावापदेश इति भावः । अतः प्रकृतेरन्यत्वेन समाधिविधानमेव विवक्षितमिति - यद्यपि भोक्तृत्वशून्यायाः प्रकृतेः कमर्फलभोक्तृत्वानुसन्धानेन यागादिप्रवृत्तिवत् प्रकृति-

२.३.४१

भिन्नत्वसमाधावपि न दोषः तथापि प्रकृतिकर्त्तृकस्य प्रकृतेरहमन्योऽस्मीति समाधेः भ्रान्तिरूपतया मोक्षहेतुत्वं न स्यादिति भावः । स्त्रक्चन्दनाद्युपयोग इति - स्त्रक्चन्दनादिधारण इत्यर्थः ।। ।। इति कर्त्रधिकरणम् ।।

२.३.४१

गुणत्रयोद्भवाभिभवविशेषवासनाविशेषविषयसन्निधीनां रुचिविशेषहेतुत्वं क्रमेणोपपादयति । तथाहीत्यादिना - वस्तुस्वभाव-विशेषरूपेति । वस्तुसन्निधि विशेषरूपत्वेत्यर्थः ।। इति परयत्ताधिकरणम् ।। *।।

२.३.४२

तत्र शरीरवाचिशब्दस्येति - श्रुतिविप्रतिपत्त्या शरीरित्वमेवाक्षिप्य समाधीयत इति भावः । भाष्ये-न प्रतितिष्ठतीति, अनन्यत्वाधि-कत्वयोः परस्परविरुद्धयोरविरोधस्य अंशांशिभावेनैव समाधेयत्वादिति भावः, अपृक्सिद्धप्रकारत्वमेव ह्यंशत्वं; तत्र पृथक्सिद्धत्वेन-नन्यत्वसमर्थनं, प्रकारत्वेन भेदसमर्थनम्, अपृथक्सिद्धत्वप्रकारत्वाभ्याम् मिलिताभ्याम् उभयव्यपदेशमुख्यत्वसमर्थनमित्यर्थः ।

२.३.४२

प्रभाप्रभावतोरिवापृथक्सिद्धांशांशित्वनिर्णयेनेति - यद्यपि तदनन्यत्वमिति सूत्रे समर्थनीयमनन्यत्वं कारणावस्थस्य कार्याव- स्थस्य चाभेदं, न तु जगद्ब्रह्मणोरंशांशित्वरूपं; तथापि सूक्ष्मचिदचिच्छरीरकेण स्थूलचिदचिच्छरीरकस्यानन्यत्व स्य समर्थनीयतया अंशत्वरूपशरीरत्वं जगतः समर्थनीयम्, तत्र च चिदंशस्यांशत्वमिह साध्यते, अचिदंशस्यांशत्वन्तु अहिकुण्डलाधिकरणे साध्यते इति दृष्टव्यम् । भाष्ये"ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा' इति, दासाः- धीवराः, कितवाः- द्यूतकृतः । उत्कृष्टैः सामानाधिकरण्य इति - श्रुताध्ययनसम्पन्नः साक्षाद्विष्णुरित्युक्ते स्तुतिपरत्वनुपपद्यते, निकृष्टसामानाधिकरण्यं तु न ब्रह्मणः स्तुतये

२.३.४४

भवति, विरुद्धत्वात्, नापि दासादीनां स्तुतये, तेषां स्तुत्यनर्हत्वात्, नापि ब्रह्मणो निन्दायै-ब्रह्मणो निन्द्यत्वाभावात्, नापि दासादी-नां निन्दायै वा-असम्भवात्, तस्माद्ब्रह्मणः दासादिसामानाधिकरण्यमभेदस्य तात्त्विकत्वमेव द्योतयतीत्यर्थः । भाष्ये-कुर्वाणेन भ्रमि-तव्यमिति, कुर्वाणत्वेन भ्रमितव्यम् कुर्वाणमिव ब्रह्म भ्राम्यति, नोपदिश्यत इति पर्य्यवसितोर्थः । शङ्कते - जीवब्रह्मणोरिति ।। * ।।

२.३.४५

भाष्ये-मन्त्रे सूत्रेऽप्यंश सति एकवचनमिति, मन्त्रे सूत्रेऽपि पादांश इत्येकवचनमित्यर्थः । पराकत्वेन च भेदो गृह्यत इति - इद-मुपलक्षणं परात्मसु भेदग्रहसिध्द्यर्थम् "शक्तयः सवर्भावानामचिन्त्यज्ञानगोचराः' इत्युक्ततीत्या शकत्यादिलक्षणः परस्परभेदः प्रत्य-क्पराकत्वातिरिक्तोऽप्यस्तीति द्रष्टव्यम् ।। * ।। भाष्ये-एकस्त्वेकदेशत्वं ह्यंशत्वमिति, यद्येवं विशेष्यस्यापि परमात्मनोऽशत्वप्रसङ्गः, विशिष्टवस्त्वेकदेशत्वाविशेषात्, ततश्च जीवपरयोरविशेषत्वप्रसङ्गः, किञ्च ममैवांशो जीवलोके जीवभूतः' इति विशेष्यभूतपरमात्मानं प्रत्येकदेशत्वं जीवस्य प्रतीयते, न तु विशिष्टं प्रति, ममेत्यस्य विशिष्टपरत्वे प्रमाणाभावात्, इश्वरांशत्वं हि स्वरसतः प्रतीयत इति वक्ष्यमाणत्वाच्च, विशिष्टे विशेषणमंश इति लोकप्रतिसिद्धतयाऽयमेवांश इत्युपदेशवैयथ्यात्, तदर्थं समानाधिकरणत्वस्यापि व्यर्थत्वात्; किञ्च "जीवभूतः सनातनः' इति विशिष्टजीर्वेऽशत्वकीर्त्तनं व्यर्थम् । ईदृशांशत्वस्य चिदचित्साधारण्यात्, अत एवाचितः पार्थक्येनांशत्वसमर्थनपर-महिकुण्डलाधिकरणमपि व्यर्थमिति चेत्-न, अंशत्वस्य नियाम्यशेषत्वलक्षणशरीररूपत्वस्य इहाधिकरणे समर्थनीयत्वात्, वक्षयति च विशेष्यस्य प्रधानतयांशित्वोपपत्तिरिति - अहिकुण्डलाधिकरणेऽचितोंशत्वसमर्थनेऽपि न

२.३.४७

तेनाऽस्य गतार्थता, भिन्नत्वाभिन्नत्वांशत्वप्रतिपादकश्रुतिविरोधसमाधानप्रकारत्वादस्याधिकरणस्य, अतो मुख्भेदान्न गतार्थता, अत एव "अवस्थितेरिति काशकृत्स्न' इत्यनेनापि न गतार्थता, एकवस्त्वेकदेशत्वं ह्यंशत्वमित्यस्याष्यत्रैव तात्पर्य्यम्, यद्यपि अपृथक्सिद्धत्वलक्षणमठशत्वं समर्थ्यते, तर्हि अपृथक्सिद्धविशेषणभूतचिदचिद्गतदोषाणां ब्रह्मणि परस्परं चाप्रसक्तेः तत्परिहारा-र्थानां "प्रकाशादिवत्तु नैवं परः'"अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्' इत्यादीनामानर्थक्यमिति चेन्न, अंशपदश्रवणमा- त्रात् विशेष्यैकदेशत्वरूपांशत्वमिह विवक्षितमिति भ्रान्त्या प्रवृत्तां

शङ्कामभिमतांशत्वप्रदर्शनेन निराकरोतीत्युक्तौ दोषाभावात् । भानुर्मानुमानिति अत्र केचित् यथा घटाश्रये घटे प्रयुक्तौ घटघटवच्छब्दौ न तुल्यार्थौ, एवं प्रभारूपभानुमन्तराश्रये भानौ प्रयुज्यमानौ

२.३.५२

भानुभानुमच्छब्दौ न तुल्यार्थौ, यदि च भानुशब्दः प्रभावचन एव सन् पर्यवसानवृत्त्या जातिगुणादिशब्दवत्प्रभावद्वचनस्स्यात्, तर्हि मत्वर्थप्रत्ययनिरपेक्षसामानाधिकरण्यं स्यात्, तस्माज्जात्यादिवाचकाः शब्दा उदाहार्थ्या इति वदन्दि । परे त्वित्यादि - जीवेश्वरसम्बन्धनिरूपणमिति । किं स्वामिभृत्यवत् सम्बन्धः? उताग्निविस्फुलङ्गादिवत् इति निरूपणमित्यर्थः । स्वात्मानं प्रत्यंशत्वानुपपत्तेरिति - विशिष्टस्य विशिष्टं प्रत्यंशत्वानुपपत्तेरित्यर्थः । वस्तुनिस्वतोंऽशभेदाभावेनेति - आकाशस्य तु स्वतः

२.३.५२

स्वांशत्वादुपहितानुपहितभेद उपपद्यत इति भावः । अयुक्तावस्थायामिति - योगराहित्यदशायामित्यर्थः । अनन्वयस्य वक्तुमश-क्यत्वाच्चेति - नियोज्यत्वानन्वयस्य वक्तुमशक्यत्वाच्चेत्यर्थः । परिच्छन्नत्वे सति अनुपलभ्यमानत्वमणुत्वमिति - नत्वणुपरि-माणत्वमिति भावः । अन्तःकरणोपाधिकत्वानुपपत्तेरिति - इदमुपलक्षणम् "प्रदीपवदावेशस्तथाहि दर्शयति, इत्यधिकरणे काय-व्यूहस्थलेऽन्तःकरणभेदमभ्युपगम्यान्तःकरणभेदेऽपि प्रतिसन्धानस्याभ्युपेतत्वादिति द्रष्टव्यम् । गोमहिषहेमाद्यंशित्वाभावादिति

२.३.५२

ननु भूतलस्याधारत्वादिलक्षणप्राधान्ये विवक्षितेऽपि भूतलस्य गोमहिषादिकमंश इति व्यवहारो न दृश्यते, देवदत्तादेः दण्डकुण्डला-देश्च विशेष्यविशेषणभावलक्षणप्राधान्यविवक्षायामपि देवदत्तस्य दण्डकुण्डलादिकमंश इति व्यवहारो न दृश्यते, द्रव्यस्वामिन्यंशि-त्वव्यवहारास्तु समुदायापेक्षया विभुत्वद्रव्यस्यांशेनैतत्स्वामित्वात् देवदात्तादेः, न तु स्वामित्वादिलक्षणप्रामाण्यप्राधान्यमात्रात्, तथा सति क्रयदानादिलब्धगोमहिष्यादिस्वामिनि अंशित्वव्यहारप्रसङ्गादिति चेन्न, अत्रांशशब्दस्य शरीरमथर् इति प्रागेवोक्तत्वा-ददोषात्, केचित्तु पटारम्भकतन्तुषु घटावच्छिन्नाकाशे यङ्कच्छिन्नपाषाणशकलादौ सर्वत्रांशशब्दव्यवहारेऽनुगतं प्रवृत्तिनिमितं तदे-कदेशत्वमेव, अतः चिदचिद्विशिष्टस्यैव ब्रह्मशब्दार्थतया चिदचितोः तदेकदेशतया तदंशत्वमुपपद्यते, केवलविशेष्यमीश्वरं प्रति

२.३.५२

नांशत्वम्, "ममैवांशः' इत्यादावपि विशिष्टाभिप्रायेणैवांशत्वम्, न चैवमीश्वरस्यापि जीववदंशत्वप्रसङ्गः, अल्पेकदेशेंऽशत्वव्य-वहारदर्शनेन ब्रह्मणोऽधिकत्वेनांशत्वव्यवहाराप्रसक्तेरिति वदन्ति ।।

इत्यंशाधिकरणम् ।। ७ ।।

Fourth Pada

३.४.१

किमाचारदर्शनादिलिङ्गानुगृहीतमिति लिङ्गशब्दः प्रमाणमात्रपरः,
आचारदर्शनादिरूपशेषत्वग्राहकप्रमाणानुगृहीतमित्यर्थः, एवमुत्तरत्रापि लिङ्गशब्दः प्रमाणमात्रपरो द्रष्टव्यः,
इतरथा "तच्छ्रुते'रिति सूत्रोक्ततृतीयाश्रुतेरसङ्गृहीतत्वप्रसङ्गात् । केचित्तु-"यदेव विद्यया करोती'त्यादिरपि
वर्तमाननिर्देशतया अन्याथर्दर्शनरूपलिङ्गमेव, न चैवं सति "तच्छ्रुते'रित्यस्य लिङ्गमिदम्, प्राप्तिरुच्यताम्'
इत्यवतारिकाभाष्यतट्टीकाग्रन्थविरोय इति वाच्यम्, अस्याभ्युपेत्यवादत्वादिति वर्णयन्ति । अनैकान्तिक-त्वाभाव
इति - आचारदर्शनादीनां विद्यायाः कर्मशेषत्वानन्यथासिद्धत्वसाधकत्व इत्यर्थः, नन्वाचारदर्शनादीना-
मनैकान्तिकत्वाभावे विद्या क्रत्व-र्थेत्येतावतैव फलफलिभावस्य परिपूर्णतया तदनुगृहीतसामानाधिकरण्येनेत्यादिरुत्तर-
ग्रन्थसन्धर्भो व्यर्थ., शेषत्वसिद्धयुपजीव-

भावावगमस्य कथं शेषत्वसाधकत्वम्, अन्योन्याश्रयप्रसङ्गात्,
तथाहि "आचारदर्शनादित्यादिपूर्वपक्षसूत्रपञ्चकोक्तन्यायेन विद्यायाः कर्मशेषत्वे सिद्धे पार्वणहोमयोः कालार्भेज्यात्वे
आरादुपकारकत्वप्रसङ्गात् सामवायिकत्वलिप्सयाकर्मसमुदाये-ज्यात्वाङ्गीकारवत् सामवायिकाङ्गत्वे सम्भवति
आरादुपकारकाङ्गत्वस्याऽन्याय्यत्वादिति न्यायेन कर्तृसंस्कारमुखेन शेषत्वस्योचितत्वात्, "आत्मा
द्रष्टव्यमः'"आत्मानमुपासीत' इति द्वितीयातव्यप्रत्ययादिना आत्मसंस्कारत्वावगमात्, आत्मनः कमर्सु कर्तृतया
उपयोगसम्भवे सक्तुन्यायेन विनियोगस्याऽयुक्तत्वात्, कर्तृसंस्कारमुखेन उपासनस्यक्रतुशेषत्वं न्याय्यम्, अतः
कर्मक्रर्तुः वेदान्तविहितोपासनकर्मभूतब्रह्माभिन्नत्वम्, अतश्च "तत्त्वमसि' इति सामानाधिकरण्यनिर्देशो-ऽपि
अनुगृहीतो भवतीत्येवं शेषत्वसिद्धयुपजीवित्वात् जीप्रह्माभेदस्य कथं तस्य शेषित्वोपपादककोटौ निवेशनमिति चेत्-
अत्राहुः, नह्याचारदर्शनादीनां लिङ्गत्वसद्भावमात्रे विद्यायाः क्रत्वर्थत्वसिद्धिः, लिङ्गानामनुग्राह्यप्रमाणसापेक्षत्वात्,
अनुग्राह्यस्य च "आत्मानमुपासीत्' इत्यादिवाक्यादन्यस्याभावात्, तत्र चात्मानमित्यस्य
कर्तृजीवतिरिक्तविषयत्ववाक्य-विधया क्रत्वर्थत्वबोधकासम्भवेन तस्य वाक्यस्य लिङ्गानुग्राह्यवाक्यविधाया
क्रत्वर्थत्वबोधकत्वसिद्धेः जीवस्य ब्रह्माभेदमन्तरेणाऽसम्भवात् उत्तरग्रन्थस्य साफल्यादिति । केचितु- सत्यं
शेषत्वोपपाद्य एव जीवब्रह्मभेदः, तथापि न तत्साधितेन जीवब्रह्माभेदेन पुनस्तदेव साध्यते, येनान्योन्याश्रयः स्यात्,
किन्तु शेषत्वसाधितेन जीवब्रह्माभेदेन कमर्कर्तृ-संस्कारमुखेन शेषत्वं साध्यते, तावत्पर्यन्तो हि पूर्वपक्षः, न
शेषत्वमात्रपर्यवसितः, "शेषत्वात्पुरुषार्तवातः' इति सूत्रेऽपि कर्तृसंस्कारद्वारा शेषत्वं विवक्षितमिति भाष्याभिप्रायात्
अस्याधिकरणस्य जीवब्रह्माभेदप्रतिपादनपर्यन्ततया तथैव सूत्राभिप्राग्रस्य वक्तव्यत्वादिति वदन्ति ।
प्रतिबन्धनिवृविद्वारकमिति - "अमृत इह भवती'ति निर्दाषत्वश्रवणादित्यर्थः । उभयमप्यभिहितमिति -
प्रतिबन्धनिवअविरिष्टप्राप्तिश्चेत्यर्थः ।। * ।। अधीत्य स्त्रास्यश्निेति ज्ञानमपि कमर्शेषत्वेनाऽवगत-मिति -
इदमाचारदर्शनादिति सूत्रपञ्चकोक्तस्योपलक्षणम्, अत्रापि भिन्नकमः, क्रमशेषत्वेनाऽप्यवगतमित्यर्थः ।
तस्स्वरूपप्रतिपादनपरमिति - तत्स्वरूपोपासनप्रतिपादनपरमित्यर्थः । पृथक्फलसाधनत्वान्न कर्माङ्गस्वमिति -
यद्यपि क्रत्वर्थस्य श्रुतिलिङ्गादिमिरवगत्वादेव नास्याः शङ्काया अवतारः, तथापि विद्यायाः
क्रत्वर्थत्वे "आत्मानमुपासीत' इत्यादिवाक्यमपि प्रमाणयितुमियं शङ्काऽवतारितेति द्रष्टव्यम् । यद्वा

तेषां लिङ्गमात्रत्वेन प्रापकप्रमाणत्वासमभवादित्यत्र तात्पर्यमिति द्रष्टव्यम् । भाष्ये-ननु च कर्तृसंस्कारमुखेनेत्यादिशङ्का-परिहारौ नोपपद्येते, यदि हि "यस्य पर्णमयी जुहूभर्वति' इत्यादिवत्"आत्मानमुपासीत' इत्यादिवाक्येन क्रत्वर्थत्वं बोध्यतेत्, तदा आत्मनो जुह्वादिवत् क्रत्वव्यभिचरिततया क्रतूपस्थापनसमर्थत्वात् जुहूपदस्य क्रत्वपूर्वीयजुहूपलक्षकत्ववत् आत्मशब्दस्य क्रत्वपूर्वलक्षकत्वात् क्रत्वथर्त्वमित्येवं क्रत्वर्थत्वे वाक्यं प्रमाणीकृतं स्यात्, तदा चेमौ शङ्कापरिहारौ युज्येते, न हि तथा प्राग्वाक्यं प्रमाणतयोपपादितम्, अपि तु आचारदर्शनादिलिङ्गेन "यदेव विद्यये'ति श्रुत्या च क्रतुशेषत्वमव-मम्यते, "आत्मा द्रष्टव्यः' इत्यात्मशेषता चावगम्यते, ततश्चोभयसामञ्जस्याय प्रोक्षणस्य

प्रकरणावगतक्रत्वङ्गभावस्य द्वितीयाश्रुत्याऽवगतव्रीहिशेषभावनिर्वाहाय व्रीहिसंस्कारद्वारा क्रत्वर्थत्ववत् उपासनस्यापि कर्तृसंस्कारद्वारा कर्मार्थत्वं निर्वोऽव्यमित्यस्योपक्षिप्तत्वेन "आत्मानमुपासीत' इत्यस्य वाक्यविधया कर्मार्थत्वपयर्न्तप्रतिपादकत्वस्याऽनुपक्षिप्त-त्वादिति केषाचिन्मन्दाशङ्का पराकृता । अत्र वाक्यस्यापि "अतः कर्तुः संस्कारद्वारेण विद्यायाः क्रतुशेषत्व'मिति भाष्ये प्रमाणीकरणात् । भाष्ये-द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात्-इति, "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' "यदाङ्क्ते चक्षुरेव भ्रातृवयस्य वअङ्क्ते यत्प्रयाजानूयाजा इज्यन्ते वर्म वा एतद्यज्ञस्य क्रियते, वर्म यजमानाय भ्रातृव्याभिभूत्यै' इत्यादिविधिविधेयेषु वाक्यप्रकरणावगतक्रत्वङ्गभावेषु पर्णतादिद्रव्येषु अञ्चनादिसंस्कारेषु प्रयाजादिकमर्सु च फलश्रवणमर्थवाद इति पूर्वतन्त्रे निर्णीतम् । न ह्यन्यशेषमन्यशेषं भवतीति - लौकिकवैदिक-

३.४.४

कर्मसाधारणस्याऽऽत्मनो वैदिककर्माव्यभिचरितत्वं न सम्भवतीत्यर्थः । तदसाधारणमेव हि तदङ्गमिति - तत्प्रत्यभि-ज्ञापकमित्यर्थः ।। * ।। गुणमुख्ययोर्विरोध इति अङ्गप्रधानयोः दीक्षणीयासोमयोः "य इष्टया पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत्' इत्येकस्मिन् पर्वकाले प्रसक्तौ प्रधानस्यैव पर्वकालकर्तव्यत्वम्, न दीक्षणीयायाः-इति पूर्वतन्त्रे विर्णीतत्वात् सोमयागेषु सुत्यप्रयोगस्य अहोरात्रव्यापित्वात् विद्यायाश्चाऽन्वहं शीलनीयतया विरोध-सद्भावात् विद्यायाः प्रधानत्वे तत्त्यगेन कर्मणामनुष्ठानं नोपपद्यत इत्यर्थः । ननु विद्ययेति तृतीयाश्रुतेः न शेषत्वप्रमाणत्वम्, तृतीयया साधनत्वमात्रप्रतिपादनेऽपि समाहितसाधनत्वरूपशेषत्वाप्रतिपादनादित्याशङ्कय श्रुतिमात्रस्य तत्राप्रमाणत्वे-ऽपि श्रुतिलिङ्गादिसहितचोदनायाः प्रमाणत्वं

३.४.६

सम्भवति "कर्त्तुस्समीहितं येन सिद्धयत्यङ्गं तदुच्यते । प्रमाणञ्च विधिस्तत्र श्रुतिलिङ्गादिसंयुतः' इत्यभियुक्तोक्तेरित्यभि-प्रयन्नाह - आगमप्रमाणस्य श्रुतिलिङ्गादयोऽनुग्राहका इति । श्रुतिलिङ्गाद्यनुगृहीतस्य विधेः प्रमाणत्वमित्यर्थः ।। * ।। नेयं श्रुतिरिति - विद्यापदश्रुतिरित्यर्थः, न तु प्रकृता तृतीया श्रुतिरिति भ्रमितव्यम् । विद्यामात्रविषया हीयं श्रुतिरिति - य एव वन्हिमान्देशः स एव धूमवान् इतिवत्, यदेवेति सर्वनामावधारणाभ्यां हि व्याप्तिरवगम्यते, यदेव कर्म करोति यद्यत्कर्म करोतीत्यर्थः, ततश्च कर्ममात्रे विद्या साधनत्वेन विधीयते, ततश्च विद्यायाः सर्वकर्माङ्गत्वं विद्याशब्दस्योद्गीथविद्यामात्र-विषयत्वेनाऽवकल्पत इति विद्याशब्दस्य सर्वविद्याविषयकत्वमेव वक्तव्यमिति, अतोऽपि सर्वविषयत्वं विद्याशब्दस्यति द्रष्टव्यम् ।। * ।। "आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाऽभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्याय-मधीयानो धार्मिकान्विदधत' इति छान्दोग्ये श्रूतये, आचार्यकुलवासी सन् वेदमधीत्य यथाविधानं-स्मृत्युक्तनियमैयुक्त

इत्यर्थः । स्मृत्युक्तनियमेष्वपि गुरुशुश्रूषायाः प्राधान्यमुच्यते-गुरोः कर्मातिशेषेणेति, कर्मानवरुद्धकालेन वेदमधीत्येते-यन्वयः, अभिसमावृत्य-गुरुकुलान्निवृत्येत्यर्थः, कुटुम्बे-गार्हस्थ्याश्रमे स्थित्वा, गार्हरथ्येऽप्यविस्मरणार्थं वेदाभ्यासंकुर्वन्नेव धार्मिकान्विदधत्-पुतष्यिादीन् धर्मनिरतान् कुर्वन् धर्मोपयुक्तानर्थान् सम्पादयन्निति वा, एवमर्थज्ञानपर्यन्ताध्ययनवतः कर्मसु निरतेर्विधानात् अर्थज्ञानं कर्माङ्गमित्येवं परे वर्णयन्ति । आचार्यास्तु "भुकत्वा सानन्दमास्ते' इत्यादौ सान-न्दमित्यास्यान्वेतुं योग्यत्वेऽपि न पूर्वनिर्दिेष्टेन वत्वाप्रत्ययान्तेनाऽन्वयः, अपि तु उतरेणास्त इत्यनेनैवेत्येवं दर्शनात्, यथाविधानं गुरोः कर्मातिशेषेणत्यस्य न पूर्वेणादीत्येत्यनेनाऽन्वयः, व्यवहितान्वयदोषप्रसङ्गश्च, अतो "ब्रह्मचारी वेदमधीत्य उपेत्याऽऽहृत्य गुरवेऽनुज्ञातो दारान्कुर्वीत विद्यान्ते गुरोरर्थेन निमन्त्र्य कृत्वाऽनुज्ञातस्य वा स्नान'मित्यादि-स्मृत्यनुसारात् "आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः' इत्यादिश्रुत्यनुसाराच्च गुरोर्यथाविधानमाचार्यस्य नियमनमनतिलङ्घय तस्य कर्तव्यं कर्माति-शेषेणअशेषेणाऽभिसामावृत्य निर्वत्यर् इत्येवार्थो वक्तव्य इत्यभिप्रेत्य निश्शेष-मिति व्याचक्रुः, अतिशेषेणेत्यत्र अतिरर्थाभावे वर्तते, अतिमर्यादोऽमर्याद इत्यर्थदर्शनात् । न च "गुरोः कर्मातिशेषेण जपे'दिति स्मृत्यैकरूप्यात्, तद्वदेव कर्मातिशेषशब्दस्यापि कर्मातिशेषशब्दस्यापि कर्मातिशिष्टकालपरत्वं वक्तव्यमिति वाच्यम्, शेषातिशेषशब्दयोः भिन्नार्थत्वेन तत्प्रत्यभिज्ञानभावात् तस्य

३.४.८

नैष्ठिकब्रह्मचारिविषयत्वात् अस्मदुक्तार्थस्य स्मृत्यनुगुणाचार्योक्तार्थत्वमेव वक्तुं युक्तम् । अविवक्षितार्थत्वादीति - तात्पर्यासिद्धयादिदोषपरिहारार्थमित्यर्थः, अर्थावबोधसुद्दिश्य शब्दोच्चारणे हि लोके वाक्यानां तात्पर्यमवगम्य तन्निर्वाहाय मुख्यार्थासम्भवे लक्षणादिकं कल्प्यते, नतूच्चारणमात्रेण, अत एव गौरश्वः पुरुषो हस्तीति पादानामुच्चारणमात्रेण लक्षणा न कल्प्यते, यदा विशिष्टार्थबोधमुद्दिश्य तेषामुच्चारणमिति तात्पर्यमवगम्यते, तदेव तन्निर्वाहार्थम्, अयं गौर्वलवर्दः अश्वो वेगवान् पुरुषो नियतचेष्टः हस्ती महावलः- इत्यश्वादिपदानां लक्षराध्याहारादिकं कल्प्यते, एवञ्च वेदवाक्यानामर्थावबोध-मुद्दिश्य उच्चारणाभेवे तात्पर्यासिद्धया तन्निर्वाहार्थं लक्षणागौणवृत्यध्याहारव्यवधारणकल्पनोच्छेददोषप्रसङ्गादवश्यं वेदेऽ-प्यर्थावबोधमुद्दिश्य उच्चारणस्य वक्तव्यत्वात् वेदे च लोक इव रागप्राप्तस्यार्थावबोधोद्देश्यकोच्चारणस्या भावात् विधिप्रयुक्त-मेव तदाश्रयणीयम्, विधिश्चाध्ययनविधेरन्यो न दृश्यत इति तेनैवाऽर्थावबोधमुद्दिश्य गुरुमुखोच्चारणानूच्चारणरूपमध्ययनं विधीयत इत्यकामेनापि स्वीकार्यम्, तत्समानार्थत्वात् "आचा-र्यकुलद्वेदमधीत्य' इत्यत्रापि तथोक्तमिति भावः । स्नात्वा जुहुयादिति - वत्वाप्रस्ययेन सति सम्भवे कर्तृकारकैक्यावगमात् तस्य च प्रयोगैक्य एव सत्वात् प्रयोगैक्यस्य चाङ्गाङ्गि-भावमन्तरेणानुपपत्तेः, कालाथर्सायोगस्य सति मत्यन्तरे अयुक्तत्वाच्चेति भावः । ननु अङ्गाङ्गिभावे सत्यपि औपनिषद-ब्रह्माविद्याया एवाङ्गित्वे किं न स्यादित्यत आह - न हि क्रतुज्ञानस्येति । पूर्वभागार्थज्ञान-तुल्यत्वादौपनिषदार्थ-ज्ञानस्येत्यर्थः ।। * ।। ननु उपात्तेषु वेदान्तवाक्येषु "यस्सर्वज्ञः' इत्यादीनां स्वरूपोपदेशपराणां सत्वेन वेद-नोपदेश-परेष्विति भाष्ये, कथमुच्यत इत्यत आह - उपासनवाक्योपमोगित्वादित्यादिना ।। * ।।

३.४.९

अङ्गित्वे ह्याननुष्ठानं नोपपद्यत इति - ननु अङ्गत्वेप्यननुष्ठानं नोपपद्यत एव, यदिचानभिसंहितफलकर्मण एवाङ्गत्वं न' तस्या-ऽनुष्ठानमिति, तर्हि तस्यवाङ्गित्वमप्यस्तु इति चेत्, तथा पूर्वपक्षिणोऽनभिप्रेतत्वादिति भावः ।। * ।।

३.४.११

भाष्ये-प्रस्तुतोद्गीथविशेषनिष्ठत्वादिति, विशेष्यत इति विशेषः, उद्गीथशब्दः उद्गीथविद्यापरः, ततश्च यच्छब्दस्य उद्गीथविद्याक्रियमाणसोमयागनिष्ठत्वादित्यर्थः, केचित्तु उद्गीथाख्यकर्मपरत्वेअपि न दोषः, प्रबलकर्मान्तराप्रतिबद्धफल-जनकत्वरूपं वीर्यवत्तरत्वमुद्गीथेन सम्भवति, उद्गीथस्याङ्गत्वेन फलजनकत्वाप्रसक्तेरिति वाच्यम्, करणानुग्रहस्यैवाङ्ग-कार्यत्वेन तादृशफले वीर्यक्तरवस्य प्रबलकर्मान्तराप्रतिबद्धस्य सम्भवादित्याहुः । एकपदसामर्थ्यं हि श्रुतिरिति - अत्रैकपद-मसहायंवाचि "अभिधातुं पदेऽन्यस्मिन् निरपेक्षो रवः श्रुतिः' इत्यभियुक्तोक्तेः स्वत एव निश्चयसमर्थत्वमिति यावत्, इयांस्तु विशेषः, समभिव्याहृतपदान्तरसापेक्षत्वेन श्रुतित्वमित्यध्वरमीमांसकाः, सङ्कोचकाभावात् प्रापकप्रमाणान्तरनैरपेक्ष्यमपि श्रुतिकोटौ निविशत इत्याचार्याणामभिप्रायः, अत एवानुवादस्सन्निहितपरामर्शीति वाचोयुक्तिर्युक्तिमती, अनुवादस्याऽपि श्रुतिरूपत्वे सन्निध्यनुरोधेन सङ्कोचस्य क्लेशेन निर्वा-ह्यत्वात् । केचित्तु श्रुतिर्न सम्भवतीत्यर्थ इत्यस्य सति सम्भवे अनुवादस्य सन्निहितगामित्वात् प्रकृताप्रकृतग्राहिणी श्रुतिर्न सम्भवतीत्यर्थ इति व्याचक्षते ।। * ।।

३.४.१२

अग्निशब्दस्य तावन्मात्रे प्रसिद्धिस्वारस्यादिति - जुह्वादिशब्दवत् क्रत्वपूर्वीयत्वस्यानादरणीयत्वात्, अयम्भावः, क्रत्व-पूर्वीयत्वं हि न शकत्या उपस्थाप्यम्, अपि तु लक्षणया, सा च मुख्यार्तानुपत्तौ सत्यामवकल्पते, "यस्य पर्णमयी जुहूर्भवति' इत्यत्र तु जुहशब्दस्य जुह्वाकृतिमात्रे पर्यवसायित्वेन तस्याः पर्णतामन्तरेणापि सम्भवात् जुहूस्वरूपमात्र-पर्यवसितपर्णताया आनर्थक्यप्रसङ्गेन जुहूपदस्य क्रत्वपूर्वीयलक्षणाश्रयणेऽपि अग्निशब्दस्य "नक्तं गार्हपत्यमादधाति' इत्यादिवाक्यपर्यालोचनया संस्मारक्ष्िाेषविशिष्टवचनतया तावन्मात्रपर्यवसितत्वेपि आनर्थक्यप्रसङ्गेन जुह्वादिवत् क्रत्वपूर्वीयलक्षणाया अनावश्यकतया क्रतुपर्यन्तत्वा-भावादित्यर्थः । शब्दस्वारस्यामिति - शब्दस्वारस्यमिति तव्यप्रत्यय-स्वारस्यमित्यर्थः,

तव्यप्रत्ययेन स्वाध्यायशब्दवाच्यवेदा-ख्याक्षरराशेः शोपित्वावगमादिति भावः । वेदमधीत्य स्नास्यन्निति - यद्यपि समावर्तनाङ्गकलापस्यैव अध्ययनानन्तर्थं शब्दार्थः, न तु समावर्तनस्य, यदि कत्वाप्रत्ययेन स्नानस्या-ऽध्ययनानन्तर्थं प्रतिपिदापयिषितं स्यात्, तदा पकत्वा भोक्ष्यमाणः स्नाति-इत्यादौ स्नास्य पाकपूर्वभावित्ववत् गोष्ठप्रवेशादिनामध्ययनप्राग्भावित्वस्याऽपि प्रसङ्गात्, तथापि समावर्तनाङ्गानामानन्तर्थे समावर्तनस्याऽप्यानन्तर्यमिति भावः । स्वोपयोग्यर्थज्ञानस्येति - स्नानोपयोग्यर्तमानस्येत्यर्थः, न च तावन्मात्रस्यैवाऽवसरप्रदः स्यात्, नान्य-स्येति, वाच्यम्, तुल्यन्यायतया स्नानानन्तरमेव दारपरिग्रहस्य कर्तव्यत्वेन दारपरिग्रहमारभ्य चाग्निहोत्रादेर्नैरन्तर्येण अनुष्ठयतया तस्यप्यवसरप्रदत्वसम्भवादित्यर्थः, ननु समावर्तनदारपरिग्रहादेरप्यथर्ज्ञानसाध्यतया तस्य च मीमांसामन्तरेण असाध्यत्वात्, अध्ययनशब्दस्य अर्थज्ञानपरत्वाभावे समावर्तनदारपरिग्रहादेरप्यनिष्पत्तिप्रसङ्गादित्यत आह - यावदर्थमानमिति । "न

३.४.१३

शूद्राय मतिं दद्यात्' इत्यध्ययनस्यार्थज्ञानपर्यन्तत्वपक्षेऽपि "स्वाध्यायोऽध्येतव्यः' इत्यध्ययननियमस्य स्वशास्वामात्र-विषयतया स्वतीयेतरशास्वाविहिताङ्गजाते तदध्ययनविधिमन्तरेणैव तत्तदध्येतृभ्यो गृहीत्वानुष्ठानं युक्तमिति त्रैवर्णिकेष्व-भ्युपेतत्वात्, शूद्रं प्रति सर्वासामपि शाखानां स्वीयेतरत्वात् तदध्ययनाभावेपि तदध्येतृभ्यो गृहीत्वा कर्मानुष्ठानं को वारयेत्, ननु शूद्रस्य क्रत्वनुष्ठानापेक्षितं ज्ञानं कार्त्स्न्ेनाक्षेप्यम्, त्रैवर्णिकानान्तु स्वाशाखेतरशाखाविहिताङ्गमात्रविषय-मित्याक्षेपलाघवात् क्रतुविषयस्तानेवाऽधिकुर्वन्ति, न शूद्रमिति चेत्, एवं तर्हि

यस्य कर्मणो यस्यां शाखायां विधानं "भूयस्त्वेनोभयश्रुति' इति न्यायेन प्रधानस्यापि विधानम्, शाखान्तरे तु किञ्चिदङ्गविधानम्, तत्र कर्मणि तच्छास्वा-ध्यायिनामेवाऽधिकारेः स्यात् ज्ञानाक्षेपलाघवात्, न तु शाखान्तराध्यायिनाम्, यस्य कर्मणः तदङगस्य कस्यचित् यस्यां शाखायां विधानं नास्ति, किन्तु शाखान्तर एव साङ्गस्य तस्य विधानम्, तत्र कर्मणि तच्छास्वाध्यायिनामधिकारो न स्यात्, शूद्रवत्तेषां तदनुष्ठानोपयोगिज्ञानस्य कार्त्स्न्ेनाऽऽक्षेप्यत्वात्, तस्मात् त्रैवर्णिकानामपि ज्ञानाक्षेपस्य सम्प्रतिपन्न-तया तद्वदेव शूद्रस्यापि कर्मानुष्ठानोपयोगिज्ञानाक्षेपसम्भवात् तत्तद्वेदविद्भयोऽवगत्य कर्मानुष्ठानमुपपद्यत एवेति अध्ययनस्य अथर्ज्ञानपर्यन्तत्वे शूद्राधिकारस्य अनिवार्यतया "तस्माच्छूद्रो यज्ञेऽनववलृप्तः' इत्यादिनिषेधविधिरेव शरणी-करणीय इति भावः । अध्ययनशब्दवाच्यव्यतिरिक्तत्वाद्विद्याया इति - अध्ययनफलव्यतिरिक्तत्वात् विद्याया इत्यर्थः ।। * ।।

३.४.१६

अर्थज्ञानदर्थान्तरत्वं कर्मेतिकर्तव्यताकत्वच्चेति - कर्माङ्गत्वानर्हवक्यार्थज्ञानादर्थान्तरभूतायाः कर्माङ्गत्वस्वभाववत्तया "कुर्वन्नेव' इति वाक्यस्य अङ्गभूतकर्मविषयत्वेनाऽप्युपपत्तिरस्तीत्युक्तमित्यर्थः ।। *।। भाष्ये-येषां नोयमात्माऽयं लोकः- इति, लोक इव प्रत्यक्ष इत्यर्थः, एके-वजसनेयिन इत्यर्थः ।। * ।। नह्यङ्गेनाऽङ्गिन इति - नन्वेवं सति कर्मणो विद्याङ्गत्वमपि न स्यात्

३.४.१९

अङ्गिना अङ्गोपमर्दस्याऽप्ययोगादिति चेन्न, येषां कर्मणां निवर्त्यत्वं तेषां विद्याङ्गत्वानभ्युपगमात्, न चैततत्परेणाऽपि कर्मभेदाभ्युपगमेन सुवचमिति वाच्यम्, जैमिनिना उपनिषदां जीवातिरिक्तब्रह्मपरत्वमपह्नुत्य देहातिरिक्तात्मपरत्व-मभ्युपगम्य तद्वेदनं पारलौकिकसर्वकर्माङ्गमित्यङ्गीकृतत्वात्, तन्मते विद्यावितर्त्यकर्मणामपि पारगौकिकात्मवेदन-साध्यत्वाविशेषेण विद्यां प्रत्यप्यङ्गि-त्वस्य वक्तव्यत्वात्, अङ्गनाऽङ्गिन उपमर्दो न सम्भवतीति भावः ।। * ।। भाष्ये-प्रकृतं प्रणवेन ब्रह्मोपासनं स्तूयते-इति, प्रकरिष्यमाणमित्यर्थः, "ओङ्कारेण सर्वा वाक् संतृण्णा ओङ्कार एवेदं सर्वम्'इत्युतरत्र प्रणवोपासनस्य विधित्सितत्वादिति भावः । भाष्ये-तेषामाश्रमाणामिति च्छेदः, ननु परामर्शेऽपि आश्रमा गम्यन्त एव, सत्यं गम्यन्त, स्मृत्याचाराभ्यां तु तेषां प्रसिद्धिः; न प्रत्यक्षया श्रुत्या, प्रत्यक्षश्रुतिविरोधे च "विरोधे त्वनपेक्ष्यं स्यात्' इति नयेन सिद्धम्, अथवा अन्धपङ्ग्वादिकर्मानधिकृतविषया स्यात्, ।

३.४.१९

ननु गार्हस्थ्यस्यापि परामर्शमात्रम्, "यज्ञोऽध्ययनं दान'मिति, ततश्च तदपि न सिद्धयेदिति चेत्-सत्यम्, एवं गृहस्थं प्रत्येव सर्व-कर्मणां श्रुतिषु विधानात् श्रुतिप्रसिद्धमेव तदस्तित्वम् । भाष्ये-"येचेमेरण्ये' इति देवयानविधिपरत्वादिति, "तद्य इत्थं विदुः ये चेमेरण्ये श्रद्धा तप' इत्युपासते तेऽर्चिषमभिस्भवन्ति' इति देवयानविधिषरत्वादित्यर्थः, "एतदेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इत्ययन्तु लोकसंस्तवः, न पारिव्राज्यविधिरिति भावः । भाष्ये-योऽग्निमुद्वासयते'-इत्यादिकेति, आदिशब्देन "आचार्याय प्रियं धमामाहृत्य प्रजातन्तुं माव्यवच्छेत्सीः नापुत्रस्य लोकोस्ति, इत्यादि गृह्यते ।। * ।। भाष्ये - अथ गृहस्थाश्रमस्थानुवादः-इति, अन्यतः प्राप्तेरभावेन अनुवादत्वासम्भवेन यद्स्यैव विधिपरत्वमभ्युपेयते, तदितरेषामपि समानमिति भावः ।

परामर्शपक्षे विधानपक्षे तुल्यमित्याद्युपसंहारभाष्यानुसारात्, न च स्तुत्यर्थतया-ऽनुवादसाम्यं प्रमाणान्तरप्राप्तिसाम्यं चोभ्यं सूत्राभिप्रेतमिति टीका-विरोध इति वाच्यम्, वर्षकृतं दुभिक्षमितिवत् प्रमाणान्तरप्राप्त्यभावकृतं साम्यमिति तदर्थात् इहैव विधिपक्षाश्रयणमिति पर्यव-सितोऽर्थः । केचित्तु परामर्शपक्षे विधानपक्षे चेति भाष्यस्य मानान्तराप्राप्तपरामर्शपक्षे मानान्तरविहितपरामर्शपक्षे चेत्यर्थः, नत्वत्रैव विधित्वपक्ष इत्यर्थः, तस्यपक्षस्योत्तरसूत्रप्रतिपाद्यत्वाभावात् । न च अस्मिन् सूत्रे पक्षद्वयस्याप्यनुपक्षेपे "विधिर्वाधारणव'दित्यत्र वाशब्स्याऽवदारणार्थत्वप्रतिपादकभाष्यासामञ्जस्यम्, पूर्वत्र पक्षद्वयोपक्षेप एव अवधारखस्वारस्यादिति वाच्यम्, अप्रयोजकत्वादिति वदन्ति । भाष्ये-तपो ब्रह्मचर्यमिति सर्वैश्शब्दैरिति, यद्यपि श्रुतौ "ब्रह्मचार्याचार्यकुलवासी' इति ब्रह्मचारिशब्द एव श्रूयते, तथापि ब्रह्मचारिधर्म एव ब्रह्मचर्यशब्देनाभिधीयते इत्युत्तरभाष्यानुरोधात् ब्रह्मचारिशब्दस्य ब्रह्मचर्यपरत्वात् ब्रह्मचर्यमित्युक्तमिति द्रष्टव्यम् । भाष्ये-ब्रह्मचर्यतपसोः गृहस्थस्यैव सम्भवादिति, "यज्ञोऽध्ययन'मिति निर्दिष्टस्य गृहस्थस्य सम्भवादित्यर्थः । अत उपकर्वाणेऽपि सम्भवात् गृडस्थस्यैवेत्येवकारोऽनुपपन्न इति चोद्यं निरस्तम्, एवकारस्वेतरव्यवच्छेदक-

त्वामावात् । भाष्ये-त्रित्वेन सङ्गह्येति, अत्र स्कन्ध शब्दो यद्याश्रमपरो न स्यात् ततो यज्ञादीनां आतिस्विकोत्पत्तीनां किमपेक्ष्य त्रित्वसङ्खया व्यवस्थाष्यते, एकैकाश्रमोपगृहीतत्वे त्वाश्रमधर्माणां त्रित्वाच्छक्यं त्रित्वो व्यवस्थापयितुमिति, आश्रमप्रतिज्ञो-पपत्तिरिति भावः ।। * ।। भाष्ये -दिष्टाग्निहोि◌े-इति, मृताग्निहोत्र इत्यर्थः, दिष्टाग्निहोत्रे श्रूयते "उपरि हि देवेभ्यो धारयति' सत्ये-षोऽनुवादः, वर्तमानोपदेशात् हिशबतदाच्चाराच्च उपरिधारणप्राप्तेः हविषोऽभ्यर्हितद्रव्यत्वात् प्रच्छादनं येन केन चित्प्राप्नोति, ततः "स्त्रुक्दण्डे सधिमुपसङ्गृह्याऽनुद्रवति' इतिवाक्यान्तरप्रतिपत्तौ समिन्नियम्यते, तस्मादनुवाद इति प्राप्ते समिधो हविराच्छादनास-

मर्थत्वात् स्त्रुक्दण्ड इत्यनेन हविषः प्राक्देशस्य प्राप्तत्वेऽपि हविष उपर्यप्राप्तत्वात् विधिरिति स्थितं तृतीये । "वीरहा वा एष देवानां योग्निमुद्वासयते' इति, एषेति च्छेदः, भाष्ये-अविरक्तविषया एवेति, गृहस्थस्यं उत्सर्गोष्यिपूर्वकत्यागे दोषदर्शनात् अविहितत्यागविषयैव दोषश्रुतिः, ततश्च प्रविव्रजिषोर्विरक्तस्य त्यागविधिसद्भावात् विहितस्त्यागो न दोषावहः, न च कर्माधिकृतान्धपङ्गुबधिरादिविषया पारिव्राज्यश्रुतिरिति वक्तुं शक्यम्, अविशेषश्रवणात्, जावालश्रुतौ "व्रती वा अव्रती वा स्त्रातको वा अस्त्रातको वा उत्सन्नाग्निरनग्निको वा' इति पृथग्विधावात् । अतः प्रतिपन्नं गार्हस्थ्य "प्रमादादज्ञानाद्वा उद्वासयितुं प्रवृत्तं प्रति वा अविरक्तं प्रति वा' इतिश्रुतिरुपपन्नेति भावः । परे त्वित्यादि - एकाधिकरण्यमित्यादि । यद्यपि कल्पतरावधिकरणभेदः सूचितः, तथापि भाष्यमामत्यारेनुक्तत्वादेवमुक्तमिति द्रष्टव्यम् । इत्यादौ विषय इति - विषयवाक्य इत्यर्थः । देव-दत्तयज्ञदत्तौ मन्दप्रज्ञावित्यादि - अन्यतरः कश्चिदित्यर्थः, ननु च शाङ्करभाष्ये-नह्येवं भवति देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ, अन्यतरस्तु तर्यार्महाप्राज्ञ इति, भवति त्वेवं देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ विष्णुमित्रस्तु महाप्राज्ञ इतीदृशोकत्यसम्भवपरतैव प्रतीयते नत्वीदृशीमुक्तिमभ्युपगम्य यज्ञदत्तस्योच्यमानत्व-निषेधपरत्वमिति चेन्न, न ह्येवं भवति, वह्निस्सेककरणमित्युक्ते वह्नेस्सेककरणत्वमित्युच्यमानत्वं न सम्भवतीत्यस्याऽर्थस्य फलितत्वदर्शनात् फलितार्थमादायाऽनुवादोपपत्तेः । किञ्च दार्ष्टान्तिके "त्रय एते पुण्यलोका भवन्ति' "ब्रह्मसंस्थो-ऽमृतत्वमेति' इति श्रुतावुक्तेरितद्धतया उक्तिं सिद्धवत्कृत्यैवेदृश्योकत्या उच्यमानत्वं न प्राङ्निर्दिष्टानाम् । अपि तु ततोऽन्यस्य परिव्राज

इत्यस्मिन्नर्थ एव दृष्टान्तस्योपन्यसनीयतया दृष्टान्तेऽप्युक्तिं सिद्धवत्कृत्यैव प्राङ्निर्दिष्टानां वोच्यमानत्वं दृष्टम्, अपि तु ततोन्यस्यैवेति, एवमुपन्यासस्योचितत्वेन तत्रैव शाङ्करभाष्यस्यापि तात्पर्यमभिप्रेत्य तथा-ऽनूदितमिति द्रष्टव्यम् । प्रकृताश्रमन्नयेति - केवलयौगिकानाम् आग्नेयीन्यायेन सन्निहितगामित्वादिति भावः ।

३.४..२१

कालभेदेनेति - पूर्वं मन्दप्रज्ञस्यैव इदानीं शास्त्राभ्यासपाटववशेन महाप्राज्ञत्वसम्भवादिति भावः । धर्म्यन्तरोपस्तापकेति - अन्यतरश्चासौ शब्दश्च अन्यतरशब्दः, नत्वन्यतर इत्ययं शब्द इति भ्रमितव्यम्, ततश्च निर्दिष्टमन्दप्रज्ञापेक्षया धर्म्यन्तरो-पस्थापकस्ववत्क्यनिर्दिष्टपदद्वयान्यतरभूतमहत्पदसमभिव्याहारादित्यर्थः । यौगिकस्येति - यौगिकस्यापीत्यर्थः । इह तु ब्रह्मसंस्थशब्दातिरेकेणेति - त्रिष्वेवाश्रमेषु ब्रह्मसंस्थश्चेदमृतत्वभाग्भवतीत्यर्थकत्वेपि विरोधाभावादित्यर्थः । किञ्च ब्रह्मसंस्थपदस्य चतुर्थाश्रमपरत्वे उर्ध्वरेतस आश्रमा न सन्ति "त्रयोः धर्मस्कन्धाः' इति तु विधेयब्रह्मसंस्थतास्तुतये अनुवादमात्रमित्येवमर्थकतया प्रयुक्तस्य "परामर्शं जैमिनिरचोदना'दिति सूत्रस्थ व्याहतार्थत्वप्रसङ्गः, तथा हि सति ब्रह्मसंस्थताविधिरेव संन्यासविधिरूपत्वेन उर्ध्वरेतसामाश्रमस्य सिद्धत्वेन पूर्वपक्षासिद्धान्तयोरप्रवृत्तेरिति द्रष्टव्यम् । अत्र परमंसस्य शिखोपवीताद्यावश्यकत्वं शतदूषण्यामाचार्यैरेव प्रपञ्चितमिति नात्र प्रयत्यते ।। * ।। ।। इति पुरुषार्थाधिकरणं ।। अनन्तराधिकरणद्वयमिति - पुरुषार्थाधिकरणापेक्षयेति शेषः । भाष्ये-परमः परार्थ्य इति, परमात्मप्रतीकत्वात्परमः परस्य ब्रह्मणः अर्थं स्थानमर्हतीति परार्थ्यः । पूर्वं सप्तानां रसानामिति - "एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचस्साम रसः साम्न उद्गीथरसः' इति पृथिव्यादीनां सप्तानां पूर्वं रसानां कीर्ति-तन्वादित्यर्थः । भाष्ये-अत्र प्रतिपादितमुपासनपरत्वमित्यादि, नन्वस्मिन्नधिकरणे "स एव रसानां रसतमः' इत्यादिवाक्यानामु-पास्यविशेषसमर्पकत्वम्, उत स्तुतिपरत्वमित्येव चिन्ता प्रक्रियते, न तु"ओमित्येतदक्षरमुद्गीथमुपासीत' इत्यादिवाक्यानामपि

३.४..२१

उपासनविधिपरत्वमस्ति, नेति विचारः प्रवर्तते, तेषां वाक्यानामनुदाहृतत्वादिति चेत्-भैवम्, रसतमादिवाक्यानामपि स्तावकत्वमिति पूर्वपक्षिणो द्वेधाभिप्रायः, अत्र "उद्गीथमुपासीत' इति नोपासनं विधीयते, उद्गीथविधिसिद्धानुष्ठानौ-पयिकज्ञानसामान्यवाची उपासनशब्दः, अतोऽनुवाद एव । अतश्च रसतमादिवाक्ये समभिव्याहृतविध्यभावेन तदेकवाक्य-तया स्तावकत्वाभावेन उद्गीथपदोपस्थापितक्रतुपकरणगतोद्गीथविथ्येकवाक्यतयैव रसतमादिवाक्यानां स्तावक्रत्वम् । न च स्तावकवाक्यानां स्तुतिविधिसमभिव्याहारनियमोऽस्ति "एतद्ब्राह्मणान्येव पञ्च ह वीषि यद्ब्राह्मणानीतराणि' इत्यतिदिष्टे-ष्वर्थवादेषु व्यभिचारादित्येकः पक्षः, "उद्गीथमुपासीत' इत्युपासनाविधिमभ्युपेत्य तदेकवाक्यतया तत्स्तावकत्वम् नोपासनाविषयसमर्पकत्वम् । "ओमित्येत-दक्षर'मित्यनेनैव उपासनविषयसमर्पणादिति द्वितीयः पक्षः, तत्र द्वितीयपक्षे उपासनानां सद्भावेपि प्रथमपक्षे उपसनाविध्यभावात् अत्र प्रतिपादितमुपासनाविधिपरत्वमित्येतत्तदभिप्रायेणेति द्रष्टव्यम् । स्तुतिर्ह प्रमाणान्तरप्राप्तेति - "विरोधे गुणवादः स्यादनुवादोऽवदारिते । भूतार्थवादस्तद्धानात् अर्थवादस्त्रिधा मतः' इति वाक्यविद्भिरुक्तत्वात्, मानान्तरविरोधे गुणवादो यथा "यजमानः प्रस्तरः' "ग्रावाण।प्रवन्ते' इत्यादौ । मानान्तरावधारिते अनुवादो यथा "अग्निर्हिमस्य भेषज'मिति । साधकबाधकप्रमाण-

३.४.२३

भावे भूतार्थवादो यथा - "वज्रहस्तः पुरन्दरः' इत्यादौ । अप्राप्तगुणविधानेन वेति - अप्राप्तधर्मोपदेशेन भूतार्थवादेनेत्यर्थः । अतश्च कथं गुणविधायकस्यार्थवादान्तर्भाव इति शङ्का न कार्या - अत्र तु तथा सन्निहतत्वाभावेनेति । "एतद्ब्राह्मणान्येव पञ्च हर्वीधि' इत्यादिवचनबलात् पञ्चसञ्चरविध्येकवाक्यत्वमिति भावः ।। * ।। भाष्ये-विधिपरत्वमेव न्याय्यमिति, विस्पष्टविधिविभक्तिश्रवणात् ध्यानपर्यायस्योपासनस्थाऽप्राप्तत्वाच्च उपासनविधिपरत्वमेव न्याय्यम् । ततश्च

समभिव्याहृतोपासनविध्येकवाक्यत्वे सति नासमभिव्याहृतोद्गीथविध्येकवाक्यत्वं युक्तमित्यर्थः । नन्वस्तु समभिव्याहृतोपासनविध्येकवाक्यत्वं, तथापि स्तुत्यर्थत्वेनान्वयः किन्न स्यादिति शङ्कमुपसंहारव्याजेन निरस्यति, भाष्ये-तस्मादुपासनविधानार्था एताश्श्रुतय इति, उपास्यत इत्युपासनम्, कर्मणि बहुवचनात् ल्युट् उपास्यविधानार्था इत्यर्थः, यद्वा उपासने विषयविधानार्था इत्यर्थः, उपासनविषयसमर्पकतया प्रवृत्तिविशेषपरत्वेन सम्भवति व्यर्थप्रयासस्तुत्यर्थत्व-कल्पनायोगादिति भावः ।। * ।। ।। इति स्तुतिमात्राधिकरणम् ।।

शङ्कया सङ्गतिरिति - विचारणात्सङ्गतिरित्यर्थः, ननु "दक्षिणत आहवचीयस्य हिरण्यकशिपावसीनोऽभिषिक्ताया पुत्रामात्यपरिवृताय राज्ञे पारिप्लवमाचक्षीत प्रथमेऽहनि "मनुर्वैवस्वतो राजा' इति पारिप्लवशब्दस्याऽऽख्यानाभिधायकत्व-दर्शनात् कथमाख्यानानां पारिप्लवनामकशस्त्रार्थत्वपूर्वपक्ष इत्यत आह - पारिप्लवा आख्यानानि इह पारिप्लवशब्देन आख्यानशंसनं विवक्षितमिति - शंसनम् शस्त्रम्, आख्यानसाध्यं शसमिित्यर्थः । परिप्लुत्य परिप्लुत्य शंसनमिति पारिप्लव-शब्दस्य शस्त्रेपि वृत्त्युपपत्तेरिति भावः, भाष्ये-विद्याविशेषप्रतिपादनार्थानीति "ते हैते माहशाला महाश्रोत्रियाः स्वमेत्य मीमांसांचक्रुः' इत्याख्याभिकया विद्यायाः परमात्मविषयत्वरूपविशेषप्रतिपत्तेः "मटचीहतेषु कुरुष्वाटक्या सह जायया' इत्याख्यायिकया विद्यायां भक्ष्यनियमनादिरूपविशेषप्रतिपत्तेर्दर्शनात्तदर्थानीत्यर्थः, तथा आख्यायिकाश्रवणे अनवहिता-नामपि अवधानसम्पादनेन प्रतिपत्तिसौकर्या-

र्थानीत्यर्थः, ननु पारिप्लवे वाक्येन विनियुक्तानामपि सन्निधेर्विद्यार्थत्वमपि स्यादिति शङ्कां निरस्यति, भाष्ये-न विद्याप्राधान्यं न्याय्यमिति, "वेधाद्यर्थभेदा'दिति न्यायविरुद्धमिति भावः । ननु "ऐ वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः तस्मादेतेनेष्ट्वा अथान्येन यजेत' इत्यत्राऽन्यशब्दस्य ज्योतिष्टोमेतरसर्वक्रतुपरामर्शिनः "यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स त दीपयति यः पञ्चदशम्' इत्यादिवाक्यशेषगतत्रिवृदादिस्तोमकक्रतुसङ्कीर्तनानुसारेण तावन्मात्रे सङ्कुचितवृत्तित्वापत्त्या अनेकस्तोमकानां क्रतूनां ज्योतिष्टोमात् प्रागप्यनुष्ठानं स्यादिति, ततश्च "एकस्तोमे वा क्रतुसंयोगात्' "सर्वेषां वा चोदनाविशेषात् प्रशंसा स्तोमानाम्' इति पूर्वपक्षसिद्धान्तसूत्राभ्यां प्रवर्तितेन पाञ्चमिकाधिकरणेन विरोधः स्यात्, तस्मादुपक्रमगतसवर्श्रुत्या विद्याप्रकरणगतःरूपानानामपि कर्मसु विनियोगात् पारिप्लवार्थत्वमेव स्यात्, न विद्यार्थत्व-मित्यस्वरसादाह - प्रकरणोपात्तेति । उपक्रमानुसारेण उपसंहारनयनस्यौत्सर्गिकत्वेऽप्यत्रानन्तशाखागतशंसनस्य अशक्यत्वेन स्वत एव उपक्रमगतसर्वश्रुतेः सङ्कोचकापेक्षासत्वात् वाक्यशेषेण चापेक्षितसमर्पणात् वाक्योषगतेष्वाख्यानेषु सङ्कोचः, यथा-"अथैतस्य हारियोजनस्य सर्व एव लिप्सन्ते' इत्यत्र सवर्शब्दस्याऽसङ्कुचितसर्वपरत्वासम्भवेन सङ्कोचका-पेक्षायां ज्योतिष्टोमे प्रकृतेषु ऋत्विक्ष्वेव सङ्कोचः, न सर्वेषाम् । किञ्च यद्युपक्रमगतसर्वश्रुत्या आख्यानानां सर्वेषां गृहीतिस्स्यात्, तदा "मनुर्वैवस्वतो राजा' इत्यादिवाक्यशेषविशेषणमनर्थकमेव स्यात्, न चार्थवत्वे सम्भवति आनर्थक्यं युक्तम्,

अतः सङ्कोचः । "यो वै त्रिवृदन्यम्' इत्यादिवाक्यशेषस्तु संयोगमात्रेणैवोपपद्यते, अन्यशब्देन चाविशेषः प्रतीयते, त्रिवृदादीनामनेकस्तोमकेष्वपि विनापि व्याप्त्या संयोगमात्रेण दीपकत्वं सम्भवतीति वैषम्यमस्तीति द्रष्टव्यम् ।। * ।। हिरण्यदक्षिण्यत्ववांक्येनोति - रजतहिरण्यस्येत्यर्थः, तस्माद्धिरण्यमिति श्रुतेरिति भावः ।। ।। इति पारिप्लवार्थाधि-करणम् ।।

३.४.२५

भाष्ये-उर्ध्वरेतसो यज्ञाद्यभावादिति, "ये चेमेरण्ये श्रद्धा तपः इत्युपासते' इति विद्यासम्बन्धबोधकवाक्यानामान्यपयर्-माश्रयणीयमिति भावः, यदि च अवश्यमूर्ध्वरेतसां विद्यासम्बन्धो वक्तव्यः' तर्हि अङ्गानुप्रकृतीविद्यायाः फलानवाप्तेः अङ्ग-भूतयज्ञाद्यनुष्ठानस्य आवश्यकत्वात् तदर्थं दारान्तरं परिगृहद्याधानं कर्तव्यम् । न च दारपरिग्रहे सति उर्ध्वरेतस्त्व-विरोधापत्तिः, विद्याङ्गकर्मार्थं दारपरिग्रहेपि भीष्मवदूर्ध्वरेतस्त्वोपपत्तेः, "सोयमुपनयन्नादधीत होमसंयोगात्' इति पूर्व-तन्त्राधिकरणपूर्वपक्षरीत्या पूर्वपक्षः, तत्र हि उपनयनाङ्गहोम आहवनीये कर्तव्यः, अस्मिन्दारपरिग्रहे सति उपनयनविधि-पूर्वकविद्याग्रहणोत्तरकालविहितो दारपरिग्रहः प्रजार्थो भविष्यतीति पूर्वपक्षः प्रवर्तितः, तद्वदत्रापि, नचाश्रमधर्मैतेव विद्याङ्गसिद्धेः यमाद्यनुष्ठानार्थम्, आदानदारसङ्गूहयोराक्षेषो न प्राप्नोतीति वाच्यम्,

यज्ञेनेत्यादितृतीयाश्रुत्या विशिष्य यज्ञादीनामपि विद्याङ्गत्वविधानात्, कर्मत्यागश्रुतिस्तु विद्याङ्गकर्मविषया । सिद्धान्तस्तु केवलपुत्रार्थमिव केलधर्मार्थं दार-सङ्गहायोगात् "धर्मे चार्थे च नातिचरितव्ये'ति स्मृतेः, भीष्मस्य तु धर्मप्रजोभयार्थे दारपरिग्रहे निर्वृत्त एव पितृप्रीत्यर्थ-मूर्ध्वरेतस्त्वप्रतिज्ञया पुत्रोत्पादनान्निवृत्तौ सत्यां दाराणां धर्मार्थत्वमात्रमवशिष्यमिति तेन यज्ञाद्यनुष्ठानम्, न तु ऊर्ध्वरेतस्त्वप्रतिज्ञानन्तरं केवलधर्मार्थदारसङ्ग्रहः, श्रुतिस्मृतिसिद्धनिकेतनत्वादिसंन्यासधर्मपर्यालोचनया न संन्यासिनो दररपरिग्रहादिकमुपपद्यत इति भावः । विद्यया फलोत्पत्तौ न कर्मापेक्षेति - क्रत्वर्थत्वाभावेन स्वशेषिभूतकर्मापेक्षा नास्तीत्यर्थः, निगमनप्रयोजनमाह - इदञ्च निगमनमिति ।। * ।। ।। इति अग्नीन्धनाद्यधिकरणम् ।।

३.४.२६

यज्ञादिश्रुतेरश्ववत्, यज्ञादीनां ज्ञानसाधनत्वे सत्येव-इत्यदिभाष्यमयुक्तम्, प्रकृतिप्रत्यययोर्मध्ये प्रत्ययार्थप्रादान्येन इच्छायामेव तृतीयया साधनत्वप्रतीतेरित्यत्राह - परमसाध्येच्छया विनेत्यादि । नन्वन्नद्वेषेण काश्र्यं प्राप्तस्य तत्परिहारा-यान्यविषयौन्मुख्यलक्षणायामिच्छायां सत्यामपि उत्कटाजीर्णादिप्रयुक्तधातुवैषम्यदोषात्, तत्र प्रवृत्तिपर्यन्ता रुचिर्न जायत इति तद्रोचकौषधवत् निरतिशयानन्दं ब्रह्म तत्प्राप्तौ विद्यासाधनमित्यर्थे प्राजीनबहुजन्मानुष्ठितानमिसंहितनित्य-नैमित्तिककर्मोपसञ्जातचित्तप्रसादमहिम्ना सम्पन्नविश्वासस्य पुरुषस्य ब्रह्मावाप्तौ तत्साधनविद्यायाञ्च औन्मुख्यलक्षणाया-मिच्छायां स्यामपि अनादिमवसञ्चितानेकदुरितदोषेण आस्तिककामुकस्य हेयकर्मणीव विषयभोगप्नावण्यं सम्पादयता प्रतिबन्धाद्विद्यासाधने श्रवणादौ प्रवृत्तिपर्यन्ता रुचिर्न जायत इति प्रतिबन्धादिनिरासपूर्वकमिच्छासम्पादकयज्ञादिविधान-मुपपन्नतरमिति चेन्न, सत्यम्, यद्यनेन वाक्येन कर्मणामिच्छादिसंयोगः प्रतिपाद्यते, तदा श्रुतनिर्वाहाय कथञ्चिदियं प्रणाड्याश्रीयेत, नत्वेतदस्ति, नत्वेतदस्ति, प्रकृतिप्रत्ययार्थयोर्मध्ये प्रत्ययार्तस्य प्राधान्यमित्यौपगवादिदृष्टसामान्य-न्यायापेक्षया इच्छाविषयतया शब्दबोध्य एव शब्दसाधनान्वय इति स्वर्गकामादिवाक्ये क्लृप्तविशेषन्यायस्य बलीयस्त्वात्, "अश्वेन जिगमिषति' "असिना जिधांसति' इत्यादिलौकिकप्रयोगे न अश्वादिरूपसंधनस्य "तसिद्वजिज्ञासितव्यं' "निदिध्यासितव्यम्' इत्यादिवैदिकप्रयोगे च तव्यप्रत्ययार्थीभूतविधेश्च सन् प्रत्यया-

३.४.२६

भिहितेच्छाविषय एव गमनान्वयस्य क्लृप्तत्वाच्च प्रकृत्यभिहितायां विद्यायामेवाऽन्वयस्य क्लृप्तत्वादिति भावः । उत्पत्ता-वपेक्षैव सूत्रप्रतिपाद्येति - यद्यपि परैः पूर्वसूत्रे फलोत्पत्तावनपेक्षत्वमस्मिन्सूत्रे विद्योत्पत्तौ कर्मापेक्षितत्वमित्येवोक्तम्, तथाप्यश्ववदित्यत्र यथाऽश्वो न लाङ्गलाकर्षणे विनियुज्यते, रथचर्यायान्तु युज्यते, एवमाश्रमकर्माणि विद्यया फलोत्पत्तौ नापेक्ष्यन्ते, उत्पत्तौ त्वपेक्ष्यन्त इति, भाष्योक्तत्वात् फलोत्पत्तावनपेक्षाष्यस्मिन्नधिकरणे प्रतिपाद्यत इत्यभिप्रेत्य दूषणमुक्तमिति द्रष्टव्यम् । अनन्तराधि-करणपूर्वपक्षहेतुरिति - आद्यसूत्रापेक्षया अनन्तराधिकरणे इत्यर्थः ।। * ।।

।। इति सर्वापेक्षाधिकरणम् ।।

३.४.२७

दूषयति - शङ्का तावदयुक्तेति । तथापीति वैयर्थ्यमिति - यमाद्यपेक्षयैव शमदमादेर्विरोधप्रसक्तिसत्त्वेन तदनुपेक्षया साकं विरोधाभावात् विरोधसूचकस्य अपीत्येतस्य वैयथ्यम्, ततश्च तथापीत्यस्य यज्ञाद्यपेक्षायामपीत्येवार्थो न तु यज्ञाद्यपेक्षत्वेपीत्यर्थ इति

३.४.२८

भावः । पूर्वसूत्रविवक्षितस्येति - स्तुत्यर्थपरत्वनिरासस्येत्यर्थः । ततोपि वरमिति - विविदितषासंयोगसमर्थनपरे पूर्वसूत्रे स्तुत्यर्थत्वनिरासस्याऽपेक्षिततया तत्रैव तन्निरासस्योचितत्वादिति भावः ।। * ।। ।। इति शमदमाद्यधिकरणम् ।।

अस्ति नेति विचार्यत इति - प्राणविदामिति शेषः । प्राणविद्यानिष्ठस्यापीति - ननु वामदेव्योपासननिष्ठस्य "न काञ्चन परिहरेत्तद्व्रत'मिति सर्वस्त्र्यपरिहारानुमतिदर्शनात्, किं पुनर्न्यायेन ब्रह्मविदामपि सर्वस्त्र्यपरिहारप्रसङ्गः । यदि च विद्यान्तरप्रकरणे श्रुतस्य विद्यान्तरान्वये प्रमाणाभावात् वामदेव्योपासनाङ्गस्य सर्वस्त्र्यपरिहारस्य न ब्रह्मविदः प्रसक्तिरस्तीति,

तर्हि प्राणविद्याङ्गभूतस्य सर्वान्नीनत्वस्य न ब्रह्मविदि प्रसक्तिरस्तीति चेन्न, वामदेव्योपासने "न काञ्चन परिहरेत्तद्व्रत'मिति सर्वस्त्र्यपरिहरणे विस्पष्टविधिविभक्तिश्रवणेन विधेयत्वावगमेपीह तादृशविधिप्रत्ययाभावेन सर्वान्नीनत्वस्याङ्गत्वेन विधानाभावेन "एवंविदि पापं कर्म न श्लिष्यते' इत्यादिवत् "न ह वा एवंविदि किञ्चनाऽनन्नं भवति' इत्यत्रापि अभक्ष्यभक्षणकृतदोषाभावमात्रप्रतिपादनपरत्वे सिद्धे किमिदं । कामकृतेष्यभक्षणे दोषाभावप्रतिपादनपरम्, उत प्रामादिक एवेति चिन्ताया एवास्मन्नधिकरणे प्रवृत्ततयगा तत्र च प्राणविद्यायाः कामकारस्थलेऽपि अन्नदोषास्पर्शरूपफल-सामर्थ्ये पूर्वपक्षिणोपक्षिप्ते सति यदि प्राणविद्याया अपि ईदृशं सामर्थ्यम्, तर्हि सर्वविद्यश्रेष्ठाया ब्रह्मविद्याया अपि कामकृताभक्ष्यभक्षणकृतदोषासस्पर्शहेतुत्वं किन्न स्यादिति यदि कश्चिच्चोदयेत्, तम्प्रति तदपि पूर्वपक्षिणो नानिष्टमित्येवं परत्वादस्य ग्रन्थस्य न दोषगन्ध इति ध्येयम् । पूर्वपक्षभिप्रेतेति - यद्यपि प्राणविद्याविषयविचारे न ब्रह्मविद्याया सङ्गति-रस्ति, तन्मात्रपर्यवसितत्वादस्य विचारस्य, नहि ब्रह्मविदः सर्वान्नीनत्वसदसद्भावयोः पूर्वोत्तरपक्षफलत्वपिति शक्यते वक्तुम्, सिद्धान्ते ब्रह्मविदः सर्वान्नीनत्वाभावस्य प्राणविदः सर्वान्नीनत्वाभावे साधकत्वोपन्यासेन फलत्वासम्भवात् । ब्रह्मविदामपीति - ननु ब्रह्मविदां दोषसत्त्व्ेपि "न ह वा एवंविदि किञ्चनाऽनन्नं भवति' इति प्राणविदां दोषाभावकीर्तनान्ना-

३.४.३०

भक्ष्यभक्षणदोष इति चेन्न, "एवंविदि पापं कर्म न श्लिष्यते' इति ब्रह्मविद्विषयेति दोषाभावदर्शनसाम्यात्, यदि च "नाविरतो दुश्चरितात्' इति दुश्चरितस्य निषिद्धतया तद्वचनं प्रामादिकविषयमिति, तर्हि "प्राणसंशयभाषन्नो योऽन्नमत्ति यतस्ततः । लिष्यते न स पापेन पद्मपत्रमिवाम्भसा' इति तस्मात् "ब्राह्मणः सुरां न पिबेत्' इत्यादिक्लृप्तसामान्य-शास्त्राविरोधेनैव "न ह वा एवंविदी'ति शास्त्रस्य कल्प्यविधिभावस्य निर्वाह्यत्वात्, यद्वा नायं फलविधिः, क्लृप्तो हि विशेषविधिः सामान्यविधिं बाधते, अत्र क्लृप्तसामान्यविधिविरोधे " न ह वा एवं विदि किञ्चनानन्नं भवति' इत्यस्य फलविधिकल्पनायोगेन अर्थवादत्वस्यैव युक्तत्वात्, न चैवं "एवंविदि पापं कर्म न श्लिष्यते' इत्यादेरपि स्तुतिमात्रत्वप्रसङ्गः, पाप्मनामश्लेषाभावे अनिर्मोक्षप्रसङ्गेन सकलपापाश्लेषस्य मोक्षविधिशास्त्रापेक्षितत्वेन फलविधित्वस्य वक्तव्यत्वात्, प्राणविद्यायाश्च च्येष्ठत्वश्रेष्ठत्वादिफलकत्वेन फलाकाङ्क्षाया अभावात्, "स होवाच किम्मेऽन्नं भविष्यतीति यत्किञ्चिदिद-माश्वभ्य आशकुनिभ्य इति होचुः तद्वा एतदनस्यान्नम्' इति श्वपर्यन्तप्राणिजाते विहितस्य प्राणविद्याङ्गस्य प्राणान्नत्व-चिन्तनस्य स्तुतिः क्रियते "न ह वा एवंविदि किञ्जनानन्नं भवति' इति, अतः फलविधित्वाभावात् प्राणविदः प्राणात्यय एव सर्वान्ननुमतिः, अनाविष्कुर्वत्रन्वद्या'दित्यत्र क्लृप्ततैव विशेषविधेः "नाविरतो दुश्चरिता'दिति

३.४.३२

विशेषशासिेण सङ्कुचितविषयत्वम्, इह तु क्लृप्तसामान्यशास्त्रानुरीधेन "न ह वा एवंविदि' इत्यस्य विधिकल्पनाभङ्ग इति विवेकः, केचित्तु परमतवद्वामदव्योपासकस्य सर्वस्व्यपरिहारवत् प्राणविद्यानिष्ठस्य तदङ्गतया सर्वान्नानुमतिर्विधीयत इति पूर्वपक्षं कृत्वा सिद्धान्तमपि तथैव वणयन्ति, परापरमतदूषणपरस्य टीका ग्रन्थस्य च परापरोक्तसूत्राक्षरयोजनामात्रदूषण-परतया विरोधप्रसङ्गो नास्तीति प्रतिपादयन्ति । ज्ञानस्य फलत्वादिति - अङ्गभूतज्ञानस्य फलत्वेन कीर्तनादपापश्लोप-श्रवणवदर्थवाद इत्यर्थः ।। * ।।

।। इति सर्वान्ननुमत्यधिकरणम् ।।

३.४.३३

किं विद्याङ्गभूतानीति - विद्याङ्गभूतान्याश्रमकर्माणि नवेति विचारः, आश्रमकर्माणीत्यस्य विवरणं केवलाश्रमिणोपीति, न तु विद्याङ्गभूतान्याश्रमकर्माणीति पक्षनिर्देश इति मन्तव्यम्, विद्याङ्गभूतानामाश्रमकर्भत्वस्यैवाऽस्मिन्नधिकरणे सिषाधयिषितत्वादिति द्रष्टव्यम् । केवलाश्रमाङ्गत्वमिति - आश्रमशब्देन तद्वान् पुरुष उच्यते, आश्रमनिेष्ठपुरुषार्थत्व-मित्यर्थः, अथवा केवल आश्रमो यस्येति बहुव्रीहिः पुरुषो अन्यपदार्थः । कर्मान्तरत्वे सतीत्यादि - अयमिान्वयः-नित्या-नित्यसंयोगविरोधप्रसङ्गेन एकस्य कर्मणो विनियोगपृथकत्वस्याप्यभावेन च कर्मान्तरत्वे सति विद्याभ्गसूतानां केवलाश्रमाभ्गत्वासम्भवात् तान्यमुसुक्षोर्नानुष्ठेयानि, विनियोगपृथकत्वेन नित्यानित्यसयोगविरोधाभावात्, कर्मान्तरत्वं नास्ति चेत्, विद्याङ्गानामेव तेषां केवलाश्रमाङ्गत्वस्भवात् केवलाश्रमिणोप्यनूष्ठेयानीति । अनुष्ठानञ्च विरुद्धमिति - वास्तवस्य विरोधस्य न वाक्यसहस्रेणापि निवृत्तिर्यक्तेत्यर्थः, एतेन,"एकस्य तूभयत्वेसयोगपृथकत्वम्' इति पूर्वतन्त्राधि-करणमपि आक्षिप्तं द्रष्टव्यम् ।। * ।। नित्यानित्यसंयोगविरोधपरिहारः

सूत्रद्वयफलमिति - अयम्भावः - सिद्धरूपेस्तुनि नित्यत्वानित्यत्वादेरिव नित्यत्वकाभ्यत्वयोर्न वस्तुतो विरोधः, षोडशिग्रहणे कर्तव्यत्वाकर्तव्यत्वर्यारिव सम्भवात्, अपितु एकस्य वाक्यस्य उभयबोधकत्वासम्भवात्, विध्येकावसेये च प्रमाणान्तराप्रवृत्तेः विरोधो वक्तव्यः, अत्र तु विनियोवक-प्रमाणद्वयमप्यस्ति, तत्र प्रमाणद्वयवशादुमयार्थत्वेन विरोध, ननु विद्याया नित्यसमीहितफलत्वाभावतदङ्गत्वेना-ऽनुष्ठीयमानस्य नित्यत्वं न स्यात्, ततश्च विद्यार्थत्वं कर्म कुर्वतः प्रत्यवायपरिहाराय नित्यपयोयोऽपि पृथकर्तव्यः, न चैवं नित्यप्रयोगस्यैवाऽनित्यत्वं स्यादिति, चेन्न, अथा स्वर्माथेर् ह्यग्निहोत्रप्रयोगः काभ्यो नैमित्तिको वा नित्यमधि-

३.४.३५

रुत्यैव निविशत इति न्यायात नित्यप्रयोगं विकृत्य प्रयोगस्य उभयत्राप्यविशेषात् नित्यविधेः प्रयोजकत्वमात्रं बाधित्वा निविशते; यथा "यदि राजन्यं वैश्यं वा याजयेत् स यदि सोमं विभक्षयिष्येत्, न्यग्रोधस्तिभिनीराहृत्य ताः संपिष्य दध्नयुन्मृज्य तमस्मै मक्ष प्रयच्छेन्न सोमम्' इति नित्यं सोमं विकृत्यैव निविशते, न तावता नित्यप्योगस्याऽनित्यतापत्ति, एवमिहापि न विरोध इति भावः । न त्वेकस्येति - फलमिति शेथः ।। * ।। भाष्ये- कर्मस्वरूपभेदे प्रमाणाभावाञ्चेति, मासाग्निहोत्रे सन्निहिताग्निहोत्रहोमासम्भवेनाऽनुवादत्वासम्भवेन विधित्वे सिद्धे विहितस्य विधानायागेन विहितात्प्रसिद्धा-ग्निहोत्रहोमात् अस्य होमस्याऽन्यत्वसिद्धौ तत्र वर्तमानमाख्यातपरतन्त्रमग्निहोत्रमिति नाम्ना प्रसिद्धाग्निहोत्रप्रत्यभिज्ञापन-समर्थमिति तत्र प्रकरणभेदात् कर्मान्तरत्वमस्तु नाम्, इह तु यज्ञादिषु विधेरश्रवणात् विद्यायामेव विधिश्रवणेन न प्रसिद्धयज्ञापेक्षयैषा भेदः, नन्विहापीष्यमाणविद्योद्दोन यज्ञादिकमेव विधयम्,न तु विद्या, तस्याः फलत्वेन विधेयत्वा-यागात् अग्निहोत्रतुल्यत्वमेव, न च प्रसिद्धस्यैव यज्ञादेः फलसम्बन्धितया विधानमस्त्विति वाच्यम्, तर्हि प्रसिद्धस्यैवाग्नि-होत्रस्य माससम्बन्धितया विधानप्रसङ्गात् । अतो मासाग्निहोत्रभेदवत् इह यज्ञादिशब्दोपात्तस्य प्रसिद्धयज्ञादेरनन्वत्वे प्रसिद्धयज्ञादीनां मध्य कस्य रूपमतिदिश्य इति दुर्ज्ञानत्वात्, यज्ञादिनाम्ना द्रव्यदेवताद्यतिदेशे देवतोद्देश्यकद्रव्यत्याग-त्वादिरूपयज्ञादि ाब्दप्रवृविनिमित्तप्राप्तेरनिवार्यत्वेन विधेयस्य कर्मणो यज्ञादिभिन्नत्वासम्भवाच्च, "यज्ञोऽध्ययनं दानमिति प्रथमः''यज्ञानां यपयज्ञोस्मि "भोक्तारं यज्ञतपसाम्' इत्यादिष्विव प्रसिद्धयज्ञादिपरत्वमेव युक्तमिति भावः ।। * ।। आदि-शब्दो यज्ञादिवाक्पर इति - यज्ञादीनां प्रतिपादकं वाक्यं यज्ञादिवाक्यं "कषाये कर्मभिः पके' इत्यादिकं गृह्यते । अङ्गत्वं वदतेति अयमिहान्वयः-अङ्गत्वं वदता "यज्ञेन दानेने'त्यादिना ये निर्दिष्टाः तानेवाङ्गत्वेन किञ्चित्कारं वदद्वाक्यमपि यज्ञादि-

३.४.३७

पर्यायधर्मकर्मादिशब्देन निर्दिशतीत्यर्थः इति । ततश्च तत्रापि वाक्ये प्रसिद्धविलक्षणधर्मभ्रान्तिः कार्योति भावः । सिद्धवदिति - सिद्धवन्निदेशरूपादित्यर्थः । "अग्निहोत्रं जुहोति' इत्यादौ हि साध्यावस्तार्थाभिधायित्वस्वभावेना-ऽऽख्यातेनापूवर्म् रूपमुत्पाद्यते, नैव कृदन्तेषु यज्ञादिशब्देष्वित्यर्थः ।। * ।। ।। इति विहिंतत्वाधिकरणम् ।।

अकृतदार इति - समावृत्य अकृतविवाह इत्यर्थः ।। * ।।

३.४.३९

भूयोधर्माल्पधर्मकयोः भक्तिप्रपत्त्योर्व्यभिचारादाह - शक्तमिति । पारिव्राज्यव्यावृत्त्यर्थमिति - ननु मृतभार्यस्याकृतदारस्य वा दारालाभेन दारसाध्याश्रमासम्भव्रेपि सन्यासाश्रमस्य सम्भवात् किमित्यनाश्रमित्वं

स्त्रोदव्यमिति शङ्काव्यावृत्यर्थम् अवैराग्ये सतीत्युक्तमित्यर्थः । परे चेत्यादि - आश्रमबहिष्ठनम्नचर्यास्मरणपरमिति । आश्रमासाधारणधर्मबहिर्भूतनग्नचर्या-स्मरणपरमित्यर्थः, यद्यपि शाङ्करभाष्ये सवर्तकप्रभृतीनाच्च नग्नचर्यादियोगात् अनपेक्षिताश्रमकर्मणामपि महायोगित्वं स्मर्यत इति महायोगित्वस्यैव स्मर्यमाणत्वमुक्तम्, न तु नम्नचर्यायाः, तथापि

नग्नचर्यावदो महायोगित्वं स्मयर्त इत्युक्ते महायोगिनो नग्नचर्या स्मर्यत

३.४.४०

इत्युक्तप्रायत्वात् तथोक्तमिति द्रष्टव्यम्, ननु नग्नचर्यायोगात् अनपेक्षिताश्रमकर्मणां महायोगित्वं स्मर्यत इति किमभिप्रेतम्, नग्न-चार्यायोगात् महायोगित्वं स्मर्यत इत्यन्वयोऽभिप्रेतः,ततश्च "अपि स्मर्यते' इति सूत्रस्य "विशेषानुग्रहश्च' इतिसूत्रस्य चासाधा-रणधर्मानुग्राह्यत्वपरत्वम्, उत

न्नाचर्यायोगादनपेक्षिताश्रमकर्मणामित्यन्वयो-ऽभिप्रेतः, ततश्च "अन्तरा चापि तु तद्दृष्टेः' इति- सूत्रस्य च "अपि स्मर्यत' इति सूत्रस्य चाश्रमकर्मानपेक्षत्वपरत्वमिति विकल्पमभिप्रेत्य प्रथमं दूषयति । विद्यायास्साधारणधर्मा-नुग्राह्यत्व इति - अतस्सूत्रद्वयस्येति । साधारणधर्मानुग्रह-परत्वमिति शेषः, द्वितीयं दूषयति - उन्मत्तचर्यास्मरणेनेति । दृष्टे सम्भवतीति - आश्रमकर्मसाध्यस्यादृष्टस्थानेनानुत्पत्तेः माहात्म्याच्छादनं दृष्टमेव प्रयोजनमिति भावः । विध्यन्तरादर्शनादिति - "तपसा ब्रह्मचर्याण श्रद्धया विद्यया आत्मानमन्विष्ये'दिति भावः ।। * ।। ।। इति विधुराधिकरणम् ।।

३.४.४२

अवकीर्णिपशुश्च तद्वदिति - "अवकीर्णिपशुश्च तद्वदाधानस्याऽप्राप्तकालत्वात्' इति जैमिनिसूत्रम्, अवकीर्णिनां ब्रह्मचयर्-प्रच्युतानां "ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेत' इति स्मृतिविहितनैर्ऋतपशुरूपं प्राश्चित्तं सिद्धंकृत्व तत्राऽग्नि-र्वचारितः, तदधिकरणमित्थम्-"यदाहवनीये गुहोती'ति सर्वेषां होमानामाहवनीयाधारत्वविधेरवकीर्णी ययाऽवकीर्णः, तया सह वा भार्यामधिगम्य वा अग्नीनाधाय आहवनीये अवकीर्णिपशुं करोतु इति पूर्वपक्षं कृत्वा "जायापती अग्निमादधीयाताम्' इत्याथानस्य दम्पत्तिकर्तृकत्वस्मरणेन परिस्त्रया सहाग्न्याधानासम्भवात् "अविष्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्' इत्यस्खलितब्रह्मचर्यस्य विवाहविधानेन अकृतप्रायश्चितस्य विवाहायोणाच्च अग्न्याधानासम्भवात् उपनयन-होमवत् लौकिकाग्नावेवावकीर्णिपशुरिति पूर्वाधिकरणे लौकिकाभावेव उपनयनहौजः समावर्तनानन्तरं नुतस्यदारपरिग्रहस्य उपनयनात्पूर्वमसम्भवेन अग्न्याधानरहितस्य माणवकस्याऽऽहवनीयाभावात् लौकिकाग्नावेवोपनयनहोम इति निरूपितम्, तदर्थस्सूत्रे तद्विदिति परामृश्यते ।। * ।।

इदञ्चोद्यसूत्रमिति - अस्योपपातकत्वप्रतिपादनपूर्वकप्रायश्चित्तसद्भावप्रतिपादनमुखेन ब्रह्मविद्याधिकारप्रतिपादनपरत्वा-देवमुक्तम्, प्रायश्चित्तसद्भावमात्रप्रतिपादनपरत्वे तु सिद्धान्तसूत्रत्वमेव, नहि सामान्यमुखेन प्रवृत्तौ नैर्ऋतपशुः "आरूढो नैष्ठिकं धर्मम्' इति स्मूत्या विशेषविषययापि न सङ्कोचमर्हति, स्मृतेर्नैष्ठिकरूपब्रह्मचारिविशेषविषयत्वेऽपि "प्रायश्चित्तं न पश्यामि' इति

३.४.४२

स्मृत्या विशेषविषययापि न सङ्कोचमर्हति, स्मृतेर्नैष्ठिकरूपब्रह्मचारिविशेषविषयत्वेऽपि "प्रायश्चित्तं न पश्यामि' इति प्रायश्चित्तदर्शनाभावेन प्रायश्चित्ताभावानुमानम्, तेन च श्रुत्यनुमानमिति विलम्बद्वयमस्ति "यो ब्रह्मचार्यवकिरेत्' इति प्रायश्चितश्रुतेः सामान्यमुखेन प्रवृत्ततया सामान्यद्वारा विशेषपर्यवसानमित्येक एव विलम्ब इति प्रायश्चित्तश्रुतेरेव बलीयस्त्वम्, ततः "प्रायश्चित्तं न पश्यामि' इति स्मृतिस्संव्यवहार्यतापादकप्रायश्चित्ताभावपरैवाभ्युपगन्तव्या, ततश्च प्रायश्चित्तसद्भावमात्रपर्यवसितत्वेन चोद्यसूत्रत्वं तन्मुखेन विद्याधिकारप्रतिपादनपर्यन्तत्वमस्य सूत्रस्य प्रकृतोपयोगा-द्वक्तव्यमित्यभिप्रेत्य चोद्यसूत्रत्वमुक्तमिति द्रष्टव्यम्, ननूपकुर्वाणस्येव नैष्ठिकादीनां मध्वशननिषेधस्यादर्शनात् कथं साम्यमित्याशङ्कयाह - भाष्ये तदुक्तं स्मृतिकारैरिति । प्रायश्चित्तञ्च परामृशतीति - ननु प्रायश्चित्तं न प्राङ्निर्दिष्टम्, ब्रह्मचर्याग्नीन्धनभैक्षचरणसत्यवचनमधुमांसगन्धमेंदिस्यप्नेञ्चनाभ्यञ्चनयानोपानच्छत्रकामक्रोधलोभमोहवादवादनस्नान -दन्तधावनहर्षनृत्तगीतादिवर्जनस्यैव प्राङ्निर्दिष्टत्वात्, तद्वयाख्यातृभिश्च उत्तरेषामप्याश्रमाणामिदं वृत्तं द्रष्टव्यम् किमविशेषेण नेत्याह - अविरोधीति । यत्स्वाश्रमाविरुद्धं द्यूतादिवर्जनं तदेव भवति, नतु विरुद्धम्, अतो नाग्नीन्धनं प्रव्रजिते प्राप्नोति, न गुरुकुलवासो वैस्वानसे प्राप्नोति न ब्रह्मचर्यं गृस्थे प्राप्नोतीति व्याख्यातम्, ततश्च प्रायश्चितस्या-ऽप्रकृततया नैतच्छब्दस्यप्रायश्चित्तपरामर्शित्वं सम्भवति, अत एव स्वश्रमाविरोधिशब्दः स्त्रीसंसर्गादिनिमिवप्रायश्चितादेः

गृहस्थेष्वनापातार्थ इति ग्रन्थोष्यसङ्गतः,स्त्रीसंसर्गादिनिमिवप्रायश्चित्तादेः प्रागनुक्तेरिति चेदत्राहुः, ब्रह्मचर्यस्याऽतिदेशे "गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजेत् तस्याजिनमूर्ध्ववालं परिधाय लोहितपात्रस्सप्त गृहान् भैक्षं चरेत् कर्माचक्षाणः सम्वत्सरेण शुध्येत्' इति प्रायश्चिवप्रकरणे वक्ष्यमाणस्य प्रायश्चित्तस्य सापवादकमेकं शास्त्रं "कार्यकालं संज्ञापरिभाषम्' इति न्यायेन तदेकवाक्यतापन्नतया ब्रह्मचर्योपदेशे तत्प्रायश्चित्तमप्यतिदिष्टं भवतीत्यभिप्रायेण प्रायश्चित्तञ्च परामृशतीत्युपपत्तेरिति, ननु ब्रह्मचर्ये निर्दिष्टे "गर्दभेनावकीणी'ति प्रायश्चित्तप्रकरणगतस्योपदिष्टातिदिष्टब्रह्मचर्य-साधारण्येनोपदेशत एव प्राप्तिसम्भवात् "उत्तरेषां चैतदविरोधि' इत्यनेनातिदेशो व्यथर् इति चेत्, नूनं भवान् "अनारम्य विदानानां प्रकृतौ वा द्विरुक्तत्वा'दिति न्यायमनालोचितपूर्वी, तथाहि सति उपदिष्टातिदिष्टजुहूसादारण्येन पर्णताया अपि प्राप्तिप्रसङ्गात् यदि चयेनादिदेशेन जुहूः प्राप्यते तेनैव पर्णताया अपि प्राप्तिसम्भवात् द्विरुक्तिदोषप्रसङ्गेन विकृतौ पर्णतोपदेशो व्यर्थः, यद्येवमुपकुर्वाणस्यापि ब्रह्मचर्यं नोपदिष्टं, "प्रागुपनयनात् कामचारवादभक्षो हुतान्ब्रह्मचारी' इत्यनुपनीतस्यैव ह्युपदिष्टम्, उपकुर्वाणे तु "उक्तं ब्रह्मचर्यमग्नीन्धनभैक्ष्चरणे'-त्यादिना अतिदिष्यते, अत उपकुर्वणस्यापि ब्रह्मचर्यमतिदिष्टमिति कृत्वा अनुपनीतब्रहकमचर्य एव प्राश्चिवमुपदेशतः प्राप्नोति, नोपुर्वाणब्रह्मचर्येऽपीति चेत्, मादूदू ब्रह्मचर्यमुपदिष्टं, माच भूत्प्रायश्चित्तमपि, तथाप्यनुपनीते उपदिष्टस्य प्रायश्चित्तस्य "उक्तं ब्रह्मचर्यमबग्नीन्धनभैक्षचरणे' त्यनेनोपकुर्वणेऽतिदिष्टतया तस्य "उत्तरेषां चैतदविरोधी'त्यनेन परामर्शे दोषाभावात्, ननु "अतातोऽग्निमग्निष्टोभेनानु-यजन्ति तमुक्थ्येन तमतिरात्रेण तं द्विरात्रेण' इत्युपदेशत एव अग्नेरग्निष्टोमोक्थ्यादिसाधारण्यमुपदिश्यते, ततश्च तदाश्रिताः श्येनाकृत्यादिगुणकामाः सर्वसाधारणा भवन्तीतिवत् "उत्तरेषां चैतदविरोधी'त्यस्यापि "तमुक्थ्येन तमतिरात्रेण' इत्यादिनिर्देशतुल्यतया ब्रह्मचर्यस्य उपदेशत एव प्रायश्चित्तस्य सर्वसाधारणत्वेन नातिदेशतः प्राप्तस्य प्राप्तिरिति चेन्न, इष्टापत्तेः, अतिदेशतोऽपि प्राप्तिमपेक्षमाणानामुपदेशतः प्राप्तिर्लभ्यते चेत्, कथमनिष्टाय सा स्यात् ।। * ।।

भाष्ये-कर्माधिकारानुगुणशुद्धिहेतुप्रायश्चित्तं न सम्भवतीति, "बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः । शरणागतहन्तृश्च स्त्रीहन्तृश्च न संवसत्' इति मनुवचनम्, न संवसेत्-अन्योन्यं गृहभोजनादिसंव्यवहारं न कुर्यादित्यर्थः । नास्मिन् लोके प्रत्यापत्तिर्विद्यते, कल्पषं तु निहन्यते "प्रायश्चित्तैरषत्येनो यदज्ञानकृत भवेत् । कामतो व्यवहायर्स्तु वचनादिह ज्जायते' इत्यादिस्मरणात्, अज्ञानकृतञ्च यद्भवेत् तत्प्रायश्चित्तैरषैति, तत्कामाच्चेत् वचनादव्यवहार्यस्तु जायत इत्यर्थः, अतश्च "प्रायश्चित्तं न पश्यामी'ति स्मृतेरपि तदनुगुण एवार्थ इत्यर्थः । परे त्वित्यादि - प्रत्यवरोधः पूर्वाश्रमप्राप्तिः । विद्याधिकारा-नधिकारसिद्धमिति - पूर्वेणान्वयः । पूर्वा-श्रमधर्मस्वनुष्ठानचिकीर्षयेति - पूर्वाश्रमधर्मेषु यागहोमादिषु सुखानुष्ठेयताप्रयुक्तचिकीर्षयेत्यर्थः । रागादिनेति - गृहस्थोहं पत्या-दिपरिवृतस्स्यामित्याशयेनेत्यर्थः । नियमश्रुत्येति - नेषां-तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः-इति सूत्रपाठ इत्यर्थः, तद्भूतस्य-उर्ध्वरेतस आश्रमा-न्प्राप्तस्य, नातद्भावः- न ततः प्रच्युतिः, न ततः प्रत्यवरोह इति यावत्, "अत्यन्तमात्मानमाचार्यकुले-ऽवसादयन्नरण्यमियात् न पुनरेयात्' इति नियमादित्यर्थः । "यथा ब्रह्मचर्यं समबाप्य गृही भेवेत् गृही भूत्वा वनी भवेत्' इत्यारोहवचोदर्शनवत् अवरोहवचसो अदर्शनादिति भावः, आभावाच्च-शिष्टाचाराणामभावच्चेत्यर्थः, इत्येवं नियश्रुत्या अतद्रूपेणाऽभावेन च प्रत्यवरोहाप्रामाणिकत्वं सिद्धान्तयन्तीत्यर्थः, तदप्रामाणिकत्वं सिद्धान्तयन्तीत्यस्यानन्तरं "न च

अधिकारिकमपि' इत्यधिकरणान्तरं नैष्ठिकादीनामाश्रमभ्रष्टानां प्राश्चित्तसम्भवासम्भवपरं वर्णन्तोऽसम्भव इति सिद्धान्तयन्तीति केषुचित्पाठो दृश्यते, सत्वग्रन्थः, तदंशे उत्तरत्र दूषणस्य कस्याप्यनुक्तेः, परमते च "न चाधिकारिकमपि पतानानुमानात्तदयोगात्' इति सूत्रेण प्रायश्चित्तासम्भवं पूवर्पक्षीकृत्य "उपपूर्वमपीत्येके भावमशुनवत्तदुक्तम्' इति सूत्रेण प्रायश्चित्तासम्भवं पूर्वपक्षीकृत्य "उपपूर्वमपीत्येके भावमशनवत्तदुक्तम्' इति प्रायश्चित्तसद्भावस्सिद्धान्तितः, "बहिस्तूभयथापि' इति सूत्रञ्च कृतप्रायश्चित्तानामप्यसंव्यवहार्यतापादनपरं कृथगधिकरणम् । अतो नायं परमतानुवादो

भवितुमर्हतीति लेखकदोषायत्तः, केचित्तु "वहिस्तूभयथापी'त्यधिकरणे कृतप्रायश्चित्तस्याप्यसंव्यवहार्यताप्रतिपादनात् संव्यवहार्यतापादकप्रायश्चित्तासम्भवपरोऽवं ग्रन्थ इत्याहुः । सद्भावे प्रमाणविरुद्धत्वे चेति - प्रामाणिकत्वाप्रामाणिकत्वयो-रित्यर्थः, प्रामाणिकत्वरूपप्रथमाधिकरणपूवर्पक्षोत्थापकाभावात् प्रथमाधिकरणसंशयोनुपपन्न इति भावः । मूलविचार इति - मूलभूतप्रायश्चित्तविचारे निर्णायकोत्तरसूत्रप्रतिपाद्यन्यायगर्भतयैक-

मतधकरणमित्यर्थः । प्रच्युतिरस्ति नेतीति विचार इति - प्रच्युतिः प्रामाणिकी अप्रामाणिकी वेति विचार इत्यर्थः ।। * ।।

।। इति तद्भूताधिकरणम् ।।

कर्माङ्गाश्रयाणीत्युक्तमिति - प्रणयनाश्रितगोदोहनस्यैव उद्गीथाश्रितस्य उपासनस्याऽङ्गत्वाभावात्-उद्गीथस्याऽऽश्रयत्व-मात्रतयाऽङ्गित्वाभावादित्यर्थः । भाष्ये-उद्गीथोपासनफलस्य यजमानाश्रयत्वश्रवणादित्यर्थः इति, इदमुपलक्षण "तया कार्मोर्थसंयोगात्' इत्यधिकरणे "यदि कामयत वर्षुकः यर्जन्यस्स्यादिति नीचैस्सदो

मिनुयात्' इति विहितानां सदोमानाश्रितानां गुणानां फलं यजमानगाम्येव, यथा "त्र्यहं नाश्नीया'दित्यादिकं तपः सत्यप्याध्वर्यवसमाख्याने याजमानम्, तपसः प्रधानफलसिद्धयर्थत्वात् प्रधानफलस्य च याजमानत्वात्, तथा कर्माङ्गफलमपि यजमानगाम्येव, कुतः? अर्थसंयोगात् "यजेत' इत्यात्मनेपदेन संङ्गप्रधान-

३.४.४५

फलस्य यजमानगामित्वश्रवणात् अङ्गाश्रितफलानामपि परम्परया तत्साध्यत्वादिति समर्थितत्वात्, अङ्गाश्रितोपासनफलं यजमानगाम्मेव, अतो "वर्षति वर्षति हे'त्यादीनामपि वृष्टयादिफलानां यजमानगामित्वं सिद्धमिति द्रष्टव्यम् । तदाश्रयस्य गोदोहनस्येति - स आश्रयो यस्येति बहुव्रीहिः, यत्र हि गुणः कारकतां प्रतिपद्यते, स आश्रय इति निर्वर्त्य एव मीमांसकानामाश्रयत्वव्यवहारात् निर्वर्तकतयोपादानं कर्तुमशक्य इत्यर्थः ।। * ।। भाष्ये-फलसाधनभूतस्येति, भूतस्य प्राप्तस्येत्यर्थः, फलसाधनगोदोहनोपासनादिगुणकामयुक्तस्येत्यर्थः । यद्वा-साङ्गस्येत्येतद् अङ्गाश्रितानामप्युलक्षणम्, ततश्च "तस्मै हि परिक्रियते' इति सूत्रे हिरण्यर्थः उद्गीथाद्युपासनमार्त्विज्यम्, तस्माद् अपि परिर्क्रियते' ऋत्विगिति सूत्रार्थ इति भाष्यकृतामाशयः । भाष्ये-साङ्गं कर्म ऋत्विग्भिरनुष्ठेयमित्यवगम्यत इति, न चैवं प्रधानस्य, द्रव्यत्यागात्मकस्य यागस्यापि ऋत्विक्कर्तृकत्वप्रसङ्ग इति वाच्यं, यजमानद्रव्यस्य त्यागे ऋत्विजामसामर्थ्येन लिङ्गबलात् हविस्त्यागदक्षिणादानादिव्यतिरिक्त एव ऋत्विजां कर्तृत्वमिति सामर्थ्यादवसीयते । नहि ऋत्विजान्येनेति - यदि शकत्यशकत्योरेव कर्तृनियमे नियामकत्वम्, तर्हि अध्वर्य्वादिना कार्यस्यापि यजमानेनापि कर्तुं शक्यत्वात् याजमानत्वप्रसङ्गः, अतश्च "शास्त्र फलं प्रयोक्तरि' इत्याधिकरणं द्वितीयपूर्वपक्षन्यायेन अशक्तस्यैव यजमानस्य ऋत्विक्द्वारा कर्तृत्वमित्यापतेत्, तस्मात् परिक्रयवचनब-लादेव अङ्गानां यजमानभिन्नकर्तृकत्वं वक्तव्यम्, तादृशं वचनमुपासनेप्यविशिष्टमिति भावः । वचननिबन्धनमिति "गोदोहनेन पशुकामस्य प्रणयेत्' इत्यध्वर्युकर्तुकप्रणयने गोदोहनस्य कारकत्वविधायकवचनबलादित्यर्थः, गोदोहनस्याऽप्यध्वर्युकर्तृकव्यापा-रविषयत्वाभावे तत्कारकत्वासम्भवा-दिति भावः । प्रकृते तु परिक्रयवचनबलात् ऋत्विक्कर्तृकत्वसिद्धिरिति द्रष्टव्यम् - अङ्गत्वे सति हि ऋत्विक्कर्तृकत्वमिति । दक्षिणानतानामअत्विजां साङ्गप्रधानानुष्ठानापरपर्यायभावनाशब्दवाच्यप्रयोगाङ्गत्वान्न गुणकामेषु कर्तृत्वं सम्भवतीत्यर्थः । ऋत्विक्कर्तृककर्मोपयोगित्वेनेति - अङ्गभूतस्याऽप्युपासनस्य क्रतुप्रयोगाद्बहिरनुष्ठातुमशक्यत्वेन तत्प्रयोगमध्यपातित्वा-विशेषात् परिक्रयस्य च चिकीर्षितसर्वाथर्त्वावगमाच्च उद्गीथोपासनस्यापि ऋत्विक्कर्तृकत्वं सिद्धमिति भावः । प्रोक्षणादि-वदिति - "नीजैस्सदो मिनुया'दिति प्रतिपादितसदोमानादिगुणाः आदिपदेन परामृश्यन्ते । अग्रयप्रायन्यायादिति - "तत्सामान्यादितरेषु तथात्वम्३ इति न्यायादित्यर्थः, अग्रयप्रायन्यायोऽपि अत्रैव पर्यवसितः, "तस्मादुहैवंविदुद्गाता ब्रूयादिति एवंविदन्तरादित्ये अन्नक्षिणि चोपदिष्टं परमात्मरूपं सर्वपापोदितत्वादिधर्मैः, देवलोककामावाप्तिफलाभ्यां सह विद्वान् उद्गाता यजमानं प्रति ब्रूयात् कं ते काममैहिकमामुष्मिकं किं फलमुद्दिश्य आगायानीति, तत्फलानुकूलोपासनसहितं गानं करवाणीति,

३.४.४६

हि यस्मात् एष एवोद्गाता कामगानस्य अभिमतफलसाधनोपासनसहितगानस्य ईष्टे व एवंविद्वानधिदैवताध्यात्मोपदिष्ट-परमात्मस्वरूपं विद्वान् साम गायतीत्यर्थः । अत्र उद्गातृकर्तृकमेवोपासनं यजमानगामिफलजनकमिति स्पष्टं प्रतीतेः ऋत्विजां परिक्रीततया यजमानस्य प्रयोजककर्तृत्वसम्भवेन "शास्त्रफलं प्रयोक्तरि' इति न्यायस्थाऽप्यविरुद्धत्वादिति भावः ।। * ।।

।। इति स्वाम्यधिकरणं ।।

मननस्य प्रवृविरूपत्वेऽपीति - यमादिवदिति शेषः, उतार्थान्तरं मननरूपमित्यस्यानन्तरं मुनिशब्दस्य प्रकृष्यमननशीले व्यासादौ प्रयोगदर्शनमर्थान्तरत्वमुपोद्वलयति नेतीति पाठोस्ति चेत् समाचानः । किं मनन विधातुं योग्यमुत नेति - सर्वाश्रमधर्माङ्गकविद्यासहकारितया विद्याङ्गभूतसर्वाश्रमधर्मवदिति शेषः, तस्यैवैतदधिकरणकृत्यत्वात्, अत्र च-अतस्सर्वेष्वाश्रमेषु स्थितस्यैवेत्युपसंहारभाष्यस्यैव साक्षित्वात् । किं मननस्येति - मननशब्दो निदिध्यासनपरः, उत्तरत्रापि तथैवेति द्रष्टव्यम् । यज्ञादिश्रुतिविरोध इति - आश्रयमधर्मप्रतिपादकयज्ञादिश्रुतिविरोध इत्यर्थः, नचाऽस्याश्शङ्कायाः प्रकृतासङ्गतिश्शङ्कया, सर्वाश्रमाङ्गक-

३.४.४६

विद्यायां सर्वाश्रमधर्मवत् तत्सहकार्यन्तरतया मौनं विधीयत इत्यस्य प्रकृततया प्रकृतासहतेरभावात् । किं कतिपयोक्ति-रनुक्तानादरमूलैव स्यादिति - वाजसनेयके "यक्षं चरे'दिति पारिव्राज्यधर्मोपदोः, "कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः' इत्यादि छान्दोग्यविहितगार्हस्थ्यधर्मादिपरिसङ्खयार्थः, एवं छान्दोग्यगतागार्हस्थ्यधर्मश्रुतिरपि वाजसनेयविहितसन्यासा-श्रमधर्मादिपरिसङ्खयार्थः । स्वप्रदेशानुक्तधर्मप्रतिक्षेपार्थ इति यावत् । मननस्य यज्ञादिश्रुतिविरुद्धतया विधातुमयोग्यत्वा-दित्यादि - अयमर्थः निदिध्यासनस्य सर्वाश्रमधर्मनिरपेक्षतया सर्वाश्रमधर्माङ्गकविद्यायाम् आश्रमधर्मदृष्टान्तेन मननस्य विधातुमयोग्यत्वात्"अथ मुनि'रिति मुनिशब्दो मननविधायकत्वायोगेन प्राप्ततपाण्डित्यानुवादीति मौश्रमनूद्यत इति फलं स्यादिति,-एवं हि क्रमः, किमस्मिन् वाक्ये मौनं विधीयते, उतानूद्यते, किं पाण्डित्यमेव मौनम् उतार्थान्तरं मननरूपमिति, किं मुनिशब्दस्य प्रकृष्टमननशीले व्यासादौ प्रयोगदर्शनमर्थान्तरत्वमुपोद्वलयति, नेति, तथा किं मननं सर्वश्रमधर्माङ्गकविद्यासहकारितया विद्याङ्गभूतसर्वाश्रमधर्मवद्विधातुं योग्यमुत नेति, तदर्थं च विद्या किं सर्वाश्रमधर्माङ्गिका, उत नेति, तदर्थञ्च विद्यायाः सर्वाश्रमधर्मविरोधोऽस्ति, नेति, किं विद्या सर्वकर्मप्रतिक्षेपिका, नेति, किं वाजसनेयके "भिक्षाचर्यं चरेत्' इति पारिव्राज्यधर्मोपदेशः, छान्दोग्ये "कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः' इति गार्हस्थ्यधर्मोपदेशश्च स्वस्वप्रदेशानुक्तपरस्पराश्रमधर्मप्रतिक्षेपार्थः, उतानुक्ताश्रमधर्मप्रदर्शनार्थ इति, यदा परस्परप्रतिक्षेपार्थः, तदा विद्यायाः सर्वाश्रमधर्मसापेक्षतया सर्वाश्रमधर्माङ्गकत्वसम्भवात् सर्वाश्रमधर्माङ्गिकायां विद्यायां सर्वाश्रम

३.४.४७

धर्मबन्मननं विधातुमयोग्यम्, यदि च प्रकृष्यमननशीले व्यासादौ मुनिशब्दप्रयोगदर्शनमर्थान्तरत्वमुपोद्वलयति, तदं पाण्डित्यस्या-ऽप्राप्तत्वात् विधेयत्वमिति, भाष्ये-विद्यासहकारित्वेन गृह्येत इति, अत षव विध्यादिवदिति दृष्टान्तोपादानं सहकार्यन्तरत्वांश एव, न तु विधित्वांशेपीति भावः, सहकार्यन्तरविधित्वांशे विद्यादेः दृष्टान्तत्वं वक्तव्यमिति यद्यभिलाषः, तदा विध्यादिवदित्यस्य बाल्यपाणिडत्यवदित्यर्थो वर्णनीय।, तयोर्मौनविध्यादित्वादिति द्रष्टव्यम् । भाष्ये-पक्षेण प्रकृष्य-मननशील इति, पक्षेण प्रयोगः पाक्षिपप्रयोग इत्यर्थः । यद्वापक्षः-परिग्रहः, "पक्ष परिग्रहे' इति धातुः आदरेण स्वीकारः, तेन हि गमनं प्रकृष्यते, प्रकर्षश्च मननस्य स्नेहपूर्वकतया चिरविरहितनायिकानायकविषयस्येव निरन्तरमनुवर्तमानत्व-रूपमुपासनालम्बनस्य शुभाश्रयस्य भगवद्विग्रहादेः पुनः पुनः संशीलनम्, तदपि विद्यानिष्पत्त्यर्थमेव, सति ह्यस्मिश्र उपासनकालेऽपि तद्विषयचित्तैकाग्र्यात् विद्या दृढिभवति, यस्योपासनव्यतिरिक्तकालेषु चिन्तान्तरावेशः तस्योपासन-कालेऽपि चेतसि समवान्तरचिन्तितविषयन्तरानुप्रवेशात् न विद्या दृढीभवेदिति भावः, भाष्ये-परिशुद्धं च परिपूर्णं विदित्वेति, उहापोहक्षमा धः, षण्डा, सा अस्य सञ्जातेति पण्डितः, तस्य कर्म पाण्डित्यम्, श्रवणमननान्तरं

तदभ्यास-पाटववशात् लब्धया ऊहापोहक्षमया नवनवोन्मेषशालिन्या अतिभयाश्रुतमतार्थानुकूल्येन सर्वकालोपनिषतात्पर्य-प्रतिषांपनपरम्, भाष्ये-यावदायुषं गार्हस्थ्यधर्मेणेति, आवदायुर्यस्येति अहुव्रीहिणा आवदायुश्शब्दः

३.४.४८

कालपरः "कालाध्वनो'रिति द्वितीया - मौनं ज्ञानातिशयरूपमित्यर्थ इति । मौनं वानप्रस्थमित्यत्र तु आश्रमवाचिपदान्तरसहाच-र्यात् पारिशेष्यात् तत्रोत्तराश्रमपरत्वेपि इह मौनशब्दस्य ज्ञानातिशयार्थवाचित्वमेवेति भावः । बाल्यादिप्रधान्नेपीति - बाल्यादिप्रधाने सत्यपीत्यर्थः । उपदेशाविशेषादिति - "तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयः' इत्यादिनेत्यर्थः । बहुवचनमिति - सौत्रं बहुवचनमित्यर्थः । षष्ठयन्ताध्याहारप्रसङ्ग इति - दर्शपूणमासादीनां विध्यादिवदित्यर्थः, ननु विध्यादिशब्दः प्रधानवाची, विध्यन्तशब्दाद्रङ्गवाची, ततश्च विध्यादिवत् विध्यादाविव अधाव इवैत्यर्थ इति आचस्पत्युक्तेर्नोक्तदोषावकारः इति चेन्न, विध्य-

३.४.४८

न्तशब्दस्य अङ्ग इव विध्यादिशब्दस्य न प्रधाने प्रसिद्धिरिति तात्पर्यात् । तत्कारिषु प्रयोगादिति -मुनिशब्दस्येति शेषः, शङ्कते । तच्च विद्यावतस्सिद्धमिति - निष्पन्नविद्यस्य शुभाश्रयममनं सिद्धमेव, तदभावे विद्यानिष्पत्तेरभावादित्यर्थः । प्रारब्धविद्यविषयत्वादिति - निष्पन्नविद्यविषयत्वाभावादित्यर्थः । ब्राह्मणशब्दश्च न जातिवाचीति - पूर्वपक्षे ब्राह्मण-शब्दस्य जातिवचनत्वात् कथं ब्राह्मण इत्यत्र यथा न विधेयत्वं, एवं "अथ मुनि'रित्यत्रापीति पूर्वपक्षे उपन्यस्तब्राह्मण-शब्दजातिवचनत्वस्य सिद्धान्ते अप्रतिक्षेपात् ब्राह्मणशब्दस्य जातिवाचित्वं परेषां सिद्धान्तेऽप्यभिमतमिति मत्वा इदं दूषणमुक्तमिति दृष्टव्यम् । न च कल्पतरौ ब्राह्मणः ब्रह्माहमस्मीति साक्षात्कारवानित्यर्थ उक्त इति वाच्यम्, तस्याधुनिकत्वात् । तृतीयसूत्रव्याख्यानमप्ययुक्तमिति -भास्करीत्यमिति शेषः । पारिव्राज्यप्रस्तावादिति - परिव्राज्यस्य प्रकृतत्वादित्यर्थः । मौनस्य परस्ताद्वार्हस्थ्यस्येति - दहरविद्यायां

३.४.४९

छान्दाग्ये "मौनमित्याचक्षते ब्रह्मचर्यमेव तत्' इति मौनोपदेशानन्तरं सर्वान्ते "स सल्वेवं वर्तयन्' इति गार्हस्थ्येनोप-संहारादित्यर्थः । द्वितीयसूत्रनिर्वाहो दत्तोत्तर इति - परमतदूषणावसरे इति शेषः ।। * ।। ।। इति सहकार्यन्तरविध्यधि-करणम् ।।

३.४.५०

भाष्ये-बालस्य यत्स्वभावानाविष्काररूपं कर्मेति, नचानाविष्करणस्याऽभावरूपस्य कथं बाल्यशब्दार्थत्वमिति शङ्कनीयम्, आविष्करणविरोधिक्रियाविशेषस्यैवानाविष्करणाब्दार्थत्वात् । एतदाश्रमनिष्ठस्य विशेषतो नियमदर्शनादित्यर्थ इति - ब्रह्मविद्यानिष्ठस्येत्यर्थः ।। * ।। ।। इत्यनाविष्काराधिकरणम् ।।

भाष्ये-ऐहिकमभ्युदयफलमुपासनमप्रस्तुतप्रतिबन्धे इति, अयमत्रान्वयः-अभ्युदयफलमुपासनम्, अप्रस्तुतप्रतिबन्धे ऐहिकं भवतीति अभ्युदयफलं मुक्तिव्यतिरिक्तफलमित्यर्थः, एवं मुक्तिफलानियम इति मुक्तिफलकचिन्तान्तरस्य प्रस्तोष्यमाणत्वा-दिह तद्व्यतिरिक्तमुपासनं सर्वं विवक्षितम्, ऐहिकम्-इह जन्मनि भवम्, ऐहिकमित्यस्यैव विवरणम् अनन्तरमिति, अस्मिन्नेव जन्मनीत्यर्थः, न च सौत्रस्यैहिकशब्दस्य साध्यनिर्देशपरत्वे किमैहिकफलोपासनं स्वसाधनपु-

यकर्मानन्तरमेव उत्पद्यत इत्यैहिकशब्दस्य पक्षविशेष-णत्वस्फलोरकटीकाविरोध इति वाच्यम्, टीकागतैहिकशब्दस्य ऐहिकामुष्मिक-साधारणपलमात्रलक्षकस्य सौत्रैहिकपदात् भिन्न-त्वात्, ऐहिकशब्दं हि लोके इह जन्मनि भवेपि प्रयुञ्जते, सौत्रस्त्वैहिकशब्द इह जन्मनि भवे वर्तते, तत्रैव प्रसिद्धिप्राचवात्, अत व योगसिध्यधिकरणे कारीर्यभिचारादेरैहिकत्वमेव स्वर्गस्या-मुि◌ेमकत्वमेव, पशुपुत्रादिरूपस्य फलस्यासति प्रतिबन्धे ऐहिकत्वम्, सति तु प्रतिबन्धे आमुष्मिकत्वमिति व्यवस्थापयन्ति, तत्रैहिकत्वं नाम एतजन्मयोग्यत्वम्, आमुष्मिकत्वं नाम जन्मान्तरभोग्यत्वम्, नत्वहलौकिकत्वं पारलौकिकत्वं पारलौकिकत्वं वा पशुपुत्रादेः पारलौकिकत्वाप्रसिद्धेः, ततश्च सौत्रस्यैहिकशब्दस्य साध्य-

३.४.५१

निर्देशपरत्वमेव युक्तम्, पक्षविशेषणत्वाभ्युपगमे ऐहिकपदस्य ऐहिकफलसाधनोपलक्षकत्वं वक्तव्यम्, तत्राप्यामुि◌ेमकफलोपा-सनसङ्ग्रहायोपलक्षपरत्वमाश्रयक्षयम्, साध्यवाचि च पदमध्याहर्तव्यम्, तस्य साध्यनिर्देशपरत्वे उपासनरूपस्य पक्षस्य प्रकृतत्वादेव नाध्याहारमपेक्षते इति सामञ्जस्यमस्ति, केचित्तु- अस्मिञ्जन्मनि सम्भवतीत्येतीवन्मात्रं न साध्यं येनेदं साध्यसमर्पकं स्यात्, किन्तु सादनानुष्ठानकालाव्यवहितोत्पत्तिकत्वम्, अत एव हि पुण्यानन्तरभेवोत्पद्यत इति भाष्यम्, अतश्च सर्वथा साध्य-वाचिपदमध्याहर्तव्यमेव, ततश्च प्रकृतिमडलान्तर्वर्तिभोगफलकम्, इहशब्दो हि सन्निकृष्टार्थवचनः मुक्तप्राप्यमगवल्लोकापेक्षया प्राकृतभोगस्तानभोगोपकरणानां सन्निकृष्टत्वेनैहिकाब्दवाच्यत्वोपपत्तेः, नचैवं स्वर्मेष्वैहिकपदप्रयोगापतिः, एतादृशार्थविवक्षया प्रयोगे दोषाभावात् ।। * ।। ।। इति ऐहिकाधिकरणम् ।।

ऐहिकोपासनविषयत्वाभावमात्रे विरोध इति - अस्मन्मते मुक्तिव्यतिरिक्तफलकोपासनविषयत्वात् पूर्वाधिकरणम् ऐहिकोपा-

३.४.५१

सनमात्रविषयत्वम्, परमते तु सर्वविषयत्वमिति विरोध इत्यर्थः । तद्देहपात इति - विद्यादेहपात इत्यर्थः । आपरोक्ष्ये तारतम्य-सम्भवादिति -साध्यतारतम्याभावेपि साधनतारतम्यसत्वात् विलम्बाविलम्बरूपानियम उपपद्यत इति भावः ।। * ।।

।। इति मुक्तिफलाधिकरणम् ।।

इति दशोपनिषद्भाष्यकारैः श्रीरङ्गरामानुजमुनिभिर्विरचितायां श्रुतिप्रकाशिका-

व्याख्यायां भावप्रकाशिकायां तृतीयस्याध्यायस्य चतुर्थः पादः ।।

समाप्तश्चाध्यायः ।।

समुदिताधिकरणसङ्ख्या - १२३- समुदितसूत्रसङ्ख्या ४६८ ।।

Fourth Chapter

First Pada

४.१.१

साध्यसाधनभावसम्बन्धज्ञापनार्थमिति - द्वयोरपि सम्बन्धिनोरेकाध्यावप्रतिपाद्यत्व एव एकप्रतीत्युपारोहस्सुशक इति भावः । कर्मयोगापेक्षया न साध्यत्वमस्तीति - इतिर्हेतौ, च्रोभिन्नक्रमः, कर्मयोगापेक्षया च साध्यत्वसत्वाच्च अत्र चिन्तायुक्तेत्यर्थः । सकृत्कृतं शास्त्रार्थ इति पाठः, भाष्ये-असकृदावृतौ प्रमाणाभावात् इति, अत एव पूर्वतन्त्रे प्रयाजादीनि फलभूमार्थिना पुनः पुनः प्रयोग्यानीति "क्रतुवद्वानुमानेनाभ्यासे फलभूमा स्यात्' इति पूर्वपक्षं कृत्वा "सकृद्वा कारणैकत्वात्' इति सकृदनुष्ठानेनैव कार्य-

सिद्धेरङ्गमात्रावृतौ फलभूयस्त्वे प्रमाणाभावाञ्चानावृत्तिरिति सिद्धान्तितमिति भावः । अत एव कर्मण्यनारम्भभावित्वात् कृषि-वत्प्रत्यारम्भं फलानि स्युः' इति न्यायेन फलभूमार्थतया काम्यानामावृत्तिवत् वेदनस्यापि आवृत्तिरिति शङ्का परास्ता, मोक्षरूपफले तारतम्याभावात् । भाष्ये-
नचावधातादिवदिति, "व्रीहीनवहन्ति' इति श्रुतस्यावधातस्य दृष्टे सम्भवत्यदृष्टकल्पनायाअन्याय्यत्वादिति न्यायेन क्रत्वपेक्षिततण्डुलविष्पत्त्यर्थत्वात् तण्डुलनिष्पत्तेश्चावधातावृत्ति-मन्तरेणाऽसम्भवात्, आश्रुताष्यवधातावृत्तिः कार्येति, "कियाणामर्थशेषत्वात्प्रत्यक्षे तन्निर्वृव्याऽपवर्गस्स्यात्' इति साधितम् तद्वदिति भावः, भाष्ये-उपासिना उपसंहियत इति, ननु छागपशुन्यायेन संवर्गविद्यगातस्य "यस्तद्वेद यत्स वेद' इति वेदनशब्दस्य "यां देवतामुपास्से' इत्युपसंहारवशात् उपासनारूपत्वपर्यवसानमस्तु नाम्, न तावन्मात्रेण आनन्द-
वल्लयाद्युक्तब्रह्मवेदनानामावृत्तिस्सिध्यति विद्याभेदात्, नहि प्रतिवसन्तं ज्योतिष्टोमस्यावृत्तिविधानात् द्वादशाहादीना-मावृत्तिः सिध्येदिति चेत् भ्रान्तोसि, क्वचिद्विद्याविशेषे आवृत्तेः श्रवणादन्यत्र विद्यान्तरेपि आवृत्त्या भवितव्यमिति यदि प्रतिपाद्येत, तदेदं चोद्यं स्यात्, नैवमत्र प्रतिपाद्यते, अपि तु विदिनोपक्रान्तस्योपासिना सिद्धवत्कृत्याऽनुवादरूपात् अन्यार्थदर्शनरूपाल्लिङ्गात् वेदान्तेषु वेदनशब्दः आवृत्तवेदनपरः, यथा "न सुकृतं न दुष्कृतं, सर्वे पाष्मानोऽतो निवर्त्तन्ते' इति सुकृतस्यापि माष्मशब्दपरामर्शरूपाल्लिङ्गाद्वेदान्तेषु पाष्मशब्दः सुकृतदुष्कृतसाधारणः, ततश्च वेदातेषु सर्वेभ्यः पाष्मभ्य उदितः' "अपहतपाष्मा' इत्यादिष्वपि पाष्मशब्दः सुकृतदुष्कृतसाधारण इत्युक्तौ ईदृशोपलम्भस्याऽप्रसक्तं । यस्तद्वेदेति - अत्र वक्तव्यं सर्वं लघुसिद्धान्ते प्रतिपादितम्, तत्रैव दृष्टव्यम्, भाष्ये-समानार्थेिेवति, मोक्षसाधनविधिष्वित्यर्थः । छागो वा मन्त्रवर्णदिति न्यायोभिप्रेत इति -ननु "छागस्य धपाया' इति मन्त्रस्यनित्यतयाङ्गत्वप्रतीतेः तदङ्गत्वं मावधीति सामा-

न्यवाचिपशुशब्दस्य मान्त्रवर्णिकछागरूपविशेषपर्यवसानं युक्तम्, इह नानापकरणाम्नातानां वेदनध्मानोपासनादिमोक्ष-साधनविधीनामेकार्थपर्यवसायित्वस्याऽनपेक्षिततया कथमत्र छागपशुन्यायावतारः, न च कासांचिद्विद्यानामावृत्त्यन-पेक्षाणामेव मोक्षसाधनत्वे मोक्षसाधनध्यानादिविधीनामननुषांनलक्षणाप्रामाण्यप्रसङ्ग इति वाच्यम्, प्रपत्तिवदावृत्ति-निरपेक्षविद्याया महाविश्वासशाल्यधिकारविशेषविषयतोपपत्त्या ध्यानपर्यवसायित्वस्य वेदनादिविधीनामनावश्यकत्वा-दिति चेन्न, अनन्यथासिद्धप्रमाणबलेन प्रपत्तावधिकारिविशेषपरिकल्पनेऽपि वेदनवित्रदस्थले तादृशाधिकारिविशेष-कल्पनाभावेन वेदनविधीनामेकार्थपर्यवसानस्याऽवश्यं वक्तव्यत्वेन छागपशुन्यायप्रवृत्तौ दोषाभावात् ।। * ।।
उपदेश-क्रियाया इति - उपदोक्रियामात्रस्यावृत्तिर्विवक्षिता, न तु श्रवणादिविशिष्टोपदेशक्रियाया इत्यर्थः, ततश्च श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्युपदेशक्रियाया आवृत्तिरस्तीति भावः । द्विसस्त्रिः प्रत्ययमात्रेणेति - द्वित्रिवेदयैरपि कृतार्थत्वादित्यर्थः । ज्ञानवेदनशब्दान्वितेति - इदं वाक्यं श्रवणमननिदिध्यासनानामावृत्तिरपेक्षिता

नवेति विचारयन्ति, तदयुक्तमित्यस्याऽनन्तरं पठितं चेत् सुसङ्गतमिव भाति, पाठो निरीक्ष्यः, ननु अपरोक्षार्थविषयकप्रत्ययावृत्तेः तदापरोक्ष्यं ब्रूमः, अतो न ज्योतिष्योमवाक्यार्थप्रत्ययावृत्तौ व्यभिचार इत्यत आह - एक-

४.१.२

श्चन्द्र इति । भेदवासनाचेदिति - अन्यत्वं वक्तुमशक्यत्वादिति भावः । कल्पनापोहेनेति - भेदसत्यत्वकल्पनाव्युदासपूवर्क-भेदमिथ्यात्वनिश्चयायेत्यर्थः । प्रतिपन्नोपाधिस्थनिषेधप्रतियोगित्वरूपमिथ्वात्वप्रतीतावुपाधिप्रतीतिर्नान्तरीयकेति भावः । वाक्या-र्थज्ञानार्थश्रवणादिविहिदूषणप्रसङ्गादन्तःकरणविलयरूपज्ञानार्थसमाधिं दूषयति । समाधिविधिश्चाऽनुपपन्न इति - बन्धनिवर्त- कस्य वाक्यार्थज्ञानस्य त्वदभिमतान्तः-करणविनाशरूपसमाधिविरुद्धत्वादिति भावः । मुक्तस्य सर्वज्ञत्व इत्याक्षेपश्च, ननु मुक्त-स्यान्दाधिक्य इत्याक्षेपश्च प्रासङ्गिक इति नाशङ्का कार्या, केचित्तु-अत्र कानिचिद्वाक्यानि पातितानीति मन्यन्ते । रश्मिबहुत्वं पर्यावर्तयेदिति - इदञ्च पुत्रं प्रति कौषीतकीवाक्यम्-हे पुत्र रश्मीनादित्यं चाऽभेदेन पर्यावर्तयात्-पर्यावर्तयतादित्यर्थः,उपास्वेति यावत् । अहङ्ग्रहोपासनेति - प्रत्यगात्मोपासनेत्यर्थः ।। * ।। ।। इति आवृत्त्यधिकरणम् ।।

४.१.३

व्यतिकरोपदेशज्ञापनायेति - पूर्वाधिकरणे "आत्मेत्येवोपासीत' इति विद्युपास्योर्व्यतिकरोपदेशज्ञापनार्थोपात्तवाक्य-स्थितात्मशब्दार्थनिरूपणं क्रियत इत्यर्थः । वस्तुतस्यतु "त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते' "आत्मेत्येवोपासीत' इत्यादीनां व्यतिकराणामुपदेशरूपत्वमुखेन दृष्टिविधित्वाभावज्ञापनायेत्यर्थः । पूर्वप्रकृतेति - जगत्कारणतयोपास्यतया चाध्यायत्रयप्रतिपादितस्य वस्तुनो वेदान्तवाक्यस्थात्मशब्दार्थात्मशब्दार्थात्मकत्वं निरूप्यते समर्थ्यत इत्यर्थः । ततश्च कथमस्याधिकरणस्य शब्दार्थनिरूपणपरत्वमिति शङ्कापि निराकृता । अहमर्थसामानाधि-करण्येनेति -अहन्त्वेनेत्यर्थः, अथवेत्यादिपक्षाभिप्रायेणाह - किमुपास्यं ब्रह्मेति । अन्यत्वेनोपास्यमिति -शरीरशरीरिभाव-रूपसम्बन्धशून्यत्वेनोपास्यमित्यर्थः । पृथकत्वानुसन्धानविरोध इति । "पृथगात्मानं प्रेरितारञ्च मत्वा' इति पृथक्सिद्धत्वानुसन्धानस्वाऽपृथक्सिद्धविशेषणत्वरूपशरीरत्वानुसन्धानविरुद्धत्वादिति भावः । यदा पृथङ्मत्वेति पृथक्पकत्वेत्यादित् मननक्रियायामन्वेति, ततश्च आत्ममननं प्रेरितृमननञ्च पृथग्भूतं कार्यमित्यर्थः पर्यवसन्नः । ततश्च आत्मप्रेरित्रोरेकमननानुप्रवेशो व्यावर्तितो भवति, अतो जीवपरयोः शरीरात्ममावानुसन्धानस्य नावकाशः । शरीरात्मभावानुसन्धाने हि द्वयोरप्येकस्यां मननक्रियायामनुप्रवेशप्रसङ्गेन पृथङ्मननं न भवेदिति विरोध

४.१.३

इति भावः । ब्रह्मोपासनानि विहितानीति - शाण्डिल्यविद्यायां "सर्वं खल्विदं ब्रह्म' इति सामानाधिकरण्यनिर्देशः, "एष म आत्मा' इति व्यदिकरणनिर्देशश्च न दृष्टिविधित्वशङ्काव्यतिरेकोकिविरोधात्, अतो न तत्रायं विचार उपयुक्त इति भावः । वस्तुतस्तु पृथक्सिद्धत्वरूपानात्मत्वानुसन्धानस्य मोक्षसाधनतया विहितत्वात्, अनात्मत्वमेव प्रामाणिकम्, आत्मेस्येवोपासीत' इत्येतत्तु अभ्युदयफलकदृष्टिविधिरूपं भविष्यतीति पूर्वपक्षिणो भावः । अहंशब्दार्थतात्पर्यविवक्षयेति - अहंशब्दार्थस्य प्रकृतित्वविवक्षायां प्रकृतेरेवास्तिक्रियाकर्तृत्वात्

उत्तमपुरुष इत्यर्थः । अत एव "यदग्ने स्थामहं त्वं वा स्या अहम्' इति, प्रकृत्याश्रयः पुरुषो भवतीति "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' इति सूत्रे प्रतिपादितमिति द्रष्टव्यम् । युक्तमिति दर्शितं भवतीति - क्रियान्वयात्प्रागेव "विष्णवे शिषिविष्टाय' इत्यादौ सामानाधिकरण्यस्थले परस्परमभेदान्वयाभ्युपगमादिहाप्य भेदान्वया-

४.१.३

नन्तरं तस्मिन्नभेदे अस्तित्वान्वयसं भाव इति भावः । प्रामाणिकत्वादिति परिहारायोगादिति - संसारिणः संसारित्वापोहेन ईश्वरात्मत्वप्रतिपादनेऽपि ईश्वरस्य संसार्यात्मत्वप्रतिपादनानाभ्युपगमात् नेश्वराभावप्रसङ्ग इ◌ीत चेति परिहारान्तरमप्युपन्यस्तम्, तथापि प्रामाणिकत्वादित्ययं परिहारः परिहासपदम् । बाधस्य तर्केऽनुगुणत्वादित्यत्र तात्पर्यमिति द्रष्टव्यम् । तत् त्वमेव, त्वमेव तद्वितीश्वरस्यापि संसंर्यात्मत्वप्रतिपादनाद्यत्यपि द्रष्टव्यम् । शास्त्रमीरुत्वाल्लोकस्येति - श्रवणे न प्रवृत्तिस्स्यादिति शेषः, स्वाप्नशशमहिषवैषम्यं शङ्कते । यदि प्रबोधेऽपीति - जीवस्य हेयार्हत्वमेव निवर्तत इति ।

स्यप्ने; तू धर्मिद्वयं धर्मद्वयञ्च निवर्तत

४.१.४

इति भावः । शुक्तिरूप्येश्वरयोरिति - न च रूप्यस्वरूपस्य नाशात् कथमवैषम्यमिति वाच्यम्, अधिष्ठानमेवाऽध्यस्तस्व-रूपमित्यभ्युपगमात् शुक्तिस्वरूपस्य चानाशादवैषम्यमिति भावः ।। * ।। ।। इति आत्मत्वोपासनाधिकरणम् ।।

ब्रह्मणः प्रतीको दृष्टिविशेषणमिति - ब्रह्म स्वतन्त्रेणोपासं प्रतीको दृष्टिविशेषणमित्यर्थः ।। * ।।

४.१.५

भाष्ये-भृत्ये तु राजदृष्टिरम्युदयायेति, स्यादिति शेषः, इदमुपलक्षणम् "मनो ब्रह्मेत्युपासती' इत्यादौ मनऽादिशब्दानां प्राथम्यात् तन्मुख्यार्थत्यागस्याऽनुचितत्वात् ब्रह्मशब्दस्य इतिशब्दशिरस्कत्वेन स्वार्थात् प्रच्यावनस्यापेक्षितत्वाच्च "आदित्यं ब्रह्मोपास्ते' इत्यादौ द्वितीयानिर्देशाच्छ मनऽादौ ब्रह्मदृष्टिरेवं युक्तेति द्रष्टव्यम् । तदभावप्रसङ्गाभावादिति - प्रतीकाभावप्रसङ्गाभावादित्यर्थः, यद्यपि ब्रह्मशरीरत्वमात्रं, न स्वरूपोपमर्दकम्, उक्तरीत्या अनुपमर्देनापि शरीरत्व-सम्भवात्, तथापि न तन्मात्रमात्मत्वेनोपास्व-त्वप्रयोजकम्, ब्रह्मस्वरूपत्वस्यैव ग्राह्यत्वेन उपास्यत्वप्रयोजकत्वात् प्रतीकादेर्ब्रह्मस्वरूपत्वापत्तौ प्रतीकाभावप्रसङ्गस्य अवर्जनीयत्वात्, प्रसङ्गादिति चेन्न, जडस्य मनऽादेः ब्रह्मस्वरूपत्वा-पत्तेरत्यान्तासत्वेन तस्य प्रतीकाभावप्रसङ्गहेतुत्वस्याप्रसक्तेरित्यत्र तात्पर्यात् । वासो ददात्यनो ददातीति - वासो ददात्यनो ददातीत्यत्र वानं तक्षणञ्च कृत्वा वासोऽनश्च निष्पाद्यैव दातव्यम्, उत यथासिद्धमेव दातव्यमिति संशये वानतक्षण-क्रियायां सत्यां वासोऽनश्शब्दयोः प्रयोगदर्शनात् क्रियानिमित्तकौ वासोऽनश्शब्दौ क्रियामेव दानाङ्गतया विधत्तः, तस्माद्दानं कुर्वता तन्तून् वृक्षाश्चोपादाय वानं तक्षणं च कतर्व्यमिति प्राप्ते, जात्यन्वयव्यतिरेकानुविधानात् जातिशब्दा-वेतौ, जातिस्तु क्रियाभिव्यङ्गयेति क्रियोत्तरकाले शब्दप्रयोगः, न तु वासोऽनश्शब्दें;◌ः क्रियावचनत्वम्, अतो वानतक्षण-क्रिययोरचोदितत्वात् नानुष्ठानमिति सप्तने स्थितम् । ब्रह्मणश्चोदितत्वाभावादिति - "मनो ब्रह्मे'त्यादौ ब्रह्मेत्युपासनमात्रं विधीयते च त्वात्मा, तथापि यस् यन्मात्रतयोपासनं विहितं तत्तन्मात्रतयैव प्रतिपत्तव्यम्, यवद्वचनं वाचनिकमिति न्यायात् नाधिकमध्याहर्तव्यम् अतिप्रसङ्गदिति भावः ।

ब्रह्मसामानाधिकरण्णञ्चेति - ब्रह्मण उपास्यत्वश्रवणात् ब्रह्मोपासने सर्वत्रात्मत्वस्य सत्यत्वादिवदनुवृत्तताया: पूर्वाधिकरणे समर्थितत्वादित्यर्थ: । इतिकरणवैयर्थ्यं हेतुरिति - शुक्तिकां रजतमिति प्रत्येतीति वाक्यसमानाकारत्वादिति भाव: । प्रतीपगतद्वितीयावभिक्तिरपीति - "य एतदेवं विद्वानादित्यं

४.१.६

ब्रह्मेत्युपास्ते' "य: सङ्कल्पं ब्रअह्मेत्युपास्ते' इत्यादावादित्यसङ्कल्पादिपुंल्लिङ्गशब्देषु द्वितीयाया असंदिग्वत्वादिति भाव: । हेतुरिति - प्रतीकस्यैव स्वततनत्रोपास्यत्वं ब्रह्मणो दृष्टिविशेषणत्वम् इत्येवंरूपे अधिकरणार्थे इति शेष:, आदित्यादे: दृष्टि-विशेषणत्वे "ब्रह्म आदित्य इत्युपास्ते' "ब्रह्म सङ्कल्प इत्युपास्ते' इत्येवं प्रथमत: उपास्यं ब्रह्म द्वितीयान्तेन निर्दिश्य दृष्टि-विशेषणानां आदित्यादीनां प्रथमान्तेन पश्चाच्च निर्देशप्रसङ्ग इत्यर्थ: । अत: प्रतीकगतद्वितीयाविभक्ति: प्रथमनिर्देशश्च-मनऽादे: स्वतन्त्रोपास्यत्वं ब्रह्मण उपास्यविशेषणत्वमित्येवंरूपाधिकरणप्रतिपाद्ये अर्थे हेतुरित्यर्थ: ।। * ।। ।। इति प्रतीकाधिकरणम् ।।

देवताया उत्कर्षादिति - ननु "ब्रह्मदृष्टिरुत्कर्षा'दिति ब्रह्मण एवोत्कर्षात् दृष्टिविशेषणत्वमुक्तम्, नत्वादित्यादिदेवतायाः, येनेयमाक्षेपिकी सङ्गतिस्स्यादिति चेन्न, ब्रह्मणस्सर्वज्ञत्वफलप्रदत्वादिना मनआद्यपेक्षयोत्कृष्टत्वात्, तद्दृष्टिर्मनआदौ कर्तव्येत्युक्ते आदित्यादीनामपि उद्गीथाद्यपेक्षया देवात्वादिना उत्कृष्टत्वात् आदित्यादिदृष्टिरुद्गीथादौ कर्तव्येति सिद्धमेवेति भाव: । फलसाधनतया विहितत्वात्प्रधानस्य कर्मण इति - साङ्गस्येति शेष:, ततश्चोद्गीथकर्माङ्गभूतोद्गीथादीनामपि फलवत्त्वमस्तीति भाव: । देवताप्रातिरवन्तरव्यापारमात्रमिति - अतिथिभोगनेनाऽतिथिप्रीतिवदिति भाव:, "फलमत उपपत्ते:' इति न्यायेन परमात्मन एव फलप्रदत्वेन इतरासां देवतानां भोजनेनातिथिवत् कर्मभि: प्रतीनामपि फलप्रदत्वासम्भवेन अप्रधानत्वादिति भाव:, ब्रह्ममतिवदादित्यामितयोपीति चशब्दार्थ इति ग्रन्थो राद्धान्तव्याख्याने उत्कृष्टश्चेत् सुश्लिष्ट इव भाति, न च तत्रापि च शब्दोऽवधारण इति भाष्येणे विरोधश्शङ्कनीय:, तस्य निपातत्वेन नानार्थत्वात्, तथापि व्याख्यानोपपत्ते: सूत्रस्यानेकार्थसूचकत्वादिति द्रष्टव्यम्, ननु उद्गीथादीनां कर्माङ्गतया फलसाधनत्ववत् आदित्यादेरपि देवतारूपेण फलसाधनत्वमविशिष्टमिति कथं पूर्वपक्ष इत्यत आह -

४.१.६

मनो ब्रह्मेत्युपासीतेत्यादिना । अफलसाधनेभ्य इति - न विद्यते फलं यषां त इत्येवं बहुव्रीहिणा अफलशब्दो अफलसाधन- वचन इति भाव: । अर्यम्णे चरुं निर्वपेदिति - यद्यादित्यादे: "अर्यम्णे चरुं निर्वपेत् स्वर्गकाम:' इत्यादि विध्यन्तरविहितेषु कर्मसु फलप्रदत्वसम्भवेऽपि अस्मिन्नुपासनाप्रकरणे देवतात्वाभावेन फलप्रदत्वाभावात् तत उद्गीथादेरेव फलवत्कर्माङ्गत्वात् उत्कृष्टत्वमित्युच्येत-तदापि उद्गीथादावेवादित्यादिदृष्टिविर्धेया, अङ्गानङ्गसमभिव्याहारवतीनां विद्यानां अङ्गेषु अनङ्गदृष्टि-रूपत्वे प्रधानकर्मप्रयुक्ताङ्गाश्रयत्वात् स्वतन्त्रफलानामपि तासां अधिकृताधिकारतया पृथक्प्रवृत्तिर्न कल्पनीयेति प्रयुक्ति-लाघवात्, अन्यथा प्रयुर्क्तिकल्पनागौरवं स्यादिति द्रष्टव्यम्, उद्गीथादीनां क्रियारूपाणामिति पाठ:, कर्मसमवायितयेति क्वचित्पाठो लेखकानवधाननिबन्धन:, उद्गीथादीनां स्वत एव गीतिक्रियारूपत्वात् परैस्तथानुक्तेश्चेति द्रष्टव्यम् । युकत्यन्तरमाह - इयमेवेति । इयमेवर्गग्निस्सामेत्युकत्वा तद्धेतुसमर्पके "तदेतदेतस्यामृच्यध्यूढं साम' इति वाक्ये पृथिव्यग्न्यो: ऋकसामशब्दप्रयोग: पूर्ववाक्ये पृथिव्यग्न्यो: ऋक्सामदृष्टिं ज्ञापयति, आरोप्यवाचिशब्देनौवाधिष्ठान-व्यवहारस्य लोके दर्शनादिति भाव: । न राज्ञि क्षत्तृशब्द इति - अध्यस्ते राज्ञि नाधिष्ठानवाचिक्षत्तृशब्दप्रयोगोऽस्तीति भाव:, तत्र

क्षत्रध्यासाभावादिति क्वचित्पाठो दृश्यते, न तस्य सामीचीन्यं पश्यामः । कर्मणो वीर्यवत्तरत्वं श्रुतमिति - "यदेव विद्यया करोति' इति विद्यया क्रियमाणस्यैव वीर्यवत्तरत्वश्रवणात् आदित्यादेश्चाक्रियमाणत्वादिति भावः । उद्गीथादिकमर्स्वतिशय उपपद्यत इति - भूतभाव्युपयोगं हि वस्तु संस्कार्यमिष्यते, उद्गीथादीनांच क्रियात्वात् ज्योतिष्टोमा-द्युपकारस्य तैः करिष्यमाणत्वाच्च तान्येवोद्वथादीन्यादित्यादिमतिभिः संस्क्रियेरन्नित्यर्थः । कर्मणो ह्यपूर्वसन्निकर्ष इति - उद्गीथादिकर्मण इत्यर्थः, ततश्च सप्रयोजनत्वादादित्यादिमतिभिः संस्कार्यत्वमुपपद्यत इति भावः, ननु उद्गीथादिकर्मणो नापूर्वसन्निकर्षः, प्रधानस्यैवापूर्वसन्निकृष्टत्वादित्याशंक्याह - असाधितस्य करणत्वायोगादिति । अङ्गाननुगृहीतस्य प्रधानस्यापूर्वकरणत्वासम्भवेन अङ्गानामपूवसन्निकृष्टत्वमस्तीति भावः । कर्मस्वतिशयावहत्वादिति - उपासनस्यो-द्गीथादिकमर्सु अतिशयावहत्वात् उद्गीथादिकर्मण एव स्वतन्त्रोपास्यत्वमिति भावः, यकत्यन्तरमाह - आदित्यादिः प्रधानमिति । प्रधानशब्दस्य नित्यनपुंसकलिङ्गतया तथा निर्देशः तदेवोपपादयति । कर्मफलस्येत्यादिना -ॠच्चि पृथिवीत्वं विधेयमवगतमिति । पृथिव्या हि ॠकत्वे अवधार्यमाणे इयमृगेवेत्यक्षरन्यासः स्यादिति भावः । पृथिव्यामृक्छब्दो लाक्षरिक इति -

४.१.६

तदेतदेतस्वामिति वाक्य इति शेषः । सम्बन्धमात्रमिति - पृथिव्यग्न्योः ॠक्सामशब्दवाच्याध्यस्तत्वलक्षणसम्बन्धोऽस्तीति भावः । न तूत्कर्षमिति - नाध्यस्तमपेक्षत इत्यर्थः, तथाचाध्यस्तवाचिशब्दत्वाभावेपि अधिष्ठानवाचिशब्देन अध्यति लक्षणया प्रयोग उप-पद्यत इति भावः । कर्मस्वतिशयाधायकत्वेनेति - कर्मस्वनुष्ठितेषु परमात्मप्रीतिरूपतिशयाधाने आदित्यादिदेवताप्रीतेः द्वारत्वादिति भावः, यद्यप्ययं ग्रन्थः पुरोवादग्रन्थेषु न दृश्यते, तथापि योग्यतानुसारादेवमुक्तमिति द्रष्टव्यम् । नहि द्वितीयाविभकत्यर्थो-ऽनन्वित इति - लोकेष्वित्यस्य द्वितीयया विपरिणाममात्रेणैव "वाचं धेनुमुपासीत' "योषितमग्निं ध्यायीत' इत्यादिवत् "लोकान् पञ्जविधं सामोपासीत' इत्युक्तौ विरोधाभावादिति भावः । क्रत्वधिकृतेनेति - क्रत्वङ्गाश्रितत्वात् गोदोहनादिवदिति भावः ।

४.१.७

पृथिव्येव ॠक् नान्यदस्तीति - अयमर्थः-पृथिव्येव ॠगित्युक्ते नान्या ॠगिति वाक्यशेषरूपं विवरणं सम्पद्यत इति ।। * ।।

।। इति आदित्यादिमत्यधिकरणम् ।।

आसनसमर्थनहेतोरैकाग्रयस्येति - अनन्तराधिकरणयोः अप्रासङ्गिकत्वेपि आसननियमसमर्थनहेतोश्चित्तैकाग्रयस्याऽस्मिन्न-धिकरणे समर्थ्यमानत्वादनन्तराधिकरणप्रतिपादितेषु अङ्गावबद्धोपासनेषु कर्मतन्त्रेषु ॠत्विक्कर्मसु आसननियमसमथर्ना-सम्भवेनाऽव्यवहिताधिकरणसङ्गत्यभावात्परमप्रकृतेनैव सङ्गतिरित्यर्थः, अङ्गावबद्धोपसनपर्युदासेनेतरेषूपासनेषु आसन-नियमचिन्तनात् अनन्तराधिकरणेनापि सङ्गतिः कथञ्चित् फलतीति बोद्धव्यम् । आद्यधिकरणे समर्थितत्वादिति - "तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्पृहा' इत्यैकाग्रयस्य समर्थितत्वमभिप्रेतं द्रष्टव्यम्, परोक्तसूत्रार्थं दूषयति । उपासन-सम्भवादित्यतोपीति - तदवश्यम्भावादिति । आसनस्यावश्यम्भावादित्यर्थः, ननु' "विविक्तदेशे तु सुस्वासनस्थः' इति कैवल्योपनिषदि श्रवणात् कथं पूर्वपक्षोत्थितिरिति चेत्, सूत्रकृता शङ्करादिभिश्चान्यैस्तद्गतवाक्यस्य क्काष्यनुपात्तत्वात् सर्वव्याख्यानाधिकरणे अस्मदीयाचार्यै-

४.१.११

रेष्यनुदाहृतत्वाच्च कैवल्योपनिषन्न संप्रतिपन्नेति केचिन्मन्यन्ते । केचित्तु तस्य दहरविद्याविशेषविषयत्वेन सर्वविद्या-साधारणत्वाभावात् अनुपन्यास इति प्रतिपद्यन्ते ।। * ।। चेलाजिनकुशोत्तरम्-चेलं-सर्वोत्तरम्, अजिनं-कुशापेक्षया उत्तरं, कुशाभूतलापेक्षया उत्तरा इत्यर्थः ।। * ।। "समे शुचौ शर्करावन्हिबालुकाविवर्जिते शब्दलाश्रयादिभिः । मनोनुकूले न तु चक्षुःपीडने गुहानिवाता-

४.१.१२

श्रयणे प्रयोजयेत' इति वचनं, शर्कराः सूक्ष्मपाषाणाः । आसनसहपठितदेशविशेष इति - आसनाङ्गभूत इत्यर्थः, एकाग्र-तातिरिक्तदेशकालविशेषाश्रवणात् एकाग्रतानुकूलासानानुकूलदेशादिविशेषस्य ध्यानापेक्षितत्वमित्युक्ते एकाग्रतापेक्षितस्य देशविशेषाद्यङ्गकस्यऽऽसननियमस्याऽपेक्षितत्वं किं वक्तव्यमित्यर्थः । उक्तप्रकारेणेति - कैमुतिकन्यायेनेति भावः ।। * ।।

।। इति आसीनाधिकरणम् ।।

भाष्ये-एकस्मिन्नेवाहानि शास्त्रार्थस्य कृतत्वादिति, इदमुपलक्षणं, ध्यानेन दर्शनसमानाकारभक्तिरूपध्याने निष्पन्न शास्त्राथर्स्य कृतत्वान्न तत् उर्ध्वमुपासनं कार्यमित्यर्थः, "स खल्वेवं वर्तयन्यावदायुषम्' इति श्रुतिस्तु कर्मणामेव यावज्जीवमनुष्ठेयत्वमाह, न तु विद्याया इति पूर्वपक्ष्यभिप्रायः, तत्रापि हि दृष्टमिति, यावज्जीवं कर्मानुष्ठानस्याऽपुनरावृत्ति-फलकत्वमुच्यमानं विद्यां प्रति

४.१.१३

स्वरूपोपकारकत्वेनैवोपपादनीयमिति तदुक्तिसामर्थ्यात् विद्याया अपि यावज्जीवमनुष्ठेयत्वं तत्र विवक्षितमुन्नीयत इति तत्फलात् "प्रायणान्तमभिध्यायीत' इति श्रुत्यन्तरदर्शनाच्च दर्शनसमानाकारतापव्यनन्तरमपि यथाश्रुतं यावज्जीवमुपासन-मनुेठेयमिति भावः । एतेन "प्रायणान्तमभिध्यायीत' इति श्रुत्यनुसारात् प्रायणशाब्दसं मरणे प्रसिद्धेश्च आप्रयाणादिति सूत्रपाठोऽयुक्त इति निरस्तम्, "प्रयाणकालो मनसाऽचलेन' इत्यादि स्मृतिप्रसिद्धेः प्रयाणशब्दस्यापि समानत्वात् । उपाध-रनुवृत्तत्वादिति - ब्राह्मणदेहावच्छिन्नत्वस्यैवोपाधित्वेन तस्यानुवृत्तैरित्यर्थः । मुक्तस्य न मुमुक्षेति - जीवन्मुक्तस्येत्यर्थः । प्रीतेश्च यथाशास्त्रमनुष्ठानजन्यत्वादिति - ननु "वेदनं ध्यानविश्रान्त'मित्युक्तरीत्या छागपशुन्यायेन दर्शनसमानाकारभक्ति-रूपापन्नज्ञानस्यैव शास्त्रात्रर्त्वाच्च दर्शनसमानाकारज्ञाननिष्पत्तिपर्यन्तमावृत्तिः भाष्यकृतापि पूर्वपक्षेऽभ्युपगन्तव्येति चेत्, सत्यभ्युपगन्तव्या साक्षात्कारपर्यन्तावृत्तिः, तथापि साक्षात्कारफलकत्वेन नोपासनस्य तावत्पर्यन्तत्वम्, अपितु परम-पुरुषप्रीतिसाधनतया दर्शनसमानाकारस्य चोदितत्वात्तावतैव च शास्त्राथर्स्य कृतत्वात् न तत उर्ध्वमुपासनमनुष्ठेयमिति पूर्वपक्षिणां युक्तमिति भावः ।।

।। इति आप्रयाणाधिकरणम् ।।

पेटिकासङ्गतिरिति - साधनपेटिकाकलपेटिकयोः सङ्गतिरित्यर्थः, विद्यास्वरूपशोधनस्य फलाध्यायासङ्गतिं परिहरति । उपाय-

४.१.१३

भूतेति - अश्लेषविनाशप्रपीतिसंशयाभावादिति । अश्लेषविनाशौ प्रतीयेते नवेति संशयस्य वक्तुमशकत्यत्वादित्यर्थः, भाष्ये-शास्त्रविरोधादिति, नामुक्तमिति शास्त्रेण कर्मणां भोगैर्नाश्यत्वावगत्या विरोधात् तयोर्विद्याफलत्वकल्पनंनोपपद्यत इत्यर्थः, भाष्ये-भिन्नविषयत्वादिति, इदमुपलक्षणम्, "नामुक्तं क्षीयते कर्मे'त्येतस्स्मरणमौत्सर्गिकम्, प्रायश्चित्तादिना नाश्यत्वाभ्युपगमात्, ततश्च "एवंविदि पापं कर्म न श्लिष्यते' इति विशेषशास्त्रविरोधे सङ्कुचितविषयमेव वक्तव्यम्, असत्यां ब्रह्मविद्यायाम् असति च प्राश्चिते "नामुक्तं क्षीयते' सत्यर्थः, न च विद्याया मोक्षफलकत्वात् अश्लेषवचनं स्तुतिरिति मन्तव्यम्, एतस्य स्तुतित्वे अदानामानन्त्येन अनिर्मोक्षप्रसङ्कादिति द्रष्टव्यम् ।। * ।।

४.१.१३

पूर्वं शरीरपातानन्तरं कर्मक्षय उक्त इति - साम्पराये तर्तव्याभावादित्यत्रेति शेषः । कर्मफलभोगानवश्यम्भावेपीति - कर्मणां फलभोगावश्यम्भावेपि उपभोगेन सर्वकर्मक्षये ब्रह्मज्ञानं मोक्षमुत्पादयतीति पूर्वपक्षिणोक्त इत्यर्थः । तथा चेदिति - देशकालादिसापेक्ष इत्यर्थः । अविद्यानिवृत्तेरनित्यत्वप्रसङ्गादिति - ननु ज्ञाव्यतिरिक्तदोकालाद्यपेक्षत्वान्नानित्यवप्रसङ्ग इति चेन्न, ज्ञानव्यतिरिक्तासम्भावनाविपरीतभावनारूपप्रतिबन्धकाभावसापेक्षत्वेन अविद्यानिवृत्तषरनित्यत्वतादवस्थ्यात् । अन्ये त्वित्यादि -

४.१.१३

अत एव सुकृतदुष्कृते इत्यादि - उत्तराधविनाशे विधूननादेरसम्भवादित्यर्थः । उत्तराघस्येति - अभक्ष्यभक्षणादिक्रियारूप-कमर्ण इत्यर्थः । नतु क्रियाजन्यादृष्टरूपकर्मण इति मन्तव्यम्, तदतिरिक्तशक्तेरभावात् । विपाकहेत्विति - विपाको नरकादिरुच्यते । विशेषोपादानवैयर्थ्यं स्यादिति - विपाकविधातस्याभ्युपेतत्वेन लेपांशविधात इति वचनस्यायुक्तत्वादिति भावः, शङ्कते । विपाकशक्तेः श्लेषस्त्विष्ट इति - अश्लेषवचनसङ्कोचः स्यादिति । ननु कथमत्राश्लेषवचनसङ्कोचः, ब्रह्मविद्या-श्लेषो हि तत्र कार्यानार्जकत्वम्, ततश्चोत्पन्नस्याप्यस्य ब्रह्मविधि कार्यानार्जकत्वात् अश्लेषवचनं सुश्लिष्टम्, नह्यश्लेषवचन-स्याऽनुत्पत्ति-

४.१.१३

वचनत्वं पुष्करपलाशजलदृष्टान्तविरोधादिति चेत्, उच्यते नहि निषिद्धकर्मजन्यपापस्याश्लेषं श्रुतिर्ब्रवीति, येनायं उपालभ्यः स्यात्, किन्त्व्ेवंविदि पापं कर्म न श्लिप्यत इति निषिद्धकर्मणोऽभक्ष्यभक्षणादेरेवाश्लेषं ब्रवीति, तस्य च कर्मणो ब्रह्मण्यश्लिष्टत्वं हि ब्रह्मविदि पापानार्जकत्वमेव न तु पापोत्पत्तिमभ्युपगम्यः ब्रह्मविदि लेपमात्रानार्जकत्वमिति सङ्कोच आश्रयणीय इत्यभिप्रायात्, नन्वेवं "क्षीयन्ते चास्य कर्माणि' इत्यादिश्रुत्यनुसारेण पूर्वाधविनाशेष्यभक्ष्यभक्षणादिनिषिद्ध-कर्मविनाश एव स्यादिति चेन्न, तेषां कर्मणां क्षणिकत्या तदानीमेव नष्टत्वेन तत्राधविनाशश्रुतेः निषिद्धकमर्जन्यपाप-विनाशपत्वेन "पापं कर्म न श्लिष्यते' इत्यादौ निडिद्धकरण्स्यैव तन्निष्ठकार्यानार्जकत्वरूपाश्लेषस्य वक्तव्यत्वात्, नचावस्थाचतुष्टयमुत्तीर्णशक्तिविषयमित्युवरग्रन्थविरोध इति वाच्यं, तस्याप्यत्रैव तस्याप्यत्रैव तात्पर्यात् ।। * ।। ।। इति तदधिगमाधिकरणम् ।।

४.१.१४

एवमिति न्यायातिदेश इति - न त्वसंश्लेषातिदेशः तस्य प्रतिज्ञयैव निर्दिष्टत्वादिति भावः । "सर्वे पाप्मान' इत्यत्र पाप्मशब्दस्य सुकृतसाधारण्यकोटिबीजं प्रकृयति । न सुकृतं न दुष्कृतमिति - सुकृतदुष्कृते निर्दिश्य सर्वे पाप्मान इति निर्देशः पाप्मशब्दस्य सुकृतसाधारण्यमवगमयति नेति पर्यवसितोऽर्थः । उक्तं न्यायमिति - पूर्वाधिकरणाभिप्रेतन्याय-मित्यर्थः । पूर्वसूत्रानुकृष्टव्यपदेशशब्दार्थमिति - व्यपदेशं प्रदर्शयतीत्यर्थः, तत्र एवंशब्देन पूर्वसूत्रे आभिप्रायिकफल-विरोधित्वन्यायात् कण्ठोक्तस्तद्वयपदेशो-प्यतिदिष्टः, तद्वयपदेशो हि तस्य फलत्वव्यपदेशः, तत्र ह्यत्रासत्वशङ्का प्राप्ता "एवंविदि पापं कर्म न

श्िळप्यते तद्यर्थषीकतूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इति पापानामेव श्रवणात् एवंशब्दोनुकृष्टस्तद्वयपदेशो न सम्भवतीति,

४.१.१५

अतस्तच्छङ्कां व्युदसितुं एवंशब्दानुकृष्टव्यपदेशसिध्यर्थमुभे सुकृतदुष्कृते निर्दिश्य सर्वे पाप्मानोऽतो निवर्तन्त इति साधारण्येन सुकृतस्यापि मुमुक्ष्वनाविष्करणात् "सुकृतदुष्कृते धूनुते' इति वाक्येन अनिष्टत्वाविष्करणाच्च, अनिष्टफलत्वरूपप्रवृतिनिमिव- सत्वात् "सर्वे पाप्मानः प्रदूयन्ते' इति सुकृताश्लेषविनाशस्यापि विद्यमानफलत्वव्यपदेशोस्तीति प्रदर्शयतीति भावः । भाष्ये-सुकृत-स्यापि शास्त्रीयत्वादिति, ज्योतिष्टोमदर्शपूर्णमासादीनां शास्त्रीत्यत्वेन परस्परानुपमर्दकत्वादिति भावः, न च तत्सुकृतदुष्कते धूनुते इति विशिष्य सुकृतस्यापि विनाशश्रवणात् कथमभ्यधिकाशङ्केति वाच्यं, तस्य शरीरपातानन्तरभावि ;सुकृतनाशविषयत्वादिति भावः ।। * ।। ।। इति इतराधिकरणं ।।

भाष्ये-उतानारब्धकार्ययोरेवेति, विद्यायोनिशरीरानारम्भकयोरित्यर्थः, भाष्ये-विन्याफलस्याविशेषश्रवणादिति, "तस्य ताव'- दिति श्रुतेः एतावन्ये चिरं यावद्धुञ्ज्ञानस्येत्यत्रैव क्षेपीयस्ताप्रतिपादनपरत्वेनादधिपरत्वाभावात्, इतरथा-अवषेश्चिरत्वस्य च प्रति- पादने वाक्यभेदप्रसङ्गादिति भावः । यावन्न विमोक्ष्ये - अथ संपत्स्स्े' इति, यावत्प्रारब्धकर्मणा न विमोक्ष्यते अथ संपत्स्यत इत्यर्थः, पुरुषव्यत्ययश्छान्दसः, नचावधिपरत्वे चिरत्वावधित्वरूपार्थद्वयप्रतिपादनेन वाक्यभेदप्रसङ्ग इत्युक्तमिति वाच्यं, वाक्य-न्तरसिद्धचिरत्वानुवादेनावधिमात्रप्रतिपादनपरत्वादस्य वाक्यस्येत्यदोषः । मिथ्यात्वेन बाधादिति - न च यतो ज्ञानमज्ञानस्यैव

४.१.१६

निवर्तकमिति ज्ञानस्य अज्ञानमात्रनिवर्तकत्वेन ज्ञानकार्यभूतप्रारब्धकर्मानिवर्तकत्वात् तस्य कर्मणः स्वोत्पादनभूताविद्यानि-वृत्तिप्रतिबन्धकत्वमस्तीति वाच्यम्, अज्ञानवत्तत्कायर्स्यापि निवर्त्यत्वस्य वक्तव्यत्वात्, इतरथा ज्ञाननिवर्त्यत्वरूपमिथ्या-त्मवस्याऽभावप्रसङ्ग इति भावः ।। * ।।

।। इति अनाब्धकार्याधिकरणम् ।।

भाष्ये-अनिच्छतोऽननुष्ठान प्राप्ते इति, निष्फलकर्मणि चिकीर्षाया अभावादित्यर्थः, यद्यग्निहोत्रादीनां फलवत्त्वं तर्हि अश्लेषो नोप-पद्यत इति भावः,यज्ञेनेत्यादिश्रुतेः, दर्शनसमानाकारविद्योदयात्प्राक् तादर्थ्येन विधानार्थतयोप्युपपत्तेर्विद्योत्पत्त्यनन्तरं यावज्जीवम-ग्निहोत्रादेरनुष्ठेयत्वे प्रमाणाभावादित्यर्थः । समुच्चयवादो निरकाश इति - सर्वापेक्षेति सूत्रं विद्याङ्गत्वपरम्, सहकारित्वेनचेति सूत्रं फलविरोधिनिरसनेन समुच्चयपरमिति यादवमतानवकाश इत्यर्थः ।। * ।।

४.१.१८

उत्तराघं विषयः स्यादिति - इदमुपलक्षणं-मारब्धव्यतिरिक्तपूर्वोत्तरसुकुतदुष्कृतानां विनष्टाश्लिष्टतया उपायनश्रुतेर्निविषयत्व-मित्येवाक्षेपाभिप्रायः, अत्रोपायनस्य चिनष्टाश्लिष्टपूर्वोत्तरसुकृतसजातीयोत्पत्तिरूपत्वेन विनाशश्लेषयोरुपायनवचनेनाऽविरोधा- दिति परिहाराभिप्रायः, अयमर्थः-"तदधिगम उत्तरपूर्वोधयोः' इत्यत्र सम्यक् विवृतस्तत्रैवानुसन्धेयः । परे त्वित्यादि - ततोपि -

४.१.१८

वरं ज्ञानाख्यकार्यायेति - न च तथासति कार्यपदं व्यर्थमिति वाच्यं, यस्य ज्ञानस्य सुकृताश्लेषोत्पादकत्वं तस्मा एव ज्ञानायेति स्फोरकत्वेन साफलत्यात् । अन्ये त्वित्यादि - विद्यासहकारिणामिति । विद्योत्पत्तेः प्राजीनानि नित्यनैमित्तिकानि विद्योत्पव्य- र्थानि अपवर्गार्थानि च तदनन्तरभाधीनि च विद्यया समप्रधानानि विद्यासहकारीणीति तेषां मर्यादा - प्रहाणसम्भावनाया इति । "तत्सुकृतदुष्कृते धूनुते' इति धूननसम्भावनाया इत्यर्थः, विद्यासहकारिणो विद्यया धूननासम्भवात् पूर्वपक्षानुत्थितेरिति भावः । काम्यव्यतिरिक्तेति - काम्येषु कर्मसु मोक्षार्थत्वासम्भवात् सिद्धान्तानुत्थितेरिति भावः ।

स्वाधिकारार्थानामिति - नियोगा-नामित्यर्थः । अपवर्गार्थत्वायोगादिति - ततश्च "न हास्य कर्म क्षीयते' इतिश्रुतेर्विद्यासहकारिविषयत्वमेव वक्तव्यं, ततश्च पूर्व-पक्षसिद्धान्तावपि तद्विषयावेवोचितावि ति भावः । विद्वत्सम्बन्ध्याश्रमधर्मविषयत्वमिति - विदुषा यावज्जीवमग्निहोत्रादीनि

४.१.१९

कर्तव्यानि नवेत्येवं विचारो युक्त इति भावः । विनियोगवचनमिति - सुहृत्संक्रमरणवचनमित्यर्थः । विद्याङ्गकर्मसमृद्धयर्थेति - मोक्षस्थाने विद्यां निवेशयाम इत्यर्थः ।। * ।। ।। इति अग्निहोत्राद्यधिकरणम् ।।

भाष्ये-तच्छरीरविमोक्षावसानत्वश्रवणादिति, "धूत्वा शरीरमकृतं कृतात्मा' इति श्रुत्यन्तरदर्शनात् तस्य तावदित्येतः शरीर-स्याश्रुतत्वेपि शरीरमोक्षावधिकरम्, न च धूत्वा शरीरमित्येतत् प्रारब्धकार्ययावच्छरीरपरम्, एकवचनश्रवणात्, एकत्वाविवक्षा-

वसाने सम्पद्यते, अनेकशरीरोपभोग्यफले चेत् तदवसाने सम्पद्यते, भोगेनैव च क्षपयितव्यत्वादारब्धफल- योः कर्मणोः । "तस्य तावदेव चिरं यावन्न विमोक्ष्ये' इति च भोगेन तयोः कर्मणोर्विमोक्ष उच्यते, देहाव-धिनियमाश्रवणात् । तदेवं ब्रह्मविद्यायाः प्रागनुष्ठितमभुक्तफलमनारब्धफलं पुण्यपापरूपं कर्मानादिकाल-सञ्चितमनन्तं विद्यामाहात्म्याद्विनश्यति । विद्यारम्भोत्तरकालमनुष्ठितञ्च न श्लिष्यति । तत्र पुण्यरूपं सर्वं विदुषः सुहृदो गृह्यन्ति, पापं च द्विषन्त इति निरवद्यम् ।। १९ ।। ।। इतरक्षपणाधिकरणं समाप्तम् ।।

।। इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य प्रथमः पादः ।।

४.१.१९

कल्पने प्रमाणाभावात्, अस्माच्छरीरात्समुत्यायेति श्रुत्यन्तरे अस्मादिति विशेषणेन विद्यायोनिशरीरस्यैव विवक्षितत्वाच्च, अन्यथा तद्वैयर्थ्यापत्तेरिति भावः । देहस्तदवधिश्च न श्रुताविति - तदवधिशब्दः तदवधित्वपरः

देहस्तदविधत्वेन न श्रूयत इत्यर्थः । ननु धूत्वा शरीरमिति श्रुत्यन्तरदर्शनात् तदवधित्वनिश्चय इत्यत आह - धूत्वा शरीरमिति । "अस्माच्छरीरात्समुत्याय' इत्यिापि शरीरपदं प्रारब्धकार्यशरीरसामान्यपरम्, अस्मादिति विशेषणं च श्रुतिस्मृतिप्रसिद्धत्याज्यत्वहेत्वनुमवसिद्धेहयताप्रदर्शनार्थमिति भावः । परे

४.१.१९

त्वित्यादि -तस्य तावदिति श्रुतिवशेनेति । तस्य तावदिति श्रुत्या विद्यायोनिशरीरपात एव ब्रह्मसम्पत्तेः श्रवणेन शरीरान्तरे "अने-कशरीराम्भककर्मफलभोगासम्भवेन क्षयायोगात् ज्ञानेनैव प्रारब्धस्य क्षयो वाच्यइत्यर्थः । शिष्टं स्पष्टम् ।।

।। इति इतरक्षणाधिकरणम् ।।

।। इति दशोपनिषद्भाव्यकारैः श्रीरङ्गरामानुजनुनिभिर्विरचितायां श्रुतप्रकाशिका व्याख्यायां भावप्रकाशिकायां चतुथर्स्याध्यायस्य प्रथमः पादः ।।

Second Pada

४.२.१

यदा लयपरत्वेष्युपपद्यत इति - ननु इन्द्रियान्तरसम्पत्तिवाक्सम्पत्तिवचनयोर्विशेषानुपलम्भात्, अत एव "सर्वाण्यनु' इति सूत्रे तद्भाष्ये च वाक्सम्पत्तिवचनन्यायस्यैव इन्द्रियसम्पत्तावतिदेशाच्च इन्द्रियान्तरवचनस्य कथमुपपादककोटौ निवेश इति चेन्न, तस्मादुपशान्ततेजाः पुनर्भवभिन्द्रियैर्मनसि सम्पद्यमानैः' इत्यस्य ह्यमर्थः-उपशन्ततेजाः उपाशन्तौष्ण्यः पुनर्भवं पुनर्जन्म उद्दिश्य मनसि सम्पद्यमानैरिन्द्रियैस्सह ग्राणमायातीति, अत्र हि पुनर्जन्मोद्दिश्य मनसि इन्द्रियाणां सम्पत्तिर्लयरूपा, इन्द्रियाणां मनसि लये हि पुनर्जन्मन एवाभावप्रसङ्गात् । अतस्तत्र सम्पत्तिशब्दस्य सयोगपरत्वं वक्तव्यमिति - वाक्सम्पत्तिवचनेष्यवैरूप्यात् तथात्वं वक्तव्यमिति इन्द्रियसम्पत्तिवचनमप्युपपादककौटौ निवेशितमिति भावः । वस्तुतस्तु इन्द्रियैर्मनसि सम्पद्यमानैरिति वाक्यस्य न वाक्सम्पत्तिवाक्यापेक्षया वैलक्षण्यमस्ति, अथाष्याचार्यैः गुणसूत्राणां सर्वेषामपि प्रकृताधिकरणार्थोपपादकत्वं वक्तव्यमित्यभिनिवेशादुपपादककोटौ निवेशितमिति द्रष्टव्यम् । नन्वयं विचारः काकदन्तपरीक्षासदृशः, पूर्वोत्तरपक्षयोरर्थभेदा- भावात् वाक्स्वरूपस्य मनसि लये नास्तीति पूर्वोत्तरपक्षयोस्सम्प्रतिपन्नमेव, न च सिद्धान्त्यमिमतो मनसि वाक्संयोगः पूर्व-पक्षिणानभ्युपगत इति शक्यते, वक्तुं, वाचो मनसि संयोगाभावे वागुक्तेर्मनसि लयवार्ताया अप्यसम्भवात्, इयांसु विशेषः,

एवं प्राप्तेऽभिधीयते-वाङ्मनसि-इति वाक्स्वरूपमेव मनसि संपद्यते । कुतः? दर्शनात् । दृश्यते हि वागि- न्द्रिये उपस्तेऽपि मनःप्रवृत्तिः । वृत्तिमात्रसम्पत्त्य्ापि तदुपपद्यत इति चेत्तत्राह-शब्दाच्च-इति ।"वाङ्मनसि सम्पद्यते' इति वाक्स्वरूपसंदत्तावेव हि शब्दो न वृत्तिमात्रसम्पत्तौ । न हि तदानीं वृत्त्युपरमे वागिन्द्रियं प्रमाणा४न्तरेणोपलभ्यते, येन वृत्तिमात्रं संपद्यत इत्युच्येत । यदुक्तं मनसो वाक्प्रकृतित्वाभावाद्वाचो मनसि संपत्तिर्नोपपद्यत इति;

तत् "वाङ्मनसि सम्पद्यते' इति वचनान्मनसा वाक् संयुज्यते न तु तत्र लीयत इति परिहर्तव्यम् ।। १ ।।

४.२.२

वाक्छब्दस्य स्वरूपपरत्वे सम्पत्तिशब्दस्य वागक्तिनिष्पादनलक्षणमनोव्यापारलयपरत्वं वाक्छब्दस्य वागुक्तिपरत्वे तु सम्पत्ति- शब्दस्य तद्धेतव्यापारविलयपरत्वमिति नैतद्वयापारस्य उपयोगोस्ति,
उत्क्रान्तिस्वरूपविशेषपर्यवसायित्वाभावात् देवदत्तपुत्राभि-प्रायेण काञ्च्यां देवदत्तो नष्ट इत्युक्ते देवदत्तशब्दस्य तत्पुत्रलक्षणयापि समर्थयितुं शक्यते, नष्टपदस्य विनष्टपुत्रलक्षणामाश्रित्यापि तदर्थ प्रतिपादयितुं शक्यते, नैतावता अर्थे कश्चन विशेषोभिहितो भवति, तत्तुल्यश्चायं विचारः, न च मुख्यजधन्ययोरन्यतरस्या-मुख्यार्थत्वे समाश्रयणीये जघन्यस्यैव अस्वरसार्थसमाश्रयणन्यायव्युत्पादनार्थमिदमधिकरणमिति वाच्यम्, तस्य पूर्वतन्त्र एव क्षुण्णत्वादिति चेत्, अत्र केचित्-अस्मिन्नधिकरणे वाक्स्वरूपस्य मनसि लय इत्येव प्रधानपूर्वपक्षः, सम्पत्तिश्रुतिः कथचिदुपपद्यत इति, अस्मिन्पक्षे अनुशयं प्रदर्शयता भाष्यकारेण पूर्वपक्षान्तरस्य सूचनात् "तन्मनः प्राण उत्तरा'दित्यतिदेशाधिकरणे अधिका-शङ्कोपपादकभाष्यग्रन्थपरिचयशालिनाम्, किमत्र मनसो लय उच्यते उत संयोगः-इति टीकाग्रन्थदर्शिनां च अस्यार्थस्य सुगम- त्वात्, यदि ह्यत्र वाग्लयपूर्वपक्षो नाभिमतः स्यात्, तर्हि अतिदेशाधिकरणे भाष्ये-मनोलयसाधकाधिकाशङ्काकथनं विरुद्धमेव स्यात्, अतस्तत्रापि वाक्स्वरूपलयकथनमेव प्रधानपर्वपक्षः, सम्पत्तिशब्दस्य व्यापारनिवृत्तिपूर्वकसंयोगार्थकत्वेनाप्युपपन्नत्वात् अप्रकृतौ लयो न युक्त इति सिद्धान्त इत्येव तत्त्वम् । परे तु वाचो मनसि संयोमाभावे वाग्वृत्तेरपि मनसि लयोक्तिर्न सम्भवतीत्ये-तत्सत्यमेव, तथापि सिद्धान्त्यभिमतसंयोमविशेषस्य पूर्वपक्षिणानभ्युपगमात् न पक्षद्वयेप्यर्थाविशेष इति वदन्दि, भाष्ये-वागि- न्द्रिये उपरतेपि मनःप्रवृत्तिरिति, अत्र मनःप्रवृत्तिसव्वाभिधानं वाक्सम्पत्तिहेतुत्वोपपत्त्यर्थम्, अन्यथा हि तत्प्रलीनवृत्तित्वं न सम्पत्तिहेतुतां भजेतेत्यर्थः । प्रवृत्तव्यापारमित्यादिटीकाया अप्यत्रैव तात्पर्यम् ।। * ।।

रुपपद्यते, "तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः' इति ।। २ ।।

।। वागधिकरणं समाप्तम् ।।

४.२.३

भाष्ये-वाचमानु सर्वेषामिन्द्रियाणामिति, अनुशब्दस्तृतीयार्थ इति कर्मप्रवचनीयः, वाचा सहेत्यर्थः, न तु पश्चादथर्वाची, तथा

सति "श्रव्ययं विमक्ती'ति पश्चादर्थेव्ययीभावसमासप्रसङ्गात्, तस्य च नित्यसमासत्वेन वाक्याभावात्, तदर्थे च द्वितीयाया अपि दुर्लभत्वाच्च, अतः सहार्थ एवायं कमर्प्रवचनीयः "कर्मप्रवचनीययुक्ते द्वितीया' इति द्वितीया, अतः टीकाग्रन्थः कथञ्चिन्नेय इति केचिदाहुः, केचित्तु वाचमनु-वाचमनुरुध्य सम्पद्यत इत्यर्थः,
अनुशब्दस्ससाधनक्रियावचनः, शाकल्यस्य संहितामनुप्रावषदित्या- दिवत् शाकल्यस्य संहितामनु निशम्य प्रावर्षदित्यर्थप्रत्ययात् प्रदर्षणस्य पश्चाद्भावोर्थः सिध्यति, यथा च पुमांसमनुजायत इतिपु- मनुज इत्यादौ पुमांसमनुरुध्य जायत इत्यर्थप्रत्ययात् ततः पश्चाज्जननं सिध्यति, एवमिहापि वाचमनुरुध्य इत्यर्थावगमात् पश्चा-दित्यर्थस्सिध्यतीत्यभिप्रेत्याचार्यैरित्थमुक्तमिति प्रतिपादयन्ति ।। * ।। ।। इति वागधिकरणम् ।।

भाष्ये-अतो मनः प्राणे सम्पद्यत इत्यत्रेत्यादि, अत्र केचिदेवं वर्णयन्ति, पूर्वपक्षे प्राणशब्दे लक्षणा अभ्युपगन्तव्या, तथा सम्प-त्तिवाचनस्याप्यस्वारस्यमेव अप्रकृतित्वात्, नहि प्रकृतिमात्र लय उपपद्यते । किञ्च प्राणशब्दस्याब्लक्षकत्वे प्राणस्तेजसीत्युत्तर-वाक्येपि प्राणशब्दस्याऽवैरूपेण जलपरत्वये जलस्य तेजसि लय इत्यर्थः स्यात्, नचैतदयुक्तं प्रयाणकालेषु भूतलयासम्भवात् ।

४.२.३

किञ्च वाङ्मनसि सम्पद्यत इतिवाक्येपि मनश्शब्देन मनःप्रकृत्यहंकारलक्षणायां मुख्यसम्पत्तिसम्भव इति पूर्वपक्षस्यापि सम्भवेन तत्समाधानस्य एतदधिकरणसिद्धान्तयुकत्यापि कर्तुमशक्यत्वात्, तस्मात् श्रुतार्थस्योपपत्तिरस्तीत्येव पूवपक्षो वक्तव्यः, न तु लक्षणामादाय पूर्वपक्ष इति, तत्रैवं केचित्समादधते- प्रकृतिविकृत्योरभेदादन्नमनसोरभेदः, जलप्राणयोश्चाभेदः, ततश्चान्नस्याप् लय इत्युक्तेस्सोपपत्तिकत्वमिति मनसः प्राणलय इत्युक्तिरुपपद्यत इति पूर्वपक्षाभिप्रायः, ततश्च प्राणप्रकृतिभूता अपो निर्दिश्ये- त्यत्र भाष्ये प्रकृतिशब्दः स्वभावपरः, प्राणस्वरूपभूता अपो निर्दिायेत्यर्थः, ततश्च तयोरभेदादित्यर्थ उक्तो भवति, ततश्च पृथि-वीरूपस्य मनसो जलरूपे प्राणे मुख्यलय उपपद्यत इत्यभिप्रायः, परम्परया स्वकारण इति भाष्ये परम्परयेत्यस्य युक्तिपरम्परये-त्यर्थः, टीकापि तदानुगुण्येन नेया, तथाहि किं प्रकृतिविकृतिभावपरमित्यस्य किं प्रकृतिविकृतिभावप्रतिपादनमुखेनाभेदपरमि- त्यर्थः, स्वकारणं पृथिवीद्वारेणेत्यादेरयमर्थः, पृथिवीद्वारेणान्नमयस्य पृथिवीरूपतयैवान्नमयस्य स्वकारणे प्राणशब्दलक्षितासु प्राणनामप्रतिपाद्यास्वित्यर्थः, केचित्तु सम्पद्यत इत्यस्य विधिरूपत्वात् "न विधौ परश्शब्दार्थः' इति न्यायेन सम्पत्तिशब्दास्वा-रस्याश्रयणासम्भवात् सम्पत्तिशब्दस्य लय एव मुख्यत्वात् यथा कथञ्चित् तत्सम्भवे तत्त्यागस्यानुचितत्वात् प्राणशब्दस्याब्ध-लक्षणापि सोढव्या, प्राणस्तेजसीत्यत्र वैरूप्यमापतति चेत्, सोढव्यमेव, अन्यत्र दोषान्तरमापतितं सोढव्यमेव, न्यायागर्तेथै किं कुमर् इति पूर्वपक्षिण आशय सति वदन्दि । परे त्वित्यादि - वृत्त्युपपत्तिपरत्वे इति । वाङ्मनसिदर्शनाच्छब्दाच्चेति सूत्रे वाक्छब्दस्य वृत्तिपरत्वं, शब्दशब्दस्य शब्दोपपत्तिपरत्वमित्याश्रयणे इत्यर्थः । मनश्शब्दयोरिति - "वाङ्मनसि सम्पद्यते मनः

४.२.४

प्राण' सति सप्तम्यन्तप्रथमान्तमनश्शब्दयोरित्यर्थः । प्राणशब्दयोश्चेति - मनः प्राणे प्राणस्तेजसीति सप्तम्यन्तप्रथमान्तमाणशब्द-योरित्यर्थः । अहङ्कारवाचित्वमनोवाचित्वेति - वाङ्मनसीत्यत्र सप्तम्यन्तमनश्शब्दस्याहङ्कारपरत्वं वदता तदधिकरणपूर्वपक्षिणैव "मनः प्राणे' इत्यत्र प्रथमान्तमनश्शब्दस्य मनोवाचित्वं वक्तव्यम्, एवं "तन्मनः प्राण उत्तरा'दित्यधिकरणपूर्वपक्षेपि सप्तम्यन्त-प्रथमान्तशब्दयोः वैरूप्यमाश्रयणीयं, तच्चायुक्तमिति भावः, अभिमतपूर्वपक्षविरोधमेव दर्शयति । मनसोऽहङ्कारलीनत्व इति - यथा मनसः प्राणविलीनत्वे प्राणात्पृथगुत्क्रमणं विरुद्धम् । एवमहङ्कारविलीनत्वेपि विरुद्धमेव, नहि तदानीमहङ्कारस्य भूतेन्द्रियादिहेतु-भूतस्य ब्रह्माण्डावरणभूतस्य उत्क्रमणं सम्भावनापदमिति भावः ।। * ।। ।। इति मनोधिकरणम् ।। भाष्ये-वाङ्मनसोरिति काचित्कः पाठः समासान्तविधेरनित्यत्वनिवन्धनः, तेजश्शब्देन भूतसूक्ष्मांशा विवक्षिता इति वाक्यस्या-

४.२.५

नन्तरम् । उपगमस्सम्बन्ध इति पाठस्समीचीनः - अन्यतरवाचिशब्दनिर्देश इति । अन्यतरमात्रवाचिशाब्दनिर्देश इत्यर्थः । भाष्ये-यमुनासागरं गच्छतीति वचो न विरुध्यते तद्वदिति, नन्वनेनैव दृष्टान्तेन प्राण उपगमनश्रुतेरेव सद्वारकत्वं किं न स्यात्, किञ्च यथा वाह्येन्द्रियव्यापरोपरमानन्तरमपि मनोव्यापारदर्शनात् "वाङ् मनसि सम्पद्यते' इति श्रुतिः, यथा च वाह्यान्तरज्ञानो-परमानन्तरमपि श्वासादिलक्षणप्राणव्यापारदर्शनात् "मनः प्राणे' इति श्रुतिः, तथा श्वासादिप्राणव्यापारोपरमानन्तरमपि देहे क्वचिदौष्ण्यलक्षणतेजोव्यापारदर्शनात् "प्राणस्तेजसी'ति श्रुतेरपि तत्साम्येन साक्षात्तेजस्सम्पत्तिपरत्वमेव युक्तमिति चेन्न, यथा "वायोरग्निः अग्नेराषः' इति श्रवणस्य "एत्तस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' इत्यस्याविरोदायाऽग्न्यादिशब्दस्वऽग्न्या-द्यवस्थपरमात्मपरत्वम्, एवमात्मोपगमश्रुत्यनुरोधाय भूतसूक्ष्मवाचितेजश्शब्दस्य तच्छरीरकजीवपरत्वेनाविरोधोपपत्तेः । किञ्च प्राणस्तेजसीति श्रुत्यनुरोधेन

जीवोपगमात्प्रागेव तेजस्सम्पत्तौ "तेजः परस्यां देवताया'मिति परदेवतासम्पत्तिश्रवणात् जीवोपग- मस्य निरवकाशत्वप्रसङ्गेन क्वचिन्निवेशेऽवश्यंभाविनि सहोत्क्रमणलिङ्गानुगृहीतात्मोपगमनश्रुत्यनुरोधात् जीवसंपत्त्यनन्तरमेव तेजःसम्पत्त्युपपत्तेश्चेति भावः । अश्रुतत्वादिति पूर्वपक्षहेतुमाहुरिति - यद्यपि प्राणस्तेजसीति श्रुतेरनतिशंकयत्वात् यथाश्रुते तेज-स्येवसम्पत्तिः, अश्रुतज्जीवसम्बत्तिपरिहारकल्पनाया अन्याय्यत्वादिति परैः पूर्वपक्षयुक्तितया श्रुतिरेव वर्णिता, तथापि श्रुत्यनु-ग्राहकतया परैरश्रुतकल्पनाया अन्याय्यत्वादिति हेतुरप्युपन्यस्त इति कृत्वा तथोक्तमिति द्रष्टव्यम् । अश्रवणमात्रस्य हेतुत्वा-योगादिति - "एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति' इति प्रदेशान्तरे श्रवणे विद्यमाने श्रवणसामान्याभावस्य हेतुत्वायोगादित्यर्थः । सहावस्थानस्य श्रुतिमिति - तत्सहिततयाऽवस्थानं सहावस्थानं, तदाधारत्वेनावस्थानमिति यावत्, न तु सहावस्थानं सामानाधिकरण्यमिति मन्तव्यम् । परैर्जीवाधिकरणकावस्थान एव स विज्ञान इत्यस्य प्रमाणीकरणादिति द्रष्टव्यम् ।। * ।। ।। इत्यध्यक्षाधिकरणम् ।।

इति प्राप्त उच्यते-भूतेषु-इति । भूतेषु संपद्यते, कुतः? तच्छ्रुतेः "पृथिवीमय आपोमयः तेजोमयः' इति जीवस्य सञ्चरतः सर्वभूतमयत्वश्रुतेः ।। ५ ।।

ननु तेजःप्रभृतिष्वेकैकस्मिन् क्रमेण संपत्तावपि "पृथिवीमयः' इत्यादिका श्रुतिरुपपद्यते, अत आह -

४.२.६

व्याख्यातं त्र्यात्मकत्वादितीति - त्र्यात्मकत्वात्तुच भूयस्त्वादिति पाठः, शाङ्करभाष्ये तथा दर्शनादिति द्रष्टव्यम्, अण्व्यो मात्रास्सूक्ष्माः दशार्धानां-पञ्चाचामित्यर्थः । जीवसहितप्राणेति - ततश्च सः प्राणसंपृक्ताध्यक्ष इति परव्याख्यानमनुपपन्नमिति

४.२.७

भावः । तत्र च व्युदसनीयेति - स्फुणटसूत्रार्थव्युदसनीयशङ्काया एव पूर्वपक्षस्योचितत्वादिति भावः । पुनस्सम्भवविषयतयेति - "अण्व्यो मात्रा विनाशिन्य' इति स्मृतेश्च "महदाद्य विशेषान्ताः' इति स्वोदाहृतस्मृतेश्च, वैषम्यमनुपूर्वश इति पुनस्सम्भवप्रति-पादकपदसम्भवासम्भवाभ्यामिति द्रष्टव्यम् ।। * ।। ।। इति भूताधिकरणं ।।

विनाशरूपं प्राप्यते, तदुच्यते "यदा सर्वे प्रमुच्यन्ते' इति चोपासनवेलायां यो ब्रह्मानुभवस्तद्विषयमित्य- भिप्रायः ।। ७ ।।

४.२.१२

वस्तुसामर्थ्यादिति पूर्वेणान्वयः, स्थूलशरीरस्योष्मा सर्वात्रिक इति ग्रन्थस्थानन्तरं सूक्ष्मदेहस्य सार्वत्रिकत्वादिति शेषोऽध्या- हर्तव्यः-इति "सन्तापयति खं देहमापादतलमस्तकम्' इत्यग्निशिखाप्रयुक्तः स्थूलशरीरे आपादतलमभिव्याप्तः सन्तापशब्दित ऊष्मा सूक्ष्मशरीरसार्वत्रिकत्वनिबन्धनः, न तु स्थूलशरीरत्वनिबन्धन इत्यर्थः । अग्निशिखायाः क्रमेणोपसंहियमाणत्वादिति - न च अग्निशिखायाः क्वाचित्कत्वादेवोष्मणः क्वाचित्कत्वोपत्तेर्नतस्य सूक्ष्मशरीरक्वाचित्कत्वनिबन्धनत्वमिति वाच्यं, अग्निशि-खाक्वाचित्कत्वस्यापि सूक्ष्मशरीरक्वाचित्कत्वनिबन्धनत्वादित्यभिप्रायः, यद्वा भूतसूक्ष्मान्तर्गततेजोंशातिरिक्ताग्निशिखाया अभा-वादिति भावः ।। * ।। हृदयान्निष्क्रामतीत्यर्थ इति - निष्क्रमितुमुद्युक्त इत्यर्थः, एतदपि फलितार्थकथनम्, "अथैनमेते प्राणा

अभिसमायन्ति स एतास्तेजोमात्रास्समभ्याददानो हृदयमेवान्वपाक्रामति' इत्युक्तत्वात् "तस्य हैतस्थ हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्कामती'ति पठ्यते, अत एतत्सन्दर्भानुसारात्

निर्गममार्गापरिज्ञानेनांतर्हृदय एव परिभ्रमति, पश्चाद्वदयाग्रं प्रद्योते तेनैष आत्मा निष्कामतीत्येवार्थः, तस्यैव स्वरसतः प्रतीतेः-इति द्रष्टव्यम् । केचित्तु हृदयाग्रपद्योतनं हृदयैकदेशान्निष्कान्तस्य

४.२.१२

मार्गप्रदर्शनायोपयुज्यते, अतो यथाश्रुतार्थेपि नानुपपत्तिरित्याहुः, तेन प्रद्योतेनेत्यादिवाक्यस्येत्यादिचोद्यस्याऽयमर्थः- उत्क्रान्तेर-विद्वन्मात्रविषयत्वे अर्चिरादिगतिरपि विदुषो न प्रसजेत्, अत उत्क्रान्तिवचनस्याविद्वन्मात्रविषयत्वमिति वक्तं न शक्यत इति, तस्मादविदुष इत्युक्तमिति शेषः । सिद्धान्ते तु विद्वद्विषयमेवेदमिति - एवकारो भिन्नक्रमः, इदमेव वाक्यं विद्वद्विषयं अविद्वद्विषयमपि भवतीत्यर्थः, मूर्ध्न इत्यस्य विद्वद्विषयत्वेन पूर्वं व्याख्यातत्वात्, ननु हृदयप्रद्योतनस्य सर्वसाधारण्ये तदोका-ग्रज्वलनमित्यत्र भाष्ये अप्रज्वलनस्य
विद्यासामर्थ्यलब्धहार्दानुग्रहाधीनत्वप्रतिपादनात् तद्विरोध इति चेत्, शताधिकनाडीवि-वेचकज्वलनविशेषस्य तदधीनत्वपरत्वप्रतिपादनपरतया विरोधाभावादिति भावः । इत्यत्रार्थपुत्रवित्तविषयेषणात्रयराहित्यं विवक्षितमिति - अत्रार्थशब्दः स्वर्गादिलोकपरः, "ते ह स्म पुत्रेषणायाश्च वित्तेषणायाश्च लोकेषणायाश्च व्युत्थाया' इति श्रुतेः, भाष्ये-अपपुनर्मृत्यंक्षयतीति विद्वांसं प्रस्तुत्येति संसारतरणरूपफलकीर्तनस्य विद्वद्विषयत्वावक्षयंभावात् विद्वांसमित्युक्तम् । षष्ठया

४.२.१३

अपादानवाचकत्वाञ्चेति - अपादानरूपसम्बन्धस्य शेषत्वेन विवक्षासम्भवादिति भावः । अग्नेरषां भक्षकत्वानुसन्धानमिति - "अग्निर्वैभृस्युः सोऽपामन्नम्' इति अपामग्न्यन्नत्वोपासनमुकत्वा विहितस्य फलमुच्यते, "अपपुनर्मृत्युञ्जयति' इति भावः । परे त्वि-त्यादि - सगुणविदुषश्चेति । सगुणब्रह्मोपासकस्येत्यर्थः, द्वितीयेति योगविभागात्समासः, असामवेदविदुषः'-"विशेषविदुष-श्शास्त्रम्' इत्यादिरामायणमाधकाव्यप्रयोगदर्शनात्, तेन विद्वच्छब्दस्य शत्रन्ततया "न लोकाव्यये'ति कृद्योगषष्ठ्या निषेधात् शेषलक्षणषष्ठयाश्च सुरणगुणेति सता योगे षष्ठी ततः समस्यत इति षष्ठीसमासनिषेधात्, सगुणं विद्वानीति द्वितीयापक्ष सामस-

४.२.१३

प्राप्त्यम्भवात्, नैवं निर्देशो युक्त इति चोच्चं निरस्तं, सुष्सुषेति वा समासात् साधुरिति । केचित्, गत्यादिपाठदर्शनात् "द्वितीया-समास' इति माधव्याख्याने मल्लिनार्थेनोक्तं, तदपि ग्राह्यमेव - इयं च तेषां सूत्रयोजनेति । "सूक्ष्मं प्रमाणतः-इति सूत्रयोजनेत्यर्थः, तदापीतेरिति पूवर्सूत्रयोजनायान्तु योजनांशे अत्यन्तदूष्याभावात् तदकथनं न दोषः । नाडीनिष्क्रमणश्रुतिरूपप्रमाणादिति - यद्यपि परभाष्ये प्रमाणत इत्यस् परिमाणत इत्यर्थः प्रतीयते, एवं हि तद्याख्यानं, तल्लिङ्गशरीरं स्वरूपतः परिमाणत्च सूक्ष्मं, स्व- रूपतः सौक्ष्म्य नायनस्य महतस्तेजस इव, भ्रसरेणारिव च परिमाणतः सौक्ष्म्यस, तथ परिमाणतस्सौक्ष्म्ात् नाडीसञ्चारो- पपत्तिः, स्वरूपतस्सौक्ष्म्ात् अप्रतिपातपार्श्वस्थानुपलम्भोपपत्तिरिति, तथापि प्रमाणपरत्वारस्यादियधपि सौक्ष्ना प्रतीयते इति

४.२.१३

तथोक्तमिति द्रष्टव्यम्, मृतत्वाभावाशङ्का शमयितुमिति पाठः, अर्चिरादिगत्युपपत्त्यर्थमिति छेदः । अतद्विषयत्वादनुदाहार्यमिति

४.२.१४

न च प्रद्यत इति पदं गन्तव्यं, न विद्यते पदं यस्य सोऽपद इत्येवं युक्तस्य गन्तव्यरहितत्वप्रतिपादनात् कथं तस्य नोदाहर्तव्यत्व- मिति शंख्यम्, पदशब्दस्य इन्द्रादिस्थंनवाचित्वात् ।। * ।। ।। इति आसृत्युपक्राधिकरणम् ।।

यथाकर्म यथाविद्यमिति यथाकर्मेत्यत्र "नश्च नपुंसकादन्यतरस्यातम्' इति टजभावे रूपम् ।। * ।।

ननु "वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि' इति वाक्यत्रयार्थे क्रमेण "नैकस्मिन्दर्शयतो हि' इत्यन्तसूत्रैर्विचारिते तेजः परस्या'मिति

चतुर्थवाक्यार्थ-

इति प्राप्त उच्यत-तानि परे-इति । तानि परस्मिन्नात्मनि सम्पद्यते; कुतः? तथा ह्याह श्रुतिः तेजः परस्यां देवतायाम्' इति । यथाह श्रुतिस्तदनुगुणं कार्यं कल्प्यमित्यर्थः । सुषुप्तिप्रलययोर्यथा परमात्मसम्पत्त्या सुखदुःखोपभोगायासविश्रमः; तद्वदिहापि ।। १४ ।। ।। परसम्पत्त्यधिकरणं समाप्तम् ।।

४.२.१५

चतुष्टयस्यापि विद्वदविद्वत्साधारण्यनिर्णायकस्यारम्भ उचितः, न तु मध्य इत्याशङ्कय "समाना चासृत्युपक्रमा'ि्दिति विद्वदवि-द्वत्समानत्वनिर्णयस्य सूत्र कृता समानविषयत्वसंशयास्पदमात्र एत्त कर्तुं युक्ततया तेजः परस्था देवताया'मिति वाक्यार्थस्य समा-नत्वसंशयानास्पदत्वात् तत्साधारण्येन कर्तुमयुक्तत्वमभिप्रेत्य चतुर्थवाक्यार्थनिर्णायकाधिकरणाभ्यां प्रागेव समाना चे'त्यधि- करणं निवेशितमिति परिहरति - पूर्व समाना चेत्यादि ।। * ।। ।। इति परसम्पत्यधिकरणम् ।।

उक्तमेवार्थं दृष्टान्तान्तरप्रदर्शनेन विवृणोति - यथा च कब्चुकोष्णीषवत इत्यादिना । तद्रहितस्य च विश्रम इति - तद्राहित्य-दशायां विश्रम, इत्यर्थः । सुषुप्तौ जीवमात्रस्येति -न तु प्रलयोत्क्रान्त्योरिव स्थूलसूक्ष्मविशिष्टस्य जीवस्येति भावः । शङ्कते - विशेष्याशस्येति । सुषुप्तिवदिति भावः । "गताः कलाः पञ्चदशं प्रतिष्ठाः' इति प्राणशब्दोदितानीद्रिषाणि देशः, मन एकं सूक्ष्माणि

४.२.१५

भूतानि पञ्चेति षोडशकलास्सन्दि, तत्र ध्राणस्य पृथिवीविकारत्वान्मनसोपि "अन्नमयं सोम्य मन' इति पृथिवीविकारत्वात् द्वयोरप्येकीकरणेन पञ्चदशत्वोक्तिरिष्युपपद्यते, प्रतिष्ठाः स्वखोपादानानि इति अवयवेषु वा अज्ञाने वा लयोक्तिवदसङ्गतेय- मुक्तिः, किञ्च परैरेवमनुक्तञ्च, अतो नायम्पाठ इति चोदयन्ति, तान्प्रतिवदामः, अन्तःकरणादिना जीवाविद्यामात्रकार्यत्वपक्षे तत्त्वज्ञानेन जीवाविद्याया उन्मूलिततया स्वकारणेषु लयासम्भवेति ईश्वराश्रितमायापरिणाममहाभूतोपसृष्टजर्वाविद्याकार्यत्वपक्षे तत्त्वज्ञानेन जीवांशस्य नाशेपि उपष्टम्भीभूतमहाभूतांशस्य सत्त्वेन तत्रान्तःकरणादिकलैकदेशस्य लयसम्भवात्, तन्तुद्वयारब्ध- पटस्य एकतन्तुनाशे तन्त्वन्तरे लयदृष्टेः परग्रन्थेषु तथा समर्थितत्वाच्च न यथानुवादः, नच उत्तराधिकरणे कलाप्रलयस्य निर-वशेषत्वसमर्थनात् तद्विरोधः स्यादिति वाच्यभूत जीवाविद्याकर्यांश एव निरवशेषलय इतिपादनपरत्वेन विरोधाभावात् । प्रथम इति - अधिकरणे

इतिशेषः । भिद्यते चासां नामरूपे इति - आसां कलानां नामरूपे शकत्यात्मके अपि भिद्येते-विदीयेते इत्यर्थः । अविद्वद्दृष्टयाप्यनवगतत्वादिति - तेषामदृश्यत्वेन श्रुत्येकसमधिगम्यस्याऽथर्स्य विदुषा उत्प्रेक्षितुमशक्यत्वादिति भावः ।

४.२.१५

प्राकृतप्रलयविषयतया वार्थवत्त्वादिति - यद्यप्यात्मज्ञानेन कलाप्रलयं प्रतिपाद्य हि "भिद्येते चासां नामरूपे पुरुषे' इत्येवं प्रोच्यते स एषोऽकलोऽमृतोभवती'तिश्रुतस्यन सर्वसाधारणप्राकृतप्रलयपरत्वं सम्भवति, तथापि देवमनुष्यादिनामरूपविषयतयार्थवत्तया पूर्वदूषण एव तात्पर्यमिति द्रष्टव्यम् । ईश्वरांशस्य निमित्तकारणत्वादिति - तन्मत इति शेषः ।। * ।।

।। इति अविभागाधिकरणं ।।

४.२.१८

उद्धृताग्नौ प्रदेश इति - उद्धृत्रोग्निर्यस्मात्प्रदेशादिति बहुव्रीहिः,भाष्ये-अमुष्यादादित्यादिति, प्रतायन्ते-सन्तता अवन्ति, आदि-त्यान्निसृता नाडीषु सम्बद्धाः नाडीभ्यो निसृताः, सन्तानभूताः सत्यः आदित्ये सम्बद्धा इति वाक्यार्थः ।। * ।।

।। इति रश्म्यनुसाराधिकरणम् ।।

णयोः प्रशस्तत्वविपरीतत्वे चोत्तमाधमगतिहेतुत्वेन स्याताम् । अतो निशि मरणमधोगतिहेतुत्वान्न ब्रह्म-प्राप्तिहेतुरिति चेत्-तन्न विदुषः कर्मसम्बन्धस्य यावद्देहभावित्वात् । एतदुक्तं भवति-अनारब्धकार्याणामधो-गतिहेतुभूतानां कर्मणां विद्यासम्बन्धेनैव

विनाशादुत्तरेषां चाश्लेषात्प्रारब्धकार्यस्य च चरमदेहावधित्वा-द्वन्धहेत्वभावाद्विदुषो निशामृतस्यापि ब्रह्मप्राप्तिः सिद्धैव । दर्शयति च श्रुतिः "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' इति । "दिवा च शुक्लपक्षश्च' सत्यादिवचनमविद्वद्विषयम् ।। १८ ।।

।। निशाधिकरणं समाप्तम् ।।

४.२.१८

तर्हि निशि मृतस्येति - रश्म्यनुसारेणेति शेषः, इष्टापत्तिमाशङ्क्याह - तस्य रविरश्म्यनपेक्षत्व इति । निशि ब्रह्मगमनस्य रविरश्म्यनपेक्षत्व इत्यर्थः । विद्यानिष्पत्यभावनिबन्धनत्वाश्रयणेनेति - अयम्भावः-विद्याया निशि मृतविषये न सर्वदा फला-जनकत्वं पूर्वपक्षिणोऽभिमतं येन विद्यायाः पाक्षिकफलत्वं नास्ति, अप्रारब्धकर्मभिर्वा प्रारब्धकर्मभिरेव वा शरीरान्तरव्यवधाने- नेति हि पूर्वपक्ष्यभिप्रायः, अतो न पाक्षिकफलत्वप्रसङ्ग इति नन्वेवं चरमत्वमेव नासातीति पूर्वपक्षे सिद्धान्तमाष्ये प्रारब्धकार्यस्य कर्मणः चरमदेहावधित्वादिति देहस्य चारम्य सिद्धवत्कृत्य परिहारो न सङ्कच्छेतेति चेत्-चरमदेहावधित्वादिति भाष्यस्याऽयमर्थः-पलभूतदेहावधित्वादस्य कर्मणः, इयन्ति शरीराणि फलभूतानीति नियमसत्त्वेन तावद्देहाधिकदेहनिष्पादनासामर्त्यादिति, अथ- मेव यावद्देहभावित्वादिति सूत्रखण्डाभिप्रेतार्थ इति द्रष्टव्यम् । तस्य तु प्रतिज्ञायामिति - रश्म्यनुसारीति प्रतिज्ञायामित्यर्थः ।

४.२.१९

अन्यथा अपेक्षिताथान्तरप्रतिज्ञाया इति - निशि मृतस्य मुक्तिस्सम्भवतीत्यर्थान्तरप्रतिज्ञाया यावद्देहमावित्वादिति िहेतोश्चे- त्यर्थः ।। * ।। ।। इति निशाधिकरणम् ।।

धूमादिमार्गलिङ्गाभावादिति - दक्षिणायानमृतानांअनन्यथासिद्धधूषादिप्राषकप्रमाणभावादित्यर्थःल भाष्ये तत्पर्यवैतीति, यदा

४.२.२०

तत्पर्यवैतीति यदा-यस्मिन्काले, तत् सोमलोकप्रापकं पुण्यं, पर्यवैति परिक्षीयत, इत्यर्थः परैर्वर्णितः ।। * ।। ननु "नैते सृती पार्थ । जानन' इति उपसंहारानुसारेण "यत्र काले त्वनावत्तिम् इत्युपक्रमो बाध्यते-इत्येतावति वक्तव्ये मध्ये ्रअग्निर्ज्योति' इत्यादिवचनं भाष्ये अयुक्तमित्याशङ्कय उपक्रमस्य उपसंहारमात्रेण अन्यथानयनासम्भवात् महावाक्यस्वारस्येन बाध्यत्वं वक्तुं मध्यमवाक्यस्यापि उपक्रमविरोधं दर्शयतीत्याह - यत्र काले त्वतीति । य उपक्रमः स बाध्यत इत्यभिप्रायेणेत्यन्वयः न तु तत्प्रतीकग्रहणमिति मन्त- व्यम् । चतुर्विधेति - अर्तो जिमासुरर्थाथा मानी च भरतर्षभ' इत्युक्तचर्तुविधिति द्रष्टव्यम्, ततश्च "यत्र काले त्वनावृत्तिमावृत्तिञ्चैव

४.२.२०

योगिनः' इत्यावृत्तिप्रतिपादकवचनमुपपद्यत इति भावः, यत्र काले त्वनावृत्तिमित्यस्य यैरातिवाहिकैर्नीयमानस्याऽऽवृत्तिरितिफलि-तोर्थः ।। * ।। ।। दक्षिणायनाधिकरणम् ।।

।। इति दशोपनिषद्भाष्यकारैः श्रीरङ्गरामानुजमुनिभिर्विरचितायां श्रुतप्रकाशिका-व्याख्यायां भावप्रकाशिकायां चतुथर्स्याध्यायस्य द्वितीयः पादः ।।

समाप्तश्चाष्यायः ।

समुदिताधिकरणसङ्ख्या -१४२- समुदितसूत्रसङ्ख्या - ५०७ ।

Third Pada

४.३.१

शव्यं शवयोग्यमिति - साध्यर्थे यत्, तस्मै स तत्र परिजिहीत-इति त्वावायवान् विगमय्य छिद्रं करोति, यथा रथचक्रस्य छिद्रमित्यर्थः । निरन्ध्रं तथा मार्गमावृत्व स्थितो वायुः स्वावयवप्रहाणे रथचक्रप्रमाणं छिद्ररूपं मार्गं ददातीत्यर्थः । अन्यत्रेति

उत तस्मादन्येऽन्यत्र मार्गा इति तैर्वाऽनेन वेत्यनियमः-इति । किं युक्तम्? अनियम इति । कुतः? अनेक-रूपत्वान्नैरपेक्ष्याच्चेति ।।

एवं प्राप्ते अभिधीयते-अर्चिरादिनेति । अर्चिरादिरेक एव मार्गः सर्वत्र प्रतिपाद्यते, अतोऽर्चिरादिनैव गच्छति । कुतः? तत्प्रथितेः- तस्यैव सर्वत्र प्रथितेः । प्रथितिः-प्रसिद्धिः, तस्यैव सर्वत्र प्रत्यभिज्ञानादित्यर्थः । प्रत्यभिज्ञानात्स एव मार्गः सर्वत्र न्यूनाधिकभावेन प्रतिपाद्यत इति विद्यागुणोपसंहारवदन्यत्र उक्तानामन्य-त्रोपसंहारः क्रियेत । छान्दोग्ये तावदुपकोशलविद्यायां पञ्चाग्निविद्यायां चैकरूप एवाम्नायते; वाजसनेयके च पञ्चाग्निविद्यायां

तथैवार्चिरादिरल्पान्तर आम्नायते, अतस्तत्रापि स एवेति प्रतीयते । अन्यत्रापि सर्व-त्राग्न्यादित्यादयः प्रत्यभिज्ञायन्ते ।। १ ।।

।। अर्चिराद्यधिकरणं समाप्तम् ।।

४.३.१

व्याख्यय पदम् । कमिभेदश्चेति - क्रमाश्रयपदार्थानां देवलोकवायुलोकादीनां प्रतिशाखम् भेदेनाऽऽम्नानादिति भावः । गुणान-त्यादुपसंहारो न शक्यत इतीति - इदमुपलक्षणम्, भदकाकारस्यापि सम्बन्धादेवमन्यत्रापि' इत्येवामादिषु दर्शितत्वादित्यपि द्रष्टव्यम् । दार्विहौमिक इति - दार्वेहाय इति कर्मविशेषणां नाम ।। * ।।

।। इति अर्चिगद्यधिकरणम् ।।

४.३.२

श्रुत्यर्थपाठप्रवृत्तिमुख्यकाण्डाः क्रपमाणनीति - वेदं कृत्वा वेदिं करोति' इति श्रौतक्रमः, "अग्निहोत्रं जुहोति, यवामूं पचति' इत्यादौ अर्थलक्षणप्रयोजनवशात्कं, "समिधो यज्जति तनूनपातं वजति, इत्यादौ पाठक्रमेण क्रमः, "प्राजापत्येषु पशुगुणेषु नियो-जनोपकरणादिषु पूर्वपूवर्कारेण उत्तरोत्तरप्रवृतिक्रः सारस्वतौ भवतः' इति विहितयोः सरस्वतीदैवत्यसरस्वद्दैवत्ययोः मुख्ययोः क्रमानुरोधेन तदङ्गभूतानां निर्वापादीनां क्रमः, काण्डक्रमो हि स्थानक्रमः, यथा साद्यस्के "सह पशूनालभते, इति सहकर्तव्यत्वेन चोदितानामग्नीषोमीयसवनीयानूबन्ध्यानां मध्ये सवनीयस्य स्तानभ्रंशाभावेन तस्यैव पूर्वभावित्वमिति द्रष्टव्यम् । पञ्चम्यभिहितं संवत्सरदेवलोकयोर्मासादूर्ध्वत्वमिति - "मासेभ्यस्संवत्सरं भासेभ्यो देवलोक' मिति पञ्चम्यारध्याहृतोर्ध्वशब्दरूपदिक्छब्ध-योगनिमित्तत्वात् पञ्चमीनिमित्तदिक्छब्द एव पञ्चमीशब्देनोपचरित इति द्रष्टव्यम् ननु नेयं पञ्चमी उर्ध्वादिति दिक्छब्दयोगनिसिमता,

४.३.२

अपि तेऽर्चिषमभिसम्भवन्ति' इति अनुषक्ताभिसम्भवनक्रियापादानत्वप्रयुक्ता, अतो नाध्याहृतोर्ध्वशब्दमादायोर्द्वत्वस्य श्रुतत्व-निर्वाहः । किञ्च कत्वाश्रुत्यादेः क्रियामौर्वापर्यलक्षणक्रमार्थकत्वात् पञ्चम्या उर्ध्वाधरक्रमे पौर्वापर्यक्रमे वा नानुशासनमस्ति, येनो-र्ध्वत्वस्य श्रौतत्वं स्यादिति चेन्न, अभिसम्भवनक्रियाया अपादाननिरपेक्षत्वेन "तेनोर्ध्वमाक्रमते' इति श्रुत्यन्तरानुसारेण च उर्ध्वशब्दस्यैव अध्याहर्तव्यतया उर्ध्वत्वस्य श्रौतत्वसम्भवादिति तात्पर्यात् ।यद्यपि च "मासेभ्यो देवलोक' मित्यादावभि-सम्भवनक्रियोपेक्षया अपादानपञ्चमी, तथापि देवलोकोद्यभिसम्भवनक्रियां प्रति नियतपूर्वसत्वरूपकारकंविशेषत्वलक्षणापादान- त्वस्य पञ्चम्याभिधाने क्रियाकारकलक्षणपौर्वापर्यरूपः क्रमोऽभिहितो भवति, ततश्च मासापादानकाभिसम्भवनक्रियाकर्मत्वे संवत्सरदेवलोकयोः कथ्यमाने मासादूर्ध्वत्वं संवत्सरदेवलोकयोरर्थात्सिध्यतीत्यभिप्रेत्य ऊर्ध्वत्वस्य श्रौतत्वमभिहितमिति द्रष्टव्यम्, एवमुत्तरत्रापि द्रष्टव्यम् । यद्वा आतिवाहिकत्वापेषां हेदुपञ्चमीत्वपक्षे तेषां पूर्वसत्त्वरूपं हेतुत्वं श्रुत्युक्तमिति द्रष्टव्यम् । हेतौ कथ-मर्चिरादौ पञ्चमी प्राप्नोति "विभाषागुणेऽस्त्रियाम्' इति पञ्चमी गुण हेतावस्त्रीलिङ्गे विहिता, यथा जाड्यन ज्जाड्याद्वा बद्ध इतीति चेत्, अत्र

केचित समादधते, नात्र "सत्त्वे निविशतेऽपैति' इति लक्षितस्य पारिभाषिकस्य गुणस्य ग्रहणम्, अपितु पराश्रित-मात्रस्य ग्रहणम्, तेनार्चिष इत्यादौ हेतौ पञ्चमीसिद्धेति तदतिमन्दम्, यद्यपि परतत्रस्य गुणस्य ग्रहणम् तथापि नात्र

पञ्चमी प्राप्नोति, अर्चिरादीना विशेष्यतया स्वतन्त्रत्वेन पराश्रितत्वभावात् गुणत्वाभावात्, यस्य गुणस्य हि भावादित्यत्र गुणशब्देन यावान् पराश्रयविशेषणभूतो द्रव्यादन्यो जात्यादिरर्थोस्ति, स सर्वोपि गृह्यत इत्युक्तप्रकाराश्रयणेपि अर्चिदानीनं विपतीतत्वेन गुणत्वाप्रसक्तेः, सत्यपि च गुणत्वे अर्चिष इत्यत्र पञ्चमी नानेन प्राप्नोति "अस्त्रिया'मिति प्रतिषेधात्, अर्चिश्शब्दस्य "इसुसन्तः । अर्चिः स्त्रियां च' इति सूत्रेण स्त्रीनपुंसकयोरनुशासनात् पुल्लिंगता नास्त्येव, अत्रत्यार्चिश्शब्द स्त्रीलिङ्ग एव "तेऽर्चिषमभिसम्भ- वन्ति' इति पूर्वत्र निर्देशात्, नपुंसकलिङ्गे तु अर्चिरित्येव द्वितीयैकवचने रूपं स्यात्, अतः स्त्रीलिङ्गः एवार्चिश्शब्द इति "अस्त्रिया'मिति प्रतिषेधः स्यादेव, नहि परतन्त्रमात्रस्य गुणस्य ग्रहणम्, अपि तु पारिभाषिकस्यैव तदनुरूपत्वेन वृत्यादा-वुदाहरणप्रत्युदाहरणयोर्दशितत्वात्, यद्यपि यस्य गुणस्य हि भावादित्यत्र पराश्रितस्य भेदकजात्यादेः गुणशब्देन ग्रहणमिति स्थितम्, लोके उपसजनं गुण उच्यते, शुक्लादौ च प्रसिद्धतरो गुणशब्दः, वैशेषिकास्तु रूपरसादयश्चतुर्विंशतिर्गुणा इति प्रति- पन्नाः, तथापि इह शास्त्रे "सत्त्वे निविशते' इत्यादिपरिभाषितस्य गुणस्य ग्रहणम्, यथा वा "वोतो गुणवचनात्' इत्यत्र कृत्रि-माकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय इति न्यायात्, तस्मेदवमत्र परिहारः "विभाषा गुणेऽस्त्रिया' मित्यत्र विभाषेति योगविभागात् गुणवचनादपि हेतोः स्त्रियामपि क्वचित्पञ्चमी भवति, तेन नास्तीह घटः, अनुपलब्धेः, वहिमान् धूमात्-इत्यादयः प्रयोगा अप्युपपन्ना इत्यलमतिक्षोदेन, - अन्यत्रेति । वृहदारण्यक एव अदेशान्तर इत्यर्थः । वायोरादित्यात्पूर्वत्वं प्रातिपदिकाभिहित- मिति - इदमुपलक्षणम्, तेन "स उर्ध्वमाक्रमते स आदित्यमागच्छति' इति वायुदत्तमार्यस्याप्राप्तौ तृतीयया करणत्वश्रवणात्,

४.३.२

नचोर्ध्वदेशाक्रमणमात्रे वायुदत्तमार्गस्य करणत्वं श्रुतं, नत्वादत्यमण्डलाक्रमण इति वाच्यम्, उर्ध्वदेशस्य विशेषाकांशायाम् आदित्यमण्डलरूपविशेषपर्यवसानादिति द्रष्टव्यम् । अनन्तरं वायुरितीति - "देवयानं पन्थानमापद्याभिलोकमागच्छति स चायुलोक'मिति पाठक्रमात् अर्चिरनन्तरमेव वायोनिर्वेश इति पूर्वः पक्षः, "स वायुमागच्छति तस्मै स तत्र परिजिहीते' इति वायुप्रदेन मार्गेण आदित्यगमनश्रवणात् कौषीतकिपाठक्रमं बाधित्वा आदित्यात्पूर्व वायोर्निवेश इति सिद्धान्तः, सूत्रमप्यादि- त्यात्पूर्वं वायोर्निवेशपरम्, नत्वब्दानन्तर्यपरमिति वदन्तीति भावः ।। * ।।

।। इति वाय्वधिकरणम् ।।

४.३.३

भाष्ये-अग्नित्वोकशब्दस्यार्चिःपर्यायत्वेनेति, अर्चिश्शब्देन ज्वालावाचित्यं तदात्मकोऽग्निरुच्यते उपचारादिनेति भावः, नन्वत्र "इसुसोस्सामर्थ्ये नित्यं समासेऽनुत्तरपदस्थस्य' इति षत्वप्राप्त्या अर्चिष्पर्यात्वेनेति भवितव्यम्,, यथा-सपिर्ष्कुण्डिका शोचि- ष्केशः-इत्यादि, अर्चिश्शुचिविसृविच्छादिभ्य इसिः' इति शोचिरादिवत् अर्चिश्शब्दोपि इसिप्रत्ययान्तरा व्युत्पादित इति चेत् अत्राभिधीयते- "अतः कृकमिकसे'त्युत्तरसूत्रे कंसग्रहणेन उणादिषु क्वचिद्वयत्पत्तिकार्यं न भवतीति ज्ञापनेन इसिप्रत्ययान्तत्वा-भावादिति वा कस्कादिषु सपिर्ष्कुण्डिकेत्यादिपाठेन इदं षत्वमनित्यमिति ज्ञापनेन वा अर्चिश्शब्दस्याऽत्र शब्दस्वरूपपरतया अमुख्यत्वाद्गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति वा महत्पूर्वश्शूद्र इत्यादावात्वादिवत् षत्वं न भवतीति, एवमुत्तरत्रापि अर्चिः-प्रभृतिष्वित्यादौ द्रष्टव्यम् । तृतीयस्तु परिहार उत्तरत्र न सम्भवति, अर्थपरत्वेन तत्र मुख्यत्वादिति अर्चिष्प्रभृतिष्वित्येव बहुषु कोशेषु पाठो दृश्यते तत्र न किञ्चिद्वन्तसाध्यं "अर्चिश्शब्दस्य गौणत्वादिसश्चाप्रत्ययत्वतः । अनित्यत्वाच्च मूर्धन्यो न कृतो-ऽर्चिःपदेऽमुना' इति

च संग्रहश्लोकः । भाष्ये-आदित्यस्याप्यत्रेत्यादि, अयमर्थः-पाठात्प्राप्तक्रमः पाठक्रमः, "अग्निलोकमा- गच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोक'मिति पाठवशेन वायोर्वरुणस्य यः क्रमः प्राप्तः, तद्वाधेन विद्युत उपरि तेषां निवेशसमर्थनेन वाजसनेयश्रुत्यनुसारादादित्यस्य वायोरुपरि निवेशोऽस्मिन्नधिकरणे सिषाधयिषित इत्यर्थः । आशंसोयां कः, देवलोकशब्दाभिहितात् वायोरुपरि निवेशस्सिद्ध इति क्वचित्पाठः, तत्र उपरिशब्दयोगे "षष्ठयतसर्थप्रत्ययेन' इति प्राप्त षष्ठी-ततः फश्चाद् वज्जतीति महाभाष्यप्रयोयेणानित्यत्वज्ञापनात् क्वचिन्न सम्भवतीति न कतेति द्रष्टव्यम् । वायुमपेक्ष्ये-

त्यर्थविवक्षमाक्यब्क्यब्लोपे पञ्चमीति वा द्रष्टव्यम्, एवमुत्तरत्रापि - भाष्ये इदानीं वरुणेन्द्रादिष्विति, तदर्थमिति शेषः ।

४.३.३

क्रमद्वयभङ्गः स्यादिति - आदित्यचन्द्रयोरन्तराले चन्द्रविद्युतोरन्तराले वा निवेशे आदित्याच्चन्द्रप्रसं चन्द्रमसो वा विद्युतम्, इतिश्रौतक्रगस्य च "वरुणलोकं स इन्द्रलोकं स प्रजापतिलोक' मिति पाठक्रमप्राप्तस्य वरुणेन्द्रप्रजापतीनामानन्तर्यस्य च भङ्गप्रसङ्गादित्यर्थः । तडिततोष्यधस्तादिति पञ्चमी पूर्ववत् द्रष्टव्या - कथं तडिदुपरि वरुणनिवेश इति । ननु कथमत्र समासः, अन्यारादिति दिग्योगलक्षणपञ्चम्याः "षष्ठयतसर्थप्रत्ययेने'ति षष्ठया बाधात् अबाधेति पञ्चम्यन्तस्य समासप्राप्त्यभावात् षष्ठीपक्षे पूरणगुणेत्यव्ययेन षष्ठयन्तस्य समासनिषेधात्, उच्यते-षष्ठीसमास एवायम्, पूरणगुणेति निषेधस्तु सत्तव्याभ्यां कृद्भ्यां साह- चर्यात् कृदन्तेनाव्ययेनैव, नान्येन, यथा कटस्य कर्तुं कटस्य कृत्वेत्यादि, तथैव वृत्त्यादावुदाहृतत्वात्, अकृदन्ताव्ययययोगे तु समासोऽस्त्येव, अत एव भगवान् पाणिनिः निरदिशत्"अनुर्यत्समया'इति, व्याख्यातं च वृत्तिकारादिभिः यस्य समया यत्स- मयेति, उपायान्तरमप्यस्तीति तद्वयाख्यातृभिरन्यथा पयिहृतः, अनित्यश्चायं समासप्रतिषेध इति पूर्वमसकृदुपपादितम् "शिष्ट-प्रयोगबाहुल्यात् कृदन्ताव्ययसंग्रहात् । अनित्यत्वाच्च, तस्यैव निर्देशास्साधनो मताः' ।अर्थकमस्य पाठप्रमादिति - मेधोदर-वर्तित्वलक्षणसामर्थ्यरूपार्थक्रमस्येत्यर्थः । तडितो गमयितृत्वाव्यवधानायेति -ततश्चन्द्रमसो विद्युतमिति औतक्रमभङ्गाङ्ग्रपि सोढव्य इति भावः । तथासतीन्द्रप्रजापत्योर्यश्रापाठमिति - फस वरुणलोकं स इन्द्रलोकं स प्रजापतिलोक'मिति पाठानुसारेण त्रयाणामव्यवधानसिध्यर्थं तडितः पूर्वं त्रयाणां निेर्दशऽङ्गीकियमाणे मेधोदरवर्तित्वरूपार्थक्रमभङ्गप्रसङ्गादित्यर्थः । तडिदानन्तर्य इति - वरुणानन्तरं तडित् तत इन्द्रप्रजापती इत्यभ्युपगम्यमाने कौषीतकिपाठसिद्धस्य वरुणेन्द्रप्रजापतीनां क्रमस्य भङ्गप्रसङ्गा-दित्यर्थः । अतः क्वचित्कोशेषु "स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं सा प्रजापतिलोक'मिति वरुणेन्द्रलोकयोर्मध्ये आदि-त्यलोकपाठो दृश्यते, स तु न प्रामाणिकः, केषुचित्कोशेषु तथा अनुदाहृतत्वात्, अस्यैव श्रुतप्रकाशिकाग्रन्थस्य साक्षित्वाच्च, तथाहि पाठे सति एतदधिकरणपूर्वपक्षसिद्धान्तयोः असङ्गतिप्रसङ्गाच्च, तथाहि यदि वरुणलोकानन्तरमादित्यः पठितः स्यात्, तर्हि-

४.३.४

वरुणेन्द्रप्रजापतीनां त्रयाणामप्यादित्यात् पूर्वत्वमिति पूर्वपक्षस्य कथमुत्थितिः, अत्रहि वायुलोकं वरुणलोकमिति पाठक्रममव- लम्ब्य वायुलोकानन्तर्थं वरुणलोकस्य वदन् पूर्वपक्षी कथं तुरगारूढस्य तुस्गविस्मरणन्यायेन वायुलोकादित्यलोकयोः पाठप्राप्तं क्रमं चानादृत्या त्रयाणामादित्यार्त्पूवं निवेश इत्याक्षिपेत् , न च वाय्वादित्ययोरानन्तर्यस्य बाधितत्वात् तत्रैव निवेशनीयानां निवेश इति वाच्यम्,"आदित्याच्छन्द्रमस' इति क्रमस्य इन्द्रप्रजापतिभ्यां बाधितत्वात्, वरुणस्यापि तत्रैव निवेशःकिं न स्या- दित्यपि वक्तुं सुशकत्वात्, किञ्च नह्यानन्तर्यं

स्वरसप्रतिपन्नं, केनचित् प्रामाणिकेनापोदितं चेत् अतथाभूतेनापि शक्यते अपव- दितुम्, तदपि प्रामाणिकमिति चेत्- तर्हि पाठक्रमानुग्रहायादित्यानन्तरमेव तर्योर्निर्देशोस्तु, आदित्याच्चन्द्रमसमिति शब्दस्वरस-प्रतिपन्नमप्यानन्तर्यमपि बाध्यताम्, वायुलोकादादित्यमिति प्रतिपन्नस्य वाय्वादित्यक्रमस्य पाठक्रमेण बाधवत्, इतरथा वरुण-लोकानन्तरमिन्द्रलोकात् पूर्वमादित्यलोकपाठस्य निरालम्बनत्व प्रसङ्गात्, अत एव पूर्वतंत्रे अग्नौ सावित्रहोमादिवैशेषिकानुष्ठा-नान्तरमेव दीक्षणीयाया अनुष्ठानं सावित्रहोमादिपाठानन्तरं दीक्षणीयागुणविधानार्थस्याप्यनुवादस्य दर्शनात्, इतरथा तत्र तत्पाठस्य अत्यन्तानर्थक्यप्रसङ्गादित्युक्तं पञ्चमे, अतो वरुणलोकेन्द्रलोकर्योध्ये नादित्यलोकपाठः कौषीतक्यां युक्तः, नचै-वमुत्तराधिकरणयादवप्रकाशमतदूषणग्रन्थविरोध इति वाच्यं, यादवप्रकाशैः तथा पाठस्य कल्पिततया पराभ्युगममादायैव परो दूषणीय इति न्यायात् उपपत्तेरिति युक्तमुत्पश्यामः । परे तु-आदित्याच्चन्द्रमसमिति श्रौत्रक्रमबाधापेक्षया "स आदित्यलोकं स इन्द्रलोक'मिति पाठक्रमबाधस्यैव युक्तत्वात्, वायुलोकादित्यलोकयोरानम्तर्यस्थ व्यवधानसहत्वाच्च त्रयाणामप्यादित्यार्त्पूवं निवेश इति पूर्वपक्षो युक्त एव । अत एव ज्जातेष्टौ पुत्रजननरूपनिमित्तानन्तर्यस्य निमित्तश्रुतिप्राप्तस्य स्तनप्राशनोत्कर्षद्वारा पुत्रविपत्तिसम्पादकत्वेन प्रयोजनविरोधप्रसङ्गात् बाधितत्वे सति जातकर्मानन्तरमपि न जातेष्टयनुष्ठानं, निमिवस्वरसानन्तर्यस्य बाधितत्वात्, तत आशौचापगमे पर्वकाले च प्राप्ते कर्तव्यमिति चतुर्थे सत्त्वात् तन्नयायेन बाधितस्य वायुलोकादित्यलोकानन्त- र्यस्य

बाधितत्वादेव निवेशसाकाङ्क्षाणां तत्रैव निवेशो युक्त इति पूर्वपक्षस्य युक्तत्वात् । न च त्रयाणामप्यादित्यात्परत एव निवेश इति पूर्वपक्षः किं न स्यादिति वाच्यं, न्यायसाम्येन तस्यापीष्टत्वात्, वायुलोकं वरुणलोकं आदित्यलोकमिति प्रथमनुतप्राठक्रम-परित्यागेन चरमश्रुतस्य "स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोक'मिति पाठक्रमानुग्रहस्य अन्याय्यत्वाच्च, तस्मात् त्रया- णां चादित्यात्पूर्वं निवेश इति युक्त एव पूर्वः पक्षः । सर्वकोशेषु दृष्टस्य वरुणेन्द्रलोकमध्ये आदित्यलोकपाठस्य यादवप्रकाशदि-भिरादृतस्याऽपलापे अतिप्रसङ्गाच्च, न च वरुणेन्द्रान्तराले आदित्यपाठस्याऽत्यन्तनिरवलम्बनत्वमिति वाच्यम्, "अग्निहोत्रं जुहोति यावगूं पचती'तिवत् बाधस्य न्यायप्राप्तत्वादिति वदन्ति ।। * ।। ।। इति वरुणाधिकरणम् ।।

४.३.४

भाष्ये-अमुकं च पर्वतपार्श्वमिति, पार्श्वशब्दस्योमयलिङ्गत्वात् पुल्लिङ्गाभिप्रायेणेत्थमुक्तं, नपुंसके तु अदकमिति स्यात्, न च "सैव हि सत्यादयः' इति सूत्रे कल्पतरौ अमुक्त फलं प्रदानसनयेत्यगृह्यमाणविशेषत्वादिति निर्देशात् अमुकमित्यप्यस्ति रूपमिति वाच्यं, तस्य व्याकरणस्मृतिविरुद्धतया अप्रामाणिकत्वात् । लोकशब्दवाच्यत्वमुक्तं स्यादिति - ततश्च स्तुतितया पर्यवस्यत् मुख्यस्य कालविशेषस्य भोगभूमित्वासम्भवादिति भावः । लोकत्वसाधकहेतुरर्थसिद्ध इति - विजिहीर्षते इति विहरणेच्छाप्रति-पादनादिति भावः, इदञ्च विजिहीर्षत इति क्वचित्कपाठप्रभिप्रेत्योक्तं, पाठान्तरं तु पूवर्मेव व्याख्यातम् । भाष्ये-अतिवाहे परम- पुरुषेण नियुक्ता इति, "तत्र नियुक्तः' इति ठगिति भावः । भाष्ये-उपसंहारे श्रूयमाणं पूर्वेषामिति, ननु विशेषविधानस्य शेषप्रति-षेधार्थत्वं लोकदृष्टम्, यथा देवदत्तो वामेनाक्ष्णा पश्यतीति तदितरनिषेधपरत्वम्, ततश्च कथमस्य इतरेषामपि चेतनत्वगमयि-तृत्वप्रतिपादकत्वमिति चेन्न, "स एनान्ब्रह्म गमयती'ति वाक्ये पुरुषत्वं गमयितृत्वं च सिद्धवत्कृत्य अमानवत्वरूपविशेषमात्रप्रति-पादनेन तेषामप्यर्चिरादीनां गमयितृत्वपुरुषत्वावगतेः, ब्रह्मगमयितृत्वविधानपक्षेपि त्वदुक्तरीत्या इतरेषां ब्रह्मगमयितृत्वनिषेधे "विशेषनिषेधे सामान्यस्याभ्यनुज्ञान'मिति न्यायेन ब्रह्मगमयितृत्वमात्रसिद्धेश्चेति द्रष्टव्यम् ।। * ।।

४.३.५

मानवगमयितृत्वव्यवच्छेदकत्वादिति - वैद्युतस्यगमयितृत्वसिद्धवत्कारेणामानवत्वनिवृत्तिमात्रपरत्वात् वाक्यस्येत्यर्थः । वैद्युते विशिष्यायं ब्रह्मगमयिता मानवो नेत्युक्त पूर्वेषां मानवत्वं गमयितृत्वं चोक्तमेव भवतीति भावः । व्यवचमछेद्यस्य मानवत्वं गमये-दिति - अर्चिरादेरित्यर्थः । अन्यत्वित्यादि - अर्थक्रमवशादिति । वृष्टिरूपैककार्यकारित्वलक्षणार्थक्रमवशादित्यर्थः - वरुणो निवेशनीय इति । इन्द्रप्रजापती तु तडितः परस्तान्निवेशनीयावित्येतत्तु पूर्वपक्षसिद्धान्तयोः समानमिति द्रष्टव्यम् । वरुणनिवे-

४.३.६

शपरं व्याख्यातमिति - पूर्वपक्षसूत्रतयेति शेषः । तमभिप्रवहन्तीति - तं प्राययन्तीत्यर्थः । वृष्टिहेतुत्वलक्षणार्थ-कमसचिवेति - इन्द्रस्यापि भेधवाहनत्वेन वर्षहेतुत्वादिति भावः ।। * ।। ।। इति आतिवाहिकाधिकरणं ।।

कार्यमुपासीनानेव गमयतीति वादरिराचार्यो मन्यते । कुतः? अस्य हिरण्यगर्भमुपासीनस्यैव गत्युपपत्तेः, न हि परिपूर्ण सर्वज्ञं सर्वगतं सर्वात्मभूतं परं ब्रह्मोपासीनस्य तत्प्राप्तये देशान्तरगतिरुपपद्यते, प्राप्तत्वादेव; नित्यप्राप्तपरब्रह्मविषयाविद्यानिवृत्तिमात्रमेव हि परविद्याकार्यम् । कार्यं तु हिरण्यगर्भरूपं ब्रह्मोपासीनस्य परिच्छिन्नदेशवर्तिप्राप्यप्राप्त्यर्थं गमनमुपपद्यते । अतोऽर्चिरादिरातिवाहिकगणस्तमेव नयति ।। ६ ।।

४.३.८

भाष्ये-गमयतीति विशेष्यत इति, बहुवचनान्तलोकशब्दस्य लोकविशेषणमुखेन गमनविशेषणत्वं युज्यत इति भावः । अत एव भाष्ये-लोकविशेषवर्तिनमित्युक्तं, भाष्ये-अर्चिरादिना गतोऽभिसन्धत इति यद्यपि न पूर्वत्र अर्चिरादिगतिः प्रस्तुता, तथापि "आकाशो ह वै नामरूपयोर्निर्वतहता' इति ब्रह्मविद्यायाः प्रस्तुतत्वात् ब्रह्मविदश्चार्चिरादिगतिं सिद्धवत्कृत्य एवमुक्तमिति

द्रष्ट- व्यम् ।। * ।।

४.३.१४

प्रपद्य इति, प्रपत्त्यभिसन्धिः प्रत्यभिसंधिशब्देन विवक्षितः ।। * ।। जैमिनिमतादिति - इदमुपलक्षणम्, बादरिमतादित्यपि द्रष्ट- व्यम्. उत्तरत्र मतद्वयविशेषप्रतिपादनात्, ननु आश्रयान्तरप्रत्ययस्य आश्रयान्तरे प्रतिक्षेषः प्रतीक इति हि वृद्धाः, तत्कथमुच्यते

४.३.१४

अप्रतीकालम्बनशब्देन कार्योपासकव्यवच्छेद इत्याशक्याह - न च प्रतीकालम्बनान्नयतीत्यत्रेति । वादरिमताद्विशेषमुकत्वा जैमिनिमताद्विशेषमाह - गोबलीवर्दन्यायादिति । जैमिनेरप्युभयविधान्नयतीत्येव परमतात्पर्यं, आदरातिशयात्तु परब्रह्मोपा-सीनानामर्चिरादिगतिर्जैमिनिना उक्तेत्यर्थः । प्रतिपत्त्याभिसन्धिरिति परेषां पाठः, न च कार्ये प्रतिपत्त्यसन्धिरिति तन्मते सूत्र- पाठश्च ।। * ।।

४.३.१५

भाष्ये पूर्वपक्षोक्तवचनस्य सिद्धान्ते अपरिहृतत्वात् स्वयं तस्यार्थमाह - ब्रह्मणा स ह ते सर्वे इत्यादीति । परेषामित्यादि - परविद्याप्रकरण इति । कठवल्लीषु तयोर्ध्वमायन्निति गतिकीर्तनमित्यर्थः - श्रुतिवाक्ये बलीयसी इति । प्रजापतिश्रुतिः तद्युक्तं वाक्यं चेत्यर्थः - प्रशंसार्थं वा तदिति । तत् सर्वात्मककीर्तनतमित्यर्थः, वाक्यभेदस्तु अस्माकमिष्ट एवेत्याशङ्कयाह - एकवा- क्यत्वे सम्भवतीति । भूगतेन प्रदेशान्तरगमनवदिति - यथा पृथिवीस्थ एव पृथिवी देशन्तरद्वारेण गच्छति, नहि तत्र पृथिवीप्रागप्राप्तेति शक्यते वक्तुं, यथा न्यग्नोधं प्राप्तेन वानरेण अग्रप्रदेशविशेषविशिष्टस्य न्यग्रोधस्यैव प्राप्त्यत्वं तद्वदित्यर्थः । पयसो दध्याद्यवस्थाप्राप्तिवञ्चेति - यथा प्राप्तस्यैव पयसो दध्याद्यवस्थतया आतञ्चनादिभिः प्राप्यत्वमित्यर्थः, यद्वा दध्वाद्य-

४.३.१५

-वस्याभिन्नस्वरूपप्राप्तिवदित्यर्थः । बन्धादनिर्मोक्ष इति - स्वरूपस्य अन्यताकर्तुमशक्यत्वादिति भावः । उभयथा च दोषादिति पठ्यमानत्वादिति - एतस्यैव साम्प्रदायिकत्वेन उभयथा अदोषात् तत्क्रतुश्चेति पाठोऽसांप्रदायिक इति भावः । अपरे त्वित्यादि

४.३.१५

वाक्यभेदप्रसङ्गादिति - अनावृत्तिसम्बन्धस्य एतत्कल्पसम्बन्धस्य च बोधनादिति भावः । परं जैमिनिरित्यनेने विरोध इति -अनावृत्तिसम्बन्धस्य एतत्कल्पसम्बन्धस्य च बोधनादिति भावः । परं जैमिनिरित्यनेन विरोध इति - परं जैमिनिरित्यनेन सिद्धान्तसूत्रेण अप्रतीकालम्बनाचिति सूत्रस्येति भावः । कार्यमण्डलातिक्रमरूपा गतिरिति - उपपद्यत इति शेषः, च नु उपाधिपरिच्छिन्नब्रह्मप्रदेशस्य घटावच्छिननब्रह्मप्रदेशस्य घटावच्छिन्नाकाशस्थानीयस्य जीवस्य कथं गमनमित्यत्राह - जीवत्वस्यौपाधिकत्वादिति । ब्रह्मकायं प्रविशत इति - प्रवेक्ष्यत इत्यर्थः । पर्यङ्कविद्यादिकं प्रमाणमिति चेदिति - नहि परब्रह्मणः पर्यङ्कारूढविग्रहत्वं सम्भवतीति भावः । विलक्षणविग्रहयोगस्यैवेति - "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि' इति

४.३.१५

विद्युद्वर्णविग्रहयोगस्य कारणत्वसाधकत्वादिति भावः । अन्यो त्वाहुरित्यादि - ब्रह्मलोकमिति प्रयोगदर्शनादिति । उपक्रमो-पसंहारस्थब्रह्मलोकशब्दयोरैकार्यस्य वक्तव्यत्वात् ब्रह्मलोकशब्दस्य पृथिव्यन्तरिक्षलोक्रपाथपाठेन चतुर्मुखलोकपरत्वस्य वक्त-व्यत्वाच्चतुर्मुखलोकस्य ब्रह्मशब्दप्रयोगविषयत्वं सिद्धमिति भावः । ह्रदनदीति - "तस्य वा

एतस्य ब्रह्मलोकस्यारो ह्रदो मुहूर्तं यष्टिहा विरजा नदी तिल्यो वृक्षः' इत्यादि प्रमाणादिति भावः । अहीननयादिति - ज्योतिष्टोमप्रकरणश्रुतायाः "द्वादशाही-

४.३.१५

नस्येति'ति विहिताया द्वादशोपसत्ताया अहर्मश्चे उत्कर्षवदिति भावः । परविद्याव्यतिरिक्तश्रेयःप्रदर्शनार्थत्वसम्भवादिति - ये यज्ञेन दानेन तपसा लोकान् यजन्ति ते धूममभिसम्भवन्ती'त्येतत् सर्वेषां परविद्याव्यतिरिक्तश्रेसां धूमादिमार्गसाधनत्वपरम्, न तु

४.३.१५

ज्ञादिमात्रस्येति भावः । हिरण्यगर्भमेव परं ब्रह्म मन्वानस्येति - सर्वमिदमनुपपन्नमित्यत्तरेणान्वयः । तदेवोपपादयति - अब्रह्म-विदामित्यादि ।। * ।। ।। कार्याधिकरणं समाप्तम् ।।

।। इति दशोपनिषद्भाष्यकारैः श्रीरङ्गरामानुजमुनिभिर्विरचितायां श्रुतप्रकाशिका-व्याख्यायां भावप्रकाशिकायां चतुथर्स्याध्यायस्य तृतीयः पादः ।।

Fourth Pada

४.४.१

ननु अपुनरावृत्तिलक्षणा गतिरुक्तेति भाष्यमयुक्तं, तस्यार्थस्य "अनावृत्तिश्शब्दा'दित्यधिकरणे समर्थयिष्यमाणत्वादित्याशङ्कयाह - विषयवाक्य इति । "आप्रयाणात्तत्रापि हि दृष्टम्' इत्यधिकरणविषयवाक्ये इत्यर्थः, अर्चिरादिपादगताधिकरणविेयवाक्यपरत्वस्य वक्तव्यत्वे "एष देवपथो ब्रह्मपथः एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' इति वाक्यं विवक्षितं द्रष्टव्यम् । ननु अस्मिन्न- धिकरणे आगन्तुकत्वानागन्तुकत्वविचारः किमवस्थाविषयः उतावस्थावद्द्रव्यविषयः, न तावदाद्यः विकारूपावस्थायाः सम्प-त्त्यनन्तरभावित्वस्य सिद्धान्तेऽभ्युपेतत्वात्, न द्वितीयः- असत्कार्यवादानभ्युपगमेनावस्थावतो ज्ञानद्रव्यस्याऽऽगन्तुकत्वशङ्काया लब्ध्वाऽ्रऽनन्दी भवति' इत्यादिभ्यो मुक्तस्य सुखानन्त्यश्रवणात् । न चापरिच्छिन्नानन्दरूपचैतन्यमेवास्य स्वरूपे; तच्च संसारदशायामविद्यातिरोहितं परं ज्योतिरुपसम्पन्नस्याविर्भवतीति शक्यं वक्तुं, ज्ञानस्वरूपस्य तिरोधानासम्भवात्, प्रकाशपर्यायस्य ज्ञानस्य तिरोधानं तद्विनाश एवेति हि पूर्वमेवोक्तम् । न च प्रकाशमात्र-स्यानन्दता सम्भवति, सुखस्वरूपता ह्यानन्दस्वरपता, सुखस्वरूपत्वं चात्मनोऽनुकूलत्वम् । प्रमाशमात्रा-त्मवादिनः कस्य प्रकाशोऽनूकूलवेदनीयोभवेदिति प्रकाशमात्रात्मवादिनः कथञ्चिदप्यानन्दस्वरूपता दुरुष- पादा ।स्वरूपापत्तिमात्रे च साध्ये स्वरूपस्य नित्यनिष्पन्नत्वादुपसम्पन्नस्य "स्वेन रूपेणाभिनिष्पद्यते' इति वचनमनर्थकं स्यात् । अतोऽपूर्वेण साध्येन रूपेण सम्बध्यते । एवं चाभिनिष्पद्यत इति वचनं मुख्यार्थमेव भवति, स्वेन रूपेणेत्यष्यानन्दैकान्तेन स्वासाधारणेनाभिनिष्पद्यत इति सङ्गच्छते इति ।

एवं प्राप्ते प्रचक्ष्महे-सम्पद्याविर्भावः- इति । अयं प्रत्यगात्माऽर्चिरादिना परं ज्योतिरुपसम्पद्य यं दशाविशे- षमापद्यते, स स्वरूपाविर्भावरूपः, नापूर्वाकारोत्पत्तिरूपः । कुतः? स्वेनशब्दात्-स्वेन रूपेणेति विशेषणो-

४.४.१

अभावात्, घटादिष्वप्यवस्थायतो नित्यत्वात् अवस्थासम्बन्धस्यैवोत्पत्तिरूपत्वात्, नह्युत्पत्तावागन्तुकत्वात्स्वर्गसुखाद्वैलक्षण्यं मीोसुखे उपलभामहे, किञ्च ब्रह्मानुभवरूपस्यानन्दस्य महापुरुषार्थस्य सत्त्वेन जीवस्वरूपस्यैव साध्यत्वपुरुषार्थत्वप्रतिपादकं "मुक्तः प्रतिज्ञानात्' "आत्मा प्रकरणात्' इतिसूत्रद्वयमप्ययुक्तमिति चेन्न, स्वेन रूपेणाभिनिष्पद्यते' इत्यत्र रूपशब्देन ब्राह्मं रूपमपहतपाप्मत्वादिकं विवक्षितमिति"ब्रह्मेण जैमिनि'रित्यत्र स्पष्टयिष्यते, तत्सिद्धवत्कृत्य तत्किं ब्राह्मं रूपमागन्तुकम्, उत प्राक्सिद्धमिति विचार्यत इत्यभ्युपगमे दोषाभावात्, आगन्तूनां ज्ञानावस्थाविशेषाणामप्रत्याख्यानात्, यदुक्तं किञ्चेत्यादि तन्न, अपहतपाप्मत्वादिविशिष्टस्वस्वरूपस्यापि निरतिशयानन्दत्वसमर्थनपरमात्रपरत्वेन दोषाभावात्, भाष्ये-

आत्मानुकूलत्व- मिति, यमात्मानं प्रति यदनुकूलत्वेन वेदनीयं तत्तस्य सुखमित्यर्थः, आत्मत्वञ्च चैतन्याश्रयत्वं, ततश्च ज्ञानमात्रात्मवादे न किञ्चिदुपपद्यत इति भावः - स्वशब्दोऽसाधारण्यपर इति । आत्मात्मीयज्ञातिधनवाची स्वशब्द इत्युक्तेरात्मीयत्वमात्रवचनोऽवं स्वशब्द इति भावः- नत्वसाध्यत्वपर इति । न च स्वशब्दस्यात्मात्मीयज्ञातिधनमात्रवाचित्वेन कथमसाध्यत्वप्रतिपादकत्वशङ्केति वाच्यम्, स्वीयवाचिनः सर्वादिकस्वीयपरत्वसम्भवेन असाध्यत्वप्रतिपादकत्वस्य फलतस्सम्भवादिति भावः । यद्वा आत्मपरोयं स्वशब्दः, ततश्च असाध्यत्वं फलतीति भावः, रूपं साध्यमित्यर्थ इति ग्रन्थानन्तरमेवञ्चेति प्रतीकग्रहणं दृश्यते, तत् स्वेनशब्दः कथमित्यत्राहेतिग्रन्थात्पूर्वमेव द्रष्टव्यम्, कोशान्तरं वा निरीक्षणीयम् । भाष्ये-यं दशाविशेषमापद्यत इति, अभिनिष्पत्तिवाच्यं

४.४.२

यं दशाविशेषमापाद्यत इत्यर्थः, ततश्च स्वेन रूपेणाभिनिष्पद्यते इत्यस्यापहतपाप्मत्वादिविशिष्टेन स्वेनः रूपेणाभिनिष्पद्यते-धर्म-भूतज्ञानेन विषयीकियत इत्यर्थः, ततश्च विकासाचस्थासम्बन्धरूपोत्पत्तेः धर्मभूतज्ञानगतत्वेऽपि अपहतपाप्मत्वादिगुणाष्यकवि-शिष्टात्मस्वरूपस्यापरिच्छिन्नानन्दतया पुरुषार्थरूपस्य नोत्पत्तिः, अस्मिन्नधिकस्ये अपहतपाप्मत्वादिकं तद्विशिष्टस्वरूपञ्च नागन्तुकम्, अपितु संसारदशायां धर्मभूतज्ञानस्य कर्मणा प्रतिबद्धत्वात्

अपहतपाप्मत्वादिगुणाष्टकविशिष्टात्मस्वरूपविषयी-करणसामर्थ्यं नास्ति तिरोधाननिवृत्तौ तु तद्विषयक भवति, ततश्च तद्विषयकं ज्ञानं परमुत्पद्यते नापहतपाप्मत्वादिरूपं तद्वि-शिष्टस्वरूपं वा इत्येव प्रतिपाद्यते, न तु मुक्तौ धर्मभूतज्ञानस्याप्युत्पत्तिः प्रत्याख्यायते, इयांस्तु विशेषः-संसारदशायां घटादिवि- षयकं ज्ञानं चक्षुरादीन्द्रियव्यापारतव्यपेक्षं, मुक्तौ तिरोधानापगमे सर्वविषयकं ज्ञानं न किञ्चिदागन्तुकं कारणमपेक्षत इत्येतद-भिप्रायेणैवमागन्तुकरूपसामान्यभावप्रवादः ।। * ।। भाष्ये-तिरोधाननिवृत्तिरत्राभिनिष्पत्तरुच्यते इति, न च कमर्रूपबन्धक्षये विकाशरूपाविर्भावो नानुपपन्न इति सुष्ठूक्तमित्युपसंहारभाष्येण-निवृत्तिरोधानस्य स्वरूपाविर्भाव एवेत्युक्तमिति ब्राह्मेण जैमि-निरित्यधिकरणभाष्येण च विरोधः, तिरोधाननिवृत्त्यभिनिष्पत्त्योर्भेदेनोपन्यासादिति वाच्यम्, भावान्तराभावपक्षमादाय निवृत्त्य-भिनिष्पत्त्योरभेदकथनम्, अतिरिक्ताभावपक्षावलम्बनेन भेदोक्तिरिति केचित् । अपरे तु तिरोधाननिवृत्तिरभिनिष्पत्तिरुच्यत इति भाष्यमभेदोपचार निबन्धनमिति समादधते, भाष्ये जागरिताद्यवस्थात्रयविनिर्मुक्तमित्युक्तमयुक्तम् "य एषोऽक्षिणि पुरुषो दृश्यते' "एष स्वप्ने महीयान् चरति तह्यत्रैतत्सुप्तः समस्तसम्प्रसङ्गः' इत्यादिना जागरितावस्थायुक्तस्यैव प्रतिपादनादित्याशङ्कयाह - जागरिताद्यवस्थासूच्यमानास्वित्यादिना ।। * ।।

४.४.३

आनन्दश्चेत्, विषयसम्पर्कनिबन्धन एव जाग्रत्सुषुप्त्यादौ तथान्वयव्यतिरेकविधानादिति व्याप्तिं दूषयति । आनन्दश्रेदित्यादिना - भाष्ये-विकाशरूपाविर्भावो नानुपपन्न इति, धमर्भूतज्ञानविकासरूपोऽपहतपाप्मत्वादिगुणाष्टकाविर्भावो नानुपपन्न इत्यर्थः, गुणाष्यकस्याविर्भावो हि धर्मभूतज्ञानविषयीक्रियमाणत्वमेवेति भावः । ननु अपहतपाप्मत्वादीनां नित्यसिद्धत्वे बन्धस्याऽपार-विर्भावो नानुपपन्न इति सुष्ठूक्तं-सम्पद्याविर्भावः-इति ।। ३ ।। ।। सम्पद्याविर्भावाधिकरणं समाप्तम् ।।

४.४.३

मार्थिकत्वं दुर्वारम् । नित्यसिद्धापहतपाप्मत्वं हि सर्वदा पापरहितत्वं, न च वस्तुतस्सर्वदा पापरहिते पाप्मसम्बन्धः तन्मूलकर्तृ-त्वभोक्तृत्वादिसम्बन्धो वा पारमार्थिकः सम्भवति, एवञ्च जीवस्य ईश्वरभावोपि दुर्वारः, श्रुतिबोधिताभेदविरोधिबन्धसत्यत्वा-सम्भवात्, अन्यथा संसारिणि नित्यसिद्धसत्यसङ्कल्पतिरोधानोकत्ययोगाच्च, नहि जीवस्य संसारदशयामपि अनुवर्तमानो यत्कि-ञ्चित्कार्यगोचरोऽस्सङ्कल्पः स तिरोहित इति वक्तुं युज्यते, तस्मादीश्वरस्य यन्नित्यसिद्धनिरवग्रहसत्यसङ्कल्पत्वं तदेव संसारदशायां जीवस्य ईश्वराभेदानभिव्यकत्या स्वकीयत्वेन अनवभासमानं तं प्रति तिरोहितमिति समर्थयितव्यम् । अपहतपाप्मत्वं न पाप्मविरहः, येन तस्य नित्यसिद्धत्वेन बन्धस्य मिथ्यात्वप्रसङ्गः, किन्तु पापहेतुकर्माचरणेपि पापोत्पत्तिप्रतिबन्धकशक्तियोगित्वम्, एवं सत्य-सङ्कल्पत्वमपि शक्तिरूपेण निर्वाह्यमिति नेश्वराभेदप्रसङ्ग इति चेन्न, एवं शब्दार्थकल्पने प्रमाणाभावात्; नहि पापजननप्रतिबन्धिका शक्तिः संसारपरिभ्रमणदशायां पापानुत्पत्यर्थं कल्पनीया, तदानीं तदुत्पत्तेरिष्टत्वात्,

विद्योदयप्रभृति तु विद्यामाहात्म्यदेव अश्लेषः "तदधिगम उत्तरपूर्वाधयोरश्लेषविनाशौ तद्व्यपदेशात्' इति सूत्रेण दर्शितः, तत एवमप्युक्तविश्लेष उपपद्यत इति व्यर्था शक्तिकल्प-नेति चेत्- अत्रोच्यते-अपहतपाप्मत्वं न पापात्यन्ताभाव इति वक्तुं शक्यम्, पाप्मनां स्वरूपेण अत्यन्ताभावप्रतियोगित्वे निःस्व-रूपत्वापत्तेः, पारमार्थिकत्वाकारेण अभावप्रतियोगित्वे अभ्युपगम्यमानेऽपि किं तत्पारमार्थिकत्वमिति पर्यालोचने अबाध्यत्व- मिति पर्यवस्यति, बाध्तय्व्च न अत्यन्ताभावप्रतियोगित्वमिति वक्तं शक्यम्, तत्रापि स्वरूपेण वा पारमार्थिकत्वाकारेण वेति विकल्पग्रासात्, किन्तु ज्ञाननिवर्त्यत्वम्, ततश्च ज्ञानानिवर्त्यत्वरूपाबाध्यत्वकारेण अत्यन्ताभावप्रतियोगित्वं पाप्मनां पर्यव- सितम्, ततश्च पाप्मनां ज्ञाननिवर्त्यत्वमिति फलितोर्थः, अयञ्चास्माकमिष्ट एव । किञ्च मुक्तस्य त्वन्मते अपहतपाप्मत्वादिप्राद- ुर्भाव एव न सम्भवति, एकजीववादे तावत् तदेकाज्ञानपरिकल्पितस्य जीवेश्वरविभागादिकृत्स्नभेदप्रपञ्चस्य तद्विद्योदये विलयात् निर्विशेषचैतन्यमात्ररूपेणावस्तानमिति न बद्धमुक्तव्यवस्थासम्भवः, अनेकजीववादमभ्युपगम्य बद्धमुक्तव्यवस्थाङ्गीकार्रेपि यद्यपि कस्यचिद्विद्योदये तदविद्याकृतभेदप्रसपञ्चस्य विलयेऽपि बद्धपुरुषान्तराविद्याकृतो भेदप्रपञ्चोऽनुवर्तत इति वक्तुं शक्यते, तथापि जीव इव ईश्वरोऽपि प्रतिबिम्ब इति पक्षे मुक्तस्य बिम्बभूतशुद्धचैतन्यमात्ररूपेणैवावस्थानौचित्येन प्रतिबिम्बान्तरत्वापत्त्यसम्भवात्, तत्सम्भवे हि कदाचित्

जीवरूपप्रतिबिम्बान्तरत्वापत्तेरपि दुर्वारत्वेन अवच्छेदपक्ष इव पुनर्बन्धापत्तेः, अत एव अनेकजीववादे अवच्छेदपक्षो नादियते तदवच्छेदेन मुक्तिः तदचच्छेदेन अन्तःकरणान्तरसंसर्गे पुनरपि बन्धापत्तेः, अतः प्रतिबिम्बस्थानीय ईश्वरः उभयानुस्यूतं शुद्धचैतन्यमिति पक्षे मुक्तस्य
वत्सर्वमुक्तिसर्वज्ञत्वसर्वेश्वरत्यसत्यकामत्वादिगुणकपरमेश्वरभावापत्तिर्वक्तव्या, यथा अनेकदर्पणेषु एकस्य मुखस्य प्रतिबिम्बे सति एकदर्पणापनये सति तत्प्रतिबिम्बोपि बिम्बभावेनावतिष्ठते न तु मुखमात्ररूपेण, तदानीमपि दर्पणान्तरसन्निधानप्रयुक्तस्य मुखे बिम्बत्वस्थानपायात्, तथा एकस्य चैतन्यस्य अनेकेषूपाधिषु प्रतिबिम्बे सति एकस्मिन्प्रतिबिम्बे विद्योदयेन न तदुपाधिनाशे तत्प्रतिबिम्बस्य बिम्बभावेन अवस्थानावश्यम्भावादिति वक्तव्यम्, अयञ्च पक्षो न सम्भवति, यतो रूपानुपहितस्य प्रतिबिम्बो न युक्तः, सुतरां नीरूपे अचाक्षुषे, अचाक्षुषप्रतिफलनवादस्य परिहारयत्वादित्यल-

मतिप्रसङ्गेन । अन्ये त्वित्यादि -पाप्मप्रागभावप्रध्वंसाभावात्यन्ताभावेति । घटात्यन्ताभावस्येव तत्प्रागभावप्रध्वंसयोरपि अत्यन्ताभावत्वाङ्गीकारात् पाप्मप्रध्वसवति मुक्ते
पापात्यन्ताभावरूपापहतपाप्मत्वासम्भवादित्यर्थः ।। * ।।

।। इति सम्पद्याविर्भावाधिकरणम् ।।

ननु भाष्ये साहित्यसाम्यसाधर्म्यादित्युक्तिरयुक्ता, साम्यस्यैव साधर्म्यरूपत्वेन साहित्यसाम्यावगमादित्युकत्यैव चारितार्थ्यादित्य आह - साम्यसाधर्म्यशब्दाविति भोग्यसाहित्यपरत्वादिति । काम्यन्त इति कामाः कल्याणगुणाः, ब्रह्मणा सह कल्याणगुणा-

४.४.४

न्सर्वाननुभवतीत्यर्थः, भोक्तृसाहित्यपरत्वे तु भोक्तृजीवापेक्षया ब्रह्मणोऽप्राधान्यप्रसङ्गः, ततश्च ब्रह्मणः प्रकारित्वभङ्गप्रसङ्ग इति भावः । ननु भोग्वसाहित्येपि कामापेक्षयां ब्रह्मणोऽप्रादान्यप्रसङ्गः इति चेन्न, इष्टापक्षेः - विभागशक्तिमात्रेण स्वपरविज्ञानादेः-

४.४.५

निर्वाहायोगादिति - भेदोपि वक्तव्य इत्यर्थः । करणाधीनज्ञानत्वे सतीति - करणाधीनज्ञानत्वे सति उपरतकरणत्वं स्वपरस-म्बोधाभावे प्रयोजकं, मुक्ते करणाधीनमानत्वाभावात् ज्ञानाभावाभावः । न परस्परैक्यमिति चेदिति - सुषुप्ताविति शेषः। ननु न सूक्ष्मचित्तत्वात् भेदोऽभ्युपगम्यते, किन्तु तत्रापि शक्तिमात्रमेव भेदकमित्याशङ्कयाह - अचितश्शक्तिमात्रशेषत्वाभावादिति । नानावस्थत्वादिति - नानावस्थत्वतदभावरूपभेदकाकारसद्भावात् अचिदपेक्षया भेदसत्त्वेपि चिदीश्वरथोर्न भेद इति चेदित्यर्थः । असङ्कीर्णतया जानातीति न जगद्व्यापारप्रसङ्ग इति चेदिति - असङ्गीर्णतायधीश्चरज्ञानविषयतया भेदस्य प्रामाणिकत्वात् न जगद्व्यापारप्रसङ्ग इति भावः ।। * ।। ।। इति अविभागेन दृष्टत्वाधिकरणम् ।।

४.४.६

ऋष्टिद्वयपक्षापेक्षयेति - मतद्वयमध्ये अन्यतरपरिग्रह इत्यर्थः । स्वरूपं जडमिति - ननु जैमिनिमते ज्ञानमात्रस्वरूपत्वमात्मनो माभून्नाम्, अपहतपाप्मत्वादीनां सद्भावात्, न ह्येतावता आत्मनो जडत्वमङ्गीकृतमित्यत किञ्चित्प्रमाणमस्तीति चेन्न, अपहत-पाप्मत्वादेः ज्ञानस्वरूपत्वस्य चाभ्युपगमे सिद्धान्तादविशेषप्रसङ्गादिति भावः ।। * ।। कादाचित्कसुखराहित्यपरमिति - अत्र चोदयन्ति - यद्यकादाचित्कसुख इति श्रूयते, तदा नञः कादाचित्कसुखपदेन समासे कादाचित्कसुखराहित्यमर्थः स्यात्, नहि

४.४.७

अनीलो घटो यस्येति बहुव्रीहिसमासाश्रयणेन अनीलघय इति निर्घटो देशो वक्तुं शक्यत इति, अत एव सत्यसङ्कल्प इत्यस्य मोधेन सङ्कल्पेन रहित इतिवेत्युत्तरग्रन्थोप्ययुक्त इति चेत्, अत्र केचित्-सतीतिपृथक्पदं सप्तम्वन्तं, सति पृथिव्यादौ

वस्तुनि अकामः निष्काम इत्यर्थः । एवं सत्यसङ्कल्प इत्यदावपि द्रष्टव्यम्, इत्येवंरूपे निर्वाहे अस्य ग्रन्थस्य तात्पर्यमिति वदन्ति ।। * ।। तत्पूर्वपक्षी-

४.४.७

कृत्य हीति - नष्टस्य पुनरुन्मज्जनाभावादित्यर्थः । अन्यपरमिति व्याक्येयं पदं, जडाशव्यवच्छेद इत्यर्थः । भाष्ये स्वल्पोति प्रदेशो-स्तीति च्छेदः । परे त्वित्यादि - सर्वात्मभावेन स्थित एवेति । मुक्त इति शेषः - ध्रुवस्येति । विभागावधिभूतस्येत्यर्थः ।। * ।।

।। इति ब्राह्माधिकरणम् ।।

४.४.८

विज्ञानधन एवेतिवदयोगव्यवच्छेदपर इति - न च विज्ञानधन एवेत्यत्र कृत्स्नोष्यात्मा जडव्यावृत्तस्वप्रकाश इत्यादिना अन्य-योगव्यवच्छेदपरत्वस्य पूर्वसूत्रे प्रतिपादनात् तद्विरोध इति वाच्यम्, तस्य विशेषणसङ्गतैवकारत्वेन शङ्खः पाण्डुर एवेत्यत्र एवका- रस्य पाण्डुरत्वायोगवयवच्छेदकत्ववत् एतस्यापि विज्ञानत्वायोगव्यवच्छेदपरत्वेन ज्ञानत्वायोगे सर्वत्र व्यवच्छिन्ने तद्व्यतिरिक्त-जाड्यव्यवच्छेदस्य फलीभूतस्य प्रतिपादकतया तस्य ग्रन्थस्यान्ययोगव्यवच्छेदे तात्पर्याभावात्, भाष्ये-न च प्रयत्नान्तरसापेक्ष-त्वाभिधायीति, मुक्तसङ्कल्पस्य लौकिकसङ्कल्पवत् सङ्कल्पत्वेन यत्सापेक्षत्वानुमानम्, तत् नरशिरःकपालशौचानुमानवदाग-म्बाधितत्वात् न प्रतिरोधीत्यर्थः, इतरथा अगस्त्यादेः समुद्रपानादिवृत्तान्तो असत्यः स्यादिति भावः, नन्वियं चिन्ता वृथा, यथा मनोरथमात्रोपस्थापितापि स्त्री स्त्रैणानां चरमधातुविसर्गे हेतुः, एवं पित्रादयोपि अस्य सङ्कल्पोपस्थापिताः कल्पिष्यन्ते स्वकार्य-जननाय किमर्था सृष्टिरभ्युपेयते मैवं सन्ति हि कानिचिद्वस्तुस्वरूपसाध्यानि कार्याणि दंतक्षतमणिमालादीनि, कानिचित् तद्-

४.४.९

ज्ञानसाध्यनि, यथा उक्तानि चरमधादुविसर्गरोमहर्षादीनि, तत्र पित्रादेः मनोरथमात्रोपदीतत्वे ज्ञानमात्रसाध्यनि कार्याणि परं भविष्यन्ति, न तु वस्तुस्वरूपसाध्यानि, नहि स्त्रैणस्य रोमहर्षणादिबद्धवन्ति, स्त्रीवस्तुसाध्या दन्तक्षतमरिमालादयः, अतस्त-त्कार्यसकलभोगसिद्धयर्थं सृष्टिः कक्षकार्या ।। * ।। स्वर्गिणां कर्मफलभूतेष्विति - जक्षणादिष्विति शेषः, नहि स्वर्गिणां तिर- श्चां वा जक्षरादीनि पुण्यं पापं वा आर्जयन्तीति भावः । तथैव च श्रुत्याविधिनिषेधागोचरत्वञ्च ज्ञापितमित्यर्थ इति । यथा पीनत्वकल्प्यस्य रात्रिभोजनस्य पीनत्वोपपादकत्वं, एवं सत्यसङ्कल्पत्वकल्प्यस्याप्यनन्याधिपतित्वस्य तदुपपादकत्वे नानुपपत्ति- रिति भावः, अत एव "सूक्तवाकेन प्रस्तरं प्रहरति' इत्यत्र प्रस्तरप्रहरणस्यायागरूपत्वेन देवतासम्बन्धासम्भवात् देवताप्रकाशकस्य सूक्तवाकस्य तृतीयाश्रुत्या न तच्छेषत्वप्रतिपादनं सम्भवतीत्याशक्य तृतीयाश्रुत्यवगतसूक्तवाककरणत्वान्यथानुपपत्त्यैव सूक्तवाक-प्रतिपाद्यदेवतासम्बन्धेन यागरूपत्वं प्रस्तरप्रेरणस्य कल्प्यत इति प्रतिपादितमति भावः । ननु अपहपाप्मत्वस्य पूर्वं सिद्धतया एत-त्सूत्रव्यावर्त्यशङ्काया अनुत्थानमित्याशंक्याह - अपहतपाप्मत्वं नामेति । अत्रैव हि स्पष्टं दर्शितमिति - सूत्र इति शेषः । परे त्वित्यादि - अत एव सत्यसङ्कल्पत्वादेव न स्वामिनं सङ्कल्पात्सृजति स्वामिपारतन्त्र्ये स्वसत्यसङ्कल्पत्वविरोधप्रसङ्गात् अतो-

४.४.१०

ऽनन्याधिपति कुर्वन्तीत्यर्थः - दुःखहेतुविरहेणेति । यो यस्मिन्सुखदुःखे आपादयितुं निवर्तयितुं च प्रभवति स तस्याधिपतिरिति भावः - शेषलक्षणस्येति । प्रोक्षणादौ सुखदुःखापादननिवर्तनाक्षमस्यापि व्रीह्यादेः शेषित्वादिति भावः । ब्रह्मणो हि प्रतिष्ठाह- मिति - मुक्तस्य धारक इत्यर्थः ।। * ।। ।। इति सङ्कल्पाधिकरणम् ।।

भाष्ये-सङ्कल्पभेदेन सत्रमहीनञ्चेत्युक्तमयुक्तं, सत्रत्वाहीनत्वयोः आसीरनूयजतिचोदनानिबन्धनत्वेन सङ्कल्पभेदनिबन्धनत्वाभा- वात् इति न शंक्यम्, सङ्कल्पभेदेन सत्रमहीनञ्च भवतीति नान्वयः, येनायं दोषः स्यात्, किन्तु उपैदियजतिचोदनाभ्यां द्विरूपत्वे सिद्धे यस्य यादृक्प्रयोगेच्छा स तं प्रयोगमनुतिष्ठतीत्यर्थ इत्याह - सत्रत्वे अहीनत्वे चेत्यादिना । सङ्कल्पभेदेनेति भाष्यग्रन्थः, "प्रायणीयोतिरात्रः प्रथममहः, पृष्ठयः षडहः त्रयश्छन्दोमाः, अविवाक्यमेकमहः उदयनीयोतिरात्रश्चरममहः' इत्येवंरूपोऽहर्गणो द्वादशाहः, अविवाक्यमेकमहः उदयजतिचोदनाभ्यां सत्ररूपोऽहीनश्च, अहीने हि "एको द्वौ बहवो वाऽहीनेन यजेरन्' इति कतृसंख्यानियमाभावः, तथा २न दीक्षिता याजयेरन्' इति याजकेषु दीक्षितत्वप्रतिषेध सत्येवमादयो धर्मा व्यवस्थिताः, सत्रे "गृहपतिसप्तदशाश्चतुर्विंातिपरमाः स्वयमृत्विजो ब्राह्मणास्सत्रमुपेयुः' इति सप्तदशसङ्खयाया अन्यूनत्वनियमः, दीक्षितानामेव परस्परयाजकत्वमित्यादयो धर्मा व्यवस्थिंाः । ततश्च यथा द्विरूपत्वं द्वादशाहस्य, एव मुक्तस्यापि सदेहत्वं विदेहत्वं च प्रामा-रिकमित्येवं रूपद्वये प्रामाणिके सति यथेच्छावशेन अहीनसत्रान्यतरप्रयोगपरिग्रहः, एवं सङ्कल्पवशेन सदेहत्वविदेहत्वान्यतर-

परिग्रह इत्यर्थः ।। * ।। तदनुगुणप्रकारपरिकल्पनेनेति - मुक्तसङ्कल्पाभावेऽपि परमात्मसङ्कल्पात् देहादिसृष्टिरित्यर्थः, ततश्च पूर्वसूत्रे अतश्शब्दपरामृष्टस्य सङ्कल्पस्य मुक्ताश्रितत्वनियम इति भावः । सार्थमाहेति - तन्वभाव इति सूत्रार्थस्य "सङ्कल्पादेव तेच्छुत'रित्यधिकरणविरुद्धत्वात् स नाभिमत इति भावः ।। * ।।

प्रवर्तकत्वशक्तिविशिष्टेत्यर्थ इति - आत्माभिमानस्य प्रवृत्तिहेतुतया आत्माभिमानानुण्येन प्रवृत्त्यानुगुण्यमस्तीति आत्माभिमा-नानुगुणशब्देन प्रवृत्तिशक्तियुक्तत्वं लक्ष्यत इति भावः, आत्माभिमानस्य प्रवृत्तिहेतुत्वमुपपादयति । आत्माभिमानो हीत्यादिना - प्रकाशकत्वशक्तिरुक्तेति । घटपटादिवाह्यवस्तुप्रकाशनशक्तियुक्ता ज्ञानव्याप्तिरित्यर्थः ।। * ।।भाष्ये-सम्पत्तिश्च मरणमिति, प्रति-ज्ञातार्थोपपादकताया"वाङ्मनसि सम्पद्यते' इत्यारभ्य "तेजः परस्यां देवतायाम्' इत्यन्तो ग्रन्थः तदेकवाक्यतयाऽपि योजयितुं शक्यते, "वाङ्मनसि सम्पद्यते' इत्यारभ्य "तेजः परस्यां देवत्ताया'मिति वचनात्, तयोश्चावस्थयोः प्राज्ञप्राप्तिः निस्सम्बोधत्वञ्च विद्येते इत्युत्तरग्रन्थैकवाक्यतामभिप्रेत्याह - सता सोम्य तदा सम्पन्नो भवतीत्यदिभिरिति । पूर्ववाक्यैकवाक्यतामभिप्रेत्याह - ब्रह्मसम्पत्तिनिर्बोधत्वयोरित्यादिना । एवञ्च योजनाद्वयमपि भाष्यकृदभिमतमिति सूचितमिति द्रष्टव्यम्, "प्राज्ञेनाऽऽत्मना सम्परिष्वक्तः' इति वाक्ये ब्रह्मसम्पत्तिनिर्बाधत्वयोः श्रवणात् "आविष्कृतं ही'ति सूत्रखण्डेनापि द्वयमपि दर्शनीयमिति मत्वा

ब्रह्मसम्पत्तिश्रुतिश्चानुसन्धेयेति "अभावं बादरि'रिति सूत्रेण "मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके' इति श्रुतौ मन-सेतिविशेषणात् मुक्तस्य शरीरेन्द्रियाणामभावोऽवसीयते, यदि हि मनसा शरीरेन्द्रियैश्च विहरेत् तदा मनसेति विशेषणमनर्थकं स्यादिति व्याख्यातम्, "भावं जैमिनिविर्कल्पामननात्' इति सूत्रे शेषः "द्वादशाहवदुभयविधं

बादरायणोऽतः' इति सूत्रे अत इत्यस्य "मनसैतान् कामान्' इति श्रुतेः "स एकधा भवती'त्यादिश्रुतेश्चेत्यर्थ इति व्याख्यातम्, तस्याविरुद्धत्वात् तमशमुपेक्ष्य निराकर्तव्याशमाह - सङ्कल्पादेवेत्यादिना । न भोगानुपपत्तिरिति - पुष्कलभोगस्थानुपपत्तावपि मनोरथमात्रसाध्यस्वाप्न भोगवत् सूक्ष्मयोगो भवत्येवेत्यर्थः । शरीरेन्द्रियसद्भावे जाग्रद्वत्पुष्कलभोगः, तदभावे सूक्ष्मभोग इति तैर्वर्णितत्वादिति भावः । शरीरस्थितेरन्यथासिद्धत्वादिति - शरीरस्थितिमन्तरेणापि मनस्सिद्धिमात्रेण भोगस्य सिद्धत्वादित्यर्थः । केवलेश्वरप्रयत्नसृष्ट- त्वेति - यद्यपि जाग्रत्स्वप्नावस्थयोः द्वयोरपि स्वसृष्टभोगोपकरणसदसद्भावयोः सिद्धान्तेष्यविशेषात् "तन्वभावे सन्ध्यवत्' "भावे जाग्रद्वत' इति व्यवस्थया निर्देशे किं बीजं, "तन्वभावे' इत्यस्य स्वसृष्टतन्वभाव इत्यर्थकल्पनञ्च क्लिष्टमित्यापि परैस्सु- वचम्, तथापि उक्तदूषणे तात्पर्यम् । अभिप्रायाविरोधज्ञापनार्थ इति - ननु मुक्तस्य ब्रह्मानुभवे अन्यानपेक्षत्वेऽपि ब्रह्मा-नुभवान्योपकरणैरीश्वरसृष्टैर्भागान् मुक्तं इति "तन्वभावे' इति सूत्रे प्रतिपादनात् विरुद्धाभिप्रायत्वस्यैवाविष्करणात् कथमविरोध

४.४.१६

इति चेन्न, औदासीन्यदशायामपि भगवान् मुक्तान् भोगं प्रापयतीत्युकत्या विरुद्धाभिप्रायत्वानापपत्तेरिति भावः । तदधिकारव- शात्तदा विष्कृतं हीति - यत्र द्वितीयदर्शनाभावः प्रतिपाद्यते, "यत्र त्वस्य सर्वमात्मैवाभूत तत्केन कं पश्येत्' "यत्र सुप्तो न क्वचन कामं कामयते न कञ्चन स्वप्नं पश्यति' इत्यादौ तत्र सर्वत्र सुषुप्तिं वा कैवल्यं वा अधिकृत्यैव प्रवृत्तेः तद्विषयत्वमेव द्वितीय-दर्शनाभावस्येति भावः । नन्विदं त्रिधामवनादिक न कैवल्यविषयमित्यत आह - सगुणविद्याविपाक इति । अन्ये त्वित्यादि -भृत्यादिशरीरवृत्तेरपुरुषार्थत्वादिति । मुक्तिदशायां त्वभोगोपकरणत्वेन सृष्टमृन्यादिशरीरवृत्तेरित्यर्थः - ईश्वरानुमञ्चरणायेति । "कामान्नीकारूप्यनुसञ्चरन्' इति श्रुतिविहितेश्वरानुवर्तनायेत्यर्थः, भृत्यादिभावस्यानिष्टत्वात् स्वयमेवाहङ्कारकरणाभावश्चेदित्ये-कवाक्यम् ।। * ।। ।। इति अभावाधिकरणम् ।।

४.४.१७

भाष्ये-किं मुक्तस्यैश्वर्यमिति ईश्वरस्य कर्म ऐश्वर्यम् "गुणवचनब्राह्मणादिभ्यः कर्माणि च' इति कर्मणि श्यन्प्रत्ययः, राज्ञः कर्म राज्यं प्रजापरिपालनमितिवत्, ततश्चायमर्थः । किं मुक्तस्य ईश्वरसाम्यसाधम्यादिशब्दैः प्राप्तं यदीश्वाकृत्वं तत्परमपुरुषासाधारणं जगत्सृष्यिस्थितिसंहाररूपं सर्वेशनमपि भवति, उत परमपुरुषानुभवान्तर्गतशरीरसर्गादिविषयमिति, जगत्सृष्टयादिसर्वेश्वरत्वं परमपुरषोनूभवविषयमिति त्रीण्यपि व्याख्येयपदानि आत्माभिमानानुरूपत्वात्, यः स्वं स्वरूपं स्वातन्त्र्ययोग्यमिति मन्यते,

४.४.१७

तस्य स्वातन्त्र्यं पुरुषार्थः - पूर्वपक्षमुक्तेति । अयं भावः-न च "न तत्समश्चाभ्यधिकश्च दृश्यते' इति श्रुतिविरोधात् साम्यं केन- चिदेव रूपेणेति सङ्कोचनीयमिति वाच्यम्, साम्यश्रुतिविरोधात् तन्निषेधश्रुतिरेव संसारिषु ब्रह्मसाम्यनिषेधविषयेति सङ्कोचोपपत्तेः, अधिकारवाक्यावगतफलविरोधेन "को हि तद्वेद यद्यमुष्मिन् लोकेऽस्ति' इत्यादेरिव स्वावयवत्वकल्पनौचित्याच्च, अपि च सा- क्षादेव उपास्यगुणप्राप्तिः फलमवगम्यत, यथाक्रतुरित्यादिश्रुतौ, न च परब्रह्मण ऐश्वर्यमात्रमुपास्यम् । न तु निरङ्कुशं सर्वजगदैश्वर्यम्, अतो मुक्तस्य

स्वसङ्कल्पसृष्टकतिपयवस्त्वैश्वर्यसिद्धावपि तत्क्रतुन्याय उपपद्यत इति वाच्यं "सर्वस्य वशी सर्वस्येशानः' "कारणं तु ध्येयः सर्वैश्वर्यसम्पन्नः' इत्यादिश्रुतिषु निरङ्कुशसर्वैश्वर्यस्य उपास्यत्वावगमात्, किञ्च मुक्तस्य सर्वेषु लोकेषु कामसञ्चारः श्रूयते, न तस्य तत्तल्लोकगतफलभोगार्थत्वकल्पनं युक्तं, ब्रह्मानन्दमनुभवतोपि विषयान्तरलिप्येया सञ्चाराभ्युपगमे तस्य निरतिशयत्व-भङ्गापत्तेः, अतो मुक्तस्य नियमनादिलीलार्थ एव लोकसचारः, तस्मात् परमसाम्यतत्क्रतुन्यायसर्वलोकसञ्चारादिप्रतिपादनदर्शनात् मुक्तस्यापि परमेश्वरवत् सर्वजगत्सृष्ट्रत्वादिकमङ्गीकर्तव्यम्, न च यद्गुणप्राप्तिर्वदधीना, तस्य गुणस्ततो न्यूनः इति नियमोऽस्ति, गुरोविद्यामधिगतवतां शिष्याणं तद्वदेव व्याख्यातृत्वप्रबन्धनिर्माणादिदर्शनात्, दृश्यन्ते च सामन्ताः पार्थिवैश्वर्याधीनैश्वर्यबन्तः पार्थिवेन स्पर्धमानाः तं विजयमाना अपि, तदिह निरतिशयैश्वर्यत्वात्परमात्मनोर्मा नाम भूवंस्तदधिकाः, तत्समानास्तु भविष्य- न्त्येव, अतस्ते स्वतन्त्रास्सन्तः जगत्सर्गेऽपि प्रवर्तेरन् न च सृष्टयादिप्रकरणेषु परमात्मन एव सृष्टयादिव्यापारो न मुक्तानामिति वाच्यम्, श्येनप्रकरणे श्येनवत् इषुनामकक्रतोरसन्निहितत्वेपि "समाचमितरच्छ्येनेन' इति साम्यवचनात् तदीयवैशेषिकाङ्गा-नामिषाविव युक्तानां सर्वेश्वरसाम्यवचनात् तदीयसृष्टयादिव्यापाराणां तेषु सिध्युपपत्तेः । किञ्च आवामयनिकस्वरसाम-वैश्व-देव्यामिक्षा-द्यावापअथिव्यैककपालप्रकरणाम्नातानामपि प्रकरणान्तररम्नातस्वरसामवारुणैककपालमैत्रावारुण्यासिक्षाणां, साप्तदश्यादिलिङ्गैर्बलात् तदीयधर्मान्तरप्राप्तिवत्सर्वलोकादिसञ्चारादिलिङ्गबलान्मुक्तानामपि ऐश्वर्यजगद्व्यापारप्राप्त्युपपत्तेरिति, जगद्व्यापारवर्जमिति "द्वितीयायाञ्च' इति अमूल तत्र परीष्सायामित्येतत् प्रायिकमित्युक्तम्-"अनुदात्तं पदमेकवर्ज्यम्' इत्यत्र वृत्तिव्याख्यातृभिः । यद्वा जगद्व्यापारं वर्जयतीति जगद्व्यापारवर्ज्जम्, कर्मण्यण् ऐश्वर्यमिति विशेष्यम्, अत एवोत्तरत्र जग-द्व्यापारवर्ज्जत्वप्रसङ्ग इत्यादिनिर्देश उपपन्नः, णमुलन्तत्वे तु न भावप्रत्ययः स्यात्, रूपञ्चान्यथा स्यात्, भाष्ये मुक्तस्यैश्वर्यमिति, भवितुमर्हतीति शेषः । अतश्च धातुसम्बन्धविहितस्य णमुलो नानुपपत्तिः णमुलन्तत्वपक्षे इति द्रष्टव्यम्, भाष्ये-ततश्चेदं जगदीश्वरत्वरूपमिति, नन्वनाद्यन्तकल्पानुवृत्तसर्वप्रपञ्चजन्मादिकारणत्वं ब्रह्मलक्षणम्, मुक्तानान्तु स्वमुक्तिप्राचीनकालवर्तिप्रपञ्च-कर्तृत्वाभावात् न लक्षणत्वविरोधः इति चेन्न, जगत्सृष्टयादिषु वर्तमानानां मुक्तानामैकमत्यनियमाभावात् कस्यचित्सिसृक्षाया- मन्यस्य सञ्जिहीर्षापि कदाचिद्भवेदिति किमपि कार्यं न निर्वर्तेत, न च सर्वेपि परमात्माधीना एव ज्जगत्सर्गादौ प्रवर्तन्त इति

४.४.१८

एकमत्यमुपपद्यत इति वाच्यं, तर्हि तदधीनत्वेन तत्सान्याभाविन साम्यश्रुतेः सङ्कोचनीयत्वावश्यम्भावात् "भोगमात्रसाम्यलि- ङ्गाच्च' इति वक्ष्यमाणसूत्रन्यायेन भोगमात्रसाम्यमादायापि तुलाधृतयोस्सुवर्णशिलाशकलयोर्गुरुत्वसाम्येनाध्यत्यन्तसाम्यव्यव- हारवत् साम्यव्यवहारस्य जगत्कारणत्वमन्तरेणाप्युपपत्तेः न मुक्तस्य जगद्व्यापारप्रवृतिरिति भावः, न च तत्क्रतुन्यायविरोधश्श-ङ्कनीयः, कारणत्वविशिष्टस्य ब्रह्मणः प्राप्त्यवाङ्गीकारेण विरोधाभावात्, भाष्ये-तदेकं सन्नव्यभवदिति, तत-ब्रह्म, एकं-क्षत्रादि परिपालवितृत्वादिश्रून्यं, सन्नव्यभवत्-विभववन्नाभूत, कर्मणे न पर्याप्तमासीदिति वावत्, श्रेयोरूपं-प्रशस्तं रूपं, अत्यसृजत-अतिशयेन असृजत् देवत्रा-देवेष्वित्यर्थः, क्षत्राणि-क्षत्रियाणीत्यर्थः, कानि पुनस्तानि क्षत्रियाणीत्यत्राह - इन्द्रो वरुह्य इत्यादि । कन दीप्ताविति धातुरिति - "कन दीप्तिकान्तिगतिषु' इत्यस्माद्भौवादिकात् ण्यत्प्राप्तः "कन्यायाः कनीन च' इति निर्देशान्न भवति, अपि तु यदेव भवति ।। * ।।

४.४.२०

सर्वत्र कामचारादयो भवन्तीति - हर्षोद्रकात्, "एतत्सामगायन्नास्ते हाउ हाउ हाउ' इत्यादि श्रुतिप्रतिकपन्नसामगानवत् हर्षो-द्रेकाद्यथेष्टं सञ्चरत इत्यर्थः, तथाच "उपस्थितेऽतस्तद्वचनात्' इत्यत्र ब्रह्मोपसम्पत्तिः कामचारे हेतूकृता, अत एव निवृत्ततिरो- धानस्य मुक्तस्य परमव्योमनिलयमस्यैव सर्वविभूतियुक्तब्रह्मानुभवसम्भवात्, सञ्चरणं वृथेति शङ्कापि पराकृता, हर्षेद्रिेकप्रयुक्त- चेष्टायाः प्रयोजनोद्देशप्रवृत्तत्वाभावात् लब्धसविभूतिकब्रह्मानुभवस्थापि चक्षरादीन्द्रियजन्यसाक्षात्कारादिलिप्सया शरीरान्त-रपरिग्रहयथेष्टस्श्चाराद्युपपत्तेः, अत्र विकारावर्तीति ब्रह्म निर्दिशतस्सूत्रकृतोऽयम्भावः, अपक्षयविनाशशून्यब्रह्मानुभवरूपस्या- नन्दस्य न वृद्धिह्रासौ, सततैकरूपत्वात्, ईदृशं ब्रह्मानुभवतो मुक्तस्य नाऽवाप्तव्य आनन्दोऽन्योस्ति, येन ब्रह्मानुभवस्य आधि-कारिकमण्डलस्थभोगापेक्षया न्यूनता कल्प्येतेति ।। * ।।

४.४.२१

ननु "सह ब्रह्मणा विपश्चिता'इत्यस्य भोग्यसाहित्यपरत्वेन भोगसाम्ये प्रमाणीकरणासम्भवात् सत्याशङ्कय भोगसाम्यरूपसायु-ज्यप्रतिपादकश्रुतिवाक्यान्युदाहरति । स एवंविदित्यादि - "पृथिव्यै चैनमग्नेश्च देवी वागाविशति सा वै देवी वाग्यया यद्यदेव

४.४.२२

वदति तवद्भवति दिवश्चैनमादित्याञ्च दैवं मन आविशति तद्वै दैवंय मनो येन आनन्द्येव भवति अथ न शोचति अद्भयश्चैनं चन्द्र- मसो दैवः प्राण आविशति स वै दैवः प्राणो यस्सञ्चरंश्चासञ्चरंश्च न व्यथते न रिष्यति' इति प्रावप्रस्तुतदैववाङ्ग्न:प्राणविज्ञानस्य फलमुच्यते । "स एवंवित् सर्वेषामात्मा भवति यथैषा दैवतैवं स यथैता देवतास्सर्वाणि भूतानि भवन्ति एवं हैवंविदं सर्वाणि भूता-न्यवन्ति' इति, आत्मा भवति-आत्मवत्पूज्यो भवति, अवन्ति-पालयन्ति तपर्यन्ति, "तेनो एतस्यै देवतायै सायुत्यं सलोकतां जयति' इति, तेन-यथोक्तज्ञानेन एतस्या देवतायाः सायुज्यं स लोकताञ्च प्राप्नोतीत्यर्थः। यद्यष्युदाहृतवाक्यानां न ब्रह्मविद्विष- यत्वं तथापि तुल्यन्यायतया ब्रह्मविद्विषयेपि भोगसम्ये लिङ्गतया पर्यवस्यतीति भावः ।। * ।।

एतदैकार्थ्यं स्यादित्यभिप्रायेणेति -"पुनर्जन्म न विद्यते' इत्यत्र ब्रह्मणि दुःखालयत्वादिविशिष्टजन्मनिषेधे पर्यवस्यतीति भावः - अनेनावृत्तिरिति । जन्म सत्वेपि हेयास्पदजन्मनिषेध इत्यभ्युपगमन्यायेन पुनरावृत्तिसत्वेपि हेयास्पदावृत्तिर्नास्ति, अपि तु काम-

४.४.२२

निर्मिति एव सञ्चार इति भावः, स्वेच्छा वा कर्म वा-इत्यस्यायम्भावः, मुक्तानां प्राक्तनपुण्यपापयोः विद्यामाहात्म्यान्नाशेषि मुक्ति-काले कृतभगवद्रोहादिपापवशेन नहुषादेः पदच्युतिवत् अस्यापि पदच्युतिस्सम्भाव्यत इति । सवितृमण्डलादिस्थानेषु भोगोक्ते- रिति - सवितृमण्डलादिगतपरमात्मोपासनायत्तैश्वर्यत्वात् इतरेषां न निरवग्रहं मुक्तानामैश्वयमित्यर्थः - किमर्थं सूथद्वयमिति चेदिति । सूत्रद्वयस्य कोऽभिप्राय इति चेदित्यर्थः - निर्विकारप्राप्तिरुपपन्नेति । अयमर्थः-यथा सगुणब्रह्मोपासकानां सगुणे ब्रह्मणि वस्तुगत्या सदपि विकारावर्तित्वरूपं न प्राप्यम्, अतत्क्रतुत्वात्, एवं सगुणे ब्रह्मणि स्थितमपि निरवग्रहैश्वर्यं सगुणोपास-कानां न प्राप्यम्, । अतत्क्रतुत्वात्, सत्यकामत्वादिलक्षणैश्वर्यस्योपास्यत्वेपि निरवग्रहैश्वर्यविशिष्टं उपासीतेति श्रुत्यभावेन निरव-

४.४.२२

-ग्रहत्वांशस्थानुपास्यतया तत्प्राप्त्यभावात् न निरवग्रहैश्वर्यं सगुणोपासकस्येति । निर्गुण प्राप्तावावृत्तिशङ्काया अभावादिति - ततश्च सगुणप्राप्तिविषयमेवेति भावः- अन्ये त्वित्यादि । चर्त्मान्तरे पुनरावत्तिरिति - नचैयम्, इतिशब्दवैयर्थ्यमिति शङ्कनीयम्,

४.४.२२

अनेकार्यास्पदत्वसूत्र त्वेन तत्साफल्यात् । मुक्तप्राप्यत्वायोगादिति - यद्यपि यादवमते "आप्नोति स्वाराज्य'मित्यस्य न मुक्त-विषयत्वम्, तथापि स्वाराज्यपदस्वारस्यात् मुक्तविषयत्वमभिप्रेत्य एतद्दूषणमुक्तमिति द्रष्टव्यम् । भाष्योक्ताशेषार्थपरामर्शीति - अशेषार्थहेतुत्वपरामर्शीत्यर्थः । सर्वं समञ्जसमित्येतत् उक्तमिति पदाध्याहारेण उक्तं सर्वं समञ्जसमिति व्याख्याय सर्वशब्दस्यानु-दाहृतश्रुत्यादिपरत्वमभिप्रेत्य द्रष्टव्यपदाध्याहारेण व्याचष्टे । सर्वशब्देनानुदाहृतेति - ननु परोक्तबाधकप्रमाणतर्काणां भाष्येऽ-नुपन्यस्तानां परिहारप्रकारस्याप्रदर्शितत्वात् कथं सर्वसामञ्जस्यं द्रष्टव्यं स्यादित्याशङ्कयाह - उक्तार्थबाधकत्वेनेति । भाष्योप-न्यस्यैरेव न्यायौः परोत्प्रेक्षितानानुत्प्रेक्षिष्यमाणानाञ्च प्रमाणतर्काभासानां परिहारस्सुगम इति भावः ।। * ।।

।। इति जगद्व्यापारवर्जाधिकरणम् ।।

।। इति तादार्थचरणारबिन्दचश्चरीकैः वात्स्यानन्तार्यसेवासमधिगतशरीरकमीमांसाभाष्यहृदयैः परकालमुनिकअपालब्धपारमहंस्यैः श्रीमद्दशोपनिषद्भाष्यकारैः श्रीरङ्गद्रामानुजमुनिभिर्विर-चितायां श्रुतप्रकाि◌ाकाव्याख्यायां भावप्रकाशिकायां चतुर्थस्याध्या-यस्य चतुर्थः पादः ।।

समाप्तच्चाध्यायः ।

समुदितधिकरणसङ्ख्या - १५६ - समुदितसूत्रष्टदृल्वा - ५४४ ।।